Q!414:23 8513
15N6S

Sah Dev, Pratap Sinh
Purascaryarnava.

Q:414:23
15N65

8513

S.J.V.J. PRATISHTHAN
LIBRARY
Jangamawadimath, Varanasi

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

❉ ❉ ❉ ❉ ❉

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

॥ श्रीः ॥

व्रजजीवन प्राच्यभारती ग्रन्थमाला
१०

श्री ५ नेपालमहाराजाधिराज-
प्रतापसिंहसाहदेवविरचितः

पुरश्चर्यार्णवः

(तन्त्रशास्त्रानुसारि-विधान-पद्धति-निरूपणात्मकः)

सम्पादकः
स्व० पण्डितमुरलीधरझा महोदयः
काशिक-राजकीय-प्रधान-संस्कृतपाठशालायां ज्यौतिषशास्त्राध्यापकः

प्रस्तावनालेखकः
आचार्य-श्रीशेषराजशर्मा 'रेग्मीः'

ज्ञाने सर्वं प्रतिष्ठितम्

चौखम्बा संस्कृत प्रतिष्ठान
३८ यू० ए०, जवाहरनगर, बंगलो रोड,
दिल्ली ११०००७

प्रकाशक—
चौखम्बा संस्कृत प्रतिष्ठान
(प्राच्यभारती के प्रकाशक एवं वितरक)
३८ यू. ए., जवाहरनगर, बंगलो रोड
दिल्ली ११०००७

Q:414:23
15N6B

पुनर्मुद्रित संस्करण
१९९९
मूल्य १०००-००

अन्य प्राप्तिस्थान—
चौखम्बा सुरभारती प्रकाशन
के० ३७/११७, गोपालमन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१

*

प्रधान वितरक—
चौखम्बा विद्याभवन
चौक (बनारस स्टेट बैंक भवन के पीछे)
पो० बा० नं० १०६९, वाराणसी २२१००१

S.J.V.J. PRATISHTHAN
LIBRARY
Jangamwadimath, Varanasi

RI JAGADGURU VISHWARADH
ANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8513

मुद्रक—
श्रीजी मुद्रणालय
वाराणसी

THE
VRAJAJIVAN PRACHYABHARATI GRANTHAMALA
10

PURAŚCARYĀRṆAVA

OF

His Majesty Shri Pratap Sinh Sah Dev
King of Nepal

(A treatise dealing with Theory & Practice of Tantric Worship)

Edited by
Late Pt. Muralidhar Jha
Professor of Astronomy, Govt. Sanskrit College, Benares.

Introduction by
Acharya Shesharaj Sharma 'Regmi'

ज्ञाने सर्वं प्रतिष्ठितम्

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U. A., Jawaharnagar, Bungalow Road,
DELHI 110007

© CHAUKHAMBA SANSKRIT PRATISHTHAN
(Oriental Publishers & Distributors)
38 U. A., Jawaharnagar, Bungalow Road
DELHI 110007

S.J.V.J. PRATISHTHAN
LIBRARY
Jangamawadimath, Varanasi
Acc. No

Also can be had of
CHAUKHAMBA SURBHARATI PRAKASHAN
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
VARANASI 221001

*

Sole Distributors
CHOWKHAMBA VIDYABHAWAN
CHOWK (Behind The Benares State Bank Building)
Post Box No. 1069
VARANASI 221001

प्रस्तावना

इष्टाऽर्थदं प्रथिततन्त्रपदाऽभिधानं
शास्त्रं किलाऽस्ति निगमागमकादिभेदम् ।
वक्ष्येऽहमद्य तदनूद्य विकीर्णतत्त्वं
सन्तोषमावहतु येन सदन्तरात्मा ॥ १ ॥

अयेऽमरभारतीमनोरमारामसञ्चरणपरायणा निगमागमप्रतिपादितसुकृताचरणपरा विलक्षणधिषणापरिपूरिताऽन्तःकरणा विचक्षणवरा महानुभावाः !

इह खलु चित्रतमे वैरिञ्चे प्रपञ्चे बहुलकालयापनतोऽप्यनासादिताऽभिमताऽभ्युदय-निःश्रेयसा मुहुर्मुहुर्दुःखवात्याताडिताः पञ्चजना जननमरणादिनानाविधदुःसहभोगाऽवाप्त्या सततमपि यातायातक्रमं कुर्वन्ति सीदन्ति चेति को हि सचेता न चेतति । अभ्युदयो निःश्रेयसं चेति द्वितयमपि शास्त्रप्रतिपादितकर्मायत्तम्, शास्त्रं च द्विविधं—निगम आगमश्च । निगमपदं च प्रायेण वेदवाचकमागमपदं च बाहुल्येन तन्त्रप्रतिपादकम् ।

परं तन्त्रशास्त्राऽनुरोधेन निगमागमरूपं द्विविधमपि तद्भेदपरिगणितम् । न केवलमेतत्प्रत्युत यामलडामरादिकं च तन्त्रप्रकारे प्रथितम् ।

तत्र खलु तन्त्रग्रन्थाः प्रायेण वैष्णवानां संहितारूपेण, शैवानामागमरूपेण शाक्तानां तन्त्रनाम्ना प्रयुज्यन्ते ।

तन्त्रपदं 'तनु विस्तारे' इति धातोरौणादिकात् ष्ट्रन्प्रत्ययतो निष्पाद्यते । यद्वा 'तन्त्रि धारण' इति धातोस्तन्त्र्यते धार्यतेऽभ्युदयो निःश्रेयसं चाऽनेनेति व्युत्पत्त्या घञ्प्रत्ययतो विधीयते ।

तन्त्रपदं सामान्यतः शास्त्ररूपेऽर्थेऽपि प्रयुज्यते, यथा सांख्यशास्त्रं 'कपिलतन्त्र'मिति 'षष्टितन्त्र'मिति वा, योगशास्त्रं 'पतञ्जलितन्त्रम्' अनयैव विधया न्यायशास्त्रं 'गोतमतन्त्रं' मीमांसादर्शनं 'पूर्वतन्त्रं' वेदान्तदर्शनम् 'उत्तरतन्त्र'मिति व्यपदिश्यते ।

भगवत्पादैः शङ्कराचार्यैर्बौद्धानां क्षणभङ्गवादस्य कृते 'वैनाशिकतन्त्र'मिति पदं प्रयुक्तम् । इत्थमेव षड्दर्शनव्याख्याताऽऽचार्यो वाचस्पतिमिश्रः 'सर्वतन्त्रस्वतन्त्र' इत्युपाधिना विभूषित आसीत् ।

तन्त्रलक्षणम्—

कालिकाऽऽगमतन्त्रे तन्त्रपदस्य व्युत्पत्तिगर्भं लक्षणं यथा—

तनोति विपुलानर्थांस्तन्त्रमन्त्रसमन्वितान् ।
त्राणं च कुरुते यस्मात्तन्त्रमित्यभिधीयते ॥ इति ।

वाराहीतन्त्रे तन्त्रस्य सविशेषं लक्षणं यथा—

सर्गश्च, प्रतिसर्गश्च, मन्त्रनिर्णय एव च ।
देवतानां च संस्थानं, तीर्थानां चैव वर्णनम् ॥

तथैवाश्रमधर्मश्च, विप्रसंस्थानमेव च ।
संस्थानं चैव भूतानां, मन्त्राणां चैव निर्णयः ।।
उत्पत्तिर्विबुधानां च, तरूणां कल्पसंज्ञितम् ।
संस्थानं ज्योतिषां चैव, पुराणाख्यानमेव च ।।
कोषस्य कथनं चैव, व्रतानां परिभाषणम् ।
शौचाऽशौचस्य चाख्यानं, नरकाणां च वर्णनम् ।।
हरचक्रस्य चाख्यानं, स्त्रीपुंसोश्चैव लक्षणम् ।
राजधर्मो दानधर्मो युगधर्मस्तथैव च ।।
व्यवहारः कथ्यते च, तथा चाऽध्यात्मदर्शनम् ।
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ।।

तन्त्रश्लोकसंख्या—

दिवि देवि ! नवलक्षं. पाताले ब्रह्मशासने ।
लक्षमात्रं भारते च क्षितौ तन्त्राणि यानि च ।।

चतुःषष्टिसंख्यानि तन्त्राणि—

शिवोक्तानि सिद्धीश्वरादीनि चतुःषष्टिसंख्यानि तन्त्राणि ।

तत्र कानिचित्प्रख्यातानि तन्त्राणि नामतो निर्दिश्यन्ते । तानि यथा—कुब्जिकातन्त्रं, कात्यायनीतन्त्रं, प्रत्यङ्गिरातन्त्रं, त्रिपुरार्णवतन्त्रं, योगिनीतन्त्रं, वाराहीतन्त्रं, ज्ञानार्णवतन्त्रं, दक्षिणामूर्तिसंहितातन्त्रं चेति ।

तन्त्रप्रशंसा—

विष्णुर्वरिष्ठो देवानां, ह्रदानामर्णवो यथा ।
नदीनां च यथा गङ्गा, पर्वतानां हिमालयः ।।
अश्वत्थः सर्ववृक्षाणां, राज्ञामिन्द्रो यथा वरः ।
देवीनां च यथा दुर्गा, वर्णानां ब्राह्मणो यथा ।।
तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम् ।
सर्वकामप्रदं पुण्यं तन्त्रं वै वेदसम्मितम् ।।
कीर्तनं देवदेवस्य हरस्य मतमेव च ।
पावनं श्रद्दधानानामिह लोके परत्र च ।। इति ।

तन्त्राणां क्षिप्रसिद्धिप्रदत्वं कलियुगे च तेषां वैशिष्टयम्—

आर्यधर्मस्य ह्रासमये वैदिकधर्मस्य जटिलत्वेन दुष्करत्वात्सौकर्याऽनुरोधेन तन्त्राचारप्रचार इत्यर्वाचीनानां विचारः । वस्तुतः कलौ क्षिप्रसिद्धिकारित्वेन तन्त्राचाराऽनुष्ठानं तद्यथा रुद्रयामले—

कृते श्रुत्युक्तमार्गः स्यात्, त्रेतायां स्मृतिभाषितः ।
द्वापरे वै पुराणोक्तः, कलावागमसम्भवः ।। इति ।।

तत्रैव—

आगमोक्तविधानेन कलौ देवान्यजेत्सुधीः ।
न हि देवाः प्रसीदन्ति कलौ चाऽन्यविधानतः ।।
पञ्चवर्णैर्भवेद्दीक्षा ह्यागमोक्तैः शृणु प्रिये !
यां कृत्वा कलिकाले च सर्वाऽभीष्टं लभेन्नरः ।। इति ।।

तन्त्रप्रामाण्यम्—

साम्प्रतमुपलब्धानां तन्त्राणां वेदवत्प्राचीनत्वाऽभावेऽपि तत्रत्यानि तत्त्वान्यतिपुरातनानि । वस्तुतो वेदस्य तन्त्रस्य च मिथो न विरोधः, प्रत्युतोभयत्रोभयमतस्य सम्मिश्रणमवलोक्यते ।

तन्त्रमतमथर्ववेदस्य सौभाग्यकाण्डात्प्रादुर्भूतमिति बहूनां विपश्चितां निश्चयः ।

श्रीमद्भागवते भगवता श्रीकृष्णेनोद्धवमुद्दिश्य—

वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः ।
त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ।। ११-२७-७
एवं क्रियायोगपथैः पुमान् वैदिकतान्त्रिकैः ।
अर्चन्नुभयतः सिद्धिं मत्तो विन्दन्त्यभीप्सिताम् ।। ११-२७-४९

इत्थं तन्त्रस्य वेदसम्मितत्वमुररीकृतम् ।

महर्षिर्हारीतोऽपि स्वकीयस्मृतौ—

'अथाऽतो धर्मं व्याख्यास्यामः । श्रुतिप्रमाणको धर्मः । श्रुतिश्च द्विविधा—वैदिकी तान्त्रिकी चेति ।'

इति तन्त्रं श्रुतिभेदरूपेण प्रदर्शितवान् ।

कालीकुलाऽर्णवतन्त्रे प्रारम्भ एवाऽस्येत्थं सङ्केत उपलभ्यते, यथा—'अथाऽत आथर्वणसंहितायां देव्युवाच ।' इति ।

रुद्रयामलतन्त्रस्य पञ्चमपटले महादेवी 'अथर्ववेदशाखिनी'तिपदेन परिकीर्तिता ।

उपनिषत्स्वपि यत्र तत्र तन्त्रमतं पर्याप्तरूपेणाऽनुस्यूतम् ।

पण्डितदामोदरनिर्मितस्य यन्त्रचिन्तामणिग्रन्थस्य भूमिकायामपि तन्त्रमथर्ववेदस्य सारभूतमिति प्रशंसितम् ।

एवं च महानैयायिको जयन्तभट्टः स्वकीयन्यायमञ्जरीग्रन्थे बहुविधयुक्तिप्रत्युक्तिभिरागमप्रामाण्यं समर्थितवान् ।

अकुण्ठप्रतिभः शैवाचार्यकण्ठीरवो नारायणकण्ठोऽपि मृगेन्द्रसंहिताया व्याख्यायां वेदवदागमप्रामाण्यमाख्यातवान् ।

महाभारतस्याऽनुशासनपर्वणि चागमशास्त्रं वेदमूलकमिति वर्णितम् ।

इत्थं पूर्वप्रदर्शितया प्रमाणपरम्परयाऽऽगमग्रन्था वेदतुल्या वेदमूलका वेत्यत्र राद्धान्ते न काऽपि विप्रतिपत्तिरिति प्रतीतप्रतिपत्तिभिः स्वीकरणीयमिति सिद्ध्यति ।

तन्त्रभेदाः—

चतुःषष्ट्यागमाः प्रोक्ताः, पञ्चधा निगमास्तथा ।
यामलं च चतुर्धोक्तं, डामराः षड्विधास्तथा ।। इति । रुद्रयामलम् ।

तन्त्रग्रन्थभेदाः—

तच्च तन्त्रशास्त्रं क्वचिदागमरूपेण कुत्रचिच्च संहितारूपेण संग्रथितमालोक्यते। वैष्णवतन्त्राणि संहितारूपेण, शैवानामागमरूपेण शाक्तानां तन्त्ररूपेण प्राप्तरूपाणि तन्त्राणि।

अष्टाविंशतिसंख्यकानामागमानामुल्लेखो दृश्यते। संहितासु च पञ्चरात्रसंहितादयोऽष्टोत्तरशतसंख्यका निशाम्यन्ते यत्र द्वादशसंख्यका एव मुद्रिताः। तत्राऽहिर्बुध्न्यसंहिताऽतिप्राचीनेति श्रूयते।

आगमाः—

आगमशब्दाऽर्थो यथा रुद्रयामले—

आगतः शिववक्त्रेभ्यो गतश्च गिरिजामुखे।
मग्नस्तस्या हृदम्भोजे तस्मादागम उच्यते॥

विषयगर्भमागमलक्षणम्—

सृष्टिश्च, प्रलयश्चैव, देवतानां तथाऽर्चनम्।
साधनं चैव सर्वेषां, पुरश्चरणमेव च॥
षट्कर्मसाधनं चैव, ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्तमागमं तद्विदुर्बुधाः॥

दाक्षिणात्या विद्वांसोऽष्टाविंशतिसंख्यकानागमानुल्लिखन्ति। एषु शैवागमा दश, रुद्रागमाश्चाऽष्टादशसंख्यकाः ख्याताः। आगमा एते सिद्धान्तागमरूपेण प्रथितिं प्राप्ताः। एतदतिरिक्ता भैरवागमाश्चतुःषष्टिसंख्यकाः। एते सर्वेऽपि मूलरूपेण शैवागमा एव। अत्र शाक्तागमाश्चांशिकरूपेण मिश्रिताः। एषु द्वैतभावादारभ्य परमाऽद्वैतभावं यावच्चर्चा वर्तते।

आगमग्रन्थेषु साधारणतश्चत्वारः पादाः। ते यथा—ज्ञानपादो योगपादश्चर्यापादः क्रियापादश्चेति।

निगमलक्षणम्—

निर्गतः शङ्करीवक्त्राद्, गतश्च गिरिशानने।
मतः श्रीवासुदेवस्य तस्मान्निगम उच्यते॥ (रुद्रयामलम्)

यामललक्षणम्—

सृष्टिश्च ज्योतिषां ध्यानं नित्यकृत्यप्रदीपनम्।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च॥
युगधर्मस्य संघातो यामलस्याऽष्टलक्षणम्।

यामलभेदाः—

आदियामलं, ब्रह्मयामलं, विष्णुयामलं, रुद्रयामलं चेति।

डामरलक्षणम्—

शिवोक्तस्तन्त्रविशेषो डामरः।

डामरभेदाः—

योगडामरः, शिवडामरो, दुर्गाडामरः, सारस्वतडामरो, ब्रह्मडामरो, गन्धर्वडामरश्चेति। (वाराहीतन्त्रम्)

आचारदृष्टया तन्त्रभेदाः—

आचारदृष्टया पुनस्तन्त्राणि त्रिविधानि—समयाचार-कुल-मिश्रकभेदात् । वैदिकमार्गमनुरुध्य श्रीविद्यादिप्रतिपादकानि तन्त्राणि समयाचारनामधेयानि । तानि च वशिष्ठसंहिता, सनकसंहिता, सनन्दनसंहिता, सनत्कुमारसंहिता, शुकसंहिता चेति व्यपदेशभाञ्जि पञ्चसंख्यानि । समयाचारस्याचारपद्धतिर्दक्षिणमार्गनाम्ना प्रथिता । तथा चाऽत्र सात्त्विकपदार्थैर्भगवत्याः सपर्याऽऽचर्यते ।

कुलतन्त्राणि महामायाशम्बराद्यभिधानानि चतुःषष्टिसंख्यकानि शिवप्रोक्तानि विद्यन्ते । एषु मद्यमांसादिभिरुपचारैर्देवी समर्च्यते । एवं च समयाचारं कुलतन्त्रं चेति द्वितयमनुसृत्य प्रवर्तितानि तन्त्राणि मिश्रकनाम्ना प्रसिद्धानि । कुलतन्त्रमनुसृत्यैव वामाचारो वाममार्गः प्रचलितोऽस्तीत्यवगम्यते । श्रुतिस्मृतिनिषिद्धाचारप्रतिपादकत्वात्कुलतन्त्रेषु मिश्रकतन्त्रेषु च त्रैवर्णिकानां नाऽधिकारः । अत एव ज्ञानार्णवतन्त्रे भगवता शङ्करेण भगवतीं गौरीमुद्दिश्य—'कौलमिश्रकमार्गौ हि हेयौ गौरि ! द्विजातिभिः ।' इति स्फुटमभिहितम् ।

उपासनीयदेवानां तन्त्रभेदाः—

उपासनीयदेवताऽनुसारेण पुनस्तन्त्राणि सामान्यतः पञ्चधा विभक्तानि । तानि यथा—शाक्तानि, शैवानि, सौराणि, गाणपत्यानि वैष्णवानि चेति । शाक्ततन्त्रस्य प्रधानग्रन्था आगमा अवगताः । अगस्त्यमुनिनिर्मितं शक्तिसूत्रमेषामुपजीव्यग्रन्थत्वेन परिकीर्तितम् ।

दार्शनिक-तन्त्रप्रस्थानानि—

एवं च दार्शनिकं सिद्धान्तमनुसृत्य तन्त्राणां प्रस्थानत्रितयम्—तद्यथा—अद्वैतं, द्वैतं, द्वैताऽद्वैतं चेति । तत्र शाक्ततन्त्रमद्वैतपरम् । शैवतन्त्रं द्वैतपरमद्वैतपरं च । वैष्णवतन्त्रं तु द्वैतपरमेव ।

शाक्ततन्त्रेषु उपासनीया देवताः—

शाक्ततन्त्रेषूपासनीया देवताः प्रधानरूपेण दश महाविद्याविदिताः । ता यथा—

काली, तारा, महाविद्या, षोडशी, भुवनेश्वरी ।
भैरवी, छिन्नमस्ता च, विद्या धूमावती तथा ॥
बगला, सिद्धविद्या च मातङ्गी, कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्तिताः ॥ (चामुण्डातन्त्रम्)

भगवद्विष्णोरवतारदशकं च दशानां महाविद्यानां रूपान्तरमिति तन्त्रशास्त्रेषु सङ्केतितम् ।

आसु दशसंख्यकासु महाविद्यासु भगवत्याः काल्यास्तारायाः षोडश्याश्च प्राधान्यम् । तत्राऽपि भगवत्याः श्रीषोडश्याः प्रमुखता वरीवर्ति ।

आसां क्रमदीक्षाऽपि प्रचलति । तिसृभ्यो महाविद्याभ्योऽतिरिक्तानां महाविद्यानां स्वतन्त्रग्रन्था न्यूना एव परं तासां पूजापद्धतिर्यत्र तत्रोपलभ्यते ।

शाक्ततान्त्रिकाणां मतद्वयं—कौलमतं समयाचारमतं च ।

चतुःषष्टिसंख्यानि तन्त्राणि कौलानां प्रधानग्रन्थाः ।

प्रमुखमहाविद्यात्रितयभेदादिकम्—

सम्प्रति तिसृषु महाविद्यासु केचिज्ज्ञातव्या विषयाः प्रदर्श्यन्ते । तत्र काल्या दक्षिणकाली भद्रकाली चेति बहवः प्रकाराः । दक्षिणाम्नायदेवी काल्युत्तराम्नायदेवी श्मशानकालीत्युल्लेखो निभाल्यते । एतदतिरिक्ताः—कामकलाकाली, धनकाली, सिद्धकाली, चण्डीकाली चेत्यनेके भेदाः । काल्या भैरवो महाकाल इति प्रसिद्धः । कालीविषये कालीतन्त्रं, महाकालसंहिता, श्यामारहस्यं परतन्त्रं चेति बहवो ग्रन्थाः । ताराविषये तारारहस्यं, ताराभक्तिसुधार्णवस्तारणीतन्त्रं तोडलतन्त्रं, नारायणभट्टकृता ताराकल्पलतापद्धतिरित्यनेके ग्रन्थाः ख्यातिमुपगताः ।

षोडशी, त्रिपुरसुन्दरी, ललिता, श्रीविद्या, त्रिपुरा, कामेश्वरी चेति सर्वा अपि श्रीषोडश्या एव नामान्तराणि । षोडश्या भैरवः कामेश्वरस्त्रिपुरभैरवो वा सम्मतः । दशसु महाविद्यासु षोडश्या एव प्रधानता सर्वसम्मता ।

श्रीविद्यासम्प्रदाये सूत्रं, भाष्यं दर्शनादिकं च, तथाऽऽचारपद्धतौ च बहवो ग्रन्था उपलभ्यन्ते । कामराजोपासिता विद्या कादिविद्या, लोपामुद्रोपासिता विद्या हादिविद्या चेति श्रीविद्यायाः सम्प्रदायद्वयम् ।

श्रीविद्याविषयकग्रन्थाः—

ब्रह्माण्डपुराणे त्रिपुरारहस्ये च श्रीललितादेव्याश्चरित्रं विस्तरेण वर्णितम् । ब्रह्माण्डपुराण एव ललितासहस्रनामानि, ललितात्रिशती चेति बहूनि स्तोत्राणि समुपलभ्यन्ते । ललितासहस्रनामसु तन्त्रभास्करस्य भास्कररायस्य वृहती व्याख्या, ललितात्रिशत्यां च शङ्कराचार्यस्य भाष्यं प्राप्यते । परं तस्मिन्भाष्ये प्रथमशङ्कराचार्यकर्तृत्वं नेति प्रतीयते । एवं च वामकेश्वरतन्त्रे परमप्रथितं देवीखड्गमालास्तोत्रं समुपलभ्यते यत्र शुक्लप्रतिपद आरभ्य प्रतिदिवसपञ्चकं शक्तेः, शिवस्य, शक्तिशिवयोः स्तोत्रपाठक्रम एवं च कृष्णप्रतिपद आरभ्य प्रतिवासरपञ्चकं विपरीतक्रमेण शक्तिशिवयोः, शिवस्य, शक्तेश्च पाठक्रमोऽनुष्ठीयते । अस्य मद्रासदेशे प्रचाराऽतिशयः ।

इत्थमेव महर्षेर्दुर्वाससस्त्रिपुरमहिम्नस्तोत्रं, गौडपादाचार्यस्य श्रीविद्यारत्नसूत्रं सुभगोदयस्तवः, शङ्कराचार्यस्य प्रपञ्चसारः, बहुत्र श्रीविद्यातत्त्वसम्बद्धं सौन्दर्यलहरीस्तोत्रमित्यादयो ग्रन्था लभ्यन्ते । सौन्दर्यलहर्यां लक्ष्मीधरविद्वद्वरविरचिता व्याख्या प्रचुराऽर्थविलसिता विद्यते ।

श्रीविद्यायाः प्रधानतो द्वादश सम्प्रदाया आकर्ण्यन्ते । तत्र बहवो लुप्तप्रायाः । सम्प्रति मन्मथस्य, क्वचिदंशे लोपामुद्रायाः सम्प्रदायः प्राप्तपदोऽवलोक्यते ।

दशसु महाविद्यासु श्रीविद्यैव प्रधानास्पदा ब्रह्मविद्यास्वरूपा च । तन्महिमा चेत्थं जेगीयते—

> यत्राऽस्ति भोगो न च तत्र मोक्षो यत्राऽस्ति मोक्षो न च तत्र भोगः ।
> श्रीसुन्दरीसेवनतत्पराणां भोगश्च मोक्षश्च करस्थ एव ॥

श्रीविद्यायाः कादिविद्या हादिविद्या चेति विद्याद्वयम् । त्रिपुरोपनिषद्भावनोपनिषच्चेति कादिविद्यायां प्रख्याते । केषाञ्चिन्मते कौलोपनिषदपि तत्रैव सम्मता । त्रिपुरातापियुपनिषदि हादिविद्यायाः प्रतिपादनं वर्तते ।

श्रीविद्याविषये निम्नलिखिता ग्रन्थाः प्राप्तप्रथाः—

ते यथा वामकेश्वरतन्त्रस्य पञ्चमोऽध्यायो योगिनीहृदयमित्यभिधानेन प्राप्तसम्मानः । द्वादश्यां त्रयोदश्यां वा शताब्द्याममृतानन्दनामा कोविदस्तस्य व्याख्यां व्यदधात् । एवं च पुण्यानन्दस्य काव्यकलाविलासो ग्रन्थ आसादितप्रकाशस्तं च नटनानन्दनाथाख्यो विद्वान् स्वटीकया सनाथमकरोत् । सप्तदशशताब्द्याः प्रारम्भे तान्त्रिकभास्करो भास्कररायाख्यः सुधीः कामकलाविलासमेव 'वरिवस्यारहस्य' नामकटीकयोद्भासयाञ्चकार । स एव विपश्चिद्वरिवस्याप्रकाशं त्रिपुरारहस्यस्य च सेतुनामिकां टीकां वामकेश्वरतन्त्राऽन्तर्गतस्य नित्याषोडशिकार्णवस्य च टीकां व्यलिखत् । स एव भास्कररायो ललितासहस्रनाम्नां, कौलोपनिषदो भावनोपनिषदश्च व्याख्यां लिलेख । तथा सप्तशत्याश्च गुप्तवतीनामधेयां टीकामुद्भासयामास ।

एवमेव परशुरामस्य कल्पसूत्रं, गौडपादाचार्यस्य श्रीविद्यारत्नसूत्रं सुभगोदयस्तोत्रं, शङ्कराचार्यस्य प्रपञ्चसार उमानन्दनाथस्य यौवनोल्लासो विद्यारण्यस्वामिनः श्रीविद्यार्णवश्चैते सर्वेऽपि ग्रन्थाः श्रीविद्याप्रतिपादकत्वेन प्राप्तप्रकाशाः ।

इत्थमेव दक्षिणामूर्तिसंहिता ज्ञानार्णवतन्त्रं तादृशावेव ग्रन्थौ ।

तन्त्रशास्त्रं काश्मीरदेशेऽपि महतीं प्रतिष्ठां लेभे । तत्र शैवानां, शाक्तानां, वैष्णवानां च मतानि प्रचलितानि । तत्र शैवमतं श्रीविद्यामतमेव पुपोष तत्र किमपि पार्थक्यं नाऽस्ति । तत्र शैवमतस्य विशेषोत्कर्षः, द्वैतमद्वैतं चेति प्रस्थानद्वयम् ।

शैवो वीरशैवः, सिद्धान्तशैवः पाशुपतश्चेति चत्वारः सम्प्रदायाश्च विद्यन्ते ।

बङ्गदेशे चतुःषष्टितन्त्रमध्ये कुलार्णवतन्त्रं, फेत्कारितन्त्रं, चीनाचारतन्त्रं, कुब्जिकातन्त्रं, महानिर्वाणतन्त्रं प्राणतोषिणीतन्त्रं च महतीं प्रतिष्ठामापुः ।

उपासनाभेदः—

शाक्ततान्त्रिकाणां मतद्वयं कौलमतं समयाचारमतं चेति । चतुःषष्टिसंख्यानि तन्त्राणि कौलानां प्रधानग्रन्थाः । भास्करराय–रामेश्वरकविप्रभृतयः कौला बाह्यत्रिकोणे प्रत्यक्षत्रिकोणे वोपासनामकुर्वन् । परं समयाचारमतावलम्बिनः सहस्रार एवोपासनां कुर्वन्तीत्युपासनाभेदौ ।

शाक्ततान्त्रिकाणां भावत्रयं—दिव्यभावः, पशुभावो, वीरभावश्चेति ।

कतिपये श्रीविद्योपासकाः—

भगवान् हयग्रीवः, अगस्त्यमुनिः, लोपामुद्रा, गौडपादाचार्यः, शङ्कराचार्यः, चैतन्यमहाप्रभुः, नित्यानन्दः, वल्लभाचार्य—एते श्रीविद्योपासकाः । एषु कतिपये महात्मानः श्रीविद्यासम्बद्धान् ग्रन्थानपि व्यरचयन् । मया दिग्दर्शनमात्रं कृतम् ।

शक्तिपीठानि—

भगवत्या दाक्षायण्याः सतीदेव्या यत्र यत्र अङ्गपतनं तत्र तत्र बहूनि शक्तिपीठानि प्रादुर्भूतानि । तत्र एकपञ्चाशत्संख्यकपीठानि प्रधानानि । एवं च कामरूपदेशः काश्मीरो मिथिला, बङ्गदेशो नेपालश्चेति देशाः शक्त्युपासकाः । एवं च नेपाले गुह्येश्वरीपीठं परमप्रथितम् ।

पुरा नेपाले बहवस्तान्त्रिका विद्वांसः सञ्जाताः । तेषु लम्बकर्णभट्टो, नेपालेन्द्रः श्री ५

प्रतापसिंहसाहदेवः, कर्पूरस्तवटीकाकारः पण्डितराजो राजगुरू रङ्गनाथपौडेलो, विश्वनाथभट्टाचार्यो, बन्धुदत्त आचार्यश्चेत्यादयो विश्रुता आसन् ।

अर्वाचीनसमयेऽपि राजपुरोहितो विद्वद्वरेण्यो वीरेन्द्रकेशरी, राजगुरुर्दुर्गानाथोऽधिकारी, पण्डितरमानाथमिश्रः, पण्डितरुद्रनाथखनाल एवं भारतेऽपि तन्त्रशास्त्रप्रख्यातो रथी धनशम्शेरश्चैते महतीं ख्यातिमधिगता दृष्टाः । नेपाले त्रैवर्णिकास्तत्राऽपि विशेषतो ब्राह्मणाः समयाचारमाश्रित्य स्वेष्टदेवतामुपासते ।

तन्त्रशास्त्रनिबन्धग्रन्थाः—

तान्त्रिकविकीर्णविषयसंग्राहकेषु निबन्धग्रन्थेषूत्पलाचार्यशिष्यस्य देशिकेन्द्रलक्ष्मणस्य शारदातिलको ब्रह्मानन्दगिरेः शाक्तानन्दतरङ्गिणी, चैतन्याचार्यसमकालस्यागमवागीशकृष्णानन्दस्य बृहत्तन्त्रसारो विद्वद्धुरन्धरस्य महीधरसूरेर्मन्त्रमहोदधि-मन्त्रमुक्तावली, मन्त्रमहार्णवः, एवं च साहकुले प्रथमनेपालशासकश्री ५ पृथ्वीनारायणसाहतनुजनुषः श्री ५ प्रतापसिंहसाहस्य वैक्रमद्वात्रिंशदधिकाऽष्टादशशतके निर्मितस्तन्त्रतत्त्वाऽर्णवः पुरश्चर्यार्णवः, शिवहरराजदेवनन्दनसिंहस्य शाक्तप्रमोदश्चैते ग्रन्थाः शिष्टप्रमोदाय प्रथिततमा वर्तन्ते ।

तत्र प्रकृतः पुरश्चर्याऽर्णवनामको ग्रन्थराजस्तन्त्रसिद्धान्तपुरश्चरणाद्यनेकाऽनुष्ठानविधानसंग्राहकोऽपि दुर्लभ आसीत्, सोऽयं विदुषां पुरत उपन्यस्यते ।

एतद्ग्रन्थरत्नप्रकाशनस्यैदम्पूर्वकत्वाऽभावेऽपि तदभावसम्भवसुधीजनसुकृताचरणान्तरायपातपरिहरणपरायणतया बहुवित्तसमयव्ययपूर्वकं प्रकाशकमहाभागैर्योऽयं मुद्रणायासोऽभ्युपगतस्तमभिवीक्ष्य सहृदयास्तदीयश्रमं सफलीकरिष्यन्ति स्वांश्च कृतार्थयिष्यन्तीति मत्वा विरम्यतेऽस्माद्व्यापारादिति शम् ।

मदनुजनुरभूद्गुणैर्गरीयान्, द्विजकुलचन्द्रकपूर्णचन्द्रसूरिः ।
तदभिमतमतं च सन्निवेश्य, लघुकृतिरत्र समस्ति मामकिना ॥ १ ॥
गुप्तवंशकवतंससदृक्षो यः पुराऽजनि कृती हरिदासः ।
संस्कृताऽगणितपुस्तकजातं सम्प्रकाश्य भुवि विश्रुतिमाप ॥ २ ॥
तत्सुतोऽपि व्रजजीवनदासो ग्रन्थमुद्रणपटुः प्रथितोऽभूत् ।
वल्लभप्रभृतितत्तनुजातैर्ग्रन्थ एष किल मुद्रित आस्ते ॥ ३ ॥
तन्त्रतत्त्वनिचयस्य चयार्थं मत्प्रयास इह लब्धपदोऽस्ति ।
सम्भ्रमभ्रमनिबन्धनदोषं मर्षयन्तु सुधियो गुणगृह्याः ॥ ४ ॥

काशी, ब्रह्मघट्टम्
दीपावली;
वैं० २०४२ तमः ।

विद्वज्जनाऽनुग्राह्यः—
शेषराजशर्मा

भूमिका ।

भो भो विविधागमशास्त्रपारावारपारीणाः सहृदयधुरीणा विद्वांसो विदांकुर्वन्तु तत्र भवन्तः पुरुषार्थसाधनमभीप्सतां पुरुषाणामागमशास्त्रपरिशीलनमन्तरेण न श्रूयते तावदुपायान्तरम् । तदर्थमेवागमशास्त्रसिद्धान्तविचारसारचतुरैः श्रीमल्लक्ष्मण-महीधर-कृष्णानन्दवागीश-प्रभृतिभिर्विद्वद्वरैः शारदातिलक–मन्त्रमहोदधि–तन्त्रसारादयो द्राक् तन्त्ररहस्यहृदयवेद्याः सद्यः सम्यक्तया प्रत्ययजननेन तान्त्रिकजनमनोविनोददायकाः संग्रथिता ग्रन्था जाग्रत्येव ।

परं तेषु च कस्मिँश्चित् संक्षिप्तविषयतया कुत्र चिद्गूढाभिप्रायस्यातिदुर्बोधतया व्याकुलायमानानामागमशास्त्रव्युत्पित्सूनां जनानां परमोपकारप्रकृतिभिः कारुणिकैरशेषशास्त्रविन्नेपालाधिपतिकुलतिलकायमानैः श्री ५ मन्महाराजाधिराजप्रतापसिंहसाहबहादुरवर्ममहोदयैः सिद्धान्तप्रतिपादनतत्पर इदानीन्तनानामतीवोपयोगी पुरश्चर्यार्णवो नाम ग्रन्थो निरमायि ।

एतद्ग्रन्थं सर्वसाधरणव्यक्तीनां खपुष्पमिवातिदुर्लभमवलोकनार्थमपि लोकैरदीयमानं बह्वायासेन लोकशुश्रूषया लब्धमप्यशुद्धप्रायमालोच्यामुमुद्दिधीर्षुभिः प्राभाकरीकम्पन्याधिपतिभिस्त्रीणि पुस्तकानि कथंकथमपि संपाद्य शोधनाय सादरं प्रेरितोऽहम् ऽस्मिन् ग्रन्थेऽत्यन्तलोकोत्तरविषयबाहुल्यं समुपलभ्यासीमहर्षसुखमनुभवन् चत्वारिंशत्पृष्ठपर्यन्तं काशिकराजकीयसंस्कृतपाठशालायां साहित्यशास्त्राध्यापकैर्विबुधवरैः श्रीमद्रामशास्त्रिभिः संशोध्य तदग्रतो बृहल्लघ्वायसाक्षरैः पद्यगद्यादीनि पृथग्विभज्य शोधयितुमारभे ।

यत्र खलु कठिनस्थलेष्वर्थान्तरयोजनपूर्वकं निम्नभागे टिप्पणं द्वितीयतृतीयपुस्तकस्थपाठान्तराणि च तत्तद्ग्रन्थद्योतनोल्लसितानि ग्रन्थान्तरप्रमाणवाक्यान्यपि उपलब्धौ तत्तद्ग्रन्थैः संयोज्य यथासम्भवमविरुद्धपाठान्तरैः सह निवेशितवान् । कुत्र चिद्विरुद्धस्थलमपि निःशङ्कं भवतां सुखे-

नावकलनाय निरूपितवान् । येन भवद्भिः सानुग्रहं विबोधितो द्वितीयावृत्तौ संस्कृत्य मुद्रणे भवत्स्वनल्पधन्यवादार्पणसुखमनुभविष्यामि ।

अस्मिन् ग्रन्थे वर्त्तमानानां मन्त्राणां यन्त्राणां चोद्धरणाय मन्त्रकोशादि ग्रन्थान्तराद्स्माच्च समुद्धृत्य ग्रन्थान्ते निवेशयिष्यामि।येन तदुद्धरणक्लेशः प्रायो नैव दुःखाकरिष्यति भवतः । उज्जीवयिष्यति च मामवामनश्रमशान्तमपि भवत्करुणामृतशीकरास्वादः ।

झोपाभिधः

श्रीमुरलीधरशर्मा ।

पुरश्चर्यार्णवस्य

विषयानुक्रमणिका ।

विषयाः	पृ.	प.
[अ]		
अकडमचक्रम्	७०	५
अकडमचक्रविचारः	६९	१५
अकथहचक्रम्	६०	१५
अकथहचक्रविचारः	५९	१
अकृतपुरश्चरणो मन्त्रोऽशुभप्रदः	४१६	९
अक्षपाटनम्	२६२	५
अक्षोभ्यमन्त्रध्यानादि	७९५	१०
अग्निजिह्वाः	२६९	१
अग्निजिह्वाधिदेवताः	२७०	५
अग्निजिह्वानाम	२६९	११
अग्निजिह्वान्यासः	३६२	११
अग्निजिह्वामन्त्राः	२६८	२५
,,	३६७	७
अग्निजिह्वावर्णाः	२६९	२५
अग्निज्वालनमन्त्रः	२६७	२६
,,	३६१	२७
अग्निज्वालनविधिः	२६८	३
अग्नित्रयस्यैकीकरणम्	२६६	१०
,,	३६१	११
अग्निदुर्गामन्त्रादि	९४८	९
अग्निप्रज्वालनम्	२६१	२७
अग्निप्रणयनार्थं पात्रविचारः	२६५	१६

विषयाः	पृ.	प.
अग्निप्रयोतृजनः	२६५	१४
अग्निमन्त्रादि	८९७	२३
अग्निवर्णतः फलानि	३००	१४
अग्निविसर्जनम्	३८०	१४
अग्निविसर्जनार्थं महाव्याहृतिः	३८०	२
अग्निविहारः	२८८	११
,,	३७५	१२
अग्निसंस्कारः	२६६	१०
,,	३६१	११
अग्नेरङ्गनिर्णयः	२९९	२३
अग्नेरङ्गविशेषे हवनादिफलम्	२९९	१८
अग्नेर्ऋष्यादिन्यासः	२७०	१३
,,	३६२	२७
अग्नेर्गर्भाधानादिषोडशसंस्काराः	२८४	९
,,	३७१	१५
अग्नेर्जिह्वादिदिङ्नियमः	२७४	१७
अग्नेर्जिह्वासु हवनम्	३७२	२१
अग्नेर्जिह्वाहोमीयपदार्थाः	२७५	२२
अग्नेर्ध्यानम्	२७९	११
,,	३६४	७
अग्नेर्मूर्त्त्यादिषु हवनम्	३७३	११
अग्नेः क्रव्यादांशः	२६४	२४

विषयाः	पृ.	प.
अग्नेः क्रव्यादांशः	२६५	२३
अग्नेः परिस्तरणम्	२७२	१२
”	३६५	१४
अग्नेः पित्रोर्विसर्जनम्	२८६	८
अग्नेः पूजनम्	२७३	१६
”	३६५	९
अग्न्याद्युद्वासनम्	३०७	१०
अग्न्युत्तारणम्	५२०	२
अघोरमन्त्रः	४४२	१४
अघोरमन्त्रध्यानादि	८२३	१४
अङ्कुरार्पणकर्माणि	१४१	८
अङ्कुरार्पणम्	१४१	५
अङ्कुरार्पणार्थं स्थानादिनियमः	१४१	१९
अङ्गन्यासः	१८५	१२
अङ्गन्यासस्य नित्यता	१८७	५
अङ्गमुद्रा	१८५	६
अङ्गुलादिमानम्	१३१	१
अचला रात्रिः	९६०	१६
अजपागायत्रीजपसङ्कल्पः	४९४	१६
अजपाजपनिवेदनम्	४९३	९
अजपाजपविधिः	४८८	३
अदीक्षितानिन्दा	३८	२०
”	३९	४
अदीक्षितपूजादि निष्फलम्	३८	११
अधमपूजा	३६	२२
अधिवासनम्	२८९	१९
”	३७६	१
अध्वनामानि	३०२	२
अध्वशोधनम्	३७७	१५
अध्वोत्पत्तिः	३७९	१
अनन्तमन्त्रध्यानादि	६९५	६
”	९०२	२२
अनन्तयन्त्रम्	११५८	२०
अनाहतचक्रे शिवध्यानम्	४९२	१
अनुक्तजपसंख्याकमन्त्रजपसंख्या	५४५	१४
अन्तर्मातृकान्यासः	१६८	२१
”	३३०	१७
अन्तर्यागः	३३२	१
अन्तर्यागविधिः	१८९	२२
अन्नपूर्णाप्रकरणम्	८७४	२३
अन्नपूर्णायन्त्रम्	११५७	१९
अपराजितापूजा	११२४	११
अपराजितावैष्णवीमन्त्रः	११३३	३
अपरीक्ष्योपदेशदीक्षानिषेधः	३९३	९
अप्सरस्साधनम्	१२१६	१२
आभिषेकमन्त्रः	४०४	२
अमृतीकरणम्	२१९	२१
”	३४६	२६
अर्घ्यपात्रप्रमाणम्	२००	१०
अर्घ्यपात्रम्	१४;	१६
अर्घ्यपात्रद्रव्याणि	१९६	१२
अर्धचन्द्रकुण्डम्	१२९	१७
अर्धनारीश्वरमन्त्रध्यानादि	७०३	२१
अवगुण्ठनम्	३४६	१५
अविहितदीपादौ निषेधः	२४७	१२

विषयाः	पृ.	प.
अशुभखञ्जरीटशान्तिः	११२७	११
अशुभस्वप्नशान्तिः	२९८	७
अशुभस्वप्नाः	२९६	५
अशौचे विशेष आश्विनशुक्ले	९९१	२१
अष्टगन्धं गणेशादिदेवानाम्	२१४	१४
अष्टदिक्पालहोमः	२८६	१६
,,	३७३	११
अष्टदिक्पालार्थं कलश-	३७३	११
स्थापनम्	३४५	१९
अष्टदिग्गजपूजनम्	३४५	२१
अष्टपाशाः	४३	१८
अष्टभैरवाः	४७३	९
अष्टमतरङ्गविषयकथनम्	७	२
अष्टमनृसिंहमन्त्रध्यानादि	६६४	२१
अष्टमीकृत्यम्	१०३६	१८
अष्टमीनिर्णयः	९८१	११
अष्टमीव्रतानिषेधः पुत्रिणः	१००४	१४
अष्टशक्तयः	७३	१३
अष्टादशोपचाराः	२२५	३
अष्टास्रकुण्डम्	१३०	११
असक्तपूजकस्यावाहनादि	३४७	१
अस्त्रपूजनम्	१०४१	७
अहिबलचक्रम्	९८	१५
अहिबलचक्राविचारः	९७	२४

[आ]

विषयाः	पृ.	प.
आगमशब्दार्थः	३२	२
आगमस्य वेदाङ्गत्वम्	३१	१७
आग्नेय्यादिकलशस्थापनम्	३४५	१७
आचमनपात्रम्	१४८	१७
आचमनमन्त्रः	३२४	२०
,,	४९८	२३
आचमनीयपात्रस्थापनम्	३३९	१०
आचाराः सविधयः	२१	५
आचार्यादिसम्भारः	१४८	१०
आज्ञाचक्रे गुरुध्यानम्	४९२	११
आज्यसंस्कारः	३६९	१५
आणवी दीक्षा	३८९	२२
आणवीभेदाः	३८९	२५
आतुराह्निकम्	३५	७
आत्ममन्त्रः	१५९	३
आपदुद्धारवटुकमन्त्रः	७०५	२०
आभिषेचिकी दीक्षा	३९२	१५
आम्नायदेवाराधनफलम्	१५	६
आम्नायमार्गयोः सङ्गतिः	२०	१४
आलीढलक्षणम्	७८८	२३
आवरणदेवताः	३५१	१८
आवरणपूजा	२४०	२
आवश्यककुण्डानि	१३२	९
आवाहनादिमुद्राः	२२०	१५
आश्विनशुक्लप्रतिपन्निर्णयः	९६९	२६
[1]आसननामलक्षणानि	४२७	१३
आसनपरिग्रहः	३५४	२२
आसनप्रकारः	२२६	२
आसनप्रमाणानि	४२७	१०
आसनशोधनम्	१५८	१६

---

[1] शरीरावयवविहितान्यासनानि वेदितव्यानि ।

विषयाः	पृ.	प.
आसनसंस्कारः	७३१	१६
आसनादिदानमुद्राः	२५२	२१
आसनानि	४२६	७
आसनानि कामनाभेदेन	४२६	१८
आसनानि निषिद्धानि	४२६	२६
आसनोपवेशनादिङ्नियमः	१५९	७
आसनोपवेशनमन्त्रः	१५८	१९
[इ]		
इन्द्रयन्त्रम्	११५९	१६
इन्द्राणीमन्त्रादि	११३५	२१
इन्द्राणीयन्त्रम्	११५८	२७
इन्द्रादिलोकपालध्यानादि	२४२	३
इष्टदेवध्यानम्	१८८	८
इष्टदेवध्याने द्वैविध्यम्	१८८	२३
[ई]		
ईशानमन्त्रादि	९०१	२६
ईशानयन्त्रम्	११५८	१९
[उ]		
उच्चैर्मन्त्रोच्चारणे दोषः	५३३	१६
उच्छिष्टगणेशमन्त्रादि	६३८	२०
उच्छिष्टचाण्डालिनीयन्त्रम्	११५७	५
उत्तमपूजा	३६	२०
उत्तमब्राह्मणलक्षणम्	२५	२
उदयास्तपुरश्चरणभेदाः	५६७	१
उदितचक्रम्	७१	१
उदितचक्रविचारः	७०	८
उपचारमुद्राः	२५२	२१
उपचारसमर्पणम्	३४९	२
उपचारसमर्पणविधिः	२२६	२

विषयाः	पृ.	प.
उपदेशदीक्षा	३९२	२३
उपदेशदीक्षासमयादि	३९३	६
उपासनाभेदाः	३७	१२
उमामाहेश्वरीतिथिः	९८२	१३
उष्णिक्	१४८	२०
[ऋ]		
ऋणिधनिचक्रम्	६३	१
ऋणिधनिचक्रविचारः	६१	११
ऋत्विगावरणवाक्यानि	३२०	१३
ऋषिच्छन्दआदिज्ञानमावश्यकम्	५३६	१७
ऋषिन्यासमुद्रा	१८५	२
ऋषिन्यासः	१८४	७
[ए]		
एकजटागायत्री	५०५	२०
एकजटामन्त्रः	७८४	२२
एकजटायन्त्रम्	११५१	१२
एकद्व्यादिमुखरुद्राक्षनामानि	४३६	११
एकपीठे पृथक्पूजानिषेधः	५२३	१६
एकलिङ्गस्थानलक्षणम्	७३२	११
एकलिङ्गादौ क्षेत्रपालविशेषाः	४७६	४
एकाङ्गादिमन्त्राः	४१४	२२
एकादशतरङ्गविषयकथनम्	९	१
एकादशनृसिंहमन्त्रादि	६६७	४
एकाशीतिपदवास्तुचक्रम्	१०८	२
एकाशीतिपदवास्तुचक्रविचारः	१०६	१९

विषयाः	पृ.	प.
एकाशीतिपदवास्तुचक्रादिकोष्ठपूरणद्रव्यवर्णाः	११०	६
[क]		
कच्छपभेदाः	१०५६	१७
कमलाक्रमः	८४९	२२
कमलेश्वरीभैरवीमन्त्रादि	८१०	२०
कमलेश्वरीभैरवीयन्त्रम्	११५५	५
करणनिर्णयः	८०	१२
करमाला वैष्णवे	४४७	९
करमाला शाक्ते	४४७	२३
करशुद्धिप्रकारः	१६१	४
करशुद्धिः	३२५	२६
कर्करीजलविकरणम्	२६०	२
कर्णपिशाचिनीसाधनम्	१२२१	२
कर्णमातङ्गीमन्त्रादि	८३२	११
कर्णयोर्मन्त्रश्रवणसंख्या	३१२	११
कर्दमप्रकारः	१३०	८
कर्पूरस्तवपुरश्चरणम्	११६८	२१
कर्मविशेषेऽग्निजिह्वान्यासः	३६२	१५
कर्मविशेषे पात्रविशेषः	२७८	२३
कर्षादिप्रमाणानि	९५०	८
कलशप्रमाणम्	२१२	२
कलशभेदाः	२११	२३
कलशस्थापनम्	३३३	८
,,	९७६	२०
,,	१०२०	२२
कलशस्थापनविधिः	१९३	२२
कलानामानि	१७२	८
कलामातृकान्यासः	१७१	१८
कलावती दीक्षा	३८५	१८
कलोत्पत्तिस्थानम्	१७२	२०
कलौ जपः शस्तः	४१५	११
कलौ विष्णवादिमाहात्म्यस्थितिः	४१५	१३
कल्किमन्त्रादि	६९२	८
कल्कियन्त्रम्	११४५	५
कवित्वसम्पादनार्थं पुरश्चरणम्	५७३	२१
,,	५७६	१९
कामकलाकालीप्रकरणम्	७७२	८
कामकलागायत्री	५०८	२
कामकलानामानि	५९८	४
कामकलायन्त्रम्	११५०	१०
कामकलास्थानानि	५९७	२२
कामगायत्री	५०८	८
कामनाभेदेन पूजास्थानानि	३७	७
कामनाभेदेन मालाभेदाः	४३१	२१
काममन्त्रादि	७२०	२३
कामराजविद्यामन्त्रः	७९६	११
कामरूपादिपीठस्थानानि	४८२	१५
कामेश्वरीभैरवीयन्त्रम्	११५५	६
कामेश्वरीसाधनम्	१२२५	९
काम्याभिषेकः	११६४	१६
कार्त्तवीर्यमन्त्रप्रयोगः	७१४	१६
कार्त्तवीर्यमन्त्रभेदाः	७११	६
कार्त्तवीर्यमन्त्रादि	७०९	२५
कार्त्तवीर्ययन्त्रम्	११४६	९

विषयाः	पृ.	प.
कार्त्तवीर्ययन्त्रं काम्यार्थम्	११४६	११
कालरात्रिः	९६०	८
कालाग्निरुद्रः	१८७	२४
कालीकृष्णयोरैक्यम्	१७	९
कालीगायत्री	५०४	२६
कालीगायत्रीपुरश्चरणम्	७५२	१८
कालीगायत्र्यन्तरम्	५०५	८
कालीध्यानम्	७२७	१५
कालीध्यानमाहात्म्यम्	७२८	७
कालीपदव्युत्पत्तिः	२८	२
कालीपुरश्चरणार्थं देशाः	७३२	८
कालीपूजागृहम्	७३३	३
कालीप्रकरणम्	७२३	१
कालीमन्त्रपुरश्चरणम्	७३३	१०
कालीमन्त्रान्तराणि	७५०	१७
कालीमन्त्रार्थः	७२४	९
कालीमाहात्म्यम्	७२५	७
कालीयन्त्राणि	११४८	१२
कालीशापोद्धारः	७२८	१२
काल्या ऋष्यादिन्यासः	७२७	२
काल्या द्वाविंशत्यक्षरमन्त्रः	७२४	३
काल्या नव नामानि	१६	१८
काल्याः कलौ विशेषः	१६	१२
काल्युपासकदेवर्षयः	७२३	१९
कीलकाष्ठपरिमाणादीनि	४७१	२
कीलारोपणादिमन्त्राः	४७१	६
कुण्डचित्राणि	१३७	
कुण्डभेदा वर्णभेदतः	१३६	१०
कुण्डभेदाः कामभेदतः	१३६	१७
कुण्डलक्षणम्	१२८	२२
कुण्डलधारिणीसाधनम्	१२२२	२३
कुण्डसंख्या	१२९	४
कुण्डसंस्कारः	२६१	३
कुण्डानां फलानि	१३६	५
कुण्डे आधारशक्त्यादिपूजनम्	३५९	१५
कुण्डे कण्ठमानम्	१३२	२०
कुण्डे खातमानम्	१३२	१
कुण्डेऽग्निजिह्वापूजनम्	३६७	७
कुण्डेऽग्निनिधानम्	३६१	१९
कुण्डेऽग्निपूजनम्	३६६	७
कुण्डेऽग्निप्रक्षेपणविधिः	२६६	२२
कुण्डेऽग्न्यङ्गदेवतादिपूजनम्	३६७	१६
कुण्डे देवताध्यानम्	३६०	१५
कुण्डे देवतापूजनम्	३५९	९
कुण्डे देवतापूजने श्रीविद्यायां विशेषः	३५९	११
कुण्डे नाभिरचनाप्रकारः	१३४	२०
कुण्डे पीठपूजनम्	३६०	९
कुण्डे पूजनक्रमः	२६३	९
कुण्डे मेखलामानम्	१३३	३
कुण्डे मेखलालक्षणम्	१३२	३
कुण्डे मेखलासु पूजनम्	३६५	२४
कुण्डे योन्यादिरचनाप्रकारः	१३४	८
कुण्डे रेखासु पूजनम्	३५९	४
कुण्डे रेखालिखनक्रमः	२६२	१७
”	३५८	२७
कुण्डेऽष्टदलकमलपूजने वैष्णवे विशेषः	३६०	२

विषयाः	पृ.	प.
कुण्डेऽष्टदलकमले पूजनम्	३५९	१९
कुण्डेऽष्टादशसंस्कारकरणाक्षमस्योपायः	३५८	२४
कुण्डेऽष्टादशसंस्काराः	३५७	२४
कुण्डे हवनसंख्यया मानानि	१२५	२२
कुत्सितशिष्यलक्षणम्	४७	८
कुब्जिकाप्रकरणम्	८७९	९
कुब्जिकायन्त्रम्	११५७	२३
कुमारीध्यानादि	१०८८	११
कुमारीनामानि वर्षभेदतः	१०८३	९
,,	११७४	११
कुमारीनिमित्तं भूषणादि	१०८९	१४
कुमारीन्यासः	१०८७	१७
कुमारीपूजनफलम्	११००	२३
कुमारीपूजनम्	११७४	१७
कुमारीपूजाविधिः	१०८१	३
कुमारीभोजनम्	१०९१	१६
कुमारीभोजनार्थमन्नोत्सर्गः	१०९२	३
कुमारीभोजने शुभाशुभानि	१०९४	१७
कुमारीलक्षणम्	१०८२	१०
कुमारीस्तुतिः	१०८५	१७
,,	१०९३	३
कुम्भः (प्रमाणविशेषः)	३९९	२२
कुलवारादयः	९६१	१२
कुलवृक्षाः	४०९	१४
कुलाकुलचक्रम्	५८	१५
कुलाकुलचक्र[illegible]	५७	१८

विषयाः	पृ.	प.
कुल्लुकाऽकरणे हानिः	५३५	२
कुल्लुकाजपस्थानम्	५३२	९
कुल्लुकाद्युत्पत्तिः	५२९	२
कुल्लुकानामृष्यादयः	५३०	४
कुल्लुकाः	५३०	२
कुबेरमन्त्रादि	९००	२१
कुबेरयन्त्रम्	११५८	१९
कुशविशेषः	४९६	७
कूर्मचक्रनवकोष्ठेषु पूज्यदेवाः	४८२	१
कूर्मचक्रपरिमाणादि	४८४	१९
कूर्मचक्रप्रदर्शनम्	४७६	१६
कूर्मचक्रम्	४७७	२
कूर्मचक्रविचार आवश्यकः	४७७	६
कूर्मचक्रविचारः	४७७	११
कूर्मचक्रविचाराभावस्थानम्	४८४	६
कूर्मचक्रे विशेषः	४७८	३
कूर्मचक्रे शुभाशुभानि	४७८	१९
कूर्मभेदाः	१०५६	१७
कूर्ममन्त्रादि	६४७	८
कूर्मयन्त्रम्	११४१	१४
कृत्यशेषम्	११०५	२०
कृष्णमन्त्रपुरश्चरणम्	५६५	१
कृष्णमन्त्रः सर्वश्रेष्ठः	७४	३
कृष्णमन्त्रादि	६८३	२५
कृष्णयन्त्रम्	११४५	१
केतुमन्त्रादि	८९१	१०
,,	९४७	१६

विषयाः	पृ.	प.
केतुयन्त्रम्	११५८	१४
केशवादिमातृकान्यासः	१७३	११
कौमारीमन्त्रादि	११३१	११
कौमारीयन्त्रम्	११५८	२१
कौलेशभैरवी	८१२	५
क्रमदीक्षा	३९४	६
क्रमदीक्षाप्राप्तदेवता	३९४	६
क्रमदीक्षाफलम्	३९६	११
क्रमदीक्षावश्यकत्वम्	३९६	७
क्रव्यादनामं	२६६	७
क्रव्यादांशपरित्यागमन्त्रः	२६५	२३
क्रियावत्यादिदीक्षा	१४७	३
क्रोधभैरवमन्त्रादि	८२०	१२
क्रोधरात्रिः	९६०	१२
क्रोधाङ्कुशमुद्रा	१२१३	२३
क्वाथाः	२१३	४
क्षिप्रप्रसादनगणेशमन्त्रादि	६३३	३
क्षेत्रपालनामानि	४७५	१३
क्षेत्रपालबलिमन्त्रः	४७२	२३
क्षेत्रपालमन्त्रादि	७०५	१३
क्षेत्रपालयन्त्रम्	११४६	२

[ख]

विषयाः	पृ.	प.
खगभेदाः	१०५८	२
खञ्जरीटदर्शनविधिः	११२६	९
खञ्जरीटप्रणाममन्त्राः	११२७	४
खञ्जरीटाष्टनामानि	११२६	२४
खड्गध्यानम्	१०६६	२३
खड्गपूजनमन्त्रः	१०६५	१४
खड्गभेदाः[1]	१०५६	२०
खड्गभेदाः	१०६८	२
खण्डितादियन्त्रे दोषः	५२३	२३
खारी(प्रमाणविशेषः)लक्षणम्	३९९	२०

[ग]

विषयाः	पृ.	प.
गङ्गाप्रकरणम्	८८१	१६
गङ्गायन्त्रम्	११५८	१
गजपूजा	१११४	६
गणचक्रम्	६८	१
गणचक्रविचारः	६८	३
गणेशगायत्री	५०४	२
गणेशतत्त्वानि	३७७	२०
गणेशपूजायां द्वारपूजनम्	३२३	२
गणेशप्रकरणम्	६३०	४
गणेशमातृकान्यासः	१८०	८
गणेशयन्त्रप्रकरणम्	११४०	८
गणेशसूक्तपुरश्चरणम्	९३३	११
गणेशादिक्रमो मार्गभेदेन	२५७	५
गणेशादिपञ्चदेवैक्यम्	१९	६
गणेशादिबलिः	३५५	१३
गणेशादिशक्तयः	४९२	२१
गणेशाम्नायभेदैर्नामभेदाः	१०	२०
गणेशाम्नायभेदैर्मन्त्रभेदाः	१०	१५
गण्डकबलौ विशेषः	१०७२	२
गण्डकभेदाः	१०५६	२०
गन्धदानमन्त्रः	२२८	२१

---

[1] अयं पशुगण्डकापरनामेति ।

विषयाः	पृ.	प.
गन्धप्रकाराः	२३०	२
गन्धर्वक्रमः	८४७	२०
गन्धाष्टकानि	२१४	१४
गरुडगायत्री	५०८	११
गरुडमन्त्रादि	७०८	२५
गरुडयन्त्रम्	११४६	७
गवयभेदाः	१०५७	४
गायत्रीपुरश्चरणादि	९०३	११
गायत्रीपूजायन्त्रम्	९०६	१७
गायत्रीपूजाविधिः	९०७	६
गायत्रीप्रणवव्याहृत्याद्यैक्यम्	९११	८
गायत्रीमुद्रा	९०८	६
गायत्रीव्याहृतिप्रणवैक्यम्	९११	३
गायत्रीव्याहृतिव्याख्या	९१०	१८
गुरुचतुष्टयम्	२०८	११
गुरुतर्पणम्	३३९	२२
गुरुत्यागकरणे दृष्टान्तः	५१	९
गुरुत्यागे फलम्	५०	११
गुरुत्यागो मार्गभेदेन	५०	१६
गुरुदक्षिणा	३१४	१४
"	३८३	१९
गुरुद्वारा शिष्याराधनार्पणम्	३८१	११
गुरुध्यानम्	४८५	२२
गुरुपर्वाणि	७९	१९
गुरुपङ्क्तिपूजनम्	३५१	२४
गुरुमाहात्म्यम्	४२	५
गुरुलक्षणम्	४४	२०
गुरुशब्दार्थः	४४	१४

विषयाः	पृ.	प.
गुरुशिष्यपरीक्षणसमयः	५०	४
गुरुशुक्रादिशुद्धिविचारो दीक्षायाम्	७८	५
गुरुस्तुतिः	३८३	६
गुरुं विना मन्त्रान्तरग्रहणोपायः	४११	१४
गुरूपदेशं विनोपासनानिषेधः	३८	२
गुरोराज्ञाग्रहणवाक्यम्	३१९	७
गुरोरावरणवाक्यम्	३१९	१६
गुरोर्विशेषः	५१	१४
गुर्वादिनमस्कारः	३२५	१८
गुह्यकालीगायत्री	५०७	९
गुह्यकालीध्यानम्	७६४	१९
गुह्यकालीपुरश्चरणम्	७७०	१६
गुह्यकालीप्रकरणम्	७६१	२२
गुह्यकालीमन्त्रः	७६२	२०
गुह्यकालीयन्त्रम्	११४९	२२
गुह्यकाल्या ऋष्यादि	७६३	२३
गुह्यकाल्युपासकाः	७६२	३
गृहकूर्मे गृहनामविचारः	४७९	४
गृहदशा	४८१	१५
गृहस्थजपे विशेषः	४६७	२२
गोधिकाभेदाः	१०५६	२१
गोपालगायत्री	५०४	१७
गोपालसुन्दरीमन्त्रादि	६९५	१०
गोरक्षनाथगायत्री	११३८	७
गोरक्षनाथमन्त्रादि	११३७	२१
गौरीगायत्री	५०७	६
गौरीमन्त्रादि	७०८	६

विषयाः	पृ.	प.
ग्रन्थनाम	२	८
,,	१२३०	२१
ग्रन्थनिर्माणसमयः	१२३०	१९
ग्रन्थनिर्मातृनाम	२	७
,,	१२३०	१८
ग्रन्थनिर्मातृप्रशंसा	२	९
,,	१२३०	१७
ग्रन्थादरे दृष्टान्तः	२	१७
ग्रहणपुरश्चरणसंकल्पः	५८२	८
ग्रहणपुरश्चरणे शौचाद्यविचारः	५८०	१४
ग्रहणभिन्नयोगा दीक्षायाम्	८०	१९
ग्रहणादयो विशिष्टा दीक्षायाम्	७९	१२
ग्रहणेऽग्राह्यमन्त्राः	८०	२१
ग्रहणे जपारम्भकालः	५८१	७
ग्रहणे पितृश्राद्धार्थं स्वर्णदानम्	५८१	२४
ग्रहणे पुरश्चरणम्	५७८	७
ग्रहणे पुरश्चरणमावश्यकम्	५८१	१२
ग्रहणे भोजनादिविचारः	५८३	१०
ग्रहमातृकाध्यानादि	८९२	१३
ग्रहमातृकाप्रकरणम्	८९१	२६
ग्रहमातृकायन्त्रम्	११५८	१६
ग्राहभेदौ	१०५६	२२
ग्राह्यमन्त्रविचारः	५७	५

[घ]

विषयाः	पृ.	प.
घटचालनमन्त्रः	४०३	१८
घटे पल्लवादिदानमन्त्राः	४०३	३
घण्टापूजनविधिः	२४५	२
घण्टामन्त्रः	२४५	४
,,	३५३	१
घृतभेदाः	२८०	२४
घृतसंस्कारः	२८०	१४
घोरारात्रिः	९६०	१५

[च]

विषयाः	पृ.	प.
चक्रमन्त्रादि	६९४	१४
चण्डिकाध्यानम्	९६५	११
चण्डीपाठपुरश्चरणं कामनाविशेषतः	११८३	१०
चण्डीपाठमाहात्म्यम्	११८१	२०
चण्डीपाठसंख्या कामनाविशेषे	११८१	२४
चतुर्थतरङ्गविषयकथनम्	४	१७
चतुर्थनृसिंहमन्त्रादि	६६१	१५
चतुर्दशनृसिंहमन्त्रादि	६६८	११
चतुर्दशभुवनानि	३०३	२१
चतुःषष्टिपदवास्तुचक्रम्	११०	३
चतुःषष्टियोगिन्यः	१०३८	२१
चत्वारो वटुकाः	१०४३	२१
चन्द्रमन्त्रादि	८८५	११
,,	९४२	१८
चन्द्रयन्त्रम्	११५८	२
चरुपाकः	२८७	११
,,	३७४	२१
चरुप्राशनम्	२८९	२
,,	३७५	२१

विषयाः	पृ.	प.
चरुहोमः	२८७	२०
„	३७५	१७
चामुण्डामन्त्रादि	९५५	१७
„	११३६	६
चामुण्डायन्त्रम्	११५८	२७
चाषपक्षिदर्शनफलम्	११२८	२
चाषप्रणाममन्त्रः	११२८	८
चितासाधनम्	६१२	३
चितासाधनसंकल्पः	६१४	१२
चिन्तामणिसरस्वतीमन्त्रादि	८७०	२१
चीनक्रमः (महाचीनदिव्यचीनक्रमौ)	८४३	२
„	८४७	२
चेटीसाधनम्	१२२४	२१
चैतन्यभैरवीमन्त्रादि	८०९	१९
चैतन्यभैरवीयन्त्रम्	११५५	३
[छ]		
छागभेदाः	१०५७	५
छागादयः प्रशस्ताः	१०६३	२४
छागादिबलिविधिः	१०६४	२०
छागो निषिद्धः	१०६२	२
छिन्नमस्तागायत्री	५०६	१२
छिन्नमस्ताप्रकरणम्	८१३	२४
छिन्नमस्तायन्त्रम्	११५५	१५
छिन्नमस्तायाः प्रशस्तपुष्पाणि	२३७	१४
[ज]		
जडाह्निकम्	३६	१२
जपकालोऽधिकारिभेदेन	४१९	१३
जपक्रमो मालायाम्	५४०	१६
जपनियमः	२५८	२
„	४६५	१२
जपपूर्त्तौ देवमार्गभेदेन विशेषः	५४८	१५
जपपूर्त्तौ विशेषः	५४८	२
जपसमये देवचिन्तनप्रकारः	५३९	१४
जपसमर्पणम्	२५८	८
जपसमर्पणानन्तरकृत्यम्	२५८	१३
जपसंख्यार्थं द्रव्याणि	४४८	२४
जपस्त्रिविधिः	५४१	१४
जपः कामनाविशेषे	५४२	२
जपादिकमावश्यके	५४५	३
जपारम्भः	५३८	२५
जपे त्याज्यानि	४६६	९
जपे नियच्युतौ प्रायश्चित्तम्	४६८	२१
जपे नियमविशेषाः	५४२	२१
जपे वस्त्रनियमः	४७०	४
जयदुर्गामन्त्रादि	९५८	६
जलदानम्	३५४	११
जलप्रणाममन्त्रः	४९७	१
जलशोधनम्	१५८	११
„	३२४	१६
जातिभेदेन निषिद्धबलिः	१०६२	६
जीवबलिः	१०४९	२२
जीवबलेर्देवविशेषः	१०५१	२

विषयाः	पृ.	प.
ज्येष्ठपुत्राय मन्त्रदाने विशेषः	५२	१६
ज्वालामुखीसाधनम्	१२२०	२
ज्वालिनीमुद्रा	२६८	११
[त]		
तत्त्वमुद्रा	४६१	१८
तत्त्वशुद्धिः	२०८	१९
तत्त्वाध्वशोधनमन्त्रः	३०२	१५
तत्त्वाध्वादिहवनम्	३७८	१०
तत्त्वानि	३०३	३
,,	३७७	२०
तर्पणम्	५०९	८
,,	५४५	२५
तर्पणमन्त्रः	५४६	५
तर्पणमन्त्रः शाक्ते	५४६	९
तर्पणमन्त्रो वैष्णवे	५४६	१६
तान्त्रिकबलिः	१०५०	६
तान्त्रिकसन्ध्या	५०२	१४
तान्त्रिकस्नानसंकल्पः	४९७	५
तापनादिषट्संस्काराः	२८१	४
,,	३६९	२१
तामसी पूजा	३७	५
तामस्युपासना	३७	१६
ताम्बूलप्रकारा देवताभेदेन	२५२	११
ताम्बूलार्पणम्	३५५	३
ताराऋष्यादिन्यासः	७८३	२४
तारागायत्री	५०५	१७
तारागुरुपङ्क्तयः	२०७	२
ताराध्यानम्	७८५	४

विषयाः	पृ.	प.
तारापुरश्चरणविधिः	७८९	६
तारापूजायां विशेषः	२५१	२२
ताराप्रकरणम्	७८०	१०
ताराभेदप्रकरणम्	७९०	२१
तारामन्त्रार्थः	७८२	२२
तारामन्त्राः	७८१	२
तारायन्त्रम्	११५१	७
ताराया विहितनिषिद्धपुष्पाणि	२३६	३
तारायां विशेषः	३१९	३
तारारात्रिः	९६०	२३
तारारामयोरैक्यम्	१९	१८
ताराविषयेऽजपाजपे विशेषः	४९४	७
ताराशब्दार्थः	२०	१०
तिथिफलं दीक्षायाम्	७६	६
तिथौ महाशब्दप्रयोगः	९५९	९
तिलकधारणविधिः	५००	१८
तीर्थजलाभिषेचनमन्त्रः	४९८	१६
तीर्थजलामृतीकरणमन्त्रः	४९८	५
तीर्थशक्तिध्यानम्	४९७	१८
तीर्थशक्तिमन्त्रः	४९७	२३
तीर्थावाहनमन्त्रः	४९७	१३
तुरगपूजा	१११३	५
तृतीयतरङ्गविषयकथनम्	४	१०
तृतीयनृसिंहमन्त्रादि	६६१	२
तृतीयप्रणायामः	१६३	२१
तेजोवन्तः	४६९	३
त्रयोदशनृसिंहमन्त्रादि	६६८	७

त्रिषया:	पृ.	प.
त्रिपुरभैरवीगायत्री	५०६	३
त्रिपुरभैरवीमन्त्रानादि	८०४	३
त्रिपुरभैरवीयन्त्रम्	११५४	२४
त्रिपुरसुन्दरीगायत्री	५०५	२४
त्रिपुरादिपूजायां द्वारपूजने विशेषः	३२३	८
त्रिपुराशब्दार्थः	२०	५
त्रिराचमनम्	३२४	२०
त्रिलोहीमुद्रा	११६३	१६
त्रिविक्रममन्त्रादि	६६९	२५
त्रैपुरतत्त्वानि	३७८	८
त्वरितामन्त्रादि	८७३	६
त्वरितायन्त्रम्	११९७	१७

[द]

दक्षिणामूर्त्तिमन्त्रादि	७००	१२
दाक्षिणामूर्त्तियन्त्रम्	११४५	१८
दण्डप्रणामलक्षणम्	११०५	२४
दत्तमन्त्रस्य गुरुकृतो जपः	३१५	२९
दधिवामनमन्त्रादि	६६९	८
दन्तकाष्ठपरीक्षा	३२०	२२
दन्तकाष्ठपरीक्षायामशुभ-निराकरणार्थं मन्त्रः	३२१	११
दन्तधावनतः शुभाशुभानि	१४९	१६
दन्तधावनमन्त्रः	४९५	१८
दन्तधावनकाष्ठादि	४९५	१६
दन्तधावनं शिष्याय	१४९	१४
दन्तधावनाशुभे प्रायश्चित्तम्	१४९	२०
दशादिक्पालपूजनम्	३५२	७

विषया:	पृ.	प.
दशादिक्पालबीजानि	४७२	१२
दशादिग्बन्धनम्	३२६	६
दशभुजादुर्गाध्यानम्	९६३	२१
दशमनृसिंहमन्त्रादि	६६७	२१
दशमहाविद्या	१३	१८
,,	७२३	४
दशमहाविद्यादशावतारा-णामैक्यम्	१९	१८
दशमहाविद्याभैरवाः	१३	२३
दशमी-(आश्विनस्य)कृत्यम्	१११९	१७
दशाङ्गधूपः	२४३	२०
दशोपचाराः	२२४	४
दारुणरात्रिः	९६१	७
दिव्यचीनक्रमः	८४७	३
दिव्यभावक्रमः	८५२	१६
दिव्यभावः	८५५	१६
दीक्षाकर्माङ्गहवने संकल्पः	३५७	१८
दीक्षाग्रहणसमये शिष्य-नियमः	३१२	१
दीक्षाग्रहणानन्तरं गुरुगृहे वासः	३१६	२३
दीक्षादानात् प्रागभिषेकः	३११	१२
दीक्षादिनकृत्यम्	२९८	२३
,,	३७७	६
दीक्षादिनात् प्राक्कृत्यम् (शिष्यस्य)	१४७	१३
,,	३१९	१
दीक्षादिने गुरोरुपवास निषेधः	३१६	८

विषयाः	पृ.	प.
दीक्षादिनोपवासनिषेधः	३८३	२७
दीक्षानिर्णयः	७५	३
दीक्षाप्रयोगः	३१९	१
दीक्षामण्डपद्वारपूजनम्	३२१	१३
दीक्षामण्डपपरिक्रमणे गुरुपाठ्यमन्त्राः	१५०	८
दीक्षामण्डपप्रवेशनियमः	३२३	१३
दीक्षामण्डपसंस्कारः	३२३	१८
दीक्षामाहात्म्यम्	३९	१
दीक्षाया आवश्यकत्वम्	३८	२०
दीक्षायां प्रशस्तस्थानानि	८१	७
दीक्षाविधिः	१४७	८
दीक्षाशब्दार्थः	४०	१५
दीक्षास्थाननिर्णयः	८४	२
दीक्षितस्य तत्क्षणे जपनियमः	३१३	२
दीपनाथभैरवपूजनम्	३२४	५
दीपपात्रम्	२४६	४
दीपपुरश्चरणम्	६९०	१४
दीपभेदाः	२४५	१७
दीपभ्रामणम्	२४७	१
दीपशब्दार्थः	२४७	२५
दीपस्थानदिङ्नियमः	२४६	१५
दीपिनीमन्त्रः	२२०	२
दीपिनीविद्याप्रकरणम्	८०३	५
दुर्गागायत्री	५०८	५
"	१०१५	१३
"	१०३४	१
दुर्गागुरुपङ्क्तयः	२०७	२२

विषयाः	पृ.	प.
दुर्गापूजार्थं मण्डपः	९६२	११
दुर्गाप्रकरणम्	९५२	४
दुर्गामन्त्रादि	९५२	६
दुर्गामूर्त्तिमुखदिक्	९६३	१८
दुर्गामूर्त्तिलक्षणम्	९६२	२१
दुर्गायन्त्रम्	११५९	६
दुर्गायाः प्रशस्तपुष्पम्	२३७	२६
दुर्गोत्सवविधिः	९५८	२२
दुःस्वप्नशान्तिः	२९८	२७
"	३७६	२४
दुःस्वप्नाः	२९६	५
दूतीयागफलम्	६०७	२५
दूतीयागविधिः	५९२	६
दूतीयागाधिकारी	६१०	२०
दूतीयागोत्पत्तिः	६०९	४
दृग्दीक्षा	३९०	२६
देवतातर्पणम्	३३९	३१
देवतावाहनादि	२१७	१८
"	३४६	२१
देवतैकीकरणम्	३७९	२५
देवीबोधनकालनिर्णयः	९६६	१३
देवीरात्रिः	९६१	२०
देवीसूक्तम्	११७२	२
देव्या आम्नायभेदैर्नामभेदाः	१२	१
देव्या नानारूपाणि	११	२२
देहे कलास्थितिः	३८५	२४
द्रव्यशुद्धिः	१५३	३
द्वादशतरङ्गविषयकथनम्	९	१४
द्वादशनृसिंहमन्त्रादि	६६७	१०

विषयाः	पृ.	प.
द्वादशोपचाराः	२२४	१२
द्वारपूजाविधिः	१५१	४
द्वितीयनृसिंहमन्त्रादि	६६०	९
द्विवर्षादिकुमारीनामानि	११७४	११

[ध]

विषयाः	पृ.	प.
धनदासाधनम्	१२१४	७
धरणीमन्त्रादि	६४९	११
धरित्रीसाधनम्	१२२६	१८
धारणयन्त्रम्	११५९	१७
धूपभेदा देवताभेदेन	२४४	२०
धूपभेदाः	२४३	१७
धूपशब्दार्थः	२४५	१४
धूमावतीगायत्री	५०६	१५
धूमावतीप्रकरणम्	८२१	१७
धूमावतीप्रशस्तपुष्पम्	२३७	१७
धूमावतीयन्त्रम्	११५६	१६
धूम्रक्रमः	८५३	११
ध्यानम्	३४५	२७
ध्यानस्नानाविधिः	४९९	२१

[न]

विषयाः	पृ.	प.
नवकुलभेदौ	१०५७	२
नक्तपदार्थः	५४४	६
नक्षत्रचक्रम्	६८	१
नक्षत्रचक्रविचारः	६६	१
नक्षत्रफलं दीक्षायाम्	७७	९
नवग्रहप्रशस्तपुष्पाणि	२३८	१९
नवग्रहाणां वैदिकमन्त्रादि	९४२	२
नव भैरवाः	१०४४	१६
नवमतरङ्गविषयकथनम्	८	३
नवमीकृत्यम्	१०४६	२२
नवरत्नमुद्रा	११६५	४
नवरत्नानि	२१२	२०
नवरात्रम्	९६२	३
नवार्णमन्त्रपुटितसप्तशतीपाठः	११८५	२८
नवार्णमन्त्रः	११८६	६
नालापनयनप्रकारः	२८५	२५
नित्यकर्माणि	४६३	९
नित्यक्लिन्नामन्त्रादि	८७४	२
नित्यक्लिन्नायन्त्रम्	११५७	१७
नित्यपूजाविधिः	५१२	८
नित्यपूजासंकल्पः	५१२	१२
नित्यहोमविधिः	५१३	२३
नित्यहोमसंकल्पः	५१४	६
नित्यहोमे विशेषः	५१५	१०
नित्याभैरवी	८१२	२५
नियमाः	४६३	२
निर्वाणम्	५३३	१२
निर्माल्यधारणम्	३१०	२०
निर्माल्यभोजिदेवार्चनम्	३५५	१
निर्माल्यवासिदेवपूजनम्	३१०	९
निर्माल्यवासिदेवाः	३१०	१३
निर्माल्यवासिनीपूजनम्	११२०	६
निर्माल्यार्पणम्	३८२	१२
निषिद्धकुमारी लक्षणम्	१०८२	१७
निषिद्धगुरुलक्षणम्	४५	२२
निषिद्धपुष्पाणि	२३१	१६

विषयाः	पृ.	प.
निषिद्धबलिः	१०६१	३
निषिद्धशिष्यलक्षणम्	४७	८
निषिद्धश्छागः	१०६२	२
नीराजनमन्त्रः	११२४	७
नीलकण्ठ-(पक्षि)प्रणाममन्त्रः	११२८	१०
नीलकण्ठशिवमन्त्रादि	७०३	२
नीलक्रमः	८४०	१९
नीलसरस्वतीगायत्री	५०९	२०
नीलसरस्वतीमन्त्रादि	७८४	१४
नीलसरस्वतीयन्त्रम्	११५१	१९
नृसिंहगायत्री	५०४	१३
नृसिंहपुरश्चरणम्	६९०	१२
नृसिंहप्रकरणम्		
नृसिंहयन्त्रम्	११४१	१९
नृसिंहस्य कामनाभेदेन ध्यानादि	६५७	१९
नेमिपरिमाणम् (कुण्डे)	१३४	२५
नैर्ऋतमन्त्रादि	८९९	१०
नैर्ऋतयन्त्रम्	११९८	१८
नैवेद्यभक्षणम्	३१६	१५
नैवेद्यस्थापनदिङ्नियमः	२४८	३
नैवेद्यादिदानविधिः	२४८	१३
,,	२४९	२२
,,	३५३	१९
[प]		
पक्षफलं दीक्षायाम्	७६	८
पक्षिभेदाः	१०५८	२
पञ्चकर्माणि	३४	४
पञ्चकला	३७७	१९
पञ्चगव्यम्	१५३	१४
,,	४४०	२१
पञ्चगव्यशोधनमन्त्रः	१५३	२१
पञ्चपल्लवाः	३८४	१५
पञ्चप्राणाहुतिदानम्	३५४	७
पञ्चभूतबीजानि	९०३	२
पञ्चभूतमित्रामित्रविचारः	५८	९
पञ्चभूतवर्णाः	५७	२०
पञ्चमतरङ्गविषयकथनम्	४	२३
पञ्चवर्गाः	४८१	१२
पञ्चशुद्धिः	१५२	१४
पञ्चायतनदीक्षायां विशेषः	३१३	१३
पञ्चायतनदेवतास्थापनक्रमः	३८७	२३
पञ्चायतननिषेधः	३८९	१८
पञ्चायतनी दीक्षा	३८७	१८
पञ्चाशदौषधयः	२१३	३
पञ्चास्त्रकुण्डम्	१३०	१५
पञ्चोपचाराः	२२४	१
पत्रिकाचालनमन्त्रादि	११२०	१४
पत्रिकापूजा	१००९	१६
पत्रिकार्चनमन्त्रः	१०२२	११
पत्रिकास्थापने विशेषः	१००९	२०
पथिकादिकर्त्तृकोपासना	३४	१७
पद्मकुण्डम्	१३०	७
पद्मपूजाप्रकारः	२११	४
परमीकरणम्	२२०	१०
,,	३४६	१८

विषयाः	पृ.	प.
परशुराममन्त्रादि	६७०	१७
परशुरामयन्त्रम्	११४२	२
पशुदानविधिः	१०६४	२०
पशुपक्ष्यादिदैवतानि	१०७८	२
पशुपाशविमोचनीगायत्री	१०६५	१
पशुपाशविमोचनीगायत्र्यन्तरम्	१०६५	९
पशुभावः	८६४	२
पश्वनुकल्पबलिः	१०६३	४
पात्रभेदाः	२०१	६
पात्रविशेषः	१९२	१५
पात्रस्थापनदिङ्नियमः	२७७	१६
पात्रासादनम्	१९२	१०
,,	२७७	२
पाद्यपात्रम्	१४८	१५
पाद्यपात्रस्थापनम्	३३६	२४
पाद्यादिद्रव्याणि	१९६	२
पारिजातसरस्वतीमन्त्रादि	८७१	९
पाशुपतास्त्रमन्त्रादि	७०७	५
पाशुपतास्त्रयन्त्रम्	११४५	२१
पितृदीक्षानिषेधः	५१	२४
पितृदीक्षाप्राशस्त्यम्	५२	१३
पीठकुम्भे विशेषः	३४५	११
पीठनवशक्तयः	२६४	१५
पीठन्यासः	३३१	२
पीठपूजा	३४०	१४
,,	३६०	९
पीठपूजाप्रकारः	२०९	२४
पीठपूजा वैष्णवे	३६०	१३

विषयाः	पृ.	प.
पीठलक्षणम्	१४८	११
पीठशक्तिपूजाप्रकारः	२११	१५
पीठस्थानानि	४८२	१५
पीठस्थानोत्पत्तिः	४८३	८
पीठे कुम्भस्थापनम्	३४२	३
पुत्रिणो महाष्टमीव्रतनिषेधः	९७७	७
पुरश्चरणकर्त्तुर्भोजननियमः	५४४	४
पुरश्चरणकर्त्तुर्भोजनपात्रम्	५४४	१६
पुरश्चरणकर्त्तुः पेयजलम्	५४४	१५
पुरश्चरणकालः	४१६	१९
,,	५१५	२०
पुरश्चरणदेशाः	४२०	२०
पुरश्चरणपदार्थः	४१३	२
पुरश्चरणपूर्वकृत्यम्	४८४	२२
पुरश्चरणप्रयोजनम्	४१३	५
पुरश्चरणभेदाः	५६३	७
,,	५६८	१८
पुरश्चरणमावश्यकम्	४१३	१३
पुरश्चरणम्	५१५	२०
पुरश्चरणस्वरूपम्	४१४	४
पुरश्चरणार्थं भूमिपरिग्रहः	४७०	२३
पुरश्चरणीयवस्त्वनुकल्पः	७४४	१८
पुरश्चरणे आपन्नस्य साधनम्	५१७	१४
पुरश्चरणे आसनविशेषः	४२७	१३
पुरश्चरणे आसनानि	४२६	७
पुरश्चरणे नियमाः	४२०	१५
पुरश्चरणे निषिद्धदेशाः	४२३	१२
पुरश्चरणे निषिद्धान्नानि	४२५	१७

विषयाः	पृ.	प.
पुरश्चरणे निषिद्धासनानि	४२६	२४
पुरश्चरणे परान्नविचारः	४२४	१५
पुरश्चरणे भक्ष्यनियमः	४२३	२१
पुरश्चरणे महिषीदुग्धनिषेधः	४२४	१३
पुरश्चरणे संकल्पपूर्ववाक्यम्	५१५	२२
पुरश्चरणे संकल्पवाक्ययोजना	५१६	२
पुरश्चरणे संकल्पार्थं दिशा	५१५	२७
पुरश्चरणे सिद्धेरलाभे उपायः	५५८	२४
पुरश्चरणे सूतकादौ विचारः	५५०	८
पुरुषसूक्तपुरश्चरणम्	९३५	३
पुष्पप्रशंसा	२३८	२५
पुष्पभेदाः	२३१	३
पुष्पाञ्जलिदानम्	३५४	१४
पुष्पाभावे तत्प्रतिनिधिः	२३९	१३
पुस्तकलिखितमन्त्रजपनिषेधः	४१	७
पुंस्त्रीनपुंसकमन्त्राः	७३	६
पूजाद्यसक्तस्य पुरश्चरणम्	४६४	१०
पूजाद्रव्यसंस्कारः	३२५	१०
पूजान्ते जपः	३५४	१७
पूजान्ते स्तुतिः	११०६	२
पूजायन्त्रप्रमाणम्	५१९	११
पूजायन्त्रस्य न्यूनाधिक्ये फलम्	५१९	१४
पूजायन्त्रे सुवर्णादिमानम्	५१९	१९
पूजासामग्र्यभावे पूजनादि	३५	७
पूर्णपात्रनियमः	३०७	१५
पूर्णाभिषेक आवश्यकः	३९८	२
पूर्णाभिषेककलशः	३९९	११
पूर्णाभिषेककालः	३९८	७
पूर्णाभिषेकमाहात्म्यम्	४१०	९
पूर्णाभिषेकविधिः	३९८	१६
पूर्णाभिषेकः	३९७	१४
पूर्णाभिषेकार्थं तीर्थजलानि	४०१	२३
पूर्णाहुतिः	३०७	४
,,	३७९	१७
पूर्वादिकलशेषु पूजनम्	३४५	१६
पूर्वादितः कलशस्थापनम्	३४५	१३
पृथग्देवानां बलिः	१०५१	७
प्रकृतितत्त्वानि	३७८	४
प्रणवध्यानपुरश्चरणादि	९१३	६
प्रणवाद्युच्चारणे शूद्रस्य चाण्डालत्वम्	५६	८
प्रणामभेदाः	२५९	१२
प्रत्यङ्गिराप्रकरणम्	८७६	७
प्रत्यङ्गिरायन्त्रम्	११५७	२१
प्रमाणग्रन्थनामादि	१२२८	१४
प्रशस्तपशुलक्षणम्	१०६३	२४
प्रशस्तमासादि दीक्षायाम्	७५	११
प्राणप्रतिष्ठा	२२२	१
,,	३४८	१८
प्राणप्रतिष्ठामन्त्रः	१६८	११
प्राणवायुः	५२७	२४
प्राणशक्तिध्यानम्	३४८	१२
प्राणशक्तिन्यासार्थं विनियोगः	३४७	५

विषयाः	पृ.	प.
प्राणशक्तिन्यासे ऋष्यादिन्यासः	२४७	८
प्राणस्थापनम्	३२७	६
प्राणादिपञ्चमुद्रा	२४९	५
प्राणायामपुरश्चरणम्	११९९	५
प्राणायामभेदाः	१६३	१५
प्राणायामलक्षणम्	१६१	१७
प्राणायामेऽङ्गुलिनियमः	१६२	२१
प्रातःकालादिपरिभाषा	९६७	१३
प्रातःकालादिविचारो दीक्षायाम्	८३	१३
प्रातःकाले इष्टदेवाचिन्तनम्	४८६	२१
प्रातःकृत्यम्	४८५	९
प्रोक्षणीपात्रस्थापनम्	३३६	१५

[ब]

विषयाः	पृ.	प.
बलराममन्त्रादि	६८३	१६
बलरामयन्त्रम्	११४५	१
बलिच्छेदनरीतिः	१०६७	२०
बलिच्छेदनास्त्राणि	१०६८	२
बलिदातृनिर्णयः	१०६९	७
बलिदानमन्त्रः	२५५	१५
,,	१०६७	२०
बलिदानसंख्या	१०६८	१७
बलिद्रव्याणि	२५५	५
,,	१०५०	१३
बलिमस्तकपतनफलम्	१०७३	५
बलिरक्तस्थापनपात्रम्	१०७२	११
बलिविशेषे देवतृप्तिकालः	१०५९	२
बलिः	१०४९	२२
बल्यन्ते जपस्तत्समर्पणं च	३५६	२५
बल्यन्ते दीपदानम्	१०७४	२०
बल्यन्ते स्तुतिः	१०७६	१५
बहिर्मातृकान्यासः	१६९	२०
बहिर्मातृकान्यासः संहारक्रमेण	१७०	२५
,,	३३०	२
बहिर्मातृकान्यासः सृष्टिक्रमेण	१६९	२०
,,	३२७	१२
बहिर्मातृकान्यासः स्थितिक्रमेण	१७१	७
,,	३२९	१६
बहिर्मातृकान्यासे विशेषः	१७१	१४
,,	३३०	१०
बालाप्रकरणम्	८०४	१४
बालायन्त्रम्	११५४	१३
बीजनामानि	१४३	२५
बीजवपनम्	१४३	१७
बीजसेचनम्	१४४	६
बीजाङ्कुरादितः फलानि	१४५	१३
बीजे जातिविभागः	९६	२०
बीभत्सवाक्यैः क्रीडा मूर्तिचालनान्ते	११२१	४
बुद्धमन्त्रादि	६९१	१५
बुद्धयन्त्रम्	११४५	२
बुधमन्त्रादि	८८७	२३
,,	९४४	५

विषयाः	पृ.	प.
बुधयन्त्रम्	११५८	१४
बृहदर्घपात्रम्	१४८	१९
बृहस्पतिमन्त्रादि	८८८	१३
,,	९४४	२२
बृहस्पतियन्त्रम्	११५८	१४
बोधनकालः	९६७	१८
ब्रह्मणो मानसपुत्रा ऋषयः	७४६	१८
ब्रह्मदक्षिणा	३०७	१४
,,	३६८	१९
,,	३८०	१६
ब्रह्ममन्त्रादि	९०२	११
ब्रह्मयन्त्रम्	११५८	२०
ब्रह्मार्पणम्	३०६	१२
ब्रह्मावरणम्	२७७	९
,,	३६८	२९
ब्राह्मणभोजनम्	३१५	२०
ब्राह्मण्यादिभूमिः	९७	१४
ब्राह्मीयन्त्रम्	११५८	२१
ब्राह्म्याद्यष्टशक्तिमन्त्रादि	११३०	५

[भ]

भगमालामन्त्रः	६०४	१३
भद्रकालीध्यानादि	७५४	२२
भवानी-(गौरी)यन्त्रम्	११४६	४
भस्मधारणम्	५०१	१२
भस्मधारणं शूद्रस्य	५०२	९
भस्मनिर्माणम्	५०१	८
भस्मसंग्रहः	५०१	६
भस्मसंस्कारः	५०१	१७

विषयाः	पृ.	प.
भिक्षान्नानि	४२४	२३
भुवनेश्वरीगायत्री	५०६	८
भुवनेश्वरीप्रकरणम्	८०६	१७
भुवनेश्वरीभैरवीमन्त्रादि	८१०	७
भुवनेश्वरीभैरवीयन्त्रम्	११५५	५
भुवनेश्वरीमातृकान्यासः	१७८	९
भुवनेश्वरीयन्त्रम्	११५४	२०
भुवनेश्वर्यादिविहितपुष्पम्	२३७	१३
भूतबलिः	२५१	३
,,	२५७	१०
,,	३५६	११
भूतलिपिदर्शनम्	११६१	२४
भूतलिपिध्यानम्	११६२	१०
भूतलिपिनिर्णयः	११६१	८
भूतलिपिपुरश्चरणम्	११६३	३
भूतशुद्धिप्रकारः	१६४	२०
भूतशुद्धिः	३२६	९
भूतशुद्धेः संक्षिप्तप्रकारः	१६८	३
भूतापसारणम्	३२३	२८
,,	१०१९	१०
भूमिक्षमापनं प्रातःकृत्ये	४९४	२२
भूमिपरीक्षा	९६	९
भूमिप्रार्थना वास्तुचक्रकोष्ठखनने	१२१	२२
भैरवक्रमः	८४८	१६
भैरवतर्पणम्	३३९	१७
भैरवनामान्तराणि	१४	६
भैरवसाधनम्	१२०३	१९

विषयाः	पृ.	प.
भैरवी-(त्रिपुराभैरवी)-प्रकरणम्	८०८	२०
भौममन्त्रादि	८८६	६
”	९४३	९
भौमयन्त्रम्	११५८	४
भ्रातृदीक्षानिषेधः	५२	१

[म]

विषयाः	पृ.	प.
मङ्गलाचरणम्	१	१
मणिकर्णिकामन्त्रादि	८८३	१६
मण्डपरचनासमयः	१२३	९
मण्डपरचनार्थं दिग्ज्ञानम्	१२२	१४
मण्डपस्थलोच्छ्रायः	१२३	२५
मण्डपहस्तनियमः	१२३	१२
मण्डपे कलशादयः	१२७	५
मण्डपे तोरणानि	१२५	१०
मण्डपे द्वाराणि	१२५	५
मण्डपे ध्वजाः	१२६	२०
मण्डपे विघ्ननिवारणार्थं न्यग्रोधादिस्थापनमन्त्राः	१२५	१८
मण्डपे वेदीरचना	१२७	२०
मण्डपे स्तम्भाः	१२४	४
मत्स्यपुरश्चरणादि	६४५	२१
मत्स्ययन्त्रम्	११४१	१०
मत्स्यभेदाः	१०५६	१०
मधुपर्कपदार्थः	२०३	६
मधुपर्कपात्रभेदाः	२०२	२८
मधुपर्कपात्रम्	१४८	१८
मधुपर्कपात्रस्थापनम्	३२९	१२
मधुपर्कः	२२७	१५
मध्यमपूजा	७६	२१
मनुष्यभेदः	१०५६	८
मनुष्ये पशुत्वकरणम्	५२२	१८
मनोहरासाधनम्	१२१२	१७
मन्त्रचैतन्यम्	५२८	१२
मन्त्रजागृतिः	९४	२१
मन्त्रदानम्	३८२	२१
मन्त्रदानविधिः	३०७	२३
मन्त्रपदार्थः	४१	१७
मन्त्रप्रतिष्ठा अधिकारिभेदेन	५२२	१२
मन्त्रमाहात्म्यम्	४१	२०
मन्त्रविशेषेषु देवताविशेषाणां शापाः	८४	१४
मन्त्रशिखा	५२८	२
मन्त्रशुद्धिलक्षणम्	१५३	१
मन्त्रशोधनप्रकारः	९०	९
मन्त्रशोधनावश्यकचक्राणि	५७	१५
मन्त्रसिद्धिदा देशाः	४२१	९
मन्त्रसिद्धिप्रकारः पुरश्चरणं विना	१२००	४
मन्त्रसिद्धिप्रकारो दरिद्रस्य	५४९	१२
मन्त्रसिद्धिभयान्याश्चर्याणि	५५६	१
मन्त्रसिद्धिलक्षणम्	५५३	४
मन्त्रसिद्धेरुपायान्तराणि	५६०	२
मन्त्रसिद्धेर्विघ्नदः समयः	५५५	१५
मन्त्रसिद्धेः सिद्धयः	५५४	१५
मन्त्रस्नानविधिः	४९९	१०
मन्त्रस्य फलदातृत्वम्	४१६	१

विषयाः	पृ.	प.
मन्त्रस्य सूतकादिदोषाः	५२६	२०
मन्त्रस्य सूतकादिदोषापकृतिः	५२७	४
मन्त्रस्य स्वापप्रबोधौ	५२७	१५
मन्त्राणां जननादिप्रकारः	९२	९
मन्त्राणां दशसंस्काराः	९२	५
मन्त्रार्थादिज्ञानमावश्यकम्	५२६	११
मन्त्रावयवाः	५३६	२३
मन्त्रोत्पत्तिः	७३	२
मन्त्रौषधम्	६०७	६
मन्वन्तरभेदेन राममन्त्राः	६७८	२४
मल्लनियुद्धम्	११२९	२
महाकालध्यानम्	७५३	१२
महाकालपुरश्चरणम्	७५३	२४
महाकालमन्त्रः	७५२	२२
महाकालीमन्त्रध्यानादि	७५४	५
महागणपतिमन्त्रः	४७४	८
महागणपतिमन्त्रादि	६३५	१२
महागणपतिमन्त्रेण हवनम्	३७४	७
महागणपतियन्त्रम्	११४०	१६
महाचीनक्रमः	८४३	५
महादेवप्रार्थनं प्रातःकृत्ये	४८७	१७
महानवमीनिर्णयः	९८५	१६
महाबलौ विशेषः	१०७०	२१
महाभये आह्निकम्	३६	७
महाराजक्रमः	८५१	९
महालक्ष्मीध्यानम्	९५६	२५
महालक्ष्मीमन्त्रादि	८३४	१९
महाष्टमीनिर्णयः	९८१	११
महासेतुः	५३२	२२

विषयाः	पृ.	प.
महिषबलिदाने विशेषः	१०६९	१७
महिषभेदौ	१०५६	१९
महिषमर्दिनीमन्त्रादि	९५२	२३
महिषासुरोत्पत्तिः	९९७	१३
महौषधी	१०१५	१९
माङ्गल्यद्रव्याणि	१००७	७
मातङ्गीगायत्री	५०६	१९
मातङ्गीप्रकरणम्	८२७	७
मातङ्गीप्रशस्तपुष्पम्	२३७	१५
मातङ्गीयन्त्रम्	११५६	२५
मातामहदीक्षानिषेधः	५१	२४
मातृकान्यासपुरश्चरणम्	११६३	११
मातृकान्यासमुद्रा	१८३	६
मातृकान्यासार्थमृष्यादिन्यासः	१६९	२०
,,	३२७	१६
मातृकान्यासार्थं संकल्पः	३१७	१२
मातृकायन्त्रम्	११४८	२
मातृदीक्षाप्राशस्त्यम्	५३	९
मात्राकारलक्षणम्	१६१	२१
मानसस्नानविधिः	५००	७
मानसीदीक्षा	३९०	८
मान्त्री दीक्षा	३९१	२४
मार्गभेदेन गणेशवटुकादिक्रमः	२५७	६
मार्गभेदेन दीक्षाकालः	८३	६
मार्गभेदेन पूर्णाभिषेकः	४०८	२३
मार्गभेदेनाधिकारिभेदाः	२२	१७
मार्गविरोधे कर्त्तव्यम्	३२	२

विषयाः	पृ.	प.
मार्गव्यवस्था	२०	१४
मार्जनम्	५४६	२३
मार्तण्डभैरवमन्त्रादि	६४२	७
मालाकारः	४४१	१६
मालाग्रथनकालः	४३९	७
मालाग्रथनप्रकारः	४४०	३
मालाग्रथने सूत्रभेदाः	४३९	१४
मालाग्रन्थिनियमः	४४१	१९
मालातोऽविघ्नप्रार्थनमन्त्रः	५३९	१२
मालानियमच्युतौ हानिः	४४४	१४
मालानियमाः	४४४	२
मालापूजनम्	४४३	१३
मालाप्रार्थनमन्त्रः	५३९	९
मालाभङ्गे उपायः	४४४	२५
मालाभेदाः	२३५	१७
”	४३०	११
मालामन्त्रः	५४३	१३
मालायन्त्रम्	११५८	२४
मालायां जपेऽङ्गुलिनियमः	४४५	७
मालासंस्कारः	४४०	१५
मालासंस्कारोऽधिकरिविशेषे	४४६	१५
मासफलं दीक्षायाम्	७५	३
माहेश्वरीमन्त्रादि	११३०	२२
मुक्तिभेदाः	१६	२
मुद्रानामानि	४५०	१
मुद्रापदार्थः	४४९	१०
मुद्राप्रदर्शनार्थमवसराः	४४९	२२
मुद्रालक्षणानि	४५१	१६

विषयाः	पृ.	प.
मुद्रिका	१४८	२९
मुष्ट्यादिपरिमाणानि	३०७	२०
मूर्त्त्यादिचालनमन्त्रः	११२०	१४
मूलदेवतातर्पणम्	३५२	२३
मूलदेवतापादुकार्चनम्	३५२	२०
मूलदेवतार्चनं प्रधानकलशे	३४५	२५
मूलाधारे गणेशध्यानम्	४९१	८
मृगभेदाः	१०५६	१३
मृग्यादयस्तिस्रो मुद्रा हवने	२८२	२३
मृत्तिकाहरणम्	१४३	२
मृत्युञ्जयमन्त्रादि	६९९	२३
मृदापहरणमन्त्रः	४९६	२१
मृदुचूडासने	७२९	६
मृद्वासनाद्यनुकल्पः	७२९	१८
मृन्मूर्त्तिदुर्गापूजनादि	१०२२	१९

[य]

विषयाः	पृ.	प.
यतिदीक्षानिषेधः	५२	३
यतिवानप्रस्थादीनां मातृकाक्रमः	१७१	१५
”	३३०	१०
यन्त्रगायत्री	५२१	२३
”	११६०	१५
यन्त्रपुरश्चरणानि	१५९	८
यन्त्रप्रतिष्ठाविधिः	५२०	१९
यन्त्रलिखनद्रव्याणि	५२४	१५
यन्त्रविशेषार्थमष्टगन्धः	५२३	२३
यन्त्रे ताम्रादिमये पूजावर्षाणि	५२५	८

विषयाः	पृ.	प.
यन्त्रे ताम्रादिमये फलानि	५२५	१४
यन्त्रे प्रस्ताराः	५२५	२०
यन्त्रे रेखा	५२५	२५
यममन्त्रादि	८९८	२४
यमयन्त्रम्	११५८	१७
यववपनविधिः	९७५	१५
युगभेदेन कल्पोक्तजपसंख्या	५४५	८
युगभेदेने मार्गभेदप्राधान्यम्	३१	१२
युगभेदेनोपास्यदेवता	१६	८
युगादितिथयः	७९	२
योगफलं दीक्षायाम्	७८	२३
योनिकुण्डम्	१२९	१३
[र]		
रक्तपुष्पस्य विशेषता	२३४	६
रतिप्रियासाधनम्	१२२५	२२
राजमातङ्गीमन्त्रादि	८२८	२३
राजमातङ्गीयन्त्रम्	११५७	५
राजसीपूजा	३७	३
राजस्युपासना	३७	१४
रात्रिसूक्तम्	११७२	२
रामगायत्री	६८२	१८
राममन्त्रपुरश्चरणम्	५७७	१२
राममन्त्रादि	६७१	२५
राममन्त्रार्थः	६७३	७
राममन्त्रो लक्ष्मणोपासितः	६७८	७
रामयन्त्रम्	११४२	७
रामस्य धारणयन्त्रे यन्त्रलिखनक्रमः	११४२	१८
रामस्य शिवशक्त्यात्मकत्वप्रदर्शनम्	१८	१६
रामोत्पत्तिमासादि	५७७	९
राशिचक्रम्	६६	१
राशिचक्रविचारः	६४	८
राहुमन्त्रादि	८९०	१७
,,	९४६	२२
राहुयन्त्रम्	११५८	१४
रुद्रगायत्री	४४२	१७
रुद्रभैरवीमन्त्रादि	८१३	४
रुद्रभैरवीयन्त्रम्	११५५	१२
रुद्राक्षधारणप्रकारः	४३८	९
रुद्राक्षभेदास्तन्माहात्म्यं च	४३६	२
रुद्राक्षस्यैकादिमुखभेदेन नामानि	४३६	१३
रुद्राध्यायपुरश्चरणविधिः	९१५	११
रेवन्तादिपूजा	११०८	२३
रोगार्त्तकर्तृकोपासना	३५	७
[ल]		
लक्ष्मीगणेशमन्त्रादि	६३१	१९
लक्ष्मीगणेशयन्त्रम्	११४०	१२
लक्ष्मीगायत्री	५०७	२
लक्ष्मीनृसिंहमन्त्रादि	६६२	१६
लक्ष्मीमातृकान्यासः	१७८	२५
लक्ष्मीयन्त्रम्	११५७	११
लक्ष्मीवासुदेवपुरश्चरणम्	६४४	१४
लक्ष्मीविद्याप्रकरणम्	८३२	२३
लक्ष्म्याः प्रशस्तपुष्पाणि	२३७	२२

विषयाः	पृ.	प.
लग्नफलं दीक्षायाम्	७८	५
लोकपालमुद्रा	२४३	५
लोपामुद्राविद्यामन्त्रादि	७९६	१८

[व]

विषयाः	पृ.	प.
वक्त्रैकीकरणम्	३७५	८
वक्रतुण्डगणेशमन्त्रादि	६३३	१८
वगलामुखीगायत्री	५०६	२२
वगलामुखीप्रकरणम्	८२४	२१
वगलामुखीप्रशस्तपुष्पम्	२३७	१४
वगलामुखीयन्त्रम्	११५६	१८
वज्रपुष्पस्य त्रैविध्यम्	२३४	१२
वज्रादिदशशस्त्रपूजनम्	३५२	१४
वटुक-(बाल-)पूजनम्	१०८९	१
वटुकमन्त्रः	४७४	४
वटुकयन्त्रम्	११४५	२४
वटुकादिबलिदानम्	२५५	१५
वटुकादिबलिदाने करादिनियमः	२५४	२१
वनदुर्गामन्त्रादि	९५४	२०
वनदुर्गायन्त्रम्	११५९	२
वराहमन्त्रादि	६४७	२१
वराहयन्त्रम्	११४१	१६
वरुणमन्त्रादि	८९९	२०
वरुणयन्त्रम्	११५८	१८
वर्गचक्रम्	६४	५
वर्गचक्रविचारः	६३	४
वर्णभेदेन कुण्डभेदाः	१३६	१०
वर्णमयी दीक्षा	३८५	४
वर्णमयी माला	४३०	१७
वर्णौषधिपुरश्चरणम्	५८३	२१
वर्त्तिकाभेदाः	२४५	२०
वश्यमातङ्गीमन्त्रादि	८३१	२२
वश्यमातङ्गीयन्त्रम्	११५७	६
वस्तुविशेषेऽग्निध्यानम्	३००	११
वाग्मतीमन्त्रादि	८८४	७
वाग्मतीयन्त्रम्	११५८	१
वाचिकी दीक्षा	३९१	१४
वामनमन्त्रादि	६६८	२२
वामनयन्त्रम्	११४१	२४
वामनस्य षड्भेदाः	६६९	५
वायुमन्त्रादि	९००	८
वायुयन्त्रम्	११५८	१९
वारफलं दीक्षायाम्	७७	४
वाराहीबीजम्	४७४	१३
वाराहीमन्त्रादि	११३३	१८
वाराहीयन्त्रम्	११५८	२२
वासन्तीपूजा	११२९	९
वास्तुकोष्ठखननम्	१२१	११
वास्तुकोष्ठखनितृदक्षिणा	१२१	२१
वास्तुकोष्ठखनितृपूजनमन्त्रः	१२१	१५
वास्तुचक्रकोष्ठखननार्थं कुद्दालपूजनमन्त्रः	१२१	१२
वास्तुचक्रोक्तदेवबलिमन्त्राः	११५	४
वास्तुदेवविसर्जनम्	१२१	७
वास्तुध्यानम्	११२	७
वास्तुबलिमन्त्रः	४७३	५
वास्तुयागविधिः	१०५	८

विषयाः	पृ.	प.
वास्तुयागावश्यकत्वम्	१०४	८
वास्तुयागोत्पत्तिः	१०४	१७
वास्तुशेषकृत्यम्	१२०	१०
विघ्नगणेशमन्त्रादि	६३८	६
विघ्नराजमन्त्रादि	६३०	४
विघ्नराजयन्त्रम्	११४०	८
विघ्नोत्सारणम्	१५२	५
,,	१५४	२
,,	३२३	१०
विघ्नोत्सारणमन्त्रः	१५४	१५
,,	३२३	११
,,	४७१	२२
विजयादशमीकृत्यम्	१११९	१७
विजयादशमीनिर्णयः	९८८	२७
विधवादीक्षानिषेधः	५३	१२
विप्रादिकर्त्तृकोपासनायां विशेषः	७४५	१६
विभूतिधारणम्	५०१	४
विभूषणीसाधनम्	१२२१	२०
विरिञ्चिगणनायकमन्त्रादि	६३७	११
विल्वपत्रार्पणे विशेषता	२३५	११
विल्वाभिमन्त्रणम्	१००८	५
विशुद्धचक्रे जीवात्मध्यानम्	४९२	६
विशेषार्घस्थापनविधिः	२००	२१
,,	३३६	२८
विष्टरलक्षणम्	१४८	१३
,,	७२९	२४
विष्टरसंस्कारः	७३०	१५
विष्णुपूजायां द्वारपूजनम्	३२२	२५
विष्णुप्रतिमाप्रमाणम्	५२३	८
विष्णुमन्त्रादि	६४३	३
विष्णुयन्त्रम्	११४१	७
विष्णुरात्रिः	९६१	२५
विसर्जनम्	१११९	१९
विहिताविहितपुष्पविचारः	२३९	८
वीरदीक्षायां विशेषः	३१६	२५
वीरपुरश्चरणम्	५८४	१६
वीरपुरश्चरणे आसनम्	५८७	२०
वीरपुरश्चरणे पूजितशक्तिस्तवः	५८६	५
वीरपुरश्चरणे पूज्यशक्तयः	५८५	६
वीरपुरश्चरणे पूज्यशक्तिपूजा	५८५	१५
वीरपुरश्चरणे शक्तिविचारः	५८८	२०
वीरभावः	८५७	१५
वीररात्र्यादयः	९५९	२४
वीरसाधनम्	६२६	७
वृत्तकुण्डम्	१३०	१
वेदिकायां स्थाण्डिलादिनिर्माणम्	३२४	१२
वैदिकतान्त्रिककुण्डयोर्भेदः	१३५	४
वैदिकबलिः	१०५०	१३
वैदिकब्राह्मणलक्षणम्	५४	२६
वैदिकमृत्युञ्जयमन्त्रादि	९१४	११
वैश्वदेवहोमविधिः	२५०	१६
वैश्वदेवहोमः	३५४	१९
वैष्णवतत्त्वानि	३०३	३
,,	३७७	२४
वैष्णवभेदाः	२७	१६

विषयाः	पृ.	प.
वैष्णवमन्त्रपुरश्चरणे विशेषः	४१७	१९
वैष्णवादिभेदेन चक्रविचारो दीक्षायाम्	५७	८
”	७२	४
वैष्णवीमन्त्रादि	११३१	२५
वैष्णवीयन्त्रम्	११५८	२१
व्याघ्रभेदाः	१०५६	२३
व्याहृतिहोमः	२८३	२२
”	३७१	९

[श]

विषयाः	पृ.	प.
शक्तिगणेशमन्त्रादि	६६१	१३
शक्रमन्त्रादि	८९७	१३
शक्रयन्त्रम्	११५८	१६
शङ्खस्थापनम्	३३३	३०
शङ्खावश्यकता विष्णुपूजायाम्	१९७	३
शतचण्डीमाहात्म्यम्	११७७	४
शतचण्डीविधिः	११७२	२६
शतचण्ड्यादिदक्षिणा	११७६	१७
शनिमन्त्रादि	८८९	२२
”	९४६	५
शनियन्त्रम्	११५८	१४
शमीतरुप्रणाममन्त्रः	११२८	१६
शयनदिङ्नियमः	२८९	२५
शयननियमः	४६५	४
शरभमन्त्रादि	७०४	१०
शरभः	१०५७	३
शरीरस्थपीठे स्थानानि	४९०	९
शल्योद्धारः	१००	१३

विषयाः	पृ.	प.
शवसाधनम्	६१८	५
शाक्ततत्त्वानि	३०३	१६
”	३७८	६
शाक्तपुरश्चरणे विशेषः	४१८	२
शापितादयो मन्त्राः	८५	३
शाम्भवी दीक्षा	३९२	१९
शाम्भवी मुद्रा	१११६	१६
शारदीपूजाफलम्	११२३	१
शारदीयात्राप्रकारः	११२४	२२
शारदोत्सवनिदानम्	९९३	१५
शावरमन्त्रपुरश्चरणम्	६११	१०
शावरमन्त्राणां जागृतिः	९५	९
शाक्ती दीक्षा	३९२	११
शिवगायत्री	५०३	१९
शिवनैवेद्यभक्षणनियमः	३१६	१८
शिवप्रकरणम्	६९७	३
शिवमन्त्रग्रहणमावश्यकं शाक्तस्य	१४	१४
शिवयन्त्रम्	११४५	९
शिवलिङ्गप्रमाणम्	५२३	१०
शिवस्नानम्	५००	१३
शिवाबलिः	११०२	६
शिवास्तुतिः	११०४	२०
शिष्यलक्षणम्	४६	६
शिष्यस्य देवतासन्निधेनयनम्	३०७	२३
”	३८०	२५
शिष्यस्य नामकरणम्	३१३	१७
”	४०९	२०

विषयाः	पृ.	प.
शिष्यस्य यागस्थले प्रवेश-दिङ्नियमः	३०१	१५
शिष्याचमनम्	३११	२५
शिष्याध्वशोधनम्	३०१	१७
शिष्याभिषेकः	३८२	१५
शिष्यार्थं दन्तधावनम्	२८९	८
शिष्यार्थं वरप्रार्थना	३०९	६
,,	३८१	२५
शिष्योपवेशनार्थमासनम्	३११	४
शिष्योपवेशनार्थं दिङ्नियमः	३११	७
शीतलापतिमन्त्रः	११३९	२४
शीतलामन्त्रादि	११३८	२३
शुक्रमन्त्रादि	८८९	५
,,	९४५	१३
शुक्रयन्त्रम्	११५८	१४
शुभस्वप्नाः	२९१	१३
शूकरभेदाः	१०५६	१७
शूद्रस्य पुराणादिपाठनिषेधः	५५	२३
शूद्रस्य वेदश्रवणनिषेधः	५६	१
शूद्रादिदीक्षादाननिषेधः	५४	२
शूद्रादिलिखितसप्तशती-पाठनिषेधः	११७१	९
शूद्रादीनामध्वशोधननिषेधः	३०४	१९
शूलिनीमन्त्रादि	९५३	२६
शैवभेदाः	३०	११
शौचमन्त्रः	४९५	३
शौचविधिः	४९४	२५
श्मशानकालीमन्त्रादि	७५७	११
श्मशानकालीयन्त्रम्	११५०	२१

विषयाः	पृ.	प.
श्मशानादिलक्षणम्	७३२	१४
श्यामलामन्त्रादि	११३४	७
श्रीधरमन्त्रादि	६९६	१०
श्रीयन्त्रदर्शनफलम्	११५२	१६
श्रीयन्त्रदानफलम्	११५२	२६
श्रीयन्त्रपूजनफलम्	११५२	२३
श्रीयन्त्रपादोदकमाहात्म्यम्	११५३	३
श्रीयन्त्रम्	११५२	७
श्रीयन्त्रोद्धारप्रकारः	११५३	८
श्रीविद्यापूजायां विशेषः	२५२	२
श्रीविद्याप्रकरणम्	७९६	११
श्रीविद्याप्रशस्तपुष्पाणि	२३६	२१
श्रीविद्यायां करमाला	४४८	९
श्रीसूक्तपुरश्चरणादि	९४०	८

[ष]

विषयाः	पृ.	प.
षट्कूटाभैरवीमन्त्रादि	८१२	१७
षट्कूटाभैरवीयन्त्रम्	११५५	८
षट्पदमातृकाचक्रम्	७२	१
षट्पदमातृकाचक्रविचारः	७१	४
षडङ्गधूपौ	२४४	७
षडस्रकुण्डम्	१३०	३
षष्ठीकृत्यम्	१००२	२
षष्ठीनिर्णयः	९७७	१६
षोडशभुजादुर्गाध्यानम्	९६४	१७
षोडशाङ्गधूपः	२४४	१३
षोडशीप्रकरणम्	७९६	२४
षोढान्यासपुरश्चरणम्	११६५	१९

[स]

विषयाः	पृ.	प.
सकलीकरणम्	२१९	१६
”	३४६	१७
सन्धिपूजनम्	१०४६	३
सन्ध्यालोपप्रायश्चित्तम्	५०८	२३
सन्ध्याविधिः	५०२	१५
सन्निधापनम्	३४६	९
सन्निरोधनम्	३४६	११
सन्यासिदीक्षानिषेधः	५२	३
सप्तमीकृत्यम्	१००८	४
सप्तमीनिर्णयः	९७९	२८
सप्तविकीर्णद्रव्याणि	३२३	२५
सप्तशती-ऋष्यादिन्यासः	११६९	२५
सप्तशतीतः प्रश्नविधिः	११९७	१९
सप्तशतीपाठक्रमः	१०४८	४
”	११७०	१३
सप्तशतीपुरश्चरणम्	११७२	१०
सप्तशतीपुरश्चरणं नवरात्रे	११७२	१८
सप्तशतीप्रथमचरित्रे मन्त्राः	११८६	२५
सप्तशतीप्रयोगाः	११८४	४
सप्तशतीमध्यमचरित्रे मन्त्राः	११८८	१०
सप्तशतीमन्त्राः कात्यायनीयाः	११९३	८
सप्तशतीविधानम्	११६९	१६
सप्तशतीहोमादौ विशेषः	११९२	४
सप्तशत्यभिषेकमन्त्राः	११७६	१३

विषयाः	पृ.	प.
सप्तशत्याः ५अध्याये मन्त्राः	११८९	६
” ६ ”	११९०	३
” ७ ”	११९७	११
” ८ ”	११९०	१६
” ९ ”	११९०	२०
” १० ”	११९१	१
” ११ ”	११९१	९
” १२ ”	११९१	१८
” १३ ”	११९२	१
सप्तास्त्रकुण्डम्	१३०	१९
सम्पत्प्रदाभैरवीमन्त्रादि	८११	८
सम्पत्प्रदाभैरवीयन्त्रम्	११५५	५
सम्प्रदायः	८६६	३
सम्मुखीकरणम्	२१९	७
”	३४६	१३
सम्मोहनमातृकान्यासः	१७९	१२
सरस्वतीध्यानम्	९५७	१३
सरस्वतीप्रकरणम्	८६८	४
सरस्वतीयन्त्रम्	११५७	१५
सर्वभूतबलिमन्त्रः	४७४	२३
सर्वमङ्गलाध्यानम्	९६६	३
सर्वविघ्नानां प्रशस्तपुष्पाणि	२३७	१९
सर्वतोभद्रमण्डलकोष्ठरञ्जनद्रव्याणि	१५६	१०
सर्वतोभद्रमण्डलपूजनम्	३४०	१०
सर्वतोभद्रमण्डलम्	१५५	३
सर्वाम्नायपूजार्हा देवी	१३	१२
सर्वौषधिः	३८४	१०

विषयाः	पृ.	प.
सहस्रचण्डीविधानम्	११७७	१०
सहस्रचण्डीहोमविधिः	११७८	९
सहस्रदलकमले परमात्मध्यानम्	४९२	१६
सहस्रनामस्तवकवचपुरश्चरणम्	११६६	५
संक्षेपदीक्षा	३८४	५
संक्षेपसन्ध्या	५०९	३
संस्कारानिषेधः सिद्धमन्त्रे	५३	१६
संहारक्रमेण मातृकाध्यानादि	१७०	२५
,,	३३०	२
सात्त्विकी पूजा	३७	१
सात्त्विक्युपासना	३७	१२
सामान्यतत्त्वानि	३०३	१०
सामान्यपूजाभेदः	३६	१८
सामान्यमन्त्रः	५७	२
सामान्यार्घस्थापनम्	१५०	१८
,,	१९९	१४
,,	३२१	१६
साम्राज्यलक्ष्मीमन्त्रादि	८३९	२२
सारसपक्षिदर्शनफलम्	११२७	१३
सिद्धाद्यविचार्यमन्त्राः	७२	११
सिद्धिकालीमन्त्रादि	७५६	१६
सिद्धिलक्षणानि	५५३	४
सिद्धिलक्ष्मीमन्त्रादि	७५८	५
सिद्धिलक्ष्मीयन्त्रम्	११५१	२
सिन्दूरहारिणीसाधनम्	१२२३	५

विषयाः	पृ.	प.
सिंहभेदाः	१०५७	१
सिंहिनीसाधनम्	१२२३	१७
सीतामन्त्रादि	६८३	४
सुदर्शनगायत्री	५०४	२०
सुन्दरीसाधनम्	१२१०	१७
सुमुखीमन्त्रादि	८३०	१२
सुमुखीयन्त्रम्	११५७	८
सूतिककर्तृकोपासना	३५	२३
सूर्यगायत्री	५०४	५
सूर्यग्रहणं विशिष्टं दीक्षायाम्	८०	२
सूर्यचन्द्रकला	२१५	८
सूर्यचन्द्रग्रहणयोर्विशेषः	९०	८
सूर्यतस्तीर्थप्रार्थनम्	४९७	९
सूर्यदेवीपूजयोर्द्वारपूजनम्	३२३	५
सूर्यमन्त्रस्त्र्यक्षरः	५११	६
सूर्यमन्त्रादि	६२९	२०
,,[1]	९४१	२४
सूर्ययन्त्रम्	११४०	२३
सूर्यराशिफलं दीक्षायाम्	८०	१५
सूर्यस्य द्वादश नामानि	११	११
सूर्यार्घदानमन्त्रः	१५९	२०
,,	३२५	७
,,	५०९	२४
,,	५११	२०
सूर्यार्घदानमावश्यकम्	५०९	१९
सूर्याम्नायः	११	५
सृष्टिक्रमेण मातृकाध्यानादि	१७०	५
,,	३२८	५

---

[1] अत्र ध्याने काचित् त्रुटिरस्ति तदर्थं शुद्धिपत्रं विलोक्यम् ।

विषयाः	पृ.	प.
सेतुः	५३२	१५
सौभाग्यक्रमः	८५४	४
सौरतत्त्वानि	३०३	७
”	३७८	१
स्त्रीदीक्षाविधिः	५३	९
स्त्रीनियमाः	४६४	१३
स्त्रीशूद्रयोर्मन्त्रश्रावणानियमः	३१२	२२
स्त्रीशूद्राणां मालासंस्कारः	४४५	१९
स्त्रीशूद्रादिदेयमन्त्रविचारः	५५	१५
स्थण्डिललक्षणम्	१३९	२
स्थानशुद्धिलक्षणम्	१५२	२०
स्थानसाधकनाम्नोर्मित्रामित्रविचारः	४८०	५
स्थितिक्रमेण मातृकाध्यानादि	१७१	४
”	३२९	१६
स्थिररेखायन्त्रप्रतिष्ठाकालः	५१९	२२
स्नानविधिः	४९६	२
स्पार्शी दीक्षा	३९०	२६
स्मर-(काम-)मन्त्रादि	७२०	२३
स्मरयन्त्रम्	११४७	२३
स्मार्त्तबलिः	१०५०	९
स्मार्त्ती दीक्षा	३९०	३
स्रुक्स्रुवसंस्कारः	२७९	१२
”	३६९	७
स्रुग्लक्षणम्	१३९	८
स्रुवधारणप्रकारः	२७२	३
स्रुवलक्षणम्	१४०	२५
स्वकर्तृकपत्न्यादिदीक्षाविचारः	५१	१७
स्वदेहे पीठपूजनम्	३४०	३
स्वप्ननिर्णयः	२९१	१३
स्वप्ननिवेदनम्	२९०	१०
स्वप्नफलपाकसमयः	२९१	१८
स्वप्नमानवमन्त्रः	२९०	२२
”	३७६	५
स्वप्नवाराहीमन्त्रादि	११३५	७
स्वप्नवाराहीयन्त्रम्	११५८	२७
स्वप्नादिलब्धमन्त्रसंस्कारः	५३	१६
स्वलिखितसप्तशतीपाठनिषेधः	११७१	९
स्वाधिष्ठाने ब्रह्मध्यानम्	४९१	१३
स्वामिदीक्षाप्राशस्त्यम्	५१	२०
स्विष्टकृद्धोमः	२८३	१४
[ह]		
हनुमद्गायत्री	५०८	१५
हनुमद्यन्त्रम्	११४७	२०
हनुमन्मन्त्रादि	७१६	९
हयग्रीवगायत्री	५०४	२३
हयग्रीवमन्त्रादि	६९२	२४
हयग्रीवादियन्त्रम्	११४५	६
हरिद्रागणेशमन्त्रादि	६३४	२२
हरिहरमन्त्रादि	७०७	१८
हवनम्	२८३	३
”	३७०	१०
हवनार्थमग्निः	२६४	२३
”	३६१	५

विषयाः	पृ.	प.
हवने मृग्याद्यस्तिस्रो मुद्राः	२८२	२३
हविष्यान्नानि	४२३	२४
हेरम्बमन्त्रध्यानपुरश्चरणानि	६३४	५
हंसध्यानम्	४८९	१७
हंसिनीसाधनम्	१२२४	६
हीनब्राह्मणलक्षणम्	२४	१२
हुतशेषप्राशनम्	३१६	१३
हुताग्नौ देवपूजनम्	३७५	५
होमद्रव्यप्रमाणानि	९४९	८
होमः स्त्रीशूद्राणां निषिद्धः	५४९	२७
होमार्थं द्रव्यासादनम्	३६८	२६
होमार्थं पात्रासादनम्	२७७	२
,,	३६८	८
होमार्थमनुकल्पः	५४८	२२
,,	५५०	२६
होमार्थमनुकल्पो वर्णभेदेन	५४९	५
होमो दोषनिवारणार्थम्	३२१	११
हौत्री दीक्षा	३९२	४

पुरश्चर्यार्णवस्य शुद्धिपत्रम् ।

अशुद्धम् ।	शुद्धम् ।	पृ. ।	प.
धावननिधिं	धावनविधिं	६	५
ब्राह्मादि	ब्राह्मचादि	९	१४
नैऋते	नैर्ऋते	१३	६

वंशीधरं कृष्णदेहं चकार द्वापरे युगे ।
(तन्त्रराजेऽपि)
कदा चिदाद्या ललिता पुंरूपा कृष्णविग्रहा ।
वेणुनादसमारम्भादकरोद्विवशं जगत् ॥
अहं सदाशिवो देवः प्रकृतिर्विष्णुरुच्यते ।
त्रुटिः १७ ९

शैवतारा	सैव तारा	१७	१८
चगामखी	बगलामुखी	१९	२१
ऽस्विति	ऽस्त्विति	३५	१८
मिर्माले	निर्माले	३६	१७
ग्राह्यो	ग्राह्या	३९	२
प्रतिमा	प्रतिभा	४०	७
यस्य तुष्टा	यस्य तुष्टो	४२	७
ऽन्वयायक्षं	ऽन्ववायाद्यं	४६	८
घातकं	घातकं	४८	१
श्रोतसि	स्रोतसि	५०	२०
कालिद्धिं-	कलिद्धिं-	७१	१०
त्रेताऽसिय-	त्रेताऽसित-	८१	११
हूँकारो वा	हुँकारो वा	८५	१२
वंशत्रयादितः	वर्षत्रयान्वितः	८८	४
षद्विंश-	षड्विंश-	८९	५
युक्तमण्डप-	युक्लमण्ड-	९६	८
सिद्धैः	सिद्धै	१७	९६
भवन्त्यत्येव	भवन्त्येव	९८	६
कृतिका	कृत्तिका	९९	१
पूर्वंषाढा	पूर्वाषाढा	९९	७
भूमिस्थं	भूमिष्ठं	१०२	१४
विदाइ	विदारी	११०	४
संकिरी-	संनिरी	११३	१७

अशुद्धम् ।	शुद्धम् ।	पृ. ।	प.
भृङ्गाभौ	भृङ्गाभो	११४	९
पुष्पदि-	पुष्पादि-	११६	११
हृद्यं	हृद्यं	११७	१४
भूयांसेश-	भूयांशेऽंश-	१३०	३
वियोनीति	वियोनीनि	१३५	५
अर्धचन्द्रम् त्र्यस्त्रम्	त्र्यस्त्रम्- अर्धचन्द्रम्	१३७	१०
षडस्त्रम्	पञ्चास्त्रम्	१३८	३
पञ्चास्त्रम्	सप्तास्त्रम्	१३८	३
सप्तास्त्रम्	षडस्त्रम्	१३८	३
कुण्डमेकविधं	कुण्डमेवंविधं	१३९	२
रापर्णम्	रार्पणम्	१४१	४
दैर्घा-	दैर्घ्या-	१४२	१४
दीक्षादीनात्	दीक्षादिनात्	१४७	२४
रचयते	रचयेत्	१५०	१८
मदी	नन्दी	१५१	१६
सज्ञान-	संज्ञान-	१५२	१७
भूतानि	भूतानि	१५४	१६
द्वितीयकम्	द्वितीयकम्	१५५	१७
भित्वा	भित्त्वा	१५७	५
ह्रौँ ह्रीँ सः	ॐ ह्रौँ ह्रीँ सः	१५९	२०
तावत्काला	तावत्कला	१६२	२४
येनैष	येनैव	१६४	१०
अधिष्ठित-	अधिष्ठितं	१६४	२२
उँर्ध्वास्यं	ऊर्ध्वास्यं	१६९	४
भ्रमध्ये	भ्रूमध्ये	१६९	१५
स्वरुपणी	स्वरूपिणी	१७९	२
पूर्वयुक्तेति	पूर्वयुक्त्येति	१७९	१६
रात्मनं	रात्मानं	१८८	१८
स्रूचा	स्रुचा	१९०	९
स्रूवम्	स्रुवम्	१९०	१५
प्रोषाण-	पाषाण-	१९२	११
शङ्खधरो	शङ्खवटी	१९३	३

अशुद्धम् ।	शुद्धम् ।	पृ. ।	प.
प्रभाव्प	प्रभाव्य	११४	३
प्रोक्ष्यण्य-	प्रोक्षण्य	११५	४
व्रीहिर्बहु-	व्रीहिबहु	११६	१७
शङ्खरो	शङ्खवरी	२०२	२८
घटस्थान्ते	घटस्यान्ते	२०५	६
स्थापनीयनि	स्थापनीयानि	२०५	१२
उर्ध्वं-	ऊर्ध्वं-	२०७	३
अवगन्तयाः	अवगन्तव्याः	२०८	७
उर्ध्वं	ऊर्ध्वं	२१०	१
धारयन्तं	धारयन्तं	२१०	१०
क्रौँ चबीजं	क्रोमिँ च	२२२	१४
ताम्बुलानि	ताम्बूलानि	२२५	१५
सुघार्णबक्तः	सुधार्णवकृतः	२२७	२२
संप्रदानं	सम्प्रदानं	२२८	६
द्रव्याद्यकृष्टः	द्रव्यादाकृष्टः	२३०	६
प्रियम्वदा	प्रियंवदा	२३३	१८
उंढाया	ऊढाया	२३४	१३
वैकक्षिका	रैकक्षिका	२३५	२१
नरश्रेष्ठ	नरश्रेष्ठ	२३८	२
समुद्धरेतू	समुद्धरेत्	२४१	१२
निऋर्ति	निर्ऋतिम्	२४२	१
ग्रासमुद्रां	ग्रासमुद्रां	२४१	३
ग्रासं	ग्रासं	२४१	६
ध्यत्वा	ध्यात्वा	२५१	८
उर्ध्वं निष्कले	ऊर्ध्वं निष्कले वा	२५६	२
पीठोपीठा-	पीठोपपीठा-	२५६	४
हरेम्	हरेत्	२५६	१०
प्रयक्ताम्	प्रयुक्तम्	२५७	२१
सर्षापा-	सर्षपा-	२६०	२१
अक्षपाठनं	अक्षपाटनं	३६२	४
इष्टां	इष्टं	२७१	११
अतिरिक्ता	अतिरक्ता	२७४	११
सुषुण्मां	सुषुम्णां	२८२	१
प्रासन-	प्राशन-	२८४	१३
कुरकमंसु	करकमंसु	२८५	५

अशुद्धम् ।	शुद्धम् ।	पृ. ।	प.
इनि	इति	२८६	१
दद्याद्धि-	दद्याद्‌धि-	२८६	२१
ऋत्विक्कार्ट-	ऋत्विक्कर्तृ-	२८८	१७
दर्शन	दशन-	२८९	२
विशोध्यं यत्नेन	विशाधयेत् तेन	२८९	१०
श्वरसी	श्वरसि	२९१	८
गाहास्तीद्वजे- देवादेवर्ज्यं	गोहस्तिद्विजदे- वादिवर्जं	२९६	२४
सिद्धयेः	सिद्धयः	२९७	२२
तारावज्रनखं दंष्ट्रायुधा- य महासिं- हाय हुँफट् नमः	तारो वज्रनख- दंष्ट्राय महा- सिंहाय हूँफ- ट् नमः	२९८	२०
दोतु-	होतु-	३०१	१
सुधौतं दन्ताद्यं	सुधौतदन्ताद्यं	३०१	११
कुञ्चित् कुञ्चि- दष्टौ	कुञ्चिः कुञ्चयो- ऽष्टौ	३०७	२०
ऍशान्यां	ऐशान्यां	३१०	१०
ददानि	ददामि	३१०	१७
र्णमानसः	पूर्णमानसः	३१४	५
क्षाद्यै-	आद्ये-	३११	१७
दीक्षाक्रसः	दीक्षाक्रमः	३१८	१३
वेचित्र्य-	वैचित्र्य-	३१८	१५
दिव्यदृष्ट्याऽ- वलोकनान्	दिव्यदृष्ट्यव- लोकनात्	३२३	१०
बद्धाञ्जलिः	बद्धाञ्जलिः	३२४	५
नस्थित-	नसंस्थित-	३२५	८
ल्याग्रेषु	लयग्रेषु	३२८	३२
ॐ	डँः	३२१	३१
वत्मना	वर्त्मना	३३२	११
स्थापययामि	स्थापयामि	३३३	१५
पूररणीय	पूरणीयम्	३३७	२३
क्काथेन	क्काथेन	३४२	११
पदर्थं	एतदर्थं	३४२	२१
सनैपिं	सनैयि	३४२	३०

अशुद्धम्।	शुद्धम्।	पृ.	प.
सूक्ष्माय	सूक्ष्मायै	३४५	११
वध्वा	बद्ध्वा	३४६	२६
दावन-	दाचम	३४९	१९
स्नातार्थे	स्नानार्थे	३५०	११
द्विवेद्य	निवेद्य	३५०	२२
मन्त्राते	मन्त्रान्ते	३५०	२५
पञ्चषडूससंयुक्तं	पञ्चधा षडूसोपेतं	३५३	२७
बलिवटुकाय	बलिर्वटुकाय	३५५	२२
३५६	२५६	३५६	२७
पलये-	पलेपये	३५८	८
छ.तृन्	छातृन्	३६२	२७
अञ्जलिः	अञ्लिः	३६३	७
वामकध्यां	वामकध्यां	३६३	२१
वहे-	वहे	३६४ ,,	६ ७
वैदिक	वैदिक	३६४	२१
लोकिताक्ष	लोहिताक्ष	३६८	३
गणपये	गणपतये	३७३	१५
बध्वा	बद्ध्वा	३७६	१
दूगेश-	दूगाणेश-	३७७	२३
-ड्डुधिमद्-	-ड्डुधमिद-	३७८	२७
मात्मानि	मात्मनि	३८५	११
आग्नेज्यां	आग्नेय्यां	३८७	२४
चंतान्	चंनात्	३८९	११
-मस्तास्तु	-मस्तासु	३८९	१८
शक्तिशङ्क-	शक्तिसङ्क	३९४	४
घत्वा	ध्यात्वा	४००	२
खण्डव-	षण्णव-	४००	१८
पावर्ति	पार्वति	४०१	१
देवेभ्यः	वेदेभ्यः	४०१	१५
चर्मन्व-	चर्मण्व-	४०२	२
इशाने	ईशाने	४०३	२०
वोपरि	स्वोपरि	४११	१७
कौणिन्या-	कौण्डिन्या-	४१७	२१
निर्षिद्ध-	निषिद्ध-	४१७	२२

अशुद्धम्।	शुद्धम्।	पृ.	प.
नियमन	नियमेन	४१७	२८
प्रसूतो	प्रसुप्तो	४१७	३०
गणशा	गाणेशा	४१८	२७
बध्वा	बद्ध्वा	४२७	१९
कुर्परे	कूर्परे	४२९ ,,	२ ५
व्यात-	व्यात्त-	४२९	१८
विजनामि	विजानामि	४३०	९
मुक्त्यार्थे	मुक्त्यर्थे	४३१	२२
सवंतन्त्रेषु	सर्वमन्त्रेषु	४३४	१३
नाशिते	नाशिनी	४३५	७
-दंशगुणैः	-दंशगुणं	४३५	११
स्फादिकं	स्फाटिकं	४३५	१३
स्काटिके	स्फाटिके	४३५	२२
पितृणा-	पितृणा-	४३७	१५
कुर्परे	कूर्परे	४३८	१०
बद्मसूत्रै-	पद्मसूत्रै-	४३९	१५
श्रेष्ठाय	श्रेष्ठाय	४४२	१०
त्रुद्यति	त्रुट्यति	४४४	४
-निषिद्धं सं	-निषिद्धसं	४४४	८
संत्रुद्यते	संत्रुट्यते	४४४	२२
कनिष्ठादित	कनिष्ठादि	४४७	१८
अङ्गुष्ठा	-अनङ्गुष्ठा	४५१	१६
तलान्तनिलि-	तलाङ्गुलि	४५२	१४
गोयनीया	गोपनीया	४५३	१२
सधिानी	साधिनी	४६०	८
मन्त्रजपा-	मन्त्रचित्ता	४६४	१९
गूढयानो	गूढपादो	४६८	१६
वणर्त्तु-	वर्त्तुं-	४७४	१९
ईन्द्र-	इन्द्र-	४७५	१४
ओघाम्बुरोषधीशो-	ओघाम्बुरोषधीशो	४७५	१६
षकारेण	खकारेण	४८०	८
शकारेण	सकारेण	४८९	८
विधानः	विधानतः	४९४	१३
प्रार्थतित्वा	प्रार्थयित्वा	४९४	२१

अशुद्धम् ।	शुद्धम् ।	पृ. ।	प.	अशुद्धम् ।	शुद्धम् ।	पृ. ।	प.
-ऽन्तस्थिति	-न्तस्तिथि-	४३५	११	मन्त्रस्त्रान-	मन्त्रस्नान-	४९९	१६
शाक्तेद्वयं वाद्य-	शक्ते द्वयं चाद्य-	४३६	११	प्रजापते	प्रजायते	५०१	१५

त्रुटिः ५०५ पृ. ६ प.

(सिद्धान्तसंग्रहे)

अथास्याः संप्रवक्ष्यामि ऋष्यादीन् भैरवोदितान् ।
श्रीकृष्णस्तु ऋषिः प्रोक्तो गायत्री छन्द ईरितम् ॥
शिवशक्त्यात्मिका काली देवता परिकीर्त्तिता ।
पदैः सदीर्घैरङ्गानि कृत्वा ध्यायेज्जगन्मयीम् ॥
श्मशानस्थां महाकालीं मुक्तकेशीं दिगम्बराम् ।
दंष्ट्राकरालवदनां मुण्डमालाविभूषिताम् ॥
दक्षिणोर्ध्वे धनुर्वामे करपद्मे तथा शरान् ।
अधः पाशं च खड्गं च धारयन्तीं क्रमेण च ॥
नीलमेघप्रभादीप्तां महाकालसमन्विताम् ।
प्रातस्तु संस्मरेदेनां मूलचक्रकृतालयाम ॥
मध्याह्नेऽनाहते चक्रे सायं व्योमाम्बुजस्थिताम् ।

पराक्षिणा-	पराक्षिना-	५०५	८	श्र्यीं सिता	श्र्यां शिता	५७५	१३
सवार्थे	सर्वार्थे	५१४	८	उभयास्तं	उदयास्तं	५७६	१४
-दित्यहुः	-दित्याहुः	५१५	१५	साधनमुच्चये	साधनसमुच्चये	५७७	२
दर्पणैः	तर्पणैः	५२२	१	कन्यारुप-	कन्यारूप-	५८५	१
यथाशक्त्या	-यथाशक्त्या	५२७	४	बहिस्कृते	बहिष्कृते	५८६	२१
इत्याभि-	इत्यभि-	५२८	१	तदन्तं	तदन्नं	५९१	५
सेनदशस्वराः	सेनदशः स्वराः	५३७	११	अलिस्यन्द-	अलिस्पन्द-	५९५	१४
हिरणमम्	हिरण्मयम्	५३१	१६	मञ्चकाग्रेषु	मञ्चकाङ्गेषु	५९६	११
संशुद्धै	सुशुद्धे	५४४	१८	पुजयीच्छेवे	पूजयेच्छिवे	६०३	२३
एषां	येषां	५४५	१४	प्रतिघाता-	प्रतिघाता-.	६०५	१८
प्रार्यश्चित-	प्रायश्चित्त-	५४८	२०	तस्याहिर्जा-	तस्मिन् हि जा-	६०७	३
-भ्रुवाश्च	भ्रुवां च	५४९	१०	धराणी	धरणी	६०८	६
जाप्पयोः	जाप्यपोः	५५०	१३	जगदे	भजने	६११	६
देवीतर्प-	देवि तर्प-	५५१	३	प्रक्षातिलां	प्रक्षालितां	६१४	४
नीरूप-	निरूप-	५५३	१	ीरार्दने	वीरार्दनेन	६१६	११
बौद्धायनः	बौधायनः	५५७	१	सितवाद्या-	सितवाधा-	६१६	२१
सिद्ध्युपा-	सिद्ध्युपाया-	५६२	२५	चन्द्रिका	चण्डिका	६१८	१
दुग्धेनाशव-	दुग्धेनाशव-	५६७	१३	संसथाये	संस्थापये	६१८	१०
कुमुमै-	कुसुमै-	५७१	२	ङेऽन्तम्	ङेऽन्तकम्	६२७	१६
देदी-	-देवी	५७४	११	सुराशवैः	सुरासवैः	६२८	२०

अशुद्धम् ।	शुद्धम् ।	पृ.	प.
-णाढ्यं	णाद्यं	६३५	१
ह्युर्ध्वं-	ह्यूर्ध्वं-	६३७	१९
-मांक्य-	-माणिक्य-	६४०	२२
नमःसास्त्रं	नमसाऽस्त्रं	६४४	१९
शुकं धानां	शुकं दधानां	६४१	२४
जाम्बुनद-	जाम्बूनद	६५४	७
कपदंष्ट्र-	करग्रदंष्ट्र-	६६२	६
नृसिंहोऽय-	ह्नृसिंहो य-	६६४	९
तमो	नमो	६६८	१६
रामन्त्र	राममन्त्र	६८३	१५
प्रीयम्	प्रियम्	६८३	२०
सत्यत्वा-	शस्त्वा-	६९१	१६
मिश्रि	मिश्र	६९२	६
क्षीलसमा	क्षीलहया	६९२	१२
च भयं	चाभयं	६९३	७
वामचारेण	वामाचारेण	७१६	४
दृष्ट्वो	दृष्ट्वा	७२०	५
चित्र	चित्र्य	७२१	२०
मृद्धि	मृदु	७२९	६
भावे तु कल्प-	भावेऽनुकल्प-	७२१	१७
चापे	चाण्डे	७३०	३
त्रिस्तर-	विष्टर-	७३१	१२
शूद	शूद्र	७४०	१
जयेत्	जपेत्	७४२	१०
स्यु	स्युः	७४३	११
तिष्टत्सु	तिष्ठत्सु	७४५	१६
भ्रंसयि-	भ्रंशयि-	७४७	१५
फड-	फडि-	७५१	११
चंयां	चर्यां	७५९	१९
दंष्ड्राग्र	दंष्ट्राग्र	७६६	१४
समुण्ड	सुमुण्ड	७६८	५
यावन्त्यः	यावत्यः	७७६	३
ललानं	लालनं	७७८	९
क्ष्रौमिति	हस्फ्रौमिति	७७९	२०
द्वारण-	द्वार	७८१	१
अनन्तरं	अनुत्तरम्	७८१	१७
कारान्तौ	कारान्तो	७८१	२५
ङित्ययि	ङित्यपि	७८४	१६
स्थ्यालङ्कार	स्थ्यलङ्कार	७८५	१८
आलाढा	आलीढा	७८९	२
चन्द्रर्धं-	चन्द्रार्धं-	७९१	१
असां त्रयाणां	आसां तिसृणां	७९१	९
वृत्या	वृत्त्या	८०५	१०
सक्तै-	शक्तै-	८१५	२२
षद्वर्णै-	षड्वर्णै-	८२२	२
गौर्यंषे	गौर्यंषे	८२८	२५
वाशा	वासा	८३६	२१
योन्यत्मक	यं.न्यात्मक	८५७	२१
कौलेयस्तस्मा-	कौले यस्तस्मा-	८६३	२०
वरंहसित	वरभसित	८७१	१८
क्षस्त्रौँ	क्षस्त्रा	८७२	७
मन्त्रदेवीँ-	मन्त्रदेवाँ-	८७६	१६
ह्रोँ	ह्रीँ	८७८	१३
व्यापकन्त	व्यापकं तु	८७८	१८
भीषाभां	भोषणां	८७८	२०
येध्या	ध्येया	८८१	७
तरो	तारो	८८३	१६
श्वेतम्बरां	श्वेताम्बरां	८८४	१२
ह्नुनेत्	हुनेत्	८८४	१९
प्रकर्त्तिंताः	प्रकीर्त्तिंताः	८८६	७
प्रकर्त्तिंतम्	प्रकीर्त्तिंतम्	८८७	८
भौममन्त्रः	बुधमन्त्रः	८८७	२१
सिध्यते	सिध्यति	८९१	६
तदोर्भि-	दोर्भि-	८९१	८
द्विजोतमान्	द्विजोत्तमान्	८९८	१९
यमन्त्रः	यममन्त्रः	८९८	२३
अदित्य-	आदित्य-	९०३	१८
घमानसः	घतमानः	९०७	२
प्रभाती	प्रभावती	९०८	१९
स्याहृषीणां	स्य व्याहृतीनां	९११	७
प्रीणिजाता-	प्राणिजाता-	९११	१५
बृहत्वा	बृहत्त्वा	९१२	२०

अशुद्धम् ।	शुद्धम् ।	पृ. ।	प.	अशुद्धम् ।	शुद्धम् ।	पृ. ।	प.
ज्यैं हि	ज्यैर्हि	९१४	१	किलासश्वित्र-	किलातश्वित्र-	९२४	१२
मकुटं	मुकुटं	९१४	२३	हुनेद्ब्रोसफ	हुनेद्ब्रोशफ	९२५	१४
ब्रह्माण्डपावि-	ब्रह्माण्डमाविस्फु-			दक्षिणमूर्त्तिं-	दक्षिणामूर्त्तिं	९२६	८
स्फुरज्ज्यो-	रज्ज्योतिः-			तिष्ठते	तिष्ठते	९२६	२०
तिस्फा-	स्फा-	९१६	९	उर्णा	ऊर्णा	९२७	२
तिष्ठते	तिष्ठते	९२०	१४	आनुष्टुबस्य	आनुष्टुभस्य	९३५	२
पशिरिष्टं	परिशिष्टं	९२३	१	दाद्यात्	दद्यात्	९३६	१३
श्रेष्ठत्व-	श्रेष्ठत्व-	९२३	२२	यथाशक्तिं	यथाशक्ति	९३६	२३

त्रुटि ९४२ पृ. ८ प. ।

सप्ताश्वं सप्तखङ्ग च जातं देशे कलिङ्गके ।
विश्वामित्रार्षकं त्रिष्टुप् छन्दः काश्यपगोत्रजम् ॥
रक्ताम्बरधरं रक्ताभरणैरुपशोभितम् ।
रक्तगन्धनुलेपाङ्गं रक्तध्वजपताकिनम् ॥
किरीडिनं सकेयूरं मणिगं रक्तच्छत्रिणम् ।

चात्रेयर्षं	चात्रेयार्षं	९४३	२	यदैवतम्	यमदैवतम्	१०७९	५
आभुवदुती	आभुवदूती	९४६	२४	प्रकर्त्तितम्	प्रकीर्त्तितम्	१०७९	१४
तिन्दोऽक्षश्च	तिन्दुकोऽक्षश्च	९५०	११	सङ्कुचान	सङ्कुचाने	१०८९	१८
पोदशभि	षोडशभि	९५०	१६	राङ्कुरे	राङ्कुचे	१०९५	९
वेदपायराणाय	वेदपारायणाय	९५९	१९	उग्रचण्डा च	उग्रचण्डा	११०७	४
शिरश्चेदे	शिरश्छेदे	९६४	१०	ऽश्विभ्यां	ऽश्विभ्यां	११११	१४
कञ्जुकोपेता	कञ्चुकोपेता	९६५	१९	भूम्यर्थंनृत-	भूम्यर्थेऽनृत-	१११३	१६
किरष्ये	करिष्ये	१००९	९	समारम्त्र	समारभ्य	१११४	१०
हूता	हूना	१०१०	९	गजपुजा	गजपूजा	१११४	११
सिन्धुभरैव	सिन्धुभैरव	१०१३	२३	मुँहूरुदर	मुँहुरुदर	१११६	१५
स्रपायेद्	स्नापयेद्	१०१४	१३	न.सारन्धं	नासारन्ध्रं	१११६	१७
स्तपतन्तु	स्नापयन्तु	१०१७	८	भासं	मांसं	१११७	१२
ग्रीतवद्या	गीतवाद्या	१०२०	५	कूर्चास्रानल-	कूर्चास्त्रानल-	११२१	३
व्रीहिने	व्रीहिणे	१०२१	३	उष्णषी	उष्णीषी	११२५	२
ससागच्छ	समागच्छ	१०३५	१	गान्धर-	गान्धार-	११२५	३
विचीनां	विचीनां	१०५३	३	वाभवम्	वाग्भवम्	११३४	९
शबूको	शम्बूको	१०५३	६	क्षिप्रसाद-	क्षिप्रप्रसाद-	११४०	१४
परिकलपते	परिकल्प्यते	१०५७	९	त्रायवृतम्	त्रयावृतम्	११४०	१८
प्राग्वपाकेन	प्राड्विपाकेन	१०५७	१७	विंद्रेषैं	विंद्वेषैं	११४६	२४
पार्षतैणेन	पार्षतैणेन	१०५९	१९	स्फुरत्कशरं	स्फुरत्केशरं	११४८	२
गात्र्यन्तर-	गायत्र्यन्तर-	१०६५	७	त्रिकोण	त्रिकोणम्	११४९	१

अथ पुरश्चर्यार्णवः ।

श्रीदक्षिणामूर्तिगुरुभ्यो नमः ।

शुण्डादण्डप्रचण्डप्रहतिहठदलत्प्रौढदोर्दण्डदृप्य-
दैत्येन्द्रानीकशुण्डोत्कररचितसमित्ताण्डवक्षोणिशोभः ।
प्रत्यूहध्वान्तधामाधिपातिराधिपतिः सिद्धसिद्धो गणानां
दद्यादद्रीन्द्रकन्यास्मरहरनयनानन्दसंवर्द्धनो वः ॥ १ ॥
ब्रह्मोमाधवमाधवात्मकतनुश्छायाऽऽननप्रस्फुरन्-
मुग्धाऽम्भोजमधुव्रताभनयनः साक्षी जगत्कर्मणः ।
ध्वान्तध्वस्तसमस्तविष्टपपरित्राणे निरस्तश्रम-
स्तिग्मांशुस्त्रिदशाग्रणीस्त्रिभुवनस्तुत्यो ऽस्तु वः श्रेयसे॥२॥
सद्भक्तिप्रणमद्विधित्रिपुराजिद्वृत्राऽहिताद्यामर-
श्रेष्ठश्रेणिकिरीटकोटिविलसद्रत्नांशुनीराजितम् ।
यत् स्मृत्वा सुधियस्तरन्ति सहसा संसारवारां निधिं
तद्विष्णोश्चरणाम्बुजं दिशतु वः श्रेयो नृसिंहाकृतेः ॥ ३ ॥
यच्छक्तिः प्रकृतिस्ततो महदभूत्तत्वं ततो ऽहंकृति-
स्तन्मात्राणि ततश्च भूतनिवहस्तेभ्यः पृथिव्यादिकः ।
भूतेभ्यः करणानि चेति जगदुत्पन्नं यतः सो ऽव्ययः
पायाच्चन्द्रकलाऽवतंसरुचिरः साऽनुग्रहो वः शिवः ॥ ४ ॥

अव्यक्तो मुक्तिमार्गो निगमनिगदितो दुर्ग इत्यागमज्ञाः
स्वाऽविद्यादीनपोह्यत् पदयुगममृतं लेभिरे भावयन्तः ।
पायात्सा सैरिभघ्नी भवसलिलनिधेस्तारिणी रक्षणीति
ब्रह्माद्यैरद्वितीयेति च सततनुता सिद्धविद्या ऽऽदितो वः॥५॥
नत्वा श्रीगणनायकं दिनमणिं विष्णुं पशूनां पतिं
दुर्गां दुर्गतितारिणीं भगवतीं गुह्येश्वरीमीश्वरीम् ।
श्रीमत्साहप्रतापसिंहधरणीपालेन नानाऽऽगमान्
दृष्ट्वा सर्वजनोपकारकपुरश्चर्य्याऽर्णवस्तन्यते ॥ ६ ॥
औदार्येण तपःसुतं सुमहता शौर्येण कर्णाद्विषं
सौन्दर्येण मनोभवं जलनिधिं गाम्भीर्यधैर्यादिभिः ।
कीर्त्या चन्द्ररुचं श्रिया हरिहयं भानुं प्रतापेन च
क्ष्मायां निर्जरपादपान् वितरणैर्निर्जित्य यो राजते ॥७॥
तस्य क्षोणीमघोनः समरविजयिनो ऽशेषशास्त्रार्थविद्भिः
सद्भिः संशोधनीयः सुविमलमतिभिः सम्यगेष प्रबन्धः ।
विद्वद्विद्वेषतर्षैर्विमलपरगुणोत्कर्षविध्वस्तहर्षैः
रोषाद्दोषैकजिज्ञासुभिरतिमलिनैर्दूष्यतां दुर्विदग्धैः ॥ ८ ॥
विद्वद्भावाऽनभिज्ञैः प्रसभमयमवज्ञायमानो ऽप्यनार्यै-
र्न स्यादस्मत्प्रबन्धः कथमिव विदुषां मानसोल्लासहेतुः ।
गुञ्जापुञ्जाऽनुरक्तैर्विपिनपरिसरे भिल्लदारैर्विमुक्ता
मुक्ताः किं नाद्रियन्ते दरदलितनवाम्भोजपत्रायताक्ष्यः ॥९॥
अत्रादौ देवतानां स्मरहरगदितान् साधु साम्नायभेदान्
भेदानाद्ये तरङ्गे कति चन विदितान् दर्शयामस्तदूर्ध्वम् ।
कालीकंसाऽरितारारघुवरमुरजिच्छैलजावल्लभाना-
मैक्यं युग्मक्रमेणाऽऽगमगदितमभेदश्च शक्तित्रयस्य ॥१०॥

रामस्य वक्ष्ये शिवशक्तिरूपता-
मैक्यं च सीताहिमशैलकन्ययोः ।
श्रीरामकामाऽन्तकयोरपि क्रमा-
दैक्यं ततो दैवतपञ्चकस्य ॥११॥
ततः परं तान्त्रिकमार्गभेदान्
वक्ष्यामि तेषामधिकारिणश्च ।
ततश्च भेदानपि वैष्णवानां
ततः परं पाशुपतप्रभेदान् ॥ १२॥
उपासनां चापि बहुप्रभेदा-
मदीक्षितानां तदनर्हतां च ।
ततश्च दीक्षामनुसद्गुरूणां
वक्ष्यामि माहात्म्यमनुक्रमेण ॥ १३॥
ततः प्रवक्ष्ये गुरुशिष्यलक्षणं
निषिद्धयोर्लक्षणमेतयोस्ततः ।
ततो गृहीतस्य मनोरहेयता-
मसद्गुरूपात्तमनोश्च हेयताम् ॥ १४॥
पित्रादिमन्त्रग्रहणे निषेधं
विधिं च मन्त्रेष्वधिकारिणश्च ।
स्वप्नाप्तमन्त्रस्य च संस्क्रियाश्च
वक्ष्यामि चक्राणि च तन्निषेधान् ॥१५॥
ततो द्वितीये रुचिरे तरङ्गे
वक्ष्यामि दीक्षोचितकालदेशान् ।
मन्त्रेषु शापानपि देवताना-
मुक्त्वा तदुद्धारविधिं च वक्ष्ये ॥१६॥

ततश्च संस्कारविधिं मनूनां
तज्जागृतिं भूमिपरीक्षणं च ।
वक्ष्यामि शल्योद्धरणप्रकारान्
वास्तोर्विधिं मण्डपलक्षणं च ॥१७॥
कुण्डानि च स्रुक्स्रुवयोश्च लक्षणं
तत्रैव वक्ष्यामि ततोऽङ्कुरार्पणम् ।
दीक्षां प्रवक्ष्यामि ततः क्रियावतीं
तरङ्गयोस्तत्र तृतीयतुर्य्ययोः ॥१८॥
दीक्षाविधौ तत्र तृतीयवीचौ
वक्ष्यामि तावद्वरणं गुरूणाम् ।
ततश्च ऋत्विग्वरणं प्रवक्ष्ये
यद्दन्तकाष्ठस्य परीक्षणं तत् ॥१९॥
द्वाराऽर्चनं यागगृहप्रवेशं
पूजोपयुक्तानि च मण्डलानि ।
ततः सपर्याविधिमागमोक्तं
वक्ष्ये घटस्थापनपूर्वकं च ॥ २० ॥
तुर्य्ये तरङ्गेऽखिलमग्निकार्य्यं
वक्ष्ये ततः पायसभोजनं च ।
गुरोः सशिष्यस्य ततोऽभिधास्ये
स्वापं ततः स्वप्नपरीक्षणं च ॥२१॥
तत्रैव दीक्षादिवसोचितानि
कर्माण्यशेषाणि मनोः प्रदानम् ।
व्यक्तीकरिष्याम्यथ पञ्चमे तु
प्रयोगमस्याः सकलं तरङ्गे ॥२२॥

संक्षेपदीक्षां च ततः प्रवक्ष्ये
ततः परं वर्णमयीं च दीक्षाम् ।
कलावतीं नाम ततश्च दीक्षां
ततः परं वेधमयीं च दीक्षाम् ॥ २३ ॥
वक्ष्यामि पाञ्चायतनीश्च दीक्षाः
स्मार्तीं ततो मानासिकीं च दीक्षाम् ।
यौगीं च दीक्षां तदनन्तरं दृग्-
दीक्षां ततः स्पर्शमयीं च दीक्षाम् ॥२४॥
दीक्षां प्रवक्ष्यामि ततश्च वाचिकीं
मान्त्रीं च हौत्रीं च ततः समासतः ।
शास्त्रीं वदिष्यामि तथा ऽऽभिषेकिकीं
तत्रैव संक्षिप्ततरां च शाम्भवीम् ॥२५ ॥
ततः प्रवक्ष्याम्युपदेशदीक्षां
ततो ऽभिधानं क्रमदीक्षणस्य ।
पूर्णाऽभिषेकं च ततो ऽभिधास्ये
मनोर्ग्रहं देशिकमन्तरेण ॥ २६ ॥
षष्ठे तरङ्गे ऽथ पुरस्क्रियाया
निरूपयिष्यामि विधिं समग्रम् ।
तत्रापि तावत् समयं च देशान्
वक्ष्यामि वक्ष्ये तत आसनानि ॥ २७ ॥
मालाप्रभेदानपि तत्र वक्ष्ये
रुद्राक्षमाहात्म्यमपि प्रसङ्गात् ।
तत्रैव मालाग्रथनप्रकारं
वक्ष्यामि संस्कारविधिं च तस्याः ॥२८॥

मुद्राणामपि लक्षणानि नियमान् हेयानि देयानि च
प्रायश्चित्तमनेकमुक्तनियमभ्रष्टोपयुक्तं नरः ।
सक्षोणीगृहकूर्मचक्ररचनां शाक्तानि पीठानि च
प्रातःकृत्यमथोऽजपाविधियुतं वक्ष्यामि तत्रैव च ॥२९॥
शौचं तत्र च दन्तधावनविधिं स्नानं च नानाविधं
तन्त्रोक्तं तिलकस्य धारणविधिं तद्वद्विभूतेरपि ।
सन्ध्योपासनदेवतर्पणविधिं नित्यार्चनं तादृशं
होमं प्रस्तुतकर्मणश्च विधिवद्वक्ष्ये ततः सक्रमम् ॥३०॥
यन्त्रस्य निर्माणमथ प्रमाणं
ततः प्रतिष्ठाविधिमागमोक्तम् ।
वक्ष्ये मनूनामथ सूतकित्वं
स्वापं प्रबोधं च शिखाश्रितं च ॥ ३१ ॥
वक्ष्यामि तत्रैव च कुल्लुकामनुं
सेतुं च निर्वाणमपि क्रमागतम् ।
तत्रैव मन्त्रं रसनाविशोधनं
ततश्च मन्त्राऽवयवान् हरेरितान् ॥३२॥
जपस्य वक्ष्यामि ततो विधानं
होमव्यवस्थामथ तर्प्पणं च ।
ततोऽभिषेकस्य विधिं प्रवक्ष्ये
ततः परं ब्राह्मणभोजनं च ॥ ३३ ॥
ततोऽभिधास्यामि ससिद्धिलक्षणाः
सोपायवर्गाश्च पुरस्क्रियाऽभिधाः ।
सर्वास्तरङ्गे रुचिरे च सप्तमे
सद्दूतिकायागसवीरसाधनाः ॥ ३४ ॥

ततोऽष्टमे चारुतमे तरङ्गे
गणाधिपस्याथ रवेश्च विष्णोः ।
मत्स्यस्य कूर्मस्य वराहमूर्त्ते-
स्तदीयशक्तेश्च तथा धरिण्याः ॥ ३५ ॥
श्रीदिव्यसिंहस्य च वामनस्य
त्रिविक्रमस्याऽथ कुठारपाणेः ।
श्रीरामचन्द्रस्य च भूसुताया-
स्ततः प्रलम्बासुरवैरिणश्च ॥ ३६ ॥
कृष्णस्य बुद्धस्य तथैव कल्किन-
स्ततो हयग्रीवरथाङ्गरूपयोः ।
अनन्तसंज्ञस्य च गोपसुन्दरी-
मूर्त्तेस्ततः श्रीधरसंज्ञकस्य ॥ ३७ ॥
शिवस्य मृत्युञ्जयनीलकण्ठ-
श्रीदक्षिणामूर्तिपुरस्सरैश्च ।
सक्षेत्रपालैर्बटुकादिरूपै-
र्भेदैरनेकैः सहितस्य तद्वत् ॥ ३८ ॥
मुरारिदेहार्द्धभृतः पुरारे-
स्ततो भवान्याश्च गरुत्मतश्च ।
सकार्त्तवीर्यस्य समीरसूनोः
स्मरस्य वक्ष्यामि मनूननेकान् ॥ ३९ ॥
एषां च ऋष्यादिपुरस्सराणि
ध्यानानि वक्ष्यामि पुरस्क्रियाश्च ।
प्रत्येकपूर्वं विधिमत्र नैषां
वक्ष्ये प्रबन्धस्य गुरुत्वभीतेः ॥ ४० ॥

स्वैः स्वैः प्रभेदैः सहितास्ततो महा-
विद्यास्तरङ्गे नवमे दश क्रमात् ।
वक्ष्यामि तासां च पुरस्क्रियाविधिं
नीलक्रमादीनपि भावसंयुतान् ॥४१॥

ततस्त्रिलोकाऽर्च्चितपादुकाया
वाग्देवताया दशमे तरङ्गे ।
तत्रैव देव्यास्त्वरिताऽभिधायाः
क्लिन्नाऽन्नपूर्णादिसमन्वितायाः ॥ ४२ ॥

प्रत्यङ्गिराया अथ कुब्जिकायाः
सुरापगायाश्च सवाग्भवायाः ।
चण्डादिकानां च ततो ग्रहाणां
ग्रहप्रसूनामथ दिग्युतानाम् ॥४३॥

मन्त्रान् प्रवक्ष्यामि पुरस्क्रियान्ता-
नथाऽभिधास्ये जननीं श्रुतीनाम् ।
न्यासानशेषान् क्रमतश्च तस्या
ध्यानं च यन्त्रं यजनक्रमं च ॥४४॥

तस्याः सपर्याविधिमप्यशेषं
मुद्राश्च वक्ष्यामि पुरस्क्रियाश्च ।
तारस्य पौरश्चरणं विधानं
मृत्युञ्जयश्रौतमनोस्तथैव ॥४५॥

रुद्राऽध्यायपुरस्क्रिया बहुविधैः सौम्यैः समं वक्ष्यते
सूक्तानां च पुरस्क्रियाविधिमथ श्रौतान् ग्रहाणां मनून् ।
तेषां च त्रिपुरारिभाषितपुरश्चर्याऽभिधानं ततो
हव्यानामपि च प्रमाणमखिलं वक्ष्यामि संक्षेपतः ॥ ४६ ॥

तरङ्गएकादशउक्तरीत्या
दुर्गामनूनामथ तान्त्रिकाणाम् ।
वक्ष्यामि पौरश्चरणं विधानं
दुर्गोत्सवस्यापि विधिं समग्रम् ॥ ४७ ॥
बलिप्रदानस्य विधिं पशूनां
वस्त्वन्तराणामपि दैवतानि ।
तत्रैव वक्ष्यामि कुमारिकायाः
पूजाविधानं च शिवाबलिं च ॥ ४८ ॥
तत्रैव रेवन्तहयेभपूजा-
विधिं प्रयोगान् नवरात्रकृत्यम्* ।
तथैव वक्ष्यामि शिवोपदिष्टं
नीराजनं खञ्जनदर्शनं च ॥ ४९ ॥
ततस्तरङ्गे चरमे मनोरमे
ब्राह्मादिमन्त्रान् सपुरस्क्रियाविधीन् ।
गोरक्षनाथस्य मनूंस्तथाविधान्
वक्ष्ये ततस्तादृशशीतलामनुम् ॥ ५० ॥
यन्त्राण्यथो यन्त्रपुरस्क्रियाया
विधिं ततो भूतलिपिं† च तस्याः ।
तत्रैव पौरश्चरणं विधानं
वक्ष्ये लिपिन्यासपुरस्क्रियाश्च ॥ ५१ ॥
त्रियोतयन्तीमथ मातृकाया-
स्त्रिलोहमुद्रामतुलप्रभावाम् ।
तत्रैव संस्कारविधिं च तस्या-

---

* कृत्यानिति पाठान्तरम् । † भूतबलिमिति पाठान्तरम् ।

स्तथैव वक्ष्ये नवरत्नमुद्राम् ॥ ५२ ॥
षोढान्याससहस्रनामकवचस्तोत्रान्तराणां तत-
स्तद्वत् सप्तशतीस्तवस्य च पुरश्चर्याऽभिधानं क्रमात् ।
तत्पाठस्य विधिं फलैश्च सहितं होमप्रयोगाऽन्वितं
मन्त्राणां च विभागमस्य तदनु प्रश्नस्य वक्ष्ये विधिम् ॥५३॥
प्राणायामपुरस्क्रिया बुधवरैर्वेद्या ततो वक्ष्यते
मन्त्राणां च पुरस्क्रियामपि विना सिद्धिप्रकारो ऽपि वा ।
नानाभैरवयोगिनीसुरवधूज्वालामुखीनां क्रमा-
दन्यासामपि च क्षितेरपि पुरश्चर्य्याऽन्वितं साधनम् ॥५४॥

तत्र पुरश्चर्य्याया मन्त्रसिद्धिफलकदेवताऽऽराधनविशेषरूपत्वादाराध्यदेवताया अभ्यर्हितत्वेन षडाम्नायाऽन्तर्गतदेवतास्तावन्निरूप्यन्ते । तत्र गणेशविशेषस्य मन्त्रनिष्ठं किंचिद्वैलक्षण्यमादाय षडाम्नायवृत्तित्वमुक्तं

मेरुतन्त्रे—

एकबीजात्मकं वक्ष्ये विघ्नमन्त्रं सुसिद्धिदम् ।
तत्रादौ वैदिकानां तु गकारः केवलो मतः ।
दक्षिणानां बिन्दुयुक्तो द्विबिन्दुः पूर्वमार्गिणाम् ॥
एतद्द्वययुतः पश्चादूर्ध्वाऽऽम्नाये च गौमिति ।
ग्लैमुत्तरे गोमिति च पातालाऽऽम्नाय*ईरितम् ॥

अत्र दक्षिणाऽऽम्नाये लक्ष्मीगणेशहरिद्रागणेशादयः, उर्द्ध्वाऽऽम्नाये महागणपत्यादयः, पूर्वाऽऽम्नाये विरिञ्चिगणनायकादयः, पश्चिमाऽऽम्नाये क्षिप्रप्रसादनगणेशादयः, उ-

---

* पातालाऽऽम्नाये=अधराऽऽम्नाये ।

त्तराऽऽम्नाये उच्छिष्टगणेशादय, इति भूयांसो गणेशभेदा मेरुतन्त्रे द्रष्टव्याः ।

सूर्यस्य द्वादशभेदवतो ऽपि दक्षिण एवाऽऽम्नायः ।

तदुक्तं तत्रैव—

एक एवाऽस्य चाऽऽम्नायो दक्षिणः परिकीर्तितः ।
यथा ऽयं यवनं विप्रं सममेव करैः स्पृशेत् ॥
उपासना तथैवाऽस्य स्वधर्माऽऽचारपूर्विका ।
चतुर्युगेषु प्रत्यक्षो देवो ऽयं सर्वसंमतः ॥
सर्वेषामेव देवानां नेत्रभूतो जगत्पतिः ।

द्वादशभेदाः—

वरुणः[1] सूर्य्य[2]वेदाङ्गौ[3] भानु[4]रिन्द्रो[5] रवि[6]स्तथा ।
गभस्ति[7]स्तु यमः[8] स्वर्णरेता[9]श्चाऽथ दिवाकरः[10] ॥
मित्रो[11]विष्णु[12]रिति प्रोक्ता आदित्या द्वादश क्रमात् ।
तपन्ति माघादारभ्य क्रमादमिततेजसः ॥

इति तत्रैवोक्ताः ।

विष्णोः शिवस्य चाऽऽम्नायप्रयुक्तभेदो ऽनुपलभ्यमानः । अवतारमन्त्रध्यानादिप्रयुक्तास्त्वनन्ता एव भेदाः, तेषु कतिचिद्भेदाः पुरश्चरणप्रकारकथनाऽवसरे स्फुटीभविष्यन्तीति अत्र नोक्ताः । देवीभेदानामनन्तत्वेन वक्तुमशक्यत्वे ऽपि वाडवानलीयतन्त्रोक्ताः कति चिद् भेदा इह प्रदर्श्यन्ते ।

तदुक्तं वाडवानलीयतन्त्रे—

एकैवाऽऽद्या जगत्सूतिः सच्चिदानन्दविग्रहा ।
तत्तद्विभूतिभेदेन भिन्ना ऽनेकत्वमागता ॥

पूर्णेशी भुवनेशानी ललिता चाऽपराजिता ।
लक्ष्मीः सरस्वती वाणी पारिजातपदाऽङ्किता ॥
अन्नपूर्णा जयाद्याश्च पूर्वाम्नायसमाश्रिताः ।
निशेशी दक्षिणा काली बगला छिन्नमस्तका ॥
भद्रा तारा च मातङ्गी दक्षिणाऽऽम्नायदेवताः ।
बहुप्रभेदसंयुक्ता कुब्जिका च कुलालिका ॥
मातङ्ग्यमृतलक्ष्म्याद्याः पश्चिमाऽऽम्नायदेवताः ।

एतेन मातङ्ग्या आम्नायद्वयवृत्तित्वमाहितम्,* दक्षिणाऽऽम्नाये ऽपि तस्या अभिधानात् । तथा—

सिद्धिलक्ष्मीर्गुह्यकाली महाभीमसरस्वती ।
धूम्रा कामकला काली महाकाली कपालिनी ।
महाश्मशानकाली च कालसंकर्षिणी तथा ॥
प्रत्यङ्गिरा महारात्रिर्योगेशी सिद्धिभैरवी ।
एता बहुविधायुक्ताः सर्वविद्योत्तमोत्तमाः ।
उत्तराऽऽम्नायपीठस्थाश्चतुर्वर्गफलप्रदाः ॥

ताराच्छिन्नमस्तयोरपि उत्तराम्नायवृत्तित्वमुक्तं

मुण्डमालायाम्—

भेदास्त्वेकोनपञ्चाशदुत्तराऽऽम्नायवर्त्मनि ।
गुह्यकाली ततः प्रोक्ता सिद्धिलक्ष्मीस्ततः परम् ॥
स्वर्णकोटीश्वरी† तत्र राजराजेश्वरी तथा ।
गुह्येश्वरी तथा प्रोक्ता तथा तारा त्रिरूपिणी ॥
छिन्नमस्ता महादेवी ततः प्रोक्ता ऽतिभीषणा ।
एवंविधास्तु संकेताः सदा गोप्याः प्रकीर्तिताः ॥

---

* वृत्तित्वमविदितामिति पाठान्तरम् ।

† कोटेश्वरीति क्वचित् पाठः ।

वाडवानलीये—

कामेशी ललिता बाला महात्रिपुरसुन्दरी ।
त्रिपुरा भैरवी ह्येता ऊर्ध्वाऽऽम्नायसमाश्रिताः ॥

ललितायाः पूर्वाम्नाये ऽप्युक्तत्वादाम्नायद्वयवृत्तित्वं बोधितम् । क्व चित्त्वरितेति पाठः ।

योगिनी वज्रपूर्वा च पन्नगी नैर्ऋतेश्वरी ।
अधराऽऽम्नायपीठस्था जैनमार्गप्रपूजिताः ॥

अत्रैव प्रधानतया भीमादेवी

महाकालसंहितायामुक्ता—

निशामयाऽधराऽऽम्नायगोचरान् देवतामनून् ।
यत्राऽऽद्यभूता विख्याता भीमादेवी भयानका ॥ इति ।
कुलबाला च दुर्गा च सर्वाऽऽम्नायप्रपूजिता ।

कुलबाला, कुमारी । तथा—

तयोः पूजा तु सर्वत्र नित्यत्वेनाऽभिधीयते ।

तयोर्दुर्गाकुमार्य्योः । एतास्तु दश देवता महाविद्यात्वेन प्रसिद्धाः ।

तदुक्तं शक्तिसङ्गमे—

काली[१] तारा[२] छिन्नमस्ता[३] सुन्दरी[४] बगला[५] रमा[६] ।
मातङ्गी[७] भुवनेशानी[८] सिद्धविद्या च भैरवी[९] ।
धूमावती[१०] च दशमी महाविद्या दश स्मृताः ॥

तत्रैव

एतासां प्रत्येकं भैरवमाह—

कालिकाया महाकालः सुन्दर्य्या ललितेश्वरः ।

तारायाश्च तथाऽक्षोभ्यश्छिन्नाया विकरालकः ॥
भुवनाया महादेवो धूम्रायाः कालभैरवः ।
नारायणो महालक्ष्म्या भैरव्या बटुकः स्मृतः ॥
मातङ्ग्यास्तु मतङ्गः स्यादथ वा स्यात् सदाशिवः ।
मृत्युञ्जयस्तु बगलाविद्यायाः परिकीर्तितः ॥

ललितेश्वरस्त्रिपुरभैरवः,विकरालः क्रोधभैरवः, कालभैरवो घोरः । यद्यपि रुद्रयामले ताराच्छिन्नमस्तादीनां सद्योजातकालरुद्रादय उक्ताः, तथापि एतेषामेव भैरवाणां नामान्तराणि तत्रोक्तानि न तु भैरवान्तराणीत्यविरोधः ।

शक्तिसंगमे—

क्रोधभैरवसंयोगाद्यक्षिण्यः सिद्धिदा यथा ।
तथा विद्याः प्रसिद्ध्यन्ति पुंयोगादेव पार्वति ॥

रुद्रयामले—

केवलं यो जपेच्छाक्तं मनुं शैवं न योजयेत् ।
जन्मकोटिषु जप्तोपि न मनुः सिद्धिभाग् भवेत् ॥
यस्या देव्यास्तु यो देवः शिवस्तस्याः शिवो भवेत् ।
तेन विद्या महादेवि कलौ सिद्ध्यति सत्वरम् ॥

मेरुतन्त्रे—

स्त्रीमन्त्रो भोगदः प्रोक्तः पुंमन्त्रो मोक्षदः परम् ।
उभयोपासनं देवा भुक्तिमुक्तिप्रदायकम् ॥

तन्त्रान्तरे—

शक्त्या विना शिवे शुष्के* नाम धाम न विद्यते ।

---

* सूक्ष्मे इति पाठान्तरम् ।

शिवं विना चित्कलानां* कलात्वं न क्वचिद् भवेत् ॥
बीजाऽङ्कुरन्याययोगाच्छिवशक्त्यात्मकं महः ।
सदा जागर्ति देवेशि नानारूपाणि दर्शयेत् ॥

षडाम्नायदेवताऽऽराधनफलान्याह

मेरुतन्त्रे—

दक्षिणोपासकः काल ऊर्ध्वः सायुज्यमाप्नुयात् ।
देवतायास्तथा पूर्वः सारूप्यं लभते परम् ॥
सामीप्यं चोत्तरो लोके पश्चिमस्त्वैहिकं फलम् ।
लाभस्त्यागश्चोपकारो ह्यधोमार्गे ऽप्युदर्क†युक् ॥

काल इति, महाकालस्वरूपी शिव एव भवेदित्यर्थः । यत्तु काले इति सप्तम्यन्तं पदं, तेन दक्षिणोपासक ऊर्ध्वाऽऽम्नायोपासकश्च काले देहाऽन्तसमये सायुज्यमाप्नुयादित्यर्थ इति कैश्चिदुक्तं, तदसत् ।

पञ्चलक्षणसंयुक्तो ब्राह्मणः काल एव सः ।

इति पूर्वग्रन्थविरोधात् ।

यत्प्रसादादहं त्वं च जातः काल इवाऽपरः ।

इत्युत्तरग्रन्थविरोधाच्च । उत्तरो लोके इति, उत्तराऽऽम्नायदेवतोपासकः सालोक्यं प्राप्नुयादित्यर्थः। इदमुत्तराऽऽम्नाये गुह्येश्वर्यादिदेवतोपासकविषयम् । तदुपासकानां तु चतुर्विधमुक्तिप्राप्तिरुक्ता

---

* विना चेत् कलानामिति पाठान्तरम् ।

† उदर्कः फलमुत्तरम् ।

महाकालसंहितायामनुस्मृतिप्रकरणे—

सालोक्यं चैव सामीप्यं सारूप्यं च तृतीयकम् ।
सायुज्यमिति देवेशि मुक्तिरुक्ता चतुर्विधा ॥
तास्वन्योपासकानां स्यादेकैका मुक्तिरीश्वरि ।
गुह्यकाल्याराधकस्य क्रमान्मुक्तिचतुष्टयम् ॥
जायते नाऽत्र सन्देहस्त्रिपुरघ्नाऽनुशासनात् ।
षडाम्नायेषु देवेशि भूयस्यः सन्ति देवताः ॥
तासु काश्चित् कृतयुगे त्रेतायां काश्चिदीरिताः ।
द्वापरे फलदाः काश्चित् कलौ काश्चित् फलप्रदाः ॥
चतुर्युगेषु फलदा दश विद्या मयेरिताः ।
तासु तिस्रो विशिष्यन्ते काली तारा च सुन्दरी ॥
तिसृष्वपि शिवे तासु* कलौ काली विशिष्यते ।
नवविधासु कालीषु† गुह्यकाली प्रशस्यते ॥
अनया सदृशी विद्या नास्ति ब्रह्माण्डगोलके ।
विद्याराज्ञी गुह्यकाली भिद्यते न कदा चन ॥

नवविधाकाली

तत्रैवोक्ता—

काली नवविधा प्रोक्ता सर्वतन्त्रेषु गोपिता ।
आद्या दक्षिणकाली च भद्रकाली तथा परा ॥
अन्या श्मशानकाली च कालकाली चतुर्थिका ।
पञ्चमी गुह्यकाली च पूर्वं या कथिता मया ॥

---

* तासु तिसृष्वपि शिवे इति पाठान्तरम् ।

† 'उत्तराऽऽम्नायमध्ये तु' इति 'नवविधासु कालीषु' इत्येतत्स्थाने पाठान्तरम् ।

षष्ठी कामकलाकाली सप्तमी धनकालिका ।
अष्टमी सिद्धिकाली च नवमी चण्डकालिका ॥

एवमन्यासां भेदा ग्रन्थान्तरेभ्यो ऽवगन्तव्याः ।

शक्तिसंगमे—

चतुर्युगानां राज्ञी वै कालिका परिकीर्तिता ।
विद्याराज्ञी सिद्धिविद्या कलौ शीघ्रफलप्रदा ॥

कालीकृष्णयोरैक्यमुक्तं

महाकालसंहितायाम्—

स्त्रीणां त्रैलोक्यजातानां कामोन्मादै*कहेतवे ।
वंशीधरः कृष्णदेवः प्रकृतिर्विष्णुरुच्यते ॥
उभयोर्मेलनाद्देवि शिवशक्तिर्हि† गीयते ।

कृष्णस्य कालीस्वरूपत्वं, रामस्य तारास्वरूपत्वं, तिसृणां शक्तीनामैक्यं चोक्तं

शक्तिसंगमे—

कदा चिदाद्या ललिता पुंरूपा कृष्णविग्रहा ।
लोकसंमोहनार्थाय स्वरूपं बिभ्रती परम् ॥
वेणुनादसमारम्भसर्वसंमोहनक्षमम् ।
कदा चिदाद्या श्रीकाली शैवतारा ऽस्ति पार्वती ॥
कदा चिदाद्या श्रीतारा पुंरूपा रामविग्रहा ।
रावणस्य वधार्थाय देवानां स्थापनाय च ॥
दैत्यसंहरणार्थाय पुंरूपं बिभ्रती परम् ।
आद्या तारा महाशक्तिः सैव काली महेश्वरी ॥

---

* कायोन्मादेति क्व चित् पाठः ।

† शिवशक्तीतीति पाठान्तरम् ।

C

या महावैष्णवी माया सा महासुन्दरी मता ।
नैव स्त्री न पुमानेषा नैव चापि नपुंसकम् ॥
यद्यच्छरीरमाधत्ते युज्यते तेन तेन सा ।

हरिहरयोरैक्यमुक्तं

तत्रैव—

एकस्मिन् समये पूर्वं विष्णुरूपावुभावपि ।
विष्णुस्वरूपसिद्ध्यर्थं तपस्तेपे हरः स्वयम् ॥
शिवस्वरूपसिद्ध्यर्थं तपस्तेपे हरिः स्वयम् ।
षड्वृन्दयुगसंख्यातमुभौ तपःपरौ शिवे ॥
शिवो विष्णुस्वरूपत्वं विष्णुश्च शिवरूपताम्* ।
उभौ हरिहरात्मानौ ह्यर्द्धनारीश्वरौ परौ ॥
मुख्यरूपमिदं देवि द्वयोः सङ्गममम्बिके ।
तेजःपुञ्जमिदं देवि ब्रह्मरूपं सनातनम् ॥

रामस्य शिवशक्त्यात्मकत्वं

तत्रैवोक्तम्—

रामः शक्तिरिति ख्यातः स शिवः परिकीर्तितः ।
शिवशक्त्यात्मकं ब्रह्म रामरामेति गीयते ॥

गौरिसीतयोः शिवरामयोश्चैक्यमुक्तं

तत्रैव—

गौरीरूपा परा सीता महासाम्राज्यनायिका ।
रामः परशिवो ज्ञेयो नाऽवतारो नरो ऽपि च ॥
यत्परं ब्रह्म विख्यातं तद्रामेत्यक्षरद्वयम् ।

---

* विष्णुः शिवस्वरूपताम् इति पाठान्तरम् ।

रामोपनिषदि—

रमन्ते योगिनो ऽनन्ते सत्यानन्दे चिदात्मनि ।
रामनामपदेनाऽसौ परं ब्रह्माऽभिधीयते ॥

गणेशादिपञ्चदेवतानामैक्यमुक्तं

रुद्रयामले—

गणेशाऽर्कहरीशानां दुर्गारूपा सरस्वती ।
महाश्यामा महाविद्या पूजनीया यथाक्रमम् ॥
न कुर्य्याद् भेदमेतेषां कौलिको वैष्णवस्तथा ।
गणेशाऽर्कहरीशानदुर्गाणां परमार्थवित् ॥
पूजयेदैक्यभावेन देवीभक्तश्च बुद्धिमान्* ।
देवीचक्रे ऽर्चयेत् सर्वान् शिवलिङ्गे ऽथ वा शिवे ॥
शालग्रामशिलायां वा सूर्यपीठे ऽथ वा शिवे ।
श्रीगणेश्वरचक्रे वा न भेदं कारयेत् सुधीः ॥
भेदं वै कुरुते यस्तु स शैवः शिवहा भवेत् ।

शैव इत्युपलक्षणम् ।

दशमहाविद्यादशाऽवताराणामैक्यमुक्तं

मुण्डमालातन्त्रे—

कृष्णस्तु कालिका साक्षाद् राममूर्तिश्च तारिणी ।
वराहो भुवना प्रोक्ता नृसिंहो भैरवीश्वरी ॥
धूमावती वामनः स्याच्छिन्ना भृगुकुलोद्भवः ।
कमला मत्स्यरूपः स्यात् कूर्मस्तु बगलामखी ॥
मातङ्गी बौद्ध इत्येषा षोडशी कल्किरूपिणी ॥ इति ।

कालीपदव्युत्पत्तिमाह

---

* देवीभक्तौ च भक्तिमानिति पाठान्तरम् ।

कामधेनुतन्त्रे—

कालसंकलनात् काली कालग्रासं करोत्यतः ।

त्रिपुराशब्दर्थमाह

सुन्दरीस्तवे—

ब्राह्मी रौद्री वैष्णवीति शक्तयस्तिस्र एव हि ।
पुरं शरीरं यस्यां सा त्रिपुरेति प्रकीर्तिता ॥

ताराशब्दार्थमाह

मत्स्यसूक्ते—

लीलया वाक्प्रदा चैव तेन नीलसरस्वती ।
तारकत्वप्रदा तारा सुखमोक्षप्रदायिनी ॥
उग्राऽऽपत्तारिणी यस्मादुग्रतारा प्रकीर्तिता ।

आम्नायभेदेन मार्गभेदनिर्णयमाह

वाडवानलीये—

पूर्वाऽऽम्नाये दक्षमार्गो वामः स्यात् पश्चिमे परे ।
दक्षिणोत्तरयोरूर्द्ध्वे मार्गौ तौ वामदक्षिणौ ॥
विहाय सर्वं सर्वत्र कौलमार्गः प्रशस्यते ।

मार्गत्रयव्यवस्था च

तत्रैव—

योगात् पञ्चमकाराणां वामहस्तेन पूजनात् ।
जपाद्धोमाच्च वामः स्याद्दक्षिणस्तद्विपर्ययात् ॥
तत्त्वतर्पणमन्त्रं तु वामहस्तेन दाक्षिणे ।
दक्षहस्तेन वामे ऽपि विशेषः परिकीर्तितः ॥

दक्षवामाक्रियायुक्तः कौलश्चोभयमिश्रितः* ।
मकाराऽऽवश्यकत्वाच्च दक्षतर्पणपूजनात् ॥
क्व चिद्वामेन देवेशि कौलो मार्गस्तृतीयकः ।

रुद्रयामले—

त्रीणि बीजानि दुर्गायास्तदाचारास्त्रयः स्मृताः† ।
प्रथमो दाक्षिणाऽऽचारो वामाऽऽचारो द्वितीयकः ॥
तृतीयस्तु कुलाऽऽचारो विधिं तेषां शृणु प्रिये ।
प्रभाते स्नानसंध्यादि मध्याह्ने जप ईश्वरि‡ ॥
और्णमासनमात्मार्थं भक्ष्यं पायसशर्करम् ।
माला रुद्राक्षसंभूता पात्रं पाषाणसंभवम् ॥
भोगः स्वकीयकान्ताभिर्दक्षिणाऽऽचार इत्ययम् ।
द्रव्येण मधुना देवि सिद्धिहानिकरो मतः ॥
वामाऽऽचारं प्रवक्ष्यामि श्रीदुर्गासाधनं परम् ।
यं विधाय कलौ शीघ्रं मान्त्रिकः सिद्धिभाग् भवेत् ॥
माला नृदन्तसंभूता पात्रं पाषाणमुण्डकम् ।
आसनं सिद्धचर्मादि कङ्कणं स्त्रीकचोद्भवम् ॥
द्रव्यमासवतत्त्वाढ्यं भक्ष्यं मांसादिकं शिवे ।
चर्वणं बालमत्स्यादि मुद्रा वीणारवः कथा ॥
मैथुनं§ परकान्ताभिः सर्ववर्णसमानता ।
वामाचार इति प्रोक्तः सर्वसिद्धिप्रदः शिवे ॥
अन्यथा सिद्धिहानिः स्यान्मन्त्रस्याऽस्य महेश्वरि ।
कुलाऽऽचारं प्रवक्ष्यामि सेव्यं योगिभिरुत्तमैः ॥

---

* उभयमाश्रित इति पाठान्तरम्।

† त्रयस्तथेति क्व चित्।

‡ जपमोश्वरीति पाठान्तरम्।

§ मिथुनमिति पाठान्तरम्।

कुलस्त्रियं कुलगुरुं कुलदेवीं महेश्वरि ।
नित्यं यत् पूजयेद्विश्वं स कुलाचार उच्यते ॥
कुलस्त्रियं शिवे ज्ञात्वा नुत्वा नत्वा महेश्वरि ।
हठादानीय संपूज्य ततो भोगं विधाय च ॥
तेजसा तर्पयेद्देवीं श्रीदुर्गां चक्रनायिकाम् ।
नीलकण्ठं च विधिना जपं कुर्याद्विशेषतः ॥
तत्पूर्वकं चरेद्धोमं कुलकान्तां विभूषयेत् ।
पानैः पेयैस्तथा भक्ष्यैः संतर्प्य कुलयोषितम् ॥
प्रत्यहं वै चरेदेवं कुलाचार इति स्मृतः ।

कौलादिभेदेन वाममार्गविधिरुक्तो,

मेरुतन्त्रे—

कौलिको ऽङ्गुष्ठतां प्राप्तो वामः स्यात्तर्जनीसमः ।
चीनक्रमो मध्यमः स्यात् सिद्धान्तीयो ऽपरो भवेत् ॥
कनिष्ठः शाबरो मार्ग इति वामस्तु पञ्चधा ।

मार्गभेदेनाऽधिकारिभेद उक्तो,

वाडवानलीये—

ब्राह्मणाः क्षत्रिया वैश्या दक्षमार्गाऽधिकारिणः ।
द्विजवर्जास्त्रयो वर्णा वामकौलाऽधिकारिणः ॥
दक्षमार्गपरिभ्रष्टो ब्राह्मणो वाममार्गगः ।
इहैव सिद्धिमाप्नोति नाऽपवर्गं* कदा चन ॥
वेदमार्गपरित्यागी कैवल्येच्छाविवर्जितः ।
सिद्धिकामी वाममार्गी ब्राह्मणो नारकी भवेत् ॥

---

* अपवर्गे इति पाठान्तरम् ।

वेदमार्गं परित्यज्य तन्त्रमार्गैकतत्पराः ।
ब्राह्मणा निरयं भुक्त्वा भवेयुर्ब्रह्मराक्षसाः ॥
वैदिकं तान्त्रिकं मार्गं दाक्षिणं ब्राह्मणश्चरन् ।
इह सिद्धीश्वरोभूत्वा देहान्ते ऽमृतमश्नुते ॥

एतेन वचननिचयेन दक्षिणे एव मार्गे ब्राह्मणस्य, मार्गत्रये ऽपि क्षत्रियवैश्ययोः, वामे कौले च शूद्रस्याऽधिकार इति व्यवस्थाप्य सिद्ध्यादिलोभाद्वामे कौले वा प्रवर्तमानस्य ब्राह्मणस्य केवलं भोग एव न मोक्षः, तदुभयं तु श्रौतमार्गसंवलिततन्त्रोक्तदक्षिणमार्गेण समुचितेष्टदेवताऽऽराधकस्यैव ब्राह्मणस्यैति सिद्धान्तितम्। न च—

वामाऽऽचारैर्द्विजैः पूर्वं कर्तव्यं कुलदीक्षणम् ।
पश्चाद्दीक्षा तु सावित्र्या व्यत्यासात् पतितो भवेत् ॥

इति ब्राह्मणानां वाममार्गाऽऽधिकारित्वप्रकाशकेन मेरुतन्त्रवचनेन विरोध इति वाच्यम् । तत्र द्विजपदस्य ब्राह्मणेतरद्विजपरत्वकल्पनेन विरोधाऽभावात् । अत एव—

ब्राह्मणानां वाममार्गो नरकायैव जायते ।

इति तन्त्रान्तरवचनान्तरमपि संगच्छते, अधिकारिविशेषाऽनुष्ठितस्य वाममार्गस्यापि भुक्तिमुक्तिजनकतया ब्राह्मणानां तदधिकारित्वे तस्य तन्निरयहेतुत्वाऽनुपपत्तेः। तथा च—

यो दाक्षिण्यं विना विप्रो महामायां प्रपूजयेत् ।
स पापः स्वर्गलोकात्तु च्युतो भवति रोगधृक् ।

इति कालिकापुराणवचनाद्दक्षिणमार्गे एव ब्राह्मणस्याऽधिकार इति बोध्यम्। एवं च क्षत्रियवैश्ययोरपि दक्षिणमार्ग एव प्रशस्तः, तयोर्वाममार्गाऽधिकारित्वकथनं तु रा-

गात् प्रवृत्तयोरपि न पातित्यमित्यभिप्रायेण; ब्राह्मणस्यैव तथाविधस्य तच्छ्रवणात्। वाममार्गस्तु शूद्राणामेव प्रशस्तः।

शूद्रादियवनान्तानां सिद्धिर्वामपथे* स्थिता।

इति मेरुतन्त्रवचनात्। आचारमाधिकृत्य—

वामादिना यजेच्छूद्रो दक्षिणेन द्विजातयः।

इति महाकालवचनात्। द्विजातय इति, ब्राह्मणक्षत्रियवैश्या इत्यर्थः। वामादिनेत्यादिशब्देन कुलाचारः संगृह्यते, सो ऽपि पूर्ववच्छूद्राणामेव प्रशस्तः, क्षत्रियवैश्ययोर्न प्रशस्तो नापि निषिद्धो, ब्राह्मणानां तु निषिद्ध एव।

ब्राह्मण्यहानिहेतुत्वात् कुलाचारं न चाऽऽचरेत्।

इति सिद्धान्तसारवचनात्।

ये विप्राः शापनिर्दग्धा ब्रह्मकर्मविवर्जिताः।
तेषां तु कौलधर्मो ऽयं भुक्तिमुक्त्योस्तु साधनम्॥
ये विप्राः पापसंजाताः शापनिर्दग्धविप्लुताः।
तेषां कुलाऽधिकारो ऽयं मार्गस्थाऽस्य प्रजायते॥

इत्यादिमेरुतन्त्रवचनेन दक्षयज्ञे पारिषदशापाद्वेदमार्गबहिर्भूतानां विनष्टब्राह्मणत्वानामेव विप्राणां तदधिकारित्वबोधनाच्च। यदि च स्वतन्त्रवक्तुरीशस्य वचनानां वैचित्र्याद् ब्राह्मणानामपि वामकौलाधिकारित्वबोधकवचनान्तरमुपलभ्येत तदा पञ्चसु लक्षणेषु यत्किंचिल्लक्षणोपलक्षिता हीनब्राह्मणास्तत्र बोद्धव्याः, तादृशानां तु तदधिकारो ऽस्त्येव।

---

* वामपक्षे इति पाठान्तरम्।

एतच्च मेरुतन्त्रे एवेश्वरचरणैर्व्यक्तीकृतम् । यथा—

ब्रह्मवीर्य्यं[1] तथा क्षेत्रं[2] संस्कारा ब्रह्मसंभवाः[3] ।
ब्राह्मणाऽऽचरणा[4]द्ब्रह्मविद्याभि[5]र्ब्राह्मणो भवेत् ॥
यस्य वश्या वयं यस्य वाचमर्थोऽनुधावति ।
एकस्मिँल्लक्षणे हीने वागर्थमनुधावति ॥
द्विहीनलक्षणो देवि स्वाचाराद्ब्राह्मणो भवेत् ।
लक्षणत्रयहीनो यस्तन्त्रमार्गेण सिध्यति ॥
चतुर्लक्षणहीनानां मार्गाः स्युः कौलिकादयः ।

लक्षणहानिश्च निर्देशक्रमप्रातिलोम्येन बोध्या* ।

तत्रैव—

पूर्वोक्तलक्षणेष्वेकं यस्मिन् विप्रे प्रदृश्यते ।
तप्यते चोपतापेन किंचिद्ब्राह्मणतां गतः ॥
अधिकारो न मे जातः समस्तब्रह्मकर्मणाम् ।
इह लोके परत्रापि कथं प्राप्स्याम्यहं सुखम् ॥
अन्धश्च यः परद्रव्ये परस्त्रीषु नपुंसकः ।
पराऽपवादे यो मूको नित्यमित्थं विचारयेत् ॥
तस्यैव ब्राह्मणस्यात्र वामे स्यादधिकारिता ।

एकमिति, ब्रह्मवीर्य्योत्पन्नत्वम् ।

तथा—

पञ्चलक्षणसंयुक्तो ब्राह्मणः काल एव सः ।
अहं ब्रह्मा तथा विष्णुस्तदाज्ञावशवर्तिनः ॥
स चेद्वामपथं प्राप्तः पुनः श्वा चाऽभिजायते ।

---

* तथा च वीर्या[1]ऽऽचार[2]संस्कार[3]क्षेत्र[4]बीजानीति क्रमेण लक्षणहानिर्द्रष्टव्या ।

चतुर्लक्षणसंयुक्तो वामस्तस्य फलप्रदः ॥
ताभ्यां दत्तो भाग्यवश्यात्तान्त्रिकः को ऽपि चेन्मनुः ।
सद्यः फलति चाऽऽद्यस्य क्रियया चाऽपरस्य तु ॥
लक्षणत्रययुक्तो यस्तस्य वैदिकतान्त्रिके ।
यथोक्ताऽऽचरणादेव फलदस्तेन वामकः ॥
लक्षणद्वयसंयुक्तस्तस्य वामश्च दक्षिणः ।
समौ तुल्यफलौ स्यातां न कदा चन वैदिकः ॥
एकलक्षणसंयुक्तो वामस्तस्य फलप्रदः ।
शूद्रादियवनाऽन्तानां सिद्धिर्वामपथे स्थिता ॥
वाममार्गस्थितो विप्रस्तुलसीं न क्व चित् स्पृशेत् ।
न स्पृशेद्वैष्णवं विप्रं प्रणमेन्न च वैदिकम् ॥
निन्दन्तु बान्धवाः सर्वे त्यजन्तु स्त्रीसुतादयः ।
जना हसन्तु मां दृष्ट्वा राजानो दण्डयन्तु वा ॥
रोगदारिद्र्यदुःखाद्यैः पीडितो ऽप्यनिशं त्वहम् ।
लक्ष्मीस्तिष्ठतु वा यातु न मुञ्चामि पदं[*] त्विदम् ॥
एवं यस्य दृढा भक्तिः स वामे सिद्धिमाप्नुयात् ।

रुद्रयामले—

वामे चन्द्रमुखी मुखे च मदिरा पात्रं कराऽम्भोरुहे
 मूर्ध्नि श्रीगुरुचिन्तनं भगवतीध्यानाऽऽस्पदं मानसम् ।
जिह्वायां जपसाधनं परिणतिः कौलक्रमाभ्यागमे[†]
 ये षां वै नियतं पिबन्तु सुरसं ते भुक्तिमुक्ती गताः ॥
वामे रामा रमणकुशला दक्षिणे चालिपात्रम्
 अग्रे मुद्राश्चणकवटकाः शूरणश्चौष्ठशुद्धिः ।

---

[*] पथमिति पाठान्तरम् ।

[†] क्रमाभ्यासने इति पाठान्तरम् ।

तन्त्रीवीणा सरसमधुरा सद्गुरुः सत्कथायां
वामाऽऽचारः परमगहनो योगिनामप्यगम्यः[*] ॥

मेरुतन्त्रे—

पेयं मद्यं पलं खाद्यं समालोक्यं प्रियामुखम् ।
इत्येवाऽऽचरणं श्रेष्ठं पामराः प्रवदन्ति च ॥
मद्यपानेन मनुजो यदि सिद्धिं लभेत चेत् ।
मद्यपानरताः सर्वे किं सिद्धा न भवन्त्युमे ॥
मांसभक्षणमात्रेण यदि पुण्या गतिर्भवेत् ।
क्रव्यादानां तदा मोक्षो मांसादन्यो न युज्यते ॥
स्त्रीसंभोगेन भो देवा यदि मोक्षो ऽभिजायते ।
तदा सर्वे ऽपि मुक्ताः स्युः कस्य जन्म भविष्यति ॥
कृपाणधारागमनाद् व्याघ्रकर्णाऽवलम्बनात् ।
भुजङ्गाऽऽवरणान्नूनमशक्यं कुलवर्त्मनि[†] ॥

अथ वैष्णवभेदाः ।

तदुक्तं शक्तिसंगमे—

वैखानसो[1] भवेदादौ श्रीराधावल्लभ[2]स्तथा ।
गोकुलेशो[3] महेशानि तथा वृन्दावनी[4] भवेत् ॥
पाञ्चरात्रः[5] पञ्चमः स्यात् षष्ठः श्रीवीरवैष्णवः[6] ।
रामानन्दी[7] हरिव्यासी[8] निम्बार्क[9]श्च महेश्वरि ॥
ततो भागवतो[10] देवि दश भेदाः प्रकीर्तिताः ।
वैखानसादिदीक्षाद्यैर्भूषितः स्मार्त्तवैष्णवः ॥
वैष्णवाऽऽचारनिरतो विष्णुमन्त्रैकपारगः ।

---

[*] एवं च ईदृशविकारकारणप्राचुर्येपि अविचलितमनसां देवताध्यानमात्रासक्तस्वान्तानां धीरवर्याणामेवाऽत्राधिकारो न तु विषयलम्पटानामिति सिध्यति ।

[†] आचरणमिति शेषः ।

अनन्यचेताः शान्तात्मा विष्णुचिह्नपरायणः ॥
श्रीराधावल्लभो देवि गोकुलेशं शृणु प्रिये ।
नानाऽऽभरणसंपन्नो नानासौगन्ध्यभूषितः ॥
गवां कुलं प्रीणयतः कलिकृष्णस्य रूपधृक् ।
शरीरमर्थं प्राणांश्च तन्निवेदनकारकः ॥
अन्तः शक्तिपरो देवि बहिर्वैष्णवरूपधृक् ।
गन्धर्वाऽऽचारनिरतो लतावेष्टित*तत्परः ॥
संप्रदायो गोकुलेशः सर्वसिद्धिकरो भुवि ।
विगताशः प्रसन्नात्मा विष्णुभक्तिपरायणः ॥
कामिनीसङ्गचपलो वनक्रीडाविनोदधृक् ।
सौगन्ध्यभूषिततनुः स्त्रीध्यानैकपरायणः ॥
विष्णुसारूप्यतत्त्वज्ञः प्रोक्तो वृन्दावनी शिवे ।
पञ्चरात्रव्रतं प्राप्ताः पाञ्चरात्राः प्रकीर्तिताः ॥
दिनपञ्चकपर्यन्तं शैवा नाम त्रिलोचनाः ।

गोपालपद्धतौ—

कायेन मनसा वाचा भजते विष्णुमेव यः ।
स वीरवैष्णवः प्रोक्तो देवतान्तरनिन्दकः ॥
चराऽचरमिदं विश्वं जानन् नारायणात्मकम् ।
कं चिन्न द्वेष्टि यः सोऽयमुत्तमो वीरवैष्णवः ॥

तत्रैव—

हृदयाम्भोजमध्यस्थे श्रीरामे परमात्मनि ।
आनन्दं भजते यस्तु रामानन्दी स उच्यते ॥

---

* लतावेष्टितकम्=आलिङ्गनविशेषः ।

शक्तिसंगमे—

पापसंहरणाऽऽसक्तो विष्णुभक्तो जितेन्द्रियः ।
यमादिनियमैर्युक्तो युक्ताऽऽचारपरायणः ॥
स्वोपयुक्तपरिग्राही* परकार्यपरायणः ।
हरिव्यासी महेशानि शिवशक्तिस्वरूपधृक् ॥
नित्याऽर्चनक्रमाऽशक्तः स्वतन्त्रैकपरायणः ।
बाह्यपूजादिनिरतो ऽनन्यभक्तः प्रसन्नधीः ॥
आर्य्यपक्षान्वितः स्वच्छः स्वच्छन्दाऽऽचारतत्परः ।
स्वतन्त्रः स्मार्त्तविद्वेषी निम्बार्को भगवान् हरिः ॥
विष्णुभक्तैकनिपुणो विजितात्मा प्रसन्नधीः ।
स्मार्त्तगर्वान्वितो देवि तदन्याऽऽचारतत्परः ॥
शैवद्वेषी तस्य सङ्गात् पुनः स्नानपरायणः ।
केवलं विष्णुभक्तिज्ञः प्रोक्तो भागवतः शिवे ॥

परमभागवतलक्षणं तु

एकादशस्कन्धे—

सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥

अन्यच्च तत्रैव—

गृहीत्वा ऽपीन्द्रियैरर्थान् यो न द्वेष्टि न हृष्यति ।
विष्णोर्मायामिदं† पश्येत् स वै भागवतोत्तमः ॥

तथा—

त्रिभुवनविभवहेतवे ऽप्यकुण्ठ-
स्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।

---

* करो ग्राहीति पाठान्तरम् ।

† इदं=जगत् ।

न चलति भगवत्पदारविन्दा-
ल्लवनिमिषार्द्धमसौ तु वैष्णवाऽग्र्यः ॥

मध्यमलक्षणं तत्रैव—

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा* यः करोति स मध्यमः ॥

प्राकृतभागवतलक्षणं तत्रैव—

अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चाऽन्येषु स भक्तः प्राकृतः स्मृतः ॥

अथ शैवभेदाः ।

शक्तिसंगमे—

शिखी[१] मुण्डी[२] जटी[३] चैव द्वि[४]त्रिदण्डी[५] क्रमेण च ।
एकदण्डी[६] महेशानि वीरशैव[७]स्तथैव च ॥
सप्त पाशुपताः प्रोक्ता दशधा वैष्णवास्तथा ।
अथ पाशुपतानां च वासनां† शृणु पार्वति ॥
शिखी पाशुपतो देवि शिखासूत्रधरः शुभः ।
समाधितत्परो देवि समाधौ शिवपीठधृक् ॥
रुद्राक्षं च तथा भस्म लिङ्गं शैवाऽभिधं शिवे ।
प्रसन्नात्मा शान्तचित्तो ब्रह्मचारी प्रकीर्तितः ॥
मतं श्रीबिन्दुमालिन्याः समाश्रित्य प्रतिष्ठितः ।
मुण्डी त्रिंशद्विधो देवि तारासूक्ते प्रकाशितः ॥
तत्र पाशुपताऽऽचारसंपन्नो मुण्डितो भवेत् ।
त्रिजटैकजटाधारी तथा वक्रजटाधरः ॥

---

* यथाक्रमम् ।

† वासनां=लक्षणम् ।

नग्नस्तपस्वी शान्तात्मा देहक्लेशपरायणः ।
कर्मत्रितयसंपन्नो जटी पाशुपतः स्मृतः ॥
द्विदण्डी तु महेशानि वाङ्मनोदण्डसंयुतः ।
कायवाङ्मनसां दण्डी त्रिदण्डी परिकीर्तितः ॥
मनोमात्रस्य दण्डी य एकदण्डी प्रकीर्तितः ।
केवल शिवसंपन्नः स्वस्य देवस्य निन्दकः ॥
वीरशैव इति ख्यातः, इति ।

अन्यत्र वैष्णवत्वेन प्रसिद्धास्त्रिदण्ड्यादयः शैवा अपि संभवन्तीति दर्शिताः ।

युगभेदेन मार्गभेदप्राधान्यमाह

रुद्रयामले—

कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिभाषितः ।
द्वापरे वै पुराणोक्तः कलावागमसंभवः ॥

प्रधान इति शेषः ।

आगमस्य वेदाऽङ्गत्वमाह

मेरुतन्त्रे—

न वेदः प्रणवं त्यक्त्वा मन्त्रो वेदसमन्वितः ।
तस्माद्वेदपरो मन्त्रो वेदाङ्गश्चाऽऽगमः स्मृतः ॥

आगमशब्दार्थो,

रुद्रयामले—

आगतः शिववक्त्रेभ्यो गतश्च गिरिजामुखे ।
मग्नस्तस्या हृदम्भोजे तस्मादागम उच्यते ॥

आगमस्य वेदाङ्गत्वे ऽपि वैदिककौलिकयोर्विरोधमाह

तत्रैव—

कौलिकं कुर्वतः कर्म वैदिकं नाऽभिधीयते ।
विरोधा*दुभयं नष्टं तस्मादेकपथा चरेत् ॥

वामदक्षिणमार्गयोरपि विरोधमाह

मेरुतन्त्रे—

वाममार्गी यदा दक्षं प्रविशेत्तत्सुरैः स तु ।
विघ्न्यते पीड्यते चापि न सिद्धिमधिगच्छति ॥
दक्षमार्गी यदा वामं प्रविशेत्तत्सुरास्तथा ।
लोकद्वयाद्भ्रापयन्ति तं ग्रसन्ति च वामिनम् ॥
तस्मात् स्वकुलमार्गं तु ज्ञात्वा कुर्यादुपासनाम् ।

उपासनाभेदास्तत्रैवोक्ताः—

श्रीशिव उवाच ।

महाकालेन यत् प्रोक्तं यन्महामायया श्रुतम् ।
रहस्याऽतिरहस्यं तत् सर्वमन्त्रेषु गोपितम् ॥
आम्नायानां रहस्यं तदाह्निकं प्रोच्यते ऽधुना ।
शृण्वन्तु सर्वे भो देवाः साधकानां प्रसिद्धिदम् ॥
तत्र नित्यं त्रिधा प्रोक्तं गुणत्रयविभेदतः ।
अधिकारिविभेदेन तदपि त्रिविधं भवेत् ॥
शुद्धं मिश्रं च गलितं तत्तथैव फलप्रदम् ।
शुद्धं सम्पूर्णफलदं मिश्रं किंचित्फलप्रदम् ॥
अकृते प्रत्यवायो न गलिते सत्फलं न च ।
अहङ्कारविहीनं यन्मानसं ज्ञानपूर्वकम् ॥

---

* विरुद्धादिति पाठान्तरम् ।

स्वस्थचित्तेन यतिना कृतं तच्छुद्धमुच्यते ।
तादृशं चेद् गृहस्थेन निर्द्रव्येणाऽथ वा कृतम् ॥
रुग्णेन पथिकेनापि कारागृहगतेन वा ।
भक्तितो वा ऽपि तन्मिश्रं बाह्यपूजाऽधिकारतः ॥
शीतादिभीत्यादाविष्टसंक्षयादल्पकार्य्यतः ।
स्त्र्यादेर्नियोगाद् गलितो गृहीतो मानसं मतम् ॥
बाह्यपूजादिकं यच्च एकान्ते नियमेन च ।
भक्त्या कृतं गृहस्थेन तच्छुद्धं राजसं मतम् ॥
पूजार्थं यद्याचयित्वा श्रद्धाभक्ती विहाय वा ।
लोकभीत्या देवभीत्या यत् तद्राजसमिश्रितम् ॥
प्रतारणार्थं लोकानां याचितं देवनामतः ।
द्रव्यं कृतं तद्वेषेण* गलितं तत्तु राजसम् ॥
वाममार्गं समाश्रित्य कौलं धर्मं विचार्य च ।
अन्यधर्मस्य चाऽद्वेषात् कृतं शुद्धं तु तामसम् ॥
कृतं यत् कामतः कर्म वैदिकं पारलौकिकम् ।
वाममार्गं समाश्रित्य मिश्रितं तत्तु तामसम् ॥
जिह्वालोभेन यत् खानं पानं यत् कामतो रतम् ।
अथ वा मारणाद्यर्थं गलितं तत्तु तामसम् ॥
शुद्धसत्त्वेन मोक्षः स्यात् स्वर्गः स्यान्मिश्रसत्त्वतः ।
सिद्धिर्गलितसत्त्वात् स्यादैहिकी च मनुष्यता ॥
स्वर्गः स्याद्राजसाच्छुद्धात् कामः स्यान्मिश्रराजसात् ।
गलिताद्राजसात् तिर्यग्योनावपि सुखं भवेत् ॥

---

* तद्वेशेनेति १ – २ पु. पा. ।

सात्त्विकात्तामसाद्देवयोनित्वं प्राप्नुयान्नरः ।
मिश्रतामसतो दुःखी नारकी चाऽन्ततामसात् ॥
कर्म पञ्चविधं प्रोक्तं पञ्चधा मुक्तिदायकम् ।
प्रसर्पण[१]मुपादान[२]मिज्या[३] ऽध्याय[४]स्तथा भुवि ॥
संमार्जनोपलेपादिसंस्कारा देवमन्दिरे[१] ।
भक्त्या ऽर्चनं* सर्प्पणं स्याद्देवसालोक्यकारकम् ॥
पूजासाधनसामग्र्या मेलनं भक्तसेवनम् ।
तत्प्रीतिः स्यादुपादानं देवतारूपदायकम् ॥
पीठपूजनपूर्वं यत् षोडशाद्युपचारकैः ।
मूर्त्तेर्यन्त्रे ऽथ वा पूजा सेज्या सामीप्यकारिका ॥
तच्छास्त्राऽध्ययनं सम्यक् कृत्वा मन्त्राऽर्थभावनम् ।
कृत्वा जपः स्यात् स्वाध्यायो देवसायुज्यकारकः ॥
गुरुदेवात्मकालानां† सम्यगैक्यविभावनम् ।
संयोगो देहलिङ्गस्य नाशकः कालयोगकृत् ॥

अथ पथिकादिकर्तृकोपासना

तत्रैवोक्ता—

अथाऽऽपराह्निकं वक्ष्ये तत् स्थानदशके भवेत् ।
मार्गे[१] प्रवासे[२] दुर्गे[३] च नाऽन्नप्राप्तौ‡[४] मनोभये[५] ॥
कारागृहे[६] ऽशुभे[७] ऽस्थाने[८] चौरव्याघ्रादिजे भये[९] ।
परचक्राऽऽगमे[१०] कुर्य्याच्छौचाद्यं च यथा तथा ॥
मन्त्रस्नानादिकं किं चित् कृत्वा मानसपूजनम् ।
मनसा हृदयस्याऽन्तर्ध्यात्वा योगाख्यपीठकम् ॥

---

* भक्तार्चनमिति १ – २ पु. पा. । † देवात्माकाराणामिति १ पु. पा. ।
‡ अन्नाप्राप्तौ, दुर्भिक्षे इत्यर्थः । नञ्शब्देन समासः ।

तत्रैव पृथिवीमध्ये पूजां देवस्य चाऽऽचरेत् ।
यथा पुष्पादिभिः पूजा बहिर्देशे विधीयते ॥
तथा हृद्यपि कर्त्तव्याः सर्वास्ताः प्रतिपत्तयः ।
मनसा जठरे होम एतद्द्विपदि चाऽऽह्निकम् ॥

अथ रोगाऽऽर्तकर्तृकोपासना

तत्रैवोक्ता—

अथाऽऽतुराह्निकं वक्ष्ये नित्यं कष्टाऽधिकस्य तत् ।
यदि लङ्घनपर्यन्तो व्याधिरात्मनि दृश्यते ॥
तदा पूजा न कर्त्तव्या स्थण्डिले प्रतिमासु च ।
न स्नानं दन्तकाष्ठं वा कुर्याद्धोममथापि वा ॥
रविमण्डलमालोक्य प्रतिमामथ वा पुनः ।
मूलमन्त्रं सकृज्जप्त्वा पुष्पं साक्षतमुत्सृजेत् ॥
श्रान्तो व्याधिभिरत्युग्रैर्जरसा चेन्द्रियच्युतः ।
निजसामयिकैर्वापि स्वकर्त्तव्यं समापयेत् ॥
रुङ्निवृत्तस्ततः स्नात्वा पूजयित्वा ऽग्निदेवताः ।
गुरून् विप्रांस्तदग्रे च वाक्यमेतदुदीरयेत् ॥
एतावत्कालविच्छिन्ना पूजा, युष्मत्प्रसादतः ।
न दोषो ऽस्त्विति संप्रार्थ्य पुनः पूर्ववदाचरेत् ॥
यस्तु रोगवशाद्दोषो जातस्तत्क्षालनं चरेत् ।
जपेन वा ऽथ दानेन होमेन ध्यानतो ऽपि वा ॥

अथ सूतकिकर्तृकोपासना

तत्रैवोक्ता—

अथ सूतकिनो नित्यं वैदिकं तु स्मृतीरितम् ।

कृत्वा तान्त्रिकपूजादि मनसैव समाचरेत् ॥
कामनार्थं प्रयोगश्चेत् तदा पूर्ववदाचरेत् ।
मृतगेहं परित्यज्य वामाऽऽचारेण सूतके ॥
स्पृहां हित्वा ज्ञानपूर्वं कुलजो धर्ममागतम् ।
यः पालयेद्वामधर्मं देवता तु स जायते ॥

अथ महाभये आपतिते पूजासामग्र्यभावे वा यत्कर्त्तव्यं तदाह

संत्रस्तेन न चेल्लब्धमर्घ्यपात्रादि साधनम् ।
पूजोदकेन कर्तव्या, तोयं चेन्नैव विद्यते ॥
तदा संपूजयेद्देवं भावनाकुसुमादिभिः ।
भक्तिः श्रद्धा भावना च पूजानां जीव उच्यते ॥

जडाऽऽह्निकमाह

जडानामाह्निकं वक्ष्ये तथा संक्षेपकर्म्माणि ।
रत्नमण्डप[१]धर्मादिचतुष्क[२]मुरगा[३]*ऽम्बुजम्[४]† ॥
मूल[५]‡मूर्ति[६]§षडङ्गानि[७]‖ तेषां पूजा विधीयते ।
एतन्न्यासक्रमेणैव स्पृशेदङ्गानि नित्यशः ॥
सर्वेषामपि वस्तूनामलाभे भावनैव हि ।
मिर्मलेनोदकेनैव पूजयेत् स्थिरमानसः ॥
सामान्यतस्त्रिधा पूजा सोत्तमा[१] मध्यमा[२] ऽधमा[३] ।
अधिकारिनिमित्ताभ्यां भिद्यते शतधा पुनः ॥
योगोपकरणैः कृत्स्नैः क्रियमाणोत्तमा मता ।
यथालब्धैर्विनिष्पाद्या द्रव्यैः पूजा तु मध्यमा ॥
पत्रपुष्पाऽम्बुनिष्पाद्या पूजा चाऽधमसंज्ञका ।

---

* उरगः शेषः ।
† पीठमध्यस्थमष्टदलकमलम् ।
‡ मूलमन्त्रः ।
§ मूर्तिः पूज्यदेवतायाः ।
‖ अङ्गन्यासः ।

विहिता ऽखिलवेदोक्तैर्ब्रह्मर्षिभिरकल्मषैः ॥
क्रियमाणा तु या पूजा सात्त्विकी सा विमुक्तिदा ।
राजर्षिभिस्तपोनिष्ठैर्भगवत्तत्त्ववेदिभिः ।
या पूजा क्रियते सम्यग्राजसी सा सुखप्रदा ॥
स्त्रीबालवृद्धमूर्खाद्यैर्भक्तैरक्षुब्धमानसैः ।
या पूजा क्रियते नित्यं तामसी सा प्रकीर्तिता ॥
अरण्ये स्वल्पकामानां सिद्ध्यर्थं पूजनं स्मृतम् ।
निष्कामानां गृहस्थानां हितं गेहे तु पूजनम् ॥
कदा चिदपि न त्याज्यो वेदमार्गो द्विजैः सदा ।
वेदच्युतानां विप्रत्वं देवत्वं चापि दुर्लभम् ॥

तथा—

उपासना त्रिधा प्रोक्ता श्रेष्ठा तत्र तु सात्त्विकी ।
तस्यां च मानसौ पूजाजपौ मुख्यतमौ स्मृतौ ॥
राजसो दक्षिणो मार्गः प्रतिमायां प्रपूजनम् ।
बाह्योपचारैः पुष्पाद्यैस्तदाद्यानां* विशिष्यते ॥
तामसोपासनं प्रोक्तं पीठादौ बलिदानतः ।
वाममार्गेण तच्चाद्यं वर्णं हित्वा प्रशस्यते ॥
एषा व्यवस्था संप्रोक्ता वामदक्षिणयोः परा ।
उपासना द्विधा प्रोक्ता सकामाऽकामविश्रुता ॥
मोक्षबीजं तु निष्कामा सकामा भवबीजकम् ।
उपासनायां च गुरूपदेशं विना ऽनधिकारित्वमाह

---

* ब्राह्मणानाम् ।

† एतदग्रे 'यथाऽधिकारोनास्तीहस्याच्चोपनयनादिष्वितिअधिकंदृश्यते २ पु. ।

तत्रैव—

द्विजानामनुपनीतानां स्वकर्माऽध्ययनादिषु ।
तथा चाऽदीक्षितानां च मन्त्रदेवाऽर्चनादिषु ॥
नाधिकारो ऽस्त्यतः कुर्य्यादात्मानं मन्त्रसंस्कृतम् ।

मन्त्रमुक्तावल्याम्—

जपो देवार्चनविधिः कार्य्यो दीक्षाऽन्वितैर्नरैः ।

तथा गौरीयामले—

यदृच्छया* श्रुतं मन्त्रं छद्मना ऽथ बलेन च ।
पत्रे स्थितं तु गाथावत् प्रजप्तमपि निष्फलम् ॥

योगिनीतन्त्रे—

अदीक्षिता ये कुर्वन्ति जपपूजादिकाः क्रियाः ।
न भवेत्तु फलं तेषां शिलायामुप्तबीजवत् ॥

महाकालसंहितायामपि—

न शास्त्रमालोक्य वदेन्नाऽऽचरेन्न जपेदपि ।
न पश्येन्नोपदिश्याच्च न कुर्य्यान्नैव साधयेत् ॥
गुरूपदेशतो लब्धे जपन्यासाऽर्चनादिके ।
पश्चात्तत्साधयेत्सर्वं सदा तद्भवभावितः ॥

दीक्षाया आवश्यकत्वमाह

रुद्रयामले—

यस्य दीक्षा शिवे नास्ति जीवनान्तं च जन्मिनः ।
स जातु नोत्तरेद्देवि निरयाऽम्बुनिधेः क्व चित् ॥
दीक्षाहीनस्य देवेशि पशोः कुत्सितजन्मनः ।

---

* यदिच्छयेति १ पु. पा. ।

पापौघो ऽन्तिकमायाति पुण्यं दूरं पलायते ॥
तस्माद्यत्नेन दीक्षैषा ग्राह्यो कृतिभिरुत्तमा ।

दत्तात्रेययामले—

अथ दीक्षाविहीनो यो वर्त्तते भुवि पापभुक् ।
मोहाऽन्धकारे नरके गर्ते पतति दुःखितः ॥
अनीश्वरस्य मर्त्यस्य नास्ति त्राता यथा भुवि ।
तथा दीक्षाविहीनस्य नेह स्वामी परत्र च ॥

आगमकल्पद्रुमे—

उपचारसहस्रैस्तु योजितां भक्तिसंयुताम् ।
अदीक्षिताऽर्चनां देवा न गृह्णन्ति कदा चन ॥
कर्माऽखिलं वृथा यस्मात् तस्मात् पशुरदीक्षितः ।

मत्स्यसूक्ते—

अदीक्षितानां मर्त्यानां शृणु देवि महेश्वरि ।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम् ॥
तत्कृतं तस्य वा श्राद्धं सर्वं संयात्यधोगतिम् ।

दीक्षामाहात्म्यमाह

कुलार्णवे—

उपपातकलक्षाणि महापातककोटिकाः* ।
क्षणाद्दहाति देवेशि दीक्षा हि विधिना कृता ॥

रुद्रयामले—

दीक्षितो ब्राह्मणो याति ब्रह्मलोकं सुधामयम् ।

---

* कोटय इति १-२ पु. पा. ।

ऐन्द्रं लोकं क्षत्रियोऽपि प्राजापत्यं विशस्तथा ॥
याति गन्धर्वनगरं शूद्रो दीक्षाप्रसादतः ।
दीक्षां विना न मोक्षः स्यात् प्राणिनां शिवशासनात् ॥
सा च न स्याद्विनाऽऽचार्यमित्याचार्य्यपरम्परा ।

वैशम्पायनसंहितायाम्—

सर्वसिद्धिकरी दीक्षा सर्वसंपत्प्रदायिनी ।
प्रतिमास्वरवर्णानि कान्तिपुष्टिधनानि च ॥
मोहनस्तम्भनाऽऽकृष्टिमारणोच्चाटनानि च ।
वशीकारं च कवितां बुद्धिं वै धारणायुताम् ॥
तारणं च समुद्रस्य वह्नेः शैत्यं रणे जयम् ।
विपिने चाऽभयं चैव शोकदुःखाऽपहं तथा ॥
धर्माऽर्थकाममोक्षांश्च ददात्येषा न संशयः ।

दीक्षाशब्दार्थ उक्तो

रुद्रयामले—

दिव्यज्ञानं यतो दद्यात् कुर्य्यात् पापस्य संक्षयम् ।
तेन दीक्षेति लोकेऽस्मिन् कीर्तिता मन्त्रपारगैः ॥

मेरुतन्त्रे—

दीयते ज्ञानविज्ञानं क्षीयन्ते पापराशयः ।
तेन दीक्षेति हि प्रोक्ता प्राप्ता चेत् सद्गुरोर्मुखात् ॥
असद्गुरुः स्वयं नष्टः कथं तारयते परम् ।

आगमसारे—

गुरोर्मुखान्महाविद्यां गृह्णीयात् पापनाशिनीम् ।
तस्माद्यत्नाद् गुरुं कृत्वा मन्त्रसाधनमाचरेत् ॥

(चामुण्डातन्त्रे)

उपविद्यासु सर्वासु षट्कर्मादिप्रसाधने ।
नात्र दीक्षाद्यपेक्षाऽस्ति नाऽत्राऽङ्गादिप्रपूजनम् ॥

उपविद्या यक्षिण्याद्याः । षट्कर्मादिसाधनमन्त्राश्च महामन्त्राऽतिरिक्ताः साधनमन्त्राः । अत्र दीक्षापदं क्रियावत्यादिदीक्षापरम् । उपदेशदीक्षा तु सर्वत्राऽऽवश्यकी ।

पुस्तके लिखितो मन्त्रो येन सुन्दरि जप्यते ।
न तस्य जायते सिद्धिर्हानिरेव पदे पदे ॥
गुरुमुख्याः क्रियाः सर्वा भुक्तिमुक्तिफलप्रदाः ।
गुर्वनुक्ताः क्रियाः सर्वा निष्फलाः स्युर्यतो ध्रुवम् ॥

इत्यादिवचनात् ॥ न च

शास्त्राद्वा गुरुवक्त्राद्वा ज्ञात्वा मन्त्रं प्रसाधयेत् ।

इति वचनात् पुस्तकादपि मन्त्रज्ञानं सिद्धिजनकमिति वाच्यम् । गुरोर्गृहीतमन्त्रः साधको मन्त्रसाधनप्रकारं शास्त्राद्गुरुमुखाद्वा ज्ञात्वा मन्त्रं साधयेदित्यस्यैव तदर्थत्वात् ॥

मन्त्रपदार्थमाह (पिङ्गलामते)

मननाद्विश्वविज्ञानं त्राणं संसारबन्धनात् ।
यतः करोति संसिद्धिं मन्त्र इत्युच्यते ततः ॥

मन्त्रमाहात्म्यमाह (मेरुतन्त्रे)

मन्त्र एवेश्वरः साक्षान्मन्त्र एव महौषधम् ।
नहि मन्त्रात् परं कश्चित् सर्वसिद्धिप्रदायकः ॥

तत्रैव—

साधकानां फलं दातुं तत्तद्रूपं धृतं सुरैः ।
मुख्यस्वरूपं तेषां तु मन्त्रा एव न चेतरत् ॥

(सारसंग्रहे)

यथा देवे तथा मन्त्रे यथा मन्त्रे तथा गुरौ ।
यथा गुरौ तथा स्वात्मन्येवं भक्तिक्रमः स्मृतः ॥

गुरुमाहात्म्यमाह (रुद्रयामले)

गुरुरेव परो मन्त्रो गुरुरेव परो जपः ।
गुरुरेव परा विद्या नास्ति किंचिद्गुरुं विना ॥
यस्य तुष्टा गुरुर्देवि तस्य तुष्टा महेश्वरी ।
येन संतोषितो देवि गुरुः स हिं सदाशिवः ॥
तस्माद्गुरुं भजेद्भक्त्या तोषयेत् सततं गुरुम् ।
गुरोर्यत्र परीवादो निन्दा यत्र प्रवर्त्तते ॥
कर्णौ तत्र पिधातव्यौ यद्वा दूरं पलायनम् ।

(ब्रह्मवैवर्त्ते)

यैः शिष्यैः शश्वदाराध्या गुरवो ह्यवमानिताः ।
पुत्रमित्रकलत्रादिसंपद्भ्यः प्रच्युता हि ते ॥
ये गुरुद्रोहिणो मूढाः सततं पापकारिणः ।
तेषां तु यावत् सुकृतं दुष्कृतं स्यान्न संशयः ॥
प्रातिकूल्यं गुरोर्नित्यं मनसा* वन्दनं चरेत् ।
सदाशिवधिया नित्यमेकग्रामनिवासिनम् ॥
गुरुं वन्देत चेद्दूरे मनसा वन्दनं चरेत् ।
ब्रह्मविष्णुशिवादीनां पूजने यत् फलं भवेत् ॥
तत् फलं समवाप्नोति प्रत्यहं वन्दने गुरोः ।
अविद्यो वा सविद्यो वा गुरुरेव तु दैवतम् ॥

---

* मनसाऽपि न कारयेदिति २ पु. पा ।

अमार्गस्थोऽथ मार्गस्थो गुरुरेव परा गतिः ।
यथा सिद्धरसस्पर्शात् ताम्रं भवति काञ्चनम् ॥
सन्निधाने गुरोरेवं शिष्यः शिवमयो भवेत् ।

तथा—

उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
तस्मान्मन्येत सततं पितुरप्यधिकं गुरुम् ॥

(वसन्तललितभैरव्याम्)

दिव्यज्ञानोपदेष्टारं दैशिकं परमेश्वरम् ।
पूजयेत् परया भक्त्या तस्याज्ञां नैव लङ्घयेत् ॥
यथा गुरुस्तथैवेशो यथैवेशस्तथा गुरुः ।
पूजनीयावुभौ भक्त्या न भेदो विद्यते तयोः ॥
नो द्वैतवादं कुर्वीत गुरुणा सह कुत्र चित् ।
अद्वैतं भावयेद्भक्त्या गुरुमीशः स जायते ॥

अन्यत्रापि

शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात् सर्वप्रयत्नेन गुरुमेव प्रसादयेत् ॥

(मेरुतन्त्रे)

घृणा[1] शङ्का[2] भयं[3] लज्जा[4] जुगुप्सा[5] चेति पञ्चमी ।
कुलं[6] शीलं[7] तथा शक्ति[8]रष्टौ पाशाः प्रकीर्त्तिताः ॥
पाशबद्धः पशुः प्रोक्तः पाशमुक्तः सदाशिवः ।
तस्मात् पाशहरो योऽत्र स गुरुर्नाऽन्य उच्यते ॥

तथा—

शङ्कया भक्षितं सर्वं त्रैलोक्यं सचराचरम् ।
सा शङ्का भक्षिता येन स गुरुर्दुर्लभः क्षितौ ॥

(कुलरत्नावल्याम्)

अत्रिनेत्रं शिवः साक्षादचतुर्बाहुरच्युतः ।
अचतुर्वदनो ब्रह्मा श्रीगुरुः कथितः प्रिये ॥
सदाशिवस्य देवस्य श्रीगुरोरपि पार्वति ।
उभयोरन्तरं नास्ति यः करोति स पातकी ॥
यथा घटश्च कलशः कुम्भश्चैकार्थवाचकाः ।
तथा देवश्च मन्त्रश्च गुरुश्चैकार्थ उच्यते ॥
न गुरोः सदृशं वस्तु न देवः शङ्करोपमः ।
न च कौलात् परो योगो न विद्या* कालिकासमा ॥

(मेरुतन्त्रे)

गुरुभक्तिविहीनस्य तपो विद्या व्रतं कुलम् ।
व्यर्थं सर्वं शवस्येव नानाऽलङ्कारभूषणम् ॥

गुरुशब्दार्थमाह (आगमसारे)

गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः ।
उकारः शिव इत्युक्तस्त्रितयात्मा गुरुः परः ॥
दृढव्रतं सदाचारं श्रद्धाभक्तिसमान्वितम् ॥
कृतज्ञं पापभीतं च साधुसज्जनसंगमम् ।
आस्तिकं दानशीलं च सर्वभूतहिते रतम् ॥

गुरुलक्षणम् (कुलार्णवे)

श्रीगुरुः परमेशानि शुद्धवर्णो मनोहरः ।
सर्वलक्षणसंपन्नः सर्वाऽवयवशोभितः ॥
सर्वाऽऽगमार्थतत्त्वज्ञः सर्वमन्त्रप्रधानवित् ।
लोकसंमोहनाकारो देववत्प्रियदर्शनः ॥

---

* बालिकेति २ पु. पा इह बालिकेति पदेन त्रिपुरसुन्दरी ।

इङ्गिताऽऽकारचेष्टाभि*र्दूरतः कृतदुर्जनः ।
अन्तर्मुखो बार्हिर्दृष्टिः सर्वज्ञो देशकालवित् ॥
आज्ञासिद्धस्त्रिकालज्ञो निग्रहाऽनुग्रहक्षमः ।
वेदवेदाङ्गविच्छान्तः सर्वजीवदयापरः ॥
स्वाधीनेन्द्रियसंचारः षड्वर्गविजयक्षमः ।
अग्रगण्योऽतिगम्भीरः पात्राऽपात्रविशेषवित् ॥
निर्मलो नित्यसंतुष्टो निर्द्वन्द्वो नित्यशक्तिमान् ।
सद्भक्तवत्सलो धीरः कृपालुः स्मितपूर्ववाक् ॥
भक्तिप्रियः सर्वसमो दयालुः शिष्यशासिता ।
स्वेष्टदेवगुरुः प्राज्ञो वनितापूजनोत्सुकः ॥
नित्ये नैमित्तिके काम्ये रतः कर्मण्यनिन्दिते ।
रागद्वेषभयक्रोधदम्भाऽहङ्कारवर्जितः ॥
स्वविद्याऽनुष्ठानतपोविद्यानां च प्रकाशकः ।
यदृच्छालाभसंतुष्टो गुणदोषविभेदकः ॥
स्त्रीधनादिष्वनासक्तो दुःसङ्गव्यसनोज्झितः ।
अलोलुपोऽहिंस्रकश्चाऽपक्षपाती विचक्षणः ॥
वित्तविद्यादिभिर्मन्त्रयन्त्रतन्त्राद्यविक्रयी ।
निःसंकल्पो निर्विकल्पो निर्णीतात्माऽतिधार्मिकः ॥
तुल्यनिन्दास्तुतिर्मौनी निरपेक्षो नियामकः ।
इत्यादिलक्षणोपेतः कथितः श्रीगुरुः प्रिये ॥

अथ निषिद्धगुरुलक्षणम् (तत्त्वसारे)

बह्वाशी दीर्घसूत्री च विषयादिषु लोलुपः ।
हेतुवादरतो दुष्टो वाग्वादी गुरुनिन्दकः ॥

---

* इङ्गिताऽऽकारचेष्टाविद्दूरत इति २ पु. पा. ।

अरोमा बहुरोमा च निन्दिताऽऽश्रमसेवकः ।
कालदन्तोऽसितोष्ठश्च दुर्गन्धिश्वासवाहकः ॥
दुष्टलक्षणसंपन्नो यद्यपि स्वयमीश्वरः ।
बहुप्रतिग्रहाऽऽसक्त आचार्यः श्रीक्षयावहः ॥

अथ शिष्यलक्षणम् (कुलार्णवे)

सच्छिष्यं तं कुलेशानि सर्वलक्षणसंयुतम् ।
शमादिसाधनोपेतं गुणशीलसमन्वितम् ॥
शुद्धदेहाऽन्ववायज्ञं धार्मिकं शुद्धमानसम् ।
विश्वासविनयोपेतं वित्तशाठ्यविवर्जितम् ।
असाध्यसाधकं शूरं बलकान्तिसमन्वितम् ॥
अनुकूलक्रियायुक्तमप्रमत्तं विचक्षणम् ।
हितसत्यमितस्निग्धभाषिणं मुक्तदूषणम् ॥
सकृदुक्तगृहीतार्थं चतुरं बुद्धिविस्तरम् ।
गृहमत्यासवोत्सङ्ग*निर्विकारमसेवकम् ॥
विमृश्यकारिणं वीरं मनोदारिद्र्यवर्जितम् ।
सर्वकार्याऽतिकुशलं धीरं सर्वोपकारकम् ॥
अत्यर्थं परनिन्दायां विमुखं सुमुखं प्रिये ।
जितेन्द्रियं सुसंतुष्टं धीमन्तं ब्रह्मचारिणम् ॥
त्यक्ताधिव्याधिचापल्यं दुःशङ्काऽऽतङ्कवर्जितम् ।
गुरुध्यानस्तुतिकथासेवनाभजनोत्सुकम् ॥
गुरुदैवतभक्तं च कामिनी†भजनोत्सुकम् ।
गुर्वाज्ञापालकं देवि गुरुकीर्तिप्रशंसकम् ॥

---

* गृहतल्पासवोत्सङ्गेति २ पु. पा. ।

† स्त्रीनिन्दारहितमिति ।

गुरुवाक्यप्रमाणज्ञं गुरुशुश्रूषणे रतम् ।
चित्ताऽनुवर्त्तिनं प्रेक्ष्यकारिणं कुलनायिके ॥
लज्जाऽभिमानगर्वादिवर्जितं गुरुसन्निधौ ।
निरपेक्षं गुरुद्रव्ये तत्प्रसादाभिकाङ्क्षिणम् ॥
गुरुध्यानादिनिरतं मोक्षमार्गाऽभिकाङ्क्षिणम् ।
इत्यादिलक्षणोपेतं गुरुः शिष्यं परिग्रहेत् ॥

कुत्सितशिष्यलक्षणं तत्रैव—

दुष्टाऽन्ववायजं दुष्टं गुणहीनं विरूपितम् ।
परशिष्यं च पाखण्डं धूर्त्तं पण्डितमानिनम् ॥
हीनाऽधिकविकाराङ्गं विकलाऽवयवान्वितम् ।
पङ्गुमन्धं च वधिरं मलिनं व्याधिपीडितम् ॥
उच्छिष्टं दुर्मुखं चापि स्वेच्छावेशधरं विटम् ।
दुर्भिदग्धं कुचेष्टं च कुटिलं भीमवीक्षणम् ॥
निद्राऽऽलस्ययुतं तन्द्राद्यूतादिव्यसनान्वितम् ।
कपाटकुड्यस्तम्भादौ तिरोहिततनुं सदा ॥
शून्यमुक्तकरं* क्षुद्रं श्रद्धाभक्तिविवर्जितम् ।
किमेकवादिनं स्तब्धं †दूषकं चपलं शठम् ॥
धनस्त्रीशुद्धिरहितं निषेधविधिवर्जितम् ।
रहस्यभेदकं चापि ‡वेदकार्य्याऽर्थघातकम् ॥
मार्जारबकवृत्तिं च रन्ध्राऽन्वेषणतत्परम् ।
मायाऽन्वितं कृतघ्नं च §प्रच्छन्नान्तरदायकम् ॥

---

* शून्यौ रिक्तौ मुक्तावसम्पुटितौ च करौ यस्य तमिति ।

† प्रेषकमिति २ पु. पा. ।

‡ देवेति २ पु. पा ।

§ गुप्तविघ्नदायकमिति ।

विश्वासघातकं देवद्रोहिणं पापकारिणम् ।
अविश्वासमविद्याङ्गमनर्थसिद्धिकाङ्क्षिणम् ॥
आततायिनमादिस्तुं कुत्सितं *कूटसाक्षिणम् ।
सर्वत्र याचकं देवि सर्वाकृष्टाभिगामिनम् ॥
असत्यनिष्ठं चासक्तं ग्राम्यादिबहुभाषिणम् ।
दुर्विचारवितर्कादिकारकं कलहप्रियम् ॥
वृथाऽऽक्षेपकरं भ्रान्तं भ्रामकं वाग्विडम्बकम् ।
परोक्षे दूषणकरं प्रत्यक्षे प्रियवादिनम् ।
वाग्रुक्षवादिनं विद्याचौरमात्मप्रशंसकम् ।
गुणाऽसहिष्णुं सङ्गीतमतिक्रोधसमन्वितम् ॥
चार्वाकं दुर्जनसखं सर्वलोकविगर्हितम् ॥
पिशुनं परसंतापं सर्वप्राणिभयंकरम् ।
अक्लेशवादिनं मित्रद्रोहिणं भ्रातृवञ्चकम् ॥
जिह्वोपस्थपरं देवि तस्करं पशुचेष्टितम् ।
अकारणद्वेषहास्यक्लेशक्रोधादिकारिणम् ॥
अतिहास्यस्य कर्त्तारं भ्रमान्तःपरिहासकम् ।
कामुकं चाऽतिनिर्लज्जं मिथ्यादुश्चेष्टसूचकम् ॥
असूयामदमात्सर्य्यदम्भाहंकारसंयुतम् ।
ईर्ष्यापैशुन्यपारुष्यकार्पण्यक्रोधमानिनम् ॥
अधीरं दुःखितं द्वेष्यमशक्तं तत्त्ववर्जितम् ।
†असिद्धकुमतिं मूढं चिन्ताकुलितमानसम् ॥
तृष्णालोभयुतं दीनमतुष्टं सर्वयाचकम् ।

---

* क्रूरसाक्षिणमिति २ पु. पा. ।

† अप्रसिद्धमतिमिति २ पु. पा.

बह्वाशिनं कपटिनं भ्रामकं कुटिलं प्रिये ॥
भक्तिश्रद्धादयाशान्तिधर्माऽऽचारविवर्जितम् ।
मातापितृगुरुप्राज्ञमहतां हास्यकारकम् ॥
कुलद्रव्यादिवीभत्सं गुरुसेवाऽभिमानिनम् ।
स्त्रीदुष्टं समयभ्रष्टं गुरुशप्तं महेश्वरि ॥
इत्यादिविगुणोपेतं गुरुः शिष्यं परित्यजेत् ।
स्नेहाद्वा लोभतो वाऽपि यदि गृह्णाति दीक्षयेत् ॥
तस्मिन् गुरौ सशिष्ये च देवताशाप आपतेत् ।
तस्मादेवंविधं शिष्यं न गृह्णीयात् कदा चन ॥
यदि गृह्णाति मोहेन तत्पापैः प्राप्यते गुरुः ।
मन्त्रिपापं च राजानं पतिं जायाकृतं यथा ॥
तथा शिष्यकृतं पापं प्रायो गुरुमपि स्पृशेत् ।
ज्ञानेन कृपया वाऽपि गुरुः शिष्यं परीक्षयेत् ॥
संवत्सरं तदर्द्धं वा तदर्द्धं वा तदर्द्धतः ।
उत्तमानधमे कार्ये नीचानुत्तमकर्मणि ॥
प्राणद्रव्यप्रदानाद्यैरादेशैश्च समागमैः ।
तन्मर्मसूचकैर्वाक्यैर्मायाभिः क्रूरचेष्टितैः ॥
पक्षपातैरुदासीनैरनेकैश्च मुहुर्मुहुः ।
आहृष्टः पीडितश्चापि यो विषादं न याति च ॥
गुरुः कृपां करोतीति मुदा* संवेदयेत् सदा ।
श्रीगुरुस्मरणे वाऽपि कीर्त्तने चापि वन्दने ॥
परिचर्यायामाह्वाने प्रेषणेऽन्वेषणे प्रिये ।

---

* संचिन्तयेदिति.

आनन्दकम्परोमाञ्चस्वरनेत्रादिविक्रिया ॥
येषां स्यात् ते न योग्याः स्युर्मन्त्रसिद्धिरपीश्वरि ।

(मन्त्रमुक्तावल्याम्)

तयोर्वत्सरमात्रेण ज्ञाताऽन्योन्यं भविष्यति ।
गुरुता शिष्यता वाऽपि नान्यथेति विनिश्चयः ॥

(मेरुतन्त्रे)

धनार्थिनस्तु गुरवः शिष्याः सिद्ध्यर्थिनः कलौ ।
तस्मान्न चोभयोः सिद्धिर्देवतानां विडम्बनम् ॥

(लिङ्गागमे)

शिष्यंश्च सद्गुरोर्मन्त्रं गृहीत्वा तं परित्यजेत् ।
गुरुत्यागकरः शिष्यः प्रायश्चित्ती भवेद्ध्रुवम् ॥

(रुद्रयामले)

गुरुत्यागाद्भवेन्मृत्युर्मन्त्रत्यागाद्दरिद्रता ।
गुरुमन्त्रपरित्यागाद्रौरवं नरकं व्रजेत् ॥

कौलिकेन पशोर्मन्त्रग्रहणे तु तत्परित्यागोऽपि देव्यागमे उक्तः ।

यदि दैवात् पशोर्विद्या लभ्यते कुलजैर्नरैः ।
द्विजं तु कौलिकं प्राप्य पुनर्विद्यामुपालभेत् ॥
यो गृह्णाति पशोर्दीक्षां तस्याऽऽधिर्गात्रपीडनम् ।
भवत्येव न संदेहो बन्धनं चैव वा भवेत् ॥
वटपत्रे लिखित्वा च तन्मन्त्रं श्रोतसि क्षिपेत् ।
सद्गुरुं वा समाश्रित्य गृह्णीयात् संस्कृतं मनुम् ॥

(कुलार्णवे)

श्रीगुरुं लक्षणोपेतं संशयच्छेदकारकम् ।

लब्ध्वा ज्ञानप्रदं देवि न गुर्वन्तरमाश्रयेत् ॥
अनभिज्ञं गुरुं प्राप्य संशयाच्छेदकारकम् ।
शिष्यो गुर्वन्तरं गत्वा तद्दोषैर्नाऽनुलिप्यते ॥

(शैवागमे)

गुरवो बहवः सन्ति कुमन्त्रौषधवेदिनः ।
निगमाऽऽगमशास्त्रोक्तमन्त्रज्ञो दुर्लभो भुवि ॥
सुविज्ञश्चोद्धरेन्मूर्खं न मूर्खो मूर्खमुद्धरेत् ।
शिलां संतारयेन्नौर्हि किं शिलां तारयेच्छिला ॥
मधुलुब्धो यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत् ।
ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् ॥

(वाराहीतन्त्रे)

स्वनाम्ना न गुरुः कार्यो भार्या च मातृनामिका ।

अथोक्तलक्षणलक्षितस्यापि गुरोर्विशेषमाह । (रुद्रयामले)

वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके ।
शैवः शाक्तोऽपि सर्वत्र दीक्षास्वामी न संशयः ॥
व्युत्क्रमेण महेशानि मन्त्रसिद्धिर्भवेन्न हि ।
न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम् ॥
न पुत्रं च तथा भ्राता भ्रातरं च न दीक्षयेत् ।

न पत्नीं दीक्षयेद्भर्तेति पशुकल्पे । वीरकल्पे तु—

वीराणां कौलिकानां च भर्त्ता दीक्षणमाचरेत् ।
भर्त्तुर्दीक्षाप्रदाने तु न दोषः कौलिकाऽऽगमे ॥
शिवेन दीक्षा पूर्वं तु गौर्य्यै दत्ता शुभावहा—इत्युक्तम् ।

तथा—

पितुर्मन्त्रं न गृह्णीयात् तथा मातामहादपि ।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY 8513

सोदराच्च कनिष्ठाद्वा वैरिपक्षाश्रितात् तथा ॥

(गणेशविमर्षिण्याम्)

पितुर्दीक्षा यतेर्दीक्षा दीक्षा च वनवासिनः ।
विविक्ताश्रमिणो दीक्षा सा न कल्याणदायिनी ॥

(योगिनीतन्त्रे)

निर्वीर्यं हि पितुर्मन्त्रं तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥
प्रमादाद्वा तथाऽज्ञानात् पितृदीक्षां यदाऽऽचरेत् ।
प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् ॥

अत्र पितुरित्यनादरे षष्ठी तेन पित्रादिष्वभक्तिरूपोऽनादरोऽतिपरिचयादिना यदि भवति तदा पुत्रादिना मन्त्रो न ग्राह्य इत्यर्थः । इति सुधार्णवकृतः ।

मत्स्यसूक्ते तु—

निर्वीर्यं हि पितुर्मन्त्रं शैवे शाक्ते न दुष्यति—इत्युक्तम् ।

(ताराकल्पे)

कथमपि मनुमेतं प्राप्य शिष्याय कस्मै
निजकुलतिलकाय ज्येष्ठपुत्राय दद्यात्—इदं ताराविषयकम् ।

श्रीविद्याविषयेऽपि न पितृदीक्षानिषेधः । तदुक्तम् (श्रीक्रमे)

मनुर्विमृश्य दातव्यो ज्येष्ठपुत्राय धीमते ।

स्वीयमन्त्रग्रहणे तु गुरुविचारो न कर्त्तव्यः ।

स्वीयमन्त्रोपदेशे तु न कुर्याद्गुरुचिन्तनम् ।

इति भैरवतन्त्रवचनात् ।

तथा च—

ब्रह्मणा कथितं पूर्वं वशिष्ठाय महात्मने ।
वसिष्ठोऽपि स्वपुत्राय मत्पित्रे दत्तवान् स्वयम् ॥

प्रसन्नहृदयः स्वच्छः पिता मे करुणानिधिः।
कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान् ॥

इति विष्णुमन्त्रमधिकृत्य वैशम्पायनसंहितायां शौनकं प्रति व्यासवाक्याद्विष्णुमन्त्रेऽपि न पितृदीक्षानिषेधः।

स तूपदेश्यः पुत्रश्च व्यत्ययी च सुतस्तथा।

इति नारायणीयवचनादभक्तस्यैव पुत्रस्य पितृदीक्षानिषेधः। इति संप्रदायविदः। व्यत्ययी मन्त्रान्तरं दत्वा मन्त्रान्तरग्राहकः।

(योगिनीतन्त्रे)

स्त्रियो दीक्षा शुभा प्रोक्ता मातुश्चाऽष्टगुणा स्मृता।
साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया ॥
सर्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता।
गुरुयोग्या भवेत् सा हि विधवा परिवर्जिता ॥

(वैशम्पायनसंहितायाम्)

स्वप्नलब्धं स्त्रिया दत्तं संस्कारेणैव सिद्ध्यति।

संस्कारश्च तत्रैव—

स्वप्नलब्धे च कलशे गुरोः प्राणान् निवेशयेत्।
वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं कृतम् ॥
ततः सिद्धिमवाप्नोति विफलं त्वन्यथा भवेत्।

सिद्धमन्त्रग्रहणे तु न कश्चिद्विचारः। तदुक्तं (शक्तियामले)

सिद्धमन्त्रो यदि भवेत् तदा पत्नीं सुदीक्षयेत्।
शक्तित्वेन वरारोहे न च सा पुत्रिका भवेत् ॥
पिता तथाविधः पुत्र्यै तथा दीक्षां समाचरेत्।
भ्राता सिद्धमनुर्भूयात् गुरुर्भ्रातुस्तु शक्तितः ॥
सिद्धमन्त्रो नरः सर्वमयोग्यं योग्यतां नयेत्।

(महाकपिलपञ्चरात्रे)

न मन्त्रे चाधिकारोऽस्ति शूद्राणां नियमः परः ।
मन्त्राभावादमन्त्रेण भाषितं सर्वकर्म हि ॥

(सातातपसंहितायाम्)

यावन्त्यर्णानि मन्त्राणां स्त्रीशूद्रादेः प्रदापयेत् ।
तावत्यो ब्रह्महत्याः स्युः स्वयमाह प्रजापतिः ॥

इति वैदिकादिमन्त्रपरम् ॥

(भविष्योत्तरे)

ब्राह्मणा क्षत्रिया वैश्याः शूद्रा ये शुचयोऽमलाः ।
तेषां मन्त्राः प्रदेया वै न तु संकीर्णवर्णिनाम् ॥

(देवीयामले)

स्वाहाप्रणवसंयुक्तं मन्त्रं शूद्रे ददद्द्विजः ।
शूद्रो निरयगामी स्याद्विप्रः शूद्रत्वमाप्नुयात् ॥

(ब्रह्मपुराणे)

वैदिको मिश्रितो वाऽपि विप्रादीनां विधीयते ।
तान्त्रिको विप्रभक्तस्य शूद्रस्यापि प्रकीर्तितः ॥

(भागवते ११, स्कन्धे)

वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः ।
त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ॥

(साम्बपुराणे)

श्रुतिभ्रष्टः श्रुतिप्रोक्तप्रायश्चित्ते भयं गतः ।
क्रमेण श्रुतिसिद्ध्यर्थं ब्राह्मणस्तं समाश्रयेत् ॥
पञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम् ।
वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवान् ॥

(आचारकुसुमावल्याम्)

ब्रह्मवीर्यसमुत्पन्नो ब्राह्मणीगर्भसंभवः ।

वेदोक्ताशेषसंस्कारसंस्कृतः सर्वदा शुचिः ॥
अधीतवेदवेदाङ्गो वेदान्तार्थविचक्षणः ।
त्रिकालविहितस्नानसंध्योपासनतर्पणः ॥
नित्यं सहस्रगायत्रीजापको वैश्वदेवकृत् ।
अग्निहोत्री सावधानो दैवे पैत्रे च कर्मणि ॥
स्वकर्मच्युतिभीतश्च भीतः कालव्यतिक्रमात् ।
प्रायश्चित्तेष्वभीतश्च सदाचारेषु सादरः ॥
गर्हिताऽऽचारविमुखः शान्तो दान्तः प्रसन्नधीः ।
इत्यादिलक्षणोपेतः कथितो वैदिको बुधैः ॥
एतदन्यब्राह्मणा ये वेदभ्रष्टाश्च ते मताः ।
वेदभ्रष्टद्विजातीनां मिश्रोऽध्वा सिद्धिदः कलौ ॥
वेदोक्त एव मार्गः स्याद्वैदिकस्य द्विजस्य च ।
परित्यक्तश्रौतमार्गः पतितः कथ्यते द्विजः ॥

(नारदपञ्चरात्रे)

स्त्रीशूद्रेभ्यो मनुं दद्यात् स्वाहाप्रणववर्जितम् ।

(कुलार्णवे)

स्त्रीशूद्राणामयं मन्त्रो नमोऽन्तश्च सुखावहः ।
एतज्ज्ञात्वा महेशानि चाण्डालानपि दीक्षयेत् ॥

(याज्ञवल्क्यसंहितायाम्)

न वैदिकं जपेच्छूद्रः स्त्रियश्चैव कदा च न ।
नमोऽन्तं शैवमन्त्रं वा वैष्णवं चेष्यते बुधैः ॥

(मेरुतन्त्रे)

मोहाद्वा कामतः शूद्रः पुराणं संहितां स्मृतिम् ।
पठन्नरकमाप्नोति पितृभिः सह पापकृत् ॥

यः शूद्रो बुद्धिपूर्वं तु शृणुयाच्छ्रावयेद्द्विजः ।
वेदं तौ दुःखितौ स्तोऽस्मिन् भवेऽन्यत्र तु नारकौ ॥
अधिकारमदाद्यस्तु धनस्य मदतोऽपि वा ।
शूद्रस्तु शृणुयाद्वेदं स निर्वंशश्च निर्धनः ॥
अज्ञानाच्चेच्छ्रुतो वेदः श्रावितो वा द्विजन्मना ।
प्राजापत्यत्रयं कृत्वा तौ द्वौ शुद्धौ भविष्यतः ॥

भूतशुद्धितन्त्रोक्तानि तन्त्रचिन्तामणिलिखितवचनानि ।

प्रणवोच्चारणाद्धोमाच्छालग्रामशिलार्चनात् ।
ब्राह्मणीगमनाच्चैव शूद्रश्चाण्डालतां व्रजेत् ॥
शूद्रस्य प्रणवोच्चारं पुराणासंमतं प्रिये ।
तस्माद्यत्नेन कर्त्तव्यं तन्त्रोक्तं शूद्रजातिना ॥
महाविद्याप्रभावेण शूद्रो वैश्यत्वमाप्नुयात् ।
प्रणवाद्यं महेशानि गृह्णीयुः शूद्रजातयः ॥
एतद्दीक्षापरं तत्त्वं सुगोप्यं परमेश्वरि ।

(रुद्रयामले)

प्रवृत्ते भैरवीतन्त्रे सर्वे वर्णा द्विजातयः ।
निवृत्ते भैरवीतन्त्रे सर्वे वर्णाः पृथक् पृथक् ॥

अत्र द्विजातय इति वर्णद्वयजाताः । कुण्डादय इति नागोजिभट्टाः ।

(सौत्रामणितन्त्रे)

मायाबीजं ब्राह्मणः स्याच्छ्रीबीजं क्षत्रियः स्मृतः ।
कामबीजं भवेद्वैश्यो वाग्भवं शूद्र ईरितः ॥
चतुर्बीजपरित्यक्तो मन्त्रः पौलस्त्यसंज्ञकः ।
चतुर्बीजं ब्राह्मणानां क्षत्रियाणां त्रिबीजकम् ॥
बीजद्वयं तु वैश्यानां शूद्राणां त्वेकबीजकम् ।

(ब्रह्मपुराणे)

ॐकारादिसमायुक्तं नमस्कारान्तमीरितम् ।
स्वनाम सर्वसत्त्वानां मन्त्र इत्यभिधीयते ॥

(यामले)

स्वताराराशिकोष्ठानामनुकूलान् भजेन्मनून् ।
शिष्यानुकूलं चक्रेभ्यो ज्ञात्वा दद्यान्मनुं गुरुः ॥

अथ चक्रविचारः । तदुक्तम् (भुवनेश्वरीतन्त्रे)

ताराशुद्धिर्वैष्णवानां कोशशुद्धिः शिवस्य च ।
राशिशुद्धिस्त्रैपुरे च गोपालेऽकडमः स्मृतः ॥
अकडमो वामनस्य गणेशे दन्तचक्रकम् ।
दन्तचक्रं वराहस्य महालक्ष्म्याः कुलाकुले ॥
नामादिचक्रे सर्वेषां भूतचक्रे तथैव च ।
दोषान् संशोध्य गृह्णीयाद्गुरुवाक्येन जल्पकः ॥

(वाराहसंहितायाम्)

ताराचक्रं राशिचक्रं नामचक्रं तथैव च ।
अत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत् ॥
अथ वक्ष्ये विचारोऽयं चक्राणां सिद्धिहेतवे ।
ततस्तु प्रथमं वक्ष्ये स्वकुलाकुलचक्रकम् ॥
कारणात् पञ्चभूतानामुद्भूता मातृका यतः ।
अतो भूतात्मका वर्णाः पञ्चपञ्चविभागतः ॥
वाय्वग्निभूजलाऽऽकाशाः पञ्चाशल्लिपयः क्रमात् ।
पञ्च ह्रस्वाः पञ्च दीर्घा विन्द्वन्ताः संधिसंभवाः ॥
पञ्चशः कादयः षक्षलसहान्ताः समीरिताः ।

पञ्चपञ्चेति दशवर्णा इत्यर्थः । वाय्वग्निभूजलाकाशा इति । अआएकचवतपयषा मारुताः । इईऐखछठथफरक्षा आग्नेयाः । उऊओगजडदबलला: भौमा ।

ऋॠऔघझढधभवसा जलीयाः* । ऌॡअंङञणनमशहा नाभसाः । पञ्चह्रस्वा इति अइउऋऌ । पञ्चदीर्घा इति आईऊॠॡ । विन्द्वन्ता इति-विन्दुरन्ते यस्य तेन अं इत्यर्थः । संधिसंभवा इति एऐओऔ ।

स्वनामाद्यक्षराणां तु मित्रं वा स्वकुलं वरम् ।

तद्यथा—

साधकस्याक्षरं पूर्वं मन्त्रस्यापि तथाऽक्षरम् ।
यद्येकभूतदैवत्यं जानीयात् स्वकुलं हि तत् ॥

मित्रमिति परस्परमैत्रम् । तदुक्तम् (दीपिकायाम्)

पार्थिवं वारुणं मैत्रमाग्नेयस्यापि मारुतम् ।
पार्थिवानामक्षराणां शत्रुत्वे मारुतं स्थितम् ॥
आग्नेयस्याम्भसं शत्रुरम्भसस्तैजसं स्मृतम् ।
एतेषामेव सर्वेषामविरोधि तु नाभसम् ॥
परस्परविरुद्धानां न कुर्यान्मेलनं सुधीः ।
उक्तं कुलाकुलं चक्रं समस्तपुरुषार्थकम् ॥

वायुः	अग्निः	भूः	जलम्	आकाशः
अ	इ	उ	ऋ	ऌ
आ	ई	ऊ	ॠ	ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	श
ष	क्ष	ल	स	ह

इति कुलाकुलचक्रम्† ।

---

* वारुणा इति २ पु. पा. ।

† अत्रत्यमेलनप्रकारो मन्त्रमहोदधौ विशेषतोऽभिहितः ।

वक्ष्ये अकथहं चक्रं प्रागुलिखेच्चतुरस्रकम् ।
मध्ये रेखाद्वयं दद्यात् प्रागग्रमुदगग्रगम् ॥
चतुरस्रं भवेत् तत्र चतुष्कोष्ठसमन्वितम् ।
पूर्वापराऽऽयतं दद्यान्मध्ये रेखाद्वयं ततः ॥
उदग्दक्षिणदीर्घं च दद्याद्रेखाद्वयं ततः ।
ततः षोडशकोष्ठाढ्यं जायते चक्रमुत्तमम् ॥
आदिक्षान्ताँल्लिखेद्वर्णान् क्रमेणानेन मन्त्रवित् ।
इन्द्र^{1}ग्नि^{3}रुद्र^{11}नव^{9}नेत्र^{2}युगा^{4}ऽर्क^{12}दिक्षु^{10}
ऋत्व^{6}ष्ट^{8}षोडश^{16}चतुर्दश^{14}भौतिकेषु^{5} ।
पाताल^{7}पञ्चदश^{15}वह्निहिमांशु^{13}कोष्ठे
वर्णाँल्लिखेल्लिपिभवान् क्रमशस्तु धीमान् ॥
आदौ चतुश्चतुष्कोष्ठे सिद्धादीन् परिकल्पयेत् ।
प्रदक्षिणक्रमादेवं स्वनामाक्षरमाद्यतः ॥
सिद्धसाध्यसुसिद्धारिक्रमेण गणयेद्बुधः ।
सिद्धादीन् सिद्धिदः सिद्धो जपात् साध्यो हुतादिभिः ॥
सुसिद्धः प्राप्तिमात्रेण साधकं भक्षयेदरिः ।
सिद्धाणां बान्धवा ज्ञेया साध्यास्ते सेवका मताः ॥
सुसिद्धाः पोषकाश्चैवं शत्रवो घातकाः स्मृताः ।

(पिङ्गलामते)

सिद्धः सिद्ध्यति कालेन साध्यस्तु जपहोमतः ।
सुसिद्धो ग्रहणादेव शत्रुर्मूलानि कृन्तति ॥

(मेरुतन्त्रे)

आदौ ज्ञेयं चतुष्केषु सिद्धाद्यं विदिशासु च ।

तत्स्थानसमकोष्ठात् तु पुनर्गण्यं गुरूक्तितः ॥

(पिङ्गलामते)

सिद्धादीन् शोधयेन्मन्त्री पुनः सिद्धादिभिः स्मृतः ।
सिद्धसिद्धो जपात् सिद्धिर्द्विगुणात् सिद्धसाध्यकः ॥
सिद्धः सुसिद्धोऽर्धजपात् सिद्धारिर्हन्ति बान्धवान् ।
साध्यसिद्धो द्विगुणकः साध्यसाध्यो निरर्थकः ॥
साध्यसुसिद्धोऽर्धजपात् साध्यारिर्हन्ति गोत्रजान् ।
सुसिद्धसिद्धोऽर्धजपात् फलं दद्याद्यथेप्सितम् ॥
सुसिद्धसाध्यं सततं जपात् सिद्धिर्न चान्यथा ।
सुसिद्धसिद्धो यो मन्त्रः पूर्वजन्मकृतश्रमः ॥
तस्मात् तं सर्वसिद्धीनां साधने योजयेन्मनुम् ।
सुसिद्धारिर्विशेषेण स्वकुलं नाशयेद्ध्रुवम् ॥
अरिसिद्धः सुतं हन्ति अरिसाध्यस्तु कन्यकाम् ।
पत्नीमपि सुसिद्धस्तु अर्यरिर्मूलघातकः ॥

अकथह १	उङप २	आखदक्ष ३	ऊचफ ४
ओडव ५	ऌझम ६	औढश ७	ॡञय ८
ईघन ९	ऋजभ १०	इगध ११	ॠछब १२
अः तस १३	ऐठल १४	अंणष १५	एटर १६

इत्यकथहचक्रम् ।

अथ ऋणिधनिचक्रम्। तत्र मन्त्राणां साधकानां ऋणित्वे धनित्वे च हेतुमाह (तन्त्रराजे)

पूर्वजन्मकृताभ्यासात् पापादस्याफलाप्तिकृत्।
पापे नष्टे फलावाप्तिः काले देहक्षयादृणी ॥
मन्त्रसंप्राप्तिमात्रेण प्राक् पूतः सिद्धये भवेत्।
सिद्धमन्त्रान् गुरोर्लब्ध्वा मन्त्री यत्सिद्धिभाग्नरः ॥
लक्ष्मीवान् स सदा पूज्यो मन्त्रभोगमवाप्नुयात्।
स मन्त्रोऽस्य ऋणी ज्ञेयो भजनं तस्य पूर्वगम् ॥
तस्मादृणविशुद्धिस्तु कार्या सर्वैस्तु सर्वतः ॥

तदुक्तम् (सुन्दरीरहस्यवृत्तौ)

पूर्वाऽपरायतं लेख्यं रेखाद्वादशकं क्रमात्।
क्रमेणैवात्र जायन्ते कोष्ठा एकादश क्रमात् ॥

तेषु वर्णाँल्लिखेन्मन्त्री स्वरादिक्रमयोगतः।
द्वौ द्वौ स्वरौ पञ्चसु कोष्ठकेषु
शेषान् स्वरान् षट्सु षडेकमेकम्।
कादीन् हशेषान् विलिखेत् ततोऽर्णा-
नेकैकमेकादशमात्रकेषु ॥

साध्याङ्कान् विलिखेदूर्ध्वे साधकाङ्कानधो लिखेत्।
इन्द्र^{१४}र्क्ष^{२७}नेत्र^{२}रवि^{१२}पञ्चदश^{१५}र्तु^{६}वेद^{४}—
वन्ह्या^{३}युधा^{५}ष्ट^{८}नव^{९}भिर्गुणिताँश्च साध्यान्।
दि^{१०}ग्भू^{१}मुनि^{७}श्रुति^{४}गजा^{८}ग्नि^{३}मुनी^{७}षु^{५}वेद^{४}-
ष^{६}ड्वह्नि^{३}भिश्च गुणितानथ साधकार्णान्।

साध्याङ्कान् साधकाङ्कांश्च पूरयेद्गृहसंख्यया ॥
नामाक्षरादकथहाद्गजभक्तशेषं
ज्ञात्वोभयोरधिकशेषमृणं धनं स्यात् ।
मन्त्रो यद्यधिकाङ्कः स्यात् तदा मन्त्रं जपेत् सुधीः ।
समेऽपि च जपेन्मन्त्री न जपेत् तदृणाधिके ॥

(मेरुतन्त्रे)

ऋणी तु साधको ज्ञेयः साधकाङ्को यदाऽधिकः ।
यावत् स्यादधिकस्तावत्संख्याकानि यदाऽऽचरेत् ॥
पुरश्चरणसंज्ञानि तदाऽस्य समता भवेत् ।
पुरश्चर्यां पुनः कृत्वा तदा स्यात् कार्यसाधकः ॥

(सुन्दरीरहस्यवृत्तौ)

गुणिते तु कृतेऽङ्कानां यच्छेषं जायते स्फुटम् ।
तदङ्कं कथयाम्यत्र एकादशगृहास्थितम् ॥

षट्६काल६काल६विय०दग्नि३समुद्र४वेद४-
खा०ऽकाश०शून्य०दहाना३ः खलु साध्यवर्णाः ।
युग्म२द्वि२पञ्च५वियद०म्बर०युक्२शशाङ्क१-
व्योमा०ऽब्धि४ वेद४ शशिन१ः खलु साधकार्णाः ॥

नामाक्षरादकथहाद्गजभक्तशेषं
ज्ञात्वोभयोरधिकशेषमृणं धनं स्यात् ।

१	२	३	४	५	६	७	८	९	१०	११
६	६	६	०	३	४	४	०	०	०	३
१४	२७	२	१२	१५	६	४	३	८	८	९
अआ	इई	उऊ	ऋॠ	ऌॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह
१०	१	७	४	८	३	७	५	४	६	३
२	२	५	०	०	२	१	०	४	४	१

इति ऋणिधनिचक्रम्।

अथ वर्गचक्रम्। तदुक्तम् (तन्त्रराजे)

मन्त्राणामरिशोधार्थं नामाद्यक्षरपूर्वकम्।
अष्टौ कोष्ठान् समालिख्य वर्गानष्टौ लिखेत् ततः॥
पक्षिमार्जारपञ्चास्यश्वानः सर्पाखुदन्तिनः।
मेषः क्रमादकारादिवसुवर्गयुता इमे॥
पक्षिमार्जारयोर्वैरं वैरं मार्जारपक्षिणोः।
वैरं पक्षिभुजङ्गानां शात्रवं गजसिंहयोः॥
मेषकुक्कुरयोर्वैरं प्रीतिं युक्त्या विचारयेत्।
भुजङ्गसिंहयोर्मैत्री मेषमूषकयोस्तथा॥
लोकादन्यच्च विज्ञेयं व्यवहारप्रयोगतः।
एवं यन्त्रवरं ज्ञात्वा गृह्णीयान्मन्त्रमुत्तमम्॥

तदुक्तम् (वाराहीतन्त्रे)

मार्जारकुक्कुरव्यालैः पक्षिणां वैरिता भवेत्।

मार्जारस्य शुनाखुभ्यां सिंहस्य दन्तिना सदा ॥
कुक्कुरस्य खगोतुभ्यां खगाऽऽखुभ्यां च भोगिनः ।
उन्दुरस्योतुसर्पाभ्यां हरिणा सह दन्तिनः ॥
गरुत्मत्सर्पयोर्वैरं तथा च गजसिंहयोः ।

अ १६ पक्षी	क ५ मार्जारः	च ५ सिंहः	ट ५ श्वा
त ५ नागः	प ५ आखुः	य ५ गजः	श ४ मेषः

इति वर्गचक्रम् ।

अथ राशिचक्रं तत्रैव—

सूत्रद्वयं पूर्वपरायतं त-
न्मध्ये द्वयं याम्यकुबेरभेदात् ।
एकैकमीशाननिशाचरे तु
हुताशवाय्वोर्विलिखेत् ततोऽर्णान् ॥
वेदा[४]ऽग्नि[३]वह्नि[३]युगल[२]श्रवणा[२]क्षि[२]संख्यान्
पञ्चे[५]षु[५]वाण[५]शर[५]पञ्च[५]चतुष्टया[४]न्तान् ।
मेषादितः प्रतिलिखेत् सकलाँस्तु वर्णान्
कन्यागतान् प्रविलिखेदथ शाद्यवर्णान् ॥

(वाराहीतन्त्रे)

वेदा[४]ग्नि[३]वह्नि[३]*युगल[२]श्रवण[२] द्वि[२]वाण[५]-
वाणे[५]षु[५]वाणे[५]षु[५]पयोधि[४]संख्यान् ।
मेषादिकोष्ठेष्वभिलिख्य वर्णान्
षडेव शादीन् युवतौ लिखित्वा ॥

---

* युगलश्रवणे त्यत्रद्विकरेति छन्दोऽभिमतः पाठः ।

यदाहुराचार्याः ।

चतुर्भिर्यादिभिः सार्धं स्यात् क्षकारस्तु मीनगः । इति ॥

एको वाऽप्यथ पञ्चमोऽथ नवमो राशेः स्वकाद्बान्धवो
राशेः स्याद्दशमो द्वितीयसहितः षष्ठो भवेत् सेवकः ।
रुद्राऽग्निस्वरसंख्यया निगदितो मन्त्रः स्वयं पोषकः
स्याच्चेदष्टमवत्सरश्रुतिमितो मन्त्रः स्वयं घातकः ॥

लग्नो^{१} धनं^{२} भ्रातृ^{३}शत्रु^{४}पुत्र^{५}मित्र^{६}कलत्रकाः^{७} ।
मरणं^{८}धर्म^{९}कर्मा^{१०}ऽऽय^{११}व्यया^{१२} द्वादश राशयः ॥

अत्र राशिचक्रे चतुर्थस्थानं शत्रुर्न तु बन्धुः । एवं षष्ठस्थानं बन्धुर्न च शत्रुरिति केचित् ।

अन्यच्च ।

जप्तुः स्वराशितो वर्ज्याः षष्ठाऽष्टरविगाः शुभाः ।
एकद्वित्रिचतुष्पञ्चसप्ताऽङ्कदशरुद्रगाः ॥
लग्नो धनं भ्रातृबन्धुपुत्रशत्रुकलत्रकाः ।
मरणं धर्मकर्माऽऽयव्यया द्वादश राशयः ॥
नामानुरूपमेतेषां शुभाऽशुभफलं दिशेत् ।
स्वराशेर्मन्त्र*पर्यन्तं गणनीयं विचक्षणैः ॥
राशीनां शुद्धता ज्ञेया त्यजेच्छत्रुमृती व्ययम् ।

तस्यायमुपदेशः ।

पूर्वपश्चिमायतं रेखाद्वयम् । दक्षिणोत्तरायतं रेखाद्वयम् । ईशानराक्षसकोणयो रेखाद्वयम्, । अग्निवायव्यकोणयो रेखाद्वयम्, । एवं रेखाष्टकम् । तत्कोष्ठेषु पञ्चाशद्वर्णान् मेषादितो वक्ष्यमाणक्रमेण लिखेत् ।

तद्यथा ।

अ.आ.इ.ई. मेषे । उ.ऊ.ऋ. वृषे । ॠ.ऌ.ॡ. मिथुने । ए.ऐ. कर्कटे । ओ.औ.सिंहे । अं.अः श.ष.स.ह. कन्यायाम् । क.ख.ग.घ.ङ. तुलायाम् । च.छ.ज.झ.ञ. वृश्चिके । ट.ठ.ड.ढ.ण.धनुषि । त.थ.द.ध.न. मकरे. । प.फ.ब.भ.म. कुम्भे । य.र.ल.व.क्ष. मीने ।

---

* मन्त्रराश्यन्तमिति २. पु. पा. ।



उ ऊ ऋ २ ॠ ऌ ॡ ३	अ आ इ ई १	य र ल व क्ष १२ प फ ब भ म ११
ए ऐ ४		त थ द ध न १०
ओ औ ५ ६ अं अः श ष स ह	क ख ग घ ङ ७	ट ठ ड ढ ण ९ च छ ज झ ञ ८

इति राशिचक्रम् ।

अथ नक्षत्रचक्रं तत्रैव ।

पूर्वापरायता रेखा दश देयाः प्रयत्नतः ।
उदग्दक्षिणदीर्घा च देया रेखाचतुष्टयी ॥
नवत्रितयसंयुक्ता कोष्ठानां सप्तविंशतिः ।
जायते च तथा कुर्याल्लिखेद्वर्णाँस्तु तेषु च ॥
पक्षै^{२}कै^{१}त्र्य^{३}ब्धि^{४}रूपा^{१}वनि^{१}भुज^{२}शशि^{१}युग्^{४}युग्म^{२}भू^{१}युग्म^{२}पक्षा^{२}
युग्मै^{२}का^{१}द्वि^{२}त्रि^{३}रूप^{१}त्र्य^{३}वनि^{१}शशि^{१}शशि^{१}द्व्ये^{२}क^{१}पक्षा^{२}ग्नि^{३}वेदाः^{४} ।
अश्विन्यादिक्रमेणाऽक्षरमिह गदितं शेषभे विन्दुसर्गौ
जप्तुर्नक्षत्रभूतादथ परिगणयेज्जन्मसंपत्क्रमेण ॥
जन्म संपद्विपत् क्षेमः प्रत्यारिः साधको वधः ।
मैत्राऽतिमैत्रतारा: स्युस्त्रिरावृत्त्या नवैव हि ॥
गणयेत् तत्क्रमादेव फलं नामानुरूपतः ।
जन्मर्क्षे च भवेद्धानिः संपत्तिः स्याच्च संपदि ॥

विपत्तारे विपत्तिः स्यात् क्षेमे मङ्गलमादिशेत्।
प्रत्यरौ शत्रुवृद्धिः स्यात् साधके सिद्धिसाधनी ॥
बधर्क्षेषु बधो ज्ञेयो मित्रर्क्षे मित्रवर्द्धनम्।
अतिमित्रे भवेत् सौख्यं ताराचक्रमिति स्मृतम् ॥
विपद्बधः प्रत्यरिश्च परित्याज्यो मनीषिभिः।

राश्यज्ञाने।

निजनामादिकं वर्णमादाय पुरतः प्रिये।
मन्त्राद्यक्षरपर्यन्तं गणनीयाश्च सूरिभिः ॥

इत्यविज्ञातराश्यादिविषयम्।
तथा च।

प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो बुधः।
प्रणष्टजन्मभं यस्य तस्य नामर्क्षतो बुधः ॥

पिङ्गलामते।

प्रायं^{२}सोमं ^{१}गुणं^{३}वेद^{४}रूपं^{१}रूपं^{१}यमं^{२}शशि^{१} ।
प्रायं^{२}प्रायं^{२}तथाचन्द्रं^{१}त्रिप्रायम्* सोम^{१}युग्मकम्^{२} ॥
गुणै^{३}क^{१}त्रि^{३}गुणंसोमं†यमाख्यं सोम^{१}यु^{२}ग्गुणम्^{३} ।
वेदं^{४} चेति न्यसेदङ्काँस्तत्संख्यां च न्यसेल्लिपिम् ॥
रसा^{६}ष्ट^{८}नव^{९}भद्राणि युग्मयुग्मप्रभेदतः।
इतराणि न भद्राणि ज्ञातव्यं मन्त्रकोविदैः ॥
आरभ्य जन्मनक्षत्रं मन्त्रताराऽवसानिकम्।

---

* त्रिप्रायमित्यनेन त्रिवारं द्वावतः २. २. २.।
† गुणं सोममित्यनेन त्रिवारमेकं तेन १. १. १.।

अ आ अश्विनी देवः	इ भरणी मनुष्यः	ई उ ऊ कृत्तिका राक्षसः	ऋ ॠ ऌ ॡ रोहिणी मनुष्यः	ए मृगशिराः देवः	ऐ आर्द्रा मनुष्यः	ओ औ पुनर्वसुः देवः	क पुष्यः देवः	ख ग आश्लेषा राक्षसः
घ ङ मघा राक्षसः	च पूर्वफा० मनुष्यः	छ ज उत्तरफा० मनुष्यः	झ ञ हस्तः देवः	ट ठ चित्रा राक्षसः	ड स्वाती देवः	ढ ण विशाखा राक्षसः	त थ द अनुराधा देवः	ध ज्येष्ठा राक्षसः
न प फ मूलम् राक्षसः	ब पूर्वाषा० मनुष्यः	भ उत्तराषा० मनुष्यः	म श्रवणा देवः	य र धनिष्ठा राक्षसः	ल शतभिषा राक्षसः	व श पूर्वभाद्रः मनुष्यः	ष स ह उत्तरभाद्रः मनुष्यः	लक्ष अं अः रेवती देवः

इति नक्षत्रचक्रम् ।

अथ गणचक्रम (तत्रैव)

पूर्वोत्तरत्रयं पश्चाद्भरण्यार्द्राऽथ रोहिणी ।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः ॥

ज्येष्ठाशतभिषामूलधनिष्ठाऽऽश्लेषकृत्तिकाः ।
चित्रामघाविशाखाः स्युस्तारा राक्षसदैवताः ॥
अश्विनीरेवतीपुष्यस्वातीहस्ताः पुनर्वसुः ।
अनुराधामृगशिरःश्रवणा देवतारकाः ॥

अन्यच्च ज्योतिःशास्त्रे ।

दे-मा-रा-मा-दे-मा-दे-दे-रा-रा-मा-म-दे-रा-द-रा- ।
दे-रा-रा-म-म-दे-रा-रा- मा-मा-दे- गणभानि च ।

तदुक्तम् (दीपिकायाम्)

हस्तस्वातिमृगाऽश्विनीहरिगुरुः पौष्णाऽनुराधाऽदिति-
रार्द्रारोहिणिकोत्तराणि भरणी पूर्वाणि भानि त्रयम् ।
ज्येष्ठाऽऽश्लेषविशाखमूलवरुणा वस्वग्निचित्रामघाः
कथ्यन्ते मुनिभिर्यथाक्रममिमे देवा नरा राक्षसाः ॥

इति गणचक्रम्* ।

अथाकडमचक्रं तत्रैव ।

चक्रं वक्ष्येऽकडमाख्यं प्रसिद्धं सर्वसिद्धिदम् ।
मन्त्राणां ग्रहणे मन्त्री सर्वथा तं विचारयेत् ॥
राशिचक्रं लिखेन्मन्त्री वर्णान् क्लीबविवर्जितान् ।
अकारादिक्षकारान्तान् विलिखेत् क्रमतः सुधीः ॥
आदिकोष्ठे यथा वर्णा जायन्तेऽकडमाः क्रमात् ।
विलिख्य गणयेजप्तुर्नामाद्यक्षरपूर्वकम् ॥
सिद्धसाध्यसुसिद्धारिक्रमेणैव पुनः पुनः ।

अन्यच्च ।

अकारादिक्षकारान्तं दक्षपार्श्वक्रमेण तु ।
मेषादितोऽभिमीनान्तं गणयेत् क्रमतः सुधीः ॥

---

* एतदर्थं नक्षत्रचक्रं विलोक्यम् ।

जप्तुः स्वनामतो मन्त्री यावन्मन्त्राद्यमक्षरम् ।
सिद्धसाध्यसुसिद्धारिक्रमेणैव पुनः पुनः ॥
सिद्धः सिद्ध्यति कालेन साध्यः सिद्ध्यति वा न वा ।
सुसिद्धो ग्रहणादेव रिपुर्मूलं निकृन्तति ॥


अःठ
भञः
अं
टबच
अकडम
आख
ढय
इग
णर
औञफल
ईघतल
ओझ
पह
ऐ
जनस
एछधष
उङ
थव
ऊ
चदश

इत्यकडमचक्र ।

अथोदितचक्रम् । तदुक्तम् (सुन्दरीरहस्यवृत्तौ)

उदिताख्यं महाचक्रं कथयामि समासतः ।
षट्कोणं विलिखेच्चक्रं समरेखं मनोहरम् ॥
पूर्वादि विलिखेद्वर्णानादिक्षान्तान् यथाक्रमम् ।
उदिते सम्पदुद्दिष्टा द्वितीये संपदां क्षयः ॥
तृतीये च धृतिं विद्याच्चतुर्थे बन्धुविप्लवः ।
पञ्चमे संशयात्मा स्यात् षष्ठे सर्वविनाशकः ॥
नामाऽऽद्यक्षरमारभ्य यावन्मन्त्राद्यदर्शनम् ।


अ
एक
छडध
मष
ऊअःचठ
दभशज्ञः
आऐखज
ढनयस
उअंङट
थबवक्ष
इओग
झणपरह
ईऔघञत
फलल

इत्युदितचक्रम् ।

अथ षट्पदमातृकाचक्रम् । (मेरुतन्त्रे)

यस्तु बीजात्मको मन्त्रस्तत्र षट्पदमातृका ।
विज्ञेयं तत्र पद्मं तु रचयेत् षट्दलं शुभम् ॥
तत्र न्यसेन्मातृकाऽर्णान् कूटषण्ढविवर्जितान् ।
स्वनामाद्यक्षरं यत्र तदारभ्य विचारयेत् ॥
सम्पद्दारिद्र्यधैर्याणि बन्धुविग्रहसंशयाः ।
सर्वनाशक्रमादेतन्नामाद्यर्णस्य कोष्ठतः ॥

कूटं शकारः । षण्ढवर्णा ऋकारादयश्चत्वारः ।



इति षट्पदमातृकाचक्रम् ।

(वाराहीतन्त्रे)

कोष्ठशुद्धिर्वराहे च महालक्ष्म्यां कुलाकुलम् ।
नामादिचक्रं सर्वेषां भूतचक्रं तथैव च ॥
ताराशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवे भवेत् ।
त्रैपुरे राशिशुद्धिः स्याद्गोपालेऽकडमः स्मृतः ।

अपवादमाह (यामले)

यदि मन्त्रा न शोभन्ते विचारेण कथंचन ।
तदा निषेधमाश्रित्य गृह्णीयान्मन्त्रमुत्तमम् ॥
नृसिंहाऽर्कवराहाणां प्रासादप्रणवस्य च ।
नित्यानां हंसमन्त्राणां सिद्धादीन् नैव शोधयेत् ॥

तथा च (कालिकापुराणे)

नृसिंहार्कवराहाणां प्रासादप्रणवस्य च ।
एकाक्षरद्व्यक्षराणां सिद्धादीन् नैव शोधयेत् ॥

(अग्निपुराणे)

हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च ।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥

नपुंसको नमोऽन्तः ।

तदुक्तम् (शारदायाम्)

मातृकावर्णभेदेभ्यः सर्वे मन्त्राः प्रजज्ञिरे ।
मन्त्रविद्याविभेदेन द्विविधा मन्त्रजातयः ॥
मन्त्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः स्मृताः ।
पुंस्त्रीनपुंसकात्मानो मन्त्राः सर्वे समीरिताः ॥
पुंमन्त्रा हूँफडन्ताः स्युर्द्वि*ठान्ताः स्युः स्त्रियो मताः ।
नपुंसका नमोऽन्ताः स्युरित्युक्ता मनवस्त्रिधा ॥

(सनत्कुमारसंहितायाम्)

सिद्धः साध्यः सुसिद्धश्च अरिश्चैव च नारद ।
गोपालेषु न बोद्धव्यः स्वप्रकाशो यतः स्वयम् ॥

(गणेशविमर्षिण्याम्)

एकाक्षरे तथा कूटे मालामन्त्रे त्रिबीजके ।
स्वप्नलब्धे स्त्रिया दत्ते सिद्धादीन्नैव शोधयेत् ॥

मालामन्त्रलक्षणं च (नारायणीतन्त्रे)

विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः ।

(देवीपुराणे)

कालिकायां च ताराया कुल्लुकायां त्रिकूटके ।
तथैकाक्षरकूटे च शिवपञ्चाक्षरेऽपि च ॥
षडक्षरे तु तस्यै†व विष्णोरष्टाक्षरेऽपि वा ।
विष्णोर्द्वादशवर्णे च राममन्त्रेऽथ तारके ॥
वैष्णवेषु च भैरव्यां सुन्दरीमन्त्रवर्यके ।
सारस्वते च बालायां सिद्धादीन्नैव शोधयेत् ॥

---

* द्विठान्ताः स्वाहान्ताः ।

† शिवस्य ।

(गौतमीये)

सर्वेषु मन्त्रवर्णेषु श्रेष्ठो वैष्णव उच्यते ।
वैष्णवेषु च सर्वेषु कृष्णमन्त्राः फलाधिकाः ॥
विशेषतो दशार्णोऽयं जपमात्रेण सिद्ध्यति ।
स्त्रिया दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणाधिका ॥
स्वप्नलब्धा च या विद्या तत्र नास्ति विचारणा ।

(योगिनीतन्त्रे)

गारुडादिषु सौरेषु वैष्णवे बौद्धजैनयोः ।
महामन्त्रेषु कूटेषु नैव सिद्धादिशोधनम् ॥

बिभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत–
स्रोतःशालिनि सन्निबन्धनसरित्संभेदमभ्यर्हितम् ।
सद्युक्तिस्फुटमौक्तिकोत्कररुचोत्तुङ्गस्तरङ्गो गतः
आद्यः श्रीनरदेवनिर्मितपुरश्चर्यार्णवे प्रस्फुरन् ॥

इति श्रीमन्महाराजाधिराजप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे षडाम्नायदेवतातदाचारादिनिर्णयपूर्वकचक्रविवेचनं नाम प्रथमस्तरङ्गः ।

अथ दीक्षाकालनिर्णयः ।

तत्रादौ मासफलम् । तदुक्तम् (यामले)

वैशाखे तु शिवा दीक्षा विपुलां श्रियमादिशेत् ।
ज्येष्ठे मृत्युप्रदा चैव आषाढे सुखसम्पदौ ॥
श्रावणे रत्नलाभः स्याद्भाद्रे दुःखप्रदा मता ।
आश्विने सर्वसिद्धिः स्यात् कार्त्तिके ज्ञानसिद्धिदा ॥
शुभकृन्मार्गशीर्षे च पौषे ज्ञानविनाशिनी ।
मेधावृद्धिकरी माघे फाल्गुने सर्ववश्यकृत् ॥
चैत्रे च पीडाजननी मलमासं विवर्जयेत् ।

(सिद्धान्तशेखरे)

शरत्काले च वैशाखे दीक्षा श्रेष्ठफलप्रदा ।
फाल्गुने मार्गशीर्षे च ज्येष्ठे दीक्षा च मध्यमा ॥
आषाढे माघमासे च कनिष्ठा सा प्रकीर्त्तिता ।
निन्दितश्चैत्रमासस्तु पौषो भाद्रपदस्तथा ॥

गोपालमन्त्रदीक्षायां तु चैत्रोऽपि प्रशस्तः । तदुक्तं गौतमेन ।

मन्त्रारम्भस्तु चैत्रे स्यात् समस्तपुरुषार्थदः ।
वैशाखे रत्नलाभः स्यात् ज्येष्ठे तु मरणं ध्रुवम् ॥
आषाढे बन्धुनाशः स्यात् पूर्णायुः श्रावणे भवेत् ।
प्रजानाशो भवेद्भाद्रे आश्विने रत्नसंचयः ॥
कार्त्तिके मन्त्रसिद्धिः स्यात् मार्गशीर्षे तथा भवेत् ।
पौषे तु शत्रुपीडा स्यान्माघे मेधाविवर्धनम् ॥
फाल्गुने सर्वकामाः स्युर्मलमासं विवर्जयेत् ।

अथ पक्षफलम् । तदुक्तम् (रुद्रयामले)

शुक्लपक्षे शुभा दीक्षा कृष्णेऽप्यापञ्चमीदिनम् ।
क्षीणेन्दौ व्रतदीक्षां च न कुर्यान्मन्त्रवित्तमः ॥

कृष्णाष्टमीमारभ्य शुक्लचतुर्दशीं यावत् क्षीणचन्द्रः ।

अथ तिथिफलम् । तदुक्तम् (यामले)

प्रतिपत्संस्कृता दीक्षा ज्ञाननाशकरी मता ।
द्वितीयायां भवेज्ज्ञानं तृतीयायां सुखी भवेत् ॥
चतुर्थ्यां धननाशः स्यात् पञ्चम्यां बुद्धिवर्धनम् ।
षष्ठ्यां ज्ञानक्षयं सौख्यं लभते सप्तमीदिने ॥
अष्टम्यां बुद्धिनाशः स्यान्नवम्यां वपुषः क्षयः ।
दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत् ॥
द्वादश्यां सर्वसिद्धिः स्यात् त्रयोदश्यां दरिद्रता ।
तिर्यग्योनिश्चतुर्दश्यां कृमिर्मासावसानके ॥
पक्षान्ते सर्वसिद्धिः स्यादस्वाध्यायं विवर्जयेत् ।
सन्ध्यागर्जननिर्घोषे भूकम्पोल्कानिपातने ॥
त्रिरात्रं वर्जयेन्मन्त्री श्रुत्युक्तानपि वर्जयेत् ।

(तत्त्वसारसंहितायाम्)

तां तां तिथिं समालोच्य तद्भक्ताँस्तत्र दीक्षयेत् ।
ब्रह्मणः पूर्णमास्युक्ता द्वादशी चक्रधारिणः ॥
चतुर्दशी शिवस्योक्ता वाचः प्रोक्ता त्रयोदशी ।
द्वितीया च श्रियाः प्रोक्ता पार्वत्याश्च तृतीयका ॥
चतुर्थी गणनाथस्य भानोः प्रोक्ता च सप्तमी ।
नित्यामार्गेषु पार्वत्या अष्टमी च चतुर्दशी ॥

अथ मासान्तपक्षान्ताविति उक्तत्वान्मासान्तं संक्रान्तेर्गतदिनं पक्षान्तं पूर्णमास्यघास्ये । तदुक्तम (गौतमीये)

सौरमासि शुभा दीक्षा न चान्द्रे न च तारके ।

इति वचनान्मासान्तं सौरमासान्तं ज्ञेयम् ।

अथ वारफलम् ।

रविवारे भवेद्वित्तं सोमे शान्तिर्भवेत् किल ।
आयुरङ्गारके हन्ति तत्र दीक्षां विवर्जयेत् ।
बुधे सौन्दर्यमाप्नोति ज्ञानं स्यात् तु बृहस्पतौ ॥
शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे ।

अथ नक्षत्रफलम् । तदुक्तम् (त्रिपुरार्णवे)

अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवम् ।
कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत् ॥
मृगशीर्षे सुखावाप्तिरार्द्रायां बन्धुनाशनम् ।
पुनर्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनम् ॥
आश्लेषायां भवेन्मृत्युर्मघायां दुःखमोचनम् ।
सौन्दर्यं पूर्वफाल्गुन्यां प्राप्नोतीति न संशयः ॥
ज्ञानं चोत्तरफाल्गुन्यां हस्तायां च बली भवेत् ।
चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविनाशनम् ॥
विशाखायां भवेत् सौख्यमनुराधा च बुद्धिदा ।
ज्येष्ठायां सुतहानिः स्यान्मूलायां कीर्त्तिवर्धनम् ॥
पूर्वाषाढोत्तराषाढे भवेतां कीर्त्तिदायिके ।
श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता ॥
बुद्धिः शतभिषायां स्यात् पूर्वभाद्रे सुखी भवेत् ।
सौख्यं चोत्तरभाद्रे स्याद्रेवत्यां कीर्त्तिवर्धनम् ॥

(रत्नावल्याम)

प्रतिपत्पूर्वाषाढा च पञ्चमीकृत्तिका तथा ।

पूर्वभाद्रपदा षष्ठ्यां दशमीरोहिणी तथा ॥
द्वादश्यां सार्पनक्षत्रमर्यम्णा च त्रयोदशी ।
नक्षत्रलुप्ता इत्येते देवानामपि नाशदा ॥

अथ लग्नफलम् (राजमार्त्तण्डे)

गुर्वर्कभार्गवाऽशुद्धौ दीक्षा दारिद्र्यकारिणी ।
शुभेऽह्नि शुभलग्ने च दीक्षैश्वर्यप्रदायिनी ॥

(रुद्रयामले)

वृषे सिंहे च कन्यायां धनुर्मीनाख्यलग्नके ।
चन्द्रतारानुकूलेऽह्नि दद्याद्दीक्षां सदा गुरुः ॥

(मेरुतन्त्रे)

सदा दुःखं सदा हानिर्वामिनां मिथुने शुभम् ।
वामिनां यवनानां च निरुद्धं बहुधा शुभम् ॥

(स्मृतिसंहितायाम्)

स्थिर[*]लग्नं विष्णुमन्त्रे शिवमन्त्रे चरं[†] स्मृतम् ।
द्विस्वभाव[‡]गतं लग्नं शक्तिमन्त्रेषु शस्यते ॥

(गौतमीये सौभाग्यरत्नाकरे च)

त्रिषडायगताः पापाः सौम्याः केन्द्रत्रिकोणगाः ।
दीक्षायां तु शुभाः प्रोक्ता रन्ध्रस्थाः सर्वनाशकाः ॥
स्थिरे लग्ने शुभा दीक्षा द्विस्वभावे च मध्यमा ।
नैव कुर्याच्चरे लग्ने दीक्षां चैव शुभेच्छुभिः ॥
तृतीयैकादशः षष्ठो दशमस्थः शुभः शशी ।

अथ योगफलम् (मेरुतन्त्रे)

विष्कम्भादिकयोगानां नामतुल्यं फलं भवेत् ।
आनन्दादिकयोगानां सर्वत्राऽविकलं फलम् ॥

---

[*] मे. क. तु. म एतानि चरलग्नानि । [†] वृ. सि. वृ. कु एतानि स्थिरलग्नानि ।
[‡] मि. क. ध. मी एतानि द्विस्वभावलग्नानि ।

मन्वाद्यासु युगाद्यासु दीक्षा सर्वसमृद्धिदा ।

ताश्चोक्ताः (मुहूर्त्तचिन्तामणौ)

मन्वाद्यास्त्रितिथी मधौ तिथिरवी ऊर्जे शुचौ दिक्तिथी
ज्येष्ठेऽन्त्ये च तिथिस्त्विषे नव तपस्यश्वाः सहस्ये शिवाः ।
भाद्रेऽग्निश्च सिते त्वमाऽष्ट नभसः कृष्णे युगाद्यासिते
गोघ्नी बाहुलराधयोर्मदनदर्शौ भाद्रमाघाऽसिते ॥

(अग्निपुराणे)

नवम्यां शुक्लपक्षस्य कार्त्तिके निरगात् कृतम् ।
त्रेताऽसिततृतीयायां वैशाखे द्वापरं युगम् ॥
दर्शे तु माघमासस्य त्रयोदश्यां नभस्यके ।
कृष्णे कलिर्द्विसप्ता स्तु ज्ञेया मन्वन्तरादयः ॥

(योगिनीतन्त्रे)

रविसंक्रमणे चैव सूर्यस्य ग्रहणे तथा ।
तत्र लग्नादिकं किंचिन्न विचार्यं कदाचन ॥
महाष्टम्यां विशेषेण धर्मकामार्थसिद्धये ।

(बृहच्छ्रीक्रमे)

विषुवेऽयनयोर्द्वन्द्वे संक्रान्त्यां मदनोत्सवे ।
गुरुपर्वदिने चैव दीक्षा शुभफलप्रदा ॥

गुरुपर्वाणि च (भुवनेश्वरीतन्त्रे)

षष्ठीभाद्रपदे मासि इषे कृष्णा त्रयोदशी ।
कार्त्तिके नवमी शुक्ला तृतीया मार्गशीर्षके ॥
पौषस्य नवमी शुक्ला माघे चैव चतुर्थिका ।
फाल्गुने नवमी शुक्ला चैत्रे कामत्रयोदशी ॥
वैशाखे चाक्षया चैव ज्येष्ठे दशहरा तथा ।
आषाढे पञ्चमी शुक्ला श्रावणे कृष्णपञ्चमी ॥

एतानि गुरुपर्वाणि पुण्यान्याहुर्मनीषिणः ।
(सारसंग्रहे)
पञ्चम्येकादशी शुक्ला सप्तमी च त्रयोदशी ।
दशमी शुक्लपक्षस्य द्वादशी तु विशेषतः ॥
तृतीया विहिता नित्यं षष्ठी सर्वत्र निन्दिता ।
विष्णुयामले ।
देवीबोधं समारभ्य यावत् स्यान्नवमीतिथिः ।
(रत्नावल्याम्)
योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनः शुभः ।
सुकर्मा च धृतिर्वृद्धिर्ध्रुवः सिद्धिश्च हर्षणः ॥
वरीयाँश्च शिवः सिद्धो ब्रह्मा इन्द्रश्च षोडश ।
अथ करणनिर्णयः (गौतमीयतन्त्रे)
शुभानि करणान्याहुर्दीक्षायां च विशेषतः ।
शकुन्यादीनि विष्टिं च विशषेण विवर्जयेत् ॥
अथ सूर्यराशिफलम् (सारसंग्रहे)
मन्त्राद्यारम्भणे मेषो धनधान्यप्रदो भवेत् ।
वृषे मरणमाप्नोति मिथुनेऽपत्यनाशनम् ॥
कर्कटे सर्वसिद्धिः स्यात् सिंहे मेधाविवर्धनम् ।
कन्या लक्ष्मीप्रदा नित्यं तुलायां सर्वसिद्धयः ॥
वृश्चिके सर्वसिद्धिः स्याद्धनुर्ज्ञानविनाशनम् ।
मकरः पुत्रदः प्रोक्तः कुम्भो धनसमृद्धिदः ॥
मीनो दुःखप्रदो नित्यमेवं राशिफलं प्रिये ।
(गार्ग्यसंहितायाम्)
निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा ।
सूर्यग्रहणकालस्य समानो नास्ति भूतले ॥
तत्र यद्यत् कृतं कर्म अनन्तफलदं भवेत् ।

एता एव महेशानि दश विद्याः प्रकीर्त्तिताः ।
नात्र सिद्धाद्यपेक्षाऽस्ति नक्षत्रादिविचारणा ॥
कालादिशोधनं नास्ति साध्यादिदूषणं न हि ।

(समयातन्त्रे)

अयने विषुवे चैव युगाद्यासु तथैव च ।
ग्रहणे च महातीर्थे न कालस्य विचारणा ॥
तुलसीनिकटे बिल्वमूले धात्रीतले तथा ।
अनादिदेवसान्निध्ये महाक्षेत्रे गवां गृहे ॥
देवीपूजादिने वाऽपि नास्ति कालस्य निर्णयः ।

(यामले)

मन्वाद्यासु युगाद्यासु दीक्षा सर्वसमृद्धिदा ।

तच्चोक्तं (मुहूर्त्तचिन्तामणौ)

मन्वाद्यास्त्रितिथी मधौ तिथिरवी ऊर्जे शुचौ दिक्तिथी
ज्येष्ठेऽन्त्ये च तिथिस्त्विषे नव तपस्यश्वाः सहस्ये शिवा ।
भाद्रेऽग्निश्च सिते त्वमाऽष्ट नभसः कृष्णे युगाद्यासिते
गोग्नी बाहुलराधयोर्मदनदर्शौ भाद्रमाघाऽसिते ॥

(अग्निपुराणे)

नवम्यां शुक्लपक्षस्य कार्त्तिके निरगात् कृतम् ।
त्रेताऽसियतृतीयायां वैशाखे द्वापरं युगम् ॥
दर्शे तु माघमासस्य त्रयोदश्यां नभस्यके ।
कृष्णे कलिर्द्विसप्तास्तु ज्ञेया मन्वन्तरादयः ॥

(योगिनीतन्त्रे)

रविसंक्रमणे चैव सूर्यस्य ग्रहणे तथा ।
तत्र लग्नादिकं किंचिन्न विचार्यं कदाचन ॥
महाष्टम्यां विशेषेण धर्मकामार्थसिद्धये ।

बृहच्छ्रीक्रमे ।

बिषुवेऽयनयोर्द्वन्द्वे संक्रान्त्यां मदनोत्सवे ।
गुरुपर्वदिने चैव दीक्षा शुभफलप्रदा ॥

गुरुपर्वाणि च (भुवनेश्वरीतन्त्रे)

षष्ठीभाद्रपदे मासि इषे कृष्णा त्रयोदशी ।
कार्त्तिके नवमी शुक्ला तृतीया मार्गशीर्षके ॥
पौषस्य नवमी शुक्ला माघे चैव चतुर्थिका ।
फाल्गुने नवमी शुक्ला चैत्रे कामत्रयोदशी ॥
वैशाखे चाऽक्षया चैव ज्येष्ठे दशहरा तथा ।
आषाढे पञ्चमी शुक्ला श्रावणे कृष्णपञ्चमी ॥
एतानि गुरुपर्वाणि पुण्यान्याहुर्मनीषिणः ।

(सारसंग्रहे)

पञ्चम्येकादशी शुक्ला सप्तमी च त्रयोदशी ।
दशमी शुक्लपक्षस्य द्वादशी तु विशेषतः ॥
तृतीया विहिता नित्यं षष्ठी सर्वत्र निन्दिता ।

विष्णुयामले ।

देवीबोधं समारभ्य यावत् स्यान्नवमीतिथिः ।
कृता तासु बुधैर्दीक्षा सर्वाभीष्टफलप्रदा ॥
बोधने चैव दुर्गायाः कालाकालं न शोधयेत् ।
अशोकाख्याऽष्टमी यत्र रामाख्या नवमी तथा ॥

(स्मृतिसंहितायाम्)

व्यतीपातो वैधृतिश्च दीक्षायोगाः शुभावहाः ।

तदुक्तम् (राजमार्त्तण्डे)

श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके ।
यद्यमा रविवारेण व्यतीपातः स उच्यते ॥

नागदैवतमाश्लेषा। मस्तके प्रथमपदे।

कन्यायां यदि वा स्यातां मेषे भूमिजभानुजौ॥
तामसी शनिवारे च सप्तमी कुम्भभास्करे।
सूर्यग्रहशतैस्तुल्यो व्यतीपातः स उच्यते॥

तामसी कृष्णा। (महोग्रताराकल्पे)

कृष्णपक्षस्य चाष्टम्यां शुभलग्ने शुभे क्षणे।
पूर्वभाद्रपदे शुक्ले मित्रतारासुसंयुते॥
अथवा चाऽनुराधायां रेवत्यां तु प्रशस्यते।
जानीयाच्छोभनं कालं मन्त्रस्य ग्रहणं प्रति॥
इषे चैव विशेषेण कार्त्तिके च विशेषतः।
महाचीनक्रमेणैव न दोषो नीलशारदे॥

(शैवागमे)

धर्मदः प्रातःकालः स्यात् संगमो राज्यदायकः।
मध्याह्ने सर्वसिद्धिः स्यात् सायाह्नो मध्यमो भवेत्॥
रजनी मन्त्रदाने तु निषिद्धा दैशिकोत्तमैः।

(क्रियाकाण्डशेखरे)

मौमुक्षवीं प्रत्यथ न कालादिनियमः स्मृतः॥
निन्द्यानि तानि सर्वाणि प्रशस्तानि विमुक्तये।
सर्वास्तारा ग्रहाः सर्वे नक्षत्राणि च राशयः॥
यस्मिन्नहनि संतुष्टो गुरुः सर्वे शुभावहाः।
संतुष्टे तु गुरौ तत्र संतुष्टाः सर्वदेवताः॥
यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः।
न कालनियमस्तत्र न देशनियमस्तथा॥
गुरुं संतोषयेद्भक्त्या स्वयमेव तथा भवेत्।

अथ दीक्षास्थाननिर्णयः । तदुक्तम् (पूर्णपद्धतौ)

गोशालायां गुरोर्गेहे देवागारे च कानने ।
पुण्यक्षेत्रे तथोद्याने नदीतीरे च स्वाश्रमे ॥
धात्रीबिल्वसमीपे च पर्वताऽग्रे गुहासु च ।
गङ्गायां तत्कृतं सर्वं कोटिकोटिगुणं भवेत् ॥

(यामले)

पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये ।
प्रयागे श्रीगिरौ काश्यां कालाकालं न शोधयेत् ॥

(योगिनीतन्त्रे)

गयायां भास्करक्षेत्रे विरजे चन्द्रपर्वते ।
चत्वरे च मतङ्गे च तथा कन्याश्रमेषु च ॥
न गृह्णीयात् ततो दीक्षां तीर्थेष्वेतेषु पार्वति ।

अथ मन्त्रविशेषेषु देवताविशेषाणां शापाः प्रोक्ताः (मेरुतन्त्रे)

सुरया सुधया पूर्वदेवा देवा विमोहिताः ।
यदा तदा तु भगवान् प्रोवाच मधुसूदनः ॥
कः पूज्यो भवतां मध्ये श्रेष्ठस्तन्मे निगद्यताम् ।
उन्मत्ताश्च तदा देवाः श्रेष्ठोऽहमिति चाऽब्रुवन् ॥
किंचित् स्मित्वा तु भगवान् मोहयन्नात्ममायया ।
इत्यवोचद्यस्य वाक्यं शापे चानुग्रहे क्षमम् ॥
स एव देवः श्रेष्ठोऽत्र पूर्वो वाऽप्यपरोऽपि वा ।
इति श्रुत्वा वचो विष्णोरशपँश्च परस्परम् ॥
मन्त्ररूपाण्यतो देवि संस्कारैः शापमोक्षणम् ।
विना तु शापमोक्षेण कः सिद्धिं प्राप्नुयाज्जनः ॥

श्रीदेव्युवाच ।

शापः केन कथं दत्तः शप्ते जप्ते च किं फलम् ।

निःशापत्वं कथं तेषां सिद्धिः स्यादिति मे वद ॥

श्रीशिव उवाच ।

आदिमध्यावसानेषु वायुर्यस्य व्यवस्थितः ।
चतुराद्यो चैकबीजोऽनेकधा यत्र संगतः ॥
केनाथवा समाक्रान्तः स मन्त्रश्छेदितोऽसिना ।
कार्त्तिकेयेन तज्जापाच्छिद्यन्तेऽस्य मनोरथाः ॥
आदौ मध्येऽवसाने वा भूबीजयुगलं भवेत् ।
आदौ यद्वा द्विधा वज्री त्रिधा मध्ये ततो द्विधा ॥
रुद्धौ शक्रस्य शापेन भुक्तिमुक्तिविवर्जितौ ।
जातौ मन्त्रौ वामदक्षमार्गयोरपि सेवितौ ॥
ह्री-मँक्रैं-श्रीँष्वेकतमं यत्र बीजं न दृश्यते ।
हूँकारो वा स मन्त्रस्तु शक्तिहीनः कृतः सुरैः ॥
एतादृशश्चेत् संजप्तः सामर्थ्यं हन्ति मन्त्रिणः ।
शक्तिहीनस्य वामस्य मरणं नात्र संशयः ॥
नादौ ह्रीँ न च मध्ये क्लीँ क्रौँते वा नैव दृश्यते ।
असौ पराङ्मुखो मन्त्रो जातः सूर्यस्य शापतः ॥
पराङ्मुखं भजेन्मन्त्री देवता स्यात् पराङ्मुखी ।
दैवात् कार्येऽपि संसिद्धे लोकः स्याच्च पराङ्मुखः ॥
आद्यावन्ते तथा मध्ये हं वा सं वा न दृश्यते ।
बधिरास्ते कृता मन्त्रा देवाचार्येण शापतः ॥
जप्ते तु बधिरे मन्त्रे विस्मृतिस्तस्य जायते ।
जायते बधिरो नूनं महाकालेन भाषितम् ॥
सूर्यबीजं हकारः स्याच्चन्द्रबीजं तु सः स्मृतः ।

रेफोऽग्निबीजमुद्दिष्टमेतन्नेत्रत्रयं मम ॥
पञ्चाक्षरे यन्त्रमन्त्रे यत्रैक*मपि नास्ति चेत् ।
मम शापान्नेत्रहीनो दुःखशोकामयप्रदः ॥
नादौ मध्ये न चान्ते वा ह्सौँ वा हंस वाथ हौँ ।
ऐँ वा फ्रेँ वाऽथवा हूँ वा नमो वा ह्रीँ मनुः स तु ॥
शापेन कीलितो देवि राजदेवेन पार्वति ।
यदा तु कीलितो मन्त्रो न सिद्धिमुपगच्छति ॥
मध्ये एको लकारो वा फट् वाऽन्ते लद्वयं यदि ।
फट्द्वयं वा त्रयं वाऽन्ते न चेत् स स्तम्भितो मनुः ॥
शापेन भैरवेणास्मात् सिद्धं भवति शोभनम् ।
कदाचिन्नैव दुःखं च प्रायशो बहुलं भवेत् ॥
आदौ तु यस्य मन्त्रस्य क्रमात् सप्ताक्षराणि चेत् ।
रेफेण वा यकारेण संयुक्तानि मनुः स तु ॥
वाय्वग्निशापसंदग्धः साधकं परितापयेत् ।
तस्मात् संस्कारयेद्देवि सिद्ध्यै साधकोत्तमः ॥
द्वाभ्यां त्रिभिरथो षड्भिरष्टभिर्वा प्रदृश्यते ।
यदाऽक्षरैरन्तरितः फट्कारः स निगद्यते ॥
नारसिंहस्य शापेन त्रस्तः संत्रासयेत् सदा ।
स्वप्नादौ साधनं नैव सिद्धिः संदृश्यते क्वचित् ॥
ओँ वा हँ वा सकारो वा नादौ भीतो मनुः स तु ।
ब्रह्मशापाद्धीनसिद्धिर्भवेदत्यन्तकष्टदः ॥
आदिमध्यावसानेषु मिलित्वा मचतुष्टयम् ।

---

*उक्तनेत्रत्रयादेकमपीति ।

स मन्त्रो मलिनो मायाशापान्मालिन्यकारकः ॥
हूँ चादौ वा मन्त्रमध्ये वाऽन्ते फट्-युगलं भवेत् ।
तिरस्कृतो रुद्रशापात् साध्यं कुर्यात् तिरस्कृतम् ॥
आदौ तारद्वयं चान्ते वषडस्त्रं च मध्यगम् ।
कुटुम्बकलहं कुर्याद्वालाशापेन भेदितः ॥
हकारेण सकारेण रहितस्त्र्यक्षरस्तु यः ।
सुषुप्तः सिंहशापेन प्रोक्तोऽभीष्टफलापहः ॥
अष्टादशाक्षरादिर्यः पञ्चफट्कारपूर्वकः ।
चामुण्डाशापतो जातो मदोन्मत्तो न शोभनः ॥
मध्ये चेत् पञ्च फट्काराः कालिकाशापतः स तु ।
मूर्छितो मूर्छितं कुर्याद्वामिनं तु विशेषतः ॥
एवमन्ते च फट्कारपञ्चकं स तु रम्भया ।
हृतवीर्यस्तु शापेन कृतः क्षीणत्वकारकः ॥
चत्वारो यत्र फट्कारा आदिमध्याऽवसानिकाः ।
अष्टादशाक्षरो हीनो हानिर्भैरवशापतः ॥
एकोनविंशत्यर्णश्च ह्रीँक्रोमोँकारसंयुतः ।
प्रध्वस्तः कामशापेन ध्वंसयेत् कामकारणात् ॥
सप्तवर्णो मनुर्बालः कुमारोऽष्टाक्षरः स्मृतः ।
षोडशार्णस्तु तरुणः प्रौढो व्योमाब्धिवर्णकः ॥
त्रिंशत्कलाः शतं वेदकाष्ठावर्णास्तु यत्र तु ।
सकृद्धि एते कालेन शप्ता दुःखानि कुर्वते ॥
नवार्णो ओँकारयुतश्चामुण्डाशापतो मनुः ।
निस्त्रिंशः साधकं छिन्द्यान्निस्त्रिंशेन न संशयः ॥

अन्ते नमो वा स्वाहा वा नास्ति वा यस्य मध्यतः ।
वषट् वौषट् सहूँफट् च एतद्वा नास्त्यसौ मनुः ॥
निर्बीज इति संशप्तो भुवनेश्याऽस्य साधकः ।
सेवां कुर्याल्लभेद्वंशनाशं वंशत्रयादितः ॥

आदिमध्यावसानेषु फट्फट्कारस्तु यस्य तु ।
कौमार्यास्तु स शापेन सिद्धिहीनो न सिद्धिकृत् ॥
दशाक्षरो यस्तु मन्त्रः स गणेशस्य शापतः ।
मन्दो जप्तस्तु मूर्खत्वं कुर्याज्जन्मनि जन्मनि ॥

आदिव्यञ्जनसंयोग एक एव स्वरो भवेत् ।
तत् कूटं कूटतो ह्यानिर्मातङ्ग्याः शापतः स्मृतः ॥
द्विवर्णः सत्त्वहीनः स्यादाश्विनेयस्य शापतः ।
नाशयेत् साधकबलं राज्ञः सैन्यं विनाशयेत् ॥
चतुर्वर्णः केकरस्तु जातः सूर्यातिशापतः ।
जपित्वा केकरं मन्त्रं चक्षुषा नैव पश्यति ॥

षडक्षराणि वीजहीना जाता रावणशापतः ।
नाशयेत् साधकबलं राज्ञः सैन्यं विनाशयेत् ॥
वंशवृद्धिर्न तज्जापादन्यथा स्त्रीसुखं न हि ।
सार्धत्रिसप्तसूर्यार्णा धूमावत्याश्च शापतः ॥

धूमताव्याकुलं चित्तं जायते साधकस्य तु ।
विंशत् तथैकविंशच्च त्रिंशद्वर्णस्तु तारया ॥
शप्त आलिङ्गितश्चायं जपात् स्वप्नरते मृतिः ।
द्वाविंशत्यक्षरो मन्त्रः सरस्वत्यास्तु शापतः ॥
मोहितं साधकं कुर्यात् पानादिव्यसनाकुलम् ।

चतुर्विंशतिवर्णो यः सप्तविंशतिवर्णकः ॥
क्षुधार्त्तो राजमातङ्ग्याः शापाद्दारिद्र्यकारकः ।
त्रयोविंशास्त्रयो रुद्रा वर्णाः कौलिकशापतः ॥
मन्त्रा दृप्तास्तज्जपेन छान्दसो जायते जनः ।
षड्विंशदेकोनत्रिंशत् त्रिंशत् षट्त्रिंशदक्षरः ॥
पूष्णः शापादङ्गहीनः कामनापूरको न हि ।
अष्टाविंशदेकत्रिंशद्वर्णो नन्दीशशापतः ॥
अतिक्रूरः साध्यनाशं कृत्वा नश्येच्च साधकः ।
अष्टत्रिंशाक्षरो मन्त्रो मातृकाणां तु शापतः ॥
अतिक्रुद्धस्तज्जपेन स्वकृतः स्वस्य संक्षयः ।
चत्वारिंशत् समारभ्य त्रिषष्टिं यावदक्षरम् ॥
सव्रीडा मालिकाशापात् सव्रीडास्तस्य साधकाः ।
पञ्चषष्ट्यक्षरा ये स्युर्मन्त्रास्ते शान्तमानसाः ॥
कामशापेन तज्जापादुद्योगस्य फलं न हि ।
षट्षष्टितो नवनवतिपर्यन्तं कुलस्य तु ॥
स्थानभ्रष्टास्तु शापेन जातास्तादृक् च साधकः ।
क्वातिधृतिर्व्यतिधृतिः कङ्कयुग्मं द्विगोकराः ॥
शतत्रयं यत्र वर्णाः शापिताश्छिन्नमस्तया ।
यूयं भवत निःस्नेहाः साधकानां भयापहाः ॥
निष्काममतिभिर्जप्ताः संसारस्नेहनाशकाः ।
चतुःशतान्यथारभ्य यावद्वर्णसहस्रकम् ॥
अतिवृद्धा यज्ञशापात् पौष्टिकादिषु वर्जिताः ।
सहस्रार्णाधिका मन्त्रा दण्डपाणेस्तु शापतः ॥

दण्डकाख्यापीडिताश्च तज्जपात् कष्टमाप्नुयात् ।
द्विसहस्राधिका मन्त्रा भार्गवस्य तु शापतः ॥
खण्डीकृताः सप्तधा ते सिद्धिखण्डकराः स्मृताः ॥
अन्यच्छृण्वन्तु भो देवा मुनीनां जपतां यदा ॥
सिद्धिर्न जाता तु तदा दत्तः शापः सुदारुणः ।
आश्वासनं देवतानां जातं सिद्धेरकारणात् ॥
उपदेशे गुरुं कुर्यात् तस्मात् तन्मन्त्रशोधनम् ।

मन्त्रशोधनप्रकारमाह ।

तत्प्रकारं प्रवक्ष्यामि शृण्वन्तु सकलाः सुराः ॥
गुरुः सिद्धासने संस्थो गुदमेढ्रान्तरं दृढम् ।
वामेन पार्ष्णिनाऽऽपीड्य तस्योपरि तु विन्यसेत् ॥
पादं तु दक्षिणं गुल्फग्रन्थ्योरन्योन्यमर्दनम् ।
यथा स्यात् तत् प्रकर्त्तव्यं ततो दक्षिणपार्ष्णिना ॥
लिङ्गमूलं विनिष्पीड्य स्थिरकाय उपाविशेत् ।
गुदमाकुञ्च्य पवनमपानाख्यं तथा गुरुः ॥
उत्थापयेत् ततः प्राणवायुं सम्यङ्निरोधयेत् ।
अपानप्राणयोः कुर्यात् संघट्टं चैकदृङ्मनाः ॥
मूलाधारे चित्स्वरूपकुण्डल्यां परमात्मनि ।
जातदोषं स्वस्य मन्त्रं चिन्तयेत् तत्र सद्गुरुः ॥
तस्य मन्त्रस्याक्षराणि क्रमादेकैकशस्ततः ।
सुषुम्णायास्तु मार्गेण मूलाधारे प्रवेशयेत् ॥
स्वाधिष्ठाने ततश्चक्रे मणिपूरे ह्यनाहते ।

विशुद्ध आज्ञाचक्रे च भित्त्वाभित्त्वा प्रवेशयेत् ॥
एवं नीत्वा ब्रह्मरन्ध्रं तत्रत्यात् सोममण्डलात् ।
निर्गतामृतसंसिक्तान् मन्त्रार्णान् सुविभावयेत् ॥
पुनः सुषुम्णामार्गेण आज्ञाचक्रेऽवतारयेत् ।
विशुद्धेऽनाहते वाऽपि मणिपूरे च चक्रके ॥
स्वाधिष्ठाने ततो भेदान्मूलाधारे प्रवेशयेत् ।
ततस्तन्मन्त्रमृष्यादिन्यासपूर्वं जपेत् पुनः ॥
अष्टोत्तरसहस्रं तु तेन शुद्धो भवेन्मनुः ।
*अनुक्तशापान्निर्मुक्तं पश्चादुपदिशेच्च तम् ॥

अनुक्तशापादिति मानसशापादित्यर्थः । वाचिकशापानां तु वक्ष्यमाणदशसंस्करनाश्यत्वादिति भावः । छिन्नत्वादिदोषाणामुक्तयोनिबन्धनाश्यत्वं नागभट्टैरप्युक्तम् ।

छिन्ना रुद्धास्तम्भिताः कीलका ये
सुप्ता मन्त्रा मूर्च्छिता हीनवीर्याः ।
दग्धास्त्रस्ताः शत्रुपक्षे स्थिता ये
बाला वृद्धा गर्विता यौवनेन ॥
ये निर्जीवा ये च सत्त्वेन हीनाः
षण्ढीभूताश्चाङ्गमन्त्रैर्विहीनाः ।
एते मुद्राबन्धनेनैव योन्या
मन्त्राः सर्वे वीर्यवन्तो भवन्ति ॥

---

* उक्तशापाद्विनिर्मुक्तमिति मेरुतन्त्रे उपलभ्यते ।

(शारदायाम्)

दोषानिमानविज्ञाय यो मन्त्रान् भजते जडः ।
सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥

मन्त्राणां दशसंस्कारास्तत्रैव ।

जननं[१] जीवनं[२] पश्चात् ताडनं[३] बोधनं[४] तथा ॥
तथाऽभिषेको[५] विमलीकरणा[६]ऽऽप्यायने[७] पुनः ।
तर्पणं[८] दीपनं[९] गुप्ति[१०]र्दशैता मन्त्रसंस्क्रियाः ॥

जननादिप्रकारास्तु (मेरुतन्त्रे)

वाचिकानां तु शापानां नाशाद्यर्थमथोच्यते ।
श्रीपर्ण्यां वा चन्दनस्य पीठे चूतादिकस्य वा ॥
कस्तूरीकुङ्कुमाद्यैश्च विलिखेत् पाञ्चभौतिकम् ।
चक्रमावाहयेत् तत्र मातृकाख्यां सरस्वतीम् ॥
यथोक्तविधिना पूजां कृत्वा चाष्टोत्तरं शतम् ।
जपित्वा मातृकां तस्या मध्यात् स्वाभीष्टमन्त्रकम् ॥
स्वरव्यञ्जनविन्दूंश्च सर्गयोगाक्षराणि च ।
पृथक् पृथग्यथोद्धृत्य चैकीकृत्य गुरूक्तितः ॥
गृहीतं जनयेन्मन्त्रं प्रोक्तं संजननं त्विदम् ।
आद्यन्तं प्रणवं कृत्वा प्रणवान्तरितं जपेत् ॥
अष्टोत्तरशतं मन्त्रं वर्णानेतत् तु जीवनम् ।
रोचनाकुङ्कुमाभ्यां च भूर्जपत्रे लिखेन्मनुम् ॥
प्रत्यक्षरं शतं वारं ताडयेच्चन्दनाम्भसा ।
समुच्चरन् वायुबीजमेतत् ताडनमुच्यते ॥

कुण्ठिताः शाबरा मन्त्रास्ताडिताः सिद्धिकारकाः ।
पूर्वोक्तपीठे संलिख्य तन्मन्त्राक्षरसंख्यया ॥
आदाय करवीरस्य पुष्पाण्यथ समुच्चरन् ।
प्रत्यक्षरं च तैः पुष्पैः शतवारं हुनेदिति ॥
उच्चरन् वह्निबीजं च बोधनं त्वेतदुच्यते ।

(शारदायां) तु हुनेदित्युक्ते हन्यादित्युक्तम् ।

*विलिखेन्मन्त्रयन्मन्त्री प्रसूनैः करवीरजैः ।
तन्मन्त्राक्षरसंख्यातैर्हन्याद्रान्तेन बोधितम्—इति ॥

रान्तेन वह्निबीजेन (मैरौ)

प्राग्वत् पीठे च तैर्द्रव्यैः पद्ममष्टदलं लिखेत् ॥
तत्कर्णिकायां मालत्या लिखेत् कलिकयैकया ।
एकैकार्णं तु मन्त्रस्य तन्मन्त्राक्षरसंख्यया ॥
बोधिद्रु†पल्लवान् गृह्य‡ तमेवं मन्त्रमुच्चरन् ।
अभिषिञ्चाम्यमुं मन्त्रं नम इत्यभिषेचयेत् ॥
नानासुगन्धितोयेन पल्लवैकेन चाक्षरम् ।
एकमष्टोत्तरशतमभिषिञ्चेदयं स्मृतः ॥
अभिषेको मन्त्रशुद्धिं कुर्यान्नृणां यथा जलम् ।
ज्योतिर्मन्त्रश्चिन्तनीयो मूलाधारेऽग्निमण्डले ॥
संस्कर्त्तव्यं मनुं तस्य ऊर्ध्वमेवं विभावयेत् ।
आणवाख्यः साहजिक आगन्तुः कार्मणः स्मृतः ॥
योगाख्यो मायिकः प्रोक्तः स्वमन्त्रे तु मलत्रयम् ।

---

* विलिख्य मन्त्रं तन्मन्त्रीति २ पु. पा. ।

† बोधिद्रुरश्वत्थवृक्षः ।

‡ गृहीत्वेह गृह्येति पाठः प्रामादिकः ।

ज्योतिर्मन्त्रेण निर्दग्धमेकमेकं विचिन्तयेत् ॥
एवं तु विमलो जातः स्वमन्त्र इति चिन्तयेत् ।
ज्योतिर्मन्त्रस्तु वेदादिह्रौमिति द्व्यक्षरो मतः ॥
विमलीकरणं ह्येतत् प्रयोगान्तेऽपि कारयेत् ।
प्राग्वत् पीठे कुङ्कुमादिद्रव्यैर्मन्त्रं विलेखयेत् ॥
ताम्रादिपात्रं कर्पूरवासितेन जलेन च ।
शुद्धेनाऽऽपूर्य लिखितमन्त्रेणाष्टोत्तरं शतम् ॥
अभिमन्त्र्य जलं तेन मन्त्रेण कुशविन्दुभिः ।
प्रत्यक्षरं प्रोक्षयेत् त्रिरेतदाप्यायनं मतम् ॥
पुरश्चर्याक्लेशितानां समावर्त्तनवत् त्विदम् ।
कस्तूर्याद्यैस्ताम्रपात्रमध्ये मन्त्रं विलेखयेत् ॥
पात्रान्तरे च कर्पूरादिकवासितसज्जलम् ।
गृहीत्वा चार्घपात्रेण पठन्मन्त्रमिमं मनुम् ॥
तर्पयामि[*] नमश्चे ति तर्पयेदिति तर्पणम् ।
ॐह्रींश्रींपूर्वकं मन्त्रं जपेदष्टोत्तरं शतम् ॥
जपेदेतद्दीपनं स्यात् सर्वमन्त्रेष्वपीष्यते ।
जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ॥
संस्कारा दश संप्रोक्ताः सर्वतन्त्रेषु गोपिताः ।
"यान्[†] कृत्वा संप्रदायेन मन्त्री वाञ्छितमश्नुते" ॥

अथ मन्त्राणां जागृतिस्तत्रैव ।

अथादौ सर्वमन्त्राणां जागृतिः प्रोच्यते मया ।
गुरुणा सा प्रकर्त्तव्या शिष्यस्य सिद्धिहेतवे ॥

---

[*] नमश्चोक्तेति वा. पा. मुक्तकल्लोलिन्याम ।

[†] मेरुतन्त्रस्य मूलपुस्तके नेदमुलभ्यते ।

* तारान्त्याग्नि † वियद्युक् च यस्मिन्नाग्नेयकः स तु ।
अन्यः सौम्यः स्वापकाल इडायामग्निरूपिणः ॥
सौम्यस्य पिङ्गलायां स्यात् तयोरन्यत्र जागृतिः ।
प्रबोधकाले संजप्तो जाग्रतो जायते मनुः ॥
अथ वा संपुटीकृत्य लान्तानाद्यान् स विन्दुकान् ।
पुनश्च सविसर्गान्तान् त्वकारं केवलं पठेत् ॥
एवं जप्तो यदीष्टश्चेत् प्रबुद्धः शीघ्रसिद्धिदः ।

शाबरमन्त्रेषु विशेष उक्तस्तत्रैव ।

अथ शाबरमन्त्राणां जागृतिं शृणु पार्वति ॥
कांस्यभाजनमानीय शुद्धं भस्मादिभिः कृतम् ।

---

* तारः ओं, अन्त्यः क्षः, अग्नी रेफः, वियत् हकारः एतेषां बहूनां युक् योगो यस्मिन् मन्त्रे स आग्नेयः । न तूक्तवर्णानां मध्ये एकवर्णस्य योगेनाग्नेयः । यथोक्तं शारदायाम् । अग्नीषोमात्मका मन्त्रा विज्ञेयाः क्रूर सौम्ययोः । कर्मणोर्वह्नितारान्त्यवियत्प्रायाः समीरिताः ॥ आग्नेया मनवः सौम्या भूयिष्ठेन्द्वमृताक्षराः । आग्नेयाः संप्रबुद्ध्यन्ते प्राणे चरति दाक्षिणे ॥ भागेऽन्यस्मिन् स्थिते प्राणे सौम्या बोधं प्रयान्ति च । नाडीद्वयं गते प्राणे सर्वे बोधं प्रयान्ति च ॥ प्रयच्छन्ति फलं सर्वे प्रबुद्धा मन्त्रिणां सदा । अत्र प्रकृतोपयोगिवह्नितारैत्यादिवचनव्याख्या राघवभट्टकृता । वह्नी रेफः । तारः ओं । अन्त्यः त्वकारः । वियत् हकारः । प्रायः शब्दो बाहुल्यवाची । प्रायो भूम्न्यन्तगमन इत्यमरः । एते आग्नेयाः । इन्दुः सः । तत्त्वन्यासे इन्दुमण्डलस्य सकारादित्वेन न्यस्तत्वात् । अमृतं वः । अग्नैकस्य बाहुल्ये तत्त्वं तदुक्तमीशानशिवेन । "ताराकाशाद्यन्तवाद्यन्तवर्णा आग्नेयाः स्युः सौम्यवर्णास्ततोऽन्ये । आग्नेयोऽपि स्यात् तु सौम्यो नमोऽन्तः सौम्योऽपि, स्यादग्निमन्त्रः फडन्तः ॥ स्यादाग्नेयैः क्रूरकार्यस्य सिद्धिः सौम्यैः सौम्यं कर्मकुर्याद्यथाव" दिति । नारायणीयेऽपि । "तारान्त्याग्निवियत्प्रायो मन्त्र आग्नेय इष्यते । शिष्टाः सौम्याः प्रशस्तौ तौ कर्मणोः क्रूरसौम्ययोः ॥ आग्नेयमन्त्रः सौम्यः स्यात् प्रायशोऽन्ते नमोऽन्वितः । सौम्यमन्त्रस्तथाऽऽग्नेयः फट्कारेणान्वितोऽन्तत" इति ॥पिङ्गलामतेऽपि । रौद्रोऽपि शान्ततामेति शान्तजातिसमन्वितः । मन्त्रः शान्तोऽपि रौद्रत्वं हुँफट्पल्लवितो यदि इति । तत्र नारायणीये विशेषः । मन्त्रावाग्नेयसौम्याख्यौ ताराद्यन्तौ द्वयोर्जयेदिति ।

† वियत् फड्द्वे इति वा. पा. । एतत्पाठसहितस्य तारान्त्याग्नीत्यारभ्य-जायते मनुरित्यन्तं श्लोकद्वयस्याभिप्राय उपर्युक्तटिप्पण्या विशदीभवति ।

प्रजपेद्रविरात्रौ तु यामे यामे शताष्टकम् ॥
खादिर्या ताडयेद्यष्ट्या कांस्यपात्रं वदेदिति ।
जाग्रतो भव मन्त्रस्य भाषयाऽथ तुरीयके ॥
यामे दद्याद्बलिं काल्या मन्त्रजं भैरवस्य तु ।
कुक्कुटंऽचान्यदेवेषु स्फोटयेन्नारिकेरकम् ॥

मन्त्रस्य भाषयेति । यद्देशीयभाषात्मकः शाबरमन्त्रस्तद्देशीयभाषयैव मन्त्रं संबोध्य त्वं जाग्रतो भवेति वदेदित्यर्थः ।

अथ दीक्षोपयुक्तमण्डपार्थं भूमिपरीक्षा ।

प्लवस्थानं च गम्भीरं दीर्घतोयाशयाश्रयः ।
अग्निशालाऽग्निहोतॄणां पुण्यस्थानं परिश्रुतम् ॥
द्विजानां सव्रतानां च आश्रयः स्वाश्रमोऽथवा ।
दीक्षायामतिशस्तानि स्थानान्येतानि पार्वति ॥
न च दीक्षां प्रकुर्वीत निकुञ्जे गहने वने ।
द्विसीम्नि च महारण्ये मात्सर्यमृगसेविते ॥

(तन्त्रान्तरे)

महानदीनां तीराणि गङ्गसागरसङ्गमः ।
प्रशस्तानि च तीर्थानि क्षेत्राणि चाश्रमा अपि ॥
अरण्यानि च सर्वाणि पर्वताः सकला अपि ।
सनिर्झराऽप्यपगिरि देवतायतनान्यपि ॥

(महाकपिलपञ्चरात्रे)

तत्र भूमिं परीक्षेत वास्तुज्ञानविशारदः ।
स्फुटिता च सशल्या च वल्मीकारोहिणी तथा ॥
दूरतः परिवर्ज्या भूः कर्त्तुरायुर्धनापहा ।
स्फुटिता मरणं कुर्यादूषरा धननाशिनी ॥
सशल्या क्लेशदा नित्यं विषमा शत्रुतो भयम् ।

ईशकोणप्लवा सा च कर्त्तुः श्रीदाऽऽशु निश्चितम् ॥
पूर्वप्लवा वृद्धिकरी वरदा तूत्तरप्लवा ।
दक्षिणप्लवा या भूमिर्नित्यं मृत्युभयप्रदा ॥
गृहक्षयकरी सा च भूमिर्या नैर्ऋतप्लवा ।
धनहानिकरी पृथ्वी कीर्त्तिता वरुणप्लवा ॥
वायुप्लवा तथा भूमिर्नित्यमुद्वेगकारिणी ।
अग्निकोणप्लवा या च पुत्राऽऽयुर्धननाशिनी ॥

(गौतमीये)

भूमेः परिग्रहं कुर्याद्यावदायतनं भवेत् ।
शुक्लमृत्स्ना च या भूमिर्ब्राह्मी सा परिकीर्त्तिता ॥
क्षत्रिया रक्तमृत्स्ना च हरिद्वैश्या प्रकीर्त्तिता ।
कृष्णा भूमिर्भवेच्छूद्रा चतुर्धा परिकीर्त्तिता ॥

(महाकपिलपञ्चरात्रे)

ब्राह्मणी भूः कुशोपेता क्षत्रिया स्याच्छराकुला ।
कुशकाशाकुला वैश्या शूद्रा सर्वतृणाकुला ॥

(गौतमीयतन्त्रे)

ब्राह्मी सर्वार्थसिद्ध्यैः स्यात् क्षत्रिया राज्यदा तथा ।
धनधान्यकरी वैश्या शूद्रा तु निन्दिता मुने ॥

(वासिष्ठ्याम्)

खन्यमाने यदा कुण्डे पाषाणः प्राप्यते भुवि ।
तदाऽपमृत्यवे चास्थिकेशाङ्गारैर्धनक्षयः ॥
भस्मनाऽग्निभयं प्रोक्तं तुषैः प्रोक्ता दरिद्रता ।

शल्यज्ञानार्थमहिबलचक्रमाह (आदियामले)

अहिचक्रं प्रवक्ष्यामि यथा सर्वज्ञभाषितम् ।
द्रव्यं शल्यं तथा शून्यं येन जानन्ति साधकाः ॥

निधिर्निवर्त्तनैकस्थः संभ्रान्तो यत्र भूतले ।
तत्र चक्रमिदं स्थाप्यं स्थानद्वारमुखस्थितम् ॥
*"अहिगत्या च नक्षत्रं तत्काले यत्र चन्द्रमाः ।
द्रव्यं शल्यं भवेत् तत्र चन्द्रभास्कर†सादज"म् ॥
ऊर्ध्वरेखाऽष्टकं लेख्यं तिर्यक् पञ्च तथैव च ।
अहिचक्रे भवन्त्यत्येवमष्टाविंशतिकोष्ठकाः ॥
तत्र पौष्णाश्विनीयाम्यकृत्तिकामघभाग्यकम् ।
उत्तराफाल्गुनी लेख्या पङ्क्तौ तत्सप्तके ध्रुवम् ॥
अहिर्बुध्न्याजपादर्क्षं शतभं ब्राह्मयसार्पभम् ।
पुष्यं हस्तं समालेख्यं द्वितीयपङ्क्तिसंस्थितम् ॥
अभिजिद्विष्णुधनिष्ठाः सौम्यं रौद्रं पुनर्वसुम् ।
चित्रभं च तृतीयायां पङ्क्तौ धिष्ण्यादिसप्तके ॥
विश्वर्क्षं तोयभं मूलं ज्येष्ठां मैत्रं विशाखभम् ।
स्वातीं पङ्क्तौ चतुर्थ्यां तु कृत्वा चक्रं विलोकयेत् ॥

अहिबलचक्रम् ।

रे २७ चं	अ १ चं	भ २ चं	कृ ३ चं	म १० चं	पू ११	उ १२
उ २६	पू २५ चं	श २४	रो ४	श्ले ९ चं	पु ८ चं	ह १३
अभि	श्र २२ चं	ध २३ चं	मृ ५	आ ६ चं	पु ७ चं	चि १४
उ २१ चं	पू २० चं	मू १९	ज्ये १८	अ १७	वि १६	स्वा १५

---

* नरपतिजयचर्योक्ताहिबलचक्रलक्षणे नेदमुपलभ्यते

† सादो गमनम् । एतन यस्मिन् नक्षत्रे चन्द्रस्य सूर्यस्य च गमनं तज्जं तद्वशं द्रव्यं शल्यं च क्रमात् तत्र भूतले भवेदिति ज्ञेयम् ।

रेवत्यश्विनीभरणीकृतिकामघापूर्वोत्तराः प्रथमपङ्क्तौ । उत्तरभाद्रपदपूर्वभाद्रपदशतभिषारोहिण्याश्लेषापुष्यहस्ता द्वितीयपङ्क्तौ। अभिजित्श्रवणधनिष्ठामृगशिरआर्द्रापुनर्वसुचित्रास्तृतीयपङ्क्तौ । तत उत्तराषाढापूर्वाषाढामूलज्येष्ठाऽनुराधाविशाखास्वात्यश्चतुर्थपङ्क्तौ ।

एवं प्रजायते चक्रे प्रस्तारः पन्नगाकृतिः ।
द्वारशाखे मघायाम्ये द्वारस्था कृत्तिका मता ॥
अश्वीशपूर्वषाढादित्रिकपञ्चचतुष्टयम् ।
रेवतीपूर्वभाद्रेन्दोर्भानि शेषाणि भास्वतः ॥
उदयादिगता नाड्यो भग्नाः षष्टयाप्तशेषके ।
दिनेन्दुभुक्तयुक्तोऽसौ भवेत् तत्कालचन्द्रमाः ॥
*"षष्टिघ्न. तं निशानाथं शरवेदाप्तकं पुनः ।
युगैः शेषं भवेद्यत् तत् प्रागादिचक्रवक्रगम्" ॥
चन्द्रवत् साधयेत् सूर्यमृक्षस्थं चेष्टकालिकम् ।
पश्चाद्विलोकयेत् तौ च स्वऋक्षेऽथान्यभे स्थितौ ॥
चन्द्रऋक्षे यदाऽर्केन्दू तत्र स्यान्निश्चितो निधिः ।
भानुऋक्षे स्थितौ तौ चेत् तदा शल्यं न चान्यथा ॥
स्वस्वभे द्वितयं ज्ञेयं नास्ति किं चिद्विपर्यये ।
स्थितं न लभते द्रव्यं चन्द्रे क्रूरग्रहान्विते ॥
हेमतारं च ताम्रारं रत्नं† ताम्रायसं त्रपुः ।
नागं चन्द्रे विजानीयाद्भास्करादिग्रहे स्थिते ॥
मिश्रैर्मिश्रं भवेद्द्रव्यं शून्य दृष्टिविपर्यये ।
सर्वग्रहस्थिते चन्द्रे निर्दिष्टोऽसौ महानिधिः ॥
शुभक्षेत्रगते चन्द्रे लाभो भवति निश्चितम् ।

---

* नरपतिजयचर्यायामिदमुपलभ्यते ।

† कांस्यायसम् इति २ पु. पा. ।

पापक्षेत्रे न लाभः स्याज्ज्ञातव्यं स्वरवेदिभिः ॥
पुष्टे चन्द्रे भवेन्मुद्रा क्षीणे चन्द्रेऽल्पको निधिः ।
ग्रहदृष्टिवशात् सोऽपि विज्ञेयो नवधा बुधैः ॥
हेमतारं च ताम्रारं पाषाणं मृन्मयायसम् ।
सूर्यादिगृहगे चन्द्रे द्रव्यभाण्डं प्रजायते ॥
भुक्तराश्यंशमानेन भूमानं कांविकैः करै—रिति ।

तद्यथा ।

चन्द्रस्थाने निधिर्ज्ञेयः सूर्यस्थाने च शल्यकम् ॥

* इदं च निर्वर्त्तनं परिमितभूमावंकमेव कुर्यात् ।

निर्वर्त्तनस्वरूपं च ।

दण्डस्तु दशहस्तः स्यात् त्रिंशद्दण्डैर्निवर्तनम् इति ।

अथ वा महाकपिलपञ्चरात्रोक्तप्रकारेण शल्योद्धारः कर्त्तव्यः । तद्यथा ।

प्रासादारम्भकाले च यदङ्गं स्पृशते पुमान् ।
वास्तुदेहे दृढं तत्र शल्यं विद्याद्विचक्षणः ॥
कण्डूयति शिरः पुंसः शिरःशल्यं समुद्धरेत् ।
शल्यं तत्रास्थि विज्ञेयं खन्यमाने करत्रये ॥
अग्निदाहश्च रोगश्च धनहानिश्च जायते ।
यत्नेनोत्पाटयेच्छल्यं यदीच्छेत् सिद्धिमात्मनः ॥
बाहौ कण्डूयमाने तु निर्दिशेल्लोहशृङ्खलम् ।
हस्तद्वयेन संतिष्ठेल्लक्षणं कथितं तव ॥
स्वामिनो मरणं विद्याद्विदेशगमनं तथा ।
यत्नेनोत्पाटयेच्छल्यं यदीच्छेद्भद्रमात्मनः ॥
ऊरौ कण्डूयमाने तु कांस्यशल्यं विनिर्दिशेत् ।
हस्तैकेन च संतिष्ठेल्लक्षणं कथितं तव ॥

---

* अस्यैव ग्रन्थस्य ९८ पृ. १ पंक्त्यां संबन्धः ।

असती च भवेद्भार्या यशोहानिश्च जायते ।
यत्नेनोत्पाटयेच्छल्यं यदीच्छेद्भद्रमात्मनः ॥
हस्ते कण्डूयमाने तु कङ्कालं च विनिर्दिशेत् ।
त्रिहस्तेन च संतिष्ठेत् खन्यमाने न चान्यथा ॥
अग्निदाहश्च रोगश्च सशल्यं मरणं ध्रुवम् ।
यत्नेनोत्पाटयेच्छल्यं यदीच्छेद्भद्रमात्मनः ॥
पृष्ठे कण्डूयमाने तु बाहुशल्यं विनिर्दिशेत् ।
हस्तेनैकेन संतिष्ठेन्नात्र कार्या विचारणा ॥
स्वामिनाशो भवेत् तत्र भार्या वा जायतेऽसती ।
पादे कण्डूयमाने तु हस्तशल्यं विनिर्दिशेत् ॥
सार्धहस्तेन संतिष्ठेल्लक्षणं गदितं तव ।
गोनाशो राजदण्डश्च सस्यहानिश्च जायते ॥
यत्नेनोत्पाटयेच्छल्यं यदीच्छेत् सिद्धिमात्मनः ।
कुक्षौ कण्डूयमाने तु पाषाणं तत्र निर्दिशेत् ॥
हस्तद्वितयमानेन लक्षणं गदितं तव ।
भुजङ्गदंशस्तत्र स्यात् तस्माच्छल्यं समुद्धरेत् ॥
जानौ कण्डूयमाने तु भस्म तत्र विनिर्दिशेत् ।
हस्तद्वयेन संतिष्ठेल्लक्षणं गदितं तव ॥
अग्निदाहो महाँ*स्तापः क्लेशदुःखभयानि च ।
करोत्येवंविधं कर्म तस्मात् तं वै समुद्धरेत् ॥
गोशृङ्गं पीतमण्डूकः शङ्खं शुक्तिश्च मण्डपः ।
शम्बूकश्च प्रशस्ताः स्युर्याश्चान्या रत्नजातयः ॥

---

* मनस्ताप इति २ पु. पा. ।

अङ्गारं वै तुषं केशमस्थिशल्यं विवर्जयेत् ।

अथ वा ब्रह्मयामलोक्तप्रकारेण शल्यं ज्ञात्वा तदुद्धारः कर्त्तव्यः । तत्र शल्यज्ञानं यथा ।

नवकोष्ठे कृते चक्रे पूर्वादिषु च दिक्षु च ।
व क च त ए ह स प या वर्णा लेख्या अनुक्रमात् ॥

ब्रह्मयामलोक्तशल्योद्धारचक्रम् ।

प	व	क
स	य	च
ह	ए	त

प्रकारान्तरम् ।

प	व	क
स	य	च
ह	ए	त

गन्धपुष्पादिनैवेद्यधूपदीपादिभिर्गृहे ।
शिशुमानीय सुस्नातं प्रष्टव्यं फलपुष्पकैः ॥
पूर्वार्धे पुष्पनाम्ना च शेषार्धे फलनामतः ।
दिनस्य शल्यं नास्त्यस्ति फलपुष्पाद्यवर्णतः ॥
कोष्ठारे पुष्पफलयोर्भवेदाद्यक्षरं यदि ।
तदा शल्यं च तत्कोष्ठे यदि तत्रास्ति नास्ति तत् ॥
सपादहस्तभूमिस्थं नृशल्यं नरनाशनम् ।
खरशल्यं सर्पशल्यं भीतिदं सार्धहस्ततः ॥
हस्तद्वये वाजिशल्यं गृहिणां मृत्युदुःखदम् ।
सार्धद्विहस्ते हस्तिशल्यं गृहशून्यप्रवासदम् ॥
श्वशल्ये महिषे मृत्युः सपादद्वयहस्तके ।
बिडालशल्यं हस्तेन त्रिहस्ते मित्रनाशनम् ॥
सार्धत्रये कपेः शल्यं दुःस्वप्नं धननाशकम् ।

वास्तुमात्रे चाखुशल्यं कुलवित्तविनाशनम् ॥
नरादिशल्यं ज्ञातव्यं वकारादावनुक्रमात् ।
यदङ्गं स्पृशते दूत*स्तदङ्गोद्भवशल्यकम् ॥
नवभागं गृहं कृत्वा तद्भागं च पुनःपुनः ।
यद्भागे पुष्पफलयोराद्यवर्णं च तत्फलम् ॥

(तत्त्वकौमुद्यां) तु

गृहारम्भे कण्डूतिश्च स्वाम्यङ्गे यत्र जायते ।
शल्यमस्तीति वक्तव्यं प्रासादे भवनेऽपि वा ॥

कवचतैहसपयाः शल्याक्षराणि । नरखरोष्ट्रशिशुमार्जारगोकपिपुरुषद्विजास्थीनि नदीपुष्पफलदेवतानां नामानि ।

शिशुसीमन्तिनीमूर्खवक्त्रात् तत्क्षणमागतम् ।
अक्षरं द्विगुणं कृत्वा मात्रां चैव चतुर्गुणाम् ॥
नवभिश्च हरेद्भागं विषमे शल्यं समे न हि ।

धरणीधारणीकरणभूत्यै नमः, इति शल्योद्धारणमन्त्र इति विशेष उक्तः । अन्यत् सर्वं ब्रह्मयामलोक्तवदिति ।

चत्वारः शल्योद्धारप्रकारा दर्शिताः । एतेषामन्यतमेन प्रकारेण शल्योद्धारं विधाय निर्दोषां भूमिं ज्ञात्वा वक्ष्यमाणप्रकारेण वास्तुयागं विधाय तत्र मण्डपं कुर्यात् । शल्योद्धारप्रकारान्तरेण भूमेः परीक्षा कर्त्तव्या तत्प्रकारश्च (प्रयोगसारे) ।

वितस्तिमात्रविस्तारं निर्माय विवरं भुवि ।
निःक्षिपेत् ता मृदस्तस्मिँस्तासु शिष्टासु शोभनम् ॥
समासु मध्यमं विद्यान्न्यूनास्वधममुच्यते ।

(गौतमीयतन्त्रे)

तता भूमिं परीक्षेत वास्तुज्ञानविशारदः ।
शल्यादिशोधनं कुर्यात् तुषाङ्गारादि दूरयेत् ॥
एतस्याकरणे मन्त्री न किंचित् फलमाप्नुयात् ।

---

* शल्यप्रश्नकर्त्तेति ।

(महाकपिलपञ्चरात्रे)

खन्यमाने जलं यावत् शल्यदोषो विनश्यति ।
दूरनीचस्थितं वारि खनितुं नैव शक्यते ॥
पञ्चहस्तं प्रखातव्यं शल्यदोषोपशान्तये ।
शल्योद्धारं ततः कृत्वा पूरयेत् सुसमं यथा ॥
वास्तुयागं ततः कुर्यात् सर्वविघ्नोपशान्तये ।

वास्तुयागस्यावश्यकत्वमाह यमः ।

गृहादिकरणे यत्र नार्चितो वास्तुदेवतः ।
तत्र शून्यं भवेत् सर्वं रक्षोविघ्नादिभिर्हतम् ॥
तस्माद्वास्त्वर्चनं सम्यक् कार्यं सम्पद्भीप्सुभिः ।

(महाकपिलपञ्चरात्रे)

भूमेः परिग्रहे पूर्वं शिलानां स्थापने तथा ।
जलाधारगृहार्थं च यतेद्वास्तुं विशेषतः ॥
अपरेष्वपि कार्येषु यागहोमादिकेषु च ।
वास्तुमण्डलकं कुर्यात् सूत्रयित्वा समं गुरुः ॥

वास्तुयागोत्पत्तिमाह (मेरुतन्त्रे)

वास्तुनामा पुरा कश्चिदसुरोऽभून्महाबलः ।
त्रैलोक्यं निर्जितं तेन त्रिपञ्चाशच्च देवताः ॥
ये रणे संमुखे यातास्तेन तं विनिपीडिताः ।
पुनःपुनर्जिता युद्धे स एवासीत् प्रजापतिः ॥
दिव्यवर्षसहस्रान्ते देवाः शरणमागताः ।
विष्णोर्मम च पार्वत्या दैत्येन्द्रेणापि तच्छ्रुतम् ॥
योद्धुकामः सोऽभ्यधावन्नारदेन प्रचोदितः ।
कृतं युद्धं तेन सार्धमस्माभिर्वर्षपञ्चकम् ॥
ततो दैत्यो मदोत्सिक्तो विष्णुमायाविमोहितः ।

उवाच वचनं तुष्टो व्रियतां व्रियतामिति ॥
नेन्द्रेण न कुबेरेण मम तोषकरं कृतम् ।
ससैन्येनापि तद्युद्धं त्वया तु जटिलेन हि ॥
कृतं विष्णुसहायेन पार्वत्यर्धाङ्गधारिणा ।
तेनाहं तुष्टिमापन्नस्त्रैलोक्यपरमेश्वरः ॥
अदेयं नास्ति मे किंचिद्याचयन्तु त्रयोऽपि च ।
इत्याकर्ण्य वचस्तस्य शिवयोर्भ्रूप्रचोदितः ॥
हरिः प्राह महाधन्य दैत्येन्द्र त्वत्समोऽस्ति कः ।
सत्यं त्रिवारं कुरुषे तदा याच्यो मया वरः ॥
शिवेनापि च पार्वत्या एक एवापरो न हि ।
त्रिरुवाच ततो दैत्यस्तदा विष्णुर्व्यजिज्ञपत् ॥
यथा ते त्वरितं मृत्युः स उपायः प्रदृश्यताम् ।
विष्णोश्छलमिति ज्ञात्वा दैत्येन्द्रः समभाषत ।
अवश्यमेव गन्तव्यं सर्वैः कालमुखे हरे ।
तथा च स्वप्रतिज्ञार्थं यो गच्छति स जीवति ॥
परं त्वेकं न मे वंशे यैश्च मत्सेवनं कृतम् ।
तस्य मार्गं दर्शयित्वा देहोऽयं विनिपात्यताम् ॥
काले तस्मिँश्च भो देवा वागुवाचाशरीरिणी ।
दैत्येन्द्र कुरु मा शोकं भूमेर्जन्म तवाभवत् ॥
तत्रैव त्वं लयं याहि त्वत्तोषार्थं वरं शृणु ।
ये वर्णाः स्वस्य भोगार्थं करिष्यन्ति नवं गृहम् ॥
तत्र त्वदुत्सवमृते नानादुःखैरुपद्रुताः ।
कालवर्ण्यादिका दास्यो विनायकमुखाश्च ते ॥

सेवकाः पीडयिष्यन्ति इत्याज्ञा पारमेश्वरी ।
इत्याकर्ण्य वचः सोऽपि गर्त्तं गत्वा महाविलम् ॥
प्रविवेश ततो देवैर्मृत्पाषाणैः प्रपूरितम् ।
तेन ये निर्जिता देवाः पुनरुद्गमशङ्कया ॥
तस्यार्थे च त्रिपञ्चाशन्निवासं चक्रुरुद्यताः ।
तस्मादवश्यं ते पूज्या गृहवाससुखेच्छया ॥

अथ वास्तुयागविधिस्तत्रैव ।

शृण्वन्तु तद्विधिं देवा वामदक्षिणमार्गतः ।
पाषाणे प्रतिमायां वा वास्तोष्पते प्रतिज्ञाति ॥
इति वैदिकमन्त्रेण तस्यावाहनपूजनम् ।
नाममन्त्रेण चान्येषां पूजां कृत्वा प्रपूरयेत् ॥
नैर्ऋत्यकोणे गेहस्य चतुरस्राकृतिं शुभाम् ।
कृत्वा समतलां भूमिं वितस्त्युच्चां च वेदिकाम् ॥
विस्तारायामतो हस्तमात्रां तत्र लिखेद्बुधः ।

(महाकपिलपञ्चरात्रे) तु विशेषः ।

गृहप्रासादकूपानां मण्डपस्य जलस्य च ।
वास्तुमण्डलकं कार्यमष्टहस्तं तु नापरम् ॥
भद्रभूमिं प्रशोध्येत दशदण्ड समालिखेत् ।
अधोऽधस्तिर्यगादौ च तेनैकाशीतिकोष्ठकम् ॥

(मेरौ)

एकाशीतिपदं चक्रं वैदिकास्तत्र देवताः ।
मध्यकोष्ठेषु नवसु त्वादौ ब्रह्माण[1]मर्च्चयेत् ॥
आपवत्सं [2]तदीशाने प्रागर्यम्णां[3] त्रिकोष्ठके ।
आग्नेये सवितारं[4]च विवस्वन्त[5]मवाकूत्रिषु ॥

इन्द्रं[६] नैर्ऋतदिग्भागे मित्रं[७] पश्चिमगं त्रिषु ।
वायव्ये राजयक्ष्माणं[८] सुमेरुं[९]चोत्तरत्रये ॥
वेदकोष्ठेषु चैशान्यामीशकोणाच्च देवताः ।
शिखी[१०]पर्जन्य[११] आप[१२]श्च दितिः[१३]प्राक्कोष्ठयोर्द्वयोः ॥
क्रमादेते पञ्च देवा ज्ञातव्याः सव्यमार्गतः ।
जयन्ते[१४]न्द्रौ [१५]सूर्य[१६]सत्यौ [१७]भृश[१८]आग्नेयकोणके ॥
अन्तरिक्षं[१९]तथा वातः[२०]पूषा [२१]सावित्र[२२]एव च ।
चतुष्क ईशतो देवास्ततो दक्षिणपञ्चके ॥
युग्मक्रमाच्च वितथो[२३]बृहत्क्षत्र[२४]यमौ [२५]तथा ।
गन्धर्वौ[२६]भृङ्गराज[२७]श्च नैर्ऋताष्टचतुष्टके ॥
ईशानीतो जय[२८]मृगौ[२९] पितृ[३०]दौवारिकौ[३१] तथा ।
ततः पश्चाद्द्विके पञ्च सुग्रीवः[३२]पुष्पदन्तकः[३३] ॥
वरुणा[३४]सुर[३५]शोषा[३६] श्च वायव्ये ईशतस्त्वहि[३७]ः ।
रुद्र[३८]श्च पापयक्ष्मा[३९] च रोग[४०]श्चोत्तरपञ्चसु ॥
मुख्यो[४१] भल्लाट[४२]सोमौ[४३] च भुजग[४४]श्चादिति[४५]स्तथा ।
देवा एते पञ्चचत्वारिंशदर्च्यास्तु भक्तितः ॥
इद*मेकाशीतिपदं वैदिकं वास्तुमण्डलम् ।

तान्त्रिकमार्गे चतुःषष्टिपदं वास्तुमण्डलं तत्रैवोक्तम् ।

अथ तान्त्रिकमार्गे तु चतुःषष्टिपदे तथा ।
कोणयोः सूत्रयुगलं मध्ये ब्रह्माणमर्चयेत् ॥

(गौतमीयतन्त्रे)

विप्राशिषा वेदघोषैर्मङ्गलाचारपूर्वकैः ।
वास्तोर्मण्डलकं कुर्याद्यथाशोभं यथाविधि ॥

---

* एतच्चक्रमग्रिमपृष्ठे विलोक्यम् ।

एकाशीतिपदं वास्तुचक्रम् ।

शिखी	पर्जन्यः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	अन्तरिक्षः	वातः
दितिः	आपः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	सावित्रः	पूषा
अदितिः	अदितिः	आपवत्सः	अर्यमा	अर्यमा	अर्यमा	सविता	वितथः	वितथः
भुजगः	भुजगः	सुमेरुः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विवस्वान्	बृहत्क्षत्रः	बृहत्क्षत्रः
सोमः	सोमः	सुमेरुः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विवस्वान्	यमः	यमः
भल्लाटः	भल्लाटः	सुमेरुः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विवस्वान्	गन्धर्वः	गन्धर्वः
मुख्यः	मुख्यः	राजयक्ष्मा	मित्रः	मित्रः	मित्रः	इन्द्रः	भृङ्गराजः	भृङ्गराजः
अहिः	रुद्रः	शोषः	असुरः	वरुणः	पुष्पदन्तः	सुग्रीवः	जयः	मृगः
रोगः	पापयक्ष्मा	शोषः	असुरः	वरुणः	पुष्पदन्तः	सुग्रीवः	दौवारिकः	पिता

(शारदायाम्)

पूर्वापरायतं सूत्रं विन्यसेद्धस्तमानतः ।
तन्मध्यं किंचिदालम्ब्य मत्स्यौ द्वौ परितो लिखेत् ॥
तयोर्मध्ये स्थितं सूत्रं विन्यसेद्दक्षिणोत्तरम् ।
द्वाभ्यां द्वाभ्यां तथाऽआभ्यां कोणेषु मकराँल्लिखेत् ॥
मत्स्यमध्ये स्थिताग्राणि तत्र सूत्राणि पातयेत्* ।
चतुरस्रं भवेत् तत्र चतुष्कोष्ठसमन्वितम् ॥
तत् पुनर्विभजेन्मन्त्री चतुःषष्टिपदं यथा ।
ईशानाद्राक्षसं यावद्यावदग्नेः प्रभञ्जनम् ॥

---

* इत्यादिना सचतुकोष्ठचतुरस्रं बहुधा मत्स्यादिरचनया गौरवेण प्रदर्शितम् । तत् पुनश्चतुःषष्टिविभागैर्विभज्य चतुःषष्टिपदं वास्तुचक्रमुदितम् । एतच्चक्रविलोकनतः स्पष्टमित्यलं मत्स्यादिरचनप्रपञ्चप्रदर्शनेनेति ।

एवं सूत्रद्वयं दद्यात् कर्णसूत्रं *समाहितः ।
ब्रह्माणं[१] पूजयेदादौ मध्यकोष्ठचतुष्टये ॥
दिक्चतुष्के तु पूर्वादि यजेदार्य[२]मनन्तरम् ।
विवस्वन्तं[३]ततो मित्रं[४] महीधर[५]मनन्तरम् ॥
कोणार्धकोष्ठद्वन्द्वेषु वह्न्यादि परितः पुनः ।
सावित्रं[६] सवितारं च[७] शक्र[८]मिन्द्रजयं[९] पुनः ।
रुद्रं[१०] रुद्रजयं[११] विद्वानापं[१२] चाऽथापवत्सकम्[१३] ॥
तत्कर्णसूत्रोभयतः कोष्ठद्वन्द्वेषु दैशिकः ।
शर्वं[१४] गुहं[१५] चार्यमाणं[१६] जृम्भकं[१७] पिलपिञ्छिकाम्[१८] ॥
चरकीं[१९] च विदारीं[२०] च पूतना[२१] मर्चयेत् क्रमात् ।
पूजयेद्दिक्षु पूर्वादिसार्द्धाद्यन्तपदेष्विमान् ॥
अष्टावष्टविभागेन देवतान् दैशिकोत्तमः ।
क्रमादीशान[२२]पर्जन्य[२३]जयन्ताः[२४]शक्र[२५]भास्करौ[२६] ॥
सत्यो[२७]वृषा[२८]न्तरिक्षौ[२९] च दिशि प्राच्यां व्यवस्थिताः ।
अग्निः[३०] पूषा[३१] च वितथो[३२] यम[३३]श्च गृहरक्षकः[३४] ॥
गन्धर्वो[३५] भृङ्गराज[३६]श्च मृगो[३७] दक्षिणदिग्गताः ।
निर्ऋति[३८]र्दौवारिकश्च[३९] सुग्रीव[४०]वरुणौ[४१] ततः ॥
पुष्पदन्ता[४२]ऽसुरौ[४३] शोष[४४] रोगौ[४५] प्रत्यग्दिशि स्थिताः ।
वायु[४६]र्नाग[४७]श्च मुख्य[४८]श्च सोमो[४९] भल्लाट[५०] एव च ॥
अर्गलाख्यो[५१] दित्य[५२]दिती[५३]कुवेरस्य दिशि स्थिताः ।
देवा एते त्रिपञ्चाशत् पूजनीयाः प्रयत्नतः ॥

(हयशीर्षपञ्चरात्रे)

एकाशीतिपदं वास्तु गृहकर्मणि शस्यते ।
चतुःषष्टिपदं वास्तु प्रासादेषु प्रशस्यते ॥

---

* स्वस्थचित्त इत्यर्थः ।

चतुःषष्टिपदं वास्तुचक्रम् ।

शर्वः । पिलपिच्छिका ।

जम्भकः । पूतना ।

गुहः । चरकी ।



अदिति ईशानः	पर्जन्यः	जयन्तः	शक्रः	भास्करः	सत्यः	वृषः	अग्निः अन्तरिक्षः
अदितिः	दितिः पर्जन्यः	जयन्तः	शक्रः	भास्करः	सत्यः	पूषा भृशः	पूषा
अर्गलः	अर्गलः	आपः आपवत्सः	आर्यमा	आर्यमा	सावित्रः सविता	वितथः	वितथः
भल्लाटः	भल्लाटः	महीधरः	ब्रह्मा	ब्रह्माः	विवस्वान्	यमः	यमः
सोमः	सोमः	महीधरः	ब्रह्मा	ब्रह्मा	विवस्वान्	गृहरक्षकः	गृहरक्षकः
मुख्यः	मुख्यः	रुद्रजयः रुद्रः	मित्रः	मित्रः	इन्द्रजयः इन्द्रः	गन्धर्वः	गन्धर्वः
नागः	शोषः नागः	असुरः	पुष्पदन्तः	वरुणः	सुग्रीवः	दौवारिकः [illegible]	भृङ्गराजः
रोगः वायुः	शोषः	असुरः	पुष्पदन्तः	वरुणः	सुग्रीवः	दौवारिकः	निर्ऋतिः [illegible]

अर्यमा विदारी ।

(मेरुतन्त्रे)

ब्रह्मस्थानं रक्तवर्णैर्दिशः पीतैर्विदिक् सितैः ।
ततो दिशस्तु हरितैर्विदिशः कृष्णवर्णकैः ॥
अरुणः परिधिः कार्यः सुन्दरं मण्डलं भवेत् ।
मध्ये पदानां नवकं मार्जयित्वा प्रपूरयेत् ॥
सितेन रजसा भूयस्तद्दिक्षु चतसृष्वपि ।
षट्कं संमार्ज्य रजसा रक्तेन परिपूरयेत् ॥
तयोर्मध्ये चतुर्दिक्षु कोष्ठं द्वादशसंख्यकम् ।

मार्जयित्वा हरिद्वर्णैर्यथाशोभं प्रपूरयेत् ।
कोणे कोणेऽष्टयुग्मं पीतवर्णेन पूरयेत् ॥
शिष्टानि च पदान्यत्र यथाशोभं प्रकल्पयेत् ।
विचित्राणि ततो मध्ये ब्रह्माणं संप्रपूजयेत् ॥

(गौतमीयतन्त्रे)

उक्तानामपि देवानां पदान्यापूर्य पञ्चभिः ।
रजोभिस्तेष्वथो तेभ्यः पायसान्नैर्वलिं हरेत् ॥
पायसैर्मधुरैः सर्वान् संयजेन्मधुरान्वितैः ।
तत्तद्द्रव्यैर्वा मतिमान् पूजयेद्दोषशान्तये ॥

(मेरुतन्त्रे)

व्रीहिमुद्गयवैः क्षौद्रघृतदुग्धप्लुतैः क्रमात् ।
अष्टोत्तरशतं वाऽष्टोत्तरविंशतिमेव वा ॥
प्रत्येकं तैर्हुनेद्द्रव्यैर्मन्त्रैस्तद्वच्च पायसैः ।
वलिं च तेषां कुर्वीत पायसैर्व्यञ्जनान्वितैः ॥
ससितैर्दुग्धकदलीफलापूपादिसंयुतैः ।
एवं सिंहगते भानौ पूर्णायां प्रतिवत्सरे ॥
स्वगेहे वास्तुपूजायां मण्डपेषु समाचरेत् ।
न बालमरणं व्याधिर्भूतप्रेतादिकानि च ॥
न सर्पपीडा नान्योन्यकलहाद्यशुभानि च ।
पुत्रपौत्रधनारोग्यं पशुदासीसमृद्धिभाक् ॥
अरोगी विजयख्यातश्चिरं जीवति तद्गृहे ।
राजवेश्मसु सर्वत्र तथा च महिषीगृहे ॥
सचिवामात्यसेनानीभवनेषु परे तथा ।
विदध्यात् प्रतिवर्षं तु प्रोक्तसिद्ध्यै तु दैशिकः ॥

न चेदुक्तान्यथारूपफलैः क्लेशोऽनिशं भवेत् ।
भैरवक्षेत्रपालानां योगिनीनां विशेषतः ॥
वामाचारैर्बलिः कार्यो महिषैर्वाऽपि कुक्कुटैः ।
आराधितास्तु वामेन जायन्तेऽतिबुभुक्षिताः ॥
देवता बलिमिच्छन्ति तद्धीनं घ्नन्ति साधकम् ।

वास्तुध्यानम् (सोमशम्भुतन्त्रे)

आकुञ्चितकरं वास्तुमुत्तानमसुराकृतिम् ।
स्मरेत् पूजासु कुड्यादिनिवेशे त्वधराननम् ॥
जानुनीकूर्पराशक्ते दिशि वातहुताशयोः ।
पैत्र्यां पादपुटौ रौद्र्यां शिरोऽस्य हृदयेऽञ्जलिः ॥

पैत्र्यामिति । प्रकृतिमण्डले पितृदेवताधिष्ठितायां रक्षोदिशि न तु दक्षिणस्यामिति ध्येयम् ।

(महाकपिलपञ्चरात्रेऽपि)

पूर्वमासीन्महानुग्रः सर्वभूतभयङ्करः ।
स देवैर्निहतो भूमौ स वास्तुपुरुषः स्मृतः ॥
यावद्भूमिः स्थिरा लोके तावद्वास्त्वसुरः स्थिरः ।
संहारे तु लयं याति देवैः सर्वग्रहादिभिः ॥
विस्तारोऽस्य समन्ताच्च शतकोटिस्तु योजनम् ।
संस्थितोऽसौ धरां व्याप्य प्रोत्तानः कृष्णवर्णकः ॥

अत्रायं क्रमः । आदौ * यजमान आचार्यं ब्रूयात् । तत आचार्यः प्रोक्तलक्षणां भूमिं परिगृह्य तस्याः शुद्धिं विधाय पञ्चगव्यैः संसिच्य तन्मध्ये शुक्लडोरकं प्रसार्य कनकशलाकया रत्नेन रजतशलाकया वा तदभावे पुष्पफलधान्यानामन्यतमेन वा ।

शान्ता[1] यशोवती[2] कान्ता[3] विलासा[4] प्राणवाहिनी[5] ।

---

* आचार्ययजनं वृणुयात् इति २ पु. पा. ।

सती[6] वसुमती[7] नन्दा[8] सुभद्रा[9] नवमी मता ॥

इति नव रेखाः प्रागपरायता दक्षिणोपक्रमा उदगपवर्गा विलिख्य

हिरण्या[1] सुव्रता[2] लक्ष्मी[3]र्विभूति[4]र्विमला[5] प्रिया[6] ।
जया[7] काला[8] विशोका[9] च नवमी संस्कृता बुधैः ॥

इति नव रेखा दक्षिणोत्तरायताः पश्चिमोपक्रमाः पूर्वापवर्गा विलिख्यैवं चतुःषष्टिपदं वास्तुमण्डलं निर्माय पञ्चरजोभिः पदानि परिपूर्य मध्येऽष्टदलं वक्ष्यमाणरीत्या निर्माय तन्मध्ये ब्रह्माणं ध्यात्वा आवाह्य तत्तत्पदेषु तत्तद्देवताश्चावाह्य प्रणवादिनमोऽन्तैस्तन्नाममन्त्रैः पूजयेत्। मण्डलाद्बहिःकोष्ठेषु कोष्ठचतुष्टयमतिरक्तं निर्माय तत्र गुरुगणेशदुर्गाक्षेत्रपालान् पूजयेत्। ऐशान्यां कलशं संस्थाप्य वरुणं यथाविधि पूजयेदिति राघवभट्टाः।

एषां ध्यानानि तन्त्रान्तरे—

उक्तानां सर्वदेवानां स्वरूपं च निगद्यते।
अक्षमालां स्रुवं दक्षे वामे दण्डकमण्डलुम् ॥
दधानमष्टनयनं यजेन्मध्येऽम्बुजासनम्।
सर्वे चतुर्भुजा देवा वास्तुदेहे व्यवस्थिताः ॥
कृताञ्जलिपुटा ऊर्ध्वे खड्गखेटकपाणयः।
ब्रह्माणं संनिरीक्षन्ते तद्वक्त्राभिमुखाश्च ते ॥
स्वस्वस्थानस्थिताश्चैव साधारणमुदाहृतम्।
मरीचिः श्वेतवर्णः स्याद्विवस्वानभ्रवर्णकः ॥
शातकुम्भनिभो मित्रः कृष्णावक्रस्तु भूधरः।
सविता नीलवर्णाभः सावित्रो धूम्रविग्रहः ॥
इन्दुश्चारुणवर्णाभः शुक्लश्चेन्द्रजयस्तथा।
रुद्रः प्रवालसदृशः पीतो रुद्रजयस्तथा ॥
आपो गोक्षीरधवल आपवत्सो जपाद्युतिः।
ईशानः क्षीरधवलः पर्जन्योऽञ्जनसंनिभः ॥
जयन्तोऽञ्जनसंकाशो महेन्द्रः श्यामलद्युतिः।

आदित्यो रक्तवर्णः स्यात् सत्यकश्चित्रवर्णकः ॥
वृषो बन्धूकपुष्पाभः कुन्दाभश्चान्तरिक्षकः ।
उद्यद्दिनकराभोऽग्निः पूषा रत्नाभसन्निभः ॥
वितथश्चेन्द्रचापाभो विद्युद्वर्णो गृहरक्षकः ।
निर्ऋतिः पावकाभश्च पीतो दौवारिकः स्मृतः ॥
सुग्रीवो नीलकण्ठाभश्चन्द्राभः पुष्पदन्तकः ।
वरुणः स्फटिकाभाङ्गो भृङ्गाभश्चासुरो मतः ॥
यमश्चाञ्जनसङ्काशो गन्धर्वः पद्मरागवत् ।
भृङ्गराजश्च भृंङ्गाभो मृगो जीमूतसंनिभः
शोषश्चोत्पलसंकाशो रोगश्चैवेन्द्रनीलवत् ।
वायुः कृष्णाभवर्णः स्यान्नागः शेषेन्दुसंनिभः ॥
मुख्यो मौक्तिकसंकाशो भल्लाटः श्वेतपद्मवत् ।
सोमः स्फटिकसंकाशोऽर्गलो रक्तोत्पलद्युतिः ॥
दितिः कुन्देन्दुधवला कपिला चादितिः स्मृता ।
चरकी शङ्खसदृशी विदारी पावकद्युतिः ॥
पूतना हिमसंकाशा मेघाभा पिलिपिञ्छिका ।
खड्गं च पानपात्रं च छुरिकां कर्त्तरीं तथा ॥
दधाना भीमरूपास्ता राक्षस्यः परिकीर्त्तिताः ।
सितो रक्तश्च पीतश्च कृष्णाः स्कन्दादिका ग्रहाः ॥
वज्रं शक्तिं च खड्गं च पाशं च विकृताननाः ।
दधाना भीषणाः प्रोक्ता ग्रहाः स्कन्दादिकाश्च ते ।

एवं ध्यात्वा पञ्चोपचारैः संपूज्य वास्तुपुरुषमपि यथोक्तं ध्यात्वा वैदिकमते उक्तवैदिकमन्त्रेण तान्त्रिकमते तु ॐवास्तोष्पतये नमः इति मन्त्रेण पञ्चोपचारैः संपूज्य तत्पूर्वदिशि तत्पश्चिमदिशि वा हस्तमात्रं त्रिमेखलं कुण्डं स्थण्डिलं वा निर्माय तत्र वक्ष्यमाणक्रमेणाग्निमुपसमाधाय मण्डलाद्ब्रह्मादिदेवतास्तत्रावाह्य

तेभ्यः पूर्वोक्तसंख्यया आहुतीर्हुत्वा पूर्णाहुतिं विधाय पुनर्मण्डले देवानानीय तेभ्यः प्रत्येकं वलिं दद्यात् ।

वलिमन्त्रा द्रव्यभेदाश्च (गौतमीयमहाकपिलपञ्चरात्रयोः)

पायसौदनलाजैश्च युक्तं धूपप्रसूनकैः ।
अन्नादिभिश्च संयुक्तं माषभक्तादिमण्डितम् ॥
गृहाणेमं वलिं ब्रह्मन् वास्तुदोषं प्रणाशय ।
गन्धादिशर्करारूपं पायसोपरिसंयुतम् ॥
आर्यकाख्य गृहाणेमं सर्वदोषं प्रणाशय ।
चन्दनाद्यर्चितं नाथ कर्पूरागुरुमण्डितम् ॥
विवस्वन् वै गृहाणेमं सर्वदोषं प्रणाशय ।
सगुडं पायसं नाथ पुष्पादिसुसमन्वितम् ॥
गृहाणेमं वलिं हृद्यं मित्र शान्तिं प्रयच्छ मे ।
माषौदनं समांसं च गन्धादिक्षीरसंयुतम् ॥
गृहाणेमं महीभृत् त्वं सर्वदोषं प्रणाशय ।
एवं मध्ये तु संपूज्य ईशानादि वलिं हरेत् ॥

एतेन पूजायामाग्नेयादिक्रमेऽपि वलावीशानादिक्रमः ।

अन्यत्रापि ।

ईशानाद्दक्षिणावर्त्तो वलिः सामान्यभाषितः ।
सर्वेषां खलु वस्तूनां विशेषः पदनिर्णये ॥

क्वचित् तु पूजाऽपि तथैवोक्ता ।

ईशकोणादिषु सुरान् पूजयेच्च विधानतः ।
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः—इति ॥

तथा ।

क्षीरखण्डसमायुक्तं पुष्पादिभिरलंकृतम् ।
गृहाणेमं वलिं गृह्यमाप शान्तिं प्रयच्छ मे ॥

दधीदं गुडसंमिश्रं गन्धादिभिः सुसंयुतम् ।
गृहाणेमं वलिं वत्स विघ्नमत्र प्रणाशय ॥
पुष्पादिकुशपानीयं शर्करागुरुवासितम् ।
सावित्र वै गृहाणेमं शान्तिमत्र प्रयच्छ मे ॥
पिष्टकं सगुडं नाथ रक्तगन्धादिशोभितम् ।
गृहाणेमं वलिं सूर्य विघ्नमत्र प्रणाशय ॥
शीतमन्नं तथा पुष्पं कुङ्कुमादिसुमण्डितम् ।
गृहाणेमं वलिं गृह्यं शक्रदेव नमोऽस्तु ते ॥
ओदनं घृतसंयुक्तं वस्त्रगन्धादिमण्डितम् ।
गृहाणेमं वलिं गृह्यमिन्द्रजय नमोऽस्तु ते ॥
पक्वापक्वमिदं मांसं वस्त्रपुष्पादिसंयुतम् ।
गृहाणेमं वलिं गृह्यं रुद्रदेव नमोऽस्तु ते ॥
समांसं घृतसंपक्वं गन्धपुष्पादिसंयुतम् ।
गृहणेमं वलिं रुद्रजय स्वस्ति नमोऽस्तु ते ॥
रक्तपुष्पं समांसं वै रक्तवस्त्रादिसंयुतम् ।
विदारि वै गृहाणेमं रक्षोविघ्नं विनाशय ॥
पित्तरक्तास्थिसंयुक्तं रक्तगन्धादिमण्डितम् ।
गृहाणेमं पूतने त्वं रक्षोविघ्न विनाशय ॥
सघृतं माषभक्तं च रक्तगन्धादिसंयुतम् ।
वलिं गृहाण शर्वे त्वं रक्षोविघ्नं विनाशय ॥
मांसपुष्पादिसंयुक्तं माषभक्तोपशोभितम् ।
गृहाणेमं वलिं स्कन्द रक्षोविघ्नं विनाशय ॥
श्वमांसं पिष्टकैर्युक्तं पक्वमांसोदकान्वितम् ।
अर्यमन् वै गृहाणेमं सर्वविघ्नं विनाशय ॥

रक्तमांसौदनं मत्स्यं गन्धधूपसमन्वितम् ।
जृम्भक त्वं गृहाणेमं रक्षोविघ्नं विनाशय ॥
छागकर्णान्वितं मांसं वस्त्रगन्धादिसंयुतम् ।
पिलपिञ्छे गृहाणेमं रक्षोविघ्नं विनाशय ॥
घृतेन साधितं मांसं वस्त्रगन्धादिसंयुतम् ।
चरकि त्वं गृहाणेमं रक्षोविघ्नं विनाशय ॥
सघृतं साक्षतं भक्तं वस्त्रगन्धाद्यलंकृतम् ।
गृहाणेमं वलिं त्वीश वास्तुदोषापहारकम् ॥
उत्पलं पायसैर्युक्तं वस्त्रादिकसमन्वितम् ।
गृहाणेमं वलिं गृह्यं मेघराज नमोऽस्तु ते ॥
पञ्चहस्तं सुपीतं च ध्वजं भक्तादिमण्डितम् ।
गृहाणेमं वलिं गृह्यं जिष्णुसुत नमोऽस्तु ते ॥
ओदनं घृतसंपूर्णं पञ्चरत्नादिमण्डितम् ।
गृहाणेमं वलिं हृद्यं देवराज नमोऽस्तु ते ॥
रक्तपुष्पयुतं भक्तं रक्तगन्धादिभिर्युतम् ।
गृहाणेमं वलिं हृद्यं भास्कराय नमोऽस्तु ते ॥
वितानं धूम्रवर्णाभं गन्धादिकसुशोभितम् ।
रक्तपुष्पं गृहाणेमं वलिं सत्य नमोऽस्तु ते ॥
इदं तु मांसभक्तं वै वस्त्रगन्धादिपूजनम् ।
गृहाणेमं वृष वलिं वास्तुदोषं विनाशय ॥
इदं तु शाद्वलं मांसं नैवेद्यादिसुसंयुतम् ।
गृहाणेमं वलिं हृद्यं व्योम शान्तिं प्रयच्छ मे ॥
सुवर्णं पिष्टकं चाथ वस्त्रगन्धादिभिर्युतम् ।

घृतान्वितं गृहाणेमं सप्तजिह्व नमोऽस्तु ते ॥
क्षीरं लाजासमायुक्तं गन्धपुष्पादिसंयुतम् ।
गृहाणेमं वलिं हव्यं पूषदेव नमोऽस्तु ते ॥
मांसौदनं गन्धमाल्ययुतं वस्त्रादिभूषितम् ।
वितथेश वलिं गृह्णन् वास्तुदोषं विनाशय ॥
मत्स्यमांसयुतं भक्तं गन्धपुष्पाद्यलंकृतम् ।
यमराज गृहाणेमं वलिं शान्तिं प्रयच्छ मे ॥
पक्वमांसौदननवनीतं वस्त्रादिमण्डितम् ।
गृहाणेमं प्रीतिकरं गृहरक्ष नमोऽस्तु ते ॥
नानागन्धसमायुक्तं रक्तगन्धादिभिर्युतम् ।
वलिं गृहाण गन्धर्व सर्वदोषं प्रणाशय ॥
इमां तु शाकुनीं जिह्वां माषभक्तोपरिस्थिताम् ।
गृहाणेमं भृङ्गराज वलिं शान्तिं प्रयच्छ मे ॥
एवं तिलघृतोपेतं गन्धपुष्पादिभिर्युतम् ।
गृहाणेमं वलिं हव्यं मृगदेव नमोऽस्तु ते ॥
शर्करामण्डितं खण्डं वस्त्रगन्धाद्यलंकृतम् ।
प्रीतो वलिं गृहाणेमं रक्षोराज नमोऽस्तु ते ॥
चन्दनागुरुकाखण्डं वस्त्रगन्धादिभिर्युतम् ।
गृहाणेमं वलिं हव्यं दौवारिक नमोऽस्तु ते ॥
इदं तु पायसं नाथ गन्धपुष्पादिमिश्रितम् ।
सुग्रीव वै गृहाणेमं वलिं शान्ति प्रयच्छ मे ॥
यवाग्वलंकृतं दुग्धं भक्तोपरिसमन्वितम ।
गृहाणेमं वलिं हव्यं जलदेव नमोऽस्तु ते ॥

माषभक्तं कुशस्तम्बं घृतगन्धादिसंयुतम् ।
पुष्पदन्त गृहाणेमं वास्तुदोषं प्रणाशय ॥
मधुना साधितं पिष्टं गन्धाद्यैरुपशोभितम् ।
वलिं गृहाणासुरेन्द्र सर्वदोषं प्रणाशय ॥
घृतं चान्नसमायुक्तं कर्पूरादिसमायुतम् ।
गृहाणेमं वलिं शोष सर्वशान्तिं प्रयच्छ मे ॥
यवजं तण्डुलं नाथ गन्धपुष्पादिशोभितम् ।
गृहाणेमं वलिं रोग सर्वदोषं प्रणाशय ॥
सघृतं मोदकं * चेदमन्नाद्यैरुपशोभितम् ।
गृहाणेमं वलिं हव्यं मृगवाह नमोऽस्तु ते ॥
इदं तु कृसरान्नं मे दुग्धगन्धादिसाधितम् ।
पातालेश गृहाणेमं विघ्नमत्र प्रणाशय ॥
नारिकेलोदकं भक्तं पीतवस्त्रादिसंयुतम् ।
गृहाणेमं वलिं मुख्य वास्तुदोषं प्रणाशय ॥
दधिगन्धादिभिर्युक्तं पीतपुष्पसमन्वितम् ।
वलिः प्रगृह्यतां सोम सर्वदोषं प्रणाशय ॥
ओदनं घृतसंमिश्रं गन्धपुष्पसमन्वितम् ।
गृहाणेमं वलिं गृह्यं भल्लाटक नमोऽस्तु ते ॥
माषान्नं तु घृताभ्यक्तं गन्धपुष्पादिमण्डितम् ।
गृहाणेमं वलिं हव्यमर्गलाख्य नमोऽस्तु ते ॥
क्षीरखण्डसमायुक्तं नानापुष्पोपशोभितम् ।
दैत्यमातर्गृहाणेमं सर्वदोषं प्रणाशय ॥

---

* मण्डकमिति २ पु. पा.

पौरिकां मधुसंमिश्रां वस्त्रगन्धादिसंयुताम् ।
गृहाणेमं वलिं गृह्यं देवमातर्नमोऽस्तु ते ॥
स्वर्गपातालमर्त्त्येषु देवता वास्तुदेवताः ।
गृह्णन्त्विमं वलिं हृद्यं तुष्टा यान्तु स्वमन्दिरम् ॥
मातरो भूतवेताला ये चान्ये वलिकाङ्क्षिणः ।
विष्णोः पारिषदा ये च तेऽपि गृह्णन्त्विमं वलिम् ॥
पितृभ्यः क्षेत्रपालेभ्यो वलिं दत्वा प्रकामतः ।
अभावादुक्तमार्गस्य कुशपुष्पादिभिर्यजेत् ॥

(प्रयोगसारे)

वास्तुशेषः क्रियापूतः सर्वरक्षाविधानकृत् ।
भूतिप्रीतिकरश्चास्मिन् दिशां वलिमुदीरयेत् ॥
दिक्पालपरिषत्सर्वभूतानुद्दिश्य नामभिः ।
पूजाविसर्जनान्तो यः स विज्ञेयो दिशो वलिः ॥
दध्यम्बुरजनी * पुष्पलाजसक्तुतिलान्धसा ।
द्रव्येण वितरेद्दिश्यं वलिं दिक्क्रमयोगतः ॥
सुराणां तेजसां चैव प्रजानां रक्षसामपि ।
तथा जलानां प्राणानां नक्षत्राणां च तत्पुनः ॥
विद्यानामधिपानां च नान्यथोक्तान् वलिं हरेत् ।
सवाहनपदं प्रोक्ता परिवाराय शक्तये ॥
तत्पार्षदेभ्यश्च ततः सर्वेभ्य इति संयुतः ।
भूतेभ्यश्च क्रमाद्भूयः प्रादक्षिण्यान् क्षिपेद्वलिम् ॥
द्विषत्पिशाचवेतालरक्षोरक्षार्थिनामिह ।

---

* हरिद्रा ।

दिशां वलिर्विशेषेण सर्वसंपत्समृद्धिदः ॥
वास्तौ गृहप्ररोहे भूतद्रोहे गृहप्रवेशे च ।
वितते च शान्तिहोमे दिशां वलिः सिद्धये प्रयोक्तव्यः ॥

इति वलिं दत्त्वा पुनस्तान् समभ्यर्च्य यथाशक्ति जप्त्वा स्तुत्वा प्रणम्य विसर्जयेत् ।

विसर्जनमन्त्रो यथा ।

यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥

इति देवान् विसृज्य कुद्दालं पूजयेत्

तदुक्तं तन्त्रान्तरे ।

भद्रं मुहूर्त्तमाश्रित्य खन्यतां वास्तुकोष्ठकम् ॥
स्वर्णकुद्दालरूप त्वं भूमेः खननकर्मणि ।
विश्वकर्मायुधो नित्यं नमस्ते चास्त्रमूर्त्तये ॥

इति स्वर्णकुद्दालं प्रपूज्य खानितृपुरुषं विश्वकर्मधिया पूजयेत् ।

द्विभुजः पीतदेहस्तु जटाधारी कजासनः ।
विश्वकर्मा सदा गौरो ज्ञानमुद्राक्षसूत्रभृत् ॥
विश्वकर्मन् जगद्व्यापिन् संसारसृष्टिकारक ।
अत्र कुद्दालहस्तस्त्वं विश्वकर्मन्नमोऽस्तु ते ॥
एकाशीतिकोष्ठभेदे वास्तौ विश्वात्मकर्मक ।
कुद्दालं गृह्यतामत्र खननं कुरु साम्प्रतम् ॥

इति तद्धस्ते कुद्दालं दक्षिणां च दद्यात् । ततः पृथिवीं प्रार्थयेत् ।

कुद्दालदारितैरत्र कीटकोटिशतैरपि ॥
क्षम्यतां पृथिवीदेवि विष्णुस्थापनहेतवे ।

इति पृथ्वीं संप्रार्थ्य विश्वकर्मात्मकखनितृपुरुषो वास्तुपुरुषस्य कक्षान्तरे खननं कुर्यात् ।

तदुक्तं तन्त्रान्तरे ।

शुभाशुभानि वास्तूनां क्रमेणैव वदाम्यहम् ।
कक्षान्तरे च नित्यं च सर्वत्र भद्रमादिशेत् ॥
शीर्षे चैव भवेन्मृत्युः कण्ठे वै दुःखभागिता ।
हस्ते चौरभयं विद्यादुरसा पशुनाशनम् ॥
जानौ विदेशगमनं पादाभ्यां च निरर्थकम् ।
वामदक्षिणमित्येवं वास्तुक्षेत्रमुदीरितम् ॥
निपुणः कारयेन्मन्त्री कल्याणं पूर्णताकृतम् ।
समाहितमना भूत्वा खनयेद्वास्तुकक्षके ॥

इति वास्तुयागविधिः ।

अथ दीक्षोपयुक्तमण्डपनिर्णयः ।

तत्रादौ मण्डपरचनार्थं पूर्वादिदिग्ज्ञानोपायः ।

तदुक्तम् (क्रियासारे)

कृत्वा भूमिं समां तत्र वृत्तं हस्तमितं समम् ।
द्वादशाङ्गुलमानोच्चं शङ्कुं खादिरनिर्मितम् ॥
अलाभे यज्ञवार्क्षं वा तत्र संस्थापयेत् सुधीः ।
तच्छाया संस्पृशेद्यत्र तन्मध्यें मध्यमं स्मृतम् ॥
तिर्यक् प्रसारयेत् सूत्रं मध्ये याम्योत्तरे स्मृते ।
कोणाः स्युरन्ये चत्वारश्चतुःसूत्रप्रसारणात् ॥
एवं मानपरिज्ञानं समाख्यातं यथा स्फुटम् ।
ज्ञात्वैवं मण्डपादीनि कुर्यात् सम्यग्विचक्षणः ॥

(महाकपिलपञ्चरात्रे)

विषुवे तु गते सूर्ये शङ्कुमानं समाचरेत् ।
खादिरं विन्यसेच्छङ्कुं द्वादशाङ्गुलविस्तृतम् ॥
निश्चलीकृत्य हन्तव्यं गृहीत्वा लोहमुद्गरम् ।
अष्टधा च स्वयं हन्यात् प्रशस्तं क्रमतो लघु ॥

हन्यमाने यदा शङ्कौ हस्तात् पतति मुद्गरः ।
तदा ताडयितुः शोको जायते दुस्तरो महान् ॥
मौञ्जं कार्पासकौशेयं प्राणिवालजमेव च ।
चतुर्यवपरीणाहं सूत्रं शङ्कौ तु वेष्टयेत् ॥
वेष्ट्यमानं यदा सूत्रं शङ्कुं मुञ्चति तत्क्षणम् ।
पुत्रस्य मरणं विद्याच्छिन्ने वै स्वविनाशनम् ॥
तत्रापि नारसिंहेन होमेनाशुभनाशनम् — इति ।

(शारदायाम्)

नक्षत्रराशिवाराणामनुकूले शुभेऽहनि ।
ततो भूमितले शुद्धे तुषाङ्गारादिवर्जिते ॥
पुण्याहं वाचयित्वा तु मण्डपं रचयेच्छुभम् ।
पञ्चभिः सप्तभिर्हस्तैर्नवभिर्वामिनां वरम् ॥

अत्र यथाश्रुतव्याख्याने कुण्डाष्टकवेद्यृत्विक्प्रचारस्थलाद्यनुपपत्त्या पञ्चभिः सप्तभिरित्यनेन द्वादशहस्तः पञ्चभिर्नवभिरित्यनेन चतुर्दशहस्तः सप्तभिर्नवभिरित्यनेन च षोडशहस्तो मण्डप इति राघवभट्टैः पदार्थादर्शे व्याख्यातम् । ताराभक्तिसुधार्णवे नृसिंहठक्कुरैरपि तथैवोक्तम् । एतेन द्वादशहस्तः कनीयान्, चतुर्दशहस्तो मध्यमः, षोडशहस्तश्चोत्तम इति त्रिविधो मण्डप उक्तः ।
तदुक्तम् (प्रतिष्ठासारसंग्रहे)

स्वल्पो द्वादशहस्तोऽयं द्विद्विवृद्ध्या ततः क्रमात् ।

यत् तु

राज्ञां होमाभिषेकादिप्रयोगार्थं तु मण्डपम् ।
विदध्यान्नवहस्तेन विस्तारायामसंयुतम् ॥

इति (तन्त्रराजवचनम्) तद्दीक्षातिरिक्तकर्मोपयुक्तमण्डपपरम् ।

(सिद्धान्तशेखरे)

स्थूलादर्काङ्गुलोच्छ्रायं मण्डपस्थलमीरितम् ।

(महाकपिलपञ्चरात्रे तु)

उच्छ्रायो हस्तमानं स्यात् सुसमं च सुशोभनम् —इत्युक्तम् ।

(शारदायाम्)

षोडशस्तम्भसंयुक्तं चत्वारस्तेषु मध्यगाः ।
अष्ट हस्ताः समुच्छ्रायाः संस्थाप्या द्वादशाभितः ॥
पञ्चहस्तप्रमाणास्ते निश्छिद्रा ऋजवः शुभाः ।
तत्पञ्चमांशं निखनेन्मेदिन्यां तन्त्रवित्तमः ॥

(वास्तुशास्त्रे)

पञ्चमांशं न्यसेद्भूमौ सर्वसाधारणो विधिः ।

(शारदायाम्)

नारिकेलदलैर्बाह्ये छादयेत् तत्समन्ततः ।

नारिकेलदलैरित्युपलक्षणम् ।

तथा च (मेरुतन्त्रे)

नारिकेलदलैर्वंशैः कटैराच्छादयेत् पुनः ।
झञ्झामारुतवृष्ट्यादिभयं न स्याद्यथा तथा ॥

(वास्तुशास्त्रेऽपि)

कटैः सद्भिस्तु संछाद्या विजयाद्यास्तु मण्डपाः—इति ।

स्तम्भनिवेशनं चाग्नेयादिक्रमेण कार्यम् ।

स्तम्भोच्छ्राये शिलान्यासे सूत्रयोजनकीलके ।
खननावटसंस्कारप्रारम्भो वह्निगोचरे —इति वचनात् ॥

(सिद्धान्तशेखरे)

मध्ये स्तम्भचतुष्कं स्यात् तन्मध्ये वेदिका मता ।
वेदीकोणेषु विन्यस्य स्तम्भान् वेदस्वरूपकान् ॥

(पञ्चरात्रे)

सारदारुभवान् स्तम्भान् दृढान् कुर्यादृजून् समान् ।

(क्रियासारे)

याज्ञीयवृक्षो वेणुर्वा क्रमुकः स्तम्भकर्मणि ।

अन्ये विशुद्धवृक्षा वा भवेयुर्नापभूरुहः ॥
गृहशल्यः स्वयं शुष्कः कुटिलश्च पुरातनः ।
असौम्यभूमिजनितः संत्याज्यः स्तम्भकर्मणि ॥

(मन्त्रमुक्तावल्याम्)

दिक्षु द्वाराणि चत्वारि विदध्यात् पञ्चमांशतः ।

(पञ्चरात्रे)

कनीयसि स्याद्वृद्धिकरं चतुरङ्गुलवृद्धितः ।
मध्यमोत्तमयोर्द्वारमिति पश्येन्मनोहरम् ॥

(सोमशम्भुमते)

प्लक्षोदुम्बरिकाश्वत्थवटजास्तोरणाः क्रमात् ।
पूर्वादितो विधातव्या यद्वाऽऽद्यन्तविपर्ययः ॥
अलाभादेकमेवैषां सर्वाशासु निवेशयेत् ।

(सिद्धान्तशेखरे)

एकमेषामलाभे स्यात् तदभावे शमीद्रुमः ।
जम्बूः खदिरसारश्च तालो वा तोरणे स्मृताः ॥

(महाकपिलपञ्चरात्रे)

देवास्तोरणरूपेण संस्थिता यज्ञमण्डपे ।
विघ्नविध्वंसनार्थं च रक्षार्थं त्वध्वरस्य च ॥
न्यसेन्न्यग्रोधमैन्द्र्यां तु याम्यां चोदुम्बरं तथा ।
वारुण्यां पिप्पलं चैव कौबेर्यां प्लक्षकं न्यसेत् ॥
सुशोभनं तु पूर्वस्यामृग्वेदादिसुमन्त्रितम् ।
इषे त्वेति च मन्त्रेण सुभद्राख्यं तु दक्षिणे ॥
सुकर्माख्यं तु वारुण्यां सामवेदादिकेन तु ।
शन्नो देवीति मन्त्रेण सुहोत्रं तूत्तरे न्यसेत् ॥

ऋग्वेदादीति । अग्निमीळे पुरोहितमिति मन्त्रेणाभिमन्त्रितमित्यर्थः । सामवेदादिकेन अग्न आयाहीति मन्त्रेण ।

(शारदायाम्)

द्वारेण तोरणानि स्युः क्रमात् क्षीरमहीरुहाम् ।
स्तम्भोच्छ्रायः स्मृतस्तेषां सप्तहस्तैः पृथक् पृथक् ॥
दशाङ्गुलप्रमाणेन तत्परीणाह ईरितः ।
तिर्यक्फलकमानं स्यात् स्तम्भमानार्धमानतः ॥
शूलानि कल्पयेन्मध्ये तोरणे हस्तमानतः ।

सप्तहस्तै*रित्यधममण्डपपक्षे ।

तदुक्तम् (वास्तुशास्त्रे)

पञ्चहस्तप्रमाणास्ते विस्तारेण द्विहस्तकाः ।
षडङ्गुलादिवृद्ध्या तु सप्तहस्तास्तथोत्तमे ॥

षडङ्गुलादीति । तेनाधममण्डपे तोरणस्तम्भयोरन्तरालभूमिर्द्विहस्ता । मध्यमे षडङ्गुलाधिकद्विहस्ता । उत्तमे द्वादशाङ्गुलाधिकद्विहस्ता । एतेन मण्डपतिर्यक्फलकमानमप्युक्तं भवति । अधमोत्तमयोः पञ्चहस्तसप्तहस्तोच्छ्रायकथनान्मध्यमे षड्ढस्तोच्छ्रायतोक्ता भवतीति सुधार्णवकृतः । शूलादि कल्पयेदिति । त्रिशूलविन्यासः शैवशाक्तादौ । वैष्णवे तु विशेष उक्तः ।

(मेरुतन्त्रे)

वैष्णवे द्वादशांशेन शङ्खचक्रगदाम्बुजान् ।
प्रागादिक्रमयोगेन न्यसेत् सौरोऽपि वैष्णवः ॥

(शारदायाम्)

दिक्षु ध्वजान्निबध्नीयाल्लोकपालसमप्रभाम् ।
वितानदर्भमालाद्यैरलंकुर्वीत मण्डपम् ॥

(प्रतिष्ठासारसंग्रहे)

पीतरक्तादिवर्णाश्च पञ्चहस्ता ध्वजा स्मृताः ।
द्विपञ्चहस्तैर्दण्डैस्ते वंशजैः संयुता समाः ॥

द्विपञ्चहस्तैर्दशहस्तैः

---

* रित्युपमण्डपपक्षे । इति. २ पु. पा. ।

अन्यत्रापि ।

पञ्चहस्ता ध्वजाः कार्या वैकल्पे तु द्विहस्तकाः ।
दण्डश्च दशहस्तश्च दशदिक्षु च तान् न्यसेत् ॥

(हयशीर्षपञ्चरात्रे)

दर्पणैश्चामरैर्घण्टैस्तम्भान् वस्त्रैर्विभूषयेत् ।
कलशैर्घण्टिकाभिश्च साधारैः कर्करैस्तथा ॥

तत्र प्रतितोरणमेकैकः कलशः स्थाप्यः । प्रतिद्वारपार्श्वे द्वौ द्वौ । प्रतिकोणं चैकैकः ।

तदुक्तम् ।

गन्धपुष्पाम्बरोपेतान् कुम्भाँस्तेषु विनिःक्षिपेत् ।

तेषु तोरणेषु ।

ध्रुवं धरां वाक्पतिं च विघ्नेशं तेषु पूजयेत् ।
मण्डपस्य तु कोणस्थकलशेषु क्रमादमी ॥
अमृतो दुर्जयश्चैव सिद्धार्थो मङ्गलस्तथा ।
पूजाद्वारस्थकुम्भेषु शक्राद्यास्तन्मनूत्तमैः ॥

अन्यत्रापि ।

मण्डपे कलशौ द्वौ द्वौ द्वारे द्वारे निवेशयेत् ।
गालितोदकसंपूर्णावाम्रपल्लवशोभितौ ॥

(शारदायाम्)

तत्त्रिभागमिते क्षेत्रेऽरत्निमात्रसमुच्छ्रिताम् ।
चतुरस्रां ततो वेदीं मण्डलाय प्रकल्पयेत् ॥

(त्रिपुरासारसमुच्चये)

चतुर्द्वारयुक्तं ततस्तस्य मध्ये
बुधस्तत्त्रिभागैकभागेन वेदीम् ।
अरत्निप्रमाणोन्नतां दर्पणान्त-
र्निभायां मनोहारिणीं चापि कुर्यात् ॥

अत्रारत्निमात्रोन्नतां हस्तमात्रसमुच्छ्रिताम् ।

तैश्चतुर्भिर्भवेन्मुष्टिर्वितस्तिस्तैस्त्रिभिर्गुणैः ।
अरत्निस्तद्द्वयेन स्याद्धस्तस्तद्वदतः शिवे ॥

इति मन्त्रराजवचनादरत्निहस्तशब्दयोः पर्यायतोक्तेति सुधार्णवकृतः ।

(क्रियासारेऽपि)

त्रिभागं मण्डपं कृत्वा मध्यभागे तु वेदिका ।
हस्तमानं तदुत्सेधश्चतुरस्त्रं समं यथा ॥

(मेरुतन्त्रे)

त्रिधारं वामदीक्षायां शङ्खाभं वैष्णवे मखे ।
चतुरस्त्रा चतुष्कोणा वेदी सर्वफलप्रदा ॥

तत्रैव ।

मण्डपोपरि बध्नीयादतिश्वेतं वितानकम् ।
अलंकुर्यात् पुष्पमालादिभिरेनं तु वेष्टयेत् ॥
आम्राश्वत्थदलोत्पन्नयुक्तया दीर्घमालया ।
स्तम्भान् दुकूलैः संवेष्ट्य मध्ये कुर्याच्च वेदिकाम् ॥
इष्टिकाभिरपक्काभिर्हस्तविस्तृतपिण्डिकाम् ।
मण्डपायामरुद्रांशनवसप्तेषुरामकैः ॥
अंशैः समुन्नतां वाऽपि तारतम्यं विलोक्य च ।
सामग्र्यादेः समावेशो यथा स्यादिति मण्डपः ॥

इति मण्डपलक्षणम् ।

अथ* कुण्डानि ।

(शारदायाम्)

प्राक्प्रोक्ते मण्डपे विद्वान् वेदिकाया बहिस्त्रिधा ।
क्षेत्रं विभज्य मध्यांशे पूर्वादि परिकल्पयेत् ॥
अष्टास्वाशासु कुण्डानि रम्याकाराण्यनुक्रमात् ।
चतुरस्त्रं योनिमर्धचन्द्रं त्र्यस्त्रं च वर्त्तुलम् ॥

---

* एतच्चित्राणि १३७–१३८ पृष्ठयोर्विलोक्यानि ।

षडस्रं पङ्कजाकारमष्टास्रं तानि नामतः ।
आचार्यकुण्डं मध्ये स्याद्गौरीपतिमहेन्द्रयोः ॥

(त्रिपुरासारसमुच्चयेऽपि)

वेदास्रं[1] योनि[2] मर्धोडुपनिभ[3] मनलास्रं[4] सुवृत्तं[5] षडस्रं[6]
पद्माकारं[7] गजास्रं[8] हरिहरहरिदारभ्य तस्यां विदध्यात् ।
मध्ये वृत्तं च गौरीपतिसुरपदिशोः पण्डिताः केचिदूचु-
र्वायव्ये पञ्चकोणं[9] दिशि मदनरिपोः सप्तकोणं[10] च कुण्डम् ॥

क्रमेणैषां लक्षणानि तत्रैव ।

प्राक् सूत्रं प्रथमं निधाय विदधीतार्धेन तस्याङ्कितं
मध्ये मत्स्ययुगं दिशोरमलधीः कीनाशवित्तेशयोः ।
ताभ्यां सूत्रमपि प्रसार्य चतुरः कोणाँस्ततो लाञ्छयेत्
  क्षेत्रं स्याच्चतुरस्रमत्र रचयेदन्यानि कुण्डान्यपि ॥

क्षेत्रे क्षिप्त्वा बहिरिह च पुरो भूतभागांशमेकं
  कोणार्धार्धं सुनिशितमतिर्भ्रामयेत् संप्रगृह्य ।
यावत्कोणं परमपि तथा सूत्रयुग्मस्य पातं
  मध्ये कुर्याद्भवति तदिदं मन्मथावासकुण्डम् ॥

परित्यज्य भागद्वयं पङ्क्तिभागी-
  कृतेऽत्रोपरिष्टादधस्ताच्च विद्वान् ।
परिभ्रामयेत् तेन मानेन सम्यग्-
  भवेदर्धचन्द्राह्वयं कुण्डमेतत् ॥

शर्वरीशार्धभागीकृतक्षेत्रतः
  पार्श्वयोर्न्यस्य भागद्वयं पण्डितः ।
तेन मानेन सूत्रद्वयं विन्यसेत्
  कुण्डमेतद्भवेदुद्रनेत्रास्रकम् ॥

दिग्गजाभ्यधिकपङ्क्तिभागतः क्षेत्रतो निशितधीर्बहिर्न्यसेत्।
भागमेककमनेन सर्वतो भ्रामयेद्भवति वृत्तमुत्तमम् ॥
भूयांसेंशद्वयमिह बहिः पार्श्वयोर्न्यस्य मध्यात्
क्षेत्राभ्यासे तु विमलमतिस्तेन मानेन कृत्वा ।
पार्श्वद्वन्द्वे झषयुगयुगं सूत्रषट्कस्य पातं
कुर्यात् कुण्डं भवति तादिदं तर्ककोणं मनोज्ञम् ॥
दशांशेऽत्र विन्यस्य बाह्येंशमेकं
परिभ्राम्य तेनैव वृत्तं दलानाम् ।
बहिर्मध्यमे कर्णिकां चापि कुर्याद्-
भवेदष्टपत्रं बुधः पद्मकुण्डम् ॥
क्षेत्रे क्षिप्त्वाऽत्र बाह्ये दिशि दिशि मिहिरद्वन्द्वकांशेंशमेकं
कृत्वा नेत्राब्धिकोणं पुनरपि मतिमान् कोणतोऽर्धं गृहीत्वा।
तत्कोणाभ्यां विदध्यादिह खलु परितस्तेन मानेन चिह्ना-
न्यष्टास्रं स्यात् समन्तादपि च वितनुयादष्टसूत्रप्रयोगम् ॥
हयांशेऽत्र भागे बहिर्न्यस्य वृत्तं
परिभ्राम्य भूयो युगांशीकृतांशैः ।
त्रिभिः पट्टदीर्घं भवेत् पञ्चसूत्रं
प्रयोगादिदं तेन पञ्चास्रकुण्डम् ॥
क्षेत्रव्यासैर्दशांशैर्बहिरिह विनिधायैकमंशं सुवृत्तं
मानेनानेन कृत्वा पुनरपि च चतुःषष्टिभागीकृतेऽत्र ।
पट्टायामप्रमाणं दृढमतिरमुना सत्रिकैस्त्रिंशदंशैः
कुर्यात् सप्तास्रकुण्डं भवति हि तादिदं सप्तसूत्रप्रयोगात् ॥

अत्र चतुर्विंशत्यङ्गुलानि हस्तमात्रकुण्डस्य व्यासः ।
तदुक्तम् (शारदायाम्)

चतुर्विंशत्यङ्गुलाद्यं हस्तं यन्त्रविदो विदुः ।
कर्त्तुर्दक्षिणहस्तस्य मध्यमाङ्गुलिपर्वणः ॥
मध्यस्य दैर्घ्यमानेन मानाङ्गुलमुदाहृतम् ।

तन्त्रान्तरे ।

जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणज्ञास्त्रसरेणुं प्रचक्षते ॥
त्रसरेणवस्ते त्वष्टौ बालाग्रं तत् स्मृतं बुधैः ।
बालाग्राण्यष्ट लिक्षा तु यूका लिक्षाष्टकं स्मृतम् ॥
अष्टौ यूका यवं प्राहुरङ्गुलं तु यवाष्टकम् ।
हस्तश्चतुर्विंशतिभिरङ्गुलैः समुदाहृतम् ॥

द्विहस्तादौ तद्द्विगुणादिवृद्धिप्रकारस्तु एकहस्तकुण्डकोणसूत्रेण द्विहस्तकुण्डमध्यसूत्रमेवं तत्कोणसूत्रेण चतुर्हस्तकुण्डमध्यसूत्रमवगन्तव्यम्। एवमग्रेऽपि। तदुक्तम् (गौतमीयतन्त्रे)

कर्णसूत्रप्रमाणेन द्विहस्तं कुण्डमुद्धरेत् ।
सर्वकुण्डेषु सर्वत्र वर्धयेद्विधिनाऽमुना ॥

अत्र कर्णसूत्रपदं कोणसूत्रपरम् ।

तदुक्तं तत्रैव ।

पूर्वपूर्वस्य कुण्डस्य कोणसूत्रं तु यद्भवेत् ।
उत्तरोत्तरकुण्डानां मानं तद्वदुदीरितम् ॥

एतेन द्विहस्तकुण्डस्य चतुस्त्रिंशदङ्गुलानि व्यासः । एकचत्वारिंशदङ्गुलानि पञ्च यवाश्च त्रिहस्तस्य । अष्टचत्वारिंशदङ्गुलानि चतुर्हस्तस्य । त्रिपञ्चाशदङ्गुलानि षड्यवाश्च पञ्चहस्तस्य। अष्टपञ्चाशदङ्गुलानि सप्त यवाश्च षड्ढस्तस्य। त्रिषष्टिरङ्गुलानि चत्वारो यवाश्च सप्तहस्तस्य । सप्तषष्टिरङ्गुलानि सप्त यवाश्चाष्टहस्तस्य । द्वासप्ततिरङ्गुलानि नवहस्तस्य । पञ्चसप्ततिरङ्गुलानि सप्त यवाश्च दशहस्तस्य । एकहस्तकुण्डस्य क्षेत्रफलं तु षट्सप्तत्यधिकपञ्चशताङ्गुलानि। एवं द्विहस्तादावपि बोद्धव्यम् । यद्यपि हस्तमात्रकुण्डस्यैव दीक्षोपयुक्तत्वेन द्विहस्तादिकुण्डानि दीक्षायामनुपयुक्तानि तथा च वक्ष्यमाणपुरश्चरणाङ्गहोमे उपयुज्यन्त इति प्रदर्शितानि ।

खातमानं मेखलालक्षणं च (त्रिपुरासारसमुच्चये)

यावन्मानं कुण्डविस्तार उक्तं
तावत् खातस्यापि मानं प्रदिष्टम् ।
कुण्डाकारं पण्डितो यादृशं तत्
तादृग्रूपं मेखलायां विदध्यात् ॥

एतावत्कुण्डकरणाशक्तस्तु पञ्चकुण्डानि कुर्यात् । तत्राप्यशक्तस्तु एकमेव कुण्डं कुर्यात् ।

नव पञ्चाथ चैकं वा कर्त्तव्यं लक्षणान्वितम् ।

इत्याम्नायरहस्यवचनात् ।

अष्टाशक्तौ तु चत्वारि दिक्षु कुण्डानि तान्त्रिके ।
तदशक्तावेकमेव चतुरस्रं प्रकल्पयेत् ॥ इति (मेरुतन्त्रवचनाच्च)

पञ्चकुण्डपक्षे तन्निवेशनम् (ज्ञानरत्नावल्यामुक्तम्)

दिक्षु वेदास्रवृत्तानि पञ्चमं त्वीशगोचरम् ।

इत्येककुण्डपक्षे तन्निवेशनमुक्तमाचार्यैः ।

अथ वा दिशि कुण्डमुत्तरस्यां
प्रविदध्याच्चतुरस्रमेकमेव—इति ।

(पिङ्गलामते)

कुण्डमेककरं वृत्तं मेखलाकण्ठनाभिमत् ।
नित्ये कर्मणि दीक्षायां शान्तौ पुष्टौ मतं शुभम् ॥

कण्ठमानमाह (महाकपिलपञ्चरात्रे)

चतुर्विंशतिभागेन कण्ठो वै परिकीर्त्तितः ।
खाताद्बाह्येऽङ्गुलः कण्ठः सर्वकुण्डेष्वयं विधिः ॥
चतुर्विंशतिमं भागमङ्गुलं परिकल्पयेत् ।
तिस्रः कुण्डे मेखला मेखले द्वे
यद्वा चैकां मेखलां वै प्रकुर्यात् ।
कुर्यादूर्ध्वं मेखलाया गजोष्ठा-
कारां योनिं चापि होतुर्दिशीह ॥

एतेन योनेः कुण्डाङ्गत्वमुक्का तस्याः आनस्वरूपदिङ्नियमाश्चोक्ताः ।
(क्रियासारे)

नाभियोनिसमायुक्तं कुण्डं श्रेष्ठं त्रिमेखलम् ।
कुण्डं द्विमेखलं मध्ये नीचं स्यादेकमेखलम् ॥

(सोमशम्भौ)

त्रिमेखलं द्विजे कुण्डं क्षत्रियस्य द्विमेखलम् ।
मेखलैका तु वैश्यस्य .... इति ॥

कुण्डतारतम्यतो मेखलातारतम्यमुक्तम् ।
(त्रिपुरासारसमुच्चये)

मुष्टिमात्रे तु तां मेखलां द्व्यङ्गुलैका-
ङ्गुलार्धाङ्गुलोत्सेधताराः क्रमात् स्युः ।
रत्निमात्रे तु तास्त्र्यङ्गुलार्धाङ्गुलैका-
ङ्गुलोत्सेधतारा भवेयुः पुरस्तात् ॥
युगा*प्पित्तनेत्राङ्गुलोत्सेधताराः
स्युरेताः क्रमाद्धस्तमात्रे तु कुण्डे ।
करद्वन्द्वमात्रे रसाम्भोधिवह्न्य-
ङ्गुलोत्सेधतारा भवेयुः पुरस्तात् ॥
वेदकरेऽस्मिन् सिन्धुरतर्का
द्व्यङ्गुलतारोत्सेधयुताः स्युः ।
षट्करगात्रेऽस्मिन् दशकर्थ-
ङ्गाङ्गुलतारोत्सेधसमेताः ॥
भास्करपङ्क्तिगजाङ्गुलतारो-
त्सेधयुताः स्युरिमा वसुहस्ते ।
नाभिमिहाम्बुजमेव विदध्या-
दष्टदलं सहकर्णिकयाऽन्तः ॥

---

* अप्पित्तोऽग्निः ३ ।

नाभिमिति । कुण्डमध्ये सकर्णिकाष्टदलकमलरूपां नाभिं कुर्यादित्यर्थः ।

तत्रैव योन्यादेः कुण्डपरिमाणानुसारं परिमाणमुक्तम् ।

मुष्टिमात्रे रसाम्भोधिनेत्राङ्गुलायामतारोन्नतिर्योनिरुक्ता बुधैः ।
नेत्रवेदाङ्गुलोत्सेधतारान्विता नाभिरप्यत्र योन्योष्ठमेकाङ्गुलम् ॥

योन्या लक्षणमेतदुदितमरत्निमात्रकुण्डस्य ।
कुण्डस्यैव मयोक्तं तदेव खलु हस्तमात्रस्य ॥

द्विहस्तादिकुण्डेषु योन्यादिवृद्धिप्रकारस्तत्रैव ।

एकैकेनाङ्गुलेनामलनिशितमतिर्वर्धयेदन्यकुण्डे-
ष्वेनां योनिं च नाभिं खलु यवयुगलेनेह योन्यास्तथौष्ठम् ।
कुर्यान्नाभिं च वृत्ताकृतिमपि यदि वा कुण्डरूपान्यरूपां
योन्याकारेऽत्र योनिं सरसिजसदृशे नो विदध्याच्च नाभिम् ॥

कुर्यादित्यनेन नाभ्याकारविकल्प उक्तः। योन्याकार इति। योनिकुण्डे योनिं पद्मकुण्डे नाभिं न कुर्यादित्यर्थः ।

मतान्तरमाह तत्रैव ।

कुण्डस्यैके हस्तमात्रस्य योनिं
प्रादुर्भूतत्र्यङ्गुलायामताराम् ।
व्यासत्र्यंशैकांशकोत्सेधयुक्तां
कुर्याद्वेधिक्ष्माजपत्रानुरूपम् ॥

तत्पक्षे नाभिवृद्धिं तद्रचनाप्रकारं चाह ।

नेत्रभूताङ्गुलोत्सेधतारान्वितां
नाभिमंशद्वये तद्दलान्यष्ट च ।
व्यासवह्न्यंशतोंशेन तत्कर्णिकां
मध्यभागे विदध्याद्बुधः कुण्डतः ॥

नेमिपरिमाणमाह तत्रैव ।

कुण्डस्यैककरस्य चारु परितो नेमिर्भवेदङ्गुले-
नैकेनैव ततो विलोचनकरादारभ्य संवर्धयेत् ।

कुण्डे दिक्करकुण्डकावधि बुधः प्रत्येकमर्धाङ्गुलं
तद्बाह्ये खलु मेखलात्रितयकं कुर्याद्यथोक्तक्रमात् ॥

वैदिकमते तु नाभिकण्ठयोन्यो न कार्याः ।

ख्यातान्येतानि कुण्डानि तान्त्रिके स्मार्त्तकर्मणि ।
अनाभिकान्यकण्ठानि वियोनीति श्रुतेरिति ॥

इति मेरुतन्त्रवचनात् ।

नालमाह । (शारदापञ्चरात्रयोः)

स्थलादारभ्य नालं स्याद्योन्या मध्ये सरन्ध्रकम् ।
स्थूलमूलं तु सूक्ष्माग्रं वाह्यमेखलया समम्—इति ॥

(ज्ञानार्णवे)

मेखलानां बहिःस्थानं स्थलमित्यभिधीयते ।
चतुरस्रस्थलाल्लब्धं नालं मध्ये सरन्ध्रकम् ॥

आहुतितारतम्यतः कुण्डानां तारतम्यमुक्तम् ।

(त्रिपुरासारसमुच्चये)

शतार्धहोमे खलु मुष्टिमात्र-
मरत्निमात्रं शतहोमकुण्डम् ।
हस्तं सहस्रे त्वयुते द्विहस्तं
लक्षे चतुर्हस्तमिदं प्रदिष्टम् ॥
दशलक्षे रसहस्तं वसुहस्तं कोटिहोमे स्यात् ।
कोट्यर्धेष्वष्टकरं होमेऽष्टागमविदो ब्रुवते ॥

मतान्तरमाह ।

केचिद्धस्तं लक्षहोमे द्विहस्तं
लक्षद्वन्द्वे वह्निलक्षे त्रिहस्तम् ।
होमे कुण्डं वेदहस्तेऽब्धिलक्षं
प्राहुर्दोष्णां पञ्चकं पञ्चलक्षे ॥
रसहस्तं रसलक्षे सप्तकरं सप्तलक्षे स्यात् ।

वसुहस्तं वसुलक्षे नवलक्षे नवकरं कुण्डम् ॥
दशहस्तं दशलक्षे दशकरमेवेह कोटिहोमेऽपि ।
दशहस्तान्न हि कुण्डं परमस्ति महीतलेऽमुष्मिन् ॥

कुण्डानां पृथक् पृथक् फलं तत्रैव ।

सर्वसिद्धिकरमम्बुधिकोणं पुत्रदं मनसिजावसथान्तम् ।
अर्धचन्द्रसदृशं शुभदं स्यादग्निकोणमरिवर्धनहेतुः ॥
शान्तिकर्मणि भवेत् सुवर्त्तुलं छेदमारणकरं षडस्रकम् ।
पद्मकुण्डमिह वृष्टिकारणं रोगशान्तिकरमष्टकोणकम् ॥

वर्णभेदेन कुण्डभेदमाह ।

चतुरस्रं विप्राणां राज्ञामिह वर्त्तुलं कुण्डम् ।
वणिजामर्धशशाङ्काकारं त्र्यस्रं तु शूद्राणाम् ॥
चतुरस्र सर्वेषां प्रशस्तमिति केचिदाहुराचार्याः ।
वाञ्छितफलदं यत् तत् कुण्डं भुवि भुक्तिमुक्तिकरम् ॥
षट्कोणमर्धचन्द्राकारं चापि प्रजाकरं कुण्डम् ।
मुक्तिकरं पञ्चास्रं वसुकोणं राज्यदा योनिः ॥

तथा ।

नित्ये नैमित्तिके च प्रविरलमतयः प्राहुरेकेऽब्धिकोणं
कुण्डं हस्तप्रमाणं स्मरगृहसदृशं चाथ वृत्तं प्रशस्तम् ।
षट्कोणं चार्धदोषाकरसदृशयुतं स्थण्डिलं रत्निमात्रा-
यामं स्वाङ्गुष्ठपूर्वोन्नतमपि सुसमं निर्मितं वालुकाभिः ॥

(मेरुतन्त्रे)

अनेकदोषं वै कुण्डं मानं न्यूनाधिकं यदि ।
तस्मात् सम्यक् परीक्ष्येदं कर्त्तव्यं शुभमिच्छता ॥
खाताधिके भवेद्रोगी हीने धेनुधनक्षयः ।
वक्रकुण्डे तु सन्तापो मरणं छिन्नमेखले ॥

मेखलारहिते शोकोऽभ्यधिके वित्तसंशयः ।
भार्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतम् ॥
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्जितम् ।
शृङ्गाररहितं यच्च कुण्डं जर्जरमेखलम् ॥
यजमानविनाशाय प्रोच्चाटः स्फुटितो भवेत् ।
सूत्राधिके सुहृद्द्वेषः सूत्रहीने दरिद्रता ॥
अनाले जठरे रोगाश्छिन्नकुण्डे त्ववाच्यता ।

इति कुण्डलक्षणम् ।

चतुरस्रम् ।



योनिः ।



अर्धचन्द्रम् ।



त्र्यस्रम् ।



वृत्तम् ।



षडस्रम् ।



पद्मम् ।



अष्टास्रम् ।



पञ्चास्रम् ।



सप्तास्रम् ।



स्थण्डिललक्षणम् (शारदायाम्)

कुण्डमेकाविधं कष्टं स्थण्डिलं तु समाचरेत् ।
चतुरस्रं स्थण्डिलं तु प्रशस्तं सर्वकर्मसु ॥

(चन्द्रपीठे तु)

त्रिरस्रं* चतुरस्रं च वितस्त्युच्छ्रयसंमितम् ।
सिकताद्यैर्विधातव्यं स्थण्डिलं हस्तमात्रकम्—इत्युक्तम् ॥

अथ स्रुग्लक्षणम् (शारदायाम्)

प्रकल्पयेत् स्रुचं यागे वक्ष्यमाणेन वर्त्मना ।
श्रीपर्णीशिंशपाक्षीरशाखिष्वेकतमं गुरुः ॥
गृहीत्वा विभजेद्धस्तमात्रं षट्त्रिंशता पुनः ।
विंशत्यंशैर्भवेद्दण्डो वेदिस्तैरष्टभिर्भवेत् ॥
एकांशेन मितः कण्ठः सप्तभागमितं मुखम् ।
वेदीत्र्यंशेन विस्तारः कण्ठस्य परिकीर्त्तितः ॥
अग्रं कण्ठसमानं स्यान्मुखे मार्गं प्रकल्पयेत् ।
कनिष्ठाङ्गुलिमानेन सर्पिषो निर्गमाय च ॥
वेदिमध्ये विधातव्या भागेनैकेन कर्णिका ।
विदधीत बहिस्तस्या एकांशेनाभितोऽवटम् ॥
तस्य खातं त्रिभिर्भागैर्वृत्तमर्धांशतो बहिः ।
अंशेनैकेन परितो दलानि परिकल्पयेत् ॥
मेखलामुखवेद्योः स्यान्नेमिरर्धांशमानतः ।
दण्डशूलाग्रयोः कुम्भो गुणवेदाङ्गुलैः क्रमात् ॥
गण्डीयुगं यमांशैः स्याद्दण्डस्यानाह ईरितः ।
षड्भिरंशः पृष्ठभागो वेद्याः कूर्माकृतिर्भवेत् ॥

---

* त्र्यस्रमित्यत्र त्रिरस्रमिति पाठोऽनुचितः ।

हंसस्य हस्तिनो वाऽपि पोत्रिणो वा लिखेन्मुखम् ।
मुखस्य पृष्ठभागे तु संप्रोक्तं लक्षणं स्रुचः ॥

श्रीपर्णी गम्भारीति प्रसिद्धा । क्षीरशाखिनोऽश्वत्थोदुम्बरवटप्लक्षाः । हस्तमात्रमिति बाहुमात्रमित्यर्थः ।

स्रुचं बाहुप्रमाणेन होमार्थं विदधीत वै ।

इत्यगस्त्यसंहितावचनात् । गण्डी कलशः ।

(फेत्कारिणीतन्त्रे)

कारस्करेणामलकीपलाशखादिरैरपि ।
सुवर्णरूप्यताम्रैर्वा अयोभिरपि कारयेत् ॥

(वायवीसंहितायाम्)

स्रुक्स्रुवौ तैजसौ ग्राह्यौ न कांस्यायससैसकौ ।
यज्ञदारुमयौ वाऽपि तान्त्रिकौ शिल्पिसंमतौ ॥
पर्णौर्वा ब्रह्मवृक्षादेरच्छिद्रे मध्य उच्छ्रिते ।

अत्रायसे विधिनिषधौ क्रूरसौम्यविषयौ ।
तदुक्तं तन्त्रान्तरे ।

सौवर्णौ स्रुक्स्रुवौ स्यातां सौम्यकर्मणि सर्वतः ॥
भवेतामायसावेतौ स्तम्भनादिषु कर्मसु ।

(वसिष्ठसंहितायाम्)

पलाशपत्रे निश्छिद्रे रुचिरे स्रुक्स्रुवौ मतौ ।
विदध्याद्वाऽश्वत्थपत्रे संक्षिप्ते होमकर्मणि ॥

(मन्त्रमुक्तावल्याम्)

कण्ठाधः कारयेन्मार्गे विद्वानाज्यस्य दुर्गमे ।
वेधं च मुखतः कुर्यात् तप्तलोहशलाकया ॥

अथ स्रुवलक्षणम् (शारदायाम्)

स्रुचश्चतुर्विंशतिभिर्भागैरारचयेद्ध्रुवम् ।
द्वाविंशत्या दण्डमानमंशैरेतस्य कीर्त्तितम् ॥
चतुर्भिरंशैरानाहः कर्षाज्यग्राहितच्छिरः ।

अंशद्वयेन निखनेत् पङ्क्तैर्मृगपदाकृतिः ॥
दण्डमूलाग्रयोर्गण्डी भवेत् कङ्कणाभूषिता ।
स्त्रुवस्य विधिराख्यात .... इति ॥

अथाङ्कुरार्पणम् (शारदायाम्)

प्रागेव दीक्षादिवसात् सप्तभिर्विधिवद्दिनैः ।
सर्वमङ्गलसंपत्त्यै विदध्यादङ्कुरार्पणम् ॥

(सिद्धान्तशेखरे)

प्रतिष्ठायां च दीक्षायां स्नापने चोत्सवे तथा ।
संप्रोक्षणे च शान्त्यर्थं विवाहे मौञ्जिबन्धने ॥
सर्वमङ्गलकार्येषु विदध्यादङ्कुरार्पणम् ।

(मेरुतन्त्रे)

सप्तभिर्नवभिर्वाऽपि दिनैर्दीक्षादिनात् पुरा ।
बीजारोपणकर्मेदं कर्त्तव्यं सर्वकामदम् ॥
मण्डपोत्तरदिग्भागे सुसंवृत्तपरं परे ।
भवने मण्डलं कुर्याद्‌दाक्ष्यां प्राग्वरुणायते ॥
याम्योदीच्यायते वामदीक्षायां संप्रशस्यते ।

भवन इति मण्डपान्तरे तच्च दक्षिणैकद्वारयुक्तं ज्ञेयम् ।

तथा ।

गोमयेनोपलिप्तायां भूमौ दक्षेऽथ वामके ।
सतैलतण्डुलेनैव सतैलविजयाद्रवैः ॥
तत्र रेखाः पञ्चकरदीर्घाकारास्तु पञ्च च ।
वितस्त्यन्तरतो रुद्ररेखाः कार्यास्तथाऽऽयताः ॥
चत्वारिंशत्कोष्ठकाः स्युश्चतुर्विंशतिकोष्ठकैः ।
बाह्यगैस्तत्र वीथी स्यात् पूरयेद्रक्तचूर्णकैः ॥

पश्चात् कोष्ठचतुष्कं यद्ब्रह्मस्थानं तदीरितम् ।
आग्नेयकोष्ठमारभ्य ईशानान्तं प्रपूरयेत् ॥
पीतरक्तश्वेतकृष्णरजोभिः श्रेष्ठमार्गतः ।
कोष्ठद्वयं ततो वीथी रक्तेनैव प्रपूरयेत् ॥
विष्णुस्थानं तदग्रे तु ज्ञेयं कोष्ठचतुष्टयम् ।
प्राग्वद्रजोभिरापूर्य तदग्रेऽपि च वीथिका ॥
प्राक्स्थं कोष्ठचतुष्कं च रुद्रस्थानं तदीरितम् ।
तत्पूर्वं पूर्ववद्रक्तैरारक्तैः सर्वरेखिकाः ॥
विस्तारोन्नतिदैर्घ्येण हस्तमात्रास्तु पालिकाः ।
कार्या डमरुकाकाराश्चतस्रो विष्णुदेवताः ॥
दूर्वाम्रपल्लवाश्वत्थदलोपेताश्च वेष्टिताः ।
सूत्रेण विष्णुस्थानस्य चतुष्कोष्ठे निवेशयेत् ॥
वैरिञ्च्यः पञ्चमुख्यस्ताः कोष्ठजाः षोडशाङ्गुलैः ।
आयामोच्छ्रायदैर्घ्याद्यैर्युक्ताः पश्चान्निवेशयेत् ॥
ब्रह्मस्थाने पल्लवादिसूत्रैः प्राग्वच्च योजिताः ।
शैवाः शरावाश्चत्वारो भान्वङ्गुलसमुच्छ्रयाः ॥
प्रक्षाल्य सूत्रैः संवेष्ट्य प्राग्वदग्न्यादिषु न्यसेत् ।
शालिपुञ्जेषु गन्धादिदर्भकूर्चयुगेषु च ॥

डमरुकाकृतयोऽतिगम्भीराः शरावा एव पालिकाः । मुखपञ्चकयुक्तास्तादृशा एव पात्रविशेषाः पञ्चमुख्यः ।

तदुक्तं तन्त्रान्तरे ।

दिक्षु चत्वारि वक्त्राणि मुखमेकं तदूर्ध्वगम्—इति ।
(मेरौ)

पूरयेत् तानि पात्राणि वालुकामृत्करीषकैः ।

करीषं शुष्कगोमयम् ।

मृत्तिकाहरणे विशेष उक्तः (सिद्धान्तशेखरे)

गन्धादिभिश्च कुद्दालं पूजयित्वा दिनान्तरे ।
गीतनृत्यसमायुक्तं गजवाजिसमन्वितम् ॥
गुर्वादयो रथारूढा गजारूढास्तथाऽपरे ।
गत्वा तीरं तडागस्य नद्याः पुष्पवनस्य वा ॥
तत्र शुद्धं भुवो भागं दर्भैः संमृज्य चास्त्रतः ।
अभ्युक्ष्य चार्घतोयेन तत्तन्मन्त्रमनुस्मरेत् ॥
हृदा भूमिं समावाह्य गन्धपुष्पैः समर्चयेत् ।
कुद्दालीमस्त्रमन्त्रेण खात्वा भूमिमथो मृदम् ॥
गृहीत्वा वामदेवेन पूरयेत् कांस्यपात्रके ।
हृदा मृदं च संपूज्य वस्त्रेणाच्छाद्य धारयेत् ॥
पुरं वा निलयं वापि सर्वमङ्गलनिःस्वनैः ।
गुरुप्रदक्षिणं कृत्वा मण्डपं त्वानयेत् ततः ॥
एतत् कर्म दिवाकाले कुर्याद्रात्रौ न बुद्धिमान् ।

एतत् कर्मेति मृत्तिकाहरणकर्मेत्यर्थः ।
बीजारोपणं तु रात्रावेव ।

कुजानामधिपः सोमस्तस्माद्रात्रौ तु निर्वपेत् ।

इति तत्रत्यादेव वचनात् ।
तथा ।

शङ्खस्वनेन नादैश्च पञ्चभिर्ब्राह्मणाशिषा ।
ततः स्वर्णादिके पात्रे दश बीजानि वापयेत् ॥
वं बीजं प्रजपेन्मन्त्री दुग्धेन क्षालयेत् ततः ॥
मूलमन्त्राभिजप्तानि .... इति शारदायाम् ।

तथा ।

तानि प्रियङ्गुश्यामाकतिलसर्षपशालयः ।
मुद्गाऽऽढकी सुनिष्पावा खल्वा माषाः प्रकीर्त्तिताः ॥

श्यामाका भाषया सामा इति प्रसिद्धा। आढकी भाषया रहर इति प्रसिद्धा।
निष्पावः सिम्बिः। खल्वाः कुलित्थाः।

तथा।

ब्रह्मपात्रे तु विकिरेत् प्रथमं वैष्णवे ततः।
ततः शैवे पञ्चवाद्यब्रह्मघोषपुरस्सरम् ॥
हरिद्रादैश्च संसिच्य वस्त्रैराच्छादयेत् ततः।
संध्ययोरुभयोरर्ध*रात्रौ चापि बलिं हरेत् ॥
गुरूपदिष्टमार्गेण सम्यक् पात्रत्रयाग्रतः।
नवाहं तु वलिं दद्यात् तत्तदुद्दिश्य दैवतम् ॥
शाल्योदनं तिला लाजाः सक्तवः प्रथमे दिने।
हरिद्राचूर्णसंयुक्तो भूतेभ्योऽयं वलिर्मतः ॥
एवं द्वितियदिवसे पितृभ्यास्तिलतण्डुलैः।
तृतीये सक्तवो लाजा यक्षेभ्यो दधिसंयुताः ॥
नागेभ्यः सक्तवस्तुर्ये नारिकेलजलप्लुताः।
दद्यात् पद्माक्षतवलिं पञ्चमे ब्रह्मणे मुदा ॥
षष्ठे शिवाय वाऽपूपयुक्तं भक्तं प्रशस्यते।
गुडोदकं सप्तमेऽह्नि विष्णवे विनिवेदयेत् ॥
विष्णोरेवाष्टमदिने दुग्धोदनवलिः स्मृतः।
कृसरान्नं तु नवमे विष्णोरेव प्रशस्यते ॥

वाममार्गे तु विशेष उक्तस्तत्रव।

वाममार्गे चतुर्दिक्तु मण्डलस्य वलिं हरेत् ॥
ब्रह्मस्थाने तु वेतालो मेषस्तस्य बलिः पुरः।
विष्णुस्थाने भैरवी स्यादजस्तस्य बलिर्मतः ॥
भैरवस्तु शिवस्थाने महिषं वलिमिच्छति।

---

* रूर्ध्वरात्राविति २ पुस्तके पाठः।

गौडी माध्वी च पैष्टी च सुरास्तत्र क्रमान्मताः ॥
मत्स्यमांसं मद्ययुक्तं भूतेभ्यो बलिरिष्यते ।
पितृभ्यः सासवपलं यक्षेभ्यः कुक्कुटो मधु ॥
भेकोन्दुरुबलिर्नागे वाममार्गे बलिस्त्वयम् ।

(सिद्धान्तशेखरे)

सोमं संपूजयेन्नित्यमधिवासदिनावधि ।
अधिवासदिने प्राप्ते सोममुद्वासयेद्गुरुः ॥

(सारस्वतमते)

प्ररूढाण्यङ्कुराण्यन्यो न वीक्षेत कदा चन ।
आचार्य एव प्रविशेत् तच्छिष्यो वा तदाज्ञया ॥

(मेरुतन्त्रे)

एवं गतेषु नवसु दिवसेषु विलोकयेत् ।
सम्यक् कस्योद्गमो जातः किं नष्टं मध्यमं च किम् ॥
सम्यगभ्युद्गते सिद्धिः कुण्ठिते विघ्नमाप्नुयात् ।
कीटभुक्तेऽत्यल्पफलं शटिते सर्वनाशनम् ॥
सिद्धिः प्रियङ्गुभिर्ज्ञेया श्यामाकैः स्त्रीसुखं भवेत् ।
तिलैः पूज्यजनोल्लासः सर्षपैर्नाभिचारकः ॥
शालिभिः सर्वमान्यत्वं मुद्गैर्देवकृपा भवेत् ।
चतुष्पादास्तथाऽऽढक्या निष्पावात् क्षेत्रमन्दिरे ॥
खल्वैः सत्कर्मसिद्धिश्च माषैः शान्तिररेर्भवेत् ।
सर्वैः समुद्गतैर्वामे सिद्धिः पातस्ततोऽन्यथा ॥

(सिद्धान्तसार)

अङ्कुरेऽनुद्गते नष्टे शान्तिहोमं समाचरेत् ।
मूलमन्त्रेण जुहुयादघोरास्त्रेण वा शतम् ॥

इत्यङ्कुरार्पणविधिः ।

विभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत-
स्रोतःशालिनि सन्निबन्धनसरित्सम्भेदमभ्यर्हितम् ॥
सद्युक्तिस्फुटमौक्तिकोत्करचमत्कारे द्वितीयस्तर-
ङ्गोऽयं श्रीनरदेवनिर्मितपुरश्चर्यार्णवेऽस्मिन्नगात् ॥

इति श्रीमन्महाराजाधिराजश्रीप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे दीक्षाकालदेशवास्तुयागकुण्डमण्डपादिनिर्णयपूर्वकमङ्कुरार्पणविधानं नाम द्वितीयस्तरङ्गः ॥

अथ तरङ्गद्वये क्रियावतीदीक्षा निरूप्यते ।

(शारदायाम्)

चतुर्विधा सा संदिष्टा क्रियावत्यादिभेदतः ।
क्रियावती[1]वर्णमयी[2]कलात्मा[3]वेधमय्यपि[4] ॥
ताः क्रमेणैव कथ्यन्ते तन्त्रेऽस्मिन् संपदावहाः ।

(मेरुतन्त्रे)

शृणु देवि प्रवक्ष्यामि सर्वतन्त्रेषु गोपितम् ।
दीक्षाविधिं पञ्चविधं तद्राज्ञामुत्तमोत्तमम् ॥
उत्तमं महदाढ्यानां सामान्यानां तु मध्यमम् ।
ब्राह्मणानामल्पमुक्तं यतीनामपि चाल्पकम् ॥
तस्मादादौ प्रवक्ष्यामि तुल्यं यच्चोत्तमोत्तमम् ।
यस्मिन् ज्ञाते चोत्तमादिभेदानां विषयो भवेत् ॥

(प्रकटयोगिनी)

आदौ तु भक्तिमान् शिष्यो निजदेहस्य शुद्धये ।
तीर्थे स्नात्वा सहस्रं तु गायत्रीं प्रजपन्नयेत् ॥
एकभक्तोपवासादिव्रतेन दिवसद्वयम् ।
अधिवासस्तृतीयेऽह्नि दीक्षां तुर्येऽह्नि चाचरेत् ॥
असंस्कृतेन देहेन सद्यो दीक्षां न चाचरेत् ।

पिङ्गलामतमन्त्रतन्त्रप्रकाशयोस्तु ।

सद्योऽधिवासमथवा प्रकुर्वीत यथाविधि ।
दिनद्वयेनैव कुर्याद्दीक्षाकर्मविचक्षणः ॥
मद्योऽधिवासनं वा स्यादेकस्मिन् दिवसे यदि—इत्युक्तम् ॥

(मेरुतन्त्रे)

दीक्षादीनात् पूर्वदिने प्रातःकृत्यं निवर्त्य च ।
समलंकृत्य देहं स्वं स्वगेहे पूजनं चरेत् ॥

गणेशस्य विधानेन पुण्याहं वाचयेत् ततः ।
नान्दीमुखाँस्तर्पयित्वा पञ्चवाद्यपुरस्सरम् ॥
यथोक्तक्तः संभारो गच्छेद्गुरुगृहं प्रति ।

पञ्चविधवाद्यमुक्तम् (सङ्गीतशास्त्रे)

ततं शुषिरमानद्धमयःसारो घनस्तथा ।
वाद्यमेतत् पञ्चविधं देवदेवस्य ताण्डवे ॥

ततं वीणादि । शुषिरं वंशीशङ्खादि । आनद्धं डिण्डिममृदङ्गादि । अयस्सारो घण्टादि ।

(मेरुतन्त्रे)

आचार्य ऋत्विग्वरणसंभारो दशधा मतः ।
श्रीपर्णीवृत्तपीठानि हस्तमानानि मानतः ॥
अष्टाङ्गुलसमुच्छ्रायसहितानि समानि च ।
सप्तविंशतिदर्भाणां वेण्यग्रे ग्रन्थिभूषितः ॥
विष्टरः सर्वयज्ञेषु लक्षणं परिकीर्त्तितम् ।
सुखोष्णोदकसंभूताः पाद्यार्थे ताम्रगण्डकाः ॥
शङ्खा अर्घप्रदानाय गन्धपुष्पजलान्विताः ।
सुताम्रस्य कमण्डल्व आचम्योदकपूरिताः ॥
ते युता मधुपर्कार्थे कांस्या दध्यादिपूरिताः ।
महदर्घ्याणि वस्त्राणि मुद्रिकाद्यं सुभूषणम् ॥
मयूरपत्रच्छत्राणि सोष्णीषाणि समाहरेत् ।
पादुकाश्चाहरेत् तत्र चर्माभरणभूषिताः ॥
कृत्वैतत् फलमाप्नोति महायज्ञार्हणोपमम् ।
अन्येभ्यो मधुपर्कस्य विप्रेभ्यः पूजनं स्मृतम् ॥
भक्त्या तद्द्विगुणं दद्यादाचार्याय सुभक्तिमान् ।
अन्यैर्द्विजैः समं यत्र दैशिकस्य प्रपूजनम् ॥

तस्मिन् यज्ञे फलं स्वल्पमनावृष्ट्या यथा क्षितौ ।
एवं गुरुगृहं गत्वा प्रणम्य गुरुपादुकाम् ॥
दत्वा वरणसामग्रीं संकल्प्य वृणुयाद्गुरुम् ।
उच्चार्यामुकमन्त्रस्य ग्रहणाय द्विजोत्तम ॥
गुरुत्वेनेति संभाष्य त्वामहं च ततो वृणे ।
इत्युक्त्वा वृणुयाच्छिष्यो वृतोऽस्मीति ततो गुरुः ॥
यथोचितं गुरो कर्म कुरुष्वेति वदेच्छिशुः ।
करवाणीति चाचार्यो गुरोरेवाज्ञया ततः ॥
ब्राह्मणान् वृणुयादष्टौ वेदवेदाङ्गपारगान् ।
तद्देवतोपासकांश्च ऋत्विक्त्वेनाथवा यदा ॥
चत्वारि कुण्डानि तदा चत्वार ऋत्विजः स्मृताः ।
ततः शिष्येण सहितो यायाद्यागगृहं गुरुः ॥
उपविश्य च तद्द्वारे परीक्षामारभेत् ततः ।
शिष्याय मूलसंजप्तं प्रदद्याद्दन्तधावनम् ॥
दन्तान् विशोध्य परतः स्थण्डिले हस्तमात्रके ।
चतुरस्रे पातयेत् तत् परीक्षेत गुरुस्ततः ॥
तदग्रं यद्दिशासंस्थं तत्रेदं पूर्वतः फलम् ।
भूतिर्हृदयसंतापो बन्धुनाशस्तथा मृतिः ॥
शोकश्च व्यग्रता सौख्यं ज्ञानं लाभः क्रमात् फलम् ।
अमङ्गलस्थानपाते प्रायश्चित्तं समाचरेत् ॥
अष्टाधिकसहस्रं वा शतं विंशतिरेव वा ।
अस्त्रसंपुटितैनैषां नाम्ना स्वाहान्वितेन च ॥
दोषान् जहि जहीत्येवं पदं नामावसानकम् ।
केवलाज्येन जुहुयाद्दुःस्वप्नेऽप्येवमेव हि ॥

दन्तकाष्ठं पुनर्देयं पुनर्दुष्टे चतुर्गुणम् ।
तृतीयमपि दुष्टं चेन्न ग्राह्या सा तु देवता ॥
वाममार्गे सकृदपि गुरुशिष्यौ विनाशयेत् ।

(सिद्धान्तसंग्रहे) गुरुमुपक्रम्य ।

यज्ञवाटं परिक्रम्य प्रक्ष्याल्य चरणौ करौ ।
आचान्तो द्वारदेशस्थो गुरुर्देवं च दिक्पतिम् ॥
नत्वा पापापनोदार्थं मन्त्रद्वयमुदीरयेत् ।
हे देव प्राकृतं चित्तं पापाक्रान्तमिदं मम ॥
तन्निःसारय चित्तान्मे पापं फट्फट् च ते नमः ।
सूर्यः सोमो यमः कालो महाभूतानि पञ्च च ॥
एते शुभाशुभस्येह कर्मणो नव साक्षिणः ।
हुँफट् इति ब्रुवन् क्रोधदृष्ट्या पश्येच्च पार्श्वयोः ॥
एवं कृते महापापं यत् तद्दूरेऽवतिष्ठते ।
तत्क्षणादेव नश्यन्ति पापान्यन्यानि मन्त्रिणः ॥
पूजने त्यक्तपापस्य काममिष्टं क्षणाद्भवेत् ।
तत आचमनं कृत्वा सामान्यार्घं प्रकल्पयेत् ॥

सामान्यार्घस्थापनविधिः (गौतमीये)

त्रिकोणवृत्तभूविम्बं मण्डलं रचयते ततः ।
आधारशक्तिं संपूज्य तत्राधारं विनिःक्षिपेत् ॥
अस्त्रेण पात्रं संशोध्य हन्मन्त्रेण प्रपूरयेत् ।
निःक्षिपेत् तीर्थमावाह्य गन्धादीन् प्रणवेन तु ॥
दर्शयेद्धेनुमुद्रां वै सामान्यार्घमिदं स्मृतम् ।
मन्त्रयेत् प्रणवेनवै .... इति च ॥

(मेरुतन्त्रे)

अर्घोदकेन संप्रोक्ष्य द्वारपूजां समाचरेत् ।

द्वारपूजाविधिस्तत्रैव ।

द्वारमर्घाम्बुना प्रोक्ष्य तन्मध्ये विघ्नपं यजेत् ।
तद्दक्षिणे महालक्ष्मीं वामे चापि सरस्वतीम् ॥
द्वारे श्रियं च तन्मध्ये शाखयोर्दक्षिणान्ययोः ।
ऊर्ध्वभागात् तलं यावत् पञ्चपञ्चविभागके ॥
नाम्नश्चाद्यक्षरं विन्दुयुक्तं नाम च ङेऽन्तकम् ।
समुच्चार्य हृदन्तं च देवानेतान् प्रपूजयेत् ॥
गणपतिं क्षेत्रपालं ततश्च वसुधारया ।
युक्तं शङ्खनिधिं दक्षे वामे वसुमतीयुतम् ॥
पूजयित्वा पद्मनिधिं तदधो दक्षवामतः ।
मायाशक्तिं च चिच्छक्तिं गङ्गां च यमुनां तथा ॥
धातारं च विधातारं दं देहल्यै नमस्त्वधः ।
आदौ तु पश्चिमद्वारे पूजा चेयं प्रकाशिता ॥
नदी चापि महाकालो द्वारयोर्दक्षवामयोः ।
पूज्यावेवमुदग्द्वारं प्राग्याम्यं च प्रपूजयेत् ॥
द्वारपालौ क्रमात् तेषु गणेशवृषभावपि ।
भृङ्गिरीटस्तथा स्कन्द उमाचण्डेश्वरौ तथा ॥
विष्णोर्नन्दः सुनन्दश्च चण्डश्चापि प्रचण्डकः ।
बलश्च प्रबलश्चैव भद्रश्चापि सुभद्रकः ॥
वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ ।
लम्बोदरश्च विकटो गणेशद्वारपालकाः ॥
विघ्नराजो धूम्रवर्णः क्रमात् पश्चिमद्वारतः ।

V

देव्याः सूर्यस्य योगिन्योऽष्टावेता द्वारपालकाः ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा च श्रिया सह ॥

तथा ।

ततश्च देशिको विद्वान् दिव्यानालोकनेन च ।
अन्तरिक्षगतानस्त्रोदकैरुत्सादयेत् क्रमात् ॥
पार्थिवान् पार्ष्णिघातैश्च त्रिभिरुत्सार्य यत्नतः ।
अङ्गं संकोच्य किं चित् तु शाखां वामगतां स्पृशन् ॥
उत्सारितानां विघ्नानां ददद्वर्म तु दक्षिणे ।
पादेन दक्षिणेनाथ प्रविशेद्यागमण्डपम् ॥
वाममार्गेऽथ वा शाक्ते वामपादपुरस्सरम् ।
ब्रह्माणं वास्त्वधीशं च नैर्ऋत्यां दिशि पूजयेत् ॥

(श्यामारहस्य) धृतवचनानि ।

पञ्चशुद्धिं विना पूजा अभिचाराय कल्पते ।
आत्मशुद्धिः स्थानशुद्धिर्मन्त्रस्य शोधनं तथा ॥
द्रव्यशुद्धिर्देवशुद्धिः शुद्धिः पञ्चविधेरिता ।
सस्नानभूतसंशुद्धिप्राणायामादिभिः प्रिये ॥
षडङ्गाद्यखिलन्यासैरात्मशुद्धिरितीरिता ।

(मेरुतन्त्रे)

पञ्चगव्यार्घतोयाभ्यां प्रोक्षयेन्मण्डपान्तरम् ।
संमार्जनोपलेपाद्यैर्दर्पणोदरवत्कृतम् ॥
विमलैर्धूपदीपादिपुष्पदामादिशोभितम् ।
पञ्चवर्ण*मयं चित्रं स्थानशुद्धिरियं मता ॥

---

* रजश्चित्रम् इति २ पु. पा.

गृहीत्वा मातृकावर्णान् मूलमन्त्राक्षराणि च ।
क्रमात् क्रमाद्द्विरावृत्तिर्मन्त्रशुद्धिरियं मता ॥
पूजाद्रव्यादि संप्रोक्ष्य मूलास्त्राभ्यां विधानतः ।
दर्शयेद्धेनुमुद्रां च द्रव्यशुद्धिरियं मता ॥
पीठे देवीं प्रतिष्ठाप्य सकलीकृत्य मन्त्रवित् ।
मूलमन्त्रेण दीप्तात्मा अभिभाव्योदकेन च ॥
त्रिवारं प्रोक्षयेद्विद्वान् देवशुद्धिरितीरिता ।
पञ्चशुद्धिं विधायेत्थं पश्चाद्यजनमाचरेत् ॥
पञ्चशुद्धिविहीनेन यत्कृतं न च तत्कृतम् ।

तत्रैव ।

अर्घ्याम्बुना च गव्येन यागस्थाने सुषिञ्चेत ।

गव्येनेति पञ्चगव्येन ।

तदुक्तम् (गौतमीये)

पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते ।
घृतं च पलमात्रं स्याद्गोमयं तोलकद्वयम् ॥
दधि प्रसृतिमात्रं स्यात् पञ्चगव्यमिदं स्मृतम् ।
अथ वा पञ्चगव्यानां समानो भाग इष्यते ॥
मूलमन्त्रेण संमन्त्र्य कुशाग्रेण च शोधयेत् ।
तेन सर्वविशुद्धिः स्यात् सर्वपापनिकृन्तनम् ॥

(स्मृतिशास्त्रे)

गायत्र्याऽऽदाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राब्णोति वै दधि ॥
तेजोऽसीति घृतं चैव देवस्य त्वा कुशोदकम् ।
मन्त्राद्यपरिज्ञाने तु प्रणवेनैव शोधयेत् ॥

(मेरुतन्त्रे)

वीक्षणाद्यैस्ततः शुद्धिं चतुर्द्वारां समाचरेत् ।
संवीक्ष्य मूलमनुना ह्यस्त्रेण प्रोक्षयेत् ततः ॥
कुर्यात् ताडनमस्त्रेण कवचेनावसेचयेत् ।
श्रीखण्डागुरु*चन्द्रैश्च धूपितेऽस्त्रेण सप्तधा ॥
जप्ताँश्चन्दनसिद्धार्थदूर्वाभस्माक्षतान् कुशान् ।
सलाजान् विकिरेन्मन्त्री प्रत्यूहघ्नान् हि मण्डपे ॥

तन्त्रान्तरे ।

आदौ विघ्नं समुत्सार्य पश्चादासनकल्पनम् ।
अथ वा चासने स्थित्वा विघ्नानुत्सारयेत् सुधीः ॥

(शारदायाम्)

लाजाचन्दनसिद्धार्थभस्मदूर्वाकुशाक्षताः ।
विकिरा इति निर्दिष्टाः सर्वविघ्नौघनाशकाः ॥

विघ्नोत्सारणमन्त्रो (मेरुतन्त्रे)

नाराचमुद्रया सम्यगस्त्रमन्त्रेण देशिकः ।
अपक्रामन्तु भुतानि पिशाचाः प्रेतगुह्यकाः ॥
ये चात्र निवसन्त्यन्ये देवता भुवि संस्थिताः ।
अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ॥
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ।
श्लोकयोरन्ततश्चास्त्रं पठन् नाराचमुद्रया ॥
क्षिप्त्वा तान्मण्डपस्य .... इति ।

तत्रैव ।

मार्जयेदस्त्रमन्त्रेण तान् मन्त्री दर्भमुष्टिना ।
आसनाय तु वर्द्धन्या ईशाने स्थापयेच्च ताम् ॥
पुण्याहं वाचयित्वा च विप्रान् संतोष्य यत्नतः ।

---

* चन्द्रः कर्पूरः ।

वेदिकायां लिखेत् पश्चात् सर्वतोभद्रमण्डलम् ॥

सर्वतोभद्रमण्डलमुक्तम् (शारदायाम्)

चतुरस्रे चतुष्कोष्ठे कर्णसूत्रसमन्विते ।
चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयम् ॥
मध्ये मध्ये यथा मत्स्या भवेयुः पातयेत् तथा ।
पूर्वापरायते द्वे द्वे मन्त्री याम्योत्तरायते ॥
पातयेत् तेषु मत्स्येषु समं सूत्रचतुष्टयम् ।
पूर्ववत्कोणकोष्ठेषु कर्णसूत्राणि पातयेत् ॥
तदुद्भूतेषु मत्स्येषु दद्यात् सूत्रचतुष्टयम् ।
ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पातयेत् ॥
षट्त्रिंशता पदैर्मध्ये लिखेत् पद्मं सुलक्षणम् ।
बहिः पङ्क्त्या भवेत् पीठं पङ्क्तियुग्मेन वीथिकाः ॥
द्वारशोभोपशोभास्ताः शिष्टाभ्यां परिकल्पयेत् ।
शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत् ॥
पद्मक्षेत्रस्य संत्यज्य द्वादशांशं बहिः सुधीः ।
तन्मध्यं विभजेद्वृत्तैस्त्रिभिः समविभागतः ॥
आद्यं स्यात् कर्णिकास्थानं केशराणां द्वितीयकम् ।
तृतीयं तत्र पत्राणामुक्तांशेन दलाग्रकम् ॥
बाह्यवृत्तान्तरालस्य मानं यद्विधिना सुधीः ।
निधाय केशराग्रेषु परितोऽर्धनिशाकरान् ॥
लिखित्वा सन्धिसंस्थानि तत्र सूत्राणि पातयेत् ।
दलाग्राणां च यन्मानं तन्मानं वृत्तमालिखेत् ॥
तदन्तराले तन्मध्ये सूत्रस्योभयतः सुधीः ।
आलिखेद्बाह्यहस्तेन दलाग्रेण समन्ततः ॥

दलमूलेषु युगशः केशराणि प्रकल्पयेत् ।
एतत् साधारणं प्रोक्तं पङ्कजं तन्त्रवेदिभिः ॥
पदानि त्रीणि पादार्थं पीठकोणेषु मार्जयेत् ।
अवशिष्टैः पदैर्विद्वान् पीठगात्राणि कल्पयेत् ॥
पदानि वीथिसंस्थानि मार्जयेत् पङ्क्त्यभेदतः ।
दिक्षु द्वाराणि रचयेद्द्विचतुष्कोष्ठकैस्ततः ॥
पदैस्त्रिभिरथैकेन शोभाः स्युर्द्वारपार्श्वयोः ।
उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनन्तरम् ॥
अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयम् ।
रञ्जयेत् पञ्चभिर्वर्णैर्मण्डलं तन्मनोहरम् ॥
पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसंभवम् ।
कुसुम्भचूर्णमरुणं कृष्णं *दग्धपुलाकजम् ॥
बिल्वादिपत्रजं श्याममित्युक्तं वर्णपञ्चकम् ।
अङ्गुलोत्सेधविस्ताराः सीमारेखाः सिताः शुभाः ॥
कर्णिका पीतवर्णेन केशराण्यरुणेन च ।
शुभ्रवर्णेन पत्राणि तत्सन्धीन् श्यामलेन च ॥
रजसा रञ्जयेन्मन्त्री यद्वा पीतैव कर्णिका ।
केशराः पीतरक्ताः स्युररुणानि दलान्यपि ॥
सन्धयः कृष्णवर्णाः स्युः पीतेनाप्यसितेन वा ।
रञ्जयेत् पीठगर्भाणि पादाः स्युररुणप्रभाः ॥
गात्राणि तस्य शुक्लानि वीथीषु चतसृष्वपि ।
आलिखेत् कल्पलतिका दलपुष्पफलान्विताः ॥

---

* पुलाकजं तुच्छधान्यजमिति ।

वर्णैर्नानाविधैश्चित्राः शोभा रक्ताः समीरिताः ।
उपशोभाः पीतवर्णाः कोणान्यसितभानि च ॥
तिस्रो रेखा बहिः कुर्यात् सितरक्तासिताः क्रमात् ।
मण्डलं सर्वतोभद्रमेतत् साधारणं स्मृतम् ॥
चतुरस्रां भुवं भित्त्वा दिग्भ्यो द्वादशधा सुधीः ।
पातयेत् तत्र सूत्राणि कोष्ठानां दृश्यते शतम् ॥
चतुश्चत्वारिंशदाढ्यं पश्चात् षट्त्रिंशताऽम्बुजम् ।
कोष्ठैः प्रकल्पयेत् पीठं पङ्क्त्या नैवात्र वीथिका ॥
द्वारशोभे यथापूर्वमुपशोभा न दृश्यते ।
अवशिष्टैः पदैः कुर्यात् षड्भिः कोणानि तन्त्रवित् ॥
विदध्यात् पूर्ववच्छेषमेवं वा मण्डलं स्मृतम् ।
चतुरस्रे चतुःषष्टिपदान्यारचयेत् सुधीः ॥
पद्मैश्चतुर्भिः पद्मं स्यान्मध्ये तत्परितः पुनः ।
वीथीश्चतस्रः कुर्वीत मण्डलान्तावसानिकाः ॥
दिग्गतेषु चतुष्केषु पङ्कजानि समालिखेत् ।
विदिग्गतचतुष्काणि भित्त्वा षोडशधा सुधीः ॥
मार्जयेत् स्वस्तिकाकारं श्वेतपीतारुणासितैः ।
रजोभिः पूरयेत् तानि स्वस्तिकानि शिवादितः ॥
प्राक्प्रोक्तेनैव मार्गेण शेषमन्यत् समाचरेत् ।
नवनाभमिदं प्रोक्तं मण्डलं सर्वसिद्धिदम् ॥
पञ्चाब्जं मण्डलं प्रोक्तमेतत् स्वस्तिकवर्जितम् ।
दीक्षायां देवपूजार्थं मण्डलानां चतुष्टयम् ॥
सर्वतन्त्रानुसारेण प्रोक्तं सर्वसमृद्धिदम् ।

(यामले)

आरक्तवर्णं तद्वर्णां शक्तिद्वादशसंयुतम् ।
संपूज्य दीपनाथं च भैरवं प्रार्थयेदिति ॥
अतितीक्ष्ण महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥
कान्तं चास्त्रं समुच्चार्य पूजावेदीं ततो विशेत् ।

(वैष्णवीकल्पे)

संस्कृत्य चासनस्थानमास्तीर्य विहितासनम् ।
जलमानीय सव्येन संस्कुर्यात् तद्यथाविधि ॥

जलसंस्कारस्तत्रैवोक्तम् ।

वायुबीजेन संशोध्य वह्निबीजेन निर्दहेत् ।
प्लावयेज्जलबीजेन गायत्र्या प्रोक्षयेत् ततः ॥
ततो धेन्वाऽमृतीकृत्य प्रणवेनाभिमन्त्रयेत् ।

तथा ।

आत्मविद्याशिवैस्तत्त्वैः प्रणवादिशिरोऽन्तकैः ।
तज्जलेन त्रिराचम्य आसनं शोधयेत् ततः ॥

शिरोऽग्निजाया । शोधनं चात्रास्त्रमन्त्रेण जलमेकरूपमिति सांप्रदायिकाः ।
तथा ।

मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छन्द ईरितम् ।
कूर्मोऽत्र देवता प्रोक्ता आसनोपनिवेशने ॥
विनियोगश्च कथितः पठेद्धृत्वाऽऽसनं ततः ।
पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥
त्वं च धारय मां नित्यं पवित्रं चासनं कुरु ।
मायाबीजं समुच्चार्य आधारशक्तये ततः ॥
कमलासनमाभाष्य ङेनमोऽन्तं प्रपूजयेत् ।
आत्ममन्त्रेणोपविशेदासने देशिकोत्तमः ॥

दुःशिल्पिरचितत्वादिनानादोषोपशान्तये ।

आत्ममन्त्रस्तु ।

स्वनामाद्यक्षरं पुंसः सोमसामिसमन्वितम् ।
आत्ममन्त्रं विजानीयात् .... ॥

इति सिद्धान्तसंग्रहे प्रोक्तः । सोमसामीति चन्द्रार्धमित्यर्थः ।

(मेरुतन्त्रे)

वेदिकायामासने स प्राङ्मुखः संविशेदथ ।
बद्धपद्मासनो मौनी ऋजुकायो जितेन्द्रियः ॥
देशिकेन्द्रस्तु संस्थाप्य पूजोपकरणानि च ।
दक्षिणे वामभागे तु स्थापयेत् कलशं शुभम् ॥
सुगन्धिजलसंपूर्णं हस्तप्रक्षालनाय च ।
पश्चात् पात्रं निधायाथ दीपान् प्रज्वालयेच्छुभान् ॥
व्यजनं मुकुरं छत्रं चामरं दिक्षु मन्त्रवित् ।

स्थापयेदिति शेषः । प्राङ्मुख इति बद्धपद्मासन इति चोपलक्षणम् ।

उदङ्मुखः प्राङ्मुखो वा स्वस्तिकासनमास्थितः ।

इति भैरवोक्तेः ।

(निबन्धे)

ततः संकल्प्य विधिवत् सूर्यायार्घं निवेदयेत् ।

सूर्यार्घदानमन्त्र उक्तो (मेरुतन्त्रे)

ह्रांह्रीँ सः सग्रहराशिनक्षत्रपदमुच्चरेत् ।
ततश्च योगकरणपरिवृत्तासनेति च ॥
संस्थितश्रीसूर्यायैष तेऽर्घः स्वाहा मनुः स्मृतः ।
चतुस्त्रिंशदक्षरोऽयं सूर्यस्यार्घनिवेदने ॥

तत्रैव पूजासंभारानुपक्रम्य ।

यथायथं तु संस्थाप्य संस्कुर्यात् तानि चात्मवान् ।
पुष्पनैवेद्यगन्धादीन् ह्राँहुँफडिति मन्त्रतः ॥

नाराचमुद्रया दृष्ट्या समया च विलोकयेत् ।
दृष्टं वाचाऽऽत्मनि ज्ञातं सम्यक् पुष्पादिदूषणम् ॥
अस्पृश्यस्पर्शनं चापि यदन्यायार्जितं च वा ।
तथा निर्माल्यसंस्पृष्टं कीटाद्यारोहणं च यत् ॥
तत्सर्वं नाशमायाति नैवेद्याद्यवलोकनात् ।
ततो रमिति मन्त्रेण शिखां दीपस्य संस्पृशेत् ॥
स तु स्याच्छुभदो दीपो निष्क्रव्यादः सुखप्रदः ।
पतङ्गकीटकेशादिदाहात् क्रव्यादिसंहृते ॥
वसामज्जादिसंभूतैर्घृताद्यैरुपयोजितम् ।
अज्ञानरूपं तत्सर्वं दोषं स्पर्शाद्विनश्यति ॥
ह्रौँ बीजमुच्चरन् मन्त्री देवतीर्थेन संस्पृशेत् ।
पानीयं घटमध्यस्थं दृष्ट्वा सम्यक् च साधकः ॥
वामेन पाणिना धृत्वा वामपार्श्वस्थितं घटम् ।
पात्राधारेण मन्त्रेण संस्कुर्वन् संस्पृशेज्जलम् ॥
स्वसंज्ञाद्यक्षरं विन्दुचन्द्रार्धपरियोजितम् ।
तत्पात्रनाम ङेऽन्तं च हृदन्तः पात्रमन्त्रकः ॥
यदज्ञानादमेध्यादिसंस्पृष्टिरिह संगता ।
यदन्यदूषणं पात्रे तोये वाऽज्ञानतो भवेत् ॥
जलाशयशवस्पर्शाज्जलस्थानाच्च संगतम् ।
इत्यादिदूषणं नश्येत् तत् प्रिये देवपूजने ॥
ततः कृताञ्जलिपुटो वामदक्षिणपार्श्वयोः ।
गुरुं गणपतिं नत्वा पुरतः स्वेष्टदेवताम् ॥
(यामले)
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
इति नत्वा गुरुं मन्त्री करशुद्ध्यादिकं चरेत् ।

करशुद्धिप्रकारस्तु (मेरुतन्त्रे)

सुगन्धिपुष्पाण्यादाय चन्दनाक्तानि मन्त्रवित् ।
ह्सौँ मन्त्रेण करयोरस्त्रमन्त्रेण मर्दयेत् ॥
तत्पुष्पं वामहस्तेन समादाय च मस्तकम् ।
भ्रामयेत् परितस्तारं जपन्नाघ्राय तत् पुनः ॥
ह्रौँ ॐ पूर्वं पठेच्छ्लोकमिमं स च निगद्यते ।
ते सर्वे विलयं यान्तु ये मां हिंसन्ति हिंसकाः ॥
मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके ।
अस्त्रमन्त्रेण नाराचमुद्रयेशदिशि त्यजेत् ॥
करशुद्धौ ततोऽस्त्रेण कुर्यात् तालत्रयं ततः ।
ऊर्ध्वोर्ध्वमस्त्रमन्त्रेण दिग्बन्धमपि देशिकः ॥
तेन संजनितं तेजो वह्निप्राकारमुद्रया ।
रक्षेदात्मनि मूलेन प्राणायामत्रयं चरेत् ॥

प्राणायामलक्षणमुक्तम् (सारसमुच्चये)

प्राणो वायुः शरीरस्य आयामस्तस्य निग्रहः ।
प्राणायाम इति प्रोक्तो द्विविधः कथ्यते हि सः ॥
सगर्भो मन्त्रजापेन निगर्भो मात्रया भवेत् ।

मात्राकारलक्षणं च (अगस्त्यसंहितायाम्)

नलिनीपत्रसंहत्यां सूक्ष्मसूच्यग्रभेदने ।
दले दले च यः कालः स कालो लववाचकः ॥
लवैस्त्रुटिस्तु त्रिंशद्भिः कलां तावत्त्रुटिं विदुः ।
काष्ठा तावत्काला ज्ञेया तावत्काष्ठा निमेषकः ॥
स्वाङ्गुलिस्फोटतुल्यश्च मात्राऽष्टादशभिः स्मृता ।

(मेरुतन्त्रे)

मध्यामूलाद्यावदग्रमङ्गुष्ठेन निपीड्यते ।
मात्रा सा प्रोच्यते सद्भिर्योगेऽभीष्टं प्रयच्छति ॥
जानुं प्रदक्षिणीकुर्याद्यावत्कालेन हस्तकः ।
तावत्कालमिता मात्रा स्वनिःश्वाससमाऽपि च ॥

(अगस्त्यसंहितायामपि)

वामजानुनि हस्तस्य भ्रमणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥

तत्रैव ।

प्राणायामैर्विना यद्यत् कृतं कर्म निरर्थकम् ।
अतो यत्नेन कर्त्तव्याः प्राणायामाः शुभार्थिभिः ॥

अत्र प्राणायामा इति बहुवचनम् । कपिञ्जलाधिकरणन्यायेन त्रित्वपरम् । तथा च ।

प्राणायामत्रयं कुर्यात् .... इति ।

(कालीक्रमे)

प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन वा ।
अथ वा मन्त्रबीजेन यथोक्तविधिना सुधीः ॥

क्वचित् ।

प्राणायामं ततः कुर्याद् वाग्भवेन समाहितः—इत्युक्तम् ।

प्राणायामेऽङ्गुलिनियमो (ज्ञानार्णवे)

कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना ॥

(मेरौ)

पूरकः कुम्भकश्चैव रेचकश्चेति स त्रिधा ।

तत्प्रकारमाह (यामले)

दक्षाङ्गुष्ठेन दक्षे च घ्राणं संपीड्य मन्त्रवित् ।
ईडया पूरयेद्वायुं मात्राषोडशभिः क्रमात् ॥

अङ्गुष्ठानामिकाभ्यां च धृत्वा नासाद्वयं ततः ।
ततस्तु कुम्भयेद्वायुं पूरकाणां चतुर्गुणैः ॥
अनामया तथा वामनासां धृत्वा तु दक्षिणे ।
द्वात्रिंशद्भिस्तु मात्राभिर्वायोश्च रेचनं चरेत् ॥
स्वचित्तं मूलचक्रे तु निधायासून् समभ्यसेत् ।

(महाकालसंहितायामपि)

मूलमन्त्रस्य जापेन मात्राषोडशकेन हि ।
वामनासापुटेनैव पूरयित्वाऽनिलं बलात् ॥
पुनस्तस्य चतुःषष्ट्याऽऽवृत्त्या वायुं विकुम्भ्य च ।
पुनर्द्वात्रिंशदावृत्त्या मूलमन्त्रस्य पार्वति ॥
नासापुटेन दक्षेण रेचयेत् सकलानिलम् ।
प्रकारेणेदृशेनैकः प्राणायामो हि जायते ॥
आवश्यकं तत्त्रयं हि फलाधिक्यं समुच्चये ।

द्वितीयप्राणायाममाह (यामले)

ततो रेचनमार्गेण प्राणायामं प्रपूरयेत् ।
पुनः षोडशमात्राभिः कुम्भकं च समाचरेत् ॥
चतुःषष्टितमैर्मन्त्री नासापुटौ विधृत्य च ।
पुनश्च रेचयेद्वायुं द्वात्रिंशन्मात्रया बुधः ॥

वामनासापुटेनेति शेषः ।
तृतीयप्राणायामस्तत्रैवोक्तः ।

वामेनैव पिबेद्वायुं मात्राषोडशकैः क्रमात् ।
नासापुटौ निपीड्याथ पूरकस्य चतुर्गुणैः ॥
दक्षेण रेचयेद्वायुं द्वात्रिंशन्मात्रया बुधः ।

तन्त्रान्तरे ।

ईडयाऽऽकर्षयेद्वायुं मात्राषोडशकैः क्रमात् ।

नासापुटौ निपीड्याथ पूरकस्य चतुर्गुणैः ॥
दक्षेण रेचयेद्वायुं द्वात्रिंशन्मात्रया बुधः ।

तन्त्रान्तरे ।

ईडयाऽऽकर्षयेद्वायुं बाह्यं षोडशमात्रया ।
सुषुम्णामध्यगं सम्यग्द्वात्रिंशन्मात्रया शनैः ॥
नाड्या पिङ्गलया चैनं रेचयेद्योगवित्तमः ।
भूयोभूयः क्रमात् तस्य व्यत्यासेन समाचरेत् ॥

तस्येति पूर्वप्राणायामस्येति । व्यत्यासेन वैपरीत्येन ।

तदुक्तम् (सनत्कुमारसंहितायाम्)

येनैष रेचयेद्वायुं तेनैव पूरयेत् पुनः—इति ।

(यामले)

प्राणायामं विधायेत्थं भूतशुद्धिं समाचरेत् ।

(शारदायाम्)

शरीराकारभूतानां भूतानां यद्विशोधनम् ।
अद्वयब्रह्मसंयोगाद्भूतशुद्धिरियं मता ॥

(यामले)

भूतशुद्धिलिपिन्यासौ विना यस्तु प्रपूजयेत् ।
विपरीतफलं दद्यादभक्त्या पूजनं यथा ॥

भूतशुद्धिप्रकारमाह (मेरुतन्त्रे)

पादतो जानुपर्यन्तं चतुरस्रं सवज्रकम् ।
लँ युतं पीतवर्णं च भूस्थानं ब्रह्मदैवतम् ॥
अधिष्ठितनिवृत्त्याख्यकलया स्थानमुच्यते ।
उत्पत्तेस्तत् तु जीवानामेवं रूपं विचिन्तयेत् ॥
जान्वोरानाभिपर्यन्तमपां स्थानं सितप्रभम् ।
अर्धचन्द्रनिभं श्रृङ्गद्वयं तत् पद्मलाञ्छितम् ॥
षट्कोणं विन्दुभिः षड्भिर्युक्तं वँ बीजसंयुतम् ।

प्रतिष्ठाकलया युक्तं ध्यायेत् तद्विष्णुदैवतम् ॥
नाभ्यादिकण्ठपर्यन्तमारक्तं रुद्रदैवतम् ।
रँ बीजयुक्तं कलया युतं विद्याख्यया तथा ॥
दीप्तिमत्स्वस्तिकोपेतं त्रिकोणाकारतां गतम् ।
महाप्रलयसंस्थानं वह्नितत्त्वं विचिन्तयेत् ॥
कण्ठाद्भ्रूमध्यपर्यन्तं षट्कोणाकारतां गतम् ।
षड्बिन्दुलाञ्छितं वृत्तवेष्टितं कृष्णवर्णकम् ॥
वायुस्थानं शान्तिकलाधिष्ठितं शिवदैवतम् ।
यँ बीजयुक्तं सर्वेषां प्राणरूपं विचिन्तयेत् ॥
भ्रूमध्याद्ब्रह्मरन्ध्रान्तमाकाशस्थानमुच्यते ।
वृत्ताकारं धूम्रवर्णं महोच्चध्वजलाञ्छितम् ॥
शान्त्यतीताख्यकलयाऽधिष्ठितं शिवदैवतम् ।
हँ बीजयुक्तं ध्यात्वेत्थं देहे भूतानि विन्यसेत् ॥
धर्मकन्दसमुद्भूतं ज्ञाननालसुशोभितम् ।
पद्मं तत्कर्णिकासंस्थं प्रदीपकलिकानिभम् ॥
सुषुम्णावर्त्मना जीवं परमात्मनि योजयेत् ।
योगयुक्तेन विधिना सोऽहंमन्त्रेण साधकः ॥
तत्रैव सर्वभूतानि विलीनानि विचिन्तयेत् ।

तन्त्रान्तरे ।

विनिधाय निजाङ्के तु समुत्तानं करद्वयम् ।
मूलाधारस्थया शक्त्या चक्रभेदक्रमेण च ॥
हंसेन ब्रह्ममार्गेण जीवं ब्रह्मणि योजयेत् ।

(महाकालसंहितायाम्)

हृत्पुण्डरीकादात्मानं ज्वलद्दीपशिखाकृतिम् ।

सुषुम्णावर्त्मना ब्रह्मबीजमन्त्रेण मस्तके ॥
सहस्रदलमध्यस्थे संयोज्य परमात्मनि ।

(सिद्धान्तसंग्रहे)

ततः समस्ततत्त्वानि तत्रैव प्रविलापयेत् ।
पृथ्वीमप्सु च ता वह्नौ वह्निं वायौ समीरणम् ॥
प्रविलाप्य तथाऽऽकाशे आकाशं प्रकृतौ ततः ।
अपरब्रह्मरूपां तां मायाशक्तिं परात्मनि ॥
एवं समस्तदेहादिप्रपञ्चं परमात्मनि ।
प्रविलाप्य परब्रह्मरूपे तिष्ठेत् कियत् क्षणम् ॥

(मेरुतन्त्रे)

शरीरे वामकुक्षौ तु चिन्तयेत् पापपूरुषम् ।
वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभम् ॥
ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम् ।
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ॥
तत्संसर्गपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ।
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ॥
खड्गचर्मधरं क्रूरमङ्गुष्ठपरिमाणकम् ।
अधोमुखं महाभीमं रूक्षं पापं विचिन्तयेत् ॥

(महाकालसंहितायाम्)

वामनासापुटेनाथ पूरयित्वा समीरणम् ।
सविन्दुवायुबीजं च धूम्रवर्णं विभाव्य च ॥
तदेव बीजं देवेशि पञ्चाशद्वारमीरयेत् ।
तदुत्पन्नेन वातेन शुष्कं देहं विचिन्त्य च ॥

सहैव रेचयेद्वायुं ततो नासापुटेन च।
वामेन वायुमुत्तोल्य सहस्रदलमध्यगम्॥
विभाव्य परमात्मानं चन्द्ररूपं वरानने।
सानुस्वारं वायुबीजं पञ्चाशद्वायुमुच्चरन्॥
तस्माच्चन्द्रात् सुधावृष्ट्या देहमाप्लाव्य सुन्दरि।
भूबीजेन सनादेन शुद्धं संयोज्य विग्रहम्॥
लीनीकृतानि यानीह पञ्चभूतानि वै पुरा।
यथास्थानं स्थापयित्वा ब्रह्मबीजं पुनर्गृणान्॥
अहंकारादिभिस्तत्त्वैः सहैव परमात्मनि।
जीवात्मानं समाकृष्य स्थापयित्वा हृदम्बुजे॥
देवीरूपमथात्मानं चिन्तयेत् क्षणामूर्जितः।

अत्र वायुबीजादेः पञ्चाशद्वारजपेन पूरकादिकमुक्तम्।
(यामलादौ तु)

नाभिदेशे च यँ कारं धूम्रं वायुं विचिन्तयेत्।
तेनैव शोधयेल्लिङ्गतनुं षोडशमात्रया॥
कर्मात्मकं चतुःषष्ट्या कुम्भयित्वा समाचरेत्।
द्वात्रिंशन्मात्रया दत्ते रेचनं तेन वा पुनः॥

इति षोडशादिमात्राभिः पूरकादिकमुक्तमिति संख्याविकल्पो द्रष्टव्यः।
(सिद्धान्तसंग्रहे)

पुनरुत्पातयेद्देहं पवित्रं परमात्मनः।
परब्रह्मात्मिका विद्या प्रकृतिर्मातृका परा॥
अजायत जगन्मातुराकाशं नभसोऽनिलः।
समीरणादभूद्वह्निर्वह्नेरापस्ततो मही॥
स्वीयमेभ्योऽपि भूतेभ्यस्तेजोरूपं कलेवरम्।
देवताराधने योग्यमुत्पन्नमिति भावयेत्॥

भूतशुद्धिरियं प्रोक्ता महापापौघनाशिनी ।

संक्षिप्तप्रकारमाह (उड्डीशे)

अथ वा कुण्डलीं देवीं पञ्चभूतादिना सह ।
परमात्मनि संयोज्य तयोरैक्यं विभाव्य च ॥
ध्यानयेगेन मनसा सोऽहंसोऽहं विभावयेत् ।

क्व चिच्छक्तिविशेषे तु हंस इति बीजादिकं परशिवे संयोज्य सोऽहमिति-मन्त्रेण स्वस्थानमानयेदित्युक्तम् ।

(मेरौ)

भूतशुद्धिं विधायैवं प्राणस्थापनमाचरेत् ।

(ज्ञानार्णवे)

प्राणप्रतिष्ठया पश्चाज्जीवं देहे नियोजयेत् ।
मुखवृत्तं समुच्चार्य हंसस्तु विपरीततः ॥
उद्धरेत् परमेशानि विद्येयं त्र्यक्षरी भवेत् ।
प्राणप्रतिष्ठामन्त्रोऽयं सर्वकर्मणि साधयेत् ॥

(मेरुतन्त्रे)

प्राणायामत्रयं कृत्वा मातृकान्यासमाचरेत् ।

(फेत्कारिणीतन्त्रे)

मन्त्रा मूकत्वमायान्ति विन्यासेन विना लिपेः ।
सर्वमन्त्रप्रसिद्ध्यर्थं तस्मादादौ लिपिं न्यसेत् ॥

तत्रादावन्तर्मातृकान्यासः । (मेरुतन्त्रे)

अथान्तर्मातृकान्यासं वक्ष्ये तं शुद्धिकारकम् ।
यं कृत्वा योगिनां चित्तं पातके न प्रवर्त्तते ॥
मूलाधारध्वनिं श्रुत्वा प्रबुद्धा शक्तिकुण्डली ।
ज्वलत्पावकसंकाशा सूक्ष्मा तेजःस्वरूपिणी ॥
मूलाधाराच्छिरःपद्मं स्पृशन्ती विद्युदाकृतिः ।
तया स्पृष्टशिरःपद्मादमृतौघस्वरूपिणः ॥

निर्गतान्मातृकावर्णान् सुषुम्णावर्त्मना तनुम् ।
स्थापयित्वा स्थितानेतानेवं ध्यात्वा प्रविन्यसेत् ॥
कण्ठे विशुद्धिचक्राख्यं पद्मं षोडशपत्रकम् ।
ऊर्ध्वास्यं प्राग्दलात् तत्र संस्थिताः षोडश स्वराः ॥
एवं संचिन्त्य तारादिं बिन्दुयुक्तं नमोऽन्तकम् ।
वदेत् स्वरं च सर्वेषु वर्णेष्वप्येषु पद्धतिः ॥
हृदयेनाहतं चक्रं ध्यायेद्द्वादशपत्रकम् ।
पूर्वपत्रान्तर्दलेषु प्राग्वत् कादीन् प्रविन्यसेत् ॥
मणिपूरं ततश्चक्रं चिन्तयेन्नाभिमण्डले ।
दशपत्रं तत्र डादिवर्णान् प्राग्वद्विचिन्तयेत् ॥
स्वाधिष्ठानं लिङ्गमूले चक्रं षड्दलमुच्यते ।
चिन्तयेद्बादिलाँस्तत्र षड्वर्णानपि पूर्ववत् ॥
मूलाधाराभिधं चक्रं पद्माकृति चतुर्दलम् ।
वँ शँ षँ सँ तत्र चिन्त्यं पूर्वाशादिदलेषु च ॥
आज्ञाख्यचक्रं भ्रूमध्ये द्विदलं कमलाकृति ।
हँ क्षँ ध्यायेदयं कार्यो मनसा केवलेन तु ॥
स्वदेहेऽनामया कार्यः पुष्पेण सुरमूर्त्तिषु ।
अनादित्वान्न ऋष्यादिर्ब्रह्मवद्ध्यानमस्य तु ॥

अथ बहिर्मातृकान्यासः । (शारदायाम्)

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री छन्द ईरितम् ।
सरस्वती समाख्याता देवता देशिकोत्तमैः ॥
अक्लीबह्रस्वदीर्घान्तगतैः षड्वर्गकैः क्रमात् ।
षडङ्गानि विधेयानि जातियुक्तानि देशिकैः ॥

(मेरुतन्त्रे)

बहिर्न्यासमथो वक्ष्ये पूर्वोक्तब्रह्मरन्ध्रके ।
वर्णारविन्दे संध्यायेन्मातृकाख्यां सरस्वतीम् ॥

ध्यानं तत्रैव ।

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
देशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितकरतलां त्रीक्षणां पद्मसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥

ललाटे मुखवृत्तेऽक्षिश्रवोनासासु गण्डयोः ।
ओष्ठयोर्दन्तपङ्क्त्योश्च मुर्ध्नि वक्त्रे न्यसेत् स्वरान् ॥
बाह्वोः संधिषु साग्रेषु कचवर्गौ न्यसेत् सुधीः ।
टतवर्गौ पदोस्तद्वत् पार्श्वयोः पृष्ठदेशतः ॥
नाभौ कुक्षौ पवर्गं च हृदंशककुदं ततः ।
न्यस्य यादिचतुर्वर्णान् शादिषट्कं ततो न्यसेत् ॥
हृदादिकरयोरङ्घ्र्योर्जठरे वदने तथा ।
न्यासस्त्वयं वर्णमात्राहीनपाठप्रपूरकः ॥

(शारदायाम्)

न्यसेत् सर्गान्वितान् सृष्ट्या ध्यायेद्देवीं यथाविधि ।
विन्दुयुक्तान् न्यसेत् तत्र संहृत्याप्रतिलोमतः ॥

(मेरुतन्त्रे)

क्षमारभ्य अकारान्तो न्यासश्चेत् क्रियते यदि ।
संहारन्यासनामा स्याद्विन्दुन्यास इतीरितः ॥

संहारक्रमेण ध्यानमाह ।

अक्षस्रजं हरिणपोतमुदग्रटङ्कं
विद्यां करैरविरतं दधतीं त्रिनेत्राम् ।

अर्धेन्दुमौलिमरुणामरविन्दसंस्थां
वर्णेश्वरीं प्रणमत स्तनभारनम्राम् ॥

(शारदायाम्)

सर्गविन्द्वन्तिकान् न्यस्य डार्णाद्यान् स्थितिवर्त्मना ।
विद्यात् पूर्वोदितान् विद्वानृष्यादीनङ्गसंयुतान् ॥

(भैरौ)

विन्दुसर्गयुतान् डादिठान्तान् वर्णान् स्थितौ न्यसेत् ।
पूर्वोक्ता एव मुन्याद्याः षडङ्गं ध्यानमुच्यते ॥
सिन्दूरकान्तिममिताभरणां त्रिनेत्रं
विद्याक्षसूत्रमृगपोतवरान् दधानम् ।
पार्श्वे स्थितां भगवतीमपि काञ्चनाभां
ध्यायेत् कराब्जधृतपुस्तकवर्णमालाम् ॥
न्यासाः कार्यास्तु वटुभिः स्थितिसंहारसृष्टयः ।
संहारसृष्टिस्थितयो गृहस्थस्तु न्यसेत् क्रमात् ॥
वानप्रस्थाश्च यतयः सृष्टिस्थितिलयक्रमात् ।
न्यासान् कुर्युरिति प्रोक्तः स्थितिन्यासः सविस्तरः ॥

अथ कलामातृकान्यासस्तत्रैव ।

वक्ष्ये कलामातृकाया न्यासं तस्य ऋषिः स्मृतः ।
प्रजापतिश्च गायत्री छन्दस्तस्यास्तु देवता ॥
सरस्वती मातृकाख्या नियोगोऽभीष्टतुष्टये ।
तारैः षडङ्गं कुर्वीत ह्रस्वदीर्घान्तरस्थितैः ॥

ध्यानमाह ।

हस्तैः पद्मं रथाङ्गं गुणमथ हरिणं पुस्तकं वर्णमालां
टङ्कं शुभ्रं कपालं दलममृतलसद्धेमकुम्भं वहन्तीम् ।

मुक्ताविद्युत्पयोदस्फटिकमणिजपाबन्धुरैः पञ्चवक्त्रै-
स्त्र्यक्षैर्वक्त्रोजनम्रां सकलशशिनिभां शारदां तां नमामि ॥
ध्यात्वैवं तारपूर्वां तामकाराद्यां च मातृकाम् ।
विन्दुयुक्तां ङेऽन्तकलानामाद्यां नमसाऽन्विताम् ॥
पूर्वोक्तशुद्धमात्राणां न्यासस्थानेषु विन्यसेत् ।

तारपूर्वामित्यादि । एतेन ॐ अंनिवृत्त्यै नम इत्यादयः प्रयोगाः संपन्नाः । कलानामान्याह ।

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथेन्धिका ।
दीपिता रेचिका चापि मोचिका च पराऽभिधा ॥
सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायनी ततः ।
व्यापिनी व्योमरूपा चानन्ता सृष्टिः समृद्धिका ॥
स्मृतिर्मेधा ततः कान्तिर्लक्ष्मीर्द्युतिः स्थिरा स्थितिः ।
सिद्धिर्जया पालिनी च शान्तिरीश्वरिका रतिः ॥
कामिका वरदा चान्या ह्लादिनी प्रीतिसंयुता ।
दीर्घा तीक्ष्णा तथा रौद्री भया निद्रा च तन्द्रिका ॥
क्षुधा स्यात् क्रोधिनी पश्चात् क्रियोत्कारी समृत्युका ।
पीता श्वेताऽरुणा पश्चादसिताऽनन्तयाऽन्विता ॥
उल्का कलामातृकैवं स्थानेऽकारादिके न्यसेत् ।

कलानामुत्पत्तिस्थानमाह ।

तत्र नादात्मनो जाताः स्वरजास्तु सदाशिवात् ।
अक्षमालां पुस्तकं च पाशं चापि कपालकम् ॥
हस्तैर्दधत्यः श्वेताभाः श्वेताभरणभूषणाः ।
अकाराद्ब्रह्मणो जाताः कचवर्गकला दश ॥
पीता अक्षस्रजं पद्ममभयं च कमण्डलुम् ।

हस्तैर्दधत्यो ध्येयास्ताः पीतगन्धानुलेपनाः ॥
विष्णोरुकारात् संजाताष्टतवर्गकला दश ।
श्यामा अभयशङ्खारिवरहस्ताः समीरिताः ॥
मकाराद्रुद्रतो जाताः पयवर्गकला नव ।
शरच्चन्द्रनिभा हस्तैरभयं शूलमेव च ॥
कपालं च वरं ध्येया दधत्य इति साधकैः ।
शकारादिकपञ्चानामीश्वराद्बिन्दुतोऽभवन् ॥
अभयं हरिणं टङ्कं वरं च करपल्लवैः ।
दधत्यो रक्तवर्णाश्च ध्येया न्यासे कलात्मके ॥

अथ केशवादिमातृकान्यास उक्तस्तत्रैव ।

केशवादिमातृकायाः साध्यनारायणो मुनिः ।
अमृतादा तु गायत्री छन्दो लक्ष्मीहरिः सुरः ॥
द्विरुक्तैः शक्तिश्रीकामैः षडङ्गानि समाचरेत् ।

शक्तिर्लज्जा ।

ध्यानमाह ।

शङ्खचक्रगदापद्मकुम्भादर्शाब्जपुस्तकम् ।
बिभ्रतं मेघचपलावर्णां लक्ष्मीहरिं भजे ॥
शक्तयस्तु निजाङ्केषु निषण्णाः सस्मिताननाः ।
एवं ध्यात्वा न्यसेच्छक्तिश्रीकामपुटिताक्षरम् ॥
तारादिहृदयान्ताश्च केशवाद्यास्तु शक्तयः ।
ङेन्ता नमोऽन्ता उच्चार्याः स्थानेऽकारादिके न्यसेत् ॥

ङेन्तामिति तान्त्रिकत्वात् साधुः । अयं च संक्षिप्तप्रकारः । अगस्त्यसंहितादौ तु चतुर्थ्येकवचनान्तयोर्नाम्नोः पृथगुच्चार उक्त । केशवाय च कीर्त्यै चेत्यादि वैष्णवीकल्पे ।

(मेरुतन्त्रे)

तारमायारमाकामानुक्त्वा वर्णान् समुच्चरेत् ।
ङेमन्तौ च तथा देव्यै शक्त्यादित्रितयं पुनः ॥

हृदयान्तं समुच्चार्य ललाटादिषु विन्यसेत् ।

क्वचित् तु देवतानामान्ते पुनः शक्त्यादिबीजोच्चारो नोक्तः ।

(विष्वक्सेन्यां तु)

तारादिर्मन्मथादिर्वा रमादिर्वा भवेदियम् ।

इति प्रणवादीनां विकल्प उक्तः ।

(शारदायां तु)

स्मराद्यां मातृकां न्यस्य केशवादिनमोन्विताम् ।
सधातुप्राणशक्त्याऽऽत्मयुक्तयाऽऽदिषु वैष्णवः ॥

इति कामबीजमात्रमुपास्तम् ।

कलामात्रा तु शाक्तानां नित्योऽयं विष्णुसेविनाम् ।

केशवादिनामान्याह ।

केशवः कीर्त्तिसंयुक्तः कान्तिर्नारायणान्विता ।
माधवस्तुष्टिसंयुक्तो गोविन्दः पुष्टिसंयुतः ॥
विष्णुश्च धृतिसंयुक्तः शान्तियुङ्मधुसूदनः ।
त्रिविक्रमः क्रियायुक्तो वामनो दययाऽन्वितः ॥
श्रीधरो मेधया युक्तो हृषीकेशस्तु हर्षया ।
पद्मनाभयुता श्रद्धा लज्जा दामोदरान्विता ॥
वासुदेवश्च लक्ष्मीयुक् संकर्षणसरस्वती ।
प्रद्युम्नः प्रीतिसंयुक्तोऽनिरुद्धो रतिसंयुतः ॥
चक्री जया गदी दुर्गा शार्ङ्गी तु प्रभयाऽन्वितः ।
खड्गी तु सत्यया युक्तः शङ्खी च चण्डया युतः ॥
हली च वाण्या संयुक्तो विलासिन्याऽथ मौशली ।
शूली च* जयया युक्तः पाशी विरजयाऽन्वितः ॥
अङ्कुशी विश्वया युक्तो मुकुन्दो विनदान्वितः ।

---

* विजयायुक्त इति २ पु. पा. ।

नन्दजस्तु* सुदयया नन्दी स्मृत्या समन्वितः॥
नर ऋद्ध्या नरकजित् समृद्ध्या शुद्धियुग्घहरिः।
कृष्णो† बुद्ध्या भुक्त्या सत्यो मतियुक् शाश्वतः ‡स्मृतः॥
शौरिक्षमे शूरदमे§ जनार्दन उमान्वितः।
भूधरः क्लेदिनीयुक्तो विश्वमूर्त्तिश्च क्लिन्नया॥
वैकुण्ठो वसुधायुक्तो वसुदापुरुषोत्तमौ।
बली तु परया युक्तो बलानुजपरायणे॥
बालसूक्ष्मे वृषघ्नश्च संध्यायुक् प्रज्ञया वृषः।
हंसः प्रभासमायुक्तो वराहो निशयाऽन्वितः॥
विमलो मेधया‖ युक्तो नृसिंहो विद्युता युतः।
केशवाद्या मातृकोक्ता यादियोगश्च पूर्ववत्॥

अस्य प्रयोगस्तु। ॐ ह्रीँ श्रीँ क्लीँ अं केशवकीर्त्तिभ्यां ह्रीँ श्रीँ क्लीँ नम इत्यादि। यादियोग इति। ॐ ह्रीँ श्रीँ क्लीँ यं त्वगात्मभ्यां वसुदापुरुषोत्तमाभ्यां ह्रीँ श्रीँ क्लीँ नम इत्यादिक्रमेण यकारादिषु त्वगादियोग इत्यर्थः।

अथ श्रीकण्ठादिमातृकान्यासस्तत्रैव।

अथ शैवहिता वक्ष्ये श्रीकण्ठादिकमातृकाः।
मुनिः स्याद्दक्षिणामूर्त्तिर्गायत्री छन्द ईरितम्॥
अर्धाद्रिजो हरो देवो नियोगः सर्वसिद्धये।
हलो बीजानि गुह्ये तु पादयोः स्वरशक्तयः॥
ह्रस्वदीर्घान्तरे कृत्वा प्राग्वद्वर्गान् हसैरयम्।
षड्दीर्घसंयुतैः कृत्वा षडङ्गानि न्यसेत् तनौ॥

---

* नन्दजः सुनदायुक्त इति ३ पु. पा।

† कृष्णो भुक्त्या बुद्ध्या सत्य इति संप्रतिमुद्रितशारदानुसारः पाठः।

‡ सात्वत इति २ पु. पा.।

§ शूररमे इति संप्रतिमुद्रितशारदानुसारः पाठः।

‖ विमलोऽमोघयेति संप्रतिमुद्रितशारदानुसारः पाठः।

ह्रस्वदीर्घान्तर इति । अँ कँ खँ गँ घँ ङँ आँ ह्सामित्यादिभिः षडङ्गं कुर्यादित्यर्थः ।

ध्यानमाह ।

बन्धूककाञ्चननिभं रुचिराक्षमालां
पाशाङ्कुशौ च वरदं निजबाहुदण्डैः ।
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्र-
मर्धाम्बिकेशमनिशं वपुराश्रयामः ॥

ह्सौँ च मातृकामुक्त्वा देवान्ते चेशमुच्चरेत् ।
ङेन्तं ङेन्तां च तच्छक्तिं नमोन्तान् मातृकास्थले ॥
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राण्यसून् वदेत् ।
शक्तिं क्रोधं तथाऽऽत्मानं ङेन्तं यादिदशस्वपि ॥

ह्सौँ अँ श्रीकण्ठेशाय पूर्णोदर्यै नम इति प्रयोगः ।

त्वगिति । ह्सौँ यँ त्वगात्मने बालीशाय सुमुख्यै नम* इत्येवं यादिदशवर्णेषु त्वगादियोगः कर्त्तव्य इत्यर्थः ।

शिवशक्तिनामान्याह ।

श्रीकण्ठपूर्णोदर्यौ चानन्तो विरजयाऽन्वितः ।
सूक्ष्मेशः शाल्मलीयुक्तो लोलाक्षीयुक् त्रिमूर्त्तिकः ॥
अमरेशो वर्त्तुलाक्ष्या चार्घीशो दीर्घघोणया ।
भारमूर्त्ति†र्दीर्घमुख्या तिथीशो गोमुखीयुतः ॥
स्थाण्वीशो दीर्घजिह्वायुग्घरः कुण्डोदरीयुतः ।
ऊर्ध्वकेश्या च झिण्टीशो भौतिको विकृतास्यया ॥
सद्योजातो ज्वालमुख्याऽ‡नुग्रहोल्कामुखीयुतः ।
अक्रूर श्रीमुखी महासेनो विद्यामुखीयुतः ॥

---

* ह्रीँ हुँ ह्सौँ त्वगात्मने बालीशेशाय सुमुख्यै नम इति मुक्तिकल्लोलिनी । तत्रैव शारदास्यपाठोऽप्युक्तः । ह्रीँ त्रीँ हुँ अँ श्रीकण्ठेशपूर्णोदरीभ्यां नम इति विशेषः ।

† भारभूतिरिति शारदानुसारः पाठः ।

‡ अनुग्रह उल्कामुखीयुत इत्यत्रानुग्रहोल्कामुखीयुत इति प्रामादिकः पाठः ।

क्रोधीशश्च महाकाल्या चण्डेशेन सरस्वती ।
पञ्चान्तके सर्वसिद्धिगौर्या युक्तः प्रकीर्त्तितः ॥
शिवोत्तमेशो* विन्यस्यो युक्तस्त्रैलोक्यविद्यया ।
एकरुद्रो मन्त्रशक्त्या कूर्मेशश्चाष्ट†शक्तियुक् ॥
एकनेत्रो भूतिमात्रायुक्तोऽथ चतुराननः ।
लम्बोदर्या युतः प्रोक्तस्त्वजेशो द्राविणीयुतः ॥
सर्वेशो नागरीयुक्तः सोमेशः खेचरीयुतः ।
लाङ्गलीशश्च मञ्जर्या दारुकेशेन रूपिणी ॥
वीरिण्या त्वर्धनारीशो ह्युमाकान्तः पुनर्युतः ।
काकोदर्या तथाऽऽषाढी पूतनायुक्त ईरितः ॥
दण्डीशो भद्रकालीयुगद्रीशो ‡योगिनीयुतः ।
मीनेशः शङ्खिनीयुक्तो §मेषेशस्तर्जनीयुतः ॥
लोहितः कालरात्र्या च शिखीशः कूर्दिनीयुतः‖ ।
छगलण्डः कपर्दिन्या द्विरण्डेशश्च वज्रया ॥
महाकालो जयायुक्तो बालीशः सुमुखीयुतः ।
भुजङ्गो रेवतीयुक्तः पिनाकी माधवीयुतः ॥
खड्गीशो वारुणीयुक्तो वकेशो वायवीयुतः ।
श्वेतो रक्षोवधारिण्या भृगुः सहजया युतः ॥
नकुलीशश्च लक्ष्मीयुक् शिवेशो व्यापिनीयुतः ।
संवर्त्तको महामायायुक्त एतास्तु मातृकाः ॥

---

* शिव उत्तमेश इत्यत्र शिवोत्तमेश इति प्रामादिकः ।
† -श्चात्मशक्तियुगिति शारदानुसारः पाठः ।
‡ -गत्रीश इति शारदानुसारः पाठः ।
§ मेषेशो गर्जिनीयुत इति शारदानुसारः पाठः ।
‖ कुब्जिनीयुत इति शारदानुसारः पाठः ।

श्रीकण्ठाद्या य ईशान्तस्तत्र नेशं प्रयोजयेत् ।

य इति । य ईशान्तो भवति तदन्ते पुनरीशपदं न देयमित्यर्थः । एतेन श्रीकण्ठादिनामान्ते ईशपददानमावश्यकमित्यनुज्ञातम् ।

तथा ।

सर्वे रुद्राः स्मृता रक्ता धृतशूलकपालकाः ।
शक्तयो रुद्रपीठस्थाः सिन्दूरारुणविग्रहाः ॥
रक्तोत्पलकपालाभ्यामलंकृतकराम्बुजाः ।

अथ भुवनेश्वरीमातृकान्यासमाह तत्रैव ।

येनोपास्या महाविद्या दश तस्याधिकारिता ।
भुवनेशीबीजपूर्वमातृकान्यासने सुराः ॥
ऋषिः शक्तिस्तु गायत्री छन्दः स्यान्मातृकामयी ।
भुवनेशी देवताऽथ नियोगः स्वेष्टसिद्धये ॥
ह्रस्वदीर्घान्तरगतैः षड्वर्गैर्दीर्घसंयुतैः ।
प्राग्वद्धरैः षडङ्गं स्यादङ्गुष्ठादि तथैव च ॥

हरैरिति । आकारादिषड्दीर्घस्वरयुक्तैर्हकाररकारैरित्यर्थः । प्रयोगस्तु । अँ कँ खँ गँ घँ ङँ आँ ह्राँ हृदयाय नम इत्यादि ।

ध्यानमाह ।

उद्यत्कोटिदिवाकरप्रति*निभा तुङ्गोरुपीनस्तनी
  बद्धार्धेन्दुकिरीटहाररसनामञ्जीरसंशोभिता ।
बिभ्राणा करपङ्कजैर्जपवटीं पाशाङ्कुशौ पुस्तकं
  दिश्यान्नो जगदीश्वरी त्रिनयना पद्मे निषण्णा सुखम् ॥
लज्जाबीजं पूर्वमुक्त्वा मातृकान्यास एव हि ।
भुवनेशीमातृकाणां न्यासकैर्यत्र साधने ॥

अथ लक्ष्मीमातृकान्यासस्तत्रैव ।

श्रीबीजपूर्वकः कार्यो लक्ष्मीकामैर्गृहस्थितैः ।

---

* प्रतिभटोत्तुङ्गोरु इति शारदा ।

ऋषिर्भृगुश्च गायत्री छन्दो मातृस्वरूपिणी ॥
लक्ष्मीस्तु देवता प्रोक्ता हरस्थाने शरौ कुरु ।
न्यासार्थं तु षडङ्गादेः शेषं श्रीबीजपूर्वकम् ॥

हरस्थाने शरौ इति । भुवनेशीमातृकोक्तहकाररकारयोः स्थाने शकाररकारौ दद्यादित्यर्थः । तेन ह्रामित्यादेः स्थाने श्रामित्यादि सिध्यति ।

ध्यानमह ।

विद्युद्दामसमप्रभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः
शुण्डादण्डसमुद्धृतामृतघटैरासिच्यमानामिमाम् ।
बिभ्राणां करपङ्कजैर्जपवटीं पद्मद्वयं पुस्तकं
भास्वद्रत्नसमुज्ज्वलां कुचनतां ध्यायेज्जगत्स्वामिनीम् ॥

अथ संमोहनमातृकान्यासस्तत्रैव ।

कामनामात्रसिद्ध्यर्थं कामबीजादि पूर्ववत् ।
कुर्याच्च मातृकान्यासं मुनिः संमोहनो मतः ॥
गायत्री छन्द उद्दिष्टं देवता मातृकामयी ।
संमोहिनी नाम देवी पूर्वयुक्त्या षडङ्गकम् ॥

पूर्वयुक्तेति । लक्ष्मीमातृकोक्तयुक्त्या संमोहनमातृकायाः कामबीजपूर्वकत्वेन हकाररकारयोः स्थाने संयुक्तककारलकारौ दत्वा षडङ्गन्यासः कार्य इत्यर्थः ।

ध्यानमाह ।

बालार्ककोटिरुचिरां स्फटिकाक्षमालां
कोदण्डमिक्षुजनितस्मरपञ्चबाणाम् ।
विद्यां च हस्तकमलैर्दधतीं त्रिनेत्रां
ध्यायेत् समस्तजननीं नवचन्द्रचूडाम् ॥

संमोहनमातृकान्तरमाह ।

शक्तिश्रीकामबीजादिमातृकान्यासतो नृणाम् ।
शत्रुत्वाद्या मन्त्रदोषा नश्यन्ति बहुवर्णजाः ॥
महासंमोहन ऋषिर्गायत्री छन्द ईरितम् ।

संमोहिनी नाम देवी न्यासः प्राङ्मातृकासमः ॥

ध्यानं यथा ।

ध्यायेयमत्त्ववलयेक्षुशराशपाशां
पद्मद्वयाङ्कुशशरां नवपुस्तकं च ।
आबिभ्रतीं निजभुजैररुणां कुचार्त्तां
संमोहिनीं त्रिनयनां नवचन्द्रचूडाम् ॥

अथ गणेशमातृकान्यासस्तत्रैव* ।

सर्वविघ्ननिरासार्थमवश्यं न्यासमाचरेत् ।
गणेशमातृकायास्तु मुनिर्गणक ईरितः ॥
निवृद्गायत्रिका छन्दो देवः शक्तिविनायकः ।
स्मृत्या दीर्घाढ्यया त्वङ्गं कृत्वा ध्यायेद्गजाननम् ॥

स्मृतिर्गकारः ।

ध्यानं यथा ।

शूलाङ्कुशवराभीतिपाणिं रक्ताब्जहस्तया ।
प्रियया ऽऽलिङ्गितं रक्तं त्रिनेत्रं गणपं भजे ॥
एवं ध्यात्वा न्यसेत् स्वीयबीजपूर्वाक्षरान्वितम् ।

स्वीयेति । स्वीयबीजं गमिति बीजं पूर्वं येषां तादृशानि यान्यक्षराणि अकारादीनि तैरन्वितं यथा भवति तथा वक्ष्यमाणशक्तिसंयुक्तान् वक्ष्यमाणगणेशान् न्यसेदित्यर्थः ।

तथा ।

विघ्नेशो ह्रीसमायुक्तो विघ्नराजः श्रिया युतः ।
विनायकः पुष्टियुक्तः शान्तियुक्तः शिवोत्तमः ॥
विघ्नकृत् स्वस्तिसंयुक्तो विघ्नहर्त्ता सरस्वती ।
गणस्तु स्वाहया युक्त एकदन्तस्तु मेधया ॥
द्विदन्तः कान्तिसंयुक्तो गजवक्त्रेण कामिनी ।
निरञ्जनो मोहिनीयुक् कपर्दी तु नदीयुतः ॥

---

* एतन्न्यासपरवचनानां मेरावानुपूर्वीपाठ उपलभ्यते ।

दीर्घजिह्वः पार्वतीयुक् ज्वालिन्या शङ्कुकर्णकः ।
वृषध्वजो नन्दया युक् सुयशागणनायकौ ॥
गजेन्द्रः कामरूपिण्या शूर्पकर्णस्तथोमया ।
त्रिलोचनस्तेजोवत्या लम्बोदरस्तु सत्यया ॥
महानन्दश्च विघ्नेश्या चतुर्मूर्त्तिः सुरूपया ।
सदाशिवः कामदायुगामोदो मदाजिह्वया ॥
दुर्मुखो भूतिसंयुक्तः सुमुखो भौतिकायुतः ।
प्रमोदः सितया युक्त एकपादो रमायुतः ॥
द्विजिह्वो महिषीयुक्तः शूरस्यापि भुजङ्गिनी ।
वीरोऽपि कर्णया युक्तः षण्मुखो भृकुटीयुतः ॥
वरदो लज्जया वामदेवः स्याद्दीर्घघोणया ।
धनुर्धरावक्रतुण्डौ द्विरण्डो यामिनीयुतः ॥
सेनानी रात्रिसंयुक्तः कामान्धो ग्रामणीयुतः ।
मत्तः शशिप्रभायुक्तो विमले लोललोचना ॥
मत्तवाहनचाञ्चल्ये जटी दीप्तिसमन्वितः ।
मुण्डी सुभगया युक्तः खड्गी दुर्भगया तथा ॥
वरेण्यश्च शिवायुक्तो भगीयुग्वृषकेतनः ।
भक्तिप्रियो भगिन्या तु गणेशो भोगिनीयुतः ॥
मेघनादः सुभगया व्यापी स्यात् कालरात्रियुक् ।
गणेश्वरः कालिकेति प्रोक्ता विघ्नेशमातृका ॥
त्वगादियोगो यादीनां पूर्ववत् परिकीर्त्तितः ।

(निबन्धे)

ओमाद्यन्तो नमोन्तो वा सविन्दुर्विन्दुवर्जितः ।
पञ्चाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः ॥

चतुर्धा मातृका प्रोक्ता केवला विन्दुसंयुता ।
सविसर्गा सोभया च रहस्यं श्रृणु कथ्यते ॥
विद्याकरी केवला च सोभया भुक्तिदायिनी ।
सविसर्गा पुत्रदात्री सविन्दुर्वित्तदायिनी ॥

(कुलावतारे)

मायालक्ष्मीबीजपूर्वो वाग्भवाद्योऽथ वा पुनः ।
त्रितारद्यो रमाद्यो वा न्यस्तव्यः साधकोत्तमैः ॥

त्रितारञ्च ।

वाग्भवं कामराजं च श्रीबीजं च त्रितारकम् ।
शक्तिश्रीकामबीजं वा त्रितारं मुनयो विदुः ॥

इति तन्त्रान्तरे प्रोक्तम् ।

बीजकोशे तु ।

वाग्भवं भुवनेशानि श्रीबीजं च त्रितारकम्—इत्युक्तम् ।

(सिद्धान्तसारे)

वाग्भवाद्या वाक्प्रदा स्यात् त्रिताराद्या तु कामदा ।
श्रीबीजाद्या महैश्वर्यदायिनी मातृका स्मृता ॥

(वीरचूडामणौ)

मातृकात्रितयं कुर्यात् सृष्टिसंहारकस्थितिम् ।
न्यासं कुर्यान्महेशानि कल्पोक्तं च विशेषतः ॥

(कुलावतारे)

सृष्टेस्तु सुतपुष्ट्यादि स्थितेस्तत्पालनं भवेत् ।
संहृतेर्दोषसंहारं तस्मात् त्रितयमाचरेत् ॥

(सिद्धान्तसारे)

सर्गे सर्गान्वितान् न्यस्येत् संहृतौ च सविन्दुकान् ।
डादिठान्तान् न्यसेद्वर्णान् स्थितौ तदुभयान्वितान् ॥

(त्रिशक्तिरत्ने तु)

अकथादित्रिभेदन विभज्य मनुवल्लिपिम् ।
कवर्गं प्रथमं न्यस्येदवर्गं च ततः परम् ॥
तवर्गं विन्यसेत् पश्चात् स्थितिरेषा प्रकीर्त्तिता—इत्युक्तम् ।

मातृकान्यासमुद्रा उक्तास्तन्त्रान्तरे ।

ललाटेऽनामिकामध्ये न्यसेच्च मुखवृत्तके ।
तर्जनीमध्यमानामा विन्यसेच्चैव नेत्रयोः ॥
तर्जन्यनामे संयोज्य न्यसेत् साधकसत्तमः ।
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः ॥
मध्यमां गण्डयोर्न्यस्य मध्यमामोष्ठयोर्न्यसेत् ।
अनामां दन्तयोर्न्यस्य मध्यमामुत्तमाङ्गके ॥
मुखेऽनामां मध्यमां च हस्ते पादे च पार्श्वयोः ।
कनिष्ठानामिकामध्या न्यस्तव्याः पृष्ठतस्तथा ॥
ताः साङ्गुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत् ।
हृदये साधकः सर्वमंसयोश्च ककुत्स्थले ॥
हृत्पूर्वहस्तपत्कुक्षिमुखेषु तलमेव च ।
एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्तिताः ॥
अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात् तस्य निष्फलः ।

(मन्त्रतन्त्रप्रकाशे)

पुष्पैरनामया वाऽपि मनसा वा न्यसेदसून् ।

अनामयेत्यस्य साङ्गुष्ठयेति ।

अङ्गुष्ठानामिकाभ्यां तु न्यासः सर्वत्र संमतः ।

इति (पद्यवाहिनी) वचनात् ।

तेन च । पुष्पैर्देवतामूर्त्तौ अङ्गुष्ठानामिकाभ्यां स्वदेहे मनसा मूलाधारादिषु न्यासो बोध्यः । इदं च ऋष्यादिकरषडङ्गन्यासबहिर्मातृकादिव्यतिरिक्तेषु तत्र मुद्रान्तराभिधानात् ।

(डामरे)

कृत्वा तु मातृकान्यासं न्यासानन्यान् समाचरेत् ।
मूलमन्त्रस्य ऋष्यादिकराङ्गादि ततो न्यसेत् ।

(योगिनीतन्त्रे)

ऋष्यादीन् विन्यसेद्देवि चतुर्थीहृदयान्तकान् ।

(बृहन्मत्स्यसूक्ते)

ऋषिन्यासो मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे ।
देवता हृदये चैव बीजं तु गुह्यदेशके ॥
शक्तिं च पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत् ।

(मेरुतन्त्रे)

ऋषेर्गुरुत्वाच्छिरसि वर्णात्वाच्छन्दसो मुखे ।
धारणां प्रोच्यते चित्ते ज्ञेयत्वाद्देवता हृदि ॥

ऋषिस्तु ।

महेश्वरमुखाज्ज्ञात्वा यः साक्षात् तपसा मनुम् ।
संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः ॥

इति (कालानलतन्त्रे) प्रोक्तम् ।

(तथा)

गुरुत्वान्मस्तके चास्य न्यासश्च परिकीर्त्तितः ॥

(मेरुतन्त्रे)

ऋ-गताविति धातोस्तु ऋवर्णः प्रापको मतः ।
षिवर्णार्थस्तु विज्ञानमतस्तत्प्रापकस्तु सः ॥

(बृहन्मत्स्यसूक्ते)

सर्वेषां मन्त्रतत्त्वानां छादनाच्छन्द उच्यते ।
अक्षरत्वात् पदत्वाच्च मुखे छन्दः समीरितम् ॥
ऋषिच्छन्दोऽपरिज्ञानान्न मन्त्रफलभाग्भवेत् ।
दौर्बल्यं चापि मन्त्राणां विनियोगमजानताम् ॥

ऋष्यादिन्यासमुद्रा उक्तास्तन्त्रान्तरे ।

ऋषिच्छन्दोदेवतानां न्यासे चाङ्गुलयः स्मृताः ।
चतस्रोऽङ्गुष्ठरहिताः शक्त्यन्तं विन्यसेत् ततः ॥
कीलकं व्यस्तहस्ताभ्यां सर्वाङ्गे साधकाग्रणीः ।

अथाङ्गमुद्रास्तत्रैव ।

हृदये मध्यमानामातर्जनीभिर्न्यसेद्बुधः ।
मध्यमातर्जनीभ्यां च शिरसि न्यासमाचरेत् ॥
अङ्गुष्ठेन शिखायां च दशभिः कवचे न्यसेत् ।
नेत्रेषु तिसृभिश्च स्यादस्त्रमूर्ध्वोर्ध्वगं त्रिशः ॥
मध्यमातर्जनीभ्यां स्यादङ्गमुद्राः स्मृता इमाः ।

षडङ्गार्थमाह ।

हृदयायेति शब्देन हृत्स्थो देवः सविग्रहः ।
उच्यते नम इत्यस्य ज्ञानं तद्विषयं परम् ॥
शिरःशब्दो देवताया उत्कृष्टत्वाभिधायकः ।
स्वाहेति विषयाः सर्वे देवतायां समर्पिताः ॥
शिखायै तत्स्वरूपत्वं वषड्वापि तदुच्यते ।
देवताया व्यापकत्वं कवचायाभिधीयते ॥
हुमिति व्यापकं तेजो देवतायाः प्रकाश्यते ।
नेत्रशब्देन देवस्य नित्यज्ञानं प्रकाश्यते ॥
वौषडिति तदेवोक्तमस्त्रशब्देन वारणम् ।
अनिष्टस्य फट्शब्देन दाहकं तेज उच्यते ॥
ज्ञात्वैवमङ्गमन्त्रार्थमङ्गन्यासं करोति यः ।
करगास्तस्य सर्वार्था पूज्यते त्रिदशैरपि ॥

(मेरुतन्त्रे)

क्रीडार्थकाद्दिवो धातोः संपूर्णं देवतापदम् ।

साधकाय ददातीति देवता परिकीर्त्तिता ॥
रज्यमानो हृदाऽऽत्मानं हृदयेऽस्ति चिदात्मकः ।
तस्मात् तत्र नमस्कुर्यान्मुख्याङ्गुष्ठेन संस्पृशेत् ॥
स्वाहया क्रियते सम्यग्विषयाहरणं यतः ।
अनामातर्जनीभ्यां तैराकृष्टैः कं निषेव्यते ॥
शिखा महो वषड्वाऽङ्गं शिखयाऽऽत्मतनुग्रहः ।
यस्मात् तस्माद्वषडिति क्रियतेऽङ्गुलमध्यया ॥
ग्रहणार्थ-कवच्-धातुर्हुँ मन्त्रेण स गृह्यते ।
शरीरेऽतस्तु कवचं तर्जन्याऽनामयाऽपि तत् ।
यथार्थज्ञानकृद्वौषट् तन्नेत्राभ्यां प्रजायते ॥
तस्मादुक्तं तत्र वौषट् तर्जन्याद्यैस्तु तत् स्मृतम् ।
एकाक्षत्वात् कुबेरादिदैवते ङेऽन्तमुच्चरेत् ॥
भ्यान्तं विष्णवादिके रुद्रादौ तु नेत्रत्रयात्मकम् ।
आध्यात्मिकादिरूपं यत् साधकस्य विनाशयेत् ॥
अविद्याजातमस्त्रं तत् फट्तालाभ्यां प्रपञ्च्यते ।

(यामले)

न्यसेदङ्गुष्ठमुख्येषु जातिभिर्नमसाऽथ वा ।
हृदादिषु षडङ्गेषु जातिषट्केन विन्यसेत् ॥
नमः स्वाहा वषट् हुँ वौषट् फडेताश्च जातयः ।

अन्यत्रापि ।

जातिषट्कमिति प्रोक्तं हृदाद्यस्त्रान्तसंयुतम् ।

तथा च (शारदायाम्)

हृदयादिषु विन्यस्येदङ्गमन्त्राँस्ततः सुधीः ।
हृदयाय नमः पूर्वं शिरसे वह्निवल्लभाम् ॥

शिखायै वषडित्युक्तं कवचाय हुमीरितम् ।
नेत्रत्रयाय वौषट् स्यादस्त्राय फडिति क्रमात् ॥
षडङ्गमन्त्रानित्युक्तान् षडङ्गेषु नियोजयेत् ।

अङ्गन्यासस्य नित्यतोक्ता (ज्ञानमालायाम्)

पूजाजपार्चनाहोमाः सिद्धमन्त्रकृता अपि ।
अङ्गन्यासेन विधुरा न दास्यन्ति फलान्यमी ॥

(मेरुतन्त्रे)

षडङ्गं विन्यसेन्मन्त्री पञ्चाङ्गं वा यथाविधि ।
यस्य मन्त्रस्य पञ्चाङ्गं नेत्रं तस्य विहीयते ॥
अङ्गैर्विहीनस्य मनोरङ्गं तेनैव कल्पयेत् ।

तथा ।

आगमोक्तेन मार्गेण न्यासान् नित्यं करोति यः ।
देवताभावमाप्नोति मन्त्रसिद्धिः प्रजायते ॥
यो न्यासकवचच्छन्नो मन्त्रं जपति तं प्रिये ।
दृष्ट्वा विघ्नाः पलायन्ते सिंहं दृष्ट्वा यथा गजाः ॥
अकृत्वा न्यासजालं यो मूढात्मा कुरुते जपम् ।
विघ्नैः स बाध्यते नूनं व्याघ्रैर्मृगशिशुर्यथा ॥
न्यासानां प्रचुरत्वेन फलानामपि भूरिता ।
उक्तन्यासो न हि त्याज्यस्त्वधिकं कामतश्चरेत् ।

(यामले)

ततस्तु योगपीठाख्यं स्वदेहे न्यासमाचरेत् ।
आधारशक्तिं प्रकृतिं तथा कूर्ममनन्तकम् ॥

अन्यत्र तु मूलप्रकृत्यनन्तरं कालाग्निरुद्रोऽप्युक्तः ।

ततश्च मूलप्रकृतिं रुद्रं कालानलाह्वयम्—इति ।

मेरौ तु मूलप्रकृतेः प्रागेव कालाग्निरुद्र उक्तः । तदनन्तरमाधारसक्तिरुक्ता ।

तथा ।

वराहं पृथिवीं क्षीरसिन्धुं द्वीपं च रत्नजम् ।

वैष्णवे तु श्वेतद्वीप उक्तः ।

मणिजं मण्डपं कल्पपादपं मणिवेदिकाम् ।
रत्नपीठं तथैतानि मन्त्री हृद्येव विन्येसत् ॥

क्वचिन्मणिमण्डपानन्तरं नन्दनोद्यानमप्युक्तम् ।
(शारदायाम्)

अंसोरुयुग्मयोर्विद्वान् प्रादक्षिण्येन देशिकः ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं विन्यसेत् क्रमात् ॥
धर्मादयः स्मृताः पादाः पीठगात्राणि चापरे ।
मुखपार्श्वनाभिपार्श्वेष्वधर्मादीन् प्रकल्पयेत् ॥
अनन्तं हृदये पद्मं यस्मिन् सूर्येन्दुपावकान् ।
एषु स्वस्वकला न्यस्येन्नामाद्यक्षरपूर्विकाः ॥
अकाराद्यं न्यसेत् सूर्यमुकाराद्यं निशाकरम् ।
मकाराद्यं न्यसेद्वह्निं कलामण्डलसंयुतम् ॥
सत्त्वादींस्त्रीन् गुणान् न्यस्येत् तथैवात्र गुरूत्तमः ।
सत्त्वं रजस्तम इति यस्य भेदाः समीरिताः ॥
आत्मानमन्तरात्मनं परमात्मानमत्र तु ।
आदिबीजत्रयं न्यस्य शक्तिबीजपुरस्सरम् ॥
ज्ञानात्मानं प्रविन्यस्य न्यसेत् पीठमनुं ततः ।
एवं देहमये पीठे चिन्तयेदिष्टदेवताम् ॥

देवताध्यानस्य द्वैविध्यमुक्तम् (मेरुतन्त्रे)

ध्यानं कुर्यात् ततो तत्तत्कल्पोक्तेनैव वर्त्मना ।
तदपि द्विविधं प्रोक्तं सगुणं निर्गुणं तथा ॥
आत्मनो हृदयाम्भोजे कर्णिकाकेशरोज्ज्वले ।

प्रफुल्ले सोमसूर्याग्निमण्डलेन विराजिते ॥
स्वीयेष्टदेवतां तत्र विद्यादागमबोधिताम् ।
एवं यद्वेदनं तद्धि सगुणं ध्यानमुच्यते ॥
यज्जीवब्रह्मणोरैक्यं सोऽहं स्यामिति वेदनम् ।
तदेव निर्गुणं ध्यानमिति ब्रह्मविदो विदुः—इति ।

अत्र न्यासानन्तरं ध्यानात् प्रागेव मुद्राप्रदर्शनमुक्तम् ।

(मेरुतन्त्रे)

कराङ्गन्यासमुख्याँस्तु न्यासानन्यान् समाचरेत् ।
तत्तत्कल्पोदितान् पश्चात् तत्तन्मुद्राः प्रदर्शयेत्—इति ।

अन्यत्र तु ।

एवं ध्यात्वा महेशानि ततो मुद्राः प्रदर्शयेत्—इति ।

ध्यानान्तरं तदुक्तम् ।

(महाथर्वणरहस्ये) तु न्यासध्यानान्तर्यागानुक्त्वा ।

ततश्च तन्मयो भूत्वा मुद्रा एताः प्रदर्शयेत्—इत्युक्तमिति ।

तत्र कालविकल्पो बोध्यः ।

मुद्राबन्धने तत्प्रदर्शनत्यागयोश्च मन्त्रभेदा (मेरुतन्त्रे) उक्ताः ।

ॐ क्लीमिति तु बीजाभ्यां मुद्राया बन्धनं स्मृतम् ।
दर्शयेन्मूलमन्त्रेण ह्सूँ बीजेन संत्यजेत् ॥

(सनत्कुमारसंहितायाम्)

अकृत्वा मानसं यागं न कुर्याद्बहिरर्चनम् ।

अन्तर्यागविधिः (बृहदुत्तरतन्त्रे)

हृत्पद्मकर्णिकामध्ये योगपीठोपरि स्थिताम् ।
ध्यात्वा तां गन्धपुष्पाद्यैर्मानसैरुपचारकैः ॥
संपूज्य विधिवत् पश्चान्मानसं होममाचरेत् ।

(श्यामारहस्ये) धृतवचनानि ।

अमायामनहंकारमरागममदं तथा ।

अमोहदमदम्भं च अद्वेषाक्षोभकौ तथा ॥
अमात्सर्यमलोभं च दश पुष्पंविदुर्बुधाः ।
अहिंसापरमं पुष्पं पुष्पमिन्द्रियनिग्रहम् ॥
दयापुष्पं धर्मपुष्पं ज्ञानपुष्पं च पञ्चमम् ।
इत्युक्तैरुत्तमैः पुष्पैः पूजयेत् परदेवताम् ॥

(मेरुतन्त्रे)

मूलाधारे चतुष्कोणामग्निकुण्डं विचिन्तयेत् ।
तत्राग्निं कुण्डलीरूपं ध्यायेन्मूलं समुच्चरेत् ॥
धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा ।
सुषुम्णावर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहम् ॥
पुण्यं जुहोमि स्वाहेति श्लोकान्ते प्रोच्चरेत् पुनः ।
पुनर्मूलं पुनः श्लोकं पुनः पापं जुहोमि च ॥
कृत्याकृत्ये च संकल्पो विकल्पो धर्म एव च ।
हुत्वा पृथक् च स्वाहान्तं पुनः श्लोकमिमं पठेत् ॥
प्रकाशामर्षहस्ताभ्यामवलम्ब्योन्मनीस्रुवम् ।
धर्माधर्मकलास्नेहं पूर्णावह्नौ जुहोम्यहम् ॥
स्वाहान्तेनाहुतिं दत्वा प्राणायामनिरोधतः ।
निरस्तनिखिलोपाधिमात्मानं चिन्मयं स्मरेत् ॥

(श्यामारहस्यादौ) तु मूलान्ते ।

नाभिचैतन्यरूपादौ हविषा मनसा स्रुचा ।
ज्ञानप्रदीपिते नित्यमक्षवृत्तीर्जुहोम्यहम् ॥

स्वाहा इति प्रथमाहुतिः ।
मूलान्ते ।

धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा ।
सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥

स्वाहा-इति द्वितीयाऽऽहुतिः ।

मूलान्ते ।

प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ।
धर्माधर्मकलास्नेहपूर्णामग्नौ जुहोम्यहम् ॥

स्वाहा-इति तृतीयाऽऽहुतिः ।

मूलान्ते ।

अन्तर्निरन्तरनिरिन्धनमेधमाने
मोहान्धकारपरिपन्थिनि संविदग्नौ ।
कस्मिंश्चिदद्भुतमरीचिविकाशभूमौ
विश्वं जुहोमि वसुधादिशिवावसानम् ॥

स्वाहा-इति चतुर्थाहुतिः । इति श्लोकचतुष्टयेनाहुतिचतुष्टयमुक्तम् ।

(मेरुतन्त्रे) ईडया वायुमाकृष्य गुदं किंचिदाकुञ्च्य जिह्वां तालुगतां विधाय मूलाधारात् कुण्डलिनीमुत्थाप्य सहस्रदलकमलकर्णिकान्तर्गतपरमशिवेन सह तां संयोज्य प्रोक्तपीठे देवतामर्चयेदिति विशेष उक्तः ।

(यथा)

वामनाडीः समाकृष्य किंचिदाकुञ्चयेद्गुदम् ।
रेचयेत् सममार्गेण जिह्वां तालुगतां चरेत् ॥
शक्तिं शिवपदे योज्य किंचिदाकुञ्चयेदधः ।
कृत्वैवं तु यजेत् पीठं न्यासमार्गेण मन्त्रवित् ॥
तस्मिन् पीठे स्थितामिष्टदेवतां मूर्त्तिविग्रहाम् ।
ध्यात्वा यजेच्चन्दनाद्यैर्मानसैर्भोजनान्तकैः ॥
भोजनावसरे त्वन्तर्वैश्वदेवं समाचरेत् ।

तत्रैव ।

तदन्ते तन्मयो भूत्वा जपेदष्टोत्तरं शतम् ।
मूलं तत् सर्वसंपत्त्यै देवतायै निवेदयेत् ॥

(मातृकार्णवे)

माला पञ्चाशिका प्रोक्ता सूत्रं शक्तिशिवात्मकम् ।

ग्रन्थिः कुण्डलिनी प्रोक्ता कलान्ते मेरुसंस्थितिः ॥

(कुमारीकल्पे) तु होमात् पूर्वं जप उक्तः ।

ततो वै मानसजपं कुर्याद्धोमादिमेव च ।
नमस्कृत्य तथा स्तुत्वा बहिर्यागमथाचरेत्—इति ॥

(चन्द्रिकायाम्)

इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत् ।
न तस्य पापपुण्यानि जीवन्मुक्तो भवेद्भुवि ॥

इत्यन्तर्यागविधिः ।

अथ पात्रासादनम् । तदुक्तम् (यामले)

साध्यसाधकयोर्मध्ये षट्त्रिंशदङ्गुलं भवेत् ।
द्वादशाङ्गुलमूर्ध्वं च तदधो द्वादशाङ्गुलम् ॥
द्वादशाङ्गुलमध्यस्थं तत्र संस्थापयेद्बुधः ।

(मेरुतन्त्रे)

अथार्घादिकपात्राणां फलं वक्ष्ये शुभाशुभम् ।
सर्वकामप्रदं स्वर्णं रौप्यमायुःसुतप्रदम् ॥
सौभाग्यं ताम्रपात्रेण धर्मवृद्धिस्तु मृण्मये ।
नारिकेले देवतुष्टिः पुष्टिकृत् काचसंभवम् ॥
लक्ष्मीप्राप्तिर्बिल्वपात्रे ब्राह्मण्यं ब्रह्मवृक्षजे ।
मारणोच्चाटने लौहं स्तम्भे प्राषाणजं भवेत् ॥
मन्त्रस्याराधने काष्ठं वाममार्गे तु तौम्बिकम् ।
रत्नादीनां तु पात्राणि शुभरेखाङ्कितानि च ॥
अर्घनैवेद्यपूजार्थं बलिदाने प्रकल्पयेत् ।

(महाहारतन्त्रे)

कन्याकोटिप्रदानानि तथा हेमशतानि च ।
यो ददाति महेशानि राहुग्रस्ते दिवाकरे ॥
तत्फलं कोटिगुणितं नारिकेलार्घपात्रतः ।

शक्तिविषयमिदम्।

देवताविशेषेण पात्रविशेषमाह (मेरुतन्त्रे)

कांस्यस्य वाऽथ रौप्यस्य शैवे शङ्खवरो हरौ।
महाशङ्खो वाममार्गे स्फाटिकं ग्रहनायके॥
पात्राणामादरः कार्यः पात्राण्येवोत्तमानि तु।
वलिहोमक्रियाद्यं हि विना पात्रं न सिद्ध्यति॥
षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्त्तितम्।
मध्यमं तु त्रिभागोनं कनिष्ठं द्वादशाङ्गुलम्॥
वस्वङ्गुलविहीनं तु न पात्रं कारयेत् क्व चित्।
नाभीविवररूपाणि पुण्डरीकाकृतीनि च॥
शङ्खनीलोत्पलाभानि पात्राणि परिकल्पयेत्।
श्वेतादीन्यतिशस्तानि विप्रादीनां क्रमेण च॥

(तत्त्वसारसंहितायाम्)

शङ्खं ज्ञानप्रदं मुक्ता शुक्तिर्विद्याप्रदायिनी।
कपालालाबुपात्राणि योगसिद्धिकराणि च॥

कपालादिविधिर्वीरपरः।

(समयाचारे)

सामान्यार्घं ततः कृत्वा पयसा साधकोत्तमः।
तज्जलैर्मण्डलं कृत्वा पात्राणि स्थापयेत् ततः॥

सामान्यार्घविधिः प्रागुक्तः।

अथ कलशस्थापनविधिः (सिद्धान्तसारे)

अस्त्रेण भूमिं संशोध्य सामान्यार्घोदकेन च।
स्ववामे विन्दुषट्कोणवृत्तवेदास्रमण्डलम्॥
संलिख्य मूलमन्त्रान्ते देवतानाम कीर्त्तयेत्।
पूजयेत् कलशाधारमण्डलाय नमोऽणुना* ॥

---

* नम इति मन्त्रेण।

आधारं स्थापयेत् तत्र क्षालितं हेति*मन्त्रतः ।
यजेद्दशकलाभिस्तु व्याप्तं तत्राग्निमण्डलम् ॥
प्रभाऽप कलशं तत्र स्थापयेद्देवताधिया ।
सूर्यविम्बं यजेत् तत्र कलाद्वादशसंयुतम् ॥
शुद्धेन पाथसा कुम्भं मूलमन्त्रेण पूरयेत् ।

वाममार्गे तु ।

शुद्धेन हेतुना मन्त्री मूलमन्त्रेण पूरयेत् ।

इति मन्त्रान्तरवचनं सुधार्णवादौ स्थितम् । शुद्धेनेति संस्कृतेनेत्यर्थः ।

तथा ।

चन्द्रविम्बं यजेत् तत्र कलाषोडशसंयुतम् ।
तारभागैस्त्रिभिर्मन्त्री विम्बत्रितयमर्चयेत् ॥
तीर्थं तत्र समावाह्य हेतिवर्मस्वमूलकैः ।
मन्त्रैः संरक्ष्यावगुण्ठ्य संवीक्ष्याभ्युक्ष्य मन्त्रवित् ॥
पूजयेद्गन्धपुष्पाद्यैश्छादयन्मत्स्यमुद्रया ।
†मन्त्रेणानेन देवेशि कलशं चाभिमन्त्रयेत् ॥
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।
इत्युक्त्वा मूलमन्त्रेण मन्त्रयेदष्टधा घटम् ॥
कुम्भमुद्रां प्रदर्श्याथ भावयेद्देवतात्मकम् ।

---

* हेतिरस्त्रम् ।

† एतत्पद्यार्धम् २ पु. नोपलभ्यते ।

कुम्भमुद्रा त्वग्रे वक्ष्यते ।

(यामले)

स्वदक्षे प्रोक्षणीपात्रमाधायाद्भिः प्रपूरयेत् ।
किंचिदर्घ्याम्बु संगृह्य प्रोक्षण्यम्भसि योजयेत् ॥
ततः साधारकं पात्रं पुरतः स्थापयेद्बुधः ।
तत्पार्श्वे पाद्यदानं च तत्पार्श्वेऽर्घप्रदानकम् ॥
आचमनीयं तु तत्पार्श्वे तद्वामे मधुपर्ककम् ।
पुनराचमनीयं च स्नानीयं तत्क्रमान्न्यसेत् ॥

अर्घ्याम्बु इति सामान्यार्घोदकमित्यर्थः । सामान्यार्घोदकस्य पात्रासादनात् पूर्वमेव स्वदक्षिणे स्थापनीयत्वात् । अत एव तद्दक्षिणपार्श्वे पाद्यपात्रस्थापनार्थं किंचित् स्थलं परित्यज्य प्रोक्षणीपात्रं स्थापयेदिति । तत्पार्श्वेऽर्घप्रदानकमिति पाद्यपात्रवामभागेऽर्घपात्रमित्यर्थः ।

(मेरुतन्त्रादौ तु)

अर्घस्योत्तरदिग्भागे पाद्यमाचमनीयकम् ।
मधुपर्कं च संस्थाप्य त्रिकोणेषु यथाक्रमम् ॥

इत्यर्घपात्रस्थापनानन्तरं तद्वामभागे पाद्यादिपात्रस्थापनमुक्तम् । उपचारसमर्पणसमयेऽपि पाद्यदानात् पूर्वमर्घदानं तत्रोक्तम् ।

(नवरत्नेश्वरे)

एकपात्रं न कर्त्तव्यं यदि साक्षान्महेश्वरः ।
मन्त्राः पराङ्मुखा यान्ति आपदश्च पदे पदे ॥
इह लोके च दारिद्र्यं मृते च पशुतां व्रजेत् ।

तत्रैव ।

पात्रद्वयमभावाद्वा कुर्यान्न्यूनं न चाचरेत् ।

(गौतमीये)

अर्घपात्राणि च त्रीणि पाद्यस्यापि त्रयं तथा ।
तथैवाचमनीयानि पात्राणि च विभागशः ॥
तथाकरणदौर्बल्यादेकमेव प्रशस्यते ।

पाद्यादिद्रव्याण्युक्तानि (फेत्कारिण्याम्)

उशीरं रोचनं चैव पाद्यपात्रे तु कल्पयेत् ।
कुशाग्रानक्षतं चैव यवव्रीहितिलानपि ॥
आज्यसिद्धार्थपुष्पाणि क्षिपेदर्घस्य पात्रके ।
जातीकर्पूरकङ्कोलबहुमूलतमालकान् ॥
चूर्णयित्वा यथान्यायं क्षिपेदाचमनीयके ।
माक्षिकं शर्करासर्पिर्दधिक्षीरयुतं तथा ॥
मधुपर्कं कल्पयित्वा प्रदद्याद्विधिपूर्वकम् ।

(मेरुतन्त्रे)

पाद्यं श्यामाकदूर्वाब्जविष्णुक्रान्ताभिरुच्यते ।

तथा ।

गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपाः ।
दूर्वा इत्यर्घपात्रस्य प्रोक्तं द्रव्याष्टकं सुराः ॥

सुरा इति देवसंबोधनम् ।

तथा ।

जातीलवङ्गकङ्कोलैर्मतमाचमनीयकम् ।
कुशपुष्पयवव्रीहिर्बहुमूलतमालकम् ॥
दापयेत् प्रोक्षणीपात्राम्भसि तत्प्रणवेन च ।

(महाकालसंहितायाम्)

अन्यानिवेदितं तोयं प्रकृतिस्थं सुशीतलम् ।
हेमादिकुम्भपात्रस्थं स्नानीयं जलमुच्यते ॥

(चन्द्रिकायाम्)

गन्धाद्भिः कारयेत् स्नानम् .... इति ।

(भैरौ)

शुद्धाभिरद्भिर्विहितं पुनराचमनीयकम् ।
द्रव्याभावे प्रदातव्याः क्षालितास्तण्डुलाः शुभाः ॥

विष्णुपूजायां शङ्खस्थापनमावश्यकम् ।

तदुक्तं कुम्भसंभवेन ।

विनैव शङ्खं पूजां यो वैष्णवः पूजयेद्धरिम् ।
पूजाफलं न चाप्नोति स सम्यक् पूजकोऽपि सन् ॥

शङ्खस्थापनविधिरुक्तो (मेरुतन्त्रे) स्ववामे इत्युपक्रम्य ।

वृत्तेन वेष्टितं सम्यक् त्रिकोणं चन्दनाम्भसा ।
तद्बहिश्चतुरस्रं च विदध्यान्मत्स्यमुद्रया ॥
संपूज्य गन्धैर्देवार्घ्यमण्डलाय नमोऽणुना ।
अङ्गानि चतुरग्न्यादिकोणेषु पुरतस्तथा ॥
दिक्षु चास्त्रं समभ्यर्च्य शङ्खाधारं प्रविन्यसेत् ।
आधारेण विना अंशो न तृप्यन्ति च मातरः ॥
तस्माद्विधिवदाधारं त्रिपदं वा चतुष्पपदम् ।
पद्माभं वा त्रिकोणं वा योन्याभं धातुजं तु तत् ॥
मूलान्ते चामुकाधारपात्रं संस्थापयामि च ।
उक्त्वा शङ्खादिकाधारं मण्डले स्थापयेदथ ॥
मँ रँ धर्मप्रदेत्युक्त्वा वदेद्दशकलात्मने ।
ङेन्तं वह्नेर्मण्डलं च देवनाम च कीर्त्तयेत् ॥
ततोऽर्घपात्राधाराय नमः प्रोक्त्वा प्रपूजयेत् ।
वह्नेर्दशकलाः पूज्यास्तत्र प्रोक्ताः प्रदक्षिणम् ॥

अत्र शङ्खार्घयोरभिधानमुक्तविधानशङ्खविशेषार्घस्थापनसाधारण्यादिति बोध्यम् ।

अस्त्रमन्त्रेण च ततः कनकादिविनिर्मितम् ।
अर्घ्यादिपात्रमथ वा शङ्खमस्त्राणुना जलैः ।
प्रक्षाल्यामुकदेवार्घपात्रं प्रतिष्ठापयामि ॥
एवमुक्त्वा तदाधारे संस्थाप्यैवं वदेत् पुनः ।

अर्थप्रदद्वादशेति कलात्मने वदेत् ततः ॥
सूर्यमण्डलमुच्चार्य ङेन्तं देवस्य नाम तु ।
अर्घपात्राय च नमो मनुनाऽनेन पूजयेत् ॥
तत्पात्रमथ तत्रैव भावयेद्भूमिमण्डलम् ।
षट्कोणं तत्र चाङ्गानि पूजयेत् पूर्ववत् ततः ॥
कला द्वादशसूर्यस्य प्रोक्ताः पात्रे प्रदक्षिणम् ।
ततः सुधामयैस्तोयैर्मूलान्ते मातृकां पठन् ॥
विलोमां पूरयेत् तस्मिन् पूजको मनुनाऽमुना ।
उँ सँ कामप्रदेत्युक्त्वा षोडशेति कलात्मने ॥
नमः पञ्चदशार्णोऽयं मन्त्रः शङ्खप्रपूरणे ।

तथा तन्त्रान्तरेऽपि ।

कर्णचन्द्रौ विन्दुयुतौ कामप्रदपदं ततः ।
षोडशान्ते कलाशब्दमात्मान्ते हृदयाणुना ॥
गन्धपुष्पैः समभ्यर्च्य कलाषोडशकं यजेत् ।

अत्र कर्ण उकारश्चन्द्रोऽर्धचन्द्रो विन्दुरनुस्वारस्तेन उमित्येकमेव बीजं विधाय मुक्तावल्यामुद्धृतम्। स एव प्रकारो नृसिंहठक्कुरैरप्यविचार्य स्वीयग्रन्थे ताराभक्तिसुधार्णवे धृतः। वस्तुतः कर्ण उकारश्चन्द्रः सकारस्तयोर्विन्दुयोगाच्च उँ सामिति बीजद्वयमेव ।

सकारः शक्तिनामा च चन्द्रपीयूषशीतलः ।

इति वर्णकोशात् ।

शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परामारहरयः ।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥

इत्यादौ चन्द्रवाचकशीतकिरणपदस्य सकारपरत्वदर्शनाच्च । न च चन्द्रपदस्य क्वचिदर्धचन्द्रपरत्वदर्शनादत्रैकमेव बीजमस्त्विति वाच्यम् । बीजद्वयप्रकाशकमेरुतन्त्रविरोधात् ।

तथा ।

तत् तोयं गन्धपुष्पाद्यैः पूजयित्वा समर्चयेत् ।
कलाषोडशकं चान्द्रं पश्चात् सर्वकलासु च ॥
प्राणप्रतिष्ठां कुर्वीत पूजान्ते साधकस्ततः ।

वह्न्यर्कचन्द्राणां कलाः प्रागुक्ताः ।

तत्पूजनप्रकाराश्च (कुलार्णवे)

आग्नेया यादिवर्णैस्तथा दश धर्मप्रदाः कलाः ।
कभाद्या वसुदाः सौराष्ठडान्ता द्वादशेरिताः ॥
सौम्याः कामप्रदायिन्यः षोडश स्वरजाः कलाः ।

विन्दुयुक्तान् यादिदश वर्णान् पूर्वं दत्वाऽग्निकलाः । कादिठान्तान् भादिडान्तान् प्रतिलोमवर्णांश्च विन्दुयुक्तानादौ दत्वा सूर्यकलाः । अकारादिषोडशस्वरान् विन्दुयुक्तानादौ दत्वा चन्द्रकलाश्च पूज्या इत्यर्थः ।

(मेरुतन्त्रे)

प्राग्वत् तीर्थं समावाह्य मूलमन्त्रेण तत्र तु ।
संयोज्य नेत्रमन्त्रेण पुष्पं न्यस्य शिखाणुना ॥
प्रदर्श्य गालिनीं मुद्रां मुद्रया धेनुसंज्ञया ।
अमृतीकृत्य विधिवत् सुधाबीजेन साधकः ॥
ध्यात्वेष्टदेवतां तत्र सकलीकरणं चरेत् ।
अङ्गन्यासेन चास्त्रेण कलयेच्च दिशो दश ॥
नेत्रमन्त्रेण संवीक्ष्य मुद्रया शङ्खसंज्ञया ।
अवष्टभ्य ततो दीप्यमुद्रया योनिरूपया ॥
गन्धपुष्पादिभिस्तत्र पूजयेदिष्टदेवताम् ।
षडङ्गानि च संपूज्य मन्त्रयेन्मूलमन्त्रतः ॥
अष्टकृत्वस्ततश्चार्घ्यं छादयेन्मत्स्यमुद्रया ।

वैष्णवे तु योनिमुद्रास्थाने धेनुमुद्रैव ।

तदुक्तमागस्त्येन ।

अस्त्रमन्त्रेण संरक्ष्य कवचेनावगुण्ठयेत् ।

दर्शयेद्धेनुमुद्रां च बोधयेत् तत्स्वमुद्रया— इति ॥

स्वमुद्रया शङ्खमुद्रया । मुद्रास्त्वग्रे वक्ष्यामः ।

(मरौ)

तच्छङ्खस्थं जलं किंचित् कुम्भतोये विनिःक्षिपेत् ।

तन्त्रान्तरे ।

स्वदक्षे प्रोक्षणीपात्रं संस्थाप्य साधकोत्तमः ।
तदुत्तरे पाद्यपात्रमर्घद्वन्द्वं च कल्पयेत् ॥

अर्घद्वन्द्वमिति । सामान्यार्घं विशेषार्घं चेत्यर्थः ।

अर्घपात्रप्रमाणमुक्तम् (सिद्धान्तसारे)

तलप्रमाणमर्घस्य पात्रं वेदाङ्गुलोच्छ्रितम् ।
वस्वङ्गुलं वा कुर्वीत नेत्राङ्गुलसमुच्छ्रितम् ॥
वर्द्धयेत् प्रोक्षणीपात्रं तस्मान्न्यूनं न कारयेत् ।

(महाकालसंहितायाम्)

आदौ मुख्यतमं ज्ञेयं षोडशाङ्गुलसंमितम् ।
मध्यमं द्वादशमितमधमं स्याद्दशाङ्गुलम् ॥
वस्वङ्गुलविहीनं तु पात्रं नैव च कारयेत् ।
सर्वत्र स्वर्णवत् ताम्रमर्घ्यपात्रं ततोऽधिकम् ॥

तत्र सामान्यार्घस्थापनविधिः प्रागुक्तः । विशेषार्घस्थापनं तु पूर्वोक्तशङ्खस्थापनवत् कार्यम् । श्यामादिविद्यायां तु विशेषविधिरुक्तः ।

यथा (त्रिशक्तिरत्ने)

कलशाद्दक्षिणे भागे त्रिकोणं वृत्तसंयुतम् ।
षट्कोणं चतुरस्रं च कृत्वा तन्मध्यभागतः ॥
विलसच्चन्द्रशकलं गन्धर्वं च समालिखेत् ।
उजापूकादिकं पीठं तच्चतुर्दिक्षु पूजयेत् ॥
अङ्गमन्त्रैश्च षट्कोणे शक्तौ मूलत्रिभेदतः ।
आधारशक्तिं संपूज्य पूर्ववद्यन्त्रिकामपि ॥
महाशङ्खं नारिकेलं सौवर्णं राजतं तथा ।

ताम्रं शुक्त्युद्भवं वाऽपि पात्रं तत्र निधापयेत्॥

गन्धर्वमिति। ईकारमित्यर्थः। उजापूकादीति। उड्डियानजालन्धरपूर्णगिरिकामरूपाख्यानि पीठानीत्यर्थः। शक्तौ इति। त्रिकोणे कौलिकमतमभिप्रेत्य महाशङ्खमित्युक्तिः।

पात्रभेदास्तन्त्रान्तरेऽप्युक्ताः।

पात्रं काञ्चनकाचरूप्यजनितं मुक्ताकपालोद्भवं
वैश्वामित्रमुदं* च कामदमिदं हैमं प्रियं स्फाटिकम्।
ताम्रं प्रीतिदमिष्टसिद्धिजनकं श्रीनारिकेलोद्भवं
पापघ्नं स्फुटमन्त्रसिद्धिजनकं मुक्तिप्रदं मौक्तिकम्॥

(त्रिशक्तिरत्ने)

समर्च्य पूर्ववन्मन्त्री पात्रं द्रव्येण पूरयेत्।
जपन् विलोमतो वर्णान् मूलमन्त्रसमुज्ज्वलान्॥

(भैरवतन्त्रे)

सकूर्चं सुभगं पात्रं विन्यस्य शुद्धपाथसा।
कुण्डगोलोद्भवेनापि स्वयम्भूकुसुमेन वा॥
वीरः स्वाद्येण चापूर्य मूलविद्यां समुच्चरन्।

शुद्धपाथसेत्यादि। दक्षिणमार्गी शुद्धजलेन। वाममार्गी चेत् कुण्डगोलोद्भवादिना पाथसाऽऽपूर्येत्यर्थः।

(त्रिशक्तिरत्ने)

संपूज्य पूर्ववत् तत्र वृत्तं षट्कोणमालिखेत्।
अकथादित्रिरेखाभ्यां त्रिकोणं वृत्तमध्यतः॥
मूलखण्डत्रयेणाथ त्रिकोणं परिपूजयेत्।
षट्कोणे च षडङ्गानि ततस्तीर्थमयं स्मरेत्॥
आनन्दभैरवं ध्यात्वा समभ्यर्च्य विधानतः।
पूजयेत् पञ्चरत्नानि कुलद्रव्याणि निःक्षिपेत्॥

---

* विश्वामित्रप्रियो नारिकेलखण्डोद्भवमित्यर्थः।

पञ्चरत्नानीति । गगनरत्नादीनि पद्धतौ वक्ष्यन्ते ।

(कुमारीकल्पे)

अर्घद्रव्यं चार्घपात्रे निःक्षिपेद्यत्नतः सुधीः ।
कुण्डगोलोद्भवं द्रव्यं स्वयम्भूकुसुमं तथा ॥
नाधर्मं विद्यते सुभ्रु महामन्त्रस्य साधने ।

(त्रिशक्तिरत्ने)

रचयेत् पूर्ववच्छेषमयमर्घविधिः स्मृतः ।

(भैरवतन्त्रे)

वामेन पाणिनाऽऽच्छाद्य मूलमष्टौ जपेत् ततः ।
भूतिर्नीं धेनुमुद्रां च योनिमुद्रां प्रदर्शयेत् ॥

अत्र कुण्डगोलोद्भवस्वयम्भूकुसुमादिकुलद्रव्यनिःक्षेपविधिर्वीरपरः ।

(पशुकल्पे तु)

गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपाः ।
दूर्वा इत्यर्घपात्रस्य प्रोक्तं द्रव्याष्टकं सुराः ॥

इति मेरुतन्त्रोक्तद्रव्याष्टकस्यैव निःक्षेपो बोध्यः ।

एवं च वामेन पाणिनेत्यपि वाममार्गिपरम् । दक्षिणमार्गे तु दक्षिणहस्तेनैवाच्छादनं संप्रदायसिद्धम् ।

(भैरवतन्त्रे)

किं चित् तोयं समादाय चान्यपात्रेषु निःक्षिपेत् ।
पूजाद्रव्याणि चात्मानं प्रोक्षयेत् तेन वारिणा ॥

(देवीपद्धतौ)

विशेषार्घोत्तरे भागे पात्रमाचमनीयकम् ।
मधुपर्कं च तद्वामे स्थापयेत् सुरवन्दिते ॥
संपृक्तं मधुपर्कं स्यात् क्षौद्रं दध्ना घृतेन च ।
प्रीतिकृत् सर्वदेवानां कांस्यपात्रे प्रकीर्त्तितम् ॥

कांस्यपात्रे च सकलसाधारणम् ।

देवतादिभेदेन मधुपर्कपात्रभेदो (मेरुतन्त्रे)

कांस्यस्य वाऽथ रूप्यस्य शैवे शङ्खवरो हरौ ।

महाशङ्खो वाममार्गे स्फाटिकं ग्रहनायके ॥

तत्रैव ।

मधुपर्कस्तु सक्षौद्रं दधि तच्चेन्न लभ्यते ।
दधिदुग्धं गुडः क्षौद्रे घृतप्रतिनिधिर्न हि ॥

मधुपर्कपदार्थ उक्तस्तत्रैव ।

परमं यत् पदं देवा मधुसंज्ञं तदुच्यते ।
तदाप्यते येन कर्म तत् प्रोक्तं मधुपर्ककम् ॥

देवतोद्देश्यकं यद्दानं परमपदप्राप्तिफलकं स मधुपर्कपदार्थ इत्यर्थः । इदं च मधुपर्कप्रदानजन्यफलानुकीर्तनपरम् । वस्तुतस्तु मधुना पृच्यते इज्याद्यस्मिन्निति मधुपर्कपदव्युत्पत्तिः । पृची संपर्के इति धात्वनुसारात् ।

(श्रीनृसिंहचरणार्चनपद्धतौ)

पुनराचमनीयार्थं पात्रं संस्थापयेत् ततः ।
स्नानं शङ्खोदकेनैव देवदेवस्य चक्रिणः ॥

शैवे तु शङ्खोदकं निषिद्धम् ।

तदुक्तम् (सिद्धान्तसंग्रहे)

नाक्षतैरर्चयेद्विष्णुं न तुलस्या विनायकम् ।
न दूर्वया यजेद्दुर्गां न शम्भुं शङ्खवारिणा ॥

पाद्याचमनीयादिपात्रस्थापनं तु सामान्यार्घस्थापनवत् कार्यम् ।

तदुक्तं तत्रैव ।

सामान्यार्घोक्तविधिना कुर्यात् पाद्यादिपात्रकम्—इति ।

(महाकालसंहितायाम्)

तानि गन्धाक्षतजलकुसुमैः परिपूरयेत् ।
पाद्ये पाद्योक्तवस्तूनि अर्घ्ये अर्घ्योदितानि च ॥
स्नानीयाचमनादौ च द्रव्याण्युक्तानि वै पुरा ।
तैरन्वितानि कार्याणि पात्राणि सकलानि च ॥

(मेरुतन्त्रे)

एकैकपात्रं मूलेन ह्यष्टकृत्वोऽभिमन्त्रयेत् ।
प्रदर्शयेद्धेनुमुद्राम् .... इति ।

तन्त्रान्तरे वीरकल्पे तु श्रीपात्रं शक्तिपात्रादिस्थापनमुक्तम् ।
(महाकालसंहितायाम्)

अस्मिन्नेव ह्यवसरे श्रीपात्रस्थापनं चरेत् ।
कौलः प्रसन्नया कुर्यात् क्षीरमध्वादिभिर्द्विजैः ॥
यतिस्तु नोभयं कुर्यान्नेच्छत्याभ्यामिति द्विजः ।

प्रसन्नया सुरया । द्विजैः राजन्यवैश्यैः । द्विजो विप्रः । आऽभ्यां क्षीरमधुभ्यामपि नेच्छतीत्यर्थः । अस्मिन् कल्पे तस्यानधिकारादिति भावः ।

तथा ।

अतः कौलिककार्यार्थं विशिष्य तदहं ब्रुवे ।

तद्विधिस्त्वसाधारणत्वान्नेह लिख्यते ।

क्वचित् तु ।

दक्षिणे मण्डलं कृत्वा श्रीपात्रं स्थापयेत् सुधीः ।
विशेषार्घोक्तविधिना .... इत्युक्तम् ॥

दक्षिणे श्रीपात्रस्थापनमुक्त्वा शक्तिपात्रादिस्थापनक्रममाह ।
(महाकालसंहितायाम्)

वामे संस्थापयेच्छक्तिपात्रं त्रिदशवन्दिते ।
मध्ये चत्वारि पात्राणि पुनरन्यानि योजयेत् ॥
गुरुर्भोगश्च वीरश्च कुलं चेति प्रकीर्तितम् ।
श्रीपात्रस्य च ये मन्त्रास्ते मन्त्राः सर्वपात्रगाः ॥
श्रीपात्रस्य क्रिया या हि सा क्रिया सर्वपात्रगा ।
तादृक्क्रियाद्यशक्तौ तु सामान्येनापि पूजयेत् ॥
पृथक्कला न चार्च्यास्तु दश द्वादश षोडश ।
शक्तेरावाहनं शक्तौ गुरोरपि गुरौ तथा ॥
परिवारान् भोगपात्रे वीरे त्वावरणात्मिकान् ।
कौलिकान् कुलपात्रे च समावाह्य यजेच्छनैः ॥

तथा ।

श्रीपात्रस्याधिकारी तु स्वयमेव न चेतरः ।

शक्तेस्तु शक्तिपात्रं स्यात् गुरुपात्रं गुरोरपि ॥
भोगपात्रं सुतादीनां शिष्याणां वीरपात्रकम् ।
कुलपात्रं कौलिकानां निर्णयः प्रोक्त ईदृशः ॥

तन्त्रान्तरे तु ।

श्रीपात्रघटयोर्मध्ये सर्वपात्राणि स्थापयेत् ।
गुरुपात्रं घटस्थान्ते तदन्ते भोगपात्रकम् ॥
तदन्ते शक्तिपात्रं च योगिनीनां तदन्तिके ।
तदन्ते वीरपात्रं च वलिपात्रं तदन्तिके ॥
पाद्यं चाचमनीयं च पात्राणि स्थापयेत् क्रमात् ।
उत्तमं नव पात्राणि सप्त पात्राणि मध्यमम् ॥
अधमं त्रीणि पात्राणि एकपात्रं न कारयेत्—इत्युक्तम् ।

पाद्यं चाचमनीयं चेत्युपलक्षणम् । अर्घस्नानीयादिपात्राण्यपि स्थापनीयानि । एतावदशक्तौ (त्रिशक्तिरत्ने)

अथवा कलशं शङ्खं शक्तिपात्रत्रयं भवेत् ।

अस्मिन् कल्पेऽपि पाद्यादिपात्राणि स्थापनीयानि पूजोपयुक्तत्वादिति सुधार्णवकृतः । 'पाद्यं चाचमनीयं च अर्घं च नवमं विदु'रिति मन्त्रचिन्तामणिधृल्लिखितपाठः प्रामादिकः । सुधार्णवकल्पलतादिषु बहुषु ग्रन्थेषु एतादृशपाठस्यानुपलम्भात् । अर्घपात्रस्य नवमपात्रत्वे श्रीपात्रस्यातिरिक्तत्वापत्तेश्च । अत एव (कुलरत्नावल्याम्)

कुलकुम्भश्च श्रीपात्रं शक्तिपात्रं तथैव च ।
गुरुपात्रं भोगपात्रं योगिनीपात्रमेव च ॥
कुलपात्रं वीरपात्रं नवमं वलिपात्रकम्—इत्युक्तम् ।

(त्रिशक्तिरत्ने)

पुष्पादिना समुद्धृत्य विन्दुं शङ्खामृतस्य च ।
निःक्षिपेत् सर्वपात्रेषु सर्वं दिव्यं विभावयेत् ॥

(तत्त्वार्णवे)

ध्यात्वैवं तर्पयेन्मूर्ध्नि तावुभौ साधकः सुधीः ।

तावुभाविति । आनन्दभैरवमानन्दभैरवीं चेत्यर्थः । तयोर्ध्याने त्वग्रे वक्ष्येते ।
(त्रिशक्तिरत्ने)

ब्रह्मरन्ध्रे स्वके मन्त्री मुद्रया तत्त्वसंज्ञया ।
तर्पयेद्गुरुपात्रीयद्रव्येणौघत्रयं सुधीः ॥
स्वगुरूनपि संतर्प्य त्रिः सकृद्वा विशेषतः ।
आत्मनो हृदयाम्भोजे परिवारगणावृताम् ॥
देवीपात्रामृतेनापि तर्पयेत् कुलनायिकाम् ।

देवीपात्रं श्रीपात्रम् । तत्त्वमुद्रा वक्ष्यते । ओघत्रयमिति । दिव्यौघं सिद्धौघं मानवौघं चेत्यर्थः ।

तत्र श्यामाया दिव्यौघा गुरुपङ्क्तय उक्ता (भावचूडामणौ)

तत्रादौ कालिका देवी तस्याः शृणु गुरुक्रमम् ।
महादेवी महादेवस्त्रिपुरश्चैव भैरवः ॥
दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते ।
ब्रह्मानन्दः पूर्णदेवश्चलचित्तश्चलाचलः ॥
कुमारः क्रोधनश्चैव वरदः स्मरदीपनः ।
माया मायावती चैव मानवौघान् शृणु प्रिये ॥
विमलः कुशलश्चैव भीमसेनः सुधाकरः ।
मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ॥
मूलदेवोऽवन्तिदेवो विघ्नेश्वरहुताशनौ ।
संतोषः समयानन्दः कालिकागुरवः स्मृताः ॥
दिव्या वसन्ति खे नित्यं सिद्धा भूमाविहापि च ।
मानवौघा मानवेषु मम रूपधराः सदा ॥
आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः ॥
मानवौघान्तिमे देवि स्वगुरूनपि योजयेत् ।

ताराविद्याया गुरुपङ्क्तयोऽपि तत्रैव ।

अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान् ।
ऊर्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा वत्स सिद्धौघान् शृणु तत्त्वतः ।
वशिष्ठः कूर्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवौघानथ वक्ष्यामि सद्गुरून् ।
तारावती भानुमती जया विद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुलेश्वरः ।
विरूपाक्षः केररी च कथितं तारिणीकुलम् ॥
आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च देव्यन्ताः परिकीर्त्तिताः ॥

अथ श्रीविद्यागुरवस्तत्रैव ।

अथ वक्ष्यामि देवेशि श्रीषोडश्या गुरुक्रमम् ।
आनन्दनाथदेवश्च परप्रकाशकस्तथा ॥
ततः परशिवो देवः परशक्तिस्ततः परम् ।
कौलेश्वरः शक्तिदेवः कुलेशानश्च कामुकः ॥
सिद्धौघान् कथयिष्यामि भोगक्रीडश्च भैरवः ।
समयो देवसहजौ मानवौघान् शृणु प्रिये ॥
गणेशो विष्णुविमलौ सहजो भुवनस्तथा ।
नीलश्च सुप्रियः पश्चात् कथिता गुरवः क्रमात् ॥

अथ दुर्गागुरुपङ्क्तयस्तत्रैव ।

शृणु वत्स महादेव गुरून् दुर्गामनूद्भवान् ।
परमात्मा परानन्दः परमेष्ठी महोदयः ॥
कृष्णः कालः कलानाथो दिव्यौघा भैरवान्तिकाः ।

नारदः काश्यपः शम्भुर्भार्गवः कुलकौलिकः ॥
एते पञ्च महादेव सिद्धौघाः परिकीर्त्तिताः ।
रुद्राचार्यः क्षमाचार्यः पवनाशनसंज्ञकः ॥
कुमारीशः शक्तिधरो घनानन्दः प्रकाशकः ।
हरिशर्मा विष्णुशर्मा दत्तात्रेयः प्रियंवदः ॥
बहुला शाकिनी देवी चर्यानाथः प्रकीर्तितः ।

एवं तत्तद्विद्यागुरुपङ्क्तयस्तत्तत्कल्पेभ्योऽवगन्तयाः । एषां तर्पणं तु श्री-अमुकानन्दनाथश्रीपादुकां तर्पयामि । एवं श्री अमुक्यम्बाश्रीपादुकां तर्पयामि इत्यादि ।

गुरुचतुष्टयमुक्तम् (भावनिर्णये)

गुरुः परमगुरुश्चैव परापरगुरुस्तथा ।
परमेष्ठी गुरुश्चैव स्वस्वाम्नाये प्रतर्पयेत् ॥

(कुलचूडामणौ)

अज्ञाने गुरुनाम्नां वै गुरुत्रितयमर्चयेत् ।
चतुष्टयं वा संकोचो न कर्त्तव्यस्ततः परम् ॥

(भावनिर्णये)

आदौ सर्वत्र देवेशि मन्त्रदः परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठि[*]रहं यतः ॥

अथ तत्त्वशुद्धिर्यथा । तत्र ॐ श्रुतिः प्राणापानव्यानोदानसमाना मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा । ॐ पृथिव्यप्तेजोवाय्वाकाशानि मे शुद्ध्यन्तां ज्योतिरित्यादि । ॐ प्रकृत्यहंकारबुद्धिमनःश्रोत्राणि मे शुद्ध्यन्तामित्यादि । ॐ वाक्चक्षुःश्रोत्रजिह्वाघ्राणवचांसि मे शुद्ध्यन्तामित्यादि । ॐ पाणिपादपायूपस्थशब्दा मे शुद्ध्यन्तामित्यादि । ॐ स्पर्शरूपरसाकाशा मे शुद्ध्यन्तामित्यादि । ॐ वायुतेजःसलिलभूम्यात्मानो मे शुद्ध्यन्तामित्यादि । सप्त मन्त्रान् परामृशन् हस्ताभ्यां सप्तधा सर्वाङ्गे स्पृशेदिति तत्त्वशुद्धिः ।

वामाचारे त्वस्मिन्नेव समये वटुकादिभ्यो वलिं प्रयच्छति तद्विधिरग्रे वक्ष्यते। तन्त्रान्तरे ।

---

[*] तान्त्रिकप्रयोगोऽयम् ।

तत्त्वशुद्धिं विधायेत्थं पूजाद्रव्याणि शोधयेत् ।

(मेरुतन्त्रे)

सेचयेत् प्रोक्षणीपात्रतोयैर्मूलास्त्रमुच्चरन् ।
आत्मानं यागवस्तूनि पूजाद्रव्याणि मण्डलम् ॥
दर्शयेद्धेनुमुद्रां च द्रव्यशुद्धिरियं मता ।
योगपीठन्यासदेवाँस्तत्तत्स्थानेषु पूजयेत् ॥
मणिपीठे भावनया ततः पूज्या स्वदेवता ।
आत्मानं देवतारूपं ध्यायेन्मूलेन पञ्च तु ॥
पुष्पस्याञ्जलयो देया मस्तके हृदये गुदे ।
पादयोः सर्वगात्रे च पूजयेच्चन्दनादिभिः ॥
चतुर्भिरुपचारैश्च नैवेद्यं न निवेदयेत् ।
गुरूपदिष्टविधिना शेषमन्यत् समापयेत् ॥
प्रोक्षिण्यद्भिः प्रयुञ्जीत सर्वमेतत् समाहितः ।
कृत्वा षडङ्गन्यासं च मन्त्रमष्टोत्तरं शतम् ॥
जपित्वा देवतायै तमर्पयेदर्घ्यतोयतः ।
पानीयं प्रोक्षणीसंस्थं त्यक्त्वा संपूर्य पूर्ववत् ॥
उपचारैश्चन्दनाद्यैर्मण्डले पूजयेद्गुरुम् ।
पूजयेत् कर्णिकां पूर्वं शालिभिस्तण्डुलैस्ततः ॥
दर्भान् न्यसेदुपर्येषां साक्षतं कूर्चकं ततः ।
छिन्नमूलाः कुशा दीर्घाः सप्तविंशतिसंख्यकाः ॥
ब्रह्मग्रन्थियुतास्त्वग्रदेशे कूर्च इहोच्यते ।
यजेदाधारशक्त्यादिपीठमन्त्रावसानकम् ॥

पीठपूजाप्रकारमाह तत्रैव ।

गुरुपङ्क्तिरुदक् पूज्या महागणपतिस्त्ववाक् ।

पूजयेदतलादीनि देवस्याधस्तु सप्त च ॥
मण्डूकं चापि तस्योर्ध्वं रुद्रं कालानलं ततः ।

(शारदायाम्)

अधः कूर्मशिलारूढां शरच्चन्द्रनिभप्रभाम् ।
आधारशक्तिं प्रयजेत् पङ्कजद्वयधारिणीम् ॥

कूर्मशिलारूढामिति । कूर्माकरा या शिला तदुपरि स्थितामित्यर्थः ।

(तथा)

मूर्ध्नि तस्याः समारूढं कूर्मं नीलाभमर्चयेत् ।
ऊर्ध्वं ब्रह्मशिलासीनमनन्तं कुन्दसन्निभम् ॥
यजेच्चक्रधरं मूर्ध्नि धारयन्तं वसुन्धराम् ।
तमालश्यामलां तत्र नीलेन्दीवरधारिणीम् ॥
अभ्यर्चयेद्वसुमतीं स्फुरत्सागरमेखलाम् ।
तस्यां रत्नमयं द्वीपं तस्मिंश्च मणिमण्डपम् ॥
यजेत् कल्पतरूँस्तस्मिन् साधकाभीष्टसिद्धिदान् ।
अधस्तात् पूजयेत् तेषां वेदिकां मण्डलोज्ज्वलाम् ॥
पश्चादभ्यर्चयेत् तस्यां पीठं धर्मादिभिः पुनः ।
रक्तश्यामहरिद्रेन्द्रनीलाभान् पादरूपिणः ॥
वृषकेशरिभूतेभरूपान् धर्मादिकान् यजेत् ।
गात्रेषु पूजयेत् ताँस्तु नञ्पूर्वानुक्तलक्षणान् ॥

भूतो देवयोनिः । नञ्पूर्वानिति अधर्मादीनित्यर्थः । उक्तलक्षणानिति वृषभाद्याकारान् रक्तादिवर्णानित्यर्थः ।

(मेरुतन्त्रे) त्वधर्मादयश्चित्रवर्णा उक्ताः ।

धर्मं वृषतनुं रक्तं ज्ञानं कृष्णं च सिंहवत् ।
वैराग्यं भूतवत् पीतमैश्वर्यं कृष्णहस्तिवत् ॥
अधर्मादीँश्चित्रवर्णान् पीठस्याधः समर्चयेत् ।

तथा ।

आग्नेयादिषु कोणेषु दिक्षु चाथाम्बुजं यजेत् ।

तत्प्रकारमाह ।

आनन्दकन्दं प्रथमं संविन्नालमनन्तरम् ।
सर्वतत्त्वात्मकं पद्ममभ्यर्चेत् तदनन्तरम् ॥
मन्त्री प्रकृतिपत्त्राणि विकारमयकेशरान् ।
पञ्चाशद्वर्णबीजाढ्यां कर्णिकां पूजयेत् ततः ॥
कलाभिः पूजयेत् सार्धं तस्यां सूर्येन्दुवाचकान् ।
प्रणवस्य त्रिभिर्भागैरथ सत्त्वादिकान् गुणान् ॥
आत्मानमन्तरात्मानं परमात्मानमर्चयेत् ।
ज्ञानात्मानं च विधिवत् पीठमन्त्रावसानकम् ॥
पीठशक्तीः केशरेषु मध्ये च सवराश्रयाम् ।

नवमी पीठशक्तिर्मध्ये पूज्येत्यर्थः ।

तदुक्तम् (मेरुतन्त्रेऽपि)

केशरेषु तथा मध्ये पूर्वादिषु यथाक्रमम् ।
तत्तन्मन्त्रोक्तपीठस्य नव शक्तीः प्रपूजयेत् ॥
पीठमन्त्रेण गन्धाद्यैः पीठमध्ये ततोऽर्चयेत् ।
चतुर्थीनमसा युक्तैः स्वैः स्वैरेव तु नामभिः ॥
मध्ये पुष्पाञ्जलिं दद्यात् पीठमन्त्रेण साधकः ।
मूलमन्त्रं समुच्चार्य षष्ठ्यन्तं पीठनाम च ॥
मूर्त्तिं च कल्पयामीति मूर्त्तिं मध्ये विनिःक्षिपेत् ।

(महाकपिलपञ्चरात्रे)

सौवर्णं कलशं रम्यं रौप्यं ताम्रमथापि वा ।
निर्दोषं मृण्मयं चापि चन्दनेन विलेपितम् ॥

कलशपरिमाणं तु ।

पञ्चाशदङ्गुलो व्यास उत्सेधः षोडशाङ्गुलः ।
कलशानां प्रमाणं तु मुखमष्टाङ्गुलं भवेत् ॥

इति (सिद्धान्तसारे) प्रोक्तम् ।

(शारदायाम्)

हेमादिरचितं कुम्भमस्त्राद्भिः क्षालितान्तरम् ।
चन्दनागुरुकर्पूरधूपितं शोभनाकृतिम् ॥
आवेष्टिताङ्गं नीरन्ध्रं तन्तुना त्रिगुणात्मना ।

सूत्रे विशेष उक्तस्तन्त्रान्तरे ।

कन्याकर्तितसूत्रेण त्रिगुणेन च वर्त्मना ।
गुणत्रयात्मकेनैव वेष्टयेदभितः समम् ॥

(शारदायाम्)

अर्चितं गन्धपुष्पाद्यैः कूर्चाक्षतसमन्वितम् ।
नवरत्नोदरं मन्त्री स्थापयेत् तारमुच्चरन् ॥

(मेरुतन्त्रे)

ध्रुवं जपन् विधानेन स्थापयेद्देशिकोत्तमः ।
नवरत्नानि निःक्षिप्य कुम्भे कूर्चमथोपरि ॥
दूर्वाचन्दनसंयुक्तं विन्यसेदक्षिणान्वितम् ।

नवरत्नानि तत्रैवोक्तानि ।

पुष्पं[1] नीलं[2] च वैदूर्यं[3] विद्रुमं[4] मौक्तिकं[5] तथा ।
ततो मरकतं[6] वज्रं[7] गोमेदं[8] पद्मरागकम्[9] ॥
प्रोक्तानि नव रत्नानि देशिकैस्तन्त्रवित्तमैः ।
आद्यन्तं क्रमतो मन्त्रं मातृकां मनसा जपन् ॥
मूलमन्त्रं जपन्नन्ते चिन्तयन्नैक्यमात्मनः ।

घटस्य पीठाभेदं च चिन्तयेत् साधकोत्तमः ॥
पञ्चाशदौषधीक्वाथैः पूरयेत् तदनन्तरम् ।
एकेन सहितास्ताश्च वर्णौषध्यश्च ता इमाः ॥
चन्दनं चापि रक्ताख्यचन्दनं चागुरुस्तथा ।
कर्पूरोशीरकुष्ठानि बालकं चापि केसरम् ॥
कङ्कोलकं जातिफलं जटामांसी मुरा तथा ।
ग्रन्थिकं रोचना जातीपत्रं पिप्पलबिल्वकौ ॥
पृश्निपर्णी चित्रकं च लवङ्गं कत्तृणं तथा ।
कट्फलं चापि गुञ्जा स्यादुदुम्बरककाश्मरी ॥
पद्मकाष्ठं शङ्खपुष्पी मयूरस्य शिखा तथा ।
प्लक्षोऽग्निमन्थश्च तथा मुद्गपर्णी कुशाः पुनः ॥
पाषाणभेदकः कृष्णशङ्खपुष्पी च रोहिणी ।
स्योनाको बृहती चैव पाटली मूषकर्णिका ॥
तुलसी शिखरी इन्द्रवल्ली भृङ्गाभिधो नृपः* ।
ततोऽपराजिता तालमूली चापि कृताञ्जली ॥
दूर्वा श्रीदेविकन्याख्ये भार्गयो भद्रमुस्तकः ।
लवङ्गरहिताश्चैताः पञ्चाशत्संख्यका इति ॥
दुग्धवृक्षत्वचां क्वाथैर्ब्रह्मभूरुट्त्वगुद्भवैः ।

पूरयेदिति शेषः ।

(शारदायाम्)

ऐक्यं संकल्प्य कुम्भस्य पीठस्य च विधानवित् ।
क्षीरिद्रुमकषायेण पलाशत्वग्भवेन वा ॥
तीर्थोदकैर्वा कर्पूरगन्धपुष्पसुवासितैः ।
आत्माभेदेन विधिवत् मातृकां प्रतिलोमतः ॥

---

* भृङ्गाभिधो नृपो भृङ्गराजः ।

जपन्मूलमनुं तद्वत् पूरयेद्देवताधिया ।
शङ्खे क्वाथाम्बुसंपूर्णं गन्धाष्टकमभीष्टदम् ॥
विलोड्य पूजयेत् तस्मिन्नावाह्य कलशे कलाः ।
दश वह्नेः कलाः पूर्वं द्वादश द्वादशात्मनः ॥
षोडशापि च सोमस्य पश्चात् पञ्चाशतं कलाः ।
जपेद्वा प्रतिलोमेन मूलमन्त्रं च मन्त्रवित् ॥
समाहितेन मनसा ध्यायन्मन्त्रस्य देवताम् ।
प्राणप्रतिष्ठां कुर्वीत तत्र तन्त्रविचक्षणः ॥
कलात्मकं शङ्खसंस्थं क्वाथं कुम्भे च निःक्षिपेत् ।

(मेरुतन्त्रे)

गन्धपङ्कप्रसूनादिवासितैर्वा शुभैर्जलैः ।
क्वाथादितोयैरापूर्य शङ्खं तस्मिन् विलोडयेत् ॥
गन्धाष्टकं तस्य तस्य देवस्याथ प्रकीर्त्त्यते ।
चन्दनागुरुकर्पूररोचनाकुङ्कुमं मदम् ॥
रक्तचन्दनयावादि गाणपत्यमुदाहृतम् ।
चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः ॥
जटामांस्यथ कस्तूरी शक्तेर्गन्धाष्टकं विदुः ।
जलकाश्मीरकुष्टैस्तु रक्तचन्दनचन्दनैः ॥
मालवागुरुकर्पूरैः शाम्भवं चाष्टगन्धकम् ।
ह्रीवेरं चन्दनं कुष्टमगुरुः कुङ्कुमं मुरम् ॥
सेव्यकं च जटामांसी वैष्णवं तदुदीरितम्
जलकाश्मीरकुष्टैस्तु रक्तचन्दनचन्दनैः ॥
तमालागुरुकर्पूरैः सौरं गन्धाष्टकं विदुः ।
गोरोचनार्ककस्तूरीकर्पूरागुरुकुङ्कुमैः ॥

चन्दनेभमदाभ्यां च दरदेन च पङ्कजैः।
गन्धाष्टकस्य संयोगात् सामर्थ्याद्देशिकस्य च ॥
सशक्तिकं जलं कुम्भे भवेदेवं विदुर्बुधाः।
आदौ कृशानुसंबन्धि कलादशकमर्चयेत् ॥
धूम्रार्चिरुष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी।
सुश्रीः सुरूपा कपिला हव्यकव्यवहे उभे ॥
कलाद्वादशकं सौरं पूजयेत् तदनन्तरम्।
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ॥
सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा।
कलाषोडशकं चान्द्रं यजेत् पश्चाद्गुरूत्तमः ॥
अमृता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः।
शशिनी चान्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥
पूर्णा पूर्णामृता कान्तिदायिन्यः सोमजाः कलाः।
वेदादिभेदसंजाताः कलाः पञ्चाशदिन्दुयुक् ॥
संनिधाप्य प्रतिष्ठाप्याभ्यर्चयेत् कलशे तु ताः।
निवृत्तिः प्रतिष्ठा विद्या शान्तिरिन्धिश्च दीपिका ॥
रेचिका मोचिका पारा सूक्ष्मा सूक्ष्मामृता तथा।
ज्ञानामृताऽऽप्यायनी च व्यापनी व्योमरूपिका ॥
अनन्ता सृष्टिऋद्धी तु स्मृतिर्मेधा च कान्तिका।
लक्ष्मीर्द्युतिः स्थिरा स्थितिः सिद्धिर्जरा च पालिनी ॥
क्षान्तीश्वर्यौ रतिः कामा वरदा ह्लादिनी तथा।
प्रीतिर्दीर्घा तीक्ष्णा रौद्री भया निद्रा च तन्द्रिका ॥
क्षुत् क्रोधिनी क्रियोत्कारी मृत्युः प्रीता च दारुणा।

असिता च तथाऽनन्ता मध्ये मध्ये प्रपूजयेत् ॥
ह्ँसः शुचिषडिति प्रताद्विष्णुस्तवेति च ।
त्रियम्बकं च गायत्री विष्णुर्योनिस्तथैव च ॥
तारस्य पञ्चभेदोत्थकलानां पूजयेत् सुधीः ।
कलादशकमावाह्य सृष्ट्याद्यं संनिधाप्य च ॥
हंसः शुचिषडित्याभ्यां ऋचं संजप्य पूजयेत् ।
प्राणसंस्थापनं कृत्वा कलानां पूजयेच्च ताः ॥
एवं जराद्यास्तीक्ष्णाद्याः पीताद्याश्च विधानवित् ।
निवृत्त्याद्याश्चापि यजेदुक्तयुक्त्या विचक्षणाः ॥
अकारोकारकौ प्रोक्तौ मकारो विन्दुनादकौ ।
शक्तिः शान्तो ह्यमी सप्त ध्रुवभेदाः प्रकीर्त्तिताः ॥
अन्तिमौ द्वाविमौ भेदौ पृथगेव समीरितौ ।

(सिद्धान्तसारे)

ध्यात्वा देवं क्षिपेदम्भः शङ्खस्थं तत्कलात्मकम् ।

घटे इति शेषः ।

(शारदायाम्)

पश्चादश्वत्थपनसचूतकोमलपल्लवैः ।
इन्द्रवल्लीसमाबद्धैः सुरद्रुमधिया गुरुः ॥
कुम्भवक्त्रं पिधायास्मिँश्चषकं सफलाक्षतम् ।
संस्थापयेत् फलधिया विधिवत् कल्पशाखिनाम् ॥
ततः कुम्भं निर्मलेन क्षौमयुग्मेन वेष्टयेत् ।

(मेरुतन्त्रे)

एतत् प्रधानकुम्भस्य स्थापनं परिकीर्तितम् ।
अथ पूर्वादिकाष्ठासु तोरणानां समीपतः ॥

यथेच्छया मण्डलानि कुर्याद्वाऽष्टदलानि च ।
तदूर्ध्वं शालिपुञ्जं तु प्रतिद्वारं समाचरेत् ॥
तदूर्ध्वं पूर्णकलशं तत्र चैतान् प्रपूजयेत् ।
प्राग्ध्रुवं च धरां दत्ते पश्चाद्वाक्पतिमुत्तरे ॥
विघ्नेशमथ चाग्नेयादिषु कुम्भान् सुविन्यसेत् ।
अमृतं दुर्जयं सिद्धार्थकं मङ्गलमर्चयेत् ॥
पुनः पूर्वादिकाष्ठासु क्रमादिन्द्रादिकान् यजेत् ।
लोकपालान् मण्डलेषु कुम्भोपरि च तदृचा ॥
ऐरावतं पुण्डरीकं वामनं कुमुदाञ्जनौ ।
पुष्पदन्तं सार्वभौमं सुप्रतीकं तदग्रतः ॥
ततो गुरुः स्ववेद्यां तु गत्वा स्वस्यासने विशेत् ।
संचिन्त्य मूलमन्त्रेण मूर्त्तिं तस्मिन् गुरूत्तमः ॥
तस्यां मूर्त्तौ समावाह्य पूजयेदिष्टदेवताम् ।

(शारदायाम्)

मूलेन मूर्त्तिमिष्ट्वाऽस्मिन् शाखायां कल्पशाखिनम् ।
आवाह्य पूजयेत् तस्यां मन्त्री मन्त्रस्य देवताम् ॥

(मेरुतन्त्रे)

आवाहनादिकं कुर्यान्मूर्त्त्यादौ नवधा तु तत् ।
आदावावाहनं कार्यं त्रिर्जपन्मूलमन्त्रकम् ॥
स्वलोकात् सूक्ष्मरूपेण देव आगत्य मूर्त्तिषु ।
स्थित एवं भावयित्वा सुषुम्णावर्त्मना सुधीः ॥
आनीय देवं स्वस्थानान्नासिकारन्ध्रनिर्गतम् ।
करे पुष्पाञ्जलिः स्थाप्यस्तं दद्याद्देवमूर्धनि ॥

(सिद्धान्तसारे)

पुष्पाञ्जलिं समादाय मुद्रया च त्रिखण्डया ।
यथोक्तां देवतां ध्यात्वा मूलमन्त्रं समुच्चरन् ॥
संबुद्ध्यन्तं देवनामात्रागच्छागच्छ चेत्यपि ।
मूलं पुनः समुच्चार्य स्वस्थानादानयेच्छिवम् ॥

अत्र शिवपदं तत्तद्देवतापरम् ।

(महाकालसंहितायाम्)

ततः प्रसूनं संगृह्य त्रिखण्डामुद्रया सुधीः ।
करकच्छपिकां बध्वा ध्यानं देव्याः समाचरेत् ॥
यस्य मन्त्रस्य यद्ध्यानं यादृशं परिकीर्तितम् ।
तेनैव ध्यानयोगेन ध्यायीत जगदम्बिकाम् ॥
वहन्नासापुटद्वारा हृदयाम्बुजमध्यतः ।
देवीं पुष्पे समानीय पुष्पं यन्त्रे प्रविन्यसेत् ॥

(मेरुतन्त्रे)

देवस्य तेजस्तन्मूर्त्तावावाहन्याख्यमुद्रया ।
स्थापयेदुच्चरन्मूलमेतदावाहनं मतम् ॥
ततः संस्थापनं कुर्यादिह तिष्ठेह तिष्ठ च ॥
मूलान्ते देवतानाम तस्यान्ते च पठेदिति ।
आस्थापनीयमुद्रां च दर्शयित्वा विभावयेत् ॥
जातः स्थिरो भव इति पश्चात् संप्रार्थयेदिति ।
देवेश भक्तिसुलभ सर्वावरणसंयुत ॥
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरो भव ।
एवं संप्रार्थ्य देवेशं संनिधापनमाचरेत् ॥
मूलमन्त्रं समुच्चार्य संबुद्ध्यन्तां च देवताम् ।

इह त्वं संनिधेहीति द्विरुक्त्वा स्वस्य संनिधौ ॥
स्थितं देवं तोषयेच्च संनिधापनमुद्रया ।
संनिरोधं ततः कुर्यान्मूलमुच्चार्य देवताम् ॥
संबुद्ध्यन्तां समुच्चार्य संनिरुद्धो भवेति च ।
द्विरुच्चरेत् कृपापूर्णां भक्तिभावनिरोधिताम् ॥
प्रतिमायां स्थिरीजातां देवतामिति चिन्तयेत् ।
संमुखीकरणं कुर्यान्मूलमुच्चार्य देवताम् ॥
संबुद्ध्यन्तां वदेत् पश्चात् संमुखो भव इत्यपि ।
ध्यायेत् स्वसंमुखं देवं सुप्रसन्नाननाम्बुजम् ॥
संमुखीकरणीं मुद्रां दर्शयेदिति तत् स्मृतम् ।
ततोऽवगुण्ठनं कुर्यान्मूलमुच्चार्य देवताम् ॥
संबुद्ध्यन्तामवगुण्ठितो भवेति प्रदर्शयेत् ।
अवगुण्ठनमुद्रां च प्रदर्श्य चिन्तयेदिति ॥
भक्त्या संमोहितं देवं विस्मयोत्फुल्ललोचनम् ।
सकलीकरणं चैतद्देवस्य हृदयादिषु ॥
षडङ्गमन्त्रान् विन्यस्य मूलमुच्चार्य देवताम् ।
संबुद्ध्यन्तां च सकलीकृतो भव वदेत् ततः ॥
ध्यायेदङ्गिनि देवे तु प्रतिष्ठा अङ्गदेवताः ।
यस्माद्भिन्नस्वभावानां यदभिन्नं प्रयोजनम् ॥
अङ्गानामङ्गिना सार्धं सकलीकरणाद्भवेत् ।
अमृतीकरणं वक्ष्ये पीठे संस्थाप्य देवताम् ॥
बद्ध्वा सम्यग्धेनुमुद्रां देवमूर्ध्नि प्रवर्षणाम् ।
जायते चामृतस्येति ध्यायन्नर्घोदकेन च ॥

त्रिः सिञ्चेन्मूलमन्त्रेण दीपिनीमन्त्रतस्त्रिधा ।
अकारादिक्षकारान्तमातृकाभिस्त्रिधा पुनः ॥
वाग्भवं वदयुग्मं च वाग्वादिनि च वाग्भवम् ।
क्लीँ क्लिन्ने क्लेदिनि क्लेदय महाक्षोभमित्यपि ॥
कुरु युग्मं कामबीजं सौँ मोक्षं कुरु युग्मकम् ।
प्रासादश्च पराप्रासादः सप्तत्रिंशदक्षरः ॥
दीपिनीमनुराख्यातो देवतेजोऽभिवृद्धिकृत् ।
मूलं संबोधनान्तं च देवनामाऽमृतीकृतः ॥
भवेति च वदेदित्थममृतीकरणं स्मृतम् ।
परमीकरणं वक्ष्ये महामुद्रां च बन्धयेत् ॥
उच्चार्य मूलदेवं च पूर्ववत् परमाकृती ।
कृतो भवेति च प्रोक्त्वा ध्यायेद्देवस्य मस्तके ॥
परमामृतवृष्टिं च .... इति ।

आवाहनादिमुद्रालक्षणान्युक्तानि (लक्षणसंग्रहे)

हस्ताभ्यामञ्जलिं बद्ध्वाऽनामिकामूलपर्वणि ।
अङ्गुष्ठौ निःक्षिपेत् सेयं मुद्रा त्वावाहनी मता ॥
अधोमुखी त्वियं वै स्यात् स्थापनीति निगद्यते ।
उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात् संनिधापनी ॥
अन्तःप्रवेशिताङ्गुष्ठा सैव संरोधिनी मता ।
उत्तानमुष्टियुगला सन्मुखीकरणं भवेत् ॥
सव्यहस्तकृता मुष्टिर्दीर्घाऽधोमुखतर्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिता सती ॥
देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिः ।

अमृतीकरणं धेनुमुद्रया सा च संमता ।
अन्योन्याभिमुखाश्लिष्टकनिष्ठाऽनामिका पुनः ।
तथा तत्तर्जनीमध्याद्धेनुमुद्राऽमृतप्रदा ॥
अन्योन्यग्रथिताङ्गुष्ठा प्रसारितपराङ्गुलिः ।
महामुद्रेयमुदितापरमीकरणे प्रिये ॥
प्रयोजयेदिमा मुद्रा देवताह्वानकर्मणि ।

अत्राद्यपञ्चमुद्रासु इहाऽऽगच्छ इह तिष्ठ इह संनिधेहि, इह संनिधेहि, इह संमुखीभवेति क्रमाद्वदन्ति ।

(उड्डीशे)

अत एवाभिपूर्णाया देवतायाः प्रपूजने ।
सादरं संमुखीभावमावाहनमिहोच्यते ॥

अत एवावाहनमुद्राप्रदर्शनादेव ।

विभोर्निवेशनं यन्त्रे स्थापनं कथितं बुधैः ॥
पूजां प्रपूज्यमानां तु गृहीत्वाऽनुग्रहादिकम् ।
कर्तुं सामर्थ्यमस्यास्तु तत् सांनिध्यं प्रचक्षते ॥
आकर्मकाण्डपर्यन्तं सांनिध्यं हि विभावयेत् ।
स संनिरोध उद्दिष्टो भक्तितो मन्त्रवित्तरैः ॥
आनन्दायतनं तत्त्वं सच्चिदानन्दलक्षणम् ।
तदत्र सकलं व्याप्तं ध्येयं स्यादवगुण्ठने ॥
सकलीकरणं कृत्वा मन्त्रैरेभिरथैकताम् ।
अङ्गानामङ्गिना सार्धं विदध्यादमृतीकृतिम् ॥
क्षमा तस्यापराधानां विज्ञेया परमीकृतिः ।

अपराधानामिति । अपरिच्छिन्नस्य ब्रह्मण आवाहनादिमुद्रया परिच्छिन्नताभावनारूपाऽपराधानामित्यर्थः ।

(मेरौ) देवस्य हृदयं स्पृशन्नित्युपक्रम्य ।

कुर्यात् प्राणप्रतिष्ठां च मम स्थाने वदेत् तथा ॥
देवतानामशेषं तु सर्वं प्राग्ववदिहैव हि ।

मम स्थान इति । भूतशुद्ध्यनन्तरं च स्वदेहे कर्त्तव्यम् । यत् प्राणप्रतिष्ठापनं तस्मादेतावान् विशेष इत्यर्थः । तत्र च ज्ञानार्णवोक्तसंक्षिप्तप्रकारोऽस्माभिर्लिखितः ।

विस्तरतस्तु (मेरुतन्त्रे)

प्राणप्रतिष्ठामन्त्रस्य मुनयोऽजेशपद्मजाः ।
छन्दो ऋग्यजुषं साम प्राणशक्तिस्तु देवता ॥
ऋषिः शिरसि वक्त्रे तु छन्दांसि हृदि देवताः ।
आं बीजाय नमो गुह्ये पदोः ह्रीँ शक्तये नमः ॥
नाभौ नमः क्लीँ कीलाय नियोगोऽसुस्थिताविति ।
ॐ आं ह्रीँ क्रोँ मँ कवर्ग सानुस्वारं नभोमुखम् ॥
पञ्चतत्त्वं समुच्चार्य स्वात्मने आँ हृदि न्यसेत् ।
ॐ आँ ह्रीँ क्रोँ चबीजं चवर्ग तद्वच्छब्दादिपञ्चकम् ॥
आत्मने ईँ समुच्चार्य शिरसे वह्निगेहिनी ।
तानि बीजानि उँ तादृक् टवर्ग श्रोत्रकादि च ॥
उक्त्वा तदात्मने ऊँ च शिखायै च वषड्वदेत् ।
तानि बीजानि एतं च वागादीनि तदात्मने ॥
ऐमुक्त्वा कवचायेति हुँ वदेत् तदनन्तरम् ।
चतुर्बीजं च पूर्वोक्तमोँ पवर्ग च तादृशम् ॥
वचनादि च तद्वत् स्यादौँ नेत्राय तदन्तकम् ।
चतुर्बीजं च अँ तादृग्यवर्गो मन आदि च ॥
तदात्मने स्वरश्चान्तोऽस्त्राय फट् चेति संवदेत् ।
अङ्गुष्ठादौ हस्ततलान्तं न्यसेदेवमेव हि ॥

नाभ्यधश्चापि कण्ठाधो मूर्धाधोऽथ तदन्तकम् ।
आँ ह्रीँ क्रोँ क्रमतो न्यस्य हृत्पद्माष्टदलेषु च ॥
पूर्वतः क्रमतो वर्णान् कर्णिकायां हृदन्तकान् ।
रँ लँ हँ षँ वँ च मँ च सँ शँ क्षमिति वर्गतः ॥
दिक्षु न्यसेत् ततो ध्यायेत् प्राणशक्तिं हृदि स्थिताम् ।
रत्नाब्धिपोतारुणपद्मसंस्थां
पाशाङ्कुशाविक्षुशराशवाणान् ।
शूलं कपालं दधतीं कराब्जै
रक्तां त्रिनेत्रां प्रणमामि देवीम् ॥
हस्तं निधाय हृदये प्राग्बीजं यादिकाष्टकम् ।
हंसः सोऽहं मम प्राणा वदेदिह स्थिता—इति ॥
उक्त्वा तथैव च पुनर्मम जीव इह स्थितः ।
पुनस्तदुक्त्वा मम तु वदेत् सर्वेन्द्रियाणि च ॥
पुनस्तदुक्त्वा मम तु वाङ्मनश्चक्षुरुच्चरेत् ।
श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं ततः ॥
तिष्ठन्तु वह्निजायान्तमुक्त्वा तारं ततो जपेत् ।
वपुर्ज्योतिर्मयं ध्यायेदिति स्यात् प्राणसंस्थितिः ॥

ममेत्यादि स्वीयप्राणस्थापनाऽभिप्रायेण ।

(तथा)

तत्तद्दैवतकल्पोक्तास्ततो मुद्राः प्रदर्शयेत् ।
ततः संपूजयेद्देवं शक्त्या लभ्योपचारकैः ॥

तन्त्रान्तरे ।

विधाय देवतामूर्त्तौ मूलन्यासमशेषतः ।
आसनादिप्रसूनान्तानुपचारान् समर्पयेत् ॥

उपचारास्तु (नवरत्नेश्वरे)

गन्धं पुष्पं तथा धूपं दीपं नैवेद्यमेव च ।
एते पञ्चोपचाराश्च कैवल्यफलदायिनः ॥

इति पञ्चोपचाराः ।

पाद्यमर्घ्यं तथा स्नानं मधुपर्काचमनं तथा ।
गन्धादयो निवेद्यान्ता उपचारा दश क्रमात् ॥

(महाकालसंहितायाम्)

पाद्यार्घाचमनीयं स्नानीयं चत्वार्यनुक्रमात् ।
गन्धं पुष्पं च धूपं च दीपं नैवेद्यमेव च ॥
पुनराचमनीयं च दशैतान् संप्रचक्षते ।

इति दशोपचाराः ।
(कुलरत्नावल्याम्)

पाद्यार्घाचमनं स्नानं पुनराचमनीयकम् ।
गन्धाक्षतप्रसूनानि धूपदीपनिवेद्यकम् ॥
ताम्बूलं द्वादश प्रोक्ता उपचाराः प्रपूजने ।

इति द्वादशोपचाराः ।
(नवरत्नेश्वरे)

आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
मधुपर्काचमनस्नानवसनाभरणानि च ॥
सुगन्धसुमनोधूपदीपनैवेद्यचन्दनम् ।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥

इति षोडशोपचाराः ।
(शारदायां तु)

पाद्यार्घाचमनस्नानवसनाभरणानि च ।
गन्धपुष्पे धूपदीपौ नैवेद्याचमनं तथा ॥
ताम्बूलमर्चना स्तोत्रं तर्पणं च नमस्क्रिया ।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥

इत्युक्तम् ।
(नवरत्नेश्वरे)

आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
स्नानं वासोपवीतं च भूषणानि च सर्वशः ॥
गन्धं पुष्पं तथा धूपं दीपमन्नं च तर्पणम् ।
माल्यानुलेपनं चैव नमस्कारं विसर्जनम् ॥
अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत् ।

इत्यष्टादशोपचाराः ।
(सुन्दरीरहस्यवृत्तौ)

आसनाभ्यञ्जने तद्वदुद्वर्त्तननिरीक्षणे ।
सन्मानं वै सर्पिरादेः स्नपनावाहने ततः ॥
पाद्यार्घाऽऽचमनीये च स्नानीयमधुपर्ककौ ।
पुनराचमनीयं च वस्त्रं यज्ञोपवीतकम् ॥
अलंकारा गन्धपुष्पे धूपदीपौ तथैव च ।
ताम्बुलानि च नैवेद्यं पुष्पमाला तथैव च ॥
अनुलेपनशय्ये च चामरं व्यजनं तथा ।
आदर्शदर्शनं चैव नमस्कारोऽप्यनन्तरम् ॥
गीतवाद्यवितानानि स्तुतिर्होमः प्रदक्षिणम् ।
दन्तकाष्ठप्रदानं च ततो देवविसर्जनम् ॥
उपचारा इमे ज्ञेयाः षड्त्रिंशत् सुरपूजने ।

इति षट्त्रिंशदुपचाराः ।
एवं चतुःषष्ट्युपचारादयस्तन्त्रान्तरे द्रष्टव्याः ।
(कुलोड्डीशे)

उपचारेषु सर्वेषु यत् किं चिद्दुर्लभं भवेत् ।
तत् सर्वं मनसा ध्यात्वा पुष्पक्षेपेण कल्पयेत् ॥
तत्र तत्र जलं दद्यादुपचारान्तरान्तरा ।

उपचारसमर्पणविधिरुक्तः (सारसंग्रहे)

देवस्य वामभागे तु दद्यान्मूलेन चासनम् ।
पौष्पं दारुमयं वास्त्रं चार्मं कौशेयतैजसम् ॥
षड्विधं चासनं प्रोक्तं देवताप्रीतिकारकम् ।

पौष्पं सुगन्धिपुष्परचितम् । दारुमयं कण्टकिभिन्नं चन्दनादिघटितम् । वास्त्रं कार्पासम् । कौशेयं कम्बलादि । कौशयं सप्तविंशतिकुशपत्राणां विष्टरः ।

तदुक्तम् (डामरे)

सप्तविंशतिदर्भाणां वेण्यग्रे ग्रन्थिभूषिता ।
विष्टरः सर्वयज्ञेषु लक्षणं परिकीर्तितम्—इति ॥

तैजसं सुवर्णादिरचितं लोहसीसादिवर्ज्यम् । चार्मं मृगव्याघ्राद्यजिनम् ।

(ज्ञानमालायाम्)

उपचारविधिं वक्ष्ये दत्वा चाऽथ शुभासनम् ।
स्वागतं कुशलप्रश्नं निगदेदग्रतस्ततः ॥

(मेरुतन्त्रे)

साङ्गं सावरणं देवं पूजार्थमिह चागतम् ।
ध्यात्वा इति तु मूलान्ते स्वागतं परिकल्पयेत् ॥

ज्ञानमालायाम् ।

पाद्यं पादाम्बुजे दद्याद्देवस्य हृदयाणुना ।

हृदयाणुना नम इति मन्त्रेणेत्यर्थः ।

(यामले)

हस्ताब्जयोस्ततो दद्यादर्घ्यं तोयैः सुवासितैः ।

(ज्ञानमालायां तु)

अर्घ्यं दिशेत् ततो मूर्ध्नि शिरोमन्त्रेण देशिकः—इत्युक्तम् ।

शिरोमन्त्रेणेति स्वाहेत्यर्थः ।
महाकालेनापि ।

अर्घ्यं मूर्ध्नि प्रदातव्यं स्वाहामन्त्रेण साधकैः—इत्युक्तम् ।

(क्रमदीपिकायां)

अर्घदानानन्तरं पाद्यदानमुक्तम् ।

दत्वाऽऽसनं स्वागतामित्युदीर्य
तथार्घपाद्याचमनीयकानि—इति ॥

(सिद्धान्तसारे)

पाद्यं हृन्मनुना दद्यादर्घ्यं ज्वलनजायया ।
स्वधयाऽऽचमनीयं च तेनैव मधुपर्ककम् ॥

(शारदायाम्)

स्वधामन्त्रेण वदने दद्यादाचमनीयकम् ।
जातीलवङ्गकङ्कोलैस्तदुक्तं मन्त्रवेदिभिः ॥

तथा ।

स्वधाणुना ततः कुर्यान्मधुपर्कं मुखाम्बुजे ।
आज्यं दधि मधून्मिश्रमयमुक्तो मनीषिभिः ॥

(कुलोड्डीशे) तु । क्षीरशर्करयोरपि मधुपर्काङ्गत्वमुक्तम् ।

माक्षिकं शर्करा सर्पिर्दधि क्षीरयुतं तथा ॥
मधुपर्कं कल्पयित्वा प्रदद्याद्विधिपूर्वकम् ।
सर्वतः क्षौद्रमधिकं दधिसर्पिःसिताः समम् ॥
क्षीरं तुः सर्वतः स्वल्पं मधुपर्क उदाहृतः ।

(शारदायाम्)

तेनैव मनुना कुर्यादद्भिराचमनीयकम् ।

तेनैव मनुनेति स्वाहामन्त्रेणैवेत्यर्थः ।

अत्र सुधार्णवकृतः ।

वारुणेन च बीजेन दद्यादाचमनीयकम् ।
मधुपर्कं मुखे दद्याज्जलमन्त्रेण देशिकः ॥

इति यामलस्वतन्त्रवचनसङ्गत्यनुरोधेन स्वधामन्त्रेणान्यत्र सुधामन्त्रेणेति पाठमाश्रित्य सुधाशब्दस्यामृतवाचकत्वात् तद्बीजेन विन्दुयुक्तवकारेण मधुपर्कमाचमनीयं च दद्यादित्याहुः ।

तन्त्रसारकृतस्तु त्यागार्थकस्वाहाशब्देनार्घ्यदानविधानात् तत्समभिव्याहृताचमनीयदाने त्यागबोधकः स्वधाशब्दो गृह्यते न तु वरुणबीजं तस्य त्यागार्थकत्वाभावात् ।

तथा च (कुलसारे)

आदौ मन्त्रं समुच्चार्य पश्चादेवं समर्चयेत् ।
सम्प्रदानं तदन्ते तु त्यागार्थकपदं ततः ॥
एवं क्रमेण देवेशि उपचारान् प्रकल्पयेत् ।

यत् तु ।

मधुपर्कं ततः कुर्याज्जलमन्त्रेण देशिकः ।
स्वधाणुना ततः कुर्यान्मधुपर्कं मुखाम्बुजे ॥
तेनैव मनुना कुर्यादद्भिराचमनीयकम् ।
वारुणेन च बीजेन दद्यादाचमनीयकम्—इति ॥

वचनद्वयं, तद्वर्णभेदेन व्यवस्थापनीयम् । शूद्राणां स्वधेत्युच्चारणेऽनधिकारात् । इत्थं च नमः स्वाहा स्वधा वौषडित्यादीनां त्यागार्थकतया तैरेव मन्त्रैरुपचारदानं तद्व्यतिरिक्तमन्त्रेणोपचारसमर्पणं तु प्रमाणशून्यमिति व्याजह्रुः ।

केचित् स्वधामन्त्रेण मधुपर्काचमनीयदानस्य सकलतन्त्रसंमतत्वात् जलमन्त्रेणेत्यादौ तृतीयायाः साहित्यमर्थस्तेन च जलबीजसहितेन स्वधामन्त्रेण दद्यादिति वदन्ति । अन्ये त्वाचमनीयसाधने जलमन्त्रस्तद्दाने तु स्वधेति संगमयन्ति ।

निबन्धे ।

स्नानं वासोऽलङ्करणं गन्धं पुष्पं हृदाऽर्पयेत् ।

हृदा नमःशब्देन ।

(कालीकल्पे तु)

स्नानं गन्धं हृदा दद्यात् पुष्पाणि वौषडित्यपि—इत्युक्तम् ।
ततो निवेदयामीति सर्वं दद्यान्महेश्वरि ॥

सर्वमिति । वस्त्रालङ्कारधूपदीपादीत्यर्थः । नैवेद्यदाने तु विशेष उक्तः ।

(सिद्धान्तसारे)

निवेदयामि हृद्वह्निजायाभिस्तत्त्वमुद्रया ।
देवतायै महेशानि दद्यान्नैवेद्यमुत्तमम्—इति ।

(मेरुतन्त्रे)

सुगन्धितैलैरभ्यङ्ग्य सुगन्धामलकादिभिः ।
उद्वर्त्तनं विधायाथ स्नापयेदुष्णवारिणा ॥
गन्धोदकैश्च मूलेन यथाशक्त्याभिषेचयेत् ।
क्षीरदध्याज्यमधुभिः खण्डेन च पृथक् पृथक् ॥

(शारदायाम्)

गन्धाद्भिः कारयेत् स्नानं वाससी परिधापयेत् ।

वस्त्राण्युक्तानि (मेरुतन्त्रे)

विष्णवे बगलामुख्यै पीतकौशेयमम्बरम् ।
शिवाय च सरस्वत्यै पार्श्वनाथाय शुभ्रकम् ॥
रक्तं शक्त्यर्कविघ्नानां भौमसौगतयोरपि ।
कृष्णं भैरवकाल्यादे राधादे नीलमम्बरम् ॥
अच्छिद्रं मलहीनं च सदशं यन्न धारितम् ।
कार्पासजं वा कौशेयं राङ्कवं वा विशिष्यते ॥
तैलादिदूषिताद्रोगः सच्छिद्राद्वाध्यता भवेत् ।
परकीयाच्च दारिद्र्यं जीर्णादायुःक्षयो भवेत् ॥
दग्धाद्विपद्भवेदास्यदत्ते गात्रावलम्बिते ।
सूचीविद्धात् स्फोटकादि मलिनात् कान्तिहीनता ॥
उप्तकेशे पुत्त्रनाशश्चाधौते दीनता भवेत् ।
मिथ्याभिशापो भवति श्लेष्ममूत्रादिदूषिते ॥

तत्रैव ।

यज्ञोपवीतं दत्त्वाऽथ भूषणानि समर्पयेत् ।
ङेन्तं नमोन्तं तन्नाम पूजनादौ प्रयोजयेत् ॥
तानि नानाविधानि स्युर्मुकुटादिप्रभेदतः ।
स्त्रीपुंप्रभेदतश्चापि विज्ञेयानि विचक्षणैः ॥

गन्धः पञ्चविध उक्तः (सिद्धान्तसंग्रहे)

संघर्षजः परिमलः क्षोदजः प्राणिसंभवः ।
कृष्णसाराभिधानश्च गन्धः पञ्चविधो मतः ॥

संघर्षजो घृष्टचन्दनादिः । परिमलः सुगन्धिद्रव्यविमर्दजन्यः । क्षोदजो गोरोचनादिचूर्णोत्पन्नः । प्राणिसंभवः कस्तूरिकादिः । कृष्णसारस्तु श्रीखण्डादिसुरभिद्रव्याद्यकृष्टः । सारभागो भाषया अतर इति प्रसिद्धः ।

तत्रैव ।

याक्षं दैवं च गान्धर्वं कर्दमं त्रितयं परम् ।
धर्मार्थकाममोक्षाणां साधनं देवतार्पितम् ॥

कर्दमत्रयं तत्रैवोक्तम् ।

कुरङ्गमदकक्कोलकालागुरुसिताभ्रकैः ।
प्रमोदकृद्देवतानां विज्ञेयो यक्षकर्दमः ॥

स एव रोचनायुक्तो देवकर्दम उच्यते ।
पटीरयुग्देवपङ्को ज्ञेयो गन्धर्वकर्दमः ॥

कुरङ्गमदः कस्तूरी । सिताभ्रं कर्पूरं । पटीरं चन्दनम् ।
(पुरश्चरणचन्द्रिकायाम्)

चन्दनं मलयोत्पन्नमनाघ्रातं सुशीतलम् ।
कर्पूराऽगुरुकस्तूरीहिमाम्बुक्षोदितं शुभम् ॥

(मेरुतन्त्रे)

कस्तूरिका चैकभागो द्वौ भागौ मुस्तकस्य च ।
तदर्धैला जटामांसी त्वक्कुष्ठं च शिलारसः ॥
चतुर्भागं वालकं च घृतभृष्टा तथा नखी ।
सुगन्धि कोकिला लोहवाणो राजवचा तथा ।
अष्टौ भागाः केशरस्य मुरायाश्चाथ षोडश ॥
कालागुरुश्चाकसीरं कालीयमथ वार्द्धयः ।
भागाः सेवन्तिकार्कस्य चन्दनेन विमर्दयेत् ॥

कामोदनामा संमर्दो देवताराजतोषकृत् ॥

पुष्पभेदास्तत्रैवोक्ताः ।

पुष्पं पञ्चविधं प्रोक्तं परं चापरमेव च ।
उत्तमं मध्यमं हीनं तेषां वक्ष्यामि लक्षणम् ॥
परं सुवर्णपुष्पं स्यात् तत्र सदा योग्यमेव हि ।
अभ्यङ्गपूर्वकं देयमर्चनार्हं पुनर्भवेत् ॥
अपरं राजतं पुष्पं ताम्रजं च प्रकीर्त्तितम् ।
सदा योग्यं चेदमपि त्रिवर्षं चैकवर्षकम् ॥
तुलसी केतकी पद्म करवीरं च मालती ।
पञ्चैतान्युत्तमान्याहुर्मध्यमानि तथा दश ॥
मल्लिकाकुन्दमन्दारतगरार्जुनकिंशुकाः ।
पारिजातमशोकं च विल्वं चम्पकमेव च ॥
एतद्भिन्नं सुवर्णं च सुगन्धं हीनमुच्यते ।
तत्तन्मन्त्रविधानेषु विहितानि समर्पयेत् ॥

अथ निषिद्धानि तत्रैव ।

नार्पयेद्भूमिपतितं कोरकं कृमिभक्षितम् ।
अङ्गलग्नं समाघ्रातं म्लानं पर्युषितं तथा ॥
उग्रगन्धमगन्धं च कृमिकेशादिदूषितम् ।
अशुद्धपात्रप्राण्यङ्गवासोभिः कुत्सितात्मभिः ॥
आनीतं तन्निषिद्धं स्यान्मध्याह्नस्नानतस्तथा ।
अधोमुखार्पितं नेष्टं पुष्पाञ्जलिविधौ न तत् ॥
न पर्युषितदोषोऽस्ति तुलसीविल्वचम्पके ।
जलजे वकुलेऽगस्त्ये मालाकारगृहेषु च ॥
केतकीकुटजैर्नेशं न वर्वयाऽक्षतैर्हरिम् ।

न दूर्वया यजेद्दुर्गां विल्वपत्रैर्दिवाकरम् ॥
लम्बोदरं तुलस्या च वृन्तहीनैः समर्चयेत् ।

देवताभेदेन पुष्पभेदा उक्ताः (पाद्मे)

दूर्वारम्भाविल्वपत्रैस्तुलसीवर्जितैः शुभैः ।
जलजैः स्थलजैः पुष्पैः श्वेतरक्तैर्गणाधिपम् ॥
मालतीकुन्दमन्दारकुमुदैः शारदां यजेत् ।
करवीरं जवापुष्पं पद्मं कोकनदं तथा ॥
नीलोत्पलमशोकं च बन्धूकं दाडिमं तथा ।
केतकं मल्लिकाऽर्कं च त्रिसन्ध्यं च रवेः प्रियम् ॥
कनकं कुमुदं कुन्दं तगरं कण्टकारिका ।
गिरिकर्णी विल्वपत्रं निषिद्धं रविपूजने ॥
हयारिकुसुमं पद्मं कैरवं नागकेशरम् ।
जातीसेवन्तिकाद्रोणपुष्पं नीलोत्पलं तथा ॥
अर्कपुष्पमपामार्गमुन्मत्तं कुटजं तथा ।
शमीपुष्पं विल्वपत्रं हरस्यातीव वल्लभम् ॥
केतकं च जपापुष्पं शिरीषं दमनं तथा ।
विभीतकं चातिमुक्तं सर्जबन्धूकयूथिकाः ॥
विष्णुक्रान्तामपि श्वेतां वर्जयेच्छिवपूजने ।
मालती मल्लिका यूथी चम्पकं नागकेशरम् ॥
पाटला कुन्दमन्दारं कह्लारमतिमुक्तकम् ।
कर्णिकारं कुरुवकं कदम्बं करवीरकम् ॥
तमालं वकुलं नीलोत्पलं कमलकैरवे ।
सेवन्तिका केतकं च दमनं मुनिपुष्पकम् ॥
धात्रीपुष्पं शमीपत्रमपामार्गस्य पत्रकम् ।

मृदूनां चैव दूर्वाणामङ्कुराः शतपत्रिका ॥
मञ्जरी सहकारस्य तुलसी च हरेः प्रिया ।
उन्मत्तमर्कपुष्पं च निर्गन्धमतिलोहितम् ॥
यदप्युत्कटगन्धं तद्वर्जयेद्विष्णुपूजने ।
रक्तपुष्पं विल्वपत्रं नृसिंहाय निवेदयेत् ॥
वर्जयेत् केतकं पुष्पमन्यत् सर्वं च पूर्ववत् ।

(कालीतन्त्रे)

नानोपहारवलिभिर्नानापुष्पैर्मनोहरैः ।
अपामार्गदलैर्भृङ्गैस्तुलसीवर्जितैः शुभैः ॥
पूजनीया सदा भक्त्या नृणां शीघ्रफलाप्तये ।

(मुण्डमालायाम्)

पुष्पाण्यपि तथा दद्याद्रक्तकृष्णासितानि च ।
श्वेतपुष्पं जवापुष्पं करवीरं तथा प्रिये ॥
तगरं मालती जाती सेवन्ती यूथिका तथा ।
धत्तूराशोकवकुलश्वेतकृष्णापराजिताः ॥
वकपुष्पं तथा विल्वं चम्पकं नागकेशरम् ।
मल्लिका झिण्टिका काञ्ची रक्तं यत् परिकीर्त्तितम् ॥
अर्कपुष्पं वर्वरं च बन्धूकं च प्रियम्वदा ।
अष्टम्यां च विशेषेण तुष्टा भवति पार्वती ॥
पद्मपुष्पेण रक्तेन सतुष्टाः सर्वदेवताः ।
कृष्णैर्वा यदि वा शुक्लैः कालिका वरदा भवेत् ॥

(मत्स्यसूक्ते)

सुगन्धिश्वेतलौहित्यकुसुमैरर्चयेत् कुलैः ।
विल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः ॥

क्षौद्रपुष्पैर्विशेषेण वज्रपुष्पेण मिश्रितम् ।
सर्वं पुष्पं प्रदद्याच्च भक्तियुक्तेन चेतसा ॥
पूजनीया सदा भक्त्या नृणां शीघ्रफलप्रदा ।

कुलैर्वज्रपुष्पाद्यैः ।

(कालिकापुराणे)

पुष्पं कोकनदं पद्मं जपा बन्धकमेव च ।
सर्वेषां पुष्पजातीनां रक्तपुष्पं विशिष्यते ॥

(यामले)

वज्रपुष्पं कालिकायै प्रदद्यात् सिद्धिहेतवे ।
योनिपुष्पं महेशाय वज्रपुष्पं निगद्यते ॥

वज्रपुष्पस्य त्रैविध्यमुक्तम् (मुण्डमालायाम्)

आषोडशादनूढाया उत्तमं सर्वसिद्धिदम् ।
बलात्कारेण ऊढाया मध्यमं भोगवर्द्धनम् ॥
रजोयोगवशादन्यदधमं सुखदायकम् ।
स्वयम्भूकुसुमं देवि त्रिविधं भुवि जायते ॥

अनूढाया अनुपभुक्तायाः । ऊढाया उपभुक्तायाः ।

तन्त्रान्तरे ।

वज्रपुष्पेणार्पितेन यथा तुष्यति कालिका ।
न स्वर्णैर्न च रत्नैश्च न स्पर्शमणिभिस्तथा ॥
अभावे वज्रपुष्पस्य जवापुष्पेण पूजयेत् ।
अर्कपुष्पेण वा पूज्या कालिका सर्वमङ्गला ॥

कालिकेति दक्षिणाम्नायाधिष्ठात्री । उत्तराम्नाये त्वर्कपुष्पनिषेध उक्तो (महाकालसंहितायाम्)

तुलसीभिरपामार्गैर्धत्तूरैः सिन्धुवारकैः ।
अर्कपुष्पैर्वासकैश्च नैव देवीं प्रपूजयेत्—इति ॥

विहितानि तत्रैवोक्तानि ।

शिरीषैः कर्णिकारैश्च चम्पकैः कोविदारकैः ।

वकुलैश्चैव मन्दारैः कुन्दपुष्पैः कुरण्टकैः ॥
लताभिर्ब्रह्मवृक्षस्य मृदुदूर्वाङ्कुरैरपि ।
काञ्चनारैरशोकैश्च पुन्नागैः केतकीदलैः ॥
सेफालिकाभिर्यूथीभिर्जातीभिर्दमनैरपि ।
शतपत्रैर्मल्लिकाभिरम्लानैर्बन्धुजीवकैः ॥
झिण्टीभिश्च जपापुष्पैः करवीरैश्च किंशुकैः ।
पारिजातैः पाटलैश्च पद्मैर्नीलोत्पलैरपि ॥
माधवीभिर्मरुवकैरपराजितयाऽपि च ।
अशनैश्च कदम्बैश्च द्रोणपुष्पैः सकेशरैः ॥
अर्चयेत् कुसुमैरेभिर्देवीं साधकसत्तमः ।
विल्वपत्रं यथा प्रीतिकरं देव्या वरानने ॥
न तथाऽन्यत् किञ्चिदस्ति पुष्पेषु प्रीतिकारकम् ।
अतो यत्नेन दातव्यं विल्वपत्रं त्रिपत्रयुक् ॥

तथा ।

नानापुष्पैर्विरचिता दातव्या पुष्पमालिका ।

मालाभेदास्तु तत्रैवोक्ताः ।

एकजातीयकैः पुष्पैर्भिन्नजातीयकैरपि ।
माला तथैकवर्णा स्याद्भिन्नवर्णाऽपि वा प्रिये ॥
सा पुनस्त्रिविधा ज्ञेया परिणाहवशेन तु ।
पतेद्धृदयपर्यन्तं या मालाऽऽमोदशालिनी ॥
वैकक्षिका सा विज्ञेया सर्वावरतया स्थिता ।
अधोऽवलम्बिनी नाभेः कौसुमी या स्रगुच्यते ॥
साऽधोरिणी परिज्ञेया मध्यमा पूर्वतोऽधिका ।
आगुल्फस्रंसिनी या तु पादपद्मोपरि स्थिता ॥

वनमालेति सा ख्याता सर्वाभ्यः स्रग्भ्य उत्तमा ।

अथ द्वितीयविद्यायाः । (नीलतन्त्रे)

अष्टम्यां च चतुर्दश्यां पूजयेच्च यथाविधि ।
आज्ञासिद्धिमवाप्नोति जवापुष्पं च वर्वरी ॥
चन्दनं चार्ककुसुमं दद्याच्छ्वेतापराजिताम् ।
बन्धूकमालया तुष्येत् तथा छागप्रदानवत् ॥

(त्रिशक्तिरत्ने)

वज्रपुष्पेण संमिश्रैरर्चयेत् सिद्धिहेतवे ।
अभावाद्वज्रपुष्पस्य स्मरणात् सिद्धिमाप्नुयात् ॥
तुलसीमालतीवर्जं पुष्पं दद्यात् प्रसन्नधीः ।

(मत्स्यसूक्ते)

पुष्पं श्रेष्ठं रक्तकोकं बन्धूकं शतपत्रकम् ।
वर्वरीद्वितयं चैव कर्णिकारद्वयं तथा ॥
वकमन्दारचूतानि करवीराणि शस्यते ।

(कुलचूडामणौ)

वर्जयेन्मालतीपुष्पं वर्जयेत् तुलसीदलम् ।

तन्त्रान्तरे ।

वज्रपुष्पेण सर्वत्र पूजयेच्चनिसुन्दरीम् ।

उपचारान्तरसमर्पणेऽपि वज्रपुष्पं प्रतीच्छ स्वाहेति वक्तव्यमित्यर्थः ।

(श्रीविद्यापद्धतौ)

जलजानीह यावन्ति श्वेतकृष्णारुणानि च ।
जपाबन्धूकमुख्यानि रक्तानि स्थलजान्यपि ॥
श्वेतान्यपि सुगन्धीनि मल्लिकावर्जितानि च ।
पीतान्यपि तथा विल्वपत्राणि च समर्पयेत् ॥
निर्गन्धं कृष्णपुष्पं च तुलसीं च परित्यजेत् ।
तुलसीगन्धमात्रेण क्रुद्धा भवति सुन्दरी ॥

नार्चयेत् त्रिपुरामम्बां पलाशकुसुमैरपि ।

काम्ये तु मल्लिका न निषिद्धा ।

तदुक्तम् (ज्ञानार्णवे)

मल्लिकामालतीजातीकुन्दैश्च शतपत्रकैः ।
श्वेतोत्पलसुशीतैश्च पूजयेन्मासमात्रकम्—इति ॥

(कौलालर्वीये)

सुन्दरीभैरवीकालीब्रह्मविष्णुविवस्वताम् ।
तुलसीवर्जिता पूजा सा पूजा सफला भवेत् ॥

विफलेति क्वचित् पाठस्तत्राप्यकारप्रश्लेषात् सफलेत्यर्थः पर्यवस्यति ।

ब्रह्मविष्णुविवस्वतामिति पुष्पचिन्तामणिहस्तलिखितपाठः प्रामादिकः । विष्णुपूजायां तुलसीनिषेधस्य स्वप्नेऽप्यश्रुतत्वात् ।

(निर्बन्धे)

रक्तपुष्पैर्विशेषेण सन्तुष्टा भुवनेश्वरी ।
तथैव छिन्नमस्ताऽपि पीतैस्तु बगलामुखी ॥
गुञ्जया तु विशेषेण मातङ्गी वरदा भवेत् ।

(मुण्डमालायाम्)

श्मशानधत्तुरेणैव तुष्टा धूमावती परा ।

एवशब्दः प्राशस्त्यपरो न त्वन्ययोगव्यवच्छेदकः ।

श्रीविद्योदितपुष्पैस्तु सर्वा विद्याः प्रपूजयेत् ।

इति तन्त्रान्तरवचनात् ।

(मेरुतन्त्रे)

कुन्दमन्दारकुमुदमालतीपद्मकेतकम् ।
नन्द्यावर्त्ताह्वयं जाती कह्लारं चम्पकं तथा ॥
रक्तोत्पलादिपुष्पाणि लक्ष्म्याश्चातिप्रियाणि हि ।

दुर्गायास्तु (भविष्यपुराणे)

मल्लिकामुत्पलं पद्मं शमीपुन्नागचम्पकम् ।
अशोकं कर्णिकारश्च द्रोणपुष्पं विशेषतः ॥
करवीरं जपापुष्पं कुङ्कुमं नागकेशरम् ।

यः प्रयच्छति पुण्यार्थं पुष्पाण्येतानि भारत ॥
चण्डिकायै नरश्रेष्ठ श्रद्धाभक्तिसमन्वितः ।
स कामानखिलान् प्राप्य श्रीदुर्गानुचरो भवेत् ॥

तथा ।

पुन्नागचम्पकः कुन्दो यूथिका नवमल्लिका ।
तगरार्जुनमल्ली च बृहती शतपत्रिका ॥
तथा कुमुदकह्लारविल्वपाटलमालती ।
जवाविचकिलाशोकरक्तनीलोत्पलानि च ॥
दमनो मरुपत्रं च शतपुष्पं विवृद्धये ।

तथा ।

सुगन्धिगन्धपुष्पैस्तु पूजयेद्यस्तु चण्डिकाम् ।
मुक्तिभिर्मालया वाऽपि सोऽश्वमेधफलं लभेत् ॥

तथा ।

नीलोत्पलसहस्रेण यो मालां संप्रयच्छति ।
चण्डिकायै नरश्रेष्ठ तस्य पुण्यफलं शृणु ॥
वर्षकोटिसहस्राणि वर्षकोटिशतानि च ।
श्रीदुर्गानुचरो भूत्वा रुद्रलोके स मोदते ॥

ग्रहाणामपि तत्रैव ।

हयारिकुसुमैः सूर्यं कदम्बैश्चन्द्रमर्चयेत् ।
क्षितिजं तु जपापुष्पैश्चम्पकेन तु सोमजम् ॥
शतपत्रैर्गुरुः पूज्यो जातीपुष्पैस्तु भार्गवः ।
मल्लिकाकुसुमैः पङ्गुः कुन्दपुष्पैर्विधुन्तुदः ॥
केतुश्च विविधैः पुष्पैः शान्तिकालेषु सर्वदा ।

(यामले)

पुष्पैर्देवाः प्रसीदन्ति पुष्पे देवाश्च संस्थिताः ।

। किं चातिबहुनोक्तेन पुष्पस्योक्तिर्मतल्लिका ॥
परं ज्योतिः पुष्पगतं पुष्पेणैव प्रसीदति ।
त्रिवर्गसाधनं पुष्पं पुष्टिश्रीस्वर्गमोक्षदम् ॥
पुष्पमूले वसेद्ब्रह्मा पुष्पमध्ये तु केशवः ।
पुष्पाग्रे तु महादेवः सर्वे देवाः स्थिता दले ॥
तस्मात् पुष्पैर्यजेद्देवं नित्यं भक्तियुतो नरः ।

(क्रियासारे)

सर्वैः पुष्पैः सदा पूज्या विहिताविहितैरपि ।
कर्त्तव्या सर्वदेवानां भक्तियोगोऽत्र कारणम् ॥
देवीपूजा सदा शस्ता जलजैः स्थलजैरपि ।
विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन चेतसा ॥

(मेरुतन्त्रे)

पुष्पाभावे प्रवालैर्वा तदभावे च कोरकैः ।
तदभावे फलैः पत्रैस्तदभावे तृणाङ्कुरैः ॥

तन्त्रान्तरे ।

पुष्पं वा यदि वा पत्रं यथोत्पन्नं तथाऽर्पणम् ।
विल्वस्य खादिरस्यापि तथा धात्रीफलस्य च ॥
तमालस्य च पद्मस्य छिन्नभिन्ने न दूष्यतः ।

(मालिनीतन्त्रे)

पूजयेत् परमेशानि पुष्पाभावे तु पत्रकैः ।
पत्राणामप्यलाभे तु द्रुमगुल्मोद्भवादिभिः ॥
तद्भवामप्यलाभे तु तत्फलेन प्रपूजयेत् ।
अक्षतैर्वा जलैर्वाऽपि तदभावे तु सर्षपैः ॥
सितैस्तेषामप्यलाभे मानसं पूजनं चरेत् ।

(मेरुतन्त्रे)

अथ पुष्पोपचारान्ते कुर्यादावरणार्चनम् ।

इदं च गौडादिसंप्रदाये । अन्यत्र तु धूपदीपनैवेद्याद्यन्तं पूजनं बोध्यम् ।

(सिद्धान्तसारे)

प्रथमं मन्त्रमुच्चार्य श्रीपूर्वं पादुकापदम् ।
द्वितीयान्तं समुच्चार्य पूजयामीति पूजयेत् ॥

(सोमभुजङ्गावल्याम्)

ततश्च मूलमन्त्रेण त्रिवारं पूजयेत् सुधीः ।
गृहीत्वाऽऽज्ञां महादेव्याः परिवारान् समर्चयेत् ॥
षडङ्गैः प्रथमः कल्पो गुरुभिस्तु द्वितीयकः ।
परिवारस्तृतीयः स्याल्लोकपालैश्चतुर्थकः ॥
तदस्त्रैः पञ्चमः प्रोक्त इति सामान्यतः क्रमः ।

(यामले)

पाद्यादिना तथा पश्चात् पूजयेदङ्गदेवताः ।

(मेरुतन्त्रे)

मन्त्रसंपुटितैर्वर्णान्मातृकायाः सविन्दुकैः ।
क्रमेण गन्धपुष्पाद्यैर्देवस्याङ्गं समर्चयेत् ॥

तथा ।

केशरेष्वग्निकोणादौ हृदयादीनि पूजयेत् ।
नेत्रमग्रेर्दिशास्वस्त्रं ध्यातव्या अङ्गदेवताः ॥
तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः ।
वरदाभयधारिण्यः प्रधानतनवः स्त्रियः ॥
अग्नीशासुरवायव्यमध्यदिक्षु क्रमात् स्थिताः ।

(तूर्णायागे)

अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति पुष्पाञ्जलिं दद्यात् प्रणमेदतिभक्तितः ।
प्रत्यावरणमेवं तु तत्तन्नाम्ना समर्पयेत् ॥

(मेरुतन्त्रे)

देवस्य पुरतः प्राची ज्ञेयाऽऽवरणपूजने ।
तदादिपरिवाराणां प्रादक्षिण्येन पूजनम् ॥

(मानसोल्लासे)

पूज्यपूजकयोर्मध्ये प्राची संकीर्त्यते बुधैः ।
तद्दक्षिणं दक्षिणं स्यादुत्तरं चोत्तरं भवेत् ॥

(ज्ञानार्णवे)

उत्तराभिमुखो देवि यदा चक्रं समुद्धरेत् ।
उत्तराशा तदा देवि पूर्वाशैव न संशयः ॥
पश्चिमाभिमुखो मन्त्री यदा चक्रं समुद्धरेत् ।
पश्चिमाशा तदा ज्ञेया पूर्वाशैव न संशयः ॥
वायुकोणं तदाऽऽग्नेयमीशानं राक्षसं भवेत् ।
दक्षिणाशामुखो मन्त्री यदा चक्रं समुद्धरेत् ॥
पूर्वाशैव तदा रक्षो रक्षःकोणं तु वह्निमत् ।

पश्चिमाशाद्यभिमुखत्वं च काम्यपूजाविशेषपरम् । नित्यादिपूजायां तु 'प्रागानना धनददिग्वदनोऽथवे'त्यादिना दिग्द्वयस्यैव नियमात् ।

(श्यामारहस्ये) तन्त्रान्तरे च ।

होतुः पूर्वं पूर्वभागं प्रदिष्टं सव्यं भागं दक्षिणं त्वागमज्ञैः ।
दक्षं विद्यादुत्तरं भागमग्र्यं प्रज्ञावद्भिः पश्चिमं पीठमुक्तम् ॥

पूर्वमिति पुरतः । अग्र्यं स्वसंमुखं तेन देवपृष्ठमेव प्रतीचीत्यर्थः । यत्तु इन्द्रादीन् साहजिकप्राच्यादिक्रमेण पूजयन्ति केचित् तत् प्रमाणशून्यम् ।

(शारदायाम्)

पश्चादभ्यर्चनीयाः स्युः कल्पोक्तावृत्तयः क्रमात् ।
अन्ते यजेल्लोकपालान्मूलपारिषदान्वितान् ॥

हेतिजात्यधिपोपेतान् दिक्षु पूर्वादितः क्रमात् ।

इन्द्रादिलोकपालानां ध्यानानि (मेरुतन्त्रे)

इन्द्रं सुराधिपं पीतमैरावतगतं विभुम् ।
सहस्रनेत्रं द्विभुजं पीतवज्रधरं भजे ॥
अग्निं तेजोऽधिपं रक्तं श्वेतशक्तिकरं प्रभुम् ।
सुभूषणं मेषवाहं वन्दे रक्ताङ्गलोचनम् ॥
यमं प्रेताधिपं कृष्णं महिषोपरि संस्थितम् ।
कालदण्डधरं क्रूरं वृतं दूतैर्भयानकैः ॥
रक्षोऽधिपं च निरृतिं शवासनसमाश्रितम् ।
धूम्राभं खड्गहस्तं च पिङ्गलश्मश्रुकूर्चकम् ॥
मकरे संस्थितं विद्युन्निभया सकराम्बुजम् ।
शुभ्राङ्गं तुन्दिलं वन्दे वरुणं यादसां पतिम् ॥
वायुं प्राणाधिपं धूम्रं रक्ताङ्कुशकरं परम् ।
वातप्रमीसमारूढं धावन्तं वेगतो भजे ॥
यक्षनाथं कुबेरं च शुक्लं शुक्लगदाधरम् ।
नरसिंहासनारूढं मेदुलं चित्रिणीयुतम् ॥
विद्याधिपं नीलशूलधरं वृषभवाहनम् ।
त्रिनेत्रं भालचन्द्रं च जटाजूटधरं सितम् ॥
लोकाधिपं विधातारं रक्तपद्मकरं शुभम् ।
हंसारूढं वेदपाठं कुर्वन्तं तमहं भजे ॥
गौरं नागाधिपं मूर्ध्नि फणामण्डलभूषितम् ।
पीनोतुङ्गं चक्रधरमनन्तं विश्वगं भजे ॥

(शारदायाम्)

वज्रं शक्तिं दण्डमसिं पाशमङ्कुशकं गदाम् ।

शूलं चक्रं पद्ममेषामायुधानि क्रमाद्विदुः ॥
पीतशुक्लसिताकाशविद्युद्रक्तसितासिताः ।
कुरुविन्दपाटलाभा वज्राद्याः परिकीर्त्तिताः ॥

(यामले)

पाणिमूले तु संलग्ने शाखाः सर्वाः प्रसारिताः ।
लोकेशानामियं मुद्रा तेषामर्चासु दर्शयेत् ॥

तन्त्रान्तरे ।

गणेशं वटुकं क्षेत्रपालं च योगिनीं तथा ।
पूर्वादिक्रमयोगेन गन्धपुष्पैः समर्चयेत् ॥

(मेरुतन्त्रे)

पुनर्मूलं समुच्चार्य साङ्गायै सपरीति च ।
वारायै नाम देव्याश्च चतुर्थ्यन्तमुदीरयेत् ॥
नम इत्यर्चयेद्गन्धपुष्पाद्यैः साधकस्त्रिधा ।

तन्त्रान्तरे ।

कृत्वाऽऽवरणपूजां तु धूपदीपौ निवेदयेत् ।

धूपभेदा उक्ताः (मेरुतन्त्रे)

धूपं दहेद्गणेशस्य प्रियः प्रोक्तस्तु गुग्गुलुः ।
सर्जं देव्या महेशस्य निर्यासो देवदारुजः ॥
विष्णोः कृष्णागुरुः शीतं भास्करस्य प्रियं मतम् ।
शक्तेर्दशाङ्गं वक्ष्यामि शैलेयं[१] मलयोद्भवम्[२] ॥
नखं[३] कुष्टं[४] सर्जरस[५]मेकैकांशं प्रकल्पयेत् ।
शिलारसा[६]गुरु[७]जटामांसी[८]भागद्वयं मतम् ॥
षड्माक्षिकं[९] सिता[१०]चाष्टौ धूपोऽयं शक्तिमोहनः ।
हरीतकी[१]सर्जरस[२]मुरमांस्यः[३] कुभागिकाः[४] ॥

लाक्षा[५]त्रिभागाश्चत्वारो भागाः शैलज[६]मुस्तयोः[७] ।
पञ्चभागं नखं[८] प्रोक्तं षड्भागं कुष्ठ[९]मुच्यते ॥
द्वादशांशो गुडो[१०]ऽकेशविघ्नविष्णुदशाङ्गकः ।
मधु[१]मुस्ता[२]घृतं[३]गन्धो[४]गुग्गुल्व[५]गुरु[६]शैलजम्[७] ॥
सरलं[८]सिल्ह[९]सिद्धार्थौ[१०] शेषदेवदशाङ्गकः ।

(तन्त्रान्तरे)

गुग्गु[१]ल्वगुरुको[२]शीर[३]शर्करा[४]मधु[५]चन्दनैः[६] ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देशिकः ॥
सिता[१]ज्य[२]मधु[३]संमिश्रं गुग्गु[४]ल्वगुरु[५]चन्दनम्[६] ।
षडङ्गधूपमेतत् तु सर्वदेवप्रियं सदा ॥
रोगरोगहररोगदकेशाः सुरतरुजतुलघुपत्रविशेषाः ।
वक्त्रविवर्जितवारिदमुस्ताधूपवर्त्तिरिह सुन्दरि शस्ता ॥
गुग्गुलं[१]सरलं[२]दारु[३]पत्रं[४]मलयसंभवम्[५] ।
ह्रीवेर[६]मगुरुं[७]कुष्ठं[८]गुडं[९]सर्जरसं[१०] घनम्[११] ॥
हरीतकी[१२]नखी[१३]लाक्षा[१४]जटामांसी[१५]च शैलजम्[१६] ।
षोडशाङ्गं विदुर्धूपं दैवे पैत्रे च कर्मणि ॥
मधु[१]मुस्तं[२]घृतं[३]गन्धो[४]गुग्गु[५]ल्वगुरु[६]शैलजम्[७] ।
चन्दनं[८]सिह्ल[९]सिद्धार्थौ[१०]दशाङ्गो धूप इष्यते ॥

(यामले)

दशाङ्गधूपः श्यामायाः सुन्दर्याः षोडशाङ्गकः ।
अष्टादशाङ्गस्ताराया भैरव्याश्च गजाङ्गकः ॥
पञ्चाङ्गश्छिन्नमस्तायाः प्रियोऽन्यासां षडङ्गकम् ।
अभावे सर्वविद्यासु गुग्गुल्वगुरुचन्दनम् ॥

(मेरुतन्त्रे)

हृदाणुनाऽथवाऽस्त्रेण घण्टां संपूज्य वादयेत् ।

तत्रैव ।

तारो जयध्वनिपदं मन्त्रमातोऽग्निगेहिनी ।
एकादशाक्षरो मन्त्रो घण्टायाः सर्वसिद्धिदः ॥
आवाहनेऽर्घे धूपे च पुष्पे नैवेद्यदीपयोः ।
घण्टानादं प्रकुर्वीत विशेषाद्धूपदीपयोः ॥
पूजाकालं विनाऽन्यत्र कुर्यादस्याः प्रवादनम् ।
नानया च विना पूजां कारयेत् सिद्धिलालसः ॥

राघवभट्टाः ।

धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य हृदाऽणुना ।
अस्त्रेण पूजितां घण्टां वादयन् गुग्गुलं दहेत् ॥

धूपपदार्थ उक्तः (कुलार्णवे)

धूताशेषमहादोषपूतिगन्धप्रहारितः ।
परमामोदजननाद्धूप इत्यभिधीयते ॥

दीपभेदा उक्ताः (कुलोड्डीशे)

घृतप्रदीपः[1] प्रथमस्तिलतैलसमुद्भवः[2] ।
सार्षपः[3]फलनिर्यासजातो[4]वा वारिजोद्भवः[5] ॥
दधिज[6]श्चान्नज[7]श्चैव दीपाः सप्त प्रकीर्त्तिताः ।
पद्मसूत्रभवा[1] वर्त्तिर्दर्भसूत्रभवा[2]ऽथवा ॥
जलजा[3] वादरी[4]वाऽपि तूलकोषोद्भवा[5]ऽथवा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधा स्मृता ॥

(यामले)

वर्त्तिः श्वेताऽथवा रक्ता न पीता नासिताऽपि च ।
बीजशून्यं च कार्पासं तदीयास्तन्तवोऽपि च ॥

पटो वा नूतनः शुक्लो वर्त्तिकायां प्रशस्यते ।
जीर्णं च मलिनं वस्त्रं नैव दद्यात् कदा चन ॥

(मेरौ)

तैजसं राजसं लौहं मार्त्तिक्यं नारिकेलजम् ।
तृणराजोद्भवं वाऽपि दीपपात्रं प्रशस्यते ॥
एवं दीपं प्रकुर्वीत नेत्ररञ्जनकारणम् ।

(यामले)

निवेदयेत् पुरो भागे गन्धं पुष्पं च भूषणम् ।
वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे ॥

(मेरुतन्त्रे)

न धूपं वितरेद्भूमौ नासने न घटे तथा ।
यथातथाधारगतं कृत्वा तं विनिवेदयेत् ॥
मेदो मज्जायुतो नेष्टो विष्णवे दारुसंभवः ।

(यामले)

दीपं दक्षिणतो दद्यात् पुरतो वा न वामतः ।

तथा ।

दक्षिणे घृतयुक्तश्च तैलयुक्तश्च वामतः ।
दक्षिणे च सिता वर्त्तिर्वामतो रक्तवर्त्तिकः ॥

(मेरुतन्त्रे)

पूजयित्वा स्वमन्त्रेण घण्टां तन्नादपूर्वकम् ।
दीपं दद्यात् तु विभवे नानावाद्यपुरस्सरम् ॥

तत्रैव ।

गोसर्पिषा वा तैलेन वर्त्त्या कर्पूरगर्भया ।
उच्चैः प्रदर्शयेद्दीपं न च मेदादिना क्वचित् ॥
न मिश्रीकृत्य दद्यात् तु दीपं स्नेहान् घृतादिकान् ।
कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत् ॥

पारावतभ्रमाकारं भ्रामयेच्च प्रदर्शयेत् ।
देवस्य सर्वावयवान् श्लोकमेवं ततः पठेत् ॥
सुप्रकाशो महादीप्तः सर्वत्र तिमिरापहः ।
सबाह्याभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥
दक्षिणे सार्षपं दीपं तिलतैलस्य वामतः ।
सिता वर्त्तिर्दक्षिणतो रक्ता वर्त्तिस्तु वामतः ॥
वृक्षेषु दीपो दातव्यो न तु भूमौ कदा चन ।
कृत्वा तु पृथिवीतापं दीपमुत्सृजते नरः ॥
सतापपापं नरकं प्राप्नोत्येव शतं समाः ।
नैव निर्वापयेद्दीपं लक्ष्मीनाशकरो यतः ॥

(कालिकापुराणे)

लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् ।
न स दीप इति ख्यातो ह्योघवह्निस्तु स श्रुतः ॥
शाणं वा दौरं वस्त्रं जीर्णं मलिनमेव वा ।
उपभुक्तं न दद्यात् तु वर्त्तिकार्थं कदा चन ॥
नैव निर्वापयेद्दीपं देवार्थमुपकल्पितम् ।
दीपहर्त्ता भवेदन्धः काणो निर्वापको भवेत् ॥
सर्वसहा वसुमती सहते न द्वयं त्विदम् ।
अकार्ये पादघातं च दीपतापं तथैव च ॥

तन्त्रान्तरे ।

अङ्गुष्ठाग्रेण देवेशि धृत्वा दीपं निवेदयेत् ।
पारावतभ्रमाकारमुद्भ्राम्य नयनावधि ॥

दीपपदार्थ उक्तः ।

(कुलार्णवे)

दीर्घाज्ञानमहाध्वान्ताहंकारपरिवर्जनात् ।

परतत्त्वप्रकाशाच्च दीप इत्यभिधीयते ॥

(यामले)

नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः ।
पक्वं च देवतावामे आमान्नं देवदक्षिणे ॥
पक्वापक्वविभेदेन नैवेद्येष्वपि च स्थितिः ।
पुरतो नियमो नास्ति दीपनैवेद्ययोः क्व चित् ॥

(रुद्रयामल-) वचनानि ।

तैजसेषु च पात्रेषु सौवर्णे राजते तथा ।
ताम्रे वा प्रस्तरे वाऽपि पद्मपत्रेऽथ वा पुनः ॥
यज्ञदारुमये वाऽपि नैवेद्यं कल्पयेद्बुधः ।
सर्वाभावे तु माहेयं स्वहस्तघटितं यदि ॥

(सारसंग्रह-) वचने तु ।

निधाय स्वर्णजे पात्रे साधारं तच्च मण्डले ।
निधाय चतुरस्रे च संस्कुर्याच्छास्त्रमार्गतः ॥
अस्त्रमन्त्रेण संप्रोक्ष्य चक्रमुद्राभिरक्षितम् ।
वायुबीजेन संशोध्य वह्निबीजेन तद्दहेत् ॥
स्पृशन् दक्षकराग्रेण सुधाबीजेन मन्त्रयेत् ।
धेनुमुद्रां प्रदर्श्याथ गन्धपुष्पैः समर्चयेत् ॥

(मेरुतन्त्रे)

देवमभ्यर्च्य कुर्याच्च पुष्पाञ्जलिमनन्यधीः ।
हेमपात्रस्थितं दिव्यं परमान्नं सुसंस्कृतम् ॥
पञ्चधा षड्रसोपेतं गृहाण मम सिद्धये ।
मूलमन्त्रं समुच्चार्य स्वाहान्तं जलमर्पयेत् ॥
कराभ्यां संस्पृशन् पात्रं नैवेद्यान्ते नमो वदेत् ।
देवस्य दक्षिणे हस्ते जलं दत्वा पठेदिदम् ॥

अमृतोपस्तरणमसि स्वाहा इति नवाक्षरम् ।
दर्शयेद्वामहस्तेन विकचोत्पलसंनिभाम् ॥
दर्शयित्वा ग्रासमुद्रां पञ्चप्राणाहुतिं चरेत् ।

प्राणादिमुद्रास्तत्रैवोक्ताः ।

कनिष्ठानामिकाङ्गुष्ठयोगः प्राणस्य मुद्रिका ।
तया ग्रासं गृहीत्वा प्राणाय स्वाहेति संवदेत् ॥
तर्जनीमध्यमाङ्गुष्ठयोगेनापानकं वदेत् ।
ङेन्तं स्वाहान्तमथ च व्यानाय च ततो वदेत् ॥
स्वाहाऽथ मध्यमानामाङ्गुष्ठयोगेन निर्वपेत् ।
हित्वा कनिष्ठां सर्वाभिरुदानायाग्निगेहिनीम् ॥
सर्वाभिस्तु समानाय स्वाहोक्त्वा ग्रासमावपेत् ।

तन्त्रान्तरे ।

स्पृशेत् कनिष्ठोपकनिष्ठिके द्वे
    स्वाङ्गुष्ठमूर्ध्ना प्रथमेह मुद्रा ।
तथाऽपरा तर्जनिमध्यमे स्या-
    दनामिकामध्यमिके च मध्या ॥
अनामिकातर्जनिमध्यमाश्च
    तद्वच्चतुर्थी सकनिष्ठकास्ताः ।
स्यात् पञ्चमी मध्यमतः प्रदिष्टाः
    प्राणादिमुद्रा निजमन्त्रयुक्ताः ॥

(मेरुतन्त्रे)

ततः स्वर्णादिजे पात्रे सुतोयं धेनुमुद्रया ।
अमृतीकृत्य देवाय देयं मन्त्रमिदं पठेत् ॥
नमस्ते देवदेवेश सर्वतृप्तिकरं परम् ।

अन्यानिवेदितं शुद्धं प्रकृतिस्थं सुशीतलम् ॥
परमानन्दसंपूर्णं गृहाण जलमुत्तमम् ।
उक्त्वैवं देवतावामे जलपात्रं निवेशयेत् ॥
त्रिभिर्वर्णैः प्रदातव्यं देवार्थं पाकभोजनम् ।
घृतपक्वं दुग्धसिद्धं साधितं केवलाग्निना ॥
युक्तं वैत्तवपङ्केन तच्छूद्रस्य प्रशस्यते ।
ततः पुष्पाञ्जलिं दद्यादस्त्रमन्त्रेण बन्धनम् ॥
दिशां कृत्वा जवनिकां देवस्य परितो न्यसेत् ।
अमृतात्मकनैवेद्यं नम इत्युच्चरेत् पुनः ॥
धेनुमुद्रां प्रदर्श्याथ भुञ्जानां देवतां स्मरेत् ।
अष्टोत्तरशतं जप्त्वा मूलमन्त्रं ददेज्जलम् ॥
नैवेद्यान्ते त्वाचमनं दत्वा होमविधिं चरेत् ।

तत्रैव ।

विधाय पूजामेवं हि धूपदीपनिवेद्यकैः ।

तथा ।

वेदिकाया दक्षभागे कृत्वा स्थण्डिलमुत्तमम् ।
संस्थाप्य वह्निं संस्कृत्य वैश्वदेवं समारभेत् ॥
यथाविधि ततस्तत्र गन्धाद्यैर्देवतां यजेत् ।
तत्र प्रणवपूर्वाभिर्हुत्वा व्याहृतिभिः पुरा ॥
जुहुयान्मूलमन्त्रेण पायसेन घृतेन च ।
पञ्चविंशतिभिः पश्चाद्धुत्वा व्याहृतिभिः पुनः ॥
संपूज्य तां चन्दनाद्यैः पीठमूर्त्तौ नियोजयेत् ।
अग्निं विसृज्य सृष्टेन पायसेन वलिं हरेत् ॥
पार्षदेभ्यश्चन्दनादिपुष्पाक्षतसमान्वितम् ।

अत्र वैश्वदेवो नित्यहोम एव ।

(सिद्धान्तसारे)

समाप्य वैश्वदेवं तु भूतेभ्यो बलिमाहरेत् ।
शाक्ते तु बलिदानान्ते दद्याद्भूतबलिं सुधीः ॥

यत्र वैष्णवादिकल्पे वक्ष्यमाणबलिदानविधिर्नास्ति तत्रास्मिन्नेव समये भूतबलिर्देय इत्यर्थः ।

(मेरुतन्त्रे)

देवं तृप्तमिति ध्यत्वा नैवेद्यं गतसारकम् ।
संचिन्त्य रक्षोदिग्भागे पात्रं तत् स्थापयेत् ततः ॥
गोमयाद्भिस्तदस्त्रेण नैवेद्यस्थानशोधनम् ।
देवोच्छिष्टं गृहीत्वा तु निर्माल्यभोजिने नमः ॥
इत्यैशान्यां विनिःक्षिप्य हस्तं प्रक्षालयेत् ततः ।
पुनराचमनं दद्यात् करोद्वर्त्तनमेव च ॥
शुद्धमाचमनं दत्वा सुगन्धैर्गन्धयेत् करौ ।

(गौतमीये)

क्षणं विमृष्य मतिमान् दद्याद्गण्डूषकं ततः ।
अमृतापिधानमसि स्वाहेति मनुनाऽमुना ॥

(यामले)

सर्वोपकरणादीनि मूलान्ते च निवेदयेत् ।
अशक्तो मनसा दद्यादेतत् कर्म न लोपयेत् ॥

द्वितीयविद्याविषये तु विशेष उक्तो (नीलतन्त्रे)

सर्वं मन्त्रमयं कृत्वा देवतायै निवेदयेत् ।
श्रीमदेकजटे वज्रपुष्पं प्रतीच्छ चोच्चरेत् ॥
मूलेनाग्निप्रियान्तेन सतारेण च साधकः ।

तारः प्रणवस्तस्य चान्वयं आदावेव संप्रदायसिद्धः । अयं च मन्त्रः सर्वोसामपि तारादिदेवतानां पूजायामविरुद्ध एवेति सुधार्णवकृतः ।

श्रीविद्याविषये तु (मानसोल्लासे)

सम्बुद्ध्या प्रवदेन्मन्त्री उपचारान् सदैव तु ।

तथा ।

सर्वोपचारमन्त्राश्च त्रिताराद्याः समीरिताः——इत्युक्तम् ।

तारत्रयं च श्रीँ ह्रीँ क्लीँ इति । (यामले)
(ज्ञानार्णवे) "वाङ्माया कमले चे"त्युक्तम् ।

पुनश्च चुल्लुकं दद्याद्दत्वा ताम्बूलमुत्तमम् ।
एलालवङ्गकर्पूरजातीफलादिसंयुतम् ॥
तमालदलकर्पूरपूगभागैस्तरङ्गितम् ।

(मेरुतन्त्रे)

ततो दद्याच्च ताम्बूलं विष्णवे द्वादशाङ्गकम् ।
खदि[१]रैला[२]लवङ्गे[३]न्दु[४]चूर्ण[५]पर्णतमालकम्[६] ॥
जातीकोशदलात्वगूभिः[७] कस्तूरी[८]केशरै[९]र्युतम् ।
पूगीफल[१०]मथ प्रोक्तं दशाङ्गं भास्करस्य तु ॥
मृगनाभितमालाभ्यां हीनं विघ्नेश्वरस्य तु ।
पञ्चाङ्गं चूर्ण[१]खदिर[२]पर्ण[३]पूगीफले[४]न्दुकम्[५] ॥
शैलं देव्या जातिकोशयुतं तच्च महेशितुः ।

तत्रैव ।

दर्शयेच्च तथाऽऽदर्शं कल्पयेच्छत्रचामरैः ।

अथोपचारमुद्राः ।

आसने पद्ममुद्रा स्याद्धस्तद्वयमधोमुखम् ।
मुद्रैषा कुशलप्रश्ने तदेवोर्ध्वमुखं पुनः ॥
मुद्रा स्यात् स्वागते चार्घ्यमुद्रा त्वञ्जलिरुच्यते ।
अनामाङ्गुष्ठयोगाच्च सैवोक्ता पाद्यमुद्रिका ॥
उत्तानं दक्षहस्तं तु कृत्वा निम्नतलं सुधीः ।

कनिष्ठहीनाः संयुक्ताश्चतस्रोऽङ्गुल्य उन्नताः ॥
मुद्रैषाऽऽचमने प्रोक्ताऽधोमुखी च त्वनामया ।
स्पृष्टाङ्गुष्ठा भवेन्मूद्रा मधुपर्के वरानने ॥
अधोमुखी दत्तहस्तकृता मुष्टिः कनिष्ठया ।
विमुक्ता स्नानमुद्रैषा गदिता परमेश्वरि ॥
उत्तानं दक्षिणं हस्तं कृत्वा तन्मध्यमां पुनः ।
अङ्गुष्ठेन स्पृशेदेषा मुद्रा वस्त्रस्य कीर्त्तिता ॥
एषैवानामिकास्पर्शान्मुद्रा भूषणसंज्ञिता ।
कनिष्ठास्पर्शतो ज्ञेया उपवीतस्य मुद्रिका ॥
ज्येष्ठाग्रेण कनिष्ठाग्रं स्पृशेद्गन्धस्य मुद्रिका ।

तन्त्रान्तरे ।

मध्यमानामिकाङ्गुष्ठैरङ्गुल्यग्रेण पार्वति ।
दद्याच्च विमलं गन्धं मूलमन्त्रेण साधकः ॥
अङ्गुष्ठतर्जनीभ्यां तु यन्त्रे पुष्पं निवेदयेत् ।
अधोमुखं करं कृत्वा तर्जन्यग्रे तु योजयेत् ॥
अङ्गुष्ठाग्रं तु मुद्रेयं पुष्पाख्या परमेश्वरि ।
यथा गन्धं तथा देवि धूपं दद्याद्विचक्षणः ॥
मध्यमानामिकाभ्यां तु मध्ये पर्वणि देशिकः ।
अङ्गुष्ठाग्रेण देवेशि धृत्वा दीपं * निवेदयेत् ॥

तथा ।

अङ्गुष्ठाग्रेण तर्जन्याः स्पृशेदग्रं महेश्वरि ।

ज्येष्ठाग्रेण स्पृशेदग्रं मध्यमायाः सुरार्चिते ।
दीपमुद्रेयमुदिता सर्वदेवप्रिया शुभा ॥
* इति २ पु० उपलभ्यते ।

धूपमुद्रेयमाख्याता सर्वदेवप्रियङ्करी ॥
अनामाग्रं स्पृशेद्देवि ज्येष्ठाग्रेण तु देशिकः ।
नैवेद्यमुद्रा कथिता देवतातृप्तिकारिणी ॥

अन्यत्र ।

उत्तोलनं त्रिधा कृत्वा गायत्र्या मूलयोगतः ।
तत्त्वाख्यमुद्रया देवि नैवेद्यं तु निवेदयेत् ॥
मूलेनाचमनं दद्यात् ताम्बूलं तत्त्वमुद्रया ।

(सिद्धान्तसारे)

मूलमन्त्रेण संपूज्य स्वस्वकल्पोक्तमन्त्रतः ।
देवतायै वलिं दत्वा विघ्नादिभ्यो वलिं हरेत् ॥

(ज्ञानार्णवे)

ईशानवह्निनैर्ऋत्यवायुकोणेषु पूर्ववत् ।
मण्डलानि विधायाथ पूर्ववत् पूजयेत् प्रिये ॥
पूर्ववद्वलिदानं च दद्यात् सर्वसमृद्धये ।
वटुकानि महेशानि योगिनीभ्यश्च वल्लभे ॥
गणेशक्षेत्रपालाभ्यां पूर्ववद्वलिमुत्सृजेत् ।

(समयाचारे)

दक्षिणे वटुकं दद्यादुत्तरे योगिनीगणे ।
पूर्वे भूतवलिं दद्यात् क्षेत्रपालाय पश्चिमे ॥

तथा ।

अङ्गुष्ठनामिकाभ्यां तु वटुकाय वलिर्मतः ।
कनिष्ठाङ्गुष्ठयोगेन योगिनीवलिमाहरेत् ॥
अङ्गुष्ठतर्जनीभ्यां तु क्षेत्रपालवलिं हरेत् ।
अङ्गुलीभिश्च सर्वाभिरुक्तो भूतवलिः प्रिये ॥
तथ्यमुष्टेस्तु मध्यस्थामङ्गुलिं दण्डवत् कुरु ।

गजदन्तमहामुद्रा गणपस्य बलौ भवेत् ॥
अङ्गुलीभिश्च सर्वाभिरुक्तो भूतबलिः प्रिये* ।

बलिद्रव्याण्युक्तानि (महाकालसंहितायाम्)

तत्रादौ दक्षिणाचारे ।

माषभक्तं तथा लाजा धानाः शक्तव एव वा ।
पृथुकास्तण्डुला वाऽपि स्विन्ना व्रीहय एव वा ॥
आमिक्षा वा यवागूर्वा कृशरं पायसं तथा ।
आज्याभिषिक्तं दधि वा पक्वान्नानि फलानि वा ॥

वामाचारे ।

दग्धमीनो भर्जितं वा तेमनीकृतमेव वा ।
मदिरा वा प्रदातव्या बलित्वेन वरानने ॥
सर्वसाधारणत्वेन बलिर्नैष प्रकीर्त्यते ।
अधिकारिविशेषेण दातुं शक्यो बलिस्त्वयम् ॥

बलिदानमन्त्रास्तु (ज्ञानार्णवे)

एह्येहि देवीपुत्रान्ते वटुकान्ते च नाथ च ।
कपिलान्ते जटाभार भासुरान्ते त्रिनेत्र च ॥
ज्वालामुखं च सर्वान्ते विघ्नान् नाशय नाशय ।
सर्वोपचारसहितं बलिं गृह्ण द्विधा पदम् ॥
वह्निजायान्वितो मन्त्रो वटुकस्य समीरितः ।
अनेन मनुना देवि वटुकस्य बलिं हरेत् ॥

(मेरौ)

योगिनीनां बलेर्मन्त्रं साधनान्ते पठेदिमम् ।

---

* एतत् पद्यार्धम् ३ पुस्तके उपलभ्यते ।

1 I

यँ योगिनीभ्यः स्वाहेति *कङ्कार्णां स्रग्धरान्वितम् ॥
ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले
पाताले वाऽनले वा सलिलपवनयोर्यत्र तत्र स्थिता वा।
क्षेत्रे पाठोपीठादिषु च कृतपदाः पुष्पधूपादिकेन
प्रीता देव्यः सदा नः †शुभवलिविधिना पान्तु वीरेन्द्रवन्द्याः॥

(ज्ञानार्णवे) तूक्तश्लोकमुक्ता—

एतदन्ते महेशानि याँ बीजं योगिनी ततः।
भ्यः स्वाहा सर्ववर्णान्ते योगिनीपदमालिखेत् ॥
कवचं चास्त्रमालिख्य वह्निजायां पुनर्लिखेत् ।
अनेन मनुना देवि योगिनीवलिमाहरेत्—इत्युक्तम् ॥

तथा।

षड्दीर्घस्वरसंभिन्नं क्षकारं पुनरालिखेत् ।
पुनः क्षेत्रपदं पालधूपदीपादि चालिखेत् ॥
सहितं वलिमालिख्य गृह्ण गृह्ण ततो वदेत् ।
वह्निजायान्वितो मन्त्रः क्षेत्रपालस्य सुन्दरि ॥
अनेन मनुना देवि क्षेत्रपाल वलिं हरेत् ।
गाँ गीँ गूँ त्रयमालिख्य ङेन्तं गणपतिं वदेत् ॥
वरान्ते वरदान्ते च सर्वान्ते जनमालिखेत् ।
मे वशं चानयेत्युक्त्वा वलिं गृह्ण द्विधा पदम् ॥
वह्निजायान्वितो मन्त्रो गणपस्यवलिं हरेत् ।

सिद्धान्तसारोद्धृतसामान्यपद्धतौ तु पूर्वादिप्रादक्षिण्येन गणेशादिभ्यो वलिप्रदानमुक्तम् ।

---

* कुरेकः। अङ्का नव। "अङ्कानां वामतो गति"रित्यतः कङ्का एकनवतिरर्णा वर्णा यस्मिन्निति। एतेन "याँ योगिनीभ्यः स्वाहा" इति सप्त वर्णाः ७ ऊर्ध्वमित्यादिस्रग्धरायाश्चतुश्चरणेषु चतुरशीति–८४ वर्णाः। एषामेकत्र संमिलनेनैकनवतिवर्णघटितमन्त्रो जायत इति।

† शुभविधिवलिनेति २ पु० पा०।

गणेशवटुकक्षेत्रपालेभ्यो वलिमाहरेत् ।
योगिनीभ्यश्च पूर्वादिप्रादक्षिण्येन देशिकः—इति ॥

महाकालेनापि गणेशादिक्रम उक्तः ।

गणाधिपतये पश्चाद्वटुकाय निवेदयेत्—इत्यादि ।

वस्तुतो दक्षिणमार्गे गणेशादिक्रमो वाममार्गे वटुकादिक्रमः ।

अवश्यमादौ वामादौ कुर्याद्वटुकपूजनम् ।
मार्गेऽस्मिन् वटुको मुख्यः सुराद्यं तेन निर्मितम् ॥

इति वाममार्गप्रकरणीय-(मेरुतन्त्र-) वचनाच्च ।

अथ भूतवलिः (मेरुतन्त्रे)

उपविश्यासने मन्त्री दद्याद्भूतवलिं ततः ।
ईशाने मण्डलं कृत्वा साधरं तत्र निःक्षिपेत् ॥
अन्नं व्यञ्जनतोयाढ्यं पात्रं पुष्पादिपूरितम् ।
तत्र भूतानि संपूज्य ततस्तेभ्यो वलिं हरेत् ॥
ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ।
योगिन्योऽप्युग्ररूपाश्च गणानामधिपाश्च ये ॥
भूचराः खेचराश्चैव ये तिष्ठन्त्यन्तरिक्षगाः ।
सर्वे ते प्रीतमनसो भूता गृह्णन्त्विमं वलिम् ॥
वामहस्तेन तत्पात्रे जलाधारं समर्पयेत् ।
पुष्पाञ्जलिं समादाय भूतानि प्रार्थयेदिति ॥
भूतानि यानीह वसन्ति भूतले
    वलिं गृहीत्वा विधिवत्प्रयुक्ताम् ।
सन्तोषमासाद्य व्रजन्तु सर्वे
    क्षमन्तु तान्यत्र नमोऽस्तु तेभ्यः ॥
दत्वा पुष्पाञ्जलिं नत्वा विहरन्तु यथासुखम् ।
भूतानीति च नाराचमुद्रया विसृजेत् ततः ॥

(शारदायाम्)

सहस्रावृत्त्या संजप्य मूलमन्त्रमनन्यधीः ।
तं जपं सर्वसंपत्त्यै देवतायै समर्पयेत् ॥

(मेरुतन्त्रे)

अष्टोत्तरसहस्रं तु तदर्धं त्रिशतं तु वा ।
अष्टोत्तरशतं वाऽपि जपेन्मूलमतन्द्रितः ॥
समाप्ते तु जपे मालां निदध्यान्मस्तकोपरि ।
अर्घपात्राज्जलं हस्ते गृहीत्वेदं पठेत् ततः ॥
गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादाज्जगत्पते ॥
देवस्य दक्षिणे हस्ते तोयं दत्वा समर्पयेत् ।

तथा ।

ततस्तु गीतस्तुतिभिर्घण्टावादनपूर्वकम् ।
ब्राह्मणो वेदमन्त्राद्यैः क्षत्रियः संहितादिभिः ॥
पौराणिकाद्यैर्वैश्यस्तु शूद्रस्तु प्राकृतादिभिः ।

(यामले)

ततश्च देवतां भक्त्या परिक्रम्य नमेद्बुधः ।

परिक्रम्येति प्रदक्षिणीकृत्य ।
प्रदक्षिणफलमुक्तं तन्त्रान्तरे ।

वेदविद्भ्यो धरां दत्वा यत् फलं लभते नरः ।
तत् फलं लभते भक्त्या कृष्णां कृत्वा प्रदक्षिणाम् ॥

कृष्णमित्युपलक्षणम् ।
प्रदक्षिणभेदा उक्ता (यामले)

त्रिकोणाकारकं देवि शक्तेः कुर्यात् प्रदाक्षिणम् ।
अर्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम् ॥

शिवप्रदक्षिणे मन्त्री अर्धचन्द्रक्रमेण च ।
सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत् ॥
प्रसार्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः ।
दर्शयेद्दक्षिणं पार्श्वं मनसाऽपि च दक्षिणः ॥
त्रिधा च वेष्टयेत् सम्यग्देवतायाः प्रदक्षिणे ।
एकहस्तप्रणामो वा एकं वाऽपि प्रदक्षिणम् ॥
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ।

तन्त्रान्तरे ।

एकं चण्ड्यां रवौ सप्त त्रीणि दद्याद्विनायके ।
चत्वारि केशवे दद्याच्छिवस्यार्धं प्रदक्षिणम् ॥

प्रणामभेदास्तु विष्णुकल्पलतायामुक्ताः ।

पद्भ्यां[१] कराभ्यां[२] जानुभ्या[३] मुरसा[४] शिरसा[५] दृशा[६] ।
वचसा[७] मनसा[८] चेति प्रणामोऽष्टाङ्ग ईरितः ॥
बाहुभ्यां[१] च सजानुभ्यां[२] शिरसा[३] वचसा[४] दृशा[५] ।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवराविमौ ॥

तथा ।

भूमौ निपत्य यः कुर्यात् कृष्णे दृष्टे नतिं सुधीः ।
सहस्रजन्मजं पापं त्यक्त्वा वैकुण्ठमाप्नुयात् ॥

(विष्णुधर्मे)

जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामान् देवस्य सर्वान् कामानवाप्नुयात् ॥
परमाणूनि यावन्ति ललाटे पुरुषस्य तु ।
पार्थिवानि भवन्तीह नमतो मधुसूदनम् ॥
तावतोऽब्दाँस्तु विप्रेन्द्र स्वर्गलोके महीयते ।

(शारदायाम्)

ततः शम्भोर्दिशि गुरुर्विकिरे* पूर्वसंचिते ।
हेमवस्त्रादिसंयुक्तां कर्करीं तोयपूरिताम् ॥
संस्थाप्य तस्यां सिंहस्थां खड्गखेटकधारिणीम् ।
घोररूपां पश्चिमास्यां पूजयेदस्त्रदेवताम् ॥
चलासनेन संपूज्य तामादाय गुरुः पुनः ।
रक्षेति लोकपालानां नालमुक्तेन वारिणा ॥
देवाज्ञां श्रावयन्नन्तः परिवृत्य प्रदक्षिणाम् ।
अस्त्रमन्त्रं समुच्चार्य यथापूर्वं निवेशयेत् ॥
अभ्यर्च्य भूयो गन्धाद्यैर्वक्त्रं तस्य स्थिरासनः ।

कर्करी वर्द्धनी सा च सनाला घटी ।

(क्रियासंग्रहे)

यथास्थानं निवेश्याथ कर्करीमस्त्ररूपिणीम् ।
आचार्य आत्मनः कुण्डे वह्निसंस्कारमाचरेत् ॥

विभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत-
स्रोतःशालिनि सन्निबन्धनसरित्संभेदमभ्यर्हितम् ।
सद्युक्तिस्फुटमौक्तिकोत्करचमत्कारे तृतीयस्तर-
ङ्गोऽयं श्रीनरदेवनिर्मितपुरश्चर्यार्णवेऽस्मिन्नगात् ॥

इति श्रीमन्महाराजाधिराजश्रीप्रतापसिंहविरचिते पुरश्चर्यार्णवे दीक्षाविधौ
गुरुवरणादिपूर्वकदेवतार्चनविधानं नाम तृतीयस्तरङ्गः ॥ ३ ॥

---

* विघ्नोपशान्तये उत्क्षिप्तश्वेतसर्षपादाविति ।

अथाग्निसंस्कारविधिः प्रदर्श्यते ।

तत्र प्रथमं कुण्डसंस्कार उक्तः (मेरुतन्त्रे)

वह्नेस्तु स्थापनं कुर्याद्वैदिकः कल्पमार्गतः ।
तान्त्रिकः कुण्डसंस्कारानष्टादश समाचरेत् ॥
मूलमन्त्रेण संपश्येत् प्रोक्षयेदस्त्रमन्त्रतः ।
कुशैः संताडयेत् कुण्डमस्त्रमन्त्रं पठँस्त्रिधा ॥
ततः कवचमन्त्रेण कुण्डस्याभ्युक्षणं मतम् ।
अस्त्रमन्त्रेण खननं कुण्डस्याङ्गुलमानतः ॥
अङ्गुष्ठानामिकाभ्यां तां मृदमस्त्रेण चोद्धरेत् ।
पुनः शुद्धमृदा तं च पूरयेद्धृदयाणुना ॥
समीकुर्यात् ततोऽस्त्रेण सेचयेत् कवचेन च ।
काष्ठादिना कुट्टयेत् तमस्त्रेण स्याद्यथा दृढम् ॥
कुशैः संमार्जयत् कुण्डं ततश्च कवचाणुना ।
विलेपनं गोमयाद्भिः कवचेनैव कारयेत् ॥
कवचेनाग्निसूर्येन्दुकलाः कुण्डे विचिन्तयेत् ।
त्रिसूत्रीकृतसूत्रेण वेष्टयेत् प्रतिमेखलम् ॥
त्रिवारं वर्ममन्त्रेण कुण्डपूजां ततश्चरेत् ।
तारश्चामुककुण्डाय आसनं च नमो* इति ॥
एषोऽर्घ इत्याद्यूहैश्च सकलं पूजनं चरेत् ।
नाभेश्च मेखलानां च कुर्यादेवं प्रपूजनम् ॥
संचिन्तयेत् ततोऽस्त्रेण तत् कुण्डं वज्रवद्दृढम् ।

(शारदायाम्)

अस्त्रेण वज्रीकरणं हृन्मन्त्रेण कुशैः शुभैः ।

---

* तान्त्रिकप्रयोगोऽयम् ।

चतुष्पथं तनुत्रेण तनुयादक्षपाटनम् ॥
यागे कुण्डानि संस्कुर्यात् संस्कारैरेभिरीरितैः ।
अथ वा तानि संस्कुर्याच्चतुर्भिर्वीक्षणादिभिः ॥

(अक्षपाठनं तु)

अच्छिन्नाग्रैस्ततो दर्भैरस्त्रमन्त्राभिमन्त्रितैः ।
कुण्डभित्तिगणं सर्वं वर्मणा परिभूषयेत् ॥
इत्येवमक्षपाटाख्यं कुण्डसंस्कार ईरितः ।

इति नारदपञ्चरात्रे प्रोक्तम् ।

(मेरुतन्त्रे)

वामहोमे तु संस्कारा आद्याश्चत्वार एव हि ।

(नारदपञ्चरात्रे)

कुण्डस्यारम्भकाले तु संस्कारा न कृता यदि ।
निष्पन्नस्य च ते सर्वे विधेयाः स्युः क्रमेण वै ॥

एते संस्काराः कुण्डनिर्माणकाले यदि न कृतास्तदा सिद्धे तस्मिन्नवश्यमाचरणीया इत्यर्थः ।

(शारदायाम्)

तिस्रस्तिस्रो लिखेल्लेखा हृदा प्रागुदगग्रगाः ।

अत्र लिखनक्रमः (सौत्रामणीतन्त्रे)

प्राचीमुदङ्मूर्धसंस्थं दक्षिणारम्भमालिखेत् ।
उदगग्रं पुरःसंस्थं पश्चिमारम्भमालिखेत् ॥
तिस्रस्तिस्रो लिखित्वैवं प्रोक्षयेद्वाग्भवेन च ।

(शारदायाम्)

प्रागग्राणां स्मृता देवा मुकुन्देशपुरन्दराः ।
रेखाणामुदगग्राणां ब्रह्मवैवस्वतेन्दवः ॥

(यामले)

मूलेन विलिखेदेता दर्भस्यैव स्रुवस्य वा ।

(मेरुतन्त्रे)

त्रिकोणोपरि षट्कोणं त्रिकोणद्वितयस्य तु ।

विष्णवीशवासवादीनां षण्णां तत्र प्रपूजनम् ॥

(शारदायामलयोस्तु)

अथ वा षट्कोणवृत्तं त्रिकोणं तत्र संलिखेत् ।
षट्कोणेनावृतं देवि त्रिकोणं वा समालिखेत्—इति ॥

त्रिकोणषट्कोणादिलिखनं पक्षान्तराभिप्रायेणोक्तम् ।

(शारदायाम्)

सर्वाण्यभ्युक्ष्य तारेण योगपीठमथार्चयेत् ।

(मेरुतन्त्रे) ।

स्वाग्रादिप्रादक्षिण्येन तत्पद्मकेशरेषु च ।
मध्यान्तं पूजयेदेतान् जयां च विजयां तथा ॥
अजिताख्यां चापराजितां नित्यां च विलासिनीम् ।
दोग्ध्रीमघोरां च तथा मङ्गलामथ तत्र तु ॥
ह्रीँ सर्वशक्तिकमलासनाय नम उच्चरन् ।
दत्वा पुष्पाञ्जलिं कुण्डे पूजयेद्भुवनेश्वरीम् ॥

तन्त्रान्तरे ।

वागीश्वरीश्वरयोर्योगपीठात्मने नमः ।
ह्रीमाद्यः पीठमन्त्रोऽयमावाह्यास्मिन् प्रपूजयेत् ॥

(मेरुतन्त्रे) पूजयेद्भुवनेश्वरीमित्यधिकृत्य ।

कामोन्मत्तं शिवं तत्र देवीमृतुमतीं तथा ।
गणेशशैवशाक्तेषु ध्यायन् संपूजयेदिति ॥

(शारदायाम्)

वागीश्वरीमृतुस्नातां नीलेन्दीवरसंनिभाम् ।
वागीश्वरेण संयुक्तामुपचारैः प्रपूजयेत् ।'

भुवनेश्वरीवागीश्वयोर्विकल्पो (गणेशविमर्षिण्याम्)

शक्तिबीजेन वागीशीं वागीशं साध्यमन्त्रतः ।

पूजयेदिति शेषः ।
(रुद्रयामले) तु

ततः शिवाय शक्त्यै च नमोन्तौ कथितौ मनू ।
आभ्यां त्रिस्त्रिश्च संपूज्य प्रणमेन्मनुनाऽमुना ॥
वागीश्वरीमृतुस्नातां समस्ताभरणान्विताम् ।
वागीश्वरेण संयुक्तां नमाम्यखिलसिद्धये—इत्युक्तम् ।

वैष्णवे तु वागीश्वरीवागीश्वरयोः स्थाने लक्ष्मीनारायणौ पूज्यौ । तदुक्तम् तत्त्वसारसंहितायाम्)

लक्ष्मीमृतुमतीं तत्र प्रभोर्नारायणस्य च ।
ग्राम्यधर्मेण संयुक्तमग्निं तत्र विचिन्तयेत् ॥

एवं सौरेऽपि । तदुक्तम् (मेरुतन्त्रे)

वैष्णवे च तथा सौरे लक्ष्मीमृतुमतीं स्मरेत् ।
नारायणस्य संयोगाज्जातमग्निं विचिन्तयेत् ॥

अत्र च ।

विभूतिरुन्नतिः कान्तिः सृष्टिः कीर्त्तिश्च सन्नतिः ।
तुष्टिरुत्कृष्टिवृद्धी च संप्रोक्ता नव शक्तयः ॥

इति पीठशक्तयः । बीजाद्यमासनं दत्वेति वचनात् श्रीलक्ष्मीनाराणयोर्योगपीठात्मने नम इति पीठमन्त्रः ।

श्रीविद्यायां तु (ज्ञानार्णवे)

कामेश्वरीं कुण्डमध्ये सकामामृतुसंयुताम् ।
समावाह्य च संपूज्य तद्गर्भे वह्निमावहेत् ॥

(शारदायाम्)

सूर्यकान्तादिसंभूतं यद्वा श्रोत्रियगेहजम् ।
आनीय वह्निं पात्रेण क्रव्यादांशं परित्यजेत् ॥

(गौतमीये)

पाषाणभवमग्निं च यदि वाऽरणिसंभवम् ।
श्रोत्रियाणां गेहजं च वनस्थमथ वा भवेत् ॥
यदृच्छालाभसंप्राप्तश्चायोग्यो यागकर्मणि ।
निरग्निब्राह्मणाल्लब्धो ह्यर्धलाभकरो भवेत् ॥
क्षत्राल्लब्धे चतुर्थांशं फलं दद्याद्धुताशनः ।
वैश्याच्छूद्राच्च विफलं जायते होमकर्म तत् ॥

(उड्डीशे)

श्रोत्रियागारजं वाऽपि सूर्यकान्तोद्भवं तु वा ।
अरणीसम्भवं वाऽपि क्षिप्तं स्वर्णादिभाजने ॥
ताम्रपात्रादिना मन्त्री पिहितं तु समानयेत् ।
अथ वाऽऽनीतमभितः स्थापयेत् कांस्यभाजने ॥

(मेरुतन्त्रे)

अरण्या मणितो विप्रगेहाद्वह्निं कुमारिका ।
सुवासिनी वा सद्वस्त्रा कृतशौचा समाहरेत् ॥
पात्रान्तरेण पिहिते ताम्रपात्रादिके शुभे ।
अग्निप्रणयनं कुर्याच्छरावे वाऽथ नूतने ॥
दद्यादस्त्रेण पात्रेऽग्निं कवचेन पिधाय च ।
जीर्णे शरावे कापाले भिन्नपात्रे तथोल्मुके ॥
नाग्निप्रणयनं कुर्याद्व्याधिहानिभयावहम् ।

क्रव्यादांशपरित्यागे विशेषस्तन्त्रान्तरे ।

अस्त्रेणाग्निं समाधाय कवचेन पिधाय तु ।
क्रव्यादांशं तु चास्त्रेण नैर्ऋत्ये संक्षिपेत् प्रिये ॥

(मन्त्रमुक्तावल्यामपि)

आनीयास्त्रेण नैर्ऋत्ये क्रव्यादांशं परित्यजेत् ।

देवांशं मूलमन्त्रेण स्थापयेत् पुरतः सुधीः ॥

(उड्डीशे) च

कूर्चास्त्राभ्यां तु नैर्ऋत्यां क्रव्यादांशं परित्यजेत्—इत्युक्तम् ।

(गणेश्वरेऽपि)

हुँ फडन्तेन मूलेन क्रव्यादांशं परित्यजेत् ।

(क्रियासारेऽपि)

श्मशानादावाममांसमत्ति यो वह्निरुच्यते ।
क्रव्यादं तस्य नामास्य त्यजेत किंचिद्धुताशनात् ॥

(शारदायाम्)

संस्कुर्यात् तं यथान्यायं देशिको वीक्षणादिभिः ।
औदर्यवैन्दवाग्निभ्यां भौमस्यैक्यं स्मरन् वसोः ॥
यो जपेद्वह्निबीजेन चैतन्यं पावके तदा ।

(मेरुतन्त्रे)

प्रदीपकलिकाकारं तेज आवाह्य यत्नतः ।
ऐक्यं जाठरवैन्दववह्निभ्यां पार्थिवस्य च ॥
स्मृत्वाऽग्निबीजकेनास्य चैतन्यं योजयेदथ ।

वैन्दवस्तु भ्रूमध्यस्थो वह्निः ।

(उड्डीशे)

दीपाद्दीपान्तरन्यायात् स्फुरन्तं सर्वतो मुखम् ।
श्वासमार्गेण मनुवित् कवचेन ततोऽर्चयेत् ॥

(शारदायाम्)

तारेण मन्त्रितं मन्त्री धेनुमुद्रामृतीकृतम् ।
अस्त्रेण रक्षितं पश्चात् तनुत्रेण च गुण्ठितम् ॥
अर्चितं त्रिः परिभ्राम्य कुण्डस्योपरि देशिकः ।
प्रदक्षिणं तदा तारमन्त्रोच्चारणपूर्वकम् ॥
आत्मनोऽभिमुखं वह्निं जानुस्पृष्टमहीतलः ।

शिवबीजधिया देव्या योनावेनं विनिःक्षिपेत् ॥

(मेरुतन्त्रेऽपि)

देव्या योनौ तत्र जानुस्पृष्टभूमिश्च देशिकः ।
शिवबीजमिति ध्यात्वा निःक्षिपेदाशुशुक्षणिम् ॥

(उड्डीशे)

भूमौ च जानुनी कृत्वा कूर्चबीज च वह्नि च ।
चैतन्यान्ते नमोऽन्तः स्यादनेनोत्थापयेच्छुचिम् ॥
शिवबीजधिया तस्या योनौ वह्निं विनिःक्षिपेत् ।

(त्रिपुरासारसमुच्चये)

योनावेनं विन्यसेत् स्वाभिवक्त्रं
पश्चाद्वह्निं मूलमन्त्रेण मन्त्री—इत्युक्तम् ।

शिवबीजधियेति शैवशाक्तविषयम् । वैष्णवादौ तु विष्णवादिबीजधियेति बोध्यम् ।

(वायवीयसंहितायां तु)

वह्निबीजं समुच्चार्य त्वादधीताग्निमासने ।
योनिमार्गेण चैव तद्वदात्मनः संमुखेन वा ॥

योनिमार्गेण मेखलोपरि स्थापितयोनिरन्ध्रेण ।

(मेरुतन्त्रे)

देवदेव्योराचमनं मैथुनान्तधिया चरेत् ।

(शारदायाम्)

पश्चाद्देवस्य देव्याश्च दद्यादाचमनीयकम् ।
ज्वालयेन्मनुनाऽनेन तमग्निमथ देशिकः ॥
चित्पिङ्गल-हनदहे पच-युग्मान्युदीर्य च ।
सर्वज्ञाज्ञापय स्वाहा मन्त्रोऽयं प्रागुदीरितः ॥

(रुद्रयामले)

हौँ हौँ ज्वलयुगं देवि प्रज्वलद्वितयं ततः ।
हुँफट्स्वाहेति मन्त्रेण ज्वालयेत् पावकं सुधीः—इत्युक्तम् ।

ज्वालनं तु मुखेन कुशमुष्टिपलाशपत्रादिना वा ।
तदुक्तम् (मेरुतन्त्रे)

मुखेनैव धमेदग्निं मुखादेषो ह्यजायत ।
कुशैः पलाशादिपर्णैर्नापवित्रेण केन चित् ॥

तन्त्रान्तरेऽपि ।

जुहुयुश्च हुताग्निं च पाणिशूर्पस्रुचादिभिः ।
न कुर्यादग्निधमनं न कुर्याद्व्यजनादिभिः ॥
मुखेनैव धमेदग्निं मुखादेषो ह्यजायत ।
नाग्निं मुखेनेति तु यल्लौकिका योजयन्ति तत्—इति ।

तत्र ज्वालिनी मुद्राऽपि प्रदर्शनीया सा च ।

मणिबन्धौ समौ कृत्वा करौ तु प्रसृताङ्गुली ।
मध्यमे मिलिते कृत्वा तन्मध्येऽङ्गुष्ठकौ क्षिपेत् ॥
इयं सा परमा मुद्रा ज्वालिनी होमकर्मणि—इति ।

उक्तलक्षणा (यामले)

तत उत्थाय विधिवत् कृत्वा पाणिपुटं सुधीः ।
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ॥
सुवर्णवर्णममलं समिद्धं विश्वतो मुखम् ।
उपविष्टेत विधिवत् मनुनाऽनेन पावकम् ॥

(उड्डीशे)

प्रादेशमात्रां समिधं मूलाग्रघृतसंप्लुताम् ।
तूष्णीं वह्नौ समुत्क्षिप्य जिह्वायां देवतां न्यसेत् ॥

(शारदायाम्)

विन्यसेदात्मनो देहे मन्त्री जिह्वाहविर्भुजः ।
लिङ्गपायुशिरोवक्त्रघ्राणनेत्रेषु सर्वतः ॥
वह्नीरार्घीशसंयुक्ताः सादियान्ताः सविन्दवः ।
वर्णा मन्त्राः समुद्दिष्टा जिह्वानां सप्त देशिकैः ॥

जिह्वास्तास्त्रिविधाः प्रोक्ता गुणभेदेन कर्मसु ।
हिरण्या कनका रक्ता कृष्णाऽन्या सुप्रभा मता ॥
बहुरूपाऽतिरक्ता च सात्त्विक्यो यागकर्मसु ।

वह्नी रेफः । इरो यकारः । अर्घीशो दीर्घौकारः । अत्र सात्त्विकरसनायां बहुरूपातिरक्तयोः पौर्वापर्यं बीजक्रमानुरोधेन न तु न्यासक्रमानुरोधेन बहुरूपायाः सर्वाङ्गे न्यसनीयत्वात् ।

तदुक्तं तन्त्रान्तरे ।

सलिङ्गगुदमुर्धास्यनासानेत्रेषु च क्रमात् ।
विन्यसेदतिरक्तां तां सर्वाङ्गे बहुरूपिणीम्—इति राघवभट्टाः ।

वस्तुतः ।

हिरण्या गगना रक्ता कृष्णा चैव तु सुप्रभा ।
बहुरूपा महेशानि अतिरिक्ता तथैव च—इत्यनन्तरम् ।
एकैकं विन्यसेद्देवि लिङ्गपायुशिरःस्वथ ।
वक्त्रे घ्राणे तथा नेत्रे सर्वाङ्गे च न्यसेत् ततः ॥

इति (वीरचूडामणि-) वचनात् ।

ततः प्रविन्यसेज्जिह्वां देहे मन्त्री विभावसोः ।
सलिङ्गगुदमूर्धास्यनासानेत्रेषु च क्रमात् ॥
सर्वाङ्गेषु च जिह्वास्ता वक्ष्यन्ते त्रिविधात्मिकाः ।
हिरण्या गगना रक्ता कृष्णा चैव तु सुप्रभा ॥
बहुरूपाऽतिरक्ता च जिह्वाः सप्तेति सात्त्विकाः ।

इति (तन्त्रमन्त्रप्रकाश-) वचनाच्चातिरक्तायाः सर्वाङ्ग एव न्यासः साधीयान् । राघवभट्टलिखितवचनानन्तरं च यदि प्रमाणं तदा विकल्प एवेति सुधार्णवकृतः । (मेरुतन्त्रेऽपि) तन्त्रमन्त्रप्रकाशिकोक्त एव क्रम उक्तः ।

(शारदायाम्)

पद्मरागा सुवर्णाऽन्या तृतीया भद्रलोहिता ।
लोहितानन्तरं श्वेता धूमिनी च करालिका ॥
राजस्यो रसना वह्नेर्विहिताः काम्यकर्मसु ।

विश्वमूर्त्तिः स्फुलिङ्गिन्या धूम्रवर्णा मनोजवा ॥
लोहिताऽन्या करालाख्या काला तामस्य ईरिताः ।
एताः सप्त नियुज्यन्ते क्रूरकर्मसु मन्त्रिभिः ॥
स्वस्वनामसमाभाः स्युर्जिह्वाः कल्याणरेतसः ।
अमर्त्यपितृगन्धर्वयक्षनागपिशाचकाः ॥
राक्षसाः सप्त जिह्वानामीरिता अधिदेवताः ।

अधिदेवतोक्तिस्तत्तज्जिह्वास्थाने न्यासार्थं पूजार्थं च ।

जिह्वासु त्रिदशादीनां तत्तत्कार्यं समाप्तये ।
जुहुयाद्वाञ्छितां सिद्धिं दद्युस्ता देवता मताः ।

इति (प्रपञ्चसार-)वचनात् तत्तज्जिह्वायां तत्तद्द्रव्येण होमपक्षे होमार्थं चेति सुधार्णवकृतः ।

(क्रियासारे)

अस्य भृगू ऋषिश्छन्दो गायत्र्यग्निस्तु देवता ।
बीजं शक्तिस्तु रँ स्वाहा ऋष्यादीन् पूर्ववन्न्यसेत् ॥

(शारदायाम्)

वह्नेरङ्गमनून्न्यस्येत् तनावुक्तेन वर्त्मना ।
सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठ पुरुषः पुनः ॥
धूमव्यापी सप्तजिह्वो धनुर्धर इति क्रमात् ।
षडङ्गमनवः प्रोक्ता जातिभिः सह संयुताः ॥
मूर्त्तीरष्टौ ततो न्यस्येद्देशिको जातवेदसः ।
मूर्धांशपार्श्वकट्यन्धुकटिपार्श्वाङ्ककेषु च ॥
प्रदक्षिणावशान्न्यस्येदुच्यन्ते ता यथाक्रमात् ।
जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः॥
अश्वोदरजसंज्ञोऽन्यः पुनर्वैश्वानराह्वयः ।
कौमारतेजाः स्याद्विश्वमुखो देवमुखः स्मृतः ॥

ताराग्नये पदाद्याः स्युर्न्नत्यन्ता वह्निमूर्त्तयः।
आसनं कल्पयित्वाग्नेर्मूर्त्तिं तस्य विचिन्तयेत् ॥

आसनं पीठं तनाविति शेषः। तत्राधारशक्त्यादिवह्निमण्डलान्तं विन्यस्य केशरेषु मध्ये च पीठशक्तीः। तत्रैव रँ वह्नियोगपीठाय नम इति पीठं च न्यसेत्। तदुक्तं तत्रैव।

स्वमण्डलान्तं प्रयजेत् पीठेशनवशक्तिकम्।
पीता श्वेताऽरुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ॥
रुचिरा ज्वालिनी प्रोक्ताः कृशानोर्नव शक्तयः।
स्वबीजेनासनं दत्वा मूर्त्तिं मलेन कल्पयेत्—इति ॥

अथ ध्यानं तत्रैव।

इष्टां शक्तिं स्वस्तिकाभीतिमुच्चै-
दीर्घैर्दोर्भिर्धारयन्तं जपाभम्।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं
ध्यायेद्वह्निं बद्धमौलिं जटाभिः ॥

ध्यानान्तरमुक्तम् (रुद्रयामले)

बन्धूकपुष्पसंकाशं सुतप्तकनकप्रभम्।
पद्मस्थं यजमानार्थं वदनद्वयशोभितम् ॥
सप्तच्छन्दोमयं देवं विमानोपरिसंस्थितम्।
त्रिधाग्रीवं त्रिपादाब्जं हव्यकव्यविनाशकम् ॥
ब्रह्माध्वर्यूद्गातृहोतृचतुःशृङ्गविराजितम्।
पञ्चपात्रं पाशुपतं कापिलं च महामतम् ॥
बौद्धं वैदिकमित्येतत् षट्पिङ्गलविलोचनम्।
वेदार्थं च चतुःश्रोत्रं श्रौतशास्त्रमयध्वनिम् ॥
सपातालजटाबद्धमौलिकोटीरभास्वरम्।
हेमालङ्कारसंयुक्तं हेमकुण्डलमण्डितम् ॥

1 L

रक्ताम्भोरुहमध्यस्थं स्वस्तिकासनसंस्थितम् ।
पृष्ठदेशसमालम्बितार्त्तीयचरणाम्बुजम् ॥
सदा शब्दायमानं च राजमानं स्वतेजसा ।
शक्तिं वज्रं स्रुक्स्रुवौ च चतुर्भिर्दिक्षु बाहुभिः ॥
तोमरं तालवृन्तं च सौवर्णं घृतपात्रकम् ।
वामैस्त्रिभिर्बाहुभिश्च दधानं रक्तवाससम् ॥
हिरण्या कनका रक्ता कृष्णा दक्षानने स्थिताः ।
सुप्रभा वाऽतिरक्ता च बहुरूपा च जिह्विका ॥
इमा रसज्ञास्तद्वामवदने नित्यमास्थिताः ।
एताभिः सप्तजिह्वाभिरुपेतं पाटिताननम् ॥

(शारदायाम्)

परिषिञ्चेत् ततस्तोयैर्विशुद्धैर्मेखलोपरि ।
दर्भैरगर्भैर्मध्यस्थमेखलायां परिस्तरेत् ॥

(कुलोड्डीशे)

एवं विन्यस्य देहः सन् परिस्तरणमाचरेत् ।
अर्घोदकेन संप्रोक्ष्य मध्यस्थमेखलोपरि ॥
उत्तराग्रं पूर्वदेशे पूर्वाग्रं दक्षिणे ततः ।
उत्तराग्रं पश्चिमे तु प्रागग्रमुत्तरे तथा ॥
मूलमाच्छादितं कृत्वा त्रिवारं तु परिस्तरेत् ॥

तथा ।

मेखलासु च सर्वासु दीपमालां प्रकल्पयेत् ।

(गणेश्वरविमर्शिण्याम्)

पूर्वाग्रैरुत्तराग्रैश्च दर्भैरग्निं परिस्तरेत् ।

दक्षिणोत्तरयोः पूर्वाग्रैः पूर्वपश्चिमयोरुत्तराग्रैरित्यर्थः ।

(मेरुतन्त्रे)

एकमेखलके कुण्डे मेखलाधः परिस्तरेत् ।
द्विमेखले द्वितीयायां मध्यमायां त्रिमेखले ॥
स्थण्डिले सिकतानां तु वाह्यभूमौ परिस्तरेत् ।

(शारदायाम्)

निःक्षिपेद्दिक्षु परिधीन् प्राचीवर्जं गुरूत्तमः ।

कात्यायनः ।

परिधीन् परिदधत्यार्द्रानेकवृक्षीयान् वाहुमात्रान् पालाशवैकण्टककाश्मर्यवैल्वानिति ।

(मेरुतन्त्रे)

पलाशकाश्मरीविल्वविकण्टकसमुद्भवान् ।
एकवृक्षोद्भवानार्द्रान् परिधीन् वाहुमात्रकान् ॥

(त्रिपुरासारसमुच्चयेऽपि)

स्थण्डिलके सिकतानां वाह्ये पात्रे न्यसेत् परिधीन् ।

(शारदायाम्)

प्रादक्षिण्येन संपूज्यास्तेषु ब्रह्मादिमूर्त्तयः ।

(सौत्रामणीतन्त्रे)

.... कुण्डमध्ये विधानवित् ।
पद्मासनान्तः साधारशक्त्यादिमनुभिः क्रमात् ।
उपर्युपरिसंपूज्या वह्नेरासनशक्तयः ॥
पूर्वादिदलमूलेषु मध्ये पूज्याः क्रमेण तु ।

आसनशक्तयः पूर्वोक्तपीठशक्तयः ।

अत्र विशेष उक्तो (मेरुतन्त्रे)

कुण्डमध्ये तु षट्कोणगर्भितं स्वर्णकर्णिकम् ।
नानाकेशरसंयुक्तं चतुर्द्वारसमावृतम् ॥
चिन्तयेदष्टदलकं चतुरस्त्रत्रयावृतम् ।
पूजापीठं तु तद्वह्नेस्तत्र मण्डूककादिकान् ॥

ज्ञानात्मानं योगपीठं संपूज्य .... इति ।

तथाऽष्टदलेषु पूर्वोक्तपीठशक्तिपूजनमुक्तम् ।

सर्वशक्तिकमलासनाय हृद्द्वादशाक्षरः ।
समस्तपीठपूजायां वह्नेर्मन्त्र उदाहृतः—इति ॥

(शारदायाम्)

ध्यातं वह्निं यजेन्मध्ये गन्धाद्यैर्मनुनाऽमुना ।
वैश्वानरजातवेदपदे पश्चादिहावह ॥
लोहिताक्षपदस्यान्ते सर्वकर्माणि साधय ।
वह्निजायावधिः प्रोक्तो मन्त्रः पावकवल्लभः ॥
मध्ये षट्स्वपि कोणेषु जिह्वाज्वालारुचो यजेत् ।

अत्र षट्सु कोणेषु मध्ये च यजेदित्यन्वयः । कोणेषु ईशानादिक्रम इत्युक्तम् ।

(सोमशम्भौ)

रुद्रेन्द्रवह्निमांसादवरुणानिलगोचरे ।
हिरण्याद्याः स्थिता वह्ने रसनाः षडनुक्रमात् ॥
मध्यतो बहुरूपा तु .... इति ।

(वायवीयसंहितायाम्)

हिरण्या प्रागुदग्जिह्वा कनका पूर्वतः स्थिता ।
रक्ताऽऽग्नेयी नैर्ऋती च कृष्णाऽन्या सुप्रभा मता ॥
अतिरिक्ता मरुज्जिह्वा स्वनामस्वगुणप्रभा ।
त्रिशिखा मध्यमा जिह्वा बहुरूपा समाह्वया ॥
तस्थुष्येका दक्षिणतो ज्वलन्ती वामतः परा ।
स्वबीजानन्तरं वाच्या .... इति ।

(गणेश्वरविमर्शिण्यामपि)

कोणषट्के च मध्ये च जिह्वाः संपूजयेत् ततः ।
हिरण्या तप्तहेमाभा शूलपाणेर्दिशि स्थिता ॥

वैदूर्यवर्णा गगना प्राच्या दिशि व्यवस्थिता ।
तरुणाऽऽदित्यसंकाशा रक्ता जिह्वाऽग्निदिक्स्थिता ॥
कृष्णा नीलाब्जसंकाशा नैर्ऋत्यां दिशि संस्थिता ।
सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता ॥
अतिरिक्ता च कौसुम्भवर्णा वायव्यसंस्थिता ।
बहुरूपा यथार्थाभा दक्षिणोत्तरसंस्थिता ॥
एता ज्वालारुचातीता वराभयकरा अपि ।

(त्रिपुरासारसमुच्चयेऽपि)

सुतप्तचामीकरचारुवर्णा
    स्थिता हिरण्यादिशि शूलपाणेः ।
वैदूर्यवर्णा कनकाभिधाना
    या सा निषण्णा दिशि वासवस्य ॥
या रक्ता तरुणादिवाकराभवर्णा
    सा जिह्वा हरिति सुसंस्थिता कृशानाः ।
या कृष्णा विकसितनीलनीरजाभा
    सा रक्षःपरिवृतदिग्विभागलग्ना ॥
पद्मरागसदृशप्रभोज्ज्वला सुप्रभा वरुणदिश्यवस्थिता ।
या महारजतपुष्पसन्निभा गन्धवाहदिशि साऽतिरक्तिका ॥
यथार्थसंज्ञा बहुरूपिका सा
    जिह्वोत्तरे दक्षिणतः स्थिता सा ।

होमे विशेष उक्तो (गणेशविमर्षिण्याम्)

एधांसि च हिरण्यायां गगनायां चरुं घृतम् ।
सिद्धार्थं बहुरूपायां रक्तायां तु यवास्तथा ॥
कृष्णायां तु हुनेल्लाजाः सुप्रभायां तु सक्तुभिः ।

तिलाँश्चैवातिरक्तायां कनकायां तु सर्वदा ॥
सर्वद्रव्याणि जुहुयात् साधकः सर्वकर्मसु ।

तन्त्रान्तरे ।

फलं तु कामभेदेन क्रमादासामुदीर्यते ।
वश्याकर्षणयोराद्या गगना स्तम्भने मता ॥
विद्वेषमोहयो रक्ता कृष्णा मारणकर्मसु ।
सुप्रभा शान्तिके पुष्टौ सुरक्तोच्चाटने मता ॥
एकैकवहुरूपा तु सर्वकामफलप्रदा ।

(मेरुतन्त्रे)

यथा कार्यं तथा जिह्वा दृश्यते चेत् स्वदिग्गता ।
ज्वालारूपा तथा सिद्धिर्विपरीतात्विपर्ययः ॥

वैष्णवे तु जिह्वान्तराण्युक्तानि तत्रैव ।

प्रभा दीप्तिः प्रकाशा च मरीचिस्तापनी तथा ।
कराला लेलिहा चेति जिह्वा वैष्णवकर्मणि ॥
ईशप्राग्वह्निनैर्ऋत्यपश्चाद्वायव्यमध्यतः ।
संस्थिता सकला जिह्वा वराभयलसत्कराः ॥

(शारदायाम्)

केशरेषूक्तमार्गेण पूजयेदङ्गदेवताः ।
दलेषु पूजयेन्मूर्त्तिं शक्तिस्वस्तिकधारिणीम् ।
लोकपालाँस्ततो दिक्षु पूजयेदुक्तलक्षणात् ॥

अत्र लोकपालपूजा मेखलास्थदर्भोपरि कार्या ।
तदुक्तं तन्त्रान्तरे ।

कोणे षट्के च मध्ये च जिह्वाभिः केशरेष्वपि ।
अङ्गमन्त्रैस्ततो वाह्ये त्वष्टाभिर्मूर्त्तिभिः क्रमात् ॥
मेखलाश्रितदर्भेषु दिक्पतीन् पूर्वतो यजेत् ।

(तत्त्वसारसंहितायाम्)

पात्राण्यासाद्य विधिवद्बहुशश्चापि मन्त्रवित् ।
तान्यवेक्ष्य पवित्रेण चोत्तानानि विधाय च ॥
पुनः प्रक्षालयेत् पात्रं परिपूर्य शुभाम्बुना ।
दत्वाऽक्षतान् पवित्रं च तदुत्पूर्य निधापयेत् ॥
दिश्युत्तरस्यां तत् पात्रं प्रणीतेत्युच्यते बुधैः ।
ततः किंचित् प्रणीताम्बु प्रोक्षण्याऽऽदाय तज्जलैः ॥
यज्ञसाधनसंभारं प्रोक्षयेन्मूलमन्त्रतः ।
ततो ब्रह्माणमावाह्याभ्यर्चयेन्मूलमन्त्रतः ।

अन्यत्रापि ।

वामे चास्तीर्य दर्भान् बलरिपुहरिदग्राँस्तदूर्ध्वं निधाय
पात्राणि द्वन्द्वशोऽधोवदनमथ तथोत्तानवक्त्राणि कृत्वा ।
हृन्मन्त्रेणाभिपूर्यान्यतममथ जलैर्मन्त्रपूतैरथैभि-
रभ्युक्ष्यान्यैश्च कूर्चैः सकलमपि हृदा सव्यगं हव्यजातम् ॥

इति तन्त्रान्तरे ।

कुण्डस्योत्तरतः स्थाप्या प्रणीता वारिपूरिता ।
प्रणीतापात्रतः सर्वे स्थाप्याः पात्रगणाः क्रमात् ॥
आज्यस्थाली चरुस्थाली गव्यक्षीरसमन्विता ।
स्रुक्स्रुवौ च घृतं गव्यं तण्डुलाः कुशमूलकाः ॥
पालाशाः समिधस्तिस्रः पूर्णपात्रमतः परम् ।

(मेरुतन्त्रे)

स्वगृह्योक्तविधानेन वायुदेशाच्च पूर्वतः ।
स्रुक्स्रुवौ च प्रणीता च प्रोक्षणीपात्रयुग्मकम् ॥
आज्यस्थाली च परिधीनिध्मं च कुशमुष्टयः ।
अधोमुखानि पात्राणि होमद्रव्यं वलिं तथा ॥

गन्धपुष्पाक्षतादीनि सर्वाण्यासादयेदथ ।
तान्यभ्युक्ष्य पवित्रेण चोत्तानानि निधाय च ॥
प्रोक्षणीपात्रयुगलं परिपूर्य शुभाम्बुना ।

तन्त्रान्तरे ।

स्ववामभागे प्रागग्रान् दर्भानास्तीर्य चोपरि ।
यथावित्तानुसारेण सौवर्णादीनि कर्मणि ॥
अधोमुखानि पात्राणि द्वन्द्वरूपाणि विन्यसेत् ।
उत्तानीकृत्य पात्राणि जलाद्यैः संप्रपूरयेत् ॥

(यामले)

वह्नेरुत्तरतः स्वस्य वामे देशिकसत्तमः ।
दर्भानास्तीर्य पूर्वाग्रान् पात्राण्यासादयेदथ ॥

स्वस्येति पूर्वाभिमुखस्येति वेदितव्यम् ।

(त्रिपुरासारसमुच्चयेऽपि)

ततो वामभागे परिस्तीर्य दर्भान्
पुलोमात्मजावल्लभाशागताग्रान् ।
तदूर्ध्वं न्यसेद्द्वन्द्वरूपेण पात्रा-
ण्यथोऽधोगतास्यानि सर्वाणि धीमान् ॥
अथोत्तानितेष्वेषु पात्रेषु पात्रं
जलैरेकमापूर्य तीर्थानि तत्र ।
सुसंचिन्त्य तैः प्रोक्षयेत् कूर्चदर्भै-
र्हृदा सव्यभागस्थितं द्रव्यजातम् ॥

पात्रेष्वपि विशेषस्तत्रैव ।

सौवर्णान्यपि राजतान्यपि तथा पात्राणि शौल्वानि वा
मृत्पात्राण्यपि शान्तिकादिषु परं शस्त्राणि कर्मस्विह ।

शैल्वक्षद्रुमशिग्रुभूरुहकृतान्येतानि विद्वेषणो-
 च्चाटोत्सादनमारणादिषु भृशं शस्तानि पात्राण्यपि ॥

शौल्वं ताम्रम् । शेलुर्बहुवारकः । अक्षद्रुमो विभीतकद्रुमः । शिग्रुः शोभाञ्जनः ।

(मेरुतन्त्रे)

वृणुयाद्ब्राह्मणं शान्तं देवतामन्त्रदीक्षितम् ।
कुण्डस्य दक्षिणे भागे वेशयेत् तं कुशासने ॥
अमुकामुकगोत्रोऽहममुकामुकगोत्रिणाम् ।
दीक्षाङ्गभूतहोमेऽस्मिन् ब्रह्माणं त्वां वृणे इति ॥
वस्त्रालङ्कारादिकेन धृत्वा तं परिपूजयेत् ।
कुर्यात् कुशवटुं वाऽपि लभ्यते ब्राह्मणो न चेत् ॥

(शारदायाम्)

पश्चादादाय पाणिभ्यां स्रुक्स्रुवौ तावधोमुखौ ।
त्रिशः प्रतापयेद्वह्नौ दर्भानादाय देशिकः ॥
तदग्रमूलमध्यानि शोधयेत् तैर्यथाक्रमात् ।
गृहीत्वा वामहस्तेन प्रोक्षयेद्दक्षिणेन तौ ॥
पुनः प्रताप्य तौ मन्त्री दर्भानग्नौ विनिःक्षिपेत् ।
आत्मनो दक्षिणे भागे स्थापयेत् तौ कुशास्तरे ॥

तन्त्रान्तरे ।

गृहीत्वा स्रुक्स्रुवावूर्ध्वमुखौ चाधोमुखौ क्रमात् ।
प्रताप्याग्नौ त्रिधा दर्भमूलमध्याग्रकैः स्पृशेत् ॥
पुनस्त्रिशः प्रताप्याधोमुखौ वह्नौ कुशान् क्षिपेत् ।
मूलमध्याग्रके न्यस्येच्छक्तीरिच्छादिकाः क्रमात् ॥
स्रुचि शक्तिं स्रुवे शम्भुं विन्यसेद्धृदयाणुना ।

इच्छादिका इति इच्छाज्ञानक्रिया इत्यर्थः ।

(शैवागमे तु)

गृहीत्वा स्रुक्स्रुवावूर्ध्ववक्त्रावधोमुखौ क्रमात् ।
प्रताप्याग्नौ त्रिधा दर्भमूलमध्याग्रकैः स्पृशेत् ॥
त्रिसूत्रवेष्टितग्रीवौ पूजितौ कुसुमादिभिः ।
कुशानामुपरिष्टात् तौ स्थापयित्वा स्वदक्षिणे—इत्युक्तम् ॥

(मेरुतन्त्रे)

कुशाग्रैस्तु तयोरग्रं मध्यं मध्यैश्च मार्जयेत् ।
मूलं मूलैस्त्रिधा चैवं मार्जयित्वा प्रतापयेत् ॥
धृत्वा तौ वामहस्तेन प्रोक्षयेत् प्रोक्षणीजलैः ।
दक्षिणेन कराग्रेण पुनः संतापयेच्च तौ ॥
कुशान् क्षिप्त्वा ततो वह्नौ स्वदक्षे तौ कुशास्तरे ।
संस्थाप्य स्रुक्स्रुवौ पश्चाद्घृतसंस्कारमाचरेत् ॥

(शारदायाम्)

आज्यस्थालीमथादाय प्रोक्षयेदस्त्रवारिणा ।
तस्यामाज्यं विनिःक्षिप्य संस्कृतं वीक्षणादिभिः ॥

तन्त्रान्तरे ।

गव्यमाज्यं समादाय मूलेनैवाभिमन्त्रितम् ।
स्वकां ब्रह्ममयीं मूर्त्तिं संचिन्त्याग्नौ प्रतापयेत् ॥

(शैवागमेऽपि)

गव्यमाज्यं समादाय मूलेनैवाभिमन्त्रितम् ।
स्वकां ब्रह्ममयीं मूर्त्तिं संचिन्त्य च—इति ॥

गव्यमित्युत्तमकल्पमभिप्रेत्योक्तम् ।
तदुक्तम् (पिङ्गलामते)

उत्तमं गोघृतं प्रोक्तं मध्यमं महिषीभवम् ।
अधमं छागलीजातं तस्माद्गव्यं प्रशस्यते—इति ॥

(वायवीयसंहितायाम्)

न्यस्य मन्त्रं घृते मुद्रां दर्शयेद्धेनुसंज्ञकाम् ।

(शारदायाम्)

निरुह्य वायवेऽङ्गारान् हृदा तेषु निवेदयेत् ।
इदं तापनमुद्दिष्टं देशिकैस्तन्त्रवेदिभिः ॥
संदीप्य दर्भयुगलमाज्ये क्षिप्त्वाऽनले क्षिपेत् ।
गुरुर्हृदयमन्त्रेण पवित्रीकरणं त्विदम् ॥
दीप्तेन दर्भयुग्मेन नीराज्याज्यं सवर्मणा ।
अग्नौ विसर्जयेद्दर्भमभिद्योतनमीरितम् ॥
घृते प्रज्वलितान् दर्भान् प्रदर्श्यास्त्राणुना गुरुः ।
जातवेदसि तान् न्यस्येदुद्योतनमिदं मतम् ॥
गृहीत्वा घृतमङ्गारान् प्रयोज्याग्नौ जलं स्पृशेत् ।
अङ्गुष्ठोपकनिष्ठाभ्यां दर्भौ प्रादेशसंमितौ ॥
धृत्वोत्पुनीयादस्त्रेण घृतमुत्पवनं त्विदम् ।
तद्वद्धृदयमन्त्रेण कुशाभ्यामात्मसंमुखम् ॥
घृते संप्लवनं कुर्यात् संस्काराः षडुदीरिताः ।

अङ्गुष्ठोपकनिष्ठाभ्यामिति हस्तद्वयस्येति शेषः । उत्पुनीयादिति अग्निसंमुखमिति शेषः ।

तदुक्तम् (शैवागमे)

प्रादेशमात्रदर्भाभ्यामङ्गुष्ठानामिकाग्रकैः ।
धृताभ्यां संमुखं वह्नेरस्त्रेणोत्प्लवमाचरेत् ॥

(शारदायाम्)

प्रादेशमात्रं सग्रन्थिदर्भयुग्मं घृतान्तरे ।
निःक्षिप्य भागौ द्वौ कृत्वा पक्षौ शुक्लेतरौ स्मरेत् ॥
वामे नाडीमिडां भागे दक्षिणे पिङ्गलां पुनः ।

सुषुम्णां मध्यतो ध्यात्वा कुर्याद्धोमं यथाविधि ॥

तत्र स्रुवधारणप्रकारो (नारदीये)

हीयते यजमानो वै स्रुवमूलस्य दर्शनात् ।
तस्मात् संगोपयेन्मूलं होमकाले स्रुवस्य च ॥
अग्रे व्याधिकरं प्रोक्तं मध्ये शोककरं स्मृतम् ।
मूले हानिकरं प्रोक्तं स्रुवं धारयते कथम् ॥
वेदाङ्गुलं परित्यज्य अग्रे चैव द्विरष्टकम् ।
वेदाङ्गुलं तु तन्मध्ये धारयेच्छङ्खमुद्रया ॥

तन्त्रान्तरे ।

पञ्चाङ्गुलं बहिस्त्यक्त्वा धारयेच्छङ्खमुद्रया ।

(होमसारे)

मूलात् षडङ्गुलं त्यक्त्वा चतुरङ्गुलमेव वा ।
प्रकोष्ठे मूलमाच्छाद्य धारयेच्छङ्खमुद्रया ॥

तन्त्रान्तरे ।

श्रुवेणाज्यं समादाय जुहुयान्न्युब्जपाणिना ।

(भैरवतन्त्रे)

हविरुत्तानहस्तेन वैश्वानरमुखे हुतम् ।
होतुश्चक्षुर्विनाशाय यजमानो विनश्यति ॥

(परिशिष्टे तु)

उत्तानेनैव हस्तेन अङ्गुष्ठाग्रेण पीडितम् ।
संहताङ्गुलिपाणिस्तु वाग्यतो जुहुयात्-....इत्युक्तम् ॥

भैरवः ।

होमे मुद्रात्रयं प्रोक्तं मृगी हंसी च शूकरी ।
मृगी कनिष्ठातर्जन्योर्हंसी मुक्तकनिष्ठिका ॥
शूकरी करसङ्कोचमिति मुद्राः प्रकीर्त्तिताः ।
मृगी च पुत्रकामार्थी हंसी सर्वफलप्रदा ॥

अभिचारेषु सर्वेषु शूकरी कथिता बुधैः ।

(शारदायाम्)

स्रुवेण दक्षिणाद्भागादादायाज्यं हृदा गुरुः ।
जुहुयादग्नये स्वाहेत्यग्नेर्दक्षिणलोचने ॥
वामतस्तद्वदादाय वामे वह्निविलोचने ।
जुहुयादथ सोमाय स्वाहेति हृदयाणुना ॥

(मेरुतन्त्रे)

गृहीत्वाऽऽज्यं वामभागाद्धृदा वामेऽग्निलोचने ।
हुनेत् सोमाय स्वाहेति त्यागः सर्वत्र नो मतः ॥

(शारदायाम्)

मध्यादाज्यं समादाय वह्नेर्भालविलोचने ।
जुहुयादग्नीषोमाभ्यां स्वाहेति हृदयाणुना ॥
हृन्मन्त्रेण स्रुवेणाज्यं भागादादाय दक्षिणात् ।
जुहुयादग्नये स्विष्टकृते स्वाहेति तन्मुखे ॥
हेतिं संपातयेद्भागेष्वाज्यस्याथाहुतिक्रमात् ।
इत्यग्निनेत्रवक्त्राणां कुर्यादुद्योतनं गुरुः ॥

संपातयेद्भागेष्विति । यस्माद्भागादाज्यं गृहीत्वा हुतं तद्भागे हुतशेषं क्षिपेदित्यर्थः ।

तदुक्तम् (शैवागमे)

स्वाहेत्यग्नौ हेतिशेषभागमाज्यं क्षिपेत् क्रमात्—इति ।

(शारदायाम्)

सताराभिर्व्याहृतिभिराज्येन जुहुयात् पुनः ।

अत्र । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहेति व्यस्तसमस्ताभिः पञ्चाहुतयः ‘पञ्चभिर्मनुभिर्हुने’दिति (नारायणीयतन्त्र-) वचनात् ।

(उड्डीशे)

देव्या व्याहृतिहोमं च ताराद्येन चतुर्हुनेत् ।
भूरग्नये पृथिव्यै च महते वह्निवल्लभा ॥
भुवः पदाद्वायवे च अन्तरिक्षाय शब्दतः ।
अग्न्यादित्यचन्द्रमसो ङेन्ता नक्षत्र इत्यपि ॥
भ्यसन्तश्चैव दिग्भ्यश्च महते वह्निवल्लभा ।

(शारदायाम्)

जुहुयादग्निमन्त्रेण त्रिवारं देशिकोत्तमः ।
गर्भाधानादिकं वह्नेः क्रिया निवर्त्तयेत् क्रमात् ॥
अष्टाभिराज्याहुतिभिः प्रणवेन पृथक् पृथक् ।
गर्भाधानं पुंसवनं सीमन्तोन्नयनं पुनः ॥
अनन्तरं जातकर्म स्यान्नामकरणं तथा ।
उपनिष्क्रमणं पश्चादन्नप्रासनमीरितम् ॥
चूडोपनयनं भूयो महानाम्न्यं महाव्रतम् ।
अथोपनिषदं पश्चाद्गोदानोद्वाहकौ मृतिः ॥

(मेरौ)

गर्भाधानं पुंसवनं सीमन्तोन्नयनं चरेत् ।
जातं वागीश्वरीगर्भात् प्रागवद्ध्यायेद्धुताशनम् ॥
जातकर्म ततः कृत्वा नालच्छेदं समाचरेत् ।
सूतकं शोधयित्वाऽथ कुर्यान्नाम यथाविधि ॥
तृप्तये यस्य देवस्यास्त्यग्निस्तन्नामपूर्वकः ।
चौलोपनयनं वह्नेर्महानाम्नीव्रतं तथा ॥
महाव्रतं चोपनिषद्व्रतं गोदानमेव च ।
समावर्त्तनमुद्वाहः शाक्ते वाग्भवपूर्वकाः ॥

तथा ।

प्रणवं पूर्वमुच्चार्य कर्मनाम समुद्धरेत् ।
संपादयामि स्वाहेति सर्वकर्मस्वयं विधिः ॥

(शारदायाम्)

शुभेषु स्युर्विवाहान्ताः क्रियास्ताः क्रूरकर्मसु ।
मरणान्ताः समुद्दिष्टा वह्नेरागमवेदिभिः ॥

(उड्डीशे)

जातकर्म समाप्याथ श्रमापनोदनाय च ।
प्रादेशमात्रां समिधं मूलाग्रघृतसंप्लुताम् ॥
ॐ कामेश्वरकामेशीभ्यां स्वाहेति त्रिर्विनिःक्षिपेत् ।
वह्नेश्च पितरौ मन्त्री स्वदेहे विनियोजयेत् ॥
इष्टदेवस्य नाम्ना तु वह्नेर्नाम समाचरेत् ।

कामेश्वरकामेश्वरीभ्यामिति तु श्रीविद्यायाम् । अन्यत्र वागेश्वरवागीश्वरीभ्यामिति ज्ञेयम् ।

(पूर्णयागे)

आज्याहुत्यष्टकं हुत्वा नामकर्म समाचरेत् ।
देशिकस्त्वमुकोऽसीति मूलमन्त्रेण कल्पयेत् ॥

(वायवीयसंहितायाम्)

जातं ध्यात्वैवमाकारं जातकर्म समाचरेत् ।
नालापनयनं कृत्वा ततः संशोध्य सूतकम् ॥
शिवाग्निरिति नामास्य कृत्वा हुतिपुरःसरम् ।
पित्रोर्विसजनं कृत्वा चूडोपनयनादिकम् ॥
अथोद्वाहावसानं च कृत्वा संस्कारमस्य तु ।

नालापनयनप्रकारस्तु (शैवागमे)

वह्नेरिहास्त्रमन्त्रेण ततो नालापनुत्तये ।
समिधः पञ्च जुहुयात् प्रान्ते मूले घृतप्लुताः—इति ॥

(वायवीयसंहितायाम्)

ताः पालाश्यः परा वाऽपि याज्ञीया द्वादशाङ्गुलाः ।
अवक्रा न स्वयं शुष्काः सत्वचो निर्व्रणाः समाः ॥
दशाङ्गुला वा विहिताः कनिष्ठाङ्गुलिसंमिताः ।
प्रादेशमात्रा वाऽलाभे होतव्याः सकला अपि—इति ॥

(शारदायाम्) वह्नेः सकलसंस्कारशेषे तत्पित्रोर्विसर्जनमुक्त्वा नालापनयनीये पञ्चसमिधां होम उक्तः ।

ततश्च पितरौ तस्य संपूज्यात्मनि योजयेत् ।
समिधः पञ्च जुहुयान्मूलाग्रघृतसंप्लुताः—इति ॥

(क्रियासारे)

पित्रोर्विसर्जनं कृत्वा चूडोपनयनादिकम् ।
कुर्याद्वा सर्वसंस्कारं शेषे देवौ विसर्जयेत् ॥
श्रमापनोदनार्थं च हुत्वा तिस्रः समिद्वराः ।

(मेरुतन्त्रे)

सबीजरसनानाम्ना चैकैकामाहुतिं हुनेत् ।
ततश्चाङ्गानि जुहुयाद्वह्नेर्मूर्त्यष्टकं तथा ॥
इन्द्रादिलोकपालाश्च आयुधानि ततः परम् ।
मन्त्रेणोङ्कारपूर्वेण स्वाहान्तेन विचक्षणः ॥
स्वाहावसाने जुहुयाद्ध्यायन् वै मन्त्रदेवताम् ।

स्वाहान्तमन्त्रे तु स्वाहान्तरं न देयम् । तदुक्तम् (मन्त्रप्रकाशे)

नमोन्ते न नमो दद्याद्द्विठान्ते द्विठमेव च ।
पूजायामाहुतौ चापि सर्वत्रायं विधिः शिवे ॥

द्विठः स्वाहा । अत्र ठकारेण लिपिसाम्याद्विन्दुरुच्यते । विन्दुद्वयं विसर्गः । स च शक्तिरूपस्तेन द्विठशब्देनाग्निशक्तिः स्वाहोच्यत इति राघवभट्टाः । वस्तुतो द्विठ इति पारिभाषिकी संज्ञेति सांप्रदायिकाः ।

(मेरुतन्त्रे)

चतुर्वारं स्रुवेणाज्यं गृहीत्वा स्रुचि निःक्षिपेत् ।

तेनैव तां पिधायाग्नौ हुनेत् तिष्ठन् गुरुः स्वयम् ॥
वौषडन्तेन वह्नेस्तु मनुना संवदेत् ततः ।
जिह्वायां मध्यसंस्थायां मन्त्री ज्वालावलीतनौ ॥
ताराद्यैर्दशभिर्भेदैः पूर्वपूर्वसमन्वितैः ।
मनुना गाणपत्येन हुनेत् पूर्वं दशाहुतीः ॥
जुहुयाच्च चतुर्वारं समस्तेनैव तेन तु ।

(शारदायामपि)

विघ्नेश्वरस्य मन्त्रेण जुहुयादाहुतीर्दश ।
सामान्यं सर्वतन्त्राणामेतदग्निमखं स्मृतम् ॥

तत्रैव ।

ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् ।
अस्त्रेण क्षालिते पात्रे नवे ताम्रमयादिके ॥
तण्डुलान् शालिसंभूतान् मूलमन्त्राभिमन्त्रितान् ।
प्रसृतीः पञ्चदशभिः क्षिप्त्वा चास्त्रमनुं जपन् ॥
प्रक्षाल्य पात्रवदनं पिधाय कवचाणुना ।
प्राङ्मुखो मूलमन्त्रेण देशिकेन्द्रश्चरुं पचेत् ॥
स्रुवेणाज्येन संपन्ने दद्यात् तत्राभिघारणम् ।
मूलेन पश्चात् तत् पात्रं कवचेनावतारयेत् ॥
अस्त्रजप्तकुशास्तीर्णमण्डले विधिवद्गुरुः ।
तं विभज्य त्रिधा भागमेकं देवाय कल्पयेत् ।
अन्यमग्नौ प्रजुहुयादपरं देशिकः स्वयम् ।
शिष्येण सार्धं भुञ्जीत ....इति ॥

होमभोजनयोः प्रकारस्त्वग्रे वक्ष्यते ।

(मेरुतन्त्रे)

संपूज्य देवतापीठं वह्नौ सम्यक् ततो गुरुः ।

अग्निरूपधरां तत्र पूजयेदिष्टदेवताम् ॥
आज्येन साध्यमनुना पञ्चविंशतिसंख्यकम् ।
हुनेन्मन्त्री चाग्निमुखे वक्त्रैकीकरणं त्विदम् ॥
आत्माग्निदेवतानां च चिन्तयन्नैक्यमात्मवित् ।
एकादशाथ मूलेन हुनेदाज्येन चाहुतीः ॥
नाडीसन्धानमेतद्धि प्रोक्तं देशिकसत्तमैः ।
अङ्गप्रभृत्या वृत्तीनामेकैकामाहुतिं हुनेत् ॥

अन्ते मूलेन दशाहुतयो देयास्तदुक्तम् (त्रिपुरासारसमुच्चये)

परिवारस्यैकैकां देव्या दशाहुतीर्जुहुयात्—इति ॥

(मेरुतन्त्रे)

पूर्वादिदिक्षु कुण्डेषु सर्वेष्वपि यथाविधि ।
गुरुर्वह्निं परिहरेत् संस्कृतेषूक्तवर्त्मना ॥
सर्वर्त्विजश्चन्दनाद्यैः संपूज्य प्रोक्तदेवताम् ।
सर्वावरणसंयुक्तां मूलेन जुहुयुस्ततः ॥
पञ्चविंशतिधा सर्पिःसंयुतेन पयोन्धसा ।

अत्र सर्वेष्वपि कुण्डेषु वह्निविहरणमाचार्यकर्तृकम् । कुण्डान्तरसंस्कारस्तु ऋत्विक्कर्तृको बोध्यः । जुहुयुरिति । आचार्य ऋत्विजश्चेति शेषः । पयोन्धसा चरुणा पूर्वोक्तचरोर्द्वितीयभागेनेति यावत् । चरुहोमात् पूर्वं पञ्चविंशतिराज्याहुतयो देयाः ।

तथा च (शारदायाम्)

ततोऽन्येष्वपि कुण्डेषु संस्कृतेषु यथाविधि ।
आचार्यो विहरेदग्निं पूर्वादिषु समाहितः ॥
ऋत्विजो गन्धपुष्पाद्यैरङ्गाद्यावरणान्विताम् ।
तत्रोक्तदेवतामिष्टां पञ्चविंशतिसंख्यया ॥
मूलेनाज्येन जुहुयुः साज्येन चरुणा तथा ।

(सोमशम्भौ)

चरोस्तृतीयभागं तु ग्रासत्रितयसंमितम् ।
अष्टग्रासप्रमाणं वा दर्शनस्पर्शवर्जितम् ॥
पलाशपुटके भुक्तौ भुक्तौ पिप्पलपत्रके ।
हृदा संभोजयेन्मन्त्री पूतैराचामयेज्जलैः ॥

(शारदायाम्)

आचान्तं शिष्यमानीय सकलीकृत्य देशिकः ।
*तालप्रमाणं हृज्जप्तं क्षीरवृक्षादिसंभवम् ॥
दन्तकाष्ठं तदा दद्याच्छिष्याय विनयात्मने ।
दन्तान् विशोध्यं यत्नेन तत् प्रक्षाल्य विसर्जयेत् ॥

(मेरुतन्त्रेऽपि)

वितस्तिमात्रं हृज्जप्तं यथोक्तं दन्तधावनम् ।
शिष्याय दद्यात् स रदान् विशोध्य क्षालितं त्यजेत् ॥

दन्तकाष्ठपरीक्षा च मण्डपप्रवेशात् प्रागेव कर्त्तव्या । अत्र तु दन्तशोधनमात्रमिति संप्रदायः । अत्रैव परीक्षा कर्त्तव्येति केचित् । अन्ये तु कालद्वयेऽपि तत्परीक्षा कर्त्तव्यैवेत्याहुः ।

(शारदायाम्)

यथाविधि तमाचान्तं शिखाबन्धाभिरक्षितम् ।
विधाय सार्द्धममुना वेद्यां दर्भास्तरे गुरुः ॥
शयीत तस्यां तां रात्रिमधिवासः समीरितः ।

(नारायणीये)

पुनस्तं शिष्यमाचान्तं शिखाबन्धाभिराक्षितम् ।
कृत्वां वेद्यां सहानेन स्वपेद्दर्भास्तरे गुरुः ॥

(पिङ्गलामते)

स्वप्नमानवमाश्रित्य स्वापयेत् पूर्वमस्तकम् ।

---

* अङ्गुष्ठमध्यमाभ्यां परिमितदीर्घम् ।

(वायवीयसंहितायाम्)
देवस्य दक्षिणे भागे शिष्यं तमधिवासयेत् ।
अहतास्तरणास्तीर्णसदर्भशयने शुचिः ॥

(मेरुतन्त्रे)
आचान्तमत्र च यथाविधि तं शिखायां
बन्धैः सुरक्षितममुं प्रविधाय मन्त्री ।
वेद्यां शयीत कुशसंस्तरणे रजन्यां
शिष्येण सार्धममुना गदितोऽधिवासः ॥

(महाकपिलपञ्चरात्रे)
गुरुपादार्चनं कृत्वा उपवासी जितेन्द्रियः ।
दर्भशय्यां गतो रात्रौ दृष्ट्वा स्वप्नं निवेदयेत् ॥

(योगिनीतन्त्रे) (मेरुतन्त्रे) च
यज्जाग्रतो दूरमुदैति दैव-
मावृत्य मन्त्रान् प्रयतस्त्रिरेतान् ।
लघ्वेकभुग्दक्षिणपार्श्वशायी
स्वप्नं परीक्षेत यथोपदेशम् ॥
भगवन् देवदेवेश शूलभृद्वृषवाहन ।
इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वतः ॥
एवं सुप्तः कुशास्तीर्णे ततः प्रयतमानसः ।
निशान्ते पश्यति स्वप्नं शुभं वा यदि वाऽशुभम् ॥

(पिङ्गलामते) (मेरुतन्त्रे) च ।

तारो हिलिद्वयं शूलपाणये द्विठ ईरितः ।
स्वप्नमानवमन्त्रोऽयं शम्भुना परिकीर्त्तितः ॥
नमो जय त्रिनेत्राय पिङ्गलाय महात्मने ।
वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥

स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ।
क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥

(मन्त्रतन्त्रप्रकाशे)

ॐ हृत्सकललोकाय विष्णवे प्रभविष्णवे ।
विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः ॥
स्वप्नमानवमन्त्रोऽयं कथितो नारदादिभिः ।

(नारदीये)

परब्रह्मस्वरूपस्त्वमन्तश्चरसी विश्वधृक् ।
शुभाशुभगतिं देव स्वप्ने मे विनिवेदय ॥
इत्युच्चार्य नमस्कुर्याज्जानुभ्यामवनीं गतः ।
प्रसन्नो वाग्यतस्तस्मिन् शयीतेष्टं विचिन्तयेत् ॥

अथ शुभस्वप्नाः । (योगिनीतन्त्रे)

त्रिविधं दर्शनं तस्य यथार्थमयथार्थकम् ।
अपाकजं यत् स्वस्थानां संयतानां हि दर्शनम् ॥
यथार्थमयथार्थं तदस्वस्थानां विकारजम् ।
अपाकजं मानसं च यथार्थफलमुच्यते ॥

(आगमसिद्धान्ते)

आद्ये वर्षाद्वत्सरार्धाद्द्वितीये
    यामे पाको वर्षपादात् तृतीये ।
यामे पाकः शर्वरीतुर्यपादे
    सद्यः पाको यो विसर्गेषु दृष्टः ॥

तथा ।

स्वप्ने पश्यति वै देवं निजेष्टं सर्वतो मुखम् ।
गुरुं प्रसादसुमुखं निर्मलं चन्द्रमण्डलम् ॥
गङ्गां भागीरथीं भानुं लिङ्गिनं लिङ्गमैश्वरम् ।

प्रसन्नां तत्र जानीयात् सिद्धिं स्वप्ननिदर्शने ॥

(नारदपञ्चरात्रे)

क्षितिलाभः क्षतं चाब्धितरणं चाग्निपूजनम् ।
होमश्च ज्वलिते वह्नौ संग्रामविजयस्तथा ॥
हंसकोकमयूराणां रथारोहणमेव च ।

(महाकपिलपञ्चरात्रे)

कन्यां छत्रं रथं दीपं प्रासादं कमलं नदीम् ।
कुञ्जरं वृषभं मालां समुद्रफेनिलं द्रुमम् ॥
पर्वतं च हयं मध्यमाममांससुरासवम् ।
एवंमादीनि सर्वाणि दृष्ट्वा सिद्धिमवाप्नुयात् ॥
यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने ॥
नदीसमुद्रतरणमाकाशगमनं तथा ।
भास्करोदयनं चैव प्रज्वलन्तं हुताशनम् ॥
ग्रहनक्षत्रताराणां चन्द्रमण्डलदर्शनम् ।
हर्म्यप्ररोहणं चैव प्रासादशिरसोऽपि वा ॥
नागाश्ववृषभेन्द्राणां तरुशैलाग्ररोहणम् ।
विमानगमनं चैव सिद्धमन्त्रस्य दर्शनम् ॥
एवमादीनि संदृष्ट्वा* नरः सिद्धिमवाप्नुयात् ।
स्वप्ने तु मदिरापानमाममांसस्य भोजनम् ॥
कृमिविष्ठानुलेपं च रुधिरेणाभिषेचनम् ।
भोजनं दधिभक्तस्य श्वेतवस्त्रानुलेपनम् ॥

---

* तान्त्रिकप्रयोगोऽयम् ।

सिंहासनं रथं यानं ध्वजं राज्याभिषेचनम् ।
रत्नान्याभरणादीनि दृष्ट्वा स्वप्ने प्रसीदति ॥

(नारदपञ्चरात्रे)

गुरुर्देवो द्विजः कन्या गोगजाश्वाश्च केशरी ।
दर्पणं शङ्खभेर्यौ च तन्त्रीवाद्यं च रोचनम् ॥
ताम्बूलभक्षणं चैव तथा बध्याभिवन्दनम् ।
सिद्धान्नमाममांसं च मद्यस्त्रीमदिरावसाः ॥
छत्रं यानं सितं वस्त्रं तथाऽन्यं श्वेतचन्दनम् ।
मालामुक्ताफले हारः पूर्णः समुदितः शशी ॥
प्रचण्डकिरणः सूर्यो निम्नगाऽथ महोदधिः ।
प्रफुल्लपादपः शाली रोचना कुङ्कुमं मधु ॥
लाजाः सिद्धार्थका बीजं नवभाण्डं च पायसम् ।
उपासन्नोऽप्यथाचार्यो गायत्री च वशं गता ॥
सर्वे स्वप्ने शुभाः प्रोक्ताः सिद्धिमोक्षफलप्रदाः ।

(नारदीये)

ग्रहणं तु परस्त्रीणामगम्यागमनं तथा ।
दंशनं श्वेतनागेन बन्धनं शृङ्खलादिभिः ॥
रोदनं ताडनं चैव धावनं वाङ्गघातनम् ।
मृल्लोहत्रपुकांस्यस्य शीसकस्यापि कुत्सितात् ॥
धातोर्लाभस्तथा पुष्पं फलरत्नावुभावपि ।
व्यजनं स्वयमन्येन धमनं च विभावसोः ॥
एवमादीनि चान्यानि शुभान्याहुर्मनीषिणः ।

(मेरुतन्त्रे)

पूर्णकुम्भो दर्पणं च मीनमाज्यं च रोचना ।

शवं रोदनहीनं च शस्त्राणि च पताकिका ॥
भारद्वाजो नृपालश्च वेदशब्दश्च गायनम् ।
कशामाङ्गल्यगीतानि चाङ्कुशं यद्धृदः प्रियम् ॥
स्वप्ने दृष्टानि चैतानि साधकः सिद्धिमाप्नुयात् ।
व्याध्यार्त्ते नास्ति दुःखं स्यात् सामान्यं सुखमाप्नुयात् ।
यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
कामयन्तीं नदीसिन्धुत्तरणं भ्रमणं च खे ॥
भास्करोदयनं चैव ग्रहणं चन्द्रसूर्ययोः ।
हर्म्यप्रासादनागाश्ववृषशैलाग्निरोहणम् ॥
भोजनं दधिभक्तस्यापक्वमांसस्य भोजनम् ।
कृमिविष्ठानुलेपश्च रुधिरेणाभिषेचनम् ॥
ताम्बूलभक्षणं मद्यपानं बध्याभिवन्दनम् ।
प्रचण्डकिरणः स्वस्थः कार्यसिद्धेस्तु लक्षणम् ॥
श्वेताम्बरधरा नारी श्वेतमाल्यानुलेपना ।
अवगूहति यं स्वप्ने तस्य श्रीः सर्वतो मुखी ॥
आसने शयने पाने शरीरे वाहने गृहे ।
ज्वलमाने विबुध्येत तस्य श्रीः सवतो मुखी ॥
सितोरगस्य दंशश्च जायते दक्षिणे करे ।
दशाहोभिर्भवेल्लाभो रोगी रोगाद्विमुच्यते ॥
निगडैर्बाहुपाशेन बध्यते वा सुतो भवेत् ।
प्रतिष्ठा वर्धते तस्य दुग्धपानाद्धनक्षयः ॥
सुरारक्तं पिबन् विद्यां लभेद्विप्रो धनं परम् ।
दधि दृष्ट्वा भवेत् प्रीतिर्गोधूमैश्च धनागमः ॥

सिद्धाविष्टागमं विद्यालाभः सिद्धार्थकैस्तथा ।
दधिलाभाद्भवेदर्थो घृतलाभाद्भवेज्जयः ॥
घृताशनाद्धनक्लेशो जयस्तु दधिभक्षणे ।
लिङ्गाद्यभ्यर्चनं दृष्ट्वा व्यवहारे जयो भवेत् ॥
यस्तु मध्ये तडागादेर्भुञ्जीत घृतपायसम् ।
निष्कम्पपुष्करे पत्रे तं विद्यात् पृथिवीपतिम् ॥
देवतालिङ्गिनो गावः पितरो ब्राह्मणा नृपाः ।
यद्वदन्ति नरं स्वप्ने तत् तथैव भविष्यति ॥
अन्त्रैः संवेष्टयेद्यस्तु ग्रामं नगरमेव वा ।
ग्रामे मण्डलराज्यं स्यान्नगरे पार्थिवो भवेत् ॥
चन्द्रतारार्कग्रसनं परिमार्गणमेव च ।
भूम्यम्बुधीनां ग्रसनं शत्रूणां च बधक्रिया ॥
जयो विवादद्यूतेषु शत्रूणां च तथा जयः ।
बडवामहिषीसिंहीगोहस्तिन्यादिदोहनम् ॥
प्रसादो गुरुविप्रेष्टदेवसिद्धादिकाच्छुभः ।
स्नानं राज्याभिषेकश्च स्वशिरश्छेदनं मृतिः ॥
तीर्थोदकानां तरणं तथा विषमलङ्घनम् ।
गोहस्तिबडवासूतिवह्निलाभस्तथैव च ॥
परस्त्र्यालिङ्गनं तस्या लाभो रोदनमेव च ।
विष्ठालेपः कुन्दजातीवकुलक्ष्मेशदर्शनम् ॥
रणद्यूतिविमर्देषु जयो निगडबन्धनम् ।
पशुमर्त्त्यमृगाणां च लब्धिरध्यसनं तथा ॥
शिखिलाभः श्वेतवस्त्रपुष्पचन्दनधारणम् ।

मणितारसुवर्णादिपात्रे भोजनकं यदा ॥
पश्येत् तदा साधकस्य ज्ञेया सिद्धिरुपस्थिता ।
कार्यार्त्तानां कार्यसिद्धिरितरेषां धनागमः ॥

अथाशुभस्वप्नाः ।

कृष्णाम्बरधरा नारी कृष्णगन्धानुलेपना ।
अवगूहति यं स्वप्ने सा रात्रिस्तस्य पश्चिमा ॥
एवं तु रक्तया व्याधिः शोकोऽरुणसमानया ।
नीलया कलहो हत्या पीतया कीरया विपत् ॥

तथा ।

बन्ध्याचर्मतुषास्थ्यादिलवणाङ्गारमिन्धनम् ।
विट्क्लीबोन्मत्ततैलानि जटिलारिवनौषधम् ॥
रोगी तृणं च संन्यासी नग्नोऽभ्यक्तः क्षुधाऽऽतुरः ।
विमुक्तकेशः पतितो व्यङ्गासृक् शस्त्राहतम् ॥
मार्जारयुद्धं कार्पासो गर्भिणी च रजस्वला ।
गुडस्तक्रं च काषायी पङ्कं रण्डा कलिर्गृहे ॥
वस्त्रादिकस्य स्खलनं लुलापसमरं तथा ।
अन्धः कुब्जो दुर्वचनो बधिरः खञ्जकुब्जकौ ॥
वमनं च घटो रिक्तो रजकी मलिनाम्बरा ।
एतैर्दृष्टैर्न कार्यं स्याद्रोगी मृत्युमवाप्नुयात् ॥
अशोकं करवीरं च पलाशं वाऽपि पुष्पितम् ।
स्वप्नेऽपि सलिलं दृष्ट्वा नरः शोकमवाप्नुयात् ॥
रूपान्तरप्रवेशश्च दक्षिणाशागतिस्तथा ।
पङ्के निमज्जनं स्नानं पुत्रभार्याविनाशदम् ॥
गाहास्तीद्विजेदेवीदेवर्ज्यं कृष्णां न शोभनम् ।

कर्पासभस्मास्थ्यादीनि त्यक्त्वा भुक्तं शुभावहम् ॥
रक्तगन्धाम्बरस्रग्वी कृष्णो वा दक्षिणामुखः ।
खरोष्ट्रमहिषारूढस्त्रिमासं न स जीवति ॥
श्वभ्रे वा पतनं गेहे द्वारं चास्य पिधीयते ।
न चोत्तिष्ठति यस्तस्मात् तदब्दं तस्य जीवितम् ॥
वान्तिर्मूत्रं पुरीषं च सन्तानजननं च्युतिः ।
शुक्रस्य पश्येद्यः स्वप्ने तस्यायुर्दशमासिकम् ॥
ताड्यते विकृतैः कृष्णैः पुरुषैरुद्यतायुधैः ।
पाषाणैस्ताड्यते वाऽपि तस्य मृत्युर्न संशयः ॥
महिषोष्ट्रखरारूढस्तैलाभ्यक्तश्च मुण्डितः ।
दक्षिणाशां प्रस्थितो यस्तस्य मृत्युर्न संशयः ॥
पश्येत् प्रासादपतनं गृहस्य शशिसूर्ययोः ।
पर्वतानां च वृक्षाणामधिकारच्युतिर्भवेत् ॥
हानिश्चैव स्वगोत्राणां व्याधिनाऽभिभवस्तथा ।
गृहसंमार्जनं लेपो गोमयेन मृदाऽपि वा ॥
तीर्त्वा नदीं समायातस्तीरेऽन्यद्वसनं धृतम् ।
रोगी रोगाद्विमुच्येत हानिः स्वस्थस्य जायते ॥
पुंनामानो मृगखगाः पोतकी शुकरी रला ।
पिङ्गला छुच्छुका पल्ली वामाङ्गे कोकिला शिवा ॥
स्त्रीनामानो मृगखगाः श्रीकण्ठो वानरो रुरुः ।
छिक्करः पिप्पलो भासो दक्षे काकर्क्षकुक्कुटाः ॥
दृष्टाश्चेद्रोगिणो रोगनाशः साधकसिद्धये ।
स्वस्थस्य चोद्यमाल्लाभो दिग्व्यत्यासान्न शोभनम् ॥

अथ स्वप्ननिवेदनम् (निबन्धे)

शिष्यस्य शुचिराचान्तः पुष्पहस्तो गुरूत्तमः ।
प्रणम्य शिरसा हृष्टस्तस्मै स्वप्नं निवेदयेत् ॥
स्वप्ने चाक्षिसमक्षं वा आश्चर्यमपि हर्षदम् ।
अकस्माद्यदि वा पश्येन्नाख्यातव्यं गुरोर्विना ॥

अथ दुःस्वप्नशान्तिः (महाकपिलपञ्चरात्रे)

दृष्ट्वा दुःस्वप्नकं चैव होमात् सिद्धिमवाप्नुयात् ।

(पिङ्गलामते)

शुभे शुभं भवेत् तस्य जुहुयादशुभे शतम् ।
अस्त्रेणेति क्रमाद्विद्वान् .... इति ॥

(मेरुतन्त्रे)

सक्षीराणां घृताक्तानां समिधां च शतं हुनेत् ।
पलाशानां तु गायत्र्या शूद्रः स्नात्वा हविष्यभुक् ॥
दीपं दद्याद्विप्रगृहे विष्णोर्गेहे शिवालये ।
एवं दृष्ट्वाऽशुभं स्वप्नं गृह्णीयान्मनुमन्यथा ॥
गृहीते हानिरेव स्याद्वाऽन्यदेवं विचिन्तयेत् ।

(नारदपञ्चरात्रे)

दृष्ट्वा समाचरेद्धोमं दन्तकाष्ठोदितं *मुने ।
केवलेनाथ वाऽऽज्येन सिंहमन्त्रेण शान्तये ॥

अस्त्रमन्त्रगायत्रीसिंहमन्त्राणां विकल्पः । तारावज्रनखं दंष्ट्रायुधाय महासिंहाय हुँफट् नमः । सिंहस्य मनुरिति (मेरौ प्रोक्तः)

अथ दीक्षादिनकृत्यम् (मेरुतन्त्रे)

समुत्थायोषसि पुनः सन्ध्यास्नानादिकं चरेत् ।
गुरुः शिष्यो ऋत्विजश्च गच्छेद्यागगृहं प्रति ॥
सर्वे ते स्वस्वकुण्डेषु जुहुयुः सघृतैस्तिलैः ।
पुनः साध्येन मनुना ह्यष्टोत्तरसहस्रकम् ॥

---

* तथा दन्तधावनम् । [जातीतगरमन्दारैर्दुःस्वप्नं च विनश्यति ।] इति ३ पुस्तके उपलभ्यते ।

द्रव्यैर्विधानप्रोक्तैर्वा हुनेदष्टाधिकं शतम् ।

(श्रीभविष्ये)

आहुतिस्तु घृतादीनां स्रुवेणाधोमुखेन च ।
हुनेत् तिलाद्याहुतीश्च दैवेनोत्तानपाणिना ॥

(वायवीयसंहितायाम्)

स्रुवेणाज्यं समित्याद्यं स्रुचा शेषं करेण वा ।
तत्र दिव्येन होतव्यं तीर्थेनार्षेण वा तथा ॥

(महाकपिलपञ्चरात्रे)

अप्रदीप्तेन होतव्यं मध्यमेनाप्यनिन्धिते ।
प्रदीप्ते लेलिहानाग्नौ होतव्यं कर्मसिद्धये ॥

(बह्वृचपरिशिष्टेऽपि)

अधोमुखः सधूमे तु जुहुयाद्यो हुताशने ।
यजमानो भवेदन्धः सपुत्र इति च श्रुतिः ॥

(छन्दोगपरिशिष्टेऽपि)

योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः ।
मन्दाग्निरामयावी च दरिद्रश्चोपजायते ॥

(त्रिपुरासारे)

अग्नेः कर्णे होमतो व्याधिवाधा
  नेत्रेऽन्धत्वं नासिकायाम्व्याधिः ।
द्रव्यच्छेदो मस्तके स्यान्मुखान्त-
  होमं कुर्यात् तेन नित्यं विपश्चित् ॥

तन्त्रान्तरे ।

यतः काष्ठं ततः श्रोत्रं यत्र धूमोऽत्र नासिका ।
यत्राल्पज्वलनं नेत्रं यत्राङ्गारस्ततः शिरः ॥
यत्र प्रज्वलिता ज्वाला जिह्वा सा जातवेदसः ।

अन्यत्रापि ।

सधूमोऽग्निः शिरो ज्ञेयं निर्धूमश्चक्षुरेव च ।
ज्वलत्कृशो भवेत् कर्णः काष्ठलग्नस्तु नासिका ॥
अग्निर्ज्वालायते यत्र शुद्धस्फटिकसन्निभः ।
तन्मुखं तत्र विज्ञेयं चतुरङ्गुलमानतः ॥

(नवदुर्गाकल्पे)

यत्र काष्ठं तत्र श्रोत्रे यत्र धूमस्तु नासिके ।
यत्राल्पज्वलनं नेत्रं यत्र भस्म तु तच्छिरः ॥
यत्रैव ज्वलितो वह्निस्तत्र जिह्वा प्रकीर्त्तिता ।

(शारदायाम्)

वैश्वानरं स्थितं ध्यायेत् समिद्धोमेषु देशिकः ।
शयानमाज्यहोमेषु निषण्णं शेषवस्तुषु ॥

तथा ।

स्वर्णसिन्दूरबालार्ककुङ्कुमक्षौद्रसन्निभः ।
सुवर्णरेतसो वर्णः शोभनः परिकीर्त्तितः ॥
भेरीवारिदहस्तीन्द्रध्वनिर्वह्नेः शुभावहः ।
नागचम्पकपुन्नागपाटलायूथिकानिभः ॥
पद्मेन्दीवरकह्लारसर्पिर्गुग्गुलुसन्निभः ।
पावकस्य शुभो गन्ध इत्युक्तस्तन्त्रवेदिभिः ॥
प्रदक्षिणास्त्यक्तकम्पाश्छत्राभाः शिखिनः शिखाः ।
शुभदा यजमानस्य राज्यस्यापि विशेषतः ॥
कुन्देन्दुधवलो धूमो वह्नेः प्रोक्तः शुभावहः ।
कृष्णः कृष्णगते वर्णो यजमानं विनाशयेत् ॥
श्वेतो राज्यं निहन्त्याशु वायसस्वरसन्निभः ।
खरस्वरसमो वह्नेर्ध्वनिः सर्वविनाशकृत् ॥

पूतिगन्धो हुतभुजो दोतुर्दुःखप्रदो भवेत् ।
छिन्नवृत्तां शिखां कुर्यान्मृत्युं धनपरिक्षयम् ॥
शुकपक्षनिभो धूमः पारावतसमप्रभः ।
हानिं तुरगजातीनां गवां च कुरुते सदा ।
एवं विधेषु दोषेषु प्रायश्चित्ताय देशिकः ॥
मूलेनाज्येन जुहुयात् पञ्चविंशतिमाहुतिम् ।

(त्रिपुरासारसमुच्चये)

वस्वधिकं शतमाज्यैर्जुहुयाच्छान्तिकममीषु दोषेषु ।
अस्त्रेण साधकेन्द्रस्तनुयादथ चक्रपूजां च—इत्युक्तम् ।

(शारदायाम्)

ततः सुधौतं दन्ताद्यं स्नातं शिष्यं समाहितम् ।
पाययित्वा पञ्चगव्यं कुण्डस्यान्तिकमानयेत् ॥

(प्रयोगसारेऽपि)

पञ्चगव्यं यथाप्रोक्तं पीत्वाऽऽचान्तं यथाविधि ।
द्वारेण दक्षिणेनाथ यागस्थानं प्रवेशयेत् ॥

(शारदायाम्)

विलोक्य दिव्यदृष्ट्या तं तच्चैतन्यं हृदम्बुजात् ।
गुरुरात्मनि संयोज्य कुर्यादध्वविशोधनम् ॥

तन्त्रान्तरे ।

हृदि स्थितं तच्चैतन्यं प्रस्फुरत्तारकाकृतिम् ।
आदाय स्थापयेत् स्वीये हृदयेऽङ्कुशमुद्रया ॥

(षडन्वयमहारत्ने)

शोधनं नाम तत्त्वानां कारणैकत्वचिन्तनम् ।
वर्णादीनां कलानां च तस्यां चिदैक्यचिन्तनम् ॥

(शारदायाम्)

उक्तं कलाध्वा तत्त्वाध्वा भुवनाध्वेति च त्रयम् ।
वर्णाध्वा च पदाध्वा च मन्त्राध्वेति परं त्रयम् ॥

(वायवीयसंहितायाम्)

तत्र शाब्दास्त्रयोऽध्वानस्त्रयस्त्वार्थाः समीरिताः ।

तन्त्रान्तरे ।

मन्त्राध्वा च पदाध्वा च वर्णाध्वेति च शब्दतः ।
भुवनाध्वा च तत्त्वाध्वा कलाध्वा चार्थतस्तथा ॥

अत्र तु संहारक्रमेणोक्तिः । (शारदायाम्) सृष्टिक्रमणेति ज्ञेयम् ।

(मेरुतन्त्रे)

शिष्यस्य पादयोश्चिन्त्या गुरुणा तु कला इमाः ।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ॥
शान्त्यतीतेति पश्चाथ शोधनक्रम उच्यते ।
कूर्चेन च गुरुः शिष्यं स्पृशन् कुण्डे स्वके हुनेत् ॥
तिलैर्घृताक्तैस्ताराद्यममुकाध्वानमत्र च ।
शोधयामि द्विठान्तेन मन्त्रेणाष्टाहुतीर्हुनेत् ॥
तत्त्वाध्वनि विलीनं तु कलाध्वानं विचिन्तयेत् ।
ततो लिङ्गप्रदेशे तु तत्त्वान्येतानि चिन्तयेत् ॥
गाणेशानि च शैवानि तत्रैतानि रसाग्नयः ।
तद्यथा शिवशक्ती च सदाशिवमहेश्वरौ ।
विद्येति पञ्चशुद्धानि शुद्धाशुद्धानि सप्त च ॥
माया विद्या कला रागः कालो नियतिरेव च ।
पुरुषश्चाथ शुद्धानि प्रकृतिर्बुद्ध्यहङ्कृती ॥
मनश्चेन्द्रियदशकं तन्मात्राभूतपञ्चकम् ।

शुद्धानीति । आणवकार्मणमायीयाख्यमलत्रयरहितानीत्यर्थः । तत्राणवो नाम सदाशिवत्वेन स्वस्थानावमर्षः । कार्मणो नाम पुण्यपापवानहमिति प्रतीतिः ।

मायीयो नामाहङ्कारादावात्मत्वबुद्धिः । शुद्धशुद्धानीति । कारणत्वेन मलत्रयराहित्याच्छुद्धानि । कार्यरूपत्वेन तद्युक्तत्वादशुद्धानीत्यर्थः ।

अथ वैष्णवतत्त्वानि द्वात्रिंशत्प्रमितानि तु ।
जीवः प्राणो मनो बुद्धिस्तन्मात्रा भूतपञ्चकम् ॥
दशेन्द्रियाणि हृत्पद्मं सूर्यसोमाग्नयस्तथा ।
वासुदेवः संकर्षणश्च प्रद्युम्नश्चानिरुद्धकः ॥
सौराणि भूततन्मात्रामनोगर्वेन्द्रियाणि च ।
प्रकृतिर्बुद्धिरिति च चतुर्विंशतिसंमितम् ॥

(शारदायाम्)

निवृत्त्याद्याः कलाः पञ्च ततो विन्दुः कला पुनः ।
नादः शक्तिः सदापूर्वशिवश्च प्रकृतेर्विंदुः ॥
आत्मविद्या शिवः पश्चाच्छिवो विद्या स्वयं पुनः ।
सर्वतत्त्वं च तत्त्वानि प्रोक्तानि त्रिपदात्मनः ॥
तत्त्वाध्वा कथितो ह्येष तत्तदागमवेदिभिः ।

(मेरुतन्त्रे)

दशैव शक्तितत्त्वानि आत्मविद्या शिवा इति ।
शिवाविद्या तथाऽऽत्मेति चात्मविद्या शिवा पुनः ॥
सर्वतत्त्वं चेति पुनः प्राग्वदूहेन होमयेत् ।
तत्त्वाध्वानं विलीनं तु चिन्तयेद्भुवनाध्वनि ॥
शिष्यस्य नाभौ चिन्त्यानि भुवनानि चतुर्दश ।
तानि क्रमेण पातालरसातलमहातलम् ॥
तलातलं च सुतलं वितलं चातलं च भूः ।
भुवश्च स्वर्महश्चापि जनस्तप इति क्रमात् ॥
सत्यं च भुवनाध्वानं होमाद्यूहस्तु पूर्ववत् ।
विलीनं भुवनाध्वानं वर्णाध्वनि विचिन्तयेत् ॥

अकारादिक्षकारान्तान् वर्णान् संचिन्तयेद्धृदि ।
वर्णाध्वानं विलीनं तु पदाध्वनि विचिन्तयेत् ॥
होमोहौ प्राग्वदेवात्र ललाटे चिन्तयेत् ततः ।
पदाध्वानं मूलमन्त्रपदवर्णस्वरूपकः ॥
पदाध्वाऽत्रोहहोमादि प्राग्वदेव समाचरेत् ।
मन्त्राध्वनि विलीनं तु पदाध्वानं विचिन्तयेत् ॥
संपूर्णमन्त्रो मन्त्राध्वा चिन्तयेच्छिष्यमूर्धनि ।
होमोहः प्राग्वदेवात्र विलीनोऽ*हं परे शिवे ॥
ब्रह्मरन्ध्रस्थिते ध्यायेदतः स्यादध्वशोधनम् ।
सृजेत् सृष्ट्या विलीनान्ताच्छिवान्ताच्च गुरूत्तमः ॥
देशिकेन्द्रश्च तं शिष्यं दृष्ट्वा दृष्ट्या च दिव्यया ।
तच्चैतन्यस्थितं तस्मिँस्तस्मिन्नेव च योजयेत् ॥

(शारदायामपि)

.... क्रमात् तान् विलयं नयेत् ।
शिवे शिवान्तान् संलीनान् जनयेत् सृष्टिमार्गतः ॥
विलोकयन् दिव्यदृष्ट्या तं शिशुं देशिकोत्तमः ।
आत्मस्थितं तच्चैतन्यं पुनः शिष्ये नियोजयेत् ॥

(क्रियासंग्रहे)

शूद्रसङ्करजातीनां नाध्वशुद्धिर्विधीयते ।
पादोदकप्रदानाद्यैः कुर्यात् पापविमोचनम् ॥
मूलेन दशधा हुत्वा चैकैकामाहुतिं ततः ।
हुत्वाऽऽवरणदेवेभ्यस्ततः पूर्णाहुतिं चरेत् ॥

(शारदायाम्)

स्रुचा पूर्णाहुतिं दत्वा मूलमन्त्रेण देशिकः ।

---

* विलीनोऽयमिति २ पु: पा.

(वायवीयसंहितायाम्)

ततो होमावशिष्टेन घृतेनापूर्य वै स्रुचम् ।
निधाय पुष्पं तस्याग्रे स्रुवेणाधोमुखेन ताम् ॥
सदर्भेण समाच्छाद्य मूलेनाञ्जलिनोत्थितः ।
वौषडन्तेन जुहुयाद्धारां जवसमन्विताम् ॥

(मेरुतन्त्रे)

सर्पिषा स्रुचमापूर्य पुष्पं चोपर्यधोमुखम् ।
स्रुगुपरि स्रुवं दत्वा पुष्पं तत्र प्रपातयेत् ॥
सव्योत्तरकराभ्यां च संपुटाभ्यां च शङ्खवत् ।
संगृह्योत्थाय संलग्नौ नाभौ तिर्यङ्निधाय च ॥
पूर्णा दर्वीति मन्त्रेण मूलेन च सुसंयतः ।
दद्यात् पूर्णाहुतीस्तिस्रः सर्वकामप्रपूरणीः ॥
श्रोत्रियस्यैतदुद्दिष्टमन्यः पूर्णाहुतिं चरेत् ।
मूलेन वौषडन्तेन स्वाहान्तेन तु वामतः ॥

(अग्निपुराणे)

मूर्धानं दिवमन्त्रेण संश्रवेण च धारया ।
दद्यादुत्थाय पूर्णां तु नोपविश्य कदा चन ॥

(हयशीर्षपञ्चरात्रे)

हुत्वा च हविषा दद्यात् स्रुचा पूर्णाहुतित्रयम् ।
वौषडन्तेन मन्त्रेण .... इति ॥

(नारदपञ्चरात्रे)

अभावे तु घृतस्यैव होमद्रव्येण पूरयेत् ।
तस्योपरि घृतं दद्यात् तदूर्ध्वं कुङ्कुमादिकम् ॥

(तूर्णायागे)

मूलं नमोन्तमुच्चार्य वामपादपुरःसरम् ।

दद्यात् पूर्णाहुतीर्मन्त्री परामृतधिया ततः ॥

(मेरुतन्त्रे)

दत्तपादं पुरस्कृत्य दक्षः पूर्णाहुतिं चरेत् ।
शक्तिहोमे वामपादं वाममार्गी च सर्वतः ॥

(गौतमीयतन्त्रे)

स्रुक्स्रुवौ तु समादाय घृतेनापूर्य तत् पुनः ।
होमद्रव्याणि निःक्षिप्य नाभौ संस्थाप्य तौ पुनः ॥
ब्रह्मार्पणेन मनुना दद्यात् पूर्णाहुतिं पुनः ।
इतः पूर्वं प्राणबुद्धिं देहे धर्माधिकारतः ॥

जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत् कृतं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा ।

ब्रह्मार्पणमनुः सोऽयं ब्रह्मार्पणविधौ स्मृतः ।
एवं होमविधिं कृत्वा कुण्डस्थण्डिलदेवताः ॥
दिक्पालदेवताश्चापि अङ्कुरार्पणदेवताः ।
आनयेत् कलशे चापि कृष्णैक्यं भावयेद्गुरुः ॥

कृष्णेति प्रकृताभिप्रायेण ।

(मेरुतन्त्रे)

पुनः संपूज्य गन्धाद्यैर्मूलमन्त्रेण मन्त्रवित् ।
कुण्डादुद्वास्य चाचार्यो देवतां कलशे न्यसेत् ॥

(शारदायाम्) ।

उद्वास्य देवतां कुम्भे साङ्गां सावरणां गुरुः ।
पुनर्व्याहृतिभिर्हुत्वा जिह्वादीनां विभावसोः ॥
एकैकामाहुतिं दत्वा परिषिञ्च्याद्भिरात्मनि ।
पावकं योजयित्वा स्वे परिधीन् सपरिस्तरान् ॥
नैमित्तिके दहेन्मन्त्री नित्ये तु न दहेदिमान् ।

व्याहृतिभिर्महाव्याहृतिभिः ।

पुनः समापयेद्धोमं महाव्याहृतिपूर्वकम्—इति वचनात् ।

तत्प्रकारस्तु (गौतमीये)

पूर्णाहुतिं ततो दद्याद्द्विश्चैवं विधानवित् ।
ॐभूरग्नये पृथिव्यै च महते स्वाहया तथा ॥
भुवो वायवे चान्तरिक्षाय महते स्वाहया तथा ।
स्वश्चन्द्रमसे दिग्भ्यश्च नक्षत्रेभ्यश्च स्वाहा ॥

ॐभूर्भुवःस्वश्चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यश्च महते स्वाहा । पावकं योजयित्वेति ।

तत्प्रकारस्तु (गणेश्वरविमर्षिण्याम्)

भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक ।
कर्मान्तरेऽपि संप्राप्ते सन्निधिं कुरु सादरम् ॥
इति मन्त्रेण संप्रार्थ्य वह्निमुद्वासयेदपि—इति ।

(मेरुतन्त्रे)

ततो ब्रह्माणमुद्वास्य ब्राह्मणाय प्रदापयेत् ।
द्वात्रिंशत्पलमानेन निर्मितं ताम्रपात्रकम् ॥
तण्डुलैस्तत् समापूर्य सहिरण्यं सदक्षिणम् ।
दद्याद्विप्राय तत्तुष्ट्यै पूर्णपात्रमितीरितम् ॥
ततः परिस्तरानग्नौ परिधीन् निःक्षिपेदिति ।

तन्त्रान्तरे ।

अष्टौ मुष्टिर्भवेत् कुञ्चित् कुञ्चिदष्टौ तु पुष्कलः ।
पुष्कलानि च चत्वारि पूर्णपात्रं तदुच्यते ॥

(शारदायाम्)

नेत्रे शिष्यस्य बध्नीयान्नेत्रमन्त्रेण वाससा ।

(महाकापिलपञ्चरात्रे)

नवेन शुक्लवस्त्रेण नेत्रे बद्ध्वा .... इत्युक्तम् ।

(पिङ्गलामते)
नेत्रवस्त्रेण तन्नेत्रे नेत्रमन्त्रेण बन्धयेत् ।
(शारदायाम्)
करे गृहीत्वा तं शिष्यं कुण्डतो मण्डलं नयेत् ।
तस्याञ्जलिं पुनः पुष्पैः पूरयित्वा यथाविधि ॥
कलशे देवताप्रीत्यै क्षेपयेन्मूलमुच्चरन् ।
(नारायणीये)
न्यासं शिष्यतनौ कृत्वा तं प्रदक्षिणमानयेत् ।
पश्चिमं द्वारमानीय क्षेपयेत् कुसुमाञ्जलिम् ॥
(मेरुतन्त्रे)
नेत्रबन्धमपास्यैवं वेशयेत् कुशसंस्तरे ।
ततश्च पाठयेच्छिष्यं मन्त्रमेनं गुरूत्तमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
(पिङ्गलामते)
पुष्पैरञ्जलिमापूर्य योगपीठे प्रदापयेत् ।
पश्चिमोत्तररुद्रेन्द्रैः पुष्पपातः शुभः शुभे ॥
आत्मयागः क्रमाद्भूयः संहृत्योत्पाद्य देशिकः ।
तत्तन्मन्त्रोदितान् न्यासान् कुर्याद्देहे शिशोस्तदा ॥
आत्मयागो भूतशुद्धिः ।
(प्रयोगसारे)
गुणांशेन पृथिव्यादिभूतानि विलयं नयेत् ।
यथावत् पिण्डसंस्थानि संहारक्रमयोगतः ॥
ततः सृष्टिक्रमेणैव पिण्डं संभावयेत् तदा ।
(मन्त्रतन्त्रप्रकाशे)
उपविश्यासने शुद्धे संहरेत् तस्य विग्रहम् ।

गन्धादिघ्राणसंयुक्तां पृथिवीमप्सु संहरेत्—इत्यादि ॥

(शारदायाम्)

पञ्चोपचारैः कुम्भस्थां पूजयित्वेष्टदेवताम् ।
तस्यां तन्त्रोक्तमार्गेण विदध्यात् सकलीकृतिम् ॥

एतदन्तरं देवसकाशाद्वरप्रार्थनमुक्तमाचार्यैः ।

कारुण्यनिलये देवि सर्वसन्निधिसंश्रये ।
शरण्ये वत्सले मातः कृपामस्मिन् शिशौ कुरु ॥
आणवप्रमुखैः पाशैः पाहि तस्य सुरेश्वरि ।
दीनस्यास्य दयाधारे कुरु कारुण्यमीश्वरि ॥
ऐहिकामुष्मिकैर्भागैरपि संबध्यतामसौ ।
स्वभक्तिः सकला चास्मै दीयतां निष्कलाश्रये—इति ॥

(क्रियासंग्रहमेरुतन्त्रयोः)

ततोऽर्घ्यपात्रमादाय मूलमुच्चार्य मन्त्रवित् ।
साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ॥
तत् सर्वं देवदेवेश गृहाणाराधनं परम् ।
इत्यर्घोदकमुत्सृज्य किंचिद्देवस्य दक्षिणे ॥
करे समर्पयेद्विद्वान् कृतमाराधनं ततः ।
भक्त्या प्रणम्य देवेशं श्लोकैरेभिः क्षमापयेत् ॥
यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम् ।
निवेदितं च नैवेद्यं तद्गृहाणानुकम्पया ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चापि न जानामि त्वं गतिः परमेश्वर ॥
कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ।
अन्तश्चारेण भूतानां द्रष्टा त्वं परमेश्वर ॥

(मेरुतन्त्रे)

उद्वासयेत् ततो देवं परिवारगणैः सह ।

तथा ।

देवस्याङ्गे विलीनं तद्रश्मिवृन्दमशेषतः ।
तेजोरूपं शिवं ध्यात्वा क्षमस्वेति पुनः पुनः ॥
क्षमाप्यारोपयेत् स्वीयहृदम्भोजे तु देवताम् ।

(क्रियासंग्रहे)

देवतारूपमात्मानं पूजयित्वा विधानतः ।
अर्घ्यादिकं विसृज्याथ यजेन्निर्माल्यवासिनम् ॥
ऐशान्यां मण्डलं कुर्याद् द्वारपद्मविवर्जितम् ।
निर्माल्यभोक्तुः पूजार्थं पञ्चायतनपूजने ॥
कर्त्तव्यानि तु पञ्चैव ईशादामध्यमर्चयेत् ।
लम्बोदरो गणेशस्य तेजश्चण्डो विवस्वतः ॥
विष्वक्सेनो हरेः प्रोक्तश्चण्डेश्वरो महेशितुः ।
चण्डेश्वरी भवान्यास्तु मन्त्रोऽहं तादृशं चरेत् ॥
लेह्यचोष्यान्नपानादि निर्माल्यं स्रग्विलेपनम् ।
निर्माल्यभोजिने तुभ्यं ददानि श्रीशिवाज्ञया ॥
इति नैवेद्यशेषं तु दत्वा नत्वा विसर्जयेत् ।

तथा ।

निर्माल्यं मस्तके धार्यं मूलमन्त्रेण मन्त्रिणा ।

(प्रयोगसारे)

अथैशान्यां दिशि यथामन्त्रविन्यस्तविग्रहम् ।
पीठस्य चतुरस्रायां वेद्यां दर्भाग्रपाणिना ॥
अभिषिञ्चेत् स्वकं शिष्यमात्मतत्त्वानुवर्त्तिनम् ।

(सोमशम्भौ)

यागालयाद्दिशीशस्य चरितं स्नानमण्डपे ।
कुर्यात् करद्वयायामां वेदीमष्टाङ्गुलोच्छ्रयाम् ॥
श्रीपर्णाद्यासने तत्र विन्यस्यानतमासने ।
शिष्यं निवेश्य पूर्वास्यं सकलीकृत्य पूजयेत् ॥

तत्रैव ।

स्नानं तूदङ्मुखं भुक्तौ पूर्ववक्त्रश्च मुक्तये ।

अन्यत्रापि ।

मण्डलं त्वीशदिक् कृत्वा मुमुक्षूँस्तूत्तराननान् ।
भुक्तये पूर्ववक्त्रांश्च शिष्याँस्तत्र निवेशयेत् ॥

(शारदायाम्)

नदत्सु पञ्चवाद्येषु सार्धं विप्राशिषा गुरुः ।
विधिवत् कुण्डमुद्धृत्य तन्मुखस्थान् सुरद्रुमान् ॥
शिशोः शिरसि विन्यस्य मातृकां मनसा जपन् ।
मूलेन साधितैस्तोयैरभिषिञ्चेत् तमात्मवित् ॥

मातृकां विलोममातृकाम् ।

क्षाद्यैरान्तैर्वर्णैरभिपूर्णतत्त्वस्त्रिरुक्तमन्त्राद्यैः ।

इति (क्रमदीपिका-) वचनात् ।

शिष्यशिरसि संयोज्य विलोममातृकां जपन् ।
मूलमन्त्रं तथा जप्त्वा कुर्याद्देवाभिषेचनम् ॥

इति (गौतमीयतन्त्र-) वचनाच्च ।

तथा ।

पूजितां पुनरादाय वर्द्धिनीमस्त्ररूपिणीम् ।
तस्याः सुसाधितैस्तोयैः सिञ्चेद्रक्षार्थमञ्जसा ॥
अवशिष्टेन तोयेन शिष्यमाचामयेद्गुरुः ।
ततस्तं सकलीकृत्य देवतात्मनमात्मवित् ॥

उत्थाय शिष्यो विमले वाससी परिधाय च ।
आचम्य वाग्यतो भूत्वा निषीदेत् सन्निधौ गुरोः ॥
देवतामात्मनः शिष्ये संक्रान्तां देशिकोत्तमः ।
पूजयेद्गन्धपुष्पाद्यैरैक्यं संभावयँस्तयोः ॥
दद्याद्विद्यां ततस्तस्मै विनीतायाम्बुपूर्वकम् ।

(वशिष्ठसंहितायाम्)

ततस्तच्छिरसि स्वस्य हस्तं दत्वा शतं जपेत् ।
अष्टोत्तरशतं वाऽपि दद्यादुदकपूर्वकम् ॥

(गौतमीये)

न्यासजालं तस्य देहे गुरुः संन्यस्य यत्नतः ।
दक्षकर्णे वदेन्मन्त्रं त्रिवारं पूर्णमानसः ॥

(मेरौ)

दक्षकर्णे वदेद्विद्वान् विप्रायोदकपूर्वकम् ।
अन्येभ्यस्तु वदेदेवमेव मन्त्रं विचक्षणः ॥

(कुलामृते)

विद्यां त्रिः कथयेत् कर्णे चाविज्ञाने च वा पुनः ।

(दीपिकायाम्)

ऋष्यादियुक्तमथ मन्त्रवरं यथावद्-
भूयस्त्रिशो गुरुरनर्घ्यमवामकर्णे ।

अन्यत्रापि ।

दक्षकर्णे त्रिशो विद्यामेकोच्चारेण चोच्चरेत् ।
एष विधिर्द्विजातीनां स्त्रीशूद्राणां च वामतः ॥

तन्त्रान्तरे ।

अनयोस्तुल्यफलदो भवत्वेवमुदीरयेत् ।
प्रसन्नवदनस्तस्मै शिष्याय मुनिपुङ्गवः ॥

(मेरुतन्त्रे)

स्वतो ज्योतिर्मयीं विद्यां गच्छन्तीं भावयेद्गुरुः ।
आगतां भावयेच्छिष्यो नतोऽस्मीति विशेषतः ॥
अष्टोत्तरशतं शिष्यः प्रजपेद्गुरुणोदितम् ।
अष्टाविंशतिवारं वा ह्यष्टकृत्वोऽथवा जपेत् ॥
गुरुदेवात्ममन्त्राणामैक्यं शिष्यो विभावयेत् ।
प्रणामं गुरवे कुर्यात् साधको भक्तिमान् मुहुः ॥

(क्रियासंग्रहे)

पादयोः पतितं शिष्यं तत उत्थापयेद्गुरुः ।
उत्तिष्ठ वत्स मुक्तोऽसि सम्यगाचारवान् भव ॥
कीर्त्तिश्रीकान्तिमेधायुर्बलारोग्यं सदाऽस्तु ते ।

(गौतमीये)

गणेशादिमनुं चोक्त्वा समयात् कथयेद्गुरुः ।

गणेशादिमन्त्रदानं पञ्चायतनदीक्षापद्धे ।

(दक्षिणामूर्त्तिसंहितायाम्)

समीपे चक्रराजं च सम्यगभ्यर्च्य देशिकः ।
आद्याक्षरेण संलग्नं सुन्दरं नाम कल्पयेत् ॥
आत्मानं योजयित्वा तु गुरुभिर्मानवैस्ततः ।
स्मर्त्तव्या गुरवः सर्वे सम्यक् प्रणतिपूर्वकम् ॥
भूमौ लिखित्वा विद्यां च सम्यक् पुष्पादिभिर्यजेत् ।
शिष्याय दर्शयेद्विद्यां प्रजप्तां शतधा प्रिये ॥
यदि स्यान्महती प्रीतिः शिष्यस्य प्रणतस्य च ।
तदैकोच्चारमात्रेण दत्तकर्णो जपेत् पराम् ॥

(तन्त्रराजे)

उक्तलक्षणसम्पन्नं शिष्यमाचारभूषणम् ।

पञ्चषट्कूटविद्याभ्यां शोधितं बहुवासरैः॥
कलशैरभिषिञ्च्यामुं श्रीचक्रे संनिवेश्य वै ।
आधारे हृदये मूर्ध्नि चक्रं संचिन्त्य मध्यतः ॥
स्वान्तादावाह्य संस्थाप्य संपूज्य न्याससंयुताम् ।
त्रिशो विद्यां वदेत् कर्णौ देव्यात्मापूर्णमानसः ॥
देवतागुरुमन्त्रात्मतत्त्वैक्यं भावयेन्मुदा ।
शतं जपेत् तदग्रस्थो निकटे त्रिदिनं वसेत् ॥
न चेत् संचारिणी शक्तिर्गुरुमेति न संशयः ।
तस्मात् तदन्तिके तस्य पूजादेशादिकृद्वसेत् ॥

(गौतमीये)

त्रिदिनं निवसेद्भक्त्या सिद्धये गुरुसन्निधौ ।
अन्यथा तद्गतं तेजो गुरुमेति न संशयः ॥

(मन्त्रतन्त्रप्रकाशे)

आचार्यादनभिप्राप्तः प्राप्तश्चादत्तदक्षिणः ।
सततं जप्यमानोऽपि मन्त्रः सिद्धिं न यच्छति ॥
सर्वस्वं वा तदर्धं वा वित्तशाठ्यविवर्जिताम् ।
गुरवे दक्षिणां दत्वा ततो मन्त्रग्रहो मतः ॥

(तन्त्रान्तरे)

गोभूहिरण्यं विपुलं गृहक्षेत्रादिकं बहु ।
न चेदर्धं तदर्धं वा तद्दशांशमथापि वा ॥
अक्लेशादन्नवस्त्रादि दद्याद्वित्तानुसारतः ।

(ब्रह्मसंहितायाम्)

अदक्षिणं कृतं कर्म वृथा नारद निश्चितम् ।
वीणां मे दक्षिणां देहि साक्षसूत्रकमण्डलुम् ॥
ततो मन्त्रं गृहाण त्वं यथाविधि महामुने ।

विधिहीनं कृतं कर्म सिद्धिं नैव प्रयच्छति ॥
(गौतमीये)
गुरवे दक्षिणां दद्याद्वित्तार्धं मुक्तितत्परः ।
तदर्धं वा ततो दद्याद्यथाशक्त्याऽथ भक्तितः ॥
वित्तशाठ्यं न कुर्वीत कृतेऽनर्थं समावहेत् ।
गोभूहिरण्यवस्त्रादि गुरवेऽथ निवेदयेत् ॥
गुरुपुत्राय तत्पत्न्यै तच्छिष्येऽपि स्वशक्तितः ।
वस्त्रालङ्करणं दद्याद्राज्यमिष्टं यथारुचि ॥
ऋत्विग्भ्यो दक्षिणां दद्याद्वस्त्रालङ्कारसंयुताम् ।
(मेरुतन्त्रे)
अलङ्कारांश्च वासांसि दद्यादृत्विग्भ्य आदरात् ।
ईश्वरार्पणबुद्ध्या तु द्विजाशीर्भिश्च नन्दितः ॥
प्रदद्याद्गुरवे शिष्यः स्वधनार्धं तदर्धकम् ।
दशांशं वा प्रदद्याच्च वित्तशाठ्यविवर्जितः ॥
गोभूहिरण्यविपिनगृहक्षेत्रादिकं तथा ।
अक्लेशादन्नवस्त्रादि दद्याद्वित्तानुसारतः ॥
प्रकारान्तरमालम्ब्य गुरुं यत्नेन तोषयेत् ।
तदधीनमना नित्यं तच्चिन्तनपरायणः ॥
तत्पादाब्जरजोभूषो भवेत् साधकसत्तमः ।
ततो नानाविधैर्भक्ष्यैर्लेह्यैश्चोष्यैस्तथा परैः ॥
ब्राह्मणान् भोजयेत् सम्यक् प्रदद्याद्भूरिदक्षिणाम् ।
(वायवीयसंहितायाम्)
मण्डपं गुरवे दद्याद्यागोपकरणैः सह ।
(नारायणीयमहाकपिलपञ्चरात्रयोः)
मन्त्रं दत्वा सहस्रं वै स्वसिद्ध्यै देशिको जपेत् ।

अन्यत्रापि ।

अष्टोत्तरं सहस्रं स्वशक्तिहीनानवाप्तये जप्यात् ।

(कुलामृते)

दण्डवत् प्रणतं शिष्यं सर्वाचारांश्च शिक्षयेत् ।
स्नानसन्ध्यासदाचारं नित्यं काम्यं तथैव च ॥
मन्त्रसिद्धिप्रकारांश्च शिष्यायाभिवदेद्गुरुः ।

दीक्षादिवसे उपवासो निषिद्धस्तदुक्तम् (योगिनीतन्त्रे)

मन्त्रं दत्वा गुरुश्चैव उपवासं य आचरेत् ।
महान्धकारे नरके कृमिर्भवति नान्यथा ॥
दीक्षां दत्वा यदा मन्त्री चोपवासं समाचरेत् ।
तस्य देवः सदा रुष्टः शापं दत्वा पुरं व्रजेत् ॥

(बृहत्सिद्धान्तसारे)

हुतशेषं ततः प्राश्य कुक्कुटाण्डप्रमाणकम् ।
चतुर्विधं च नैवेद्यं देवतायै यदर्पितम् ॥
तद्भक्तेभ्यः *प्रदत्वा तद्भुञ्जीयातां यथारुचि ।

गुरुशिष्याविति शेषः ।

(मेरुतन्त्रे)

शैवस्तु शैवनिर्माल्यप्रसादस्याधिकारवान् ।
अन्यो निरयमायाति न दोषः पञ्चसंगमे ॥
स्वयम्भूतीर्थलिङ्गं वा प्रसादं वाऽपि भक्तितः ।
अशैवा वाऽथ शैवा वा मुच्यन्ते पापराशितः ॥

(सिद्धान्तसारे)

दिनत्रयं गुरुकुले स्थित्वा तुर्येऽन्हि देवताम् ।
अर्चयित्वा गृहं गच्छेद्दुर्वाज्ञां शिरसा वहन् ॥

अथ वीरदीक्षायां विशेषः । तत्र भूतशुद्धिमातृकान्यासषोढान्यासादिकं सर्वं गुरुः स्वशरीरे शक्तिशरीरे च विधाय कलशस्थापनं श्रीपात्रादिस्थापनं च कृत्वा

---

* तान्त्रिकप्रयोगोऽयम् ।

द्वितीयागक्रमेण कुण्डगोलोत्थद्रव्यमुत्पाद्य संस्कृत्य मत्स्यमांसादेरपि संस्कारं विधाय वीरपूजाक्रमेण देवतां संपूज्य शिष्याय मन्त्रदानसमये ।

शिष्यहस्ते महेशानि पात्रं दत्वा कुलेश्वरि—इति ।

(वीरचूडामण्यु-) क्तवीरपात्रम् ।

इदं पवित्रममृतं पीयतां भवभेषजम् ।
पशुपाशसमुच्छेदकारणं भैरवोदितम् ॥

इति (कुलार्णव-) क्रमेण शिष्यहस्ते दद्यात् ।

शिष्योऽप्यनेनैव मन्त्रेण पीयतामित्यत्र पिबामीति पठित्वा—

धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा ।
सुषुम्णा वर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥

इत्यादिमन्त्रेण पिबेत् । ततो गुरुर्मन्त्रं दद्यात् ।

तत्र (यामले)

ऋष्यादिसहितामेनां लिखित्वा भूमिमध्यगाम् ।
पुष्पादिना समभ्यर्च्य शिष्यायाथ प्रदर्शयेत् ॥
यदि शिष्ये महाप्रीतिस्तदा कर्णे वदेद्गुरुः ।
ततोऽप्यतितरां शिष्यो गुरोश्चेत् प्रीतिभाजनम् ॥
तदा गण्डूषपूर्वं हि दद्यादेनां गुरूत्तमः ।
निर्विकल्पोऽपि शिष्यस्तां गृह्णीयाद्धृष्टमानसः ॥
तदभावे न सिद्धिः स्याद्देवताशापमाप्नुयात् ।

(दक्षिणामूर्त्तिसंहितायाम्)

कलशस्थैः पल्लवैस्तु त्रिवारं प्रोक्षयेच्छुभम् ।
भवेद्यदाऽभिषिक्तस्तु तदाऽसौ देशिकाग्रणीः ॥
गण्डूषतत्त्वसंयुक्तस्तदाऽर्होऽयं शिवार्चने ।
अन्यथा नैव सिद्धिः स्यात् सविकल्पस्य पार्वति ॥
गण्डूषदाने शिष्यस्य विकल्पो यदि जायते ।
न सिद्धिस्तस्य कुत्रापि श्रीविद्याऽपि पराङ्मुखी ॥

शेषं पशुदीक्षासमानम् ।

द्वितीयविद्यादीक्षायां विशेष उक्तो (नीलतन्त्रे)

अष्टोत्तरसहस्रहोमं विल्वपत्रेण कारयेत् ।
अथ वाऽष्टशतं कुर्यादष्टाविंशतिमेव वा ॥
पायसं कृशरं दद्यान्मोदकं खण्डशर्कराम् ।
वलिं दत्वा छागलं वै गोधामांसमनुत्तमम् ॥
रम्भापुष्पं सारमत्स्यं जुहुयाच्च प्रयत्नतः ।
यवक्षीरं ततो हुत्वा शाल्यन्नं मधुना सह ॥
गोभूहिरण्यवस्त्राद्यैस्तोषयेद्गुरुमात्मनः—इति ।

(मेरुतन्त्रे)

एवं क्रियावती दीक्षा संपदात्री निरूपिता ।
राज्ञां धनाढ्यवैश्यानां विप्राणां व्यवसायिनाम् ॥
अयं दीक्षाक्रमः प्रोक्तो भोगयुक्सिद्धिमिच्छताम् ।

इति क्रियावती दीक्षा परिपूर्णा ।

बिभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृतस्रोतः-
शालिनि सन्निबन्धनसरित्संभेदमभ्यर्हितम् ।
तुर्यः श्रीनरदेवनिर्मितपुरश्चर्यार्णवे प्रस्फुरत्-
सद्युक्तिस्फुटमौक्तिकोत्कररुचोत्तुङ्गस्तरङ्गो गतः ॥

इति श्रीमन्महाराजाधिराजश्रीप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे क्रियावतीदीक्षाविधिर्नाम चतुर्थस्तरङ्गः ॥ ४ ॥

अथ दीक्षाप्रयोगः प्रकाश्यते ।

तत्रादौ भक्तियुक्तः शिष्यः प्रथमदिने चौरादिकं विधाय शरीरशुद्ध्यर्थं तीर्थादौ स्नात्वा गायत्रीसहस्रं प्रजप्य हविष्यं सकृद्भुक्त्वा द्वितीयदिने कृतोपवासस्तृतीयदिवसे कृतनित्यक्रियो वस्त्रालङ्कारादिभिर्देहमलङ्कृत्य विघ्ननिवारणार्थं स्वगृहे गणेशमभ्यर्च्य पुण्याहं वाचयित्वा नान्दीश्राद्धं च विधाय यथोक्तवरणसम्भारानादाय पञ्चवाद्यपुरःसरं गुरुगृहं गच्छेत् । तत्र च हस्तौ पादौ प्रक्षाल्य कृताञ्जलिर्भक्तिनम्रः—

भगवन् परमात्मरूपिन् परमकारुणिक श्रीगुरो सकलपुरुषार्थसाधनमहामन्त्रप्रदानेन मामनुगृह्णीष्व—

इत्युक्त्वा गुरुं साष्टाङ्गं प्रणम्य तदाज्ञया प्राङ्मुख उदङ्मुखो वाऽऽसने उपविश्य कुशत्रयतिलजलान्यादाय स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् ।

तद्यथा—

ॐ विष्णुर्विष्णुः । ॐ अद्येत्यादि-अमुकगोत्रोत्पन्नोऽमुकदेवशर्मा धर्मार्थकाममोक्षप्राप्तिकामः श्रीमदमुकदेवताया अमुकमन्त्रदीक्षामहं करिष्ये—इति संकल्प्य गुरुं वृणुयात् ।

तद्यथा—

ॐ साधु भवानास्तात्—इति शिष्यो वदेत् ।

ॐ साध्वहमासे—इति गुरुः ।

ॐ अर्चयिष्यामो भवन्तम्—इति शिष्यः ।

ॐ अर्चय—इति गुरुः ।

ततः शिष्यः—

श्रीगुरवे नमः—इति मन्त्रेण गुरवे आसनं दत्वा तेनैव मन्त्रेण पाद्यादिभिर्गन्धपुष्पधूपदीपवस्त्रालङ्करणादिभिश्च गुरुमभ्यर्च्य दक्षिणजानुं भूमौ धृत्वा पठेत्-

ॐ अद्येत्यादि—अमुकगोत्रोत्पन्नोऽमुकदेवशर्मा धर्मार्थकाममोक्षप्राप्तिकामः श्रीमदमुकदेवताया अमुकमन्त्र-

महणायामुकगोत्रममुकप्रवरममुकवेदाध्यायिनममुकदेवशर्माणमेभिः पाद्यादिभिरर्चितं भवन्तं गुरुत्वेनाहं वृणे ।

ॐ वृतो ऽस्मि—इति प्रतिवचनम् ।

पुनर्बद्धाञ्जलिना—

ॐ अद्येत्यादि-अमुकमन्त्रदीक्षाकर्मणि त्वमाचार्यो भव ।

ॐ भवामि—इति प्रतिवचनम् ।

भगवन् श्रीगुरो यथाविहितं कर्म कुरु—इति शिष्यो वदेत् ।

यथाज्ञानतः करवाणि—इति प्रतिवचनम् ।

ततः शिष्यो गुरवे नमस्कारं कुर्यात् । तथा ततोऽवशिष्टां वरणसामग्रीं गुरवे निवेद्य तच्चरणौ प्रणम्य तदाज्ञया ऋत्विजो वृणुयात् । तद्यथोक्तोपचारैरुक्तप्रकारेण च तान् प्रत्येकमभ्यर्च्य पठेत्—

ॐ अद्येत्यादि-अमुकगोत्रोत्पन्नोऽमुकदेवशर्मा चतुर्वर्गफलप्राप्तिकामः श्रीमदमुकदेवताया मत्कर्तृकामुकमन्त्रदीक्षाकर्मण्यमुकगोत्रममुकप्रवरममुकवेदाध्यायिनममुकशर्माणमेभिः पाद्यादिभिरर्चितं भवन्तमृत्विक्त्वेनाहं वृणे ।

ॐ वृतो ऽस्मि -- इतिं प्रतिवचनम् ।

यथाविहितं कर्म कुरु—इति शिष्यः ।

यथाज्ञानतः करवाणि—इति प्रतिवचनम् ।

एवमष्टौ ऋत्विजः प्रत्येकं वृणुयात् ।

ततः कर्मोपयुक्तसामग्रीं तेभ्यो दत्वा तान् प्रणमेत् ।

ततो गुरुः शिष्येण ऋत्विग्भिश्च सहितो यागमण्डपं गत्वा तद्द्वारि उपविश्य दन्तकाष्ठपरीक्षां कुर्यात् । पायसभोजनानन्तरमेव दन्तकाष्ठपरीक्षा कर्त्तव्या । [* कर्त्तव्या-इति एषां मतैस्तु तस्मिन्नेव काले कर्त्तव्या ।]

सा यथा—

अश्वत्थोदुम्बरवटप्लक्षादिक्षीरवृक्षसम्भवं द्वादशाङ्गुलप्रमाणं दन्तकाष्ठं देयमूलमन्त्रेणाभिमन्त्र्य गुरुः शिष्याय दद्यात् ।

---

* कोष्ठकान्तर्गतं प्रक्षिप्तमिवाभाति ।

शिष्योऽपि हस्तौ पादौ प्रक्षाल्याचम्य गुरुं नत्वा तद्दन्तकाष्ठमादाय दन्तान् विशोध्य वालुकादिनिर्मिते हस्तमात्रे चतुरस्रस्थण्डिले दन्तकाष्ठं त्यक्त्वा शुद्धजलेन गण्डूषपूर्वकमाचमनं कुर्यात् ।

ततो गुरुः पूर्वादिदिक्पतितदन्तकाष्ठाग्रमालोक्य शुभाशुभफलानि विचारयेत् ।

यथा—

दन्तकाष्ठाग्रे पूर्वदिक्पतिते ऐश्वर्यलाभः । आग्नेयदिक्पतिते हृदयसन्तापः । दक्षिणदिक्पतितं बन्धुनाशः । रक्षोदिक्पतिते मरणम् । पश्चिमदिक्पतिते शोकः । वायवीयदिक्पतिते व्यग्रता । उत्तरदिक्पतिते सौख्यम् । ईशानदिक्पतिते च ज्ञानलाभ इति फलं विचार्य अशुभदिक्पतिते तु तज्जन्यदोषनिवारणार्थम्—

फट् अमुकदोषं जहि २ फट् स्वाहा—इति मन्त्रेणाष्टोत्तरसहस्रसंख्याकमष्टोत्तरशतसंख्याकं वा होममाज्यने कुर्यात् ।

ततो गुरुर्मण्डपद्वारदेशे आसने उपविश्य आचमनप्राणायामौ विधाय सामान्यार्घस्थापनं कुर्यात् ।

तद्यथा—

अस्त्रजलेन भूमिं संप्रोक्ष्य त्रिकोणवृत्तचतुरस्रमण्डलं विलिख्य—

ॐ आधारशक्तये नमः—इति मण्डलं संपूज्य तदुपरि आधारं संस्थाप्य—

रँ वह्निमण्डलाय दशकलात्मने नमः—इत्याधारं संपूज्य—

फट्—इति मन्त्रेणार्घपात्रं प्रक्षाल्याधारोपरि संस्थाप्य—

अँ सूर्यमण्डलाय द्वादशकलात्मने नमः—इत्यर्घपात्रं संपूज्य—

नमः—इति जलेनापूर्य—

सँ सोममण्डलाय षोडशकलात्मने नमः—इति जलं संपूज्य तस्मिन् जले—

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

इत्यङ्कुशमुद्रया सूर्यमण्डलात् तीर्थमावाह्य प्रणवेन गन्धपुष्पं निधाय तेनैव संपूज्य तेनैवाष्टधा दशधा वाऽभिमन्त्र्य धेनुमुद्रां प्रदर्शयेत् ।

ततस्तज्जलेन—

फट्—इति द्वारमभ्युक्ष्य द्वारपूजां कुर्यात् ।

तद्यथा—

ॐ विघ्नेशाय नमः—इति द्वारस्योर्ध्वोदुम्बरे ।

मँ महालक्ष्म्यै नमः—इति तद्दक्षिणे ।

सँ सरस्वत्यै नमः—इति तद्वामे ।

द्वारश्रियै नमः—इति मध्ये ।

द्वारस्य दक्षिणशाखायां वामशाखायां चोर्ध्वभागादारभ्य तलपर्यन्तमेता द्वारदेवताः पूजयेत् ।

तद्यथा—

गँ गणपतये नमः—इति दक्षिणे ।

क्षँ क्षेत्रपालाय नमः—इति वामे ।

शँ वसुन्धरायुक्ताय शङ्खनिधये नमः—इति पुनर्दक्षिणे ।

पँ वसुमतियुक्ताय पद्मनिधये नमः—इति वामे ।

मँ मायाशक्तये नमः—इति दक्षिणे ।

चँ चिच्छक्तये नमः—इति वामे ।

गँ गङ्गायै नमः—इति दक्षिणे ।

यँ यमुनायै नमः—इति वामे ।

धँ धात्रे नमः—इति दक्षिणे ।

वँ विधात्रे नमः—इति वामे ।

दँ देहल्यै नमः, अँ अस्त्राय नमः—इति वा देहल्याम् ।

एवं पश्चिमद्वारमारभ्य प्रतिद्वारं संपूज्य द्वारपालान् पूजयेत् ।

तत्र विशेषशिवपूजायाम्—

नन्दिमहाकालगणेशवृषभृङ्गिस्कन्दभवानीचण्डेश्वरान्—

पश्चिमद्वारमारभ्य प्रतिद्वारं क्रमेण द्वौ द्वौ पूजयेत् ।

एषां पूजने मन्त्रस्तु—

नँ नन्दिने नमः—इत्यादि ।

विष्णुपूजायाम्—

नन्दसुनन्दचण्डप्रचण्डबलप्रबलभद्रसुभद्राख्यान्—

द्वारपालान् पूजयेत् ।

गणेशपूजायाम्—

वक्रतुण्डैकदंष्ट्रमहोदरगजाननलम्बोदरविकटविघ्नराजधूम्रवर्णान्—पूजयेत् ।

सूर्यपूजायां देवीपूजायां च—

ब्राह्मीमाहेश्वरीकौमारीवैष्णवीवाराहीन्द्राणीचामुण्डामहालक्ष्मीः—पूजयेत् ।

त्रिपुरादिपूजायां तु—

गणेशक्षेत्रपालवटुकयोगिनीगङ्गायमुनालक्ष्मीसरस्वतीः—पूजयेदिति ।

ततो देयमन्त्रेण दिव्यदृष्ट्याऽवलोकनात् दिव्यान् विघ्नानुत्सार्य—

अस्त्राय फट्—इति जलक्षेपेणान्तरिक्षगान् विघ्नानुत्सार्य तेनैव मन्त्रेण त्रिभिर्वामपार्ष्णिघातैर्भौमान् विघ्नानुत्सारयेत् ।

ततो दक्षिणाङ्गं किञ्चित् संकोच्य द्वारस्य वामशाखां स्पृशन्नुत्सारितभूतानां निर्गमनार्थं दक्षिणमार्गं ददद्दक्षिणपादपुरःसरं मण्डपान्तः प्रविशेत् । वाममार्गे तु शक्तिवामपादपुरःसरं मण्डपान्तःप्रवेशः । तथैव स्त्रीकर्तृकदीक्षायामपि ।

ततो नैर्ऋत्यां दिशि—

ॐ वास्तुपुरुषाय वास्त्वधीशाय ब्रह्मणे नमः—

इति पुष्पाक्षतैः संपूज्य प्रणम्य पञ्चगव्यसामान्यार्घतोयाभ्यां मण्डपाभ्यन्तरं संप्रोक्ष्य संस्कारचतुष्टयं कुर्यात् ।

तद्यथा—

मूलमन्त्रं—समुच्चरन् मण्डपाभ्यन्तरं पश्येत् ।

फट्—इति सामान्यार्घजलेन तत्प्रोक्षणं कुर्यात् । तेनैव मन्त्रेण दर्भैस्ताडयेत् ।

हुँ—इति मन्त्रेण सिञ्चेत् ।

ततः श्रीखण्डागुरुकर्पूरादिधूपेन मण्डपाभ्यन्तरं प्रधूप्य लाजाचन्दनसिद्धार्थभस्मदूर्वाकुशाक्षतानिति सप्त विकिरानेकीकृत्य—

फट्—इत्यस्त्रमन्त्रेण सप्तधाऽभिमन्त्र्य—

ॐ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥

इति त्रिधा विकिरेत् ।

ततस्तान् विकिरानस्त्रमन्त्रमुच्चरन् दर्भमुष्टिना संमार्ज्य वर्धन्यासनार्थमीशानकोणे पुञ्जीकृत्य स्थापयेत् ।

ततः पुण्याहं वाचयित्वा विप्रान् सन्तोष्य—

ॐ दीपनाथभैरवाय नमः—इति तन्नामकं भैरवं संपूज्य बद्धाञ्जलिः प्रार्थयेत् ।

तस्मिन् क्षेत्रे दीपनाथ निर्विघ्नसिद्धिहेतवे ।
दीक्षायागसमृद्ध्यर्थमनुज्ञां दातुमर्हसि ॥
अतितीक्ष्ण महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि-॥

इत्यनुज्ञामादाय—

फट्—इति मन्त्रमुच्चरन् वेदिकोपरि गत्वा वेदिकायां मृदा चतुरस्रं स्थण्डिलं निर्माय तदुपरि सर्वतोभद्रमण्डलं विलिख्य पूजोपकरणानि यथास्थानं निवेश्यासनमास्तीर्य वामभागस्थजलपात्रमादाय जलशोधनं कुर्यात् ।

तद्यथा—

यँ—इति वायुबीजेन संशोष्य—

रँ—इत्यग्निबीजेन संदह्य—

वँ—इति वरुणबीजेनाप्लाव्य—

गायत्र्या संप्रोक्ष्य धेनुमुद्रयाऽमृतीकृत्य तेन जलेन—

ॐ आत्मतत्त्वाय स्वाहा, ॐ विद्यातत्त्वाय स्वाहा,
ॐ शिवतत्त्वाय स्वाहा—इति त्रिराचम्य—

अस्त्राय फट्—इत्यासनं संप्रोक्ष्य तदुपरि अष्टदलकमलं विलिख्य—

पृथिव्या मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनपरिग्रहे विनियोगः ।

आसनं धृत्वा—

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम्—इति पठित्वा—

ह्रीँ आधारशक्तिकमलासनाय नमः——इत्यासनं संपूज्य तदुपरि आत्ममन्त्रमुच्चरन् स्वस्तिकपद्मासनादिक्रमेणोपविश्य संकल्पं कुर्यात् ।

यथा—

ॐ अद्येत्यादि--अमुकदेवशर्माऽमुकगोत्रोऽमुकशर्मकर्तृकामुकदेवताया अमुकमन्त्रदीक्षाकर्मणि यथासम्भवोपचारैरमुकदेवतायाः पूजामहं करिष्ये——इति संकल्पः ।

ॐ ह्राँ ह्रीँ सः सग्रहराशिनक्षत्रयोगकरणपरिवृतासनस्थितश्रीसूर्याय एष तेऽर्घः स्वाहा——इति सूर्यार्घं दत्वा पूजाद्रव्याणि संस्कुर्यात् ।

तद्यथा—नाराचमुद्रां बद्ध्वा—

ह्राँ हुँ फट्——इति मन्त्रमुच्चरन् गन्धपुष्पनैवेद्यादीनि समदृष्ट्या विलोकयेत् ।

रँ——इति मन्त्रेण दीपशिखां स्पृशेत् ।

ततः—

श्रौँ बीजमुच्चरन् देवतीर्थेन जलं संस्पृश्य जलपात्रं वामहस्तेन धृत्वा—

जँ जलाधारपात्राय नमः——इति मन्त्रं पठेत् ।

ततः शिरस्यञ्जलिमाधाय वामे—

ॐ गुरुभ्यो नमः, ॐ परमगुरुभ्यो नमः, ॐ परापरगुरुभ्यो नमः——इति गुरुत्रयं नत्वा दक्षिणे—

गँ गणपतये नमः——मध्ये—

अमुकदेवतायै नमः——इति प्रणम्य—

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

इति गुरुं पुनर्नत्वा करशुद्धिं कुर्यात् ।

यथा—

ह्सौँः——इति मन्त्रेण चन्दनाक्तं पुष्पमादाय—

फट्—इति मन्त्रेण कराभ्यां समर्घ्य तत् पुष्पं वामहस्तेनादाय शिरसि परिभ्राम्य प्रणवं जपन्नाघ्राय—

ह्रौँ ॐ ते सर्वे विलयं यान्तु ये मां हिंसन्ति हिंसकाः।
मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके—इति पठित्वा—

फट्—इति मन्त्रेण नाराचमुद्रया ईशाने त्यजेत्।

ततोऽस्त्रमन्त्रेण ऊर्ध्वोर्ध्वक्रमेण तालत्रयपुरःसरं छोटिकाभिर्दशदिग्बन्धनं विधाय तज्जनिततेजो वह्निप्राकारमुद्रया संरक्ष्य मूलेन तद्बीजेन प्रणवेन वा प्राणायामत्रयं कृत्वा भूतशुद्धिं कुर्यात्।

यथा—स्वाङ्के उत्तानौ करौ कृत्वा—

सोऽहम्—इति जीवात्मानं प्रदीपकलिकाकारं हृत्पद्मासनमूलाधारस्थितकुण्डलिन्या सह सुषुम्णावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यंषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तत्र पृथिव्यप्तेजोवाय्वाकाशगन्धरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्रवाक्पाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहङ्काराख्यानि चतुर्विंशतितत्त्वानि उक्तक्रमेण लीनानि विभाव्य—

यँ—इति वायुबीजं धूम्रवर्णं वामनासापुटे विचिन्त्य तस्य षोडशवारजपेन वायुना देहमापूर्य नासापुटौ धृत्वा पञ्चाशद्वारजपेन चतुःषष्टिवारजपेन वा कुम्भकं कृत्वा वामकुक्षिस्थकृष्णवर्णपापपुरुषेण सह देहं संशोष्य पञ्चाशद्वारजपेन द्वात्रिंशद्वारजपेन वा दक्षनासया वायुं रेचयेत्। एवमग्रेऽपि संख्याविकल्पो बोध्यः।

ततो दक्षनासापुटे—

रँ—इति वह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोडशवारजपेन देहमापूर्य नासापुटौ धृत्वा चतुःषष्टिवारजपेन कुम्भकं कृत्वा पापेन सह दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत्।

ठँ—इति चन्द्रबीजं शुक्लवर्णं वामनासिकायां धृत्वा तस्य षोडशवारजपेन ललाटे चन्द्रं नीत्वा सहस्रदलकमलकर्णिकान्तं परमात्मानं चन्द्ररूपं विभाव्य—

वँ—इति वरुणबीजस्य चतुःषष्टिवारजपेन तस्माल्ललाटचन्द्राद्गलितसुधया मातृकावर्णात्मिकया समस्तदेहमाप्लाव्य—

लँ—इति पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं विचिन्त्य दक्षिणेन वायुं रेचयेत्।

ततः परमात्मनि लीनानि पञ्चभूतान्युक्तक्रमेण यथास्थानं निवेश्य देवताराधनयोग्यं तेजोरूपं देहमुत्पन्नं विभाव्य—

हँसः—इति जीवात्मानं परमात्मनः समाकृष्य हृत्पद्मे स्थापयित्वा देवतारूपमात्मानं विचिन्तयेत् ।

इति भूतशुद्धिं विधाय—

आँ सोऽहं मम प्राणा इह प्राणा इह स्थिताः, आँ सोऽहं मम जीव इह जीव इह स्थितः, आँ सोऽहं मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

इति स्वहृदि प्राणस्थापनं कृत्वा मातृकान्यासं कुर्यात् ।

यथा—

अस्य श्रीमातृकासरस्वतीमन्त्रस्य ब्रह्मा ऋषिर्गायत्री छन्दो मातृकासरस्वती देवता हलो बीजानि स्वराः शक्तयो व्यक्तयः कीलकानि शरीरशुद्धिपुरःसरमभीष्टसिद्ध्यर्थे लिपिन्यासे विनियोगः ।

शिरसि—ब्रह्मणे ऋषये नमः । मुखे—गायत्र्यै छन्दसे नमः । हृदि—मातृकासरस्वत्यै देवतायै नमः । गुह्ये—हल्भ्यो बीजेभ्यो नमः । पादयोः—स्वरेभ्यः शक्तिभ्यो नमः । सर्वाङ्गेषु—व्यक्तिभ्यः कीलकेभ्यो नमः ।

लिपिन्यासे विनियोगः—इति बद्धाञ्जलिः ।

ततः कराङ्गन्यासौ—

अँ कँ खँ गँ घँ ङँ आँ अङ्गुष्ठाभ्यां नमः । इँ चँ छँ जँ झँ ञँ ईँ तर्जनीभ्यां स्वाहा । उँ टँ ठँ डँ ढँ णँ ऊँ मध्यमाभ्यां वषट् । एँ तँ थँ दँ धँ नँ ऐँ अनामिकाभ्यां हुँ । ओँ पँ फँ बँ भँ मँ औँ कनिष्ठिकाभ्यां वौषट् । अँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ अः करतलकरपृष्ठाभ्यां अस्त्राय फट् ।

एवं हृदयादिषु—

अँ कँ खँ गँ घँ ङँ आँ हृदयाय नमः—इत्यादि न्यसेत् ।

ततो ध्यानम् ।

यथा—

पञ्चाशल्लिपिभिर्विभक्तमुखदोष्पन्मध्यवक्षःस्थलीं
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम् ।
मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥

एवं ध्यात्वा केवलान् सविसर्गान् वा अकारादिक्षकारान्तान् वर्णान् ललाटादिस्थानेषु न्यसेत् ।

तद्यथा—

अः नमः—ललाटे ।
आः नमः—मुखवृत्ते ।
इः नमः—दक्षनेत्रे ।
ईः नमः—वामनेत्रे ।
उः नमः—दक्षकर्णे ।
ऊः नमः—वामकर्णे ।
ऋः नमः—दक्षनासापुटे ।
ॠः नमः—वामनासापुटे ।
ऌः नमः—दक्षगण्डे ।
ॡः नमः—वामगण्डे ।
एः नमः—ओष्ठे ।
ऐः नमः—अधरे ।
ओः नमः—ऊर्ध्वदन्ते ।
औः नमः—अधोदन्ते ।
अंः नमः—ब्रह्मरन्ध्रे ।
अः नमः—मुखे ।
कः नमः—दक्षबाहुमूले ।
खः नमः—दक्षकूर्परे ।
गः नमः—दक्षमणिबन्धे ।
घः नमः—दक्षाङ्गुलिमूलेषु ।
ङः नमः—दक्षाङ्गुल्याग्रेषु ।
चः नमः—वामबाहुमूले ।
छः नमः—वामकूर्परे ।
जः नमः—वाममणिबन्धे ।
झः नमः—वामाङ्गुलिमूलेषु ।
ञः नमः—वामाङ्गुल्यग्रेषु ।
टः नमः—दक्षपादमूले ।
ठः नमः—दक्षजानुनि ।
डः नमः—दक्षगुल्फे ।
ढः नमः—दक्षपादाङ्गुलिमूलेषु ।

णः नमः—दक्षपादाङ्गुल्यग्रेषु।
तः नमः—वामपादमूले।
थः नमः—वामजानुनि।
दः नमः—वामगुल्फे।
धः नमः—वामपादाङ्गुलिमूलेषु।
नः नमः—वामपादाङ्गुल्यग्रेषु।
पः नमः—दक्षपार्श्वे।
फः नमः—वामपार्श्वे।
बः नमः—पृष्ठे।
भः नमः—नाभौ।
मः नमः—उदरे।
यः नमः—हृदये।
रः नमः—दक्षांशे।
लः नमः—ककुदि।
वः नमः—वामांशे।
शः नमः—हृदयादिदक्षिणकरे।
षः नमः—हृदयादिवामकरे।
सः नमः—हृदयादिदक्षिणपादे।
हः नमः—हृदयादिवामपादे।
लः नमः—हृदयाद्युदरे।
क्षः नमः—हृदयादिमुखे व्यापकम्।

इति सृष्टिक्रमः।

अथ स्थितिक्रमः।

तत्र ऋष्यादिकराङ्गन्यासान्तं पूर्ववद्विधाय ध्यायेत्।

यथा—

सिन्दूरकान्तिममिताभरणां त्रिनेत्रां
विद्याक्षसूत्रमृगपोतवरान् दधानाम्।
पार्श्वे स्थितां भगवतीमपि काञ्चनाभां
ध्यायेत् कराब्जधृतपुस्तकवर्णमालाम्॥

एवं ध्यात्वा—

ॐ नमः—दक्षगुल्फे इत्यादि। क्षँ नमः—हृदादिमुखे इत्यन्तं विन्यस्य पुनः—अँः नमः—ललाटे इत्यादि। ठँ नमः—दक्षजानुनि इत्यन्तं विसर्गानुस्वारयुक्तान् डादिठान्तान् वर्णान् न्यसेत्।

इति स्थितिक्रमः।

अथ संहारक्रमः।

अत्रापि ऋषिन्यासादिकं पूर्ववद्विधाय ध्यानम्।

यथा—

अक्षस्रजं हरिणपोतमुदग्रटङ्क-
विद्यां करैरविरतं दधतीं त्रिनेत्राम् ।
अर्धेन्दुमौलिमरुणामरविन्दभासां
वर्णेश्वरीं प्रणमत स्तनभारनम्राम् ॥

एवं ध्यात्वा—

क्षँ नमः—हृदादिमुखे इत्यादिविन्दुयुक्तान् क्षकाराद्यकारान्तवर्णांस्तत्तत्स्थानेषु न्यसेत्

इति संहारक्रमः ।

अत्र पूर्वं सृष्टिक्रमेण ततः स्थितिक्रमेण ततः संहारक्रमेण न्यासो यतिवानप्रस्थादिभिः कार्यः ।

पूर्वं स्थितिक्रमेण ततः संहारक्रमेण ततः सृष्टिक्रमेण न्यासो ब्रह्मचारिभिः कार्यः ।

गृहस्थैस्तु प्रथमं संहारक्रमेण ततः सृष्टिक्रमणे ततः स्थितिक्रमणे न्यासः कार्यः । अयं त्रिविधोऽपि बहिर्मातृकान्यासः ।

अथान्तर्मातृकान्यासः ।

तत्र मूलाधारध्वनिश्रवणप्रबुद्धकुण्डलिनीसंस्पृष्टसहस्रदलकमलात् सुषुम्णामार्गेण निर्गतानमृतमयान् मातृकावर्णान् निजदेहमभिव्याप्य स्थितान् ध्यात्वा कण्ठस्थविशुद्धाख्यषोडशदलकमलदलेषु पूर्वदलादिक्रमेण प्रणवादिनमोऽन्तान् सविन्दून् अकारादिषोडशस्वरान् मनसा विन्यसेत् ।

यथा—

ॐ अँ नमः—इत्यादि ।

ततो हृदयस्थानाहताख्यद्वादशदलकमलदलेषु तेनैव क्रमेण ककारादिठकारान्तान् वर्णान् न्यसेत् ।

ततो नाभिस्थमणिपूरकाख्यदशदलकमलदलेषु डकारादिफकारान्तान् दशवर्णान् न्यसेत् ।

ततो लिङ्गमूलस्य स्वाधिष्ठानाख्यषड्दलकमलदलेषु बकारादिलकारान्तान् षड्वर्णान् न्यसेत् ।

ततो मूलाधाराख्यचतुर्दलकमलदलेषु वकारादिसकारान्तांश्चतुरो वर्णान् विन्यसेत् ।

ततो भ्रूमध्यस्थिताज्ञाख्यद्विदलकमलदलयोर्द्वौ वर्णौ हकारक्षकारौ विन्यसेत् ।

इत्यन्तर्मातृकान्यासः ।

ततश्च स्वस्वकल्पोक्तन्यासान्तराणि विधाय मूलमन्त्रस्य ऋष्यादिन्यासं च कृत्वा पीठन्यासं कुर्यात् ।

यथाः—

ॐ आधारशक्तये नमः,
ॐ मूलप्रकृतये नमः,
ॐ कूर्माय नमः,
ॐ अनन्ताय नमः,
ॐ वराहाय नमः,
ॐ पृथिव्यै नमः,
ॐ क्षीरसमुद्राय नमः,
ॐ श्वेतद्वीपाय नमः,
ॐ मणिमण्डपाय नमः,
ॐ कल्पवृक्षाय नमः,
ॐ मणिवेदिकायै नमः,
ॐ रत्नसिंहासनाय नमः,

एतत् सर्वं हृदि ।

ॐ धर्माय नमः—दक्षिणस्कन्धे ।
ॐ ज्ञानाय नमः—वामस्कन्धे ।
ॐ वैराग्याय नमः—वामोरौ ।
ॐ ऐश्वर्याय नमः—दक्षिणोरौ ।
ॐ अधर्माय नमः—मुखे ।
ॐ अज्ञानाय नमः—वामपार्श्वे ।
ॐ अवैराग्याय नमः—नाभौ ।
ॐ अनैश्वर्याय नमः—दक्षिणपार्श्वे ।
ॐ अनन्ताय नमः—हृदि-
ॐ पद्माय नमः,
ॐ आनन्दकन्दाय नमः,
ॐ संविन्नालाय नमः,
ॐ सर्वतत्त्वात्मकपद्माय नमः,
ॐ प्रकृतिमयपत्रेभ्यो नमः,
ॐ विकारमयकेशरेभ्यो नमः,
ॐ पञ्चाशद्वर्णबीजाढ्यकर्णिकायै नमः,
ॐ अं सूर्यमण्डलाय द्वादशकलात्मने नमः,
ॐ उं सोममण्डलाय षोडशकलात्मने नमः,
ॐ मं वह्निमण्डलाय दशकलात्मने नमः,
सँ सत्त्वाय नमः,
रँ रजसे नमः,
तँ तमसे नमः,
आँ आत्मने नमः,
अँ अन्तरात्मने नमः,
पँ परमात्मने नमः,
ह्रीँ ज्ञानात्मने नमः—

इत्यन्तं विन्यस्य हृत्पद्मस्य पूर्वादिकेशरेषु स्वकल्पोक्तपीठशक्तीर्विन्यस्य पीठमन्त्रं पठित्वा—

अमुकदेवतायोगपीठाय नमः—इति पीठन्यासं विधाय देहात्मके पीठे देवतां ध्यात्वा मानसैरुपचारैः पूजयेत् ।

तत्रायं क्रमः । उक्तपीठन्यासक्रमेण स्वदेहे आधारशक्त्यादियोगपीठान्तं मनसैव संपूज्य तस्मिन् पीठे यथोक्तां देवतां ध्यात्वा—

सोऽहम्—इत्यैक्यं विभाव्य गन्धपुष्पधूपदीपनैवेद्यादीन् मानसोपचारान् समर्प्य मानसहोमं कुर्यात् ।

यथा—

अहङ्कारासत्यपैशून्यकामक्रोधलोभमोहमदमात्सर्यादिरूपं हविर्मनोरूपं स्रुवं सुषुम्णारूपां स्रुचं परिकल्प्य मूलाधारे आत्मान्तरात्मपरमात्मज्ञानात्मरूपचतुःकोणमग्निकुण्डं विचिन्त्य तत्र कुण्डलिनीरूपं प्रज्वलद्वह्निं ध्यात्वा मनसैव मूलमन्त्रमुच्चार्य तदन्ते—

धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा ।
सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥

इति श्लोकं पठित्वा—

पुण्यं जुहोमि स्वाहा—इति प्रथमाहुतिः ।

पुनर्मूलान्ते तमेव श्लोकं पठित्वा—

पापं जुहोमि स्वाहा—इति द्वितीयाहुतिः ।

एवं मूलान्ते तमेव श्लोकं पठित्वा—

कृत्यं जुहोमि स्वाहा—इति तृतीयाहुतिः ।

एवम्—

अकृत्यं स्वाहा—इति चतुर्थाहुतिः ।

संकल्पं जुहोमि स्वाहा—इति पञ्चमाहुतिः

विकल्पं जुहोमि स्वाहा—इति षष्ठाहुतिः ।

धर्मं जुहोमि स्वाहा—इति सप्तमाहुतिः ।

एवमाहुतीर्हुत्वा पूर्णाहुतिं कुर्यात् ।

यथा मूलमन्त्रान्ते—

***प्रकाशामर्षहस्ताभ्यामवलम्ब्योन्मनीस्रुवम् ।**
धर्माधर्मकलास्नेहं पूर्णवह्नौ जुहोम्यहं, स्वाहा ॥

---

* अत्र क्वचित् पाठभेदोऽस्ति तदर्थं द्रष्टव्यमस्यैव ग्रन्थस्य १६१ पृ० ।

इति पूर्णाहुतिं विधाय समस्तोपाधिविनिर्मुक्तं सच्चिदानन्दात्मकमात्मानं स्मृत्वा मूलमन्त्रमष्टोत्तरशतं प्रजप्य तं जपं देवतायै निवेदयेत् । क्वचित् तु होमात् पूर्वं जप उक्तः ।

इत्यन्तर्यागविधिः ।

ततो द्वारपूजोक्तविधिना स्वदक्षिणे सामान्यार्घं संस्थाप्य कलशस्थापनं कुर्यात् ।

तद्यथा स्ववामे—

अस्त्राय फट्—इति सामान्यार्घजलेन भूमिं संप्रोक्ष्य तत्र विन्दुषट्कोणवृत्तचतुरस्रात्मकं मण्डलं विलिख्य मूलान्ते—

अमुकदेवताकलशाधारमण्डलाय नमः—इति संपूज्य—

फट्—इत्याधारं प्रक्षाल्य मूलान्ते—

अमुकदेवताकलशाधारं स्थापयामि नमः—इत्याधारं संस्थाप्य

मँ वह्निमण्डलाय दशकलात्मने नमः—इति संपूज्य पूर्ववत् कलशं प्रक्षाल्य वस्त्रमाल्यादिभिरलङ्कृत्य मूलान्ते—

अमुकदेवताकलशं स्थापययामि नमः—इति संस्थाप्य—

अँ सूर्यमण्डलाय द्वादशकलात्मने नमः—इति संपूज्य मूलमन्त्रमुच्चरन् शुद्धजलेन कलशं पूरयेत् । वामाचारे तु हेतुद्रव्येण पूरयेत् । श्यामारहस्यादौ तु तथा दर्शनात् ।

ततः—

ॐ सोममण्डलाय षोडशकलात्मने नमः—इति तज्जल संपूज्य—

गङ्गे च यमुने चैव—इत्यादिनाऽङ्कुशमुद्रया सूर्यमण्डलात् तीर्थमावाह्यास्त्रेण संरक्ष्य कवचेनावगुण्ठ्य मूलमन्त्रेण संवीक्ष्य तेनैवाभ्युक्ष्य मूलान्ते—

अमुकदेवताकलशामृताय नमः—इति गन्धपुष्पादिभिरभ्यर्च्य मत्स्यमुद्रयाऽऽच्छाद्य—

ॐ कलशस्य मुखे विष्णुः—इत्यादि पठित्वा मूलमन्त्रमष्टधा जपित्वा कुम्भमुद्रां प्रदर्श्य कलशं देवतात्मकं भावयेत् ।

इति कलशस्थापनविधिः ।

ततः शङ्खस्थापनं कुर्यात् ।

तद्यथा कलशाद्दक्षिणे स्ववामे—

अस्त्राय फट्—इति सामान्यार्घजलेन भूमिं संप्रोक्ष्य तत्र त्रिकोणवृत्तचतुरस्रमण्डलं मत्स्यमुद्रया विलिख्य—

ॐ अमुकदेवताशङ्खाधारमण्डलाय नमः—इति गन्धपुष्पाभ्यां मण्डलं संपूज्य चतुरस्रस्याग्नेयादिषु चतुर्षु कोणेषु पुरतो दिक्षु च षडङ्गमन्त्रैः संपूज्य—

फट्—इत्याधारं जलेन प्रक्षाल्य मूलमन्त्रान्ते—

अमुकदेवताशङ्खाधारं स्थापयामि नमः—इत्याधारं संस्थाप्य—

मँ रँ धर्मप्रददशकलात्मने वह्निमण्डलायामुकदेवताशङ्खाधाराय नमः—इत्याधारं संपूज्य पूर्वादितः प्रादक्षिण्यक्रमेण वह्नेर्दशकलाः पूजयेत्।

तद्यथा—

यँ धूम्रार्चिषे नमः।	षँ सुश्रियै नमः।
रँ ऊष्मायै नम।	सँ सुरूपायै नमः।
लँ ज्वलिन्यै नमः।	हँ कपिलायै नमः।
वँ ज्वालिन्यै नमः।	लँ हव्यवाहायै नमः।
शँ विस्फुलिङ्गिन्यै नमः।	क्षँ कव्यवाहायै नमः—इति

अशक्तश्चेत्—

वह्नेर्धूम्रार्चिरादिदशकलाभ्यो नमः—इति पूजयेत्।

ततः शङ्खम्—

फट्—इति प्रक्षाल्य मूलान्ते—

अमुकदेवताशङ्खं स्थापयामि नमः—इत्याधारोपरि शङ्खं संस्थाप्य—

अँ अर्थप्रदद्वादशकलात्मने सूर्यमण्डलायामुकदेवताशङ्खपात्राय नमः—इति शङ्खं संपूज्य शङ्खे षट्कोणं भूविम्बं च संभाव्य षट्कोणेषु षडङ्गमन्त्रैः संपूज्य पूर्वादितः प्रादक्षिण्यक्रमेण सूर्यस्य तपिन्यादिद्वादशकलाः पूजयेत्।

तद्यथा—

कँ भँ तपिन्यै नमः।	घँ पँ मरीच्यै नमः।
खँ बँ तापिन्यै नमः।	ङँ नँ ज्वालिन्यै नमः।
गँ फँ धूम्रायै नमः।	चँ धँ रुच्यै नमः।

छँ दँ सुषुम्णायै नमः ।
जँ थँ भोगदायै नमः ।
झँ तँ विश्वायै नमः ।
ञँ णँ बोधिन्यै नमः ।
टँ ढँ धारिण्यै नमः ।
ठँ डँ क्षमायै नमः—इति ।

अशक्तश्चेत्—

सूर्यस्य तपिन्यादिद्वादशकलाभ्यो नमः—इति पूजयेत् ।

ततो मूलान्ते—

क्षँ हँ सँ षँ शँ वँ लँ रँ यँ मँ भँ बँ फँ पँ नँ धँ दँ थँ तँ णँ ढँ डँ ठँ टँ ञँ झँ जँ छँ चँ ङँ घँ गँ खँ कँ अँः अँ औँ ओँ ऐँ एँ ॡँ ऌँ ॠँ ऋँ ऊँ उँ ईँ इँ आँ अँ ।

इति विलोममातृकावर्णानुच्चार्य—

अमुकदेवताशङ्खममृतेन पूरयामि नमः—इति विमलजलेन शङ्खमापूर्य—

उँ सँ कामप्रदषोडशकलात्मने चन्द्रमण्डलाय नमः—इति गन्धपुष्पादिभिः शङ्खजलं संपूज्य उक्तक्रमेण चन्द्रस्यामृतादिषोडशकलाः पूजयेत् ।

यथा—

अँ अमृतायै नमः ।
आँ मानदायै नमः ।
इँ पूषायै नमः ।
ईँ पुष्ट्यै नमः ।
उँ तुष्ट्यै नमः ।
ऊँ रत्यै नमः ।
ऋँ धृत्यै नमः ।
ॠँ शशिन्यै नमः ।
ऌँ चन्द्रिकायै नमः ।
ॡँ कान्त्यै नमः ।
एँ ज्योत्स्नायै नमः ।
ऐँ श्रियै नमः ।
ओँ प्रीत्यै नमः ।
औँ अङ्गदायै नमः ।
अँ पूर्णायै नमः ।
अँः पूर्णामृतायै नमः—इति ।

अशक्तश्चेत्—

चन्द्रस्यामृतादिषोडशकलाभ्यो नमः—शक्तश्चेत् प्रत्येकमावाह्य प्राणप्रतिष्ठां कृत्वा पाद्यादिभिः पूजयेत् ।

ततो गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वास्तत्र निःक्षिप्य—

ॐ गङ्गे च यमुने चैव—इत्यादिनाऽङ्कुशमुद्रया सूर्यमण्डलात् तीर्थमावाह्य मूलमन्त्रेण तस्मिञ्जले तीर्थं संयोज्य—

वौषट्—इति पुष्पं निःक्षिप्य—

वषट्—इति गालिनीमुद्रां प्रदर्श्य—

वँ—इति धेनुमुद्रयाऽमृतीकृत्य मूलान्ते—

अमुकदेवते इहागच्छ इह तिष्ठ—इति हृदयाद्देवतां तत्रावाह्य वाहनादिमुद्राः प्रदर्श्य षडङ्गमन्त्रैः सकलीकृत्य दिक्षु अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य—

वौषट्—इति संवीक्ष्य शङ्खमुद्रयाऽवष्टभ्य योनिमुद्रया प्रदीप्य मूलमन्त्रेण गन्धपुष्पादिभिरिष्टदेवतां तत्र संपूज्य षडङ्गानि च संपूज्य मत्स्यमुद्रयाऽऽच्छाद्य मूलमन्त्रमष्टधा जपेत्।

इति शङ्खस्थापनविधिः।

ततः शङ्खजलं किंचित् कलशजले निःक्षिप्य सामान्यार्घस्य दक्षिणपार्श्वे पाद्यपात्रार्थं किंचित् स्थलमुक्त्वा प्रोक्षणीपात्रं स्थापयेत्।

तद्यथा—सामान्यार्घोदकेन त्रिकोणवृत्तात्मकं मण्डलं कृत्वा—

नमः—इति प्रपूज्य साधारं प्रोक्षणीपात्रमस्त्रमन्त्रितजलेन प्रक्षाल्य तदुपरि संस्थाप्य—

ॐ गङ्गे च यमुने—इत्यादिना जलेनापूर्य—

नमः—इति गन्धपुष्पाभ्यां संपूज्य प्रणवेन कुशपुष्पयवादिकं प्रक्षिप्य प्रणवेनैव त्रिधाऽभिमन्त्र्य धेनमुद्रां प्रदर्श्य किंचित् सामान्यार्घजलं तज्जले निःक्षिपेत्।

इति प्रोक्षणीपात्रस्थापनविधिः।

ततस्तद्वामपार्श्वे सामान्यार्घस्थापनवत् पाद्यपात्रं संस्थाप्य उशीरगोलोचनाश्यामाकदूर्वाब्जविष्णुक्रान्तादिद्रव्याणि तज्जले निःक्षिप्य तद्वामपार्श्वस्थितसामान्यार्घवामपार्श्वे स्वपुरतो विशेषार्घस्थापनं कुर्यात्।

तद्विधिस्तु—

शङ्खस्थापनवद्गालिन्यादिमुद्राप्रदर्शनस्थाने योन्यादिमुद्राप्रदर्शनम्।
विष्णुविषये तु योनिमुद्रास्थाने धेनुमुद्राप्रदर्शनमिति तत्र विशेषः। अयं च साधारणो विधिः। श्यामादिविद्यायां तु विशेषः।

यथा—सामान्यार्घजलेन विन्दुयुक्तमीकारं तद्बहिस्त्रिकोणं तद्बहिर्वृत्तं तद्बहिः

षट्कोणं तद्बहिश्चतुरस्रं विलिख्य चतुरस्रस्य चतुर्षु कोणेषु स्वाग्रादिप्रादक्षिण्येन पीठचतुष्टयं पूजयेत् ।

यथा—

हँ उड्डियानपीठाय नमः, गँ जालन्धरपीठाय नमः, ॠँ पूर्णगिरिपीठाय नमः, अँ कामरूपीठाय नमः—इति ।

ततस्तेनैव क्रमेण षट्कोणस्य षट्सु कोणेषु षडङ्गमन्त्रैः पूजयेत् ।

ततस्त्रिकोणस्य त्रिषु कोणेषु मूलमन्त्रस्य त्रिभिर्भागैः पूजयेत् । यत्र च विभागासम्भवस्तत्र समस्तेन मूलमन्त्रेणैव त्रिष्वपि कोणेषु पूजयेत् ।

ततो मूलमन्त्रं तद्बीजमात्रं वा उच्चार्य—

अमुकदेवताविशेषार्घाधारशक्तये नमः—इति त्रिकोणमध्यस्थमीकारं संपूज्यास्त्रमन्त्रितजलेनाधारं प्रक्षाल्य मूलान्ते—

अमुकदेवताविशेषार्घाधारं स्थापयामि नमः-इत्याधारं संस्थाप्य-

मँ रँ धर्मप्रददशकलात्मने वह्निमण्डलायामुकदेवताविशेषार्घाधाराय नमः—इत्याधारं संपूज्य शङ्खस्थापनोक्तक्रमेण वह्नेर्धूम्रार्चिरादिदशकला अपि पूजयेत् ।

ततः पूर्ववत् पात्रं प्रक्षाल्य मूलान्ते—

अमुकदेवताविशेषार्घपात्रं स्थापयामि नमः—इति संस्थाप्य—

अँ सूर्यमण्डलायार्थप्रदद्वादशकलात्मनेऽमुकदेवताविशेषार्घपात्राय नमः—इति पात्रं संपूज्य शङ्खस्थापनोक्तक्रमेण सूर्यस्य तपिन्यादिद्वादशकला अपि पूजयेत् ।

ततो मूलमन्त्रान्ते विलोममातृकावर्णान् पठित्वा कलशस्थजलेन विशेषार्घं पूरयेत् । वाममार्गिभिस्तु कुण्डगोलोद्भवस्वयम्भूकुसुमादिद्रव्येण तस्य स्वकल्पोक्तकारणद्रव्येण वा विशेषार्घं पूरणीयम् ।

ततः—

उँ सँ कामप्रदषोडशकलात्मने चन्द्रमण्डलायामुकदेवताविशेषार्घामृताय नमः—इति संपूज्य शङ्खस्थापनोक्तक्रमेण चन्द्रस्यामृताद्याः षोडशकलाः प्रत्येकमर्चयेत् ।

ततः पात्रामृते त्रिकोणवृत्तषट्कोणात्मकं यन्त्रं विलिख्य त्रिकोणस्य त्रिसृषु रेखासु अकारादिषोडशस्वरान् ककारादितकारान्तान् थकारादिसकारान्तान् वर्णान् विलिख्य मध्ये—

हँ लँ क्षँ—इति बीजत्रयं विलिख्य मूलखण्डत्रयेण त्रिकोणमभ्यर्च्य षट्कोणे षडङ्गानि संपूज्य ।

ॐ गङ्गे च यमुने चैव—इत्यादिनाऽङ्कुशमुद्रया सूर्यमण्डलात् तीर्थान्यावाह्य तीर्थमयं विभाव्य गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वास्तत्र निःक्षिप्य वामाचारे तु मीनमुद्रया मांसखण्डं निःक्षिप्य कारणेन पूरितं चेत् कुम्भमुद्रया पूर्वोक्तकुलद्रव्यं संशोध्य निःक्षिपेत् ।

तत आनन्दभैरवीसहितमानन्दभैरवं ध्यात्वा तत्रावाह्य—

*ह् स् क्ष् म् ल् व् र् यूँ आनन्दभैरवाय वषट्,

*स् ह् क्ष् म् ल् व् र् यीँ सुधादेव्यै वौषट्—इति मन्त्राभ्यां गन्धपुष्पादिभिस्तौ समभ्यर्च्य बालाऽयक्षरीमुच्चार्य—

ब्रह्माण्डरससंभूतमशेषरससंभवम् ।
आपूरितं महापात्रं पीयूषरसमावह ॥
अखण्डैकरसानन्दकरे परसुधात्मनि ।
स्वच्छन्दस्फुरणं मन्त्रं निधेह्यकुलरूपिणि ॥
अकुलस्थामृताकारे सिद्धिज्ञानकलेवरे ।
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि ॥
तद्रूपेणैकरस्यं च कृत्वा ह्येतत्स्वरूपिणि ।
भूत्वा परामृताकारा मयि चित्स्फुरणं कुरु ॥

एभिर्मन्त्रैरभिमन्त्र्य पञ्चरत्नानि पूजयेत् ।

यथा—

ग्लूँ गगनरत्नाय नमः, स्लूँ स्वर्गरत्नाय नमः, प्लूँ पातालरत्नाय नम, म्लूँ मर्त्त्यरत्नाय नमः, न्लूँ नागरत्नाय नमः—इति स्वाग्रादिचतुर्दिक्षु मध्ये च पूजयेत् ।

---

* उच्चारणे सुकरत्वात् पृथगक्षरघटितावेव मूले न्यस्तौ वस्तुतः संमिलिताक्षरमन्त्रौ— | ह्स्क्ष्म्ल्व्र्यूँ | स्ह्क्ष्म्ल्व्र्यीँ | इति ।

ततो मूलमन्त्रेण हृदयादिष्टदेवतां तत्रावाह्य आवाहनादिमुद्राः प्रदर्श्य षडङ्गैः सकलीकृत्य अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य—

वँ——इति धेनुमुद्रयाऽमृतीकृत्य योनिमुद्रां प्रदर्श्य मूलेन गन्धपुष्पादिभिः संपूज्य पुष्पाञ्जलित्रयं दत्वा धूपदीपादिनैवेद्यानि दक्षिणमार्गी दक्षिणहस्तेन वाममार्गी चेद्वामहस्तेन मत्स्यमुद्रया वाऽर्घ्यमाच्छाद्य मूलमन्त्रमष्टधा दशधा वा प्रजप्य देवतारूपमर्घ्यं विभाव्य भूतिनीधेनुयोनिमुद्राः प्रदर्शयेत् ।

इति विशेषार्घस्थापनविधिः ।

ताराश्रीविद्यादिविषयेऽप्यनेनैव विधिना विशेषार्घं स्थापयेत् ।

ततो विशेषार्घवामे सामान्यार्घजलेन त्रिकोणं विलिख्य वैष्णवादौ तु वृत्तमात्रं कृत्वा सामान्यार्घवदाचमनीयपात्रस्थापनं कृत्वा जातीलवङ्गकक्कोलादिद्रव्याणि तज्जले निःक्षिपेत् ।

ततस्तद्वामे पूर्ववन्मण्डलं कृत्वा मधुदधिघृतैः पूर्णं मधुपर्कपात्रं संस्थाप्य तद्वामे पुनराचमनीयपात्रमाचमनीयपात्रवत् संस्थाप्य शुद्धजलेन पूरयेत् ।

ततः सर्वाणि पात्राणि मूलमन्त्रेण प्रत्येकमष्टधाऽभिमन्त्र्य धेन्वादिमुद्रां प्रदर्शयेत् ।

ततो दूर्वाकुर्चेन पुष्पादिना वा शङ्खामृतं विशेषार्घामृतं च किंचित् समादाय पात्रान्तरेषु निःक्षिप्य विशेषार्घामृतेनैव पूर्वोक्तमन्त्राभ्यामानन्दभैरवमानन्दभैरवीं च तत्त्वमुद्रया शिरसि सन्तर्प्य शङ्खामृतेन स्वस्वकल्पोक्तान् दिव्यौघसिद्धौघमानवौघान् गुरून् ब्रह्मरन्ध्रे तत्त्वमुद्रयैव सन्तर्प्य स्वगुरुपरमगुरुपरापरगुरुपरमेष्ठिगुरूनपि तर्पयेत् ।

तद्यथा—

श्री-अमुकानन्दनाथश्रीगुरुपादुकां तर्पयामि नमः ।

एवम्—

परमगुरुश्रीपादुकां तर्पयामि नमः, परापरगुरुश्रीपादुकां तर्पयामि नमः, परमेष्ठिगुरुश्रीपादुकां तर्पयापि नमः—

इति त्रिः सकृद्वा तर्पयेत् ।

यत्र वामाचारादौ गुरुपात्रादिकमतिरिक्तमेव स्थापितं तत्र गुरुपात्रीयद्रव्येणैव गुरुपङ्क्तिस्तर्पयेत् ।

ततो विशेषार्घजलेन हृदये मूलदेवतां तर्पयेत् ।

यथा—

मूलमन्त्र——मुच्चार्य—

साङ्गां सपरिवारां सायुधां सवाहनां श्री-अमुकदेवीं तर्प-

यामि नमः—इति त्रिः सकृद्वा संतर्प्य प्रोक्षणीपात्रस्थजलेनात्मानं पूजामण्डल पूजोपकरणानि च मूलमन्त्रास्त्रमन्त्राभ्यां संप्रोक्ष्य धेनुमुद्रां प्रदर्शयेत् ।

ततः पूर्वोक्तपीठन्यासक्रमेण स्वदेहे तत्तत्स्थानेषु गन्धपुष्पादिभिः पीठदेवताः संपूज्य हृत्पद्मकर्णिकामध्य मणिपीठं विभाव्य तत्र देवतां ध्यात्वा देवतारूपमात्मानं विभाव्य मूलमन्त्रेण गन्धपुष्पधूपदीपैश्चतुर्भिरुपचारैर्देवतामभ्यर्च्य मस्तके हृदये मूलाधारे पादयोः सर्वाङ्गेषु चैकैकं पुष्पाञ्जलिं दत्वा मूलमन्त्रमष्टोत्तरशतं यथाशक्ति वा प्रजप्य तज्जपं देवतायै समर्प्य प्रोक्षणीपात्रस्थजलं भूमौ निःक्षिप्य जलान्तरेण पात्रमापूर्य सर्वतोभद्रमण्डलं गन्धपुष्पादिभिः पूजयेत् ।

ॐ सर्वतोभद्रमण्डलाय नमः—इति ।

ततः शालिभिस्तत्कर्णिकामापूर्य तदुपरि तण्डुलपुञ्जं तदुपरि दर्भानास्तीर्य तदुपरि साक्षतं यथोक्तं कूर्चं निधाय पीठपूजां कुर्यात् ।

यथा मण्डलस्योत्तरदिशि—

श्रीगुरुभ्यो नमः, श्रीपरमगुरुभ्यो नमः, श्रीपरापरगुरुभ्यो नमः, श्रीपरमेष्ठिगुरुभ्यो नमः—इति संपूज्य दक्षिणस्यां दिशि—

गँ महागणपतये नमः—इति पूजयेत् ।

ततो भावनया मण्डलस्याधस्तात्—

ॐ अतलादिसप्तपातालेभ्यो नमः ।

ॐ मण्डूकाय नमः,

ॐ कालाग्निरुद्राय नमः,

ऊर्ध्वोर्ध्वक्रमेण—

ॐ आधारशक्तये नमः,

ॐ मूलप्रकृतये नमः,

ॐ कूर्माय नमः,

ॐ अनन्ताय नमः,

ॐ वराहाय नमः,

ॐ पृथिव्यै नमः,

ॐ अमृतार्णवाय नम,

ॐ रत्नद्वीपाय नमः,

ॐ मणिमण्डपाय नमः—इति संपूज्य मण्डलस्य चतुर्दिक्षु मध्ये च—

ॐ कल्पवृक्षेभ्यो नमः—भावनया तेषामधस्तात्—

ॐ मणिवेदिकायै नमः—तदुपरि—

ॐ रत्नसिंहासनाय नमः——आग्नेयादिषु चतुर्षु कोणेषु—

ॐ धर्माय नमः,
ॐ ज्ञानाय नमः,
ॐ वैराग्याय नमः,
ॐ ऐश्वर्याय नमः,

दिक्षु पूर्वादिक्रमेण—

ॐ अधर्माय नमः,
ॐ अज्ञानाय नमः,
ॐ अवैराग्याय नमः,
ॐ अनैश्वर्याय नमः,

मध्ये ऊर्ध्वोर्ध्वक्रमेण—

ॐ आनन्दकन्दाय नमः,
ॐ सविन्नालाय नमः,
ॐ सर्वतत्त्वात्मकपद्माय नमः,
ॐ प्रकृतिमयपत्रेभ्यो नमः,
ॐ विकारमयकेशरेभ्यो नमः,
ॐ पञ्चाशद्वर्णबीजाढ्यकर्णिकायै नमः——कर्णिकायाम्।
अँ सूर्यमण्डलाय द्वादशकलात्मने नमः,
ॐ सोममण्डलाय षोडशकलात्मने नमः,
मँ वह्निमण्डलाय दशकलात्मने नमः,
सँ सत्त्वाय नमः,
रँ रजसे नमः,
तँ तमसे नमः,
आँ आत्मने नमः,
अँ अन्तरात्मने नमः,
पँ परमात्मने नमः,
ह्रीँ ज्ञानात्मने नमः,

इति संपूज्य पद्मस्य केशरेषु मध्ये च पूर्वादिक्रमेण तत्तत्कल्पोक्तपीठशक्तीः पूजयेत्।

ततः पीठमन्त्रं पठित्वा—

अमुकदेवतायोगपीठाय नमः——इति मध्ये पूजयेत्।

ततो मूलमन्त्रमुच्चार्य—

अमुकदेवतापीठस्य मूर्त्तिं कल्पयामि नमः——इति पीठमध्ये गन्धपुष्पादिकं निःक्षिपेत्।

ततस्तस्मिन् मण्डले पूर्वादितः प्रादक्षिण्येन वह्नेर्दशकला गन्धपुष्पादिभिः प्रत्येकं पूजयेत् ।

ततः स्वर्णादिरचितं यथोक्तं कुम्भमादाय—

फट्—इति शुद्धजलेन संप्रोक्ष्य चन्दनेनोपलिप्य—

हुँ—इति कवचमन्त्रमुच्चरन्नभितस्त्रिगुणात्मकसूत्रेण संवेष्ट्य चन्दनागुरुकर्पूरैः प्रधूप्य गन्धपुष्पादिभिरभ्यर्च्य नवरत्नान्युदरे निःक्षिप्य दूर्वाचन्दनाक्षतयुक्तं कूर्चमुपरि विन्यस्य—

प्रणवम्—उच्चरन् पीठे कुम्भं स्थापयेत् ।

ततः कुम्भे पूर्वादिप्रादक्षिण्यक्रमेण सूर्यस्य तपिन्यादिद्वादशकलाः संपूज्य कुम्भपीठयोरात्मकुम्भयोश्चैक्यं विभाव्य मातृकावर्णान् प्रातिलोम्येन पठित्वा तदन्ते मूलमन्त्रमुच्चार्य* पञ्चाशदौषधीक्वाथेन क्षीरिद्रुमकषायेण पलाशत्वग्भवेन गन्धपुष्पसुवासिततीर्थजलेन वा देवताबुद्ध्या कुम्भं पूरयेत् ।

ततः कुम्भजले पूर्वादितः प्रादक्षिण्येन चन्द्रस्यामृतादिषोडशकलाः संपूज्यौषधीक्वाथेन गन्धपुष्पसुवासिततीर्थोदकेन वा शङ्खान्तरमापूर्य तज्जले गन्धाष्टकं विलोड्य वह्नेर्धूम्रार्चिरादिदशकलास्तत्रावाह्य—

आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँः हंसः सोऽहं वह्नेर्धूम्रार्चिरादिदशकलानां प्राणा इह २ स्थिताः—एवम्—

जीव इह २ स्थितः—एवम्—

सर्वेन्द्रियाणि—इत्यादिप्राणप्रतिष्ठां कृत्वा—

वह्नेर्धूम्रार्चिरादिदशकलाभ्यो गन्धं नमः—इत्यादिपञ्चोपचारैः संपूज्य शङ्खस्थापनोक्तक्रमेण—

यँ धूम्रार्चिषे नमः—इत्यादिप्रत्येकं गन्धपुष्पादिभिः संपूज्य अनेनैव प्रकारेण सूर्यस्य तपिन्यादिद्वादशकलाश्चन्द्रस्यामृतादिषोडशकलाश्चावाह्याभ्यर्च्य पञ्चाशत् कलाः पूजयेत् ।

तद्यथा—

†**हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्**—इति वैदिकमन्त्रेण सृष्ट्यादिदशकला आवाह्य—

---

* तदर्थं द्रष्टव्यमस्यैव ग्रन्थस्य पृ० २१३ ।

† वाजसनेयिसंहितायाः १० अ० २४ मन्त्रः ।

ॐ सृष्ट्यादिदशकलाभ्यो नमः—इति पञ्चोपचारैः सपूज्य गन्धपुष्पादिभिः प्रत्येकं पूजयेत् ।

यथा—

कँ सृष्ट्यै नमः ।
खँ ऋद्ध्यै नमः ।
गँ स्मृत्यै नमः ।
घँ मेधायै नमः ।
ङँ कान्त्यै नमः ।
चँ लक्ष्म्यै नमः ।
छँ धृत्यै नमः ।
जँ स्थिरायै नमः ।
झँ स्थित्यै नमः ।
ञँ सिद्ध्यै नमः ।

इति संपूज्य—

[*]ॐ प्रतद्विष्णुः स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वाः—इति मन्त्रेण जरादिदशकला आवाह्य प्राणप्रतिष्ठादिकं कृत्वा—

ॐ जरादिदशकलाभ्यो नमः—इति पञ्चोपचारैः संपूज्य प्रत्येकं पूजयेत् ।

यथा—

टँ जरायै नमः ।
ठँ पालिन्यै नमः ।
डँ क्षान्त्यै नमः ।
ढँ ईश्वर्यै नमः ।
णँ रत्यै नमः ।
तँ कामिकायै नमः ।
थँ वरदायै नमः ।
दँ ह्लादिन्यै नमः ।
धँ प्रीत्यै नमः ।
नँ दीर्घायै नमः ।

इति संपूज्य—

[†]त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्—इति मन्त्रेण तीक्ष्णादिदशकला आवाह्य—

---

[*] वाजसनेयिसंहितायाः ५ अ० २० मन्त्रः ।

[†] वाजसनेयिसंहितायाः ३ अ० ६० मन्त्रः ।

ॐ तीक्ष्णादिदशकलाभ्यो नमः—इति पञ्चोपचारैः संपूज्य प्रत्येकं पूजयेत् ।

यथा—

पँ तीक्ष्णायै नमः ।
फँ रौद्र्यै नमः ।
बँ भवायै* नमः ।
भँ निद्रायै नमः ।
मँ तन्द्रायै नमः ।
यँ क्षुधायै नमः ।
रँ क्रोधिन्यै नमः ।
लँ क्रियायै नमः ।
वँ उत्कारिण्यै नमः ।
शँ मृत्यवे नमः ।

इति संपूज्य—

†ॐ तद्विष्णोः परमं पदꣳसदा पश्यन्ति सूरयः दिवीव चक्षुराततम्—इति मन्त्रेण गायत्र्या वा पीताद्याश्चतुष्कलाः पूर्ववदावाह्य पूजयेत् ।

यथा—

षँ पीतायै नमः ।
सँ दारुणायै नमः ।
हँ असितायै नमः ।
क्षँ अनन्तायै नमः ।

इति संपूज्य—

ॐ तद्विप्रासो विपन्यवो जागृवाꣳसः समिधन्ते । विष्णोर्यत् परमं पदम् ।

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंषतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥

इति मन्त्रेण निवृत्यादिषोडशस्वरकला आवाह्य प्राणप्रतिष्ठादिकं कृत्वा पञ्चोपचारैः संपूज्य प्रत्येकं पूजयेत् ।

---

* बँ मयायै नमः—इत्यपि ३ पु० पा० ।

† वाजसनेयिसंहितायाः ६ अ० ५ मन्त्रः ।

यथा—

अँ निवृत्त्यै नमः ।
आँ प्रतिष्ठायै नमः ।
इँ विद्यायै नमः ।
ईँ शान्त्यै नमः ।
उँ इन्धिकायै नमः ।
ऊँ दीपिकायै नमः ।
ऋँ रेचिकायै नमः ।
ॠँ मोचिकायै नमः ।
लृँ परायै नमः ।
ॡँ सूक्ष्मायै नमः ।
एँ सूक्ष्मामृतायै नमः ।
ऐँ ज्ञानामृतायै नमः ।
ओँ आप्यायिन्यै नमः ।
औँ व्यापिन्यै नमः ।
अँ व्योमरूपायै नमः ।
अँः अनन्तायै नमः ।

इति संपूज्य कलात्मकं तच्छङ्खस्थं जलं कुम्भे निःक्षिपेत् ।

ततोऽश्वत्थपनसचूतादिपल्लवैरिन्द्रवल्लीवेष्टितैः कल्पवृक्षधिया कुम्भवक्त्रं पिधाय तस्मिन् कुम्भमुखे सफलाक्षतं चषकं कल्पवृक्षफलधिया स्थापयेत् ।

ततः क्षौमवस्त्रयुग्मेन कुम्भं संवेष्ट्य वेदिकाया अधस्तात् पूर्वादिचतुर्दिक्षु द्वारसमीपेऽष्टदलमण्डलानि कृत्वा तेषु शालिपुञ्जान् निधाय तदुपरि पूर्णकलशान् संस्थाप्य तेषु पूर्वादिक्रमेण—

ध्रुवधरावागीशविघ्नेशान्—आवाह्य पञ्चोपचारैः संपूज्य तेनैव प्रकारेणाग्नेयादिकोणेषु कलशान् संस्थाप्य तेषु—

अमृतदुर्जयसिद्धार्थमङ्गलान्—आवाह्य पूजयेत् ।

पुनः पूर्वादिष्वष्टदिक्षु कलशान्तराणि संस्थाप्य तेषु—

इन्द्रादिलोकपालान्—अभ्यर्च्य तत्पुरतः—

ऐरावतपुण्डरीकवामनकुमुदोञ्जनपुष्पदन्तसार्वभौमसुप्रतीकाख्यान्—अष्टदिग्गजानपि पूजयेत् ।

ततः प्रधानकलशे मूलदेवतार्चनं कुर्यात् ।

तत्रादौ मूलमन्त्रमुच्चार्य-

अमुकदेवतायाः मूर्त्तिं कल्पयामि नमः—इति गन्धपुष्पादिभिर्मूर्त्तिं परिकल्प्यावाहनं कुर्यात् ।

तद्यथा-त्रिखण्डामुद्रान्तः पुष्पं निधाय देवतां ध्यात्वा त्रिः सकृद्वा मूलमन्त्रमुच्चार्य—

भगवत्यमुकदेवते इहागच्छागच्छ—इत्युक्त्वा सुषुम्णामार्गेण हृदयाम्भोजात् पुष्पाञ्जलौ देवतामानीय मूलमन्त्रमुच्चार्य आवाहनमुद्रया मूर्त्तौ स्थापयेत्।

ततः संस्थापनमुद्रया मूलान्ते—

अमुकदेवते इह तिष्ठ तिष्ठ—इत्युक्त्वा—

देवेश भक्तिसुलभ सर्वावरणसंयुतम्।
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरो भव॥

इति संप्रार्थ्य पुनर्मूलमुच्चार्य सन्निधापनमुद्रया—

अमुकदेवते इह सन्निधेहीह सन्निधेहि—इति सन्निधापनं कृत्वा पूर्ववन्मूलमन्त्रमुच्चार्य—

अमुकदेवते इह सन्निरुद्धा भव २—इति सन्निरोधनमुद्रां प्रदर्श्य संमुखीकरणमुद्रया मूलान्ते—

अमुकदेवते संमुखीकृता भव २—इति संमुखीकृत्य पुनर्मूलमुच्चार्य—

अमुकदेवते अवगुण्ठिता भव २—इत्यवगुण्ठनमुद्रयाऽवगुण्ठ्य देवताया हृदयाद्यङ्गेषु षडङ्गमन्त्रान् विन्यस्य मूलमुच्चार्य—

अमुकदेवते सकलीकृता भव २—इति सकलीकृत्यामृतीकरणं कुर्यात्।

यथा—मूलमन्त्रेण दीपिनीमन्त्रेण अकारादिक्षकारान्तैर्मातृकावर्णैश्च त्रिधा त्रिधा धेनुमुद्रयाऽर्घ्योदकेनामृतवर्षणबुद्ध्या देवतामूर्द्धि सिञ्चेत्। इयमेव 'देवताशुद्धि'रित्युच्यते।

दीपिनीमन्त्रश्च—

ऐँ वद २ वाग्वादिनि ऐँ क्लीँ क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु २ क्लीँ सौँ मोक्षं कुरु २ ह्सौँ स्हौँ—इति।

ततो मूलमुच्चार्य धेनुमुद्रयैव—

अमुकदेवते अमृतीकृता भव २—इत्यमृतीकृत्य महामुद्रां बध्वा देवतामस्तके परमामृतवर्षणधिया मूलमन्त्रमुच्चार्य—

अमुकदेवते परमीकृता भव—इति ब्रूयात्।

अशक्तश्चेत् सर्वत्र मूलमन्त्रमुच्चार्य—

आवाहिता भव, स्थापिता भव, सन्निहिता भव, सन्निरुद्धा भव, संमुखीकृता भव, अवगुण्ठिता भव, सकलीकृता भव, अमृतीकृता भव, परमीकृता भव—इत्यावाहनादिमुद्राः प्रदर्शयेत्।

ततः प्राणशक्तिन्यासं कुर्यात्।

अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि च्छन्दांसि प्राणशक्तिर्देवता आँ बीजं ह्रीँ शक्तिः क्रौँ कीलकममुकदेवताप्राणप्रतिष्ठायां विनियोगः।

ब्रह्मविष्णुमहेश्वरेभ्य ऋषिभ्यो नमः—शिरसि।

ऋग्यजुःसामभ्यश्छन्दोभ्यो नमः—मुखे।

प्राणशक्त्यै देवतायै नमः—हृदि।

आँ बीजाय नमः—गुह्ये।

ह्रीँ शक्तये नमः—पादयोः।

क्रौँ कीलकाय नमः—नाभौ।

अमुकदेवताप्राणप्रतिष्ठायां विनियोगः—इति सर्वाङ्गे व्यापकम्।

ॐ आँ ह्रीँ क्रौँ अँ कँ खँ गँ घँ ङँ आकाशवायुतेजोजलपृथिव्यात्मने आँ अङ्गुष्ठाभ्यां नमः।

ॐ आँ ह्रीँ क्रौँ इँ चँ छँ जँ झँ ञँ शब्दस्पर्शरूपरसगन्धात्मने ईँ तर्जनीभ्यां स्वाहा।

ॐ आँ ह्रीँ क्रौँ उँ टँ ठँ डँ ढँ णँ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊँ मध्यमाभ्या वषट्।

ॐ आँ ह्रीँ क्रौँ एँ तँ थँ दँ धँ नँ वाक्पाणिपादपायूपस्थात्मने ऐँ अनामिकाभ्यां हुँ।

ॐ आँ ह्रीँ क्रौँ ओँ पँ फँ बँ भँ मँ वचनादानगमनवि-

सर्गानन्दात्मने औँ कनिष्ठिकाभ्यां वौषट् ।

ॐ आँ ह्रीँ क्रौँ अँ यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँ मनोबुद्ध्यहङ्कारात्मने अँः करतलकरपृष्ठाभ्यां फट् ।

एवं हृदयादिषडङ्गन्यासं विधाय—

आँ नमः—नाभेरधः ।

ह्रीँ नमः—कण्ठादधः ।

क्रौँ नमः—शिरसोऽधो व्यापकं विधाय हृत्पद्मस्य पूर्वादिदलेषु कर्णिकायां च—

लँ नमः, रँ नमः, हँ नमः, षँ नमः, वँ नमः, यँ नमः, सँ नमः, शँ नमः, क्षँ नमः—इति क्रमेण विन्यस्य ध्यायेत् ।

ध्यानं यथा—

रक्ताब्धियोतारुणपद्मसंस्थां
पाशाङ्कुशाविक्षुशरासबाणान् ।
शूलं कपालं दधतीं कराब्जै
रक्तां त्रिनेत्रां प्रणमामि देवीम् ॥

इति ध्यात्वा मृगमुद्रया पुष्पादिना देवताया हृदयं स्पृष्ट्वा प्राणप्रतिष्ठां कुर्यात् ।

तन्मन्त्रो यथा—

ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ सः सोहं मूलान्ते अमुकदेवतायाः प्राणा इह २ स्थिताः ।

एवम्—

जीव इह २ ।

एवम्—

सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

प्रणवं मूलमन्त्रं वा त्रिवारं जप्त्वा देवतामूर्त्तौ मूलमन्त्रस्य ऋष्यादिकरषडङ्गन्यासान् विधाय स्वस्वकल्पोक्तमुद्राः प्रदर्श्योपचारान् समर्पयेत् ।

तत्र प्रथमतः—

देवेदमासनं रम्यं मया तुभ्यं प्रकल्पितम् ।
भवैतस्मिन्निषण्णा त्वं यावत् पूजां करोम्यहम् ॥

इत्युक्त्वा मूलमन्त्रमुच्चार्य—

अमुकदेवतायै इदमासनं नमः—इति देवस्य वामभागे आसनं दद्यात् ।

ततः साङ्गां सावरणां सायुधां देवतां पूजार्थमागतां ध्यात्वा मूलान्ते—

अमुकदेवते स्वागतम्—इति तन्मुद्रया स्वागतं परिकीर्त्य—

इदं श्यामाकदूर्वाब्जविष्णुक्रान्तासमन्वितम् ।
पाद्यं गृहाण देवेश तीर्थतोयैः प्रकल्पितम् ॥

इत्युक्त्वा मूलान्ते—

अमुकदेवतायै पाद्यं नमः—इति पाद्यपात्रस्थजलेन पादयोः पाद्यं दद्यात् ।

गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ।
दूर्वाभिश्च समायुक्त एषोऽर्घः प्रतिगृह्यताम्—इत्युक्त्वा मूलमुच्चार्य—

अमुकदेवतायै अर्घ्यं स्वाहा—इति हस्तयोः शिरसि चार्घं दद्यात् ।

जातीलवङ्गककोलकर्पूरादिसुवासितम् ।
गृहाण देवदेवेश एतदाचननीयकम्—इत्युक्त्वा—

मूलान्ते—

अमुकदेवतायै इदमाचमनीयं स्वधा—इति वा मुखे आचमनीयं तत्पात्रस्थजलेन दद्यात् ।

आज्येन मधुना दध्ना त्वदर्थं परिकल्पितम् ।
गृहाण कांस्यपात्रस्थं मधुपर्कं सुरेश्वर—इति पठित्वा मूलमन्त्रमुच्चार्य—

अमुकदेवतायै मधुपर्कं स्वधा—इति मुखे मधुपर्कं दद्यात् ।

ततः पुनराचमनीयपात्रस्थजलेनाचमनीयवत् पुनराचमनीयं दत्त्वा—

तिलतैलसमायुक्तं सुगन्धिद्रव्यनिर्मितम् ।
उद्वर्तनमिदं देव गृहाण त्वं प्रसीद मे—इति श्लोकान्ते मूलमन्त्रमुच्चार्य—

अमुकदेवायै तत्सुगन्धितैलसंयुक्तमुद्वर्त्तनं नमः—इत्युद्वर्त्तनं निवेद्य—

गव्यं क्षीरं दधि घृतं शर्कराक्षौद्रसंयुतम् ।
पञ्चामृतं यदेतच्च तेन त्वां स्नापयाम्यहम्—इति पठित्वा मूलमुच्चार्य पञ्चामृतेन—

अमुकदेवतां स्नापयामि नमः—इति पृथग्युगपदेव वा संस्नाप्य—

अन्यादिवेदितं तोयं प्रकृतिस्थं सुशीतलम् ।
सुगन्धिद्रव्यसंयुक्तं स्नानार्थं प्रतिगृह्यताम्—इत्युक्त्वा मूलान्ते-

अमुकदेवतायै स्नानं नमः, अमुकदेवतां स्नापयामि नमः—इति वा शङ्खोदकेन स्नानं कारयेत्। शैवे तु शङ्खोदकनिषेधादर्घोदकेनैव स्नापनम्

ततो मूलान्ते—

अमुकदेवतायै पुनराचमनीयं स्वधा—इति ।

वँ—इति वा पुनराचमनीयं तत्पात्रस्थजलेन दद्यात् ।

तत्तत्पात्राभावे तु शङ्खादिजलेनैव पाद्यादि दद्यात् ।

ततः—

इमे सुसूक्ष्मे मृदुनी कीटकोशसमुद्भवे ।
कृपया देवदेवेश परिधत्स्व सुवाससी—इति पठित्वा मूलमुच्चार्य—

अमुकदेवतायै वस्त्रं निवेदयामि नमः—इति क्षौमादिवस्त्रयुग्मं दिवेद्य मूलान्ते—

अमुकदेवतायै यज्ञोपवीतं नमः—इति यज्ञोपवीतं निवेद्य—

सौवर्णाभरणं दिव्यं मुक्तारत्नोपशोभितम् ।
रमणीयमिदं देव गृहाण प्रीतिमावह—इति पठित्वा मूलमन्त्रान्ते-

अमुकदेवतायै स्वर्णादिघटितान्याभरणानि निवेदयामि—

इत्याभरणानि निवेद्य—

कुरङ्गमदकर्पूररोचनादिसमन्वितम् ।
गृहाण मलयोत्पन्नमेतत् सुरभिचन्दनम्—इति पठित्वा—

मूलमुच्चार्य—

अमुकदेवतायै गन्धं नमः—इति गन्धं निवेद्य—

नानाविधानि चैतानि जलस्थलरुहाणि च ।
सुगन्धीनि सुपुष्पाणि गृहाण जगदीश्वर—इत्युक्त्वा—

मूलमन्त्रान्ते—

अमुकदेवतायै पुष्पाणि वौषट्—इति । नमः—इति वा पुष्पाणि निवेदयेत् । स्त्रीदेवते तु देवेत्यादौ देवीत्यादि पठनीयम् ।

ततः पूजां कुर्यात् ।

यथा—मूलमन्त्रमुच्चार्य—

श्रीपादुकां पूजयामि नमः—इति पुष्पाञ्जलिना त्रिवारमभ्यर्च्य मूलमन्त्रपुटितैर्मातृकावर्णैर्देवतायास्तत्तत्स्थानेषु संपूज्य परिवारार्चनार्थमाज्ञामादायावरणपूजां कुर्यात् ।

यथा—

तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः ।
वरदाभयधारिण्यः प्रधानतनवः स्त्रियः ॥
अग्नीशासुरवायव्यमध्यदिक्षु क्रमात् स्थिताः ।

इत्यङ्गदेवता ध्यात्वा अग्नीशासुरवायव्यकोणेष्वग्रेर्दिक्षु च क्रमेणाङ्गदेवताः पूजयेत् ।

ततो वायव्ये पुरत ईशाने च गुर्वोघत्रयं च संपूज्य वायव्यादीशानपर्यन्तम्—

ॐ श्रीगुरुभ्यो नमः ।
ॐ श्रीपरमगुरुभ्यो नमः ।
ॐ श्रीपरापरगुरुभ्यो नमः ।
ॐ श्रीपरमेष्ठिगुरुभ्यो नमः ।

इति गुरुपङ्क्तीः पूजयेत् ।

त्रिपुरादिविषये तु—

ऐँ ह्रीँ श्रीगुरुभ्यो नमः । गुरुपादुकाभ्यो नमः—इत्येवं पूजयेत् ।

ततः स्वकल्पोक्तपरिवारदेवताः संपूज्य पूर्वादिषु इन्द्रादिदशलोकपालान् पूजयेत् ।

यथा—

लँ इन्द्राय नमः ।
रँ अग्नये नमः ।
मँ यमाय नमः ।
क्षँ नैर्ऋताय नमः ।
वँ वरुणाय नमः ।
यँ वायवे नमः ।
सँ कुवेराय नमः ।
हँ ईशानाय नम ।
आँ ब्रह्मणे नमः—ऊर्ध्वम् ।
अँ अनन्ताय नमः—अधः ।

इति संपूज्य वज्रादिदशशस्त्राणि पूजयेत् ।

तद्यथा—

वँ वज्राय नमः ।
शँ शक्तये नमः ।
दँ दण्डाय नमः ।
खँ खड्गाय नमः ।
पँ पाशाय नमः ।
अँ अङ्कुशाय नमः ।
गँ गदायै नमः ।
शँ शूलाय नमः ।
पँ पद्माय नमः—ऊर्ध्वम् ।
चँ चक्राय नमः—अधः ।

इति गन्धपुष्पादिभिः संपूज्य पुनर्मूलमन्त्रमुच्चार्य—

साङ्गायै सवाहनायै सालङ्कारायै सायुधायै सपरिवारायै श्री-अमुकदेवतायै श्रीपादुकां पूजयामि नमः—इति त्रिः सकृद्वा संपूज्य मूलमन्त्रमुच्चार्य तत्त्वमुद्रया—

अमुकदेवतां तर्पयामि नमः—इति त्रिवारं तर्पयेत् ।

ततो धूपपात्राग्नौ धूपं निधायास्त्रमन्त्रेण संप्रोक्ष्य—

नमः—इति गन्धपुष्पाक्षतैः संपूज्य मूलमन्त्रेणाभिमन्त्र्य धेनुमुद्रयाऽमृतीकृत्य—

ॐ जयध्वनिमन्त्रमातः स्वाहा—इति मन्त्रेणास्त्रेण वाद्यघण्टां संपूज्य वामहस्तेन तां वादयन्—

वनस्पतिरसोद्भूतो गन्धाढ्यसुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्—इति पठित्वा—

मूलमन्त्रान्ते—

अमुकदेवतायै धूपं निवेदयामि—इति नीचैर्धूपं निवेद्य देवस्य वामभागे पुरतो वा स्थापयेत् ।

ततो दीपपात्रे दीपं प्रज्वाल्य धूपवत् संस्कृत्य घण्टां वादयन्—

सुप्रकाशो महादीपः सर्वत्र तिमिरापहः ।
सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम्—इति पठित्वा

मूलान्ते—

अमुकदेवतायै दीपं निवेदयामि—इति दीपं निवेद्य देवस्य दृष्टिपर्यन्तमुत्तोल्य परिभ्राम्य घृतयुक्तं चेद्दक्षिणे तैलयुक्तं चेद्वामे सिता वर्त्तिश्चेद्दक्षिणे रक्ता वर्त्तिश्चेद्वामे दीपं स्थापयेत् । पुरतस्तु न नियमः ।

ततो देवतायाः पुरतः सामान्यार्घजलेन भूमिं संप्रोक्ष्य चतुरस्रमण्डलं कृत्वा तत्र स्वर्णादिनिर्मितं साधारं नैवेद्यपात्रं संस्थाप्य तस्मिन् पात्रे यथोक्तं यथासम्भवं वा नैवेद्यं विधायास्त्रमन्त्रेण संप्रोक्ष्य चक्रमुद्रया संरक्ष्य—

यँ—इति वायुबीजेन संशोष्य—

रँ—इति वह्निबीजेन संदह्य दक्षकराग्रेण स्पृष्ट्वा—

वँ—इति वरुणबीजमुच्चरन् धेनुमुद्रयाऽमृतीकृत्य मूलमन्त्रेणाष्टधा कराभ्यामभिमन्त्र्य धेनुमुद्रां प्रदर्श्य—

नमः—इति गन्धपुष्पादिभिरभ्यर्च्य मूलमन्त्रेण पुष्पाञ्जलित्रयं देवतायै दत्वा—

नैवेद्यं षड्रसोपेतं चतुर्विधमिदं तव ।
स्थापितं पुरतो भक्त्या गृहाण तुष्टिमावह ॥
हेमपात्रस्थितं दिव्यं परमान्नं सुसंस्कृतम् ।
पञ्चषड्रससंयुक्तं गृहाण मम सिद्धये—

इति पठित्वा नैवेद्यपात्रं कराभ्यां स्पृष्ट्वा मूलमन्त्रमुच्चार्य—

अमुकदेवतायै इदं यथासम्भवं निवेदयामि नमः स्वाहा-

इति दक्षिणहस्तेन जलमादाय नैवेद्यं समर्पयेत् ।

ततो देवस्य दक्षिणहस्ते—

ॐ अमृतोपस्तरणमसि स्वाहा—इति जलं दत्वा वामहस्तेन विकचोत्पलनिभां ग्रासमुद्रां प्रदर्श्य दक्षिणहस्तेनोक्तमुद्राभिः—

ॐ प्राणाय स्वाहा,
ॐ अपानाय स्वाहा,
ॐ उदानाय स्वाहा,
ॐ व्यानाय स्वाहा,
ॐ समानाय स्वहा—

इति पञ्चप्राणाहुतीर्हुत्वा पात्रान्तरे जलं निधाय धेनुमुद्रयाऽमृतीकृत्य—

नमस्ते देवदेवेश सर्वतृप्तिकरं वरम् ।
अन्यानिवेदितं शुद्धं प्रकृतिस्थं सुशीतलम् ॥
परमानन्दसंपुर्णं गृहाण जलमुत्तमम्—इत्युक्त्वा देवताया वामभागे जलपात्रं निवेश्य मूलेन पुष्पाञ्जलिं दत्वाऽस्त्रमन्त्रेण दिग्बन्धनं विधाय देवतायाः परितो यवनिकां कृत्वा—

अमृतात्मकनैवेद्यं नमः—इत्युच्चार्य धेनुमुद्रां प्रदर्श्य भुञ्जानां देवतां स्मृत्वाऽष्टोत्तरशतं दशधा वा मूलमन्त्रं प्रजप्य—

ॐ अमृतापिधानमसि स्वाहा—इति जलं दद्यात् ।

ततो दक्षिणे स्थण्डिलं कृत्वा वक्ष्यमाणप्रकारेणाग्निं संस्थाप्य तस्मिन्नग्नौ देवतामावाह्य पाद्यादिभिर्गन्धपुष्पादिभिश्च संपूज्य घृतयुक्तेन पायसेन वैश्वदेवाख्यं होमं कुर्यात् ।

तत्र प्रथमं सप्रणवाभिर्व्याहृतिभिर्हुत्वा मूलमन्त्रेण पञ्चविंशत्याहुतीर्दद्यात् ।

पुनर्व्याहृतिभिर्हुत्वा पञ्चोपचारैर्देवतां संपूज्य पीठमूर्त्तौ तां संयोज्य वह्निं विसृजेत् ।

ततः शिष्टेन पायसेन—

ॐ अमुकदेवतायाः पार्षदेभ्य एष बलिर्नमः—इति पार्षदेभ्यो गन्धपुष्पाक्षतसहितं बलिं विसृजेत् ।

ततो यवनिकामुद्धाट्य देवेन यथेष्टं भुक्तं नैवेद्यं सम्भाव्य नैवेद्यपात्रं नैर्ऋतेयदिशि संस्थाप्य नैवेद्यस्थानमस्त्रमन्त्रेण गोमयाद्भिः संशोध्य देवोच्छिष्टं किंचित् समादाय—

ॐ निर्माल्यभोजिने नमः—इत्यैशान्यां दिशि क्षिपेत् ।

ततो हस्तौ प्रक्षाल्य ताम्बूलमादाय पुरतः संस्थाप्य—

एलालवङ्गखदिरचूर्णपूगादिसंयुतम् ।

ताम्बूलं देवदेवेश गृहाण त्वं प्रसीद मे—इति पठित्वा—

मूलान्ते—

अमुकदेवतायै इदं ताम्बूलं निवेदयामि स्वाहा—इति निवेद्य मूलेन गन्धपुष्पादिभिस्त्रिवारं पूजयेत् ।

ततो दर्पणं प्रदर्श्य छत्रचामरादिकं निवेद्य शक्तिविषये तु स्वकल्पोक्तमन्त्रेण देवतायै माषभक्तादिवलिं दत्वा आग्नेयादिषु पूर्वदक्षिणोत्तरपश्चिमभागेषु वा यथाक्रमं 'गणेशवटुकक्षेत्रपालयोगिनीभ्यो' वलिं दद्यात् ।

तत्र क्रमस्तु—
मण्डलानि कृत्वा वलिपात्राणि संस्थाप्य—

गँ गणेशाय वलिमूर्त्तये नमः—इत्यादिमन्त्रेण वलिं संपूज्य—

गाँ गणेशाय नमः ।
वाँ वटुकाय नमः ।
क्षाँ क्षेत्रपालाय नमः ।
याँ योगिनीभ्यो नमः ।

इति मन्त्रैर्गन्धपुष्पादिभिस्तानभ्यर्च्य—

गाँ गीँ गूँ गणपतये वर वरद सर्वजनं मे वशमानय वलिं गृह्ण २ स्वाहा—एष वलिर्गणपतये नमः—

इति गणेशाय वलिं दत्वा—

एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभार भासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान् नाशय सर्वोपचारसहितं वलिं गृह्ण २ स्वाहा—एष वलिं वटुकाय नमः—इति वटुकाय वलिं दत्वा—

क्षाँ क्षीँ क्षूँ क्षैँ क्षौँ क्षः क्षेत्रपालाय धूपदीपादिसहितं वलिं गृह्ण २ स्वाहा—एष वलिः क्षेत्रपालाय नमः—इति क्षेत्रपालाय वलिं दत्वा—

याँ योगिनीभ्यः स्वाहा—

ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा
पाताले वाऽनले वा सलिलपवनयोर्यत्र तत्र स्थिता वा ।
क्षेत्रे पीठोपपीठादिषु च कृतपदाः पुष्पधूपादिकेन
प्रीता देव्यः सदा नः शुभविधि*वलिना पान्तु वीरेन्द्रवन्द्याः ॥

एष वलिर्योगिनीभ्यो नमः—इति योगिनीभ्यो वलिं दद्यात् ।

वैष्णवादौ तु भूतवलिमात्रम् ।

ततो भूतवलिं दद्यात् ।

तद्यथा—

ईशाने मण्डलं कृत्वा अन्नव्यञ्जनपुष्पाक्षतजलादियुक्तं साधारं वलिपात्रं संस्थाप्य तत्र—

ॐ सर्वेभ्यो भूतेभ्यो नमः—इति गन्धपुष्पादिभिः संपूज्य—

ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ।
योगिन्योऽप्युग्ररूपाश्च गणानामधिपाश्च ये ॥
भूचराः खेचराश्चैव ये तिष्ठन्त्यन्तरिक्षगाः ।
सर्वे ते प्रीतमनसो भूत्वा गृह्णन्त्विमं वलिम् ॥

इति पठित्वा वामहस्तेन तत्पात्रे जलधारां समर्प्य—

ॐ सर्वेभ्यो भूतेभ्य एषोऽन्नवलिर्नमः—इति दक्षहस्तेनोत्सृजेत् ।

ततः पुष्पाञ्जलिमादाय प्रार्थयेत् ।

भूतानि यानीह वसन्ति भूतले
वलिं गृहीत्वा विधिवत् प्रयुक्ताम् ।
सन्तोषमासाद्य व्रजन्तु सर्वे
क्षमन्तु तान्यत्र नमोऽस्तु तेभ्यः ॥

इति संप्रार्थ्य पुष्पाञ्जलिं दत्वा नत्वा च—

भूतानि यथासुखं विहरन्तु—इति नाराचमुद्रया विसृजेत् ।

ततो मूलमष्टोत्तरसहस्रं प्रजप्य—

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।

---

* एतदर्थं द्रष्टव्यमस्यैव ग्रन्थस्य ३५६ पृ० ।

सिद्धिर्भवतु मे देव त्वत्प्रसादाज्जगत्पते—

इति जपं निवेद्य यथाशक्ति स्तुत्वा प्रणम्य आसनादुत्थाय त्रिः परिक्रम्य साष्टाङ्गं प्रणमेत् ।

तत ईशानस्थे पूर्वसञ्चितविकिरपुञ्जेषु सुवर्णगर्भां वस्त्रवेष्टितां जलपूरितां वर्द्धनीं संस्थाप्य—

सिंहस्थां खड्गखेटकधारिणीं घोररूपां पश्चिमास्याम्—अस्त्रदेवतां ध्यात्वा तस्यामावाह्य—

फट् अस्त्रदेवतायै नमः—इति मन्त्रेण पञ्चोपचारैश्चलासनेनैव संपूज्य तां कर्करीमादाय—

अमुकदेवताज्ञया इन्द्रामुकदेवयजनं रक्ष—इत्यादिसकललोकपालान् भावयन् नालाद्वारिधारां विमोच्य मण्डपाभ्यन्तरं प्रदक्षिणीकृत्य—

फट्—इत्यस्त्रमन्त्रमुच्चार्य यथास्थानं निवेशयेत् ।

ततः स्थिरासनो भूत्वा गन्धाद्यैरुपचारैः पूर्ववत् संपूज्य प्रणमेत् ।

तत आचार्यः स्वीयकुण्डे पूर्वेशानमध्यस्थे विधिवदग्निसंस्कारं कुर्यात् ।

तत्रादौ कुण्डस्थानमागत्यासने उपविश्य तत्त्वत्रयेणाचम्य कुशत्रयतिलजलान्यादाय संकल्पं कुर्यात् ।

तद्यथा—

ॐ अद्य—इत्यादिदेशकालौ संकीर्त्य—

अमुकगोत्रोऽमुकदेवशर्माऽमुकगोत्रामुकशर्मकर्तृकामुकदेवतामुकमन्त्रदीक्षाकर्माङ्गभूतहोमकर्माहं करिष्ये— इति संकल्प्य पूर्वोक्तमन्त्रेण सूर्यार्घं दत्वा सामान्यार्घ्यं संस्थाप्य कुण्डस्य वीक्षणाद्यष्टादशसंस्कारान् कुर्यात् ।

तद्यथा—

मूलमन्त्रमुच्चरन् कुण्डं पश्येदिति 'वीक्षणम्' ।

फट्—इत्यस्त्रमन्त्रेण 'प्रोक्षणम्' ।

तेनैव मन्त्रेण दर्भैस्त्रिधा 'ताडनम्' ।

हुँ—इति कवचमन्त्रेणा 'भ्युक्षणम्' ।

फट्—इत्यस्त्रमन्त्रेणाङ्गुलमानेन 'खननम्' ।

तेनैव मन्त्रेणाङ्गुष्ठानामिकाभ्यां 'मृत्तिकोद्धरणम्' ।

नमः—इति हृन्मन्त्रेण पुनर्मृत्तिकाभिः 'पूरणम्'।

अस्त्रमन्त्रेण 'समीकरणम्'।

हुँ—इति जलेन 'सेचनम्'।

फट्—इति 'कुट्टनम्'।

तच्च काष्ठादिना हस्तेनैव वा दृढीकरणम्।

ततः—

हुँ—इति मन्त्रेण कुशमुष्टिना कुण्डे मृदं मार्जयेदिति 'मार्जनम्'।

तेनैव मन्त्रेण गोमयेनोपलयेदिति 'लेपनम्'।

ततस्तेनैव मन्त्रेण कुण्डमध्ये सोमसूर्याग्निकलाश्चिन्तयेदिति 'कलारूपकल्पनम्'।

हुँ—इति कवचमन्त्रमुच्चरन् सूत्रत्रयेण कुण्डमेखलास्त्रिवारं वेष्टयेदिति 'त्रिसूत्रीकरणम्'।

ॐ अमुककुण्डाय नमः—इति मन्त्रेण कुण्डं पूजयेदित्य 'र्चनम्'।

कुण्डार्चनानन्तरम्—

ॐ अमुककुण्डनाभये नमः—ॐ अमुककुण्डमेखलाभ्यो नमः—

इति पूजयेत्।

अस्त्रमन्त्रेण कुण्डं वज्रवद्दृढं चिन्तयेदिति 'वज्रीकरणम्'।

कुण्डमध्ये पूर्वाग्रं कुशं निधाय तदुपर्युत्तराग्रं कुशं निधायोपरि विष्टरं न्यस्य तदुपरि पुष्पं दत्वा—

नमः—इति हृन्मन्त्रेण पूजयेदिति 'चतुष्पथीकरणम्'।

अस्त्रमन्त्राभिमन्त्रितानच्छिन्नाग्रान् कुशान् मेखलासु कवचमन्त्रमुच्चरन्नास्तरेदित्य 'क्षपाटनम्'।

इत्यष्टादशसंस्कारान् कुर्यात्।

अष्टादशसंस्कारकरणाशक्तस्तु पूर्वोक्तवीक्षणादिसंस्कारचतुष्टयमेव कुर्यात्।

वाममार्गे तु संस्कारचतुष्टयमेव कुर्यात्।

ततः कुण्डमध्ये दर्भमूलेन स्रुवमूलेन वा—

नमः—इत्युच्चरन् प्रागग्रास्तिस्रो रेखा उदगग्रास्तिस्रो रेखा लिखेत्।

तत्र प्रागग्रा रेखा दक्षिणोपक्रमा उदगपवर्गा उदगग्राश्च पश्चिमोपक्रमाः प्रागपवर्गा इति लिखनक्रमः।

अथ वा त्रिकोणगर्भं वृत्तवेष्टितं षट्कोणं लिखेदिति (शारदायाम्) उक्तम्।
उक्तरेखाषट्कं तादृशषट्कोणं च लिखेदिति (मेरुतन्त्रे) प्रोक्तम्।

त्रिकोणमध्ये लज्जाबीजं प्रणवं च लिखेदित्यपि क्वचिदुक्तम् ।

ततः—

प्रागग्ररेखासु—	उदगग्ररेखासु—
ॐ मुकुन्दाय नमः ।	ॐ ब्रह्मणे नमः ।
ॐ ईशानाय नमः।	ॐ वैवस्वताय नमः ।
ॐ पुरन्दराय नमः ।	ॐ इन्दवे नमः ।

इति लिखनक्रमेणैव गन्धपुष्पादिभिः पूजयेत् ।

ततो मूलमुच्चार्य—

अमुकदेवताकुण्डाय नमः—इति पूजयेत् ।

श्रीविद्याविषये तु—

ऐँ ह्रीँ श्रीँ ऐँ क्लीँ सौँः मुकुन्दाय नमः—इत्यादिक्रमेणैव पूजयेत् ।

ततः प्रणवमुच्चरन् समान्यार्घजलेनाभ्युक्ष्य योगपीठदेवताः पूजयेत् ।

तद्यथा—कुण्डमध्ये घटस्थापनोक्तक्रमेण—

ॐ आधारशक्तये नमः—इत्यादि—

ॐ रत्नसिंहासनाय नमः—इत्यन्तं सम्पूज्य अग्न्यादिकोणेषु धर्मादीनभ्यर्च्य पूर्वादिदिक्षु अधर्मादीन् पूजयेत् ।

ततोऽष्टदलकमलं विचिन्त्य—

ॐ अनन्ताय नमः—इत्यादि—

ह्रीँ ज्ञानात्मने नमः—इत्यन्तं संपूज्य—

पूर्वादिकेशरेषु—

ॐ जयायै नमः ।

ॐ विजयायै नमः ।

ॐ अजितायै नमः ।

ॐ अपराजितायै नमः ।

ॐ नित्यायै नमः ।

ॐ विलासिन्यै नमः ।

ॐ दोग्ध्र्यै नमः ।

ॐ अघोरायै नमः ।

मध्ये—

ॐ मङ्गलायै नमः—इति पीठशक्तीः पूजयेत् ।

वैष्णवे तु—

ॐ विभूत्यै नमः ।
ॐ उन्नत्यै नमः ।
ॐ कान्त्यै नमः ।
ॐ सृष्ट्यै नमः ।
ॐ कीर्त्यै नमः ।
ॐ सन्नत्यै नमः ।
ॐ पुष्ट्यै नमः ।
ॐ उत्कृष्ट्यै नमः ।
ॐ ऋद्ध्यै नमः ।

इति पीठशक्तीः पूजयेत्

ततः—

ह्रीँ वागीश्वरीवागीश्वरयोर्योगपीठात्मने नमः—इति पीठमन्त्रेण पीठं पूजयेत् ।

ह्रीँ सर्वशक्तिकमलासनाय नमः—इति मन्त्रेण वा पूजयेत् ।

वैष्णवे तु—

श्रीलक्ष्मीनारायणयोर्योगपीठात्मने नमः—इति पूजयेत् ।

ततः—

वागीश्वरीमृतुस्नातां नीलेन्दीवरसन्निभाम् ।
वागीश्वरेण संयुक्ताम् .... इति ध्यात्वा—

श्रीविद्यायां तु—

कामेश्वरीं कुण्डमध्ये सकामामृतुसंयुताम्—इति ध्यात्वा—

वैष्णवे तु—

लक्ष्मीमृतुमतीं तत्र प्रभोर्नारायणस्य च ।
ग्राम्यधर्मेण संयुक्ताम् .... इति ध्यात्वा तत्रावाह्य आवाहनादिमुद्राः प्रदर्श्य—

ह्रीँ वागीश्वरीवागीश्वराभ्यां नमः ।

श्रीविद्यापक्षे तु—

क्लीँ कामेश्वरीकामेश्वराभ्यां नमः ।

वैष्णवे तु—

श्रीँ लक्ष्मीनारायणाभ्यां नमः—इति मन्त्रेण पञ्चोपचारैः पूजयेत् ।

एवं सौरेऽपि—

अथ वा शैवशाक्तादौ—

कामोन्मत्तं शिवमृतुमतीं भुवनेश्वरीम्—ध्यात्वा-

ह्रीँ भुवनेश्वरीशिवाभ्यां नमः—इति मन्त्रेण पूजयेत्।

ततः सूर्यकान्तादिसम्भूतमरणिसम्भवं वा श्रोत्रियगेहजं वा वह्निं स्वर्णपात्राद्यन्यतमपात्रे निधाय पात्रान्तरेणाच्छाद्य समानीय—

फट्—इत्यस्त्रमन्त्रेणाग्निं स्वदक्षिणे समाधाय—

हुँ—इति कवचमन्त्रेणाच्छाद्य तस्मात् क्रव्यादांशमादाय—

हुँ फट्—इति नैर्ऋत्ये क्षिपेत्।

ततोऽवशिष्टमग्निं देवांशं विचिन्त्य मूलमन्त्रेण पुरतः संस्थाप्य कुण्डसंस्कारोक्तक्रमेण वीक्षणादिभिश्चतुर्भिः संस्कृत्य औदर्यवैन्दवाग्निभ्यां भौमस्य वह्नेरैक्यं भावयेत्। वैन्दवो भ्रूमध्यस्थो वह्निः।

ततः—

रँ वह्निचैतन्यं कल्पयामि—इति।

हुँ रँ चैतन्यं ते नमः—इति मन्त्रेण वा पावकचैतन्यं संयोज्य प्रणवेणाष्टोत्तरशतं दशधा वाऽभिमन्त्र्य धेनुमुद्रयाऽमृतीकृत्य—

फट्—इति संरक्ष्य—

हुँ—इत्यवगुण्ठ्य गन्धपुष्पादिभिः पूजयेत्।

रँ वह्निमूर्त्तये नमः—इत्यभ्यर्च्य कुण्डस्योपरि प्रादक्षिण्येन त्रिः परिभ्राम्य जानुस्पृष्टमहीतलः प्रणवोच्चारणपूर्वकमात्मनोऽभिमुखं शिवबीजधिया देव्या योनौ निःक्षिपेत्।

शिवबीजधिया शैवशाक्तादौ वैष्णवादौ तु विष्ण्वादिबीजधियेति बोध्यम्।

ततः—

ह्रीँ वागीश्वरीवागीश्वराभ्यामाचमनीयं नमः—इत्याचमनीयं दत्वा—

वह्निरूपां देवताम्-देव्या गर्भे धृतां ध्यात्वा गर्भरक्षार्थं दर्भकङ्कणं दत्वा-

चित्पिङ्गल-हन २ दह २ पच २ सर्वाज्ञा ज्ञापय स्वाहा—

इति मन्त्रेण ज्वालिनीमुद्रया वह्निं प्रज्वालयेत्।

(रुद्रयामले तु)—

ह्लौँ ह्लौँ ज्वल २ प्रज्वल २ हुँ फट् स्वाहा——इति मन्त्रेणाग्निप्रज्वालनमुक्तम् ।

ततः कृताञ्जलिः—

ॐ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्—इत्यनेन वह्निमुपतिष्ठेत् ।

ततः प्रादेशमात्रां मूलाग्रयोर्घृतसंप्लुतां सामिधं वह्नौ तूष्णीं हुत्वा पूजाप्रकरणोक्तक्रमेण गणेशादिवन्दनदिग्बन्धनभुतशुद्धिप्राणायाममातृकान्यासमूलन्यासान् विधाय स्वदेहे वह्निजिह्वान्यासं कुर्यात् ।

तत्र सात्त्विकीनां जिह्वानां न्यासः ।

यथा—

स्प्रूँ हिरण्यायै नमः—लिङ्गे ।
ष्प्रूँ गगनायै नमः—पायौ ।
श्प्रूँ रक्तायै नमः—मूर्ध्नि ।
व्प्रूँ कृष्णायै नमः—वक्त्रे ।
ल्प्रूँ सुप्रभायै नमः—घ्राणे ।
र्प्रूँ बहुरूपायै नमः—नेत्रे ।
य्प्रूँ अतिरिक्तायै नमः-सर्वाङ्गे ।
एताः सात्त्विक्यो जिह्वाः सात्त्विककर्मसु ।

काम्यादौ तु-

पद्मरागा सुवर्णा भद्रलोहिता लोहिता श्वेता धूमिनी करालिका——इति राजस्यो जिह्वा न्यसनीयाः ।

क्रूरकर्मणि—

विश्वमूर्त्तिः स्फलिङ्गिनी धूम्रवर्णा लोहिता कराला काली—इति तामस्यो जिह्वा न्यसनीयाः । बीजानि तु पूर्वोक्तान्येव ।

ततस्तान्येव बीजान्यादौ दत्वा तेष्वेव स्थानेषु—

अमर्त्यपितृगन्धर्वयक्षनागपिशाचराक्षसान्——सप्तजिह्वाधिष्ठातॄन् देवानपि क्रमेण न्यसेत् ।

स्प्रूँ अमर्त्याय नमः——इत्यादि ।

तत ऋष्यादिन्यासं कुर्यात् ।

यथा—

अग्निमन्त्रस्य भृगु ऋषिर्गायत्री छन्दोऽग्निर्देवता रँ बीजं स्वाहा शक्तिरग्नियजने विनियोगः ।

भृगवे ऋषये नमः—शिरसि।
गायत्रीछन्दसे नमः—मुखे।
अग्नये देवतायै नमः—हृदये।

रँ बीजाय नमः—गुह्ये।
स्वाहायै शक्तये नमः—पादयोः।
अग्नियजने विनियोगः—

इति बद्धाञ्जलिः।

ततः करन्यासः।

ॐ सहस्रार्चिषे अङ्गुष्ठाभ्यां नमः। ॐ स्वस्तिपूर्णाय तर्जनीभ्यां नमः स्वाहा। ॐ उत्तिष्ठपुरुषाय मध्यमाभ्यां वषट्। ॐ धूमव्यापिने अनामिकाभ्यां हुँ। ॐ सप्तजिह्वाय कनिष्ठिकाभ्यां वौषट्। ॐ धनुर्धराय करतलपृष्ठाभ्यां फट्।

एवं हृदयाद्यष्टन्यासः।

ततो मूर्त्तिन्यासं कुर्यात्।

तद्यथा—

ॐ अग्नये जातवेदसे नमः—मूर्ध्नि।
ॐ अग्नये सप्तजिह्वाय नमः—दक्षांशे।
ॐ अग्नये हव्यवाहनाय नमः—दक्षपार्श्वे।
ॐ अग्नये अश्वोदरजाय नमः—दक्षकटौ।
ॐ अग्नये वैश्वानराय नमः—लिङ्गे।
ॐ अग्नये कौमारतेजसे नमः—वामकट्याम्।
ॐ अग्नये विश्वमुखाय नमः—वामपार्श्वे।
ॐ अग्नये देवमुखाय नमः—वामांशे।

इति मूर्त्तिन्यासः।

ततः पीठन्यासं कुर्यात्।

तद्यथा—आधारशक्त्यादिवह्निमण्डलान्तमुक्तस्थानेषु विन्यस्य हृत्पद्मस्य पूर्वादिकेशरेषु—

ॐ पीतायै नमः,
ॐ श्वेतायै नमः,

ॐ अरुणायै नमः,
ॐ कृष्णायै नमः,

ॐ धूम्रायै नमः,
ॐ तीव्रायै नमः,
ॐ स्फुलिङ्गिन्यै नमः,
ॐ रुचिरायै नमः,
ॐ ज्वालिन्यै नमः—मध्ये

इति वह्नेर्नव शक्तीः पीठे विन्यस्य तत्रैव-

रँ वह्नेर्योगपीठाय नमः—इति पीठन्यासं विधाय वह्निं ध्यायेत् ।

ध्यानं यथा--

इष्टं शक्तिं स्वस्तिकाभीतिमुच्चै-
दीर्घैर्दोर्भिर्धारयन्तं यवाभम् ।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं
ध्यायेद्वह्निं बद्धमौलिं जटाभिः—इदं (शारदो-)क्तध्यानम् ।

(रुद्रयामलो-)क्तध्यानम् ।

यथा—

बन्धूकपुष्पसङ्काशं सुतप्तकनकप्रभम् ।
पद्मस्थं यजमानार्थं वदनद्वयशोभितम् ॥
सप्तच्छन्दोमयं देवं विमानोपरिसंस्थितम् ।
त्रिधा ग्रीवं त्रिपादाब्जं हव्यकव्यविनाशनम् ॥
ब्रह्माध्वर्यूद्गातृहोतृचतुःशृङ्गविराजितम् ।
पञ्चरात्रं पाशुपतं कापिलं च महामतम् ॥
बौद्धं वेदिकमित्येतत् षट्पिङ्गलाविलोचनम् ।
वेदार्थं च चतुःश्रोत्रं श्रौतशास्त्रमयध्वनिम् ॥
सपाटलजटाबद्धमौलिकोटीरभास्वरम् ।
हेमालङ्कारसंयुक्तं हेमकुण्डलमण्डितम् ॥
रक्ताम्भोरुहमध्यस्थं स्वस्तिकासनसंस्थितम् ।
पृष्ठदेशसमालम्बि तार्त्तीयचरणाम्बुजम् ।

महाशब्दायमानं च राजमानं स्वतेजसा ।
शक्तिं वज्रं स्रुक्स्रुवं च चतुर्भिर्दक्षबाहुभिः ॥
तोमरं तालवृन्तं च सौवर्णं घृतपात्रकम् ।
वामैस्त्रिभिर्बाहुभिश्च दधानं रक्तवाससम् ॥
हिरण्या कनका रक्ता कृष्णा दक्षानने स्थिता ।
सुप्रभा चातिरक्ता च बहुरक्ता च जिह्विका ॥
इमा रसज्ञास्तद्वामवदने नित्यमास्थिताः ।
एताभिः सप्तजिह्वाभिरुपेतं पाटिताननम् ॥

इति ध्यात्वा वह्निदेवतात्मकमात्मानं विचिन्त्य मानसैरुपचारैरभ्यर्च्य—

रँ आत्ममूर्त्तये वह्नये नमः——इति मन्त्रेण नैवेद्यरहितैर्गन्धादिभिर्बाह्योपचारैरप्यात्मानं संपूज्य सामान्यार्घजलेन मेखलाः परिषिञ्च्य गर्भशून्यैर्दर्भैरग्रैः परिस्तरणं कुर्यात्—

परिस्तरणं च ।

एकमेखलकुण्डे मेखलाया अधस्तात् द्विमेखले कुण्डे द्वितीयमेखलोपरि त्रिमेखलाकुण्डे मध्यमेखलायां कुर्यात् ।

तत्क्रमश्च—

दक्षिणोत्तरयोः पूर्वाग्रैः पूर्वपश्चिमयोरुत्तराग्रैर्दर्भैर्मूलभागानग्रभागैराच्छादयन् परिस्तरेदिति ।

ततः प्राचीं विहाय दक्षिणोत्तरपश्चिमेषु पलाशादिवृक्षसम्भवान् हस्तमात्रान् सविष्टारान् परिधीन् निःक्षिप्य तेषु प्रादक्षिण्येन—

ॐ ब्रह्मणे नमः । ॐ विष्णवे नमः । ॐ रुद्राय नमः ।

इति पूजयेत् ।

ततो मेखलासु—

ॐ वामायै नमः ।
ॐ ज्येष्ठायै नमः ।
ॐ रौद्र्यै नमः ।
ॐ अम्बिकायै नमः—

इति पूर्वादिप्रादक्षिण्येन संपूज्य—

रँ वह्नये आसनं कल्पयामि नमः——इति आसनं दत्वा कुण्डमध्ये

सचतुर्द्वारं चतुरस्रत्रयावृतमष्टदलकमलं विचिन्त्य प्राग्लिखितपीठपूजाक्रमेणाधारशक्त्यादिवह्निमण्डलान्तं मण्डूकादिश्नानारमान्तं वा संपूज्य वह्न्यासनपद्मस्य पूर्वादिदलमूलेषु मध्ये च पूर्वोक्तनवशक्तीरभ्यर्च्य—

रँ वह्नेर्योगपीठात्मने नमः—इति।

सर्वशक्तिकमलासनाय नमः—इति मन्त्रेण वा पीठं संपूज्य मूलमन्त्रान्ते—

रँ वह्नेर्मूर्त्तिं कल्पयामि नमः—इति मूर्त्तिं परिकल्प्य पुनर्वह्निं ध्यात्वा-

ॐ वैश्वानरजातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा भगवन्नग्ने इहागच्छागच्छ—

ॐ वैश्वानरजातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा— इत्यावाहयेत्।

आद्यन्तयोर्मूलमन्त्रोच्चारणं च पूर्वोक्तप्रमाणसिद्धम्।

ततः—

रँ आवाहितो भव, संस्थापितो भव—इत्यादिक्रमेणावाहनादिमुद्राः प्रदर्श्य प्राणप्रतिष्ठां कुर्यात्।

यथा—

ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ हँसः सोऽहं रँ वह्नेः प्राणा इह २ स्थिताः।

एवम्—

जीव इह २ स्थितः।

एवम्—

सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

एवं प्राणप्रतिष्ठां विधाय—

ॐ वैश्वानरजातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा—इदं पाद्यं वह्नये नमः—इत्यादिक्रमेण पाद्यार्घ्याचमनस्नानगन्धपुष्पधूपदीपनैवेद्यताम्बूलानि निवेद्य—

ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा—श्रीपादुकां पूजयामि नमः—इति पुष्पाञ्जलिना वारत्रयमभ्यर्च्य आवरणार्चनं कुर्यात् ।

तद्यथा—

षट्कोणेषु मध्ये च ईशानादिक्रमेण हिरण्यादिसप्तजिह्वाः पूजयेत् ।

यथा—

स्म्रूँ हिरण्यायै नमः ।
ष्म्रूँ गगनायै नमः ।
श्म्रूँ रक्तायै नमः ।
व्म्रूँ कृष्णायै नमः ।
ल्म्रूँ सुप्रभायै नम ।
र्म्रूँ बहुरूपायै नमः ।
य्म्रूँ अतिरिक्तायै नमः ।

वैष्णवे तु—

प्रभा दीप्तिः प्रकाशा मरीचिस्तापिनी कराला लेलिहाना चेति सप्त जिह्वाः पूज्याः ।

ततः केशरेष्वङ्गदेवताः पूजयेत् ।

यथा—

ॐ सहस्रार्चिषे हृदयाय नमः—आग्नेये ।
ॐ स्वस्तिपूर्णाय शिरसे स्वाहा—ईशाने ।
ॐ उत्तिष्ठपुरुषाय शिखायै वषट्—नैर्ऋत्ये ।
ॐ धूमव्यापिने कवचाय हुँ—वायव्ये ।
ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट्—मध्ये ।

वैष्णवादौ तु नेत्राभ्यामिति ज्ञेयम् ।

चतुर्दिक्षु—

ॐ धनुर्धरायास्त्राय फट्—इति संपूज्य—

पूर्वादिदलेषु—

ॐ अग्नये जातवेदसे नमः ।
ॐ अग्नये सप्तजिह्वाय नमः ।
ॐ अग्नये हव्यवाहनाय नमः ।
ॐ अग्नये अश्वोदरजाय नमः ।
ॐ अग्नये वैश्वानराय नमः ।
ॐ अग्नये कौमारतेजसे नमः ।
ॐ अग्नये विश्वमुखाय नमः ।
ॐ अग्नये देवमुखाय नमः—

इत्यष्टमूर्त्तीरभ्यर्च्य मेखलाश्रितदर्भेषु पूर्वादिक्रमेणेन्द्रादीन् तद्बहिर्वज्रादीन् संपूज्य—

ॐ वैश्वानर जातवेद इहावह लोकिताक्ष सर्वकर्माणि साधय स्वाहा साङ्गाय सायुधाय सवाहनाय सालङ्काराय सपरिवाराय वह्नये श्रीपादुकां पूजयामि नमः—इति संपूज्य पात्राण्यासादयेत् ।

तद्यथा—

स्ववामभागे प्रागग्रान् दर्भानास्तीर्य तदुपर्यस्त्रमन्त्रितजलेन प्रक्षालितानि युग्मरूपाणि स्रुक्स्रुवप्रोक्षणीप्रणीताज्यस्थालीचरुस्थाल्यादिपात्राण्यधोमुखीकृत्य विन्यसेत् ।

यद्यपि पूजोपयुक्तप्रोक्षणीपात्रस्य स्वदक्षिणे स्थापनमुक्तं तथाऽपि होमोपयुक्तं तत्प्रणीतादिपात्रवद्वाम एव स्थापनीयम् ।

स्रुक्स्रुवयोरेव दक्षिणेऽभिधानादिति श्रीविद्यापद्धतिकृतः स्रुक्स्रुवावपि पूर्वं वाम एवासाद्य संस्कारोत्तरं दक्षिणे स्थाप्यौ ।

ततस्तानि पात्राणि पवित्रेणोत्तानानि विधाय पुनः प्रक्षाल्य सामान्यार्घजलेन संप्रोक्ष्य—

नमः—इति हृन्मन्त्रमुच्चरन् शुद्धजलेन प्रोक्षणीपात्रमापूर्य आधारपात्रजलेषु क्रमेण विम्बत्रयमभ्यर्च्य—

ॐ गङ्गे च यमुने चैव—इत्यादिनाऽङ्कुशमुद्रया सूर्यमण्डलात् तीर्थमावाह्य अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य प्रणवेन गन्धपुष्पाक्षतपवित्राणि निःक्षिप्य कूर्चे निधाय प्रणवेनाष्टधाऽभिमन्त्र्य धेनुमुद्रां प्रदर्श्य प्रणीतापात्रमपि शुद्धजलेनापूर्य गन्धपुष्पाक्षतपवित्राणि निःक्षिपेत् ।

ततः प्रणीतापात्रस्थं किंचिज्जलं प्रोक्षणीपात्रे निःक्षिप्य तज्जलेन हृन्मन्त्रं मूलमन्त्रमुच्चरन् यागद्रव्याणि प्रोक्षयेत् ।

इति पात्रासादनम् ।

द्रव्यशोधनं च विधाय ब्रह्माणं वृणुयात् ।

यथा—

तद्देवतामन्त्रदीक्षितं ब्रह्माणं कुण्डदक्षिणभागे कुशासने उपविश्य—

ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्माऽमुकदेवताऽमुकमन्त्रदीक्षाकर्माङ्गभूतेऽस्मिन् होमकर्मणि अमुकगोत्रममुकदेवशर्माणं भवन्तं ब्रह्माणमहं वृणे ।

वृतोऽस्मि—इति प्रतिवचनम् ।

इति वृत्वा—

ॐ ब्रह्मणे नमः—इति मन्त्रेण गन्धादिभिर्वासोलङ्कारादिभिश्च पूजयेत् ।

ततः स्रुक्स्रुवौ संस्कुर्यात् ।

यथा—

ऊर्ध्वमुखौ स्रुक्स्रुवौ हस्ताभ्यां गृहीत्वाऽधोमुखौ विधाय वारत्रयमग्नौ प्रताप्य वामहस्तेन तौ धृत्वा दक्षिणहस्तेन दर्भानादाय तैर्दर्भैस्तयोरग्रमूलमध्यानि शोधयेत् ।

शोधनक्रमश्च—

अग्रेणाग्रं मूलेन मूलं मध्येन मध्यमिति ।

ततः सामान्यार्घप्रोक्षणीजलाभ्यां संप्रोक्ष्य पुनर्वह्नौ प्रताप्य दर्भानग्नौ प्रक्षिपेत् ।

ततः स्वदक्षिणे कुशानास्तीर्य तदुपरि तौ स्थापयेत् ।

तत आज्यं संस्कुर्यात् ।

तद्यथा—आज्यस्थालीमादायास्त्रमन्त्रितजलेन संप्रोक्ष्य तस्यामाज्यं निधाय मूलमन्त्रेण वीक्ष्य—

अस्त्राय फट्—इति संप्रोक्ष्य तेनैव मन्त्रेण दर्भैः संताड्य—

हुँ—इत्यर्घजलेनाभ्युक्षणं कुर्यात् ।

इति संस्कारचतुष्टयं कृत्वा कुण्डादङ्गारानुद्धृत्य वायुकोणे संस्थाप्य तेष्वङ्गारेषु—

नमः—इति मन्त्रेणाज्यस्थालीं स्थापयेत् । इदं 'तापनम्' ।

ततो दर्भयुगलं प्रज्वाल्याज्ये निःक्षिप्य दग्धशेषम्—

नमः—इति मन्त्रेण वह्नौ निःक्षिपेत् । इदं 'पवित्रीकरणम्' ।

पुनर्ज्वलितेन दर्भयुगलेन—

हुँ—इति मन्त्रमुच्चरन् घृतं नीराज्य अग्नौ निःक्षिपेत् । इत्य'भिद्योतनम्' ।

ततः प्रज्वालितकुशमुष्टिं गृहीत्वा—

अस्त्राय फट्—इति मन्त्रमुच्चरन् प्रदर्श्याग्नौ प्रक्षिपेत् 'इत्युद्योतनम्' ।

तस्मादङ्गारादाज्यस्थालीमानीयात्मसंमुखे संस्थाप्य तानङ्गारानग्नौ प्रक्षिप्याङ्गारस्थानमार्जनं कृत्वा जलं स्पृशेत् ।

तत उत्तानहस्तयोरङ्गुष्ठोपकनिष्ठाभ्यां प्रादेशमात्रं पवित्रं पृथक् पृथक् धृत्वा-

अस्त्राय फट्—इति मन्त्रमुच्चरन् वह्नेः संमुखमुत्प्लुनीयात् ।

ततः पवित्रं स्थानान्तरे संस्थाप्य पुनस्तेनैव प्रकारेण दर्भद्वयं गृहीत्वा तेन दर्भयुग्मेन—

नमः—इति मन्त्रमुच्चरन्नात्मसंमुखं घृतं संप्लाव्य पूर्वस्थापितपवित्रद्वयमेतत्पवित्रयुग्मं च वह्नौ क्षिपेत् । इत्यु'त्प्लवनसंप्लवने' उभयमपि प्लावनमेव ।

ततः प्रादेशमात्रं सग्रन्थि दर्भयुगलमाज्यस्थाल्यां घृतमध्ये निःक्षिप्याज्यदक्षिणभागं शुक्लपक्षमाज्यवामभागं कृष्णपक्षं विचिन्त्य वामे इडां दक्षिणे पिङ्गलां मध्ये सुषुम्णां ध्यात्वा होमं कुर्यात् ।

यथा—स्रुवेण—

नमः—इति मन्त्रमुच्चरन् दक्षिणभागाद्घृतमादाय—

ॐ अग्नये स्वाहा अग्नये इदं नमः—इत्यग्नेर्दक्षिणलोचने जुहुयात् । संपातमाज्यं तत्रैव दक्षिणभागे निःक्षिपेत् ।

पुनः-

नमः—इति वामभागाद्घृतमादाय—

ॐ सोमाय स्वाहा सोमायेदं नमः—इति वामलोचने जुहुयात् । संपाताज्यं तत्रैव वामभागे स्थापयेत् ।

पुनरेवं मध्यभागाद्घृतमादाय—

ॐ अग्नीषोमाभ्यां स्वाहा अग्नीषोमाभ्यामिदं नमः—इति वह्नेर्ललाटे नेत्रे हुत्वा संपातमाज्यं पूर्ववन्मध्यभागे क्षिपेत् ।

वैष्णवादौ तु ललाटनेत्राहुतिं न कुर्यात् । तत्रापि श्रीनृसिंहचरणाराधनोपयुक्तहोमे तु कुर्यादेव ।

नेत्रत्रयोद्भासमानं परमात्मानमच्युतम् ।
श्रीनृसिंहमहं वन्दे देवदेवं वृषाकपिम्—इत्युक्तत्वात् तत्रापि-
प्रज्वलद्वह्निनेत्राभ्यां दहान्निव जगत्त्रयम्—इत्यादिद्विनेत्रध्यानपक्षे तु नेत्राहुतिर्न कार्या ।

पुनः—

नमः—इति दक्षिणभागादाज्यमादाय—

ॐ अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृते इदं नमः—इति वह्नेर्वक्त्रे जुहुयात् ।

(शारदायां तु)-

स्वाहा—इति हुत्वा—

हा—इति हुतशेषे क्षिपेदित्युक्तम्—

तत्रापि—

स्वा—इति हुत्वा—

हा—इति हुतशेषं संपादयेदिति प्रतिभाति ।

ततः प्रणवमुक्ताभिर्व्यस्तसमस्ताभिर्व्याहृतिभिः पञ्च हुतीर्दद्यात् ।

तद्यथा—

ॐ स्वाहा, भूः स्वाहा, भुवः स्वाहा, स्वः, स्वाहा, ॐ भूर्भुवःस्वः स्वाहा—इति हुत्वा—

ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा—इत्यग्निमन्त्रेणाहुतित्रयं दत्वा वह्नेर्गर्भाधानादिषोडशसंस्कारान् कुर्यात् ।

यथा—

ॐ अग्नेर्गर्भाधानं संपादयामि स्वाहा—इत्यष्टाहुतीर्जुहुयात् ।

एवमग्रेऽपि ।

ॐ अग्नेः पुंसवनं संपादयामि स्वाहा—इति ।

ॐ अग्नेः सीमन्तोन्नयनं संपादयामि स्वाहा, ॐ अग्नेर्जातकर्म संपादयामि स्वाहा—इति जातकर्माहुतिर्हुत्वा—

ॐ अग्नेर्नालच्छेदं संपादयामि फट् स्वाहा—इति मूलाग्रयोर्घृतसंप्लुताः पञ्च समिधो जुहुयात् ।

ततः—

ॐ वह्नेः सूतकं शोधयामि स्वाहा—इत्येकाहुतिं दत्वा स्वेष्टदेवतानाम्ना—

वह्ने त्वममुकनामाऽसि—इति नाम कृत्वा वह्नीष्टदेवतयोरैक्यं विचिन्त्य—

ॐ अग्नेर्नामकरणं संपादयामि स्वाहा—इति पूर्ववदष्टाहुतीर्जुहुयात् ।

ॐ अग्ने त्वं शिवनामाऽसि, अग्ने त्वं वरदनामाऽसि, अग्ने त्वं विश्वरूपनामाऽसि—इत्येवं वा नाम कुर्यात् ।

श्रीविद्यापक्षे तु—

अग्ने त्वं कामाग्निनामाऽसि—इति नाम कुर्यात् ।

ततः—

ॐ अग्ने निष्क्रमणं संपादयामि स्वाहा ।

एवं—

ॐ अग्नेरन्नप्राशनम् ।
ॐ अग्नेश्चूडाकरणम् ।
ॐ अग्नेरुपनयनम् ।
ॐ अग्नेर्महानाम्न्यव्रतम् ।
ॐ अग्नेर्महाव्रतम् ।
ॐ अग्नेरुपनिषद्व्रतम् ।
ॐ अग्नेर्गोदानव्रतम् ।
ॐ अग्नेः समावर्त्तनम् ।

ॐ अग्नेर्विवाहं संपादयामि स्वाहा—इति प्रत्येकमष्टाहुतीर्हुत्वा मूलाग्रयोर्घृतसंप्लुतां समिधमादाय—

ॐ ह्रीँ वागीशवागीश्वरीभ्यां स्वाहा—इति त्रिवारं जुहुयात् ।

ततोऽग्नेः पितरौ वागीश्वरौ पूर्ववत् पञ्चोपचारैः संपूज्य प्रणम्य स्वहृदये उद्वासयेत् ।

ततो वह्नेः सप्तसु जिह्वासु तन्मन्त्रैरेकैकामाहुतिं दद्यात् ।

यथा—

स्म्रूँ हिरण्यायै स्वाहा ।
ष्म्रूँ गमनायै स्वाहा ।
श्म्रूँ रक्तायै स्वाहा ।
व्म्रूँ कृष्णायै स्वाहा ।
ल्म्रूँ सुप्रभायै स्वाहा ।
म्रूँ बहुरूपायै स्वाहा ।
य्म्रूँ अतिरिक्तायै स्वाहा ।
इति सप्तजिह्वामन्त्रेण जुहुयात् ।

ततोऽङ्गमन्त्रैर्जुहुयात् ।

तद्यथा—

ॐ सहस्रार्चिषे हृदयाय नमः स्वाहा—एवं क्रमेण जुहुयात् ।
ॐ स्वस्तिपूर्णाय शिरसे स्वाहा ।
ॐ उत्तिष्ठपुरुषाय शिखायै वषट् ।
ॐ धूमव्यापिने कवचाय हुँ स्वाहा ।
ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् स्वाहा ।

वैष्णवादौ तु—
नेत्राभ्याम्—इति ज्ञेयम् ।

ॐ धनुर्धरायास्त्राय फट् स्वाहा ।

ततो वह्नेर्मूर्त्तिमन्त्रैर्जुहुयात् ।
तद्यथा—

ॐ अग्नये जातवेदसे स्वाहा ।
ॐ अग्नये सप्तजिह्वाय स्वाहा ।
ॐ अग्नये हव्यवाहनाय स्वाहा ।
ॐ अग्नये अश्वोदरजाय स्वाहा ।
ॐ अग्नये वैश्वानराय स्वाहा ।
ॐ अग्नये कौमारतेजसे स्वाहा ।
ॐ अग्नये विश्वमुखाय स्वाहा ।
ॐ अग्नये देवमुखाय स्वाहा ।

इति हुत्वा—

ॐ इन्द्राय स्वाहा ।
ॐ अग्नये स्वाहा ।
ॐ यमाय स्वाहा ।
ॐ वरुणाय स्वाहा ।
ॐ नैर्ऋतये स्वाहा ।
ॐ वायवे स्वाहा ।
ॐ कुबेराय स्वाहा ।
ॐ ईशानाय स्वाहा ।
ॐ ब्रह्मणे स्वाहा ।
ॐ अनन्ताय स्वाहा ।
ॐ वज्राय स्वाहा ।
ॐ शक्तये स्वाहा ।
ॐ दण्डाय स्वाहा ।
ॐ खड्गाय स्वाहा ।
ॐ पाशाय स्वाहा ।
ॐ अङ्कुशाय स्वाहा ।
ॐ गदायै स्वाहा ।
ॐ त्रिशूलाय स्वाहा ।
ॐ पद्माय स्वाहा ।
ॐ चक्राय स्वाहा ।

इति हुत्वा—

स्रुवेण चतुर्वारमाज्यमादाय स्रुचि निधाय स्रुवेण पिधाय शृङ्गाग्रे पुष्पादिकं दत्त्वोत्तिष्ठेत्।

ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा वौषट्—इति वौषडन्तेनाग्निमन्त्रेण जुहुयात्।

ततो महागणपतिमन्त्रेण दशधा विभक्तेन दशाहुतीर्दद्यात्।

तद्यथा—

ॐ स्वाहा।

ॐ श्रीँ स्वाहा।

ॐ श्रीँ ह्रीँ स्वाहा।

ॐ श्रीँ ह्रीँ क्लीँ स्वाहा।

ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ स्वाहा।

ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ स्वाहा।

ॐ श्रीँ ह्रीँ ग्लौँ गँ गणपतये स्वाहा।

ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ गणपतये वर वरद स्वाहा।

ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ गणपये वर वरद सर्वजनं मे स्वाहा।

ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा—इति हुत्वा—

पुनस्तेनैव समस्तेन मन्त्रेण चतुर्वारं जुहुयात्।

इति सर्वसाधारणोऽग्निमुखविधिः।

ततश्चरुपाकं कुर्यात्।

यथा—आचार्यः प्राङ्मुखो भूत्वा नव्यं ताम्रादिपात्रमादायास्त्रमन्त्रितजलेन प्रक्षाल्य तस्मिन् पात्रे तण्डुलानुसारेण गोक्षीरं निधाय साधारं तत् पात्रं वह्नौ संस्थाप्य पञ्चदशप्रभृतिपरिमितान् शालितण्डुलान् मूलमन्त्रेणाभिमन्त्र्य तस्मिन् पात्रे क्षिप्त्वा पिधानपात्रमादायास्त्रमन्त्रितजलेन प्रक्षाल्य—

हुँ—इति कवचमन्त्रमुच्चरँस्तेन पात्रेण पाकपात्रमुखं पिधाय मूलमन्त्रमुच्चरँश्चरुं पचेत्।

ततः स्रुवेणाज्यमादाय स्विन्नं चरुं मूलमन्त्रमुच्चरन्नभिघारयेत्।

ततः—

हुँ——इति कवचमन्त्रेण तत्पात्रमवतार्य अस्त्रमन्त्राभिमन्त्रितकुशास्तीर्णमण्डले स्थापयेत् ।

ततश्चरुं त्रिधा विभज्य भागमेकं पात्रान्तरे निधाय देवतायै समर्पयेत् ।

द्वितीयं भागं वक्ष्यमाणहोमार्थं तृतीयं भागं भोजनार्थं स्थापयेत् ।

ततो वह्नौ देवताया आधारशक्त्यादिपीठमन्त्रान्तं संपूज्य तत्रेष्टदेवतामावाह्योपचारैः संपूज्यावरणदेवता अपि पूजयेत् ।

ततो देयमूलमन्त्रेण स्वाहान्तेन पञ्चविंशत्याज्याहुतीर्वह्निमुखे जुहुयात् ।
इदमेव वह्नीष्टदेवतयो'र्वक्त्रैकीकरण'मित्युच्यते ।

तत आत्माग्निदेवतानामैक्यं विचिन्त्य एकादशाज्याहुतीर्मूलेनैव दद्यात् । इदं 'च नाडीसन्धान'मित्युच्यते ।

तत आवरणदेवताभ्य एकैकामाहुतिं दत्वा ऋत्विग्भिरुक्तप्रकारेण संस्कृतेषु पूर्वादिकुण्डेषु क्रमेणाचार्यो वह्निं विहरेत् ।

ततः सर्वे ऋत्विजः स्वस्वकुण्डाग्नौ सावरणामिष्टदेवतामुपचारैः संपूज्य मूलमन्त्रेणाज्येन पञ्चविंशत्याहुतीर्हुत्वाऽऽवरणदेवताभ्य एकैकामाहुतिं दद्युः ।

ततो गुरुः पूर्वोक्तचरोर्द्वितीयभागं नवधा विभज्य भागमेकं स्वयं गृहीत्वा एकैकं भागं सर्वेभ्य ऋत्विग्भ्यो दद्यात् ।

ततस्तस्मिँश्चरौ घृतं निधाय सघृतेन चरुणाऽऽचार्य ऋत्विजश्च स्वे स्वे कुण्डे मूलमन्त्रेण प्रत्येकं पञ्चविंशत्याहुतीर्जुहुयुः ।

तत आवरणदेवताभ्य एकैकामाहुतिं दत्वा मूलमन्त्रेणाज्येन दश दशाहुतीर्हुत्वा वह्निरूपामिष्टदेवतां प्रणमेयुः ।

तत आचार्यश्चरोस्तृतीयभागं द्विधा विभज्य पलाशपत्रे पिप्पलपत्रे वा निधाय भागमेकं स्वयं गृहीत्वा परं भागं शिष्याय दद्यात् ।

ततो गुरुः शिष्यश्च—

नमः——इति हृन्मन्त्रमुच्चरन् ग्रासत्रयं ग्रासाष्टकं वा दन्तस्पर्शं विना भुक्त्वा मन्त्रपूतेन जलेनाचमनं कुर्यात् ।

ततो गुरुः कृताचमनं शिष्यं मूलमन्त्रेण सकलीकृत्य तस्मै पूर्वोक्तलक्षणं* हृन्मन्त्रितं दन्तकाष्ठं दद्यात् ।

ततः शिष्यस्तेन दन्तकाष्ठेन दन्तान् विशोध्य जलेन प्रक्षाल्य दन्तकाष्ठं विसृज्याचमनं कुर्यात् ।

अस्मिन्नेव समये पूर्वोक्तदन्तकाष्ठपरीक्षां केचित् कुर्वन्ति ।

ततः सायं सन्ध्योपासनं कृत्वा गुरुर्मूलमन्त्रेण स्वकल्पोक्तमन्त्रान्तरेण वा

---

* द्रष्टव्यमस्यैव ग्रन्थस्य पृ० ३२० ।

शिष्यस्य शिखां बध्वा मण्डपाद्बहिर्देवताया दक्षिणभागे वेदिकान्तरोपरि कुशशय्यायां पूर्वशिरस्कः शिष्येण सार्धं शयनं कुर्यात् ।

शिष्यश्च शयनसमये स्वप्नमानवमन्त्रेण शुभस्वप्नं प्रार्थयेत् ।

स्वप्नमानवमन्त्रो यथा—

भगवन् देवदेवेश शूलभृद्वृषवाहन ।
इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वतम् ॥

यद्वा—

ॐ हिलि २ शूलपाणये स्वाहा ।
नमो जय त्रिनेत्राय पिङ्गलाय महात्मने ।
वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥
स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ।
क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥

वैष्णवे तु—

ॐ नमः सकललोकाय विष्णवे प्रभविष्णवे ।
विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः ॥

यद्वा—

परब्रह्मस्वरूपस्त्वमन्तश्चरसि विश्वधृक् ।
शुभाशुभगतिं देव स्वप्ने मे विनिवेदय—इत्युच्चार्य जानुभ्यामवनीं स्पृष्ट्वा विष्णुं प्रणम्य प्रसन्नो वाग्यतो निजेष्टं विचिन्त्य शयनं कुर्यात् ।

ततः स्वप्नं दृष्ट्वा समुत्थायाचम्य पुष्पं धृत्वा गुरुं प्रणम्य गुरवे स्वप्नं निवेदयेत् ।

ततो गुरुः शुभमशुभं वा स्वप्नं निर्णीय स्वप्नो यदि शुभस्तदा देवतां प्रसन्नां जानीयात् । स्वप्नो यद्यशुभस्तदा शान्तिं कुर्यात् ।

दुःस्वप्नशान्तिस्तु—

फट् दुःस्वप्नदोषान् जहि २ फट् स्वाहा—इति मन्त्रेण ।

ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय हुँ फट् नमः स्वाहा—इति सिंहमन्त्रेण वा तद्देवतागायत्र्या वा पलाशसमिच्छतमाज्याहुतिशतं वा जुहुयात् ।

तत्र संकल्पस्तु—

ॐ अद्येत्यादि—अमुकगोत्रोऽमुकदेवशर्मा दुःस्वप्नशान्तिकामो गुरुद्वारा सक्षीरघृताक्तपालाशसमिदाहुतिशतमहं होष्यामि । इत्यधिवासनविधिः ।

ततो दीक्षादिने गुर्वादयः सर्वे प्रातरुत्थाय प्रातःकृत्यस्नानसन्ध्यादिनित्यकर्म समाप्य यागमण्डपं प्रविश्य देवतां नत्वा स्वे स्वे कुण्डे सघृतैस्तिलैस्तद्देवताकल्पोक्तद्रव्यान्तरैर्वा स्वाहान्तेन मूलमन्त्रेण प्रत्येकमष्टोत्तरसहस्राहुतीरष्टोत्तरशताहुतीर्वा जुहुयुः ।

ततो होमसमाप्तौ गुरुः समुत्थाय मण्डपाद्बहिर्गत्वा कृतस्नानं शिष्यं पञ्चगव्यं पाययित्वा दक्षिणद्वारेण मण्डपं प्रवेश्य स्वीयं कुण्डान्तिकमानयेत् ।

ततो दिव्यदृष्ट्या शिष्यं विलोक्य तद्धृदयाद्ब्रह्मनाड्याऽङ्कुशमुद्रया तच्चैतन्यमाकृष्य स्वब्रह्मनाडीमार्गेण स्वहृदये संयोज्याध्वशोधनं कुर्यात् ।

तद्यथा—शिष्यस्य पादयोः—

निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीताख्याः—पञ्चकला विचिन्त्य कूर्चेन तत्पादौ संस्पृश्य—

ॐ कलाध्वानं शोधयामि स्वाहा—इति सघृतैस्तिलैरष्टाहुतीर्जुहुयात् ।

ततः कलाध्वानं तत्त्वाध्वनि विलीनं विभाव्य शिष्यस्योपस्थप्रदेशे—

शिवशक्तिसदाशिवेश्वरविद्यामायाविद्याकलारागकालनियतिपुरुषप्रकृतिबुद्ध्यहङ्कारमनश्चक्षुःश्रोत्रघ्राणजिह्वात्वग्वाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुतेजोजलपृथिव्याख्यानि—षट्त्रिंशद्गणेशैवतत्त्वानि ।

जीवप्राणमनोबुद्धिशब्दस्पर्शरूपरसगन्धाकाशवायुतेजोजलपृथिवीचक्षुःश्रोत्रजिह्वाघ्राणत्वग्वाक्पाणिपादपायूपस्थसूर्यसोमाग्निवासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्यानि—द्वात्रिंशद्वैष्णवतत्त्वानि ।

आकाशवायुतेजोजलपृथिवीशब्दस्पर्शरूपरसगन्धमनोऽहङ्कारचक्षुःश्रोत्रजिह्वाघ्राणत्वग्वाक्पाणिपादपायूपस्थप्रकृतिमहत्तत्त्वाख्यानि—चतुर्विंशतिः सौरतत्त्वानि।

निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीताख्यकलापञ्चकविन्दुकलानादशक्तिसदाशिवाख्यानि—दशप्रकृतितत्त्वानि ।

आत्मविद्याशिवशिवविद्यात्मात्मविद्याशिवसर्वाख्यानि—दशशाक्ततत्त्वानि ।

आत्मविद्याशिवशिवविद्यात्मसर्वाख्यानि—त्रैपुरतत्त्वानि च विचिन्त्य शिष्यस्योपस्थप्रदेशं कूर्चेन संस्पृश्य—

ॐ तत्त्वाध्वानं शोधयामि स्वाहा—इत्यष्टाहुतीर्जुयात् ।

ततस्तत्त्वाध्वानं भुवनाध्वनि विलीनं विभाव्य शिष्यस्य नाभौ क्रमेण—

पातालरसातलमहातलतलातलसुतलवितलतलातलभूर्भुवःस्वर्महर्जनस्तपःसत्याख्यानि—चतुर्दश भुवनानि विचिन्त्य नाभिं स्पृष्ट्वा—

ॐ भुवनाध्वानं शोधयामि स्वाहा—इत्यष्टाहुतीर्जुहुयात् ।

ततो भुवनाध्वानं वर्णाध्वनि विलीनं विभाव्य शिष्यस्य हृदयेऽकारादिक्षकारान्तान् विचिन्त्य हृदयं स्पृष्ट्वा—

ॐ वर्णाध्वानं शोधयामि स्वाहा—इत्यष्टाहुतीर्जुहुयात् ।

ततो वर्णाध्वानं पदाध्वनि विलीनं विभाव्य शिष्यस्य ललाटे मन्त्रपदानि विचिन्त्य ललाटं संस्पृश्य—

ॐ पदाध्वानं शोधयामि स्वाहा—इत्यष्टाहुतीर्जुहुयात् ।

ततः पदाध्वानं मन्त्राध्वनि विलीनं विभाव्य शिष्यस्य मूर्ध्नि संपूर्णमन्त्रं विचिन्त्य मूर्धानं स्पृष्ट्वा—

ॐ मन्त्राध्वानं शोधयामि स्वाहा—इति पूर्ववदष्टाहुतीर्हुत्वा ब्रह्मरन्ध्रस्थिते परमशिवे मन्त्राध्वा विलीन इति चिन्तयेत् ।

एवं संहारक्रमेण शिष्यदेहे षड्विधमदमध्वशोधनं विधाय पुनः सृष्टिक्रमेण

परमशिवान् मन्त्राध्वनः पदाध्वा पदाध्वनो वर्णाध्वा वर्णाध्वनो भुवनाध्वा भुवनाध्वनस्तत्त्वाध्वा तत्त्वाध्वनः कलाध्वा उत्पन्न इति चिन्तयेत् ।

अत्र केचित्—

ॐ परमशिवान्मन्त्राध्वानमुत्पादयामि स्वाहा—इत्याहुतिभि क्रमेणाध्वनो जनयेदिति वदन्ति ।

ततः शिष्यं दिव्यदृष्ट्या विलोकयन्नात्मस्थितं तच्चैतन्यं स्ववहन्नाड्या तद्वहन्नाडीमार्गेण तद्धृदये योजयेत् ।

ततो मूलमन्त्रेण दशाहुतीर्हुत्वाऽऽवरणदेवताभ्य एकैकामाहुतिं दत्वा पूर्णाहुतिं कुर्यात् ।

तत्क्रमस्तु—होमावशिष्टेन घृतेन स्रुचमापूर्य पुष्पतिलयवफलादिकं निधायाधोमुखेन स्रुवेण स्रुचं पिधाय तदग्रे पुष्पं दत्वा मूलाच्चतुरङ्गुलं परित्यज्य शङ्खमुद्रया स्रुक्स्रुवौ धृत्वा तन्मूलेनाभिसंलग्नौ कृत्वोत्थितः सन् दक्षिणपादपुरःसरं वौषडन्तेन मूलमन्त्रेण पूर्णाहुतित्रयं दद्यात् ।

शाक्ते वाममार्गादौ च वामपादपुरःसरं पूर्णाहुतिं दद्यात् । वाममार्गे स्वाहान्तेन मूलमन्त्रेण ।

वैदिकक्रमस्तु—

*{ **मूर्द्धानं दिव**—इति मन्त्रेण ।
पूर्णादर्वी—इत्यादिमन्त्रेण वा पूर्णाहुतिं दद्यादिति विशेषः ।

ततो ब्रह्मार्पणमन्त्रैः पूर्णाहुतिं दद्यात् ।

मन्त्रो यथा ।

इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत् कृतं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा ।

एवं ब्रह्मार्पणमन्त्रेण पूर्णाहुतिं दत्वा वह्निस्थामिष्टदेवतां पञ्चोपचारैः संपूज्य प्रणम्य षडङ्गमन्त्रेण सकलीकृत्य संहारमुद्रया कुण्डादुद्वास्य कलशे संयोज्य पूर्वादिदिक्षु स्थापितान् ध्रुवादीनिन्द्रादिलोकपालान् बहिःस्थिता अङ्कुरार्पणदेवताश्च तत्तत्स्थानादुद्वास्य प्रधानकलशे समानीय तासां देवतानामिष्टदेवतैक्यं विचिन्त्य वह्नेर्विसर्जनार्थं महाव्याहृतिभिर्होमं कुर्यात् ।

---

* द्रष्टव्यौ वाजसनेयिसंहितायाः ७ अ०, २४ मं०, ३ अ० ४९ मं० ।

तद्यथा--

ॐ भूरग्नये पृथिव्यै च महते स्वाहा ।

ॐ भुवो वायवे अन्तरिक्षाय च दिवे च महते स्वाहा ।

ॐ स्वरादित्याय चन्द्रमसे दिग्भ्यश्च नक्षत्रेभ्यश्च स्वाहा ।

ॐ भूर्भुवःस्वश्चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यश्च महते स्वाहा ।

इति हुत्वा पूर्वोक्तप्रकारेण वह्नेर्जिह्वाङ्गमूर्त्तिमन्त्रैर्लोकपालान् तदायुधमन्त्रैश्चैकैकामाहुतिं हुत्वा पयसा जलेन वा मेखलासु वह्निं परिषिञ्च्य तन्मन्त्रेण पञ्चोपचारैः संपूज्य—

स्वस्ति श्रद्धां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् ।
आयुष्यं तेजआरोग्यं देहि मे हव्यवाहन ॥
भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक ।
कर्मान्तरेऽपि संप्राप्ते सान्निध्यं कुरु सादरम् ॥

इति संप्रार्थ्य—

भगवन्नग्ने पूजितोऽसि क्षमस्व—इत्युक्त्वा वह्निं प्रणम्य संहारमुद्रया विसृजेत् ।

ततो ब्रह्माणमुद्वास्य द्वात्रिंशत्पलप्रमाणेन निर्मितं ताम्रपात्रं तण्डुलैरापूर्य तदुपरि सुवर्णदक्षिणां निधाय ब्रह्मप्रतिनिधिब्राह्मणाय दद्यात् ।

दानवाक्यं यथा—

ॐ अद्येत्यादि—कृतैतद्दीक्षाकर्माङ्गभूतहोमकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे विप्राय तुभ्यमहं संप्रददे—इति पूर्णपात्रं दद्यात् ।

तत आचार्यः परिस्तरणकुशान् परिधींश्च तूष्णीमग्नौ प्रक्षिपेत् । नित्यहोमे तु तान् न दहेदिति विशेषः ।

ततः—

वौषट्——इति नेत्रमन्त्रमुच्चरन् नव्येन शुक्लवस्त्रेण शिष्यस्य नेत्रे बध्वा पुष्पैस्तदञ्जलिं पूरयित्वा तत्करं धृत्वा तिरस्करणीं विमोच्य शिष्यं देवतान्तिकमानीय स्वयं मूलमन्त्रमुच्चरन् देवतायै पीठोपरि पुष्पाञ्जलिं क्षेपयेत् ।

ततो गुरुणा निराकृतनेत्रबन्धः शिष्यः—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः—इति पठित्वा गुरुचरणौ प्रणम्य देवतां साष्टाङ्गं प्रणमेत् ।

ततो गुरुः शिष्यं दर्भास्तरे निवेश्य भूतशुद्धिक्रमेण पञ्चभूतात्मकं तद्देहं संहृत्य पुनः सृष्टिमार्गेणोत्पाद्य तद्देहे स्वकल्पोक्तन्यासान् विधायाभिषेकार्थमीशानदिशि विरचिते मण्डपान्तरे हस्तद्वयायामायामष्टाङ्गुलोच्छ्रितायां चतुरस्रवेदिकायां श्रीपर्ण्यादिकाष्ठनिर्मितपीठोपरि शिष्यं निवेश्य स्वयं देवतास्थानमागत्य पाद्यादिभिरुपचारैर्देवतां संपूज्य मूलेन पुष्पाञ्जलित्रयं दत्वाऽराधनार्पणं कुर्यात् ।

तद्यथा—मूलमन्त्रमुच्चार्य—

साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं देवदेवेश गृहाणाराधनं परम्—इत्युक्त्वा देवस्य दक्षिणकरे शक्तिविषये वामकरेऽर्घोदकमुत्सृजेत् ।

ततो देवतां प्रणम्य पुष्पाञ्जलिमादाय क्षमापयेत् ।

यथा—

यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम् ।
निवेदितं च नैवेद्यं तद्गृहाणानुकम्पया ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि त्वं गतिः परमेश्वर ॥
कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ।
अन्तश्चारेण भूतानां द्रष्टा त्वं परमेश्वर—इत्युक्त्वा पुष्पाञ्जलिं क्षिप्त्वा प्रणमेत् ।

ततः शिष्यार्थे वरं प्रार्थयेत् ।

तद्यथा—

कारुण्यनिलये देवि सर्वसन्निधिसंश्रये ।
शरण्ये वत्सले मातः कृपामस्मिन् शिशौ कुरु ॥
आणवप्रमुखैः पाशैः पाशितस्य सुरेश्वरि ।

दीनस्यास्य दयाधारे कुरु कारुण्यमीश्वरि ॥
ऐहिकामुष्मिकैर्भोगैरपि संबध्यतामसौ ।
स्वभक्तिः सकला चास्मै दीयतां निष्कलाश्रये—इति ।

पुन्देवते तु ।

कारुण्याश्रयदेवेश—इत्यादिपाठोऽनुसन्धेयः—

इति संप्रार्थ्य सर्वा आवरणदेवताः प्रधानदेवताङ्गे लीना इति विचिन्त्य तेजोरूपां देवतां ध्यात्वा—

भगवत्यमुकदेवते पूजिताऽसि क्षमस्व—इत्युक्त्वा संहारमुद्रया विसृज्य वहन्नाडीमार्गेण स्वहृदये तां स्थापयेत् ।

तत ऐशान्यां दिशि मण्डलं कृत्वा तद्देवताकल्पोक्तं निर्माल्यवासिनं संपूज्य—

लेह्यचोष्यान्नपानादि निर्माल्यं स्रग्विलेपनम् ।
निर्माल्यभोजिने तुभ्यं ददामि देवताज्ञया—इति निर्माल्यं दत्वा संहारमुद्रया निर्माल्यवासिनं विसृजेत् ।

ततो मूलमन्त्रेण स्वशिरसि किंचिन्निर्माल्यं धृत्वा कुम्भमुत्थाप्य शिष्यनिकटं गत्वा कुम्भमुखस्थान् पल्लवान् शिष्यस्य शिरसि विन्यस्य मातृकावर्णान् मूलमन्त्रं चोच्चरन् पञ्चवाद्यादिनादैर्विप्राशीर्भिश्च सार्धं कुम्भतोयेन शिष्यमभिषिञ्चेत् ।

ततो वर्धनीमुत्थाप्य तज्जलेनाभिषिञ्चेत् ।

ततोऽवशिष्टजलेन शिष्यमाचम्य षडङ्गैः सकलीकृत्य तं देवतात्मानं चिन्तयेत् ।

ततः शिष्यः समुत्थाय धौतवाससी परिधायाचम्य गुरोः सन्निधौ तदाज्ञया पूर्वाभिमुख उत्तराभिमुखो वा आसने उपविशेत् ।

ततो गुरुरात्मनः सकाशात् तद्देहे संक्रान्तां देवतां विचिन्त्य तयोरैक्यं विभाव्य गन्धपुष्पाद्यैः संपूज्य मन्त्रं दद्यात् ।

तद्यथा—

अमुकदेवतामन्त्रमहं ददामि—इति प्रतिज्ञां श्रावयन् गुरुः शिष्यहस्ते जलं दद्यात् ।

ददस्वानुग्रहपूर्वकम्—इति शिष्यो वदेत् ।

ततो गुरुः शिष्यस्य शिरसि हस्तं दत्वा देयमन्त्रमष्टोत्तरशतं प्रजप्य दक्षिणकर्णे त्रिवारं मन्त्रं श्रावयेत् ।

स्त्रीशूद्रयोस्तु वामकर्णे मन्त्रं कथयेत् । जलदानपूर्वकमन्त्रदानं ब्राह्मणमात्रविषयम् । तदितरेभ्यस्तु तद्विनैव मन्त्रं दद्यात् ।

ततो गुरुर्ज्योतिर्मयीं विद्यां स्वतः शिष्यतनुं प्रविशन्तीं विचिन्त्य—

मन्त्रोऽयमावयोस्तुल्यफलदोऽस्तु—इति ब्रूयात् ।

शिष्योऽपि तादृशीं विद्यां गुरुमुखात् स्वहृदयं प्रविशन्तीं विचिन्त्य—

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
सर्वदेवस्वरूपाय सर्वमन्त्रमयाय च ॥
घोरान्मृत्युमहापाशान्मोचितः कृपया त्वया ।
त्वत्प्रसादादहं नाथ कृतकृत्योऽस्मि सर्वतः—इति स्तुत्वा गुरुचरणयोर्दण्डवत् पतित एव तिष्ठेत् ।

ततो गुरुः—

उत्तिष्ठ वत्स मुक्तोऽसि सम्यगाचारवान् भव ।
कीर्त्तिश्रीकान्तिमेधायुर्बलारोग्यं सदाऽस्तु ते—इत्युक्त्वा शिष्यमुत्थापयेत् ।

ततः शिष्यो गुरुदेवमन्त्राणामैक्यं संभाव्य गुरोराज्ञया तत्सन्निधौ मन्त्रमष्टोत्तरशतं जपेत् । गुरुरपि मन्त्रदानानन्तरमष्टोत्तरसहस्रमष्टोत्तरशतं वा मन्त्रं जपेत् ।

ततः शिष्यो वित्तशाठ्यं विहाय सर्वस्वं तदर्धं तदर्धं वा गुरवे दक्षिणां दद्यात् ।

कुशत्रयतिलजलान्यादाय—

ॐ अद्येत्यादि—अमुकगोत्रोऽमुकशर्मा कृतैतदमुकदेवतामुकमन्त्रग्रहणप्रतिष्ठार्थमिमां दक्षिणाममुकगोत्रायामुकशर्मणे श्रीगुरवे तुभ्यमहं संप्रददे ।

एवं ब्रह्मप्रतिनिधिविप्राय ऋत्विग्भ्यश्च गोभूहिरण्यवासोऽलङ्कारादीन् दद्यात् । ततः पूजोपकरणसहितं मण्डपं गुरवे दद्यात् ।

ततो ब्राह्मणान् भोजयित्वा तेभ्यो दक्षिणां दत्वा तदाशिषः समादाय देवनिवेदितं नैवेद्यं तद्भक्तेभ्यो दत्वा गुरुशिष्यौ भुञ्जीयाताम् । दीक्षादिने गुरुशिष्ययोरुपवासो निषिद्धः ।

ततः शिष्यो दिनत्रयं गुरुकुले निवासं कृत्वा चतुर्थदिने देवतार्चनं कारयित्वा गुरुं प्रणम्य तदाज्ञामादाय स्वगृहं गच्छेत् ।

इति क्रियावतीदीक्षाप्रयोगः परिपूर्णः ।

एतदशक्तौ संक्षेपदीक्षा विधेया । सा च प्रोक्ता (निबन्धे) ।

मुहूर्त्ते सर्वतोभद्रे नवकुम्भं निधाय च ।
सोदकं गन्धपुष्पाभ्यामर्चितं वस्त्रसंयुतम् ॥
सर्वौषधीनवरत्नपञ्चपल्लवसंयुतम् ।
ततो देवार्चनं कृत्वा हुनेदष्टोत्तरं शतम् ॥

सर्वौषधीति तन्त्रान्तरे ।

जटामांसी वचा कुष्टं शैलेयं रजनीद्वयम् ।
शटीचम्पकमुस्तं च सर्वौषधिगणाः स्मृतः ॥

रजनीद्वयं हरिद्रा दारुहरिद्रा । [*] पृश्निपर्णी पिप्पली सहदेवी घृतकुमारी ।
नवरत्नानि पूर्व[†]मुक्तानि ।

पञ्चपल्लवमिति (वाशिष्ठे)

पनसाम्रं तथाऽश्वत्थं वटं वकुलमेव च ।
पञ्चपल्लवमित्युक्तं मुनिभिस्तन्त्रवेदिभिः ॥

तन्त्रान्तरे ।

अश्वत्थोदुम्बरवटप्लक्षाम्राः पञ्चपल्लवाः—इत्युक्तम् ।

(निबन्धे)

शिष्यं स्वलङ्कृतं वेद्यामुपाग्न्यमुपवेशयेत् ।
मन्त्रितैः प्रोक्षणीतोयैः शान्ति कुम्भजलैस्तथा ॥
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् ।

अष्टशतमष्टोत्तरशतम् ।

अथ संपादयन् मन्त्रं हस्तं शिरसि धारयन् ।

---

[*] पुस्तकत्रये ग्रन्थासन्दर्भवाक्यमिदमुपलभ्यते ।
[†] द्रष्टव्यमस्यैव ग्रन्थस्य २१२ पृ. ।

शमस्त्वित्यक्षतान् दद्यात् ततः शिष्योऽर्चयेद्गुरुम् ॥

इति संक्षेपदीक्षाविधिः ।

अथ वर्णमयी दीक्षा (मेरुतन्त्रे)

अथ वर्णमयीं दीक्षां शृण्वन्तु ज्ञानदायिनीम् ।
पुंप्रकृत्याऽऽत्मकत्वं च वर्णानां समुदीरितम् ॥
तादृक्त्वं च शरीरस्य प्रोक्तमेवास्ति देशिकैः ।
ततस्तनौ शिशोर्न्यस्येदर्णान् देशिकसत्तमः ॥
संहरेद्वैपरीत्येन वर्णाँस्तत्स्थानसंस्थितान् ।
देशिकेन्द्रः स्वसामर्थ्यादाज्ञया देवतात्मनः ॥
देवतात्मा भवेच्छिष्यस्तदासंलीनतत्त्वकः ।
ततस्तु शिष्यचैतन्यं परमात्मानि योजयेत् ॥
तानर्णाँस्तत उत्पाद्य न्यसेच्छिष्यशरीरके ।
तस्मिँश्च दृष्टिक्रमतस्तच्चैतन्यं पुनर्न्यसेत् ॥
भवेच्छिष्यो देवतात्मा नित्यानन्दात्मकः शिवः ।
ज्ञानदाऽर्णमयी दीक्षा कथिता सर्वसिद्धिदा ॥

इति वर्णमयी दीक्षाविधिः ।

अथ कलावती दीक्षा तत्रैव ।

अथ वक्ष्ये कलादीक्षामणिमाद्यष्टसिद्धिदाम् ।
वेदे पञ्चकला दीक्षा दक्षेऽष्टत्रिकला मता ॥
कुपञ्चाशत्कला वामे सिद्धमन्त्रगुरोस्तु सा ।
ग्राह्या द्रुतं सिद्धिकर्त्री विपरीते विपर्ययः ॥
कला निवृत्तिप्रमुखा भूतानां पञ्च चेरिताः ।
शिष्यकाये भूतमये वेधयेत् ताः क्रमात् सुधीः ॥
पादादिजानुपर्यन्तं निवृत्तिः संस्थिता कला ।

जान्वोः सकाशादानाभि प्रतिष्ठाख्या कला स्थिता ॥
नाभितः कण्ठपर्यन्तं विद्याख्या संस्थिता कला ।
कण्ठतो ह्याललाटं तु शान्त्याख्या संस्थिता कला ॥
भालाच्छिरोऽवधि प्रोक्ता शान्त्यतीता कला तथा ।
संहृतिक्रमतो विद्वान् वेधयेत् स्थानतोऽन्यतः ॥
स्थाने स्वीयाज्ञया चैवं दीक्षा पञ्चकला स्मृता ।
अष्टत्रिंशत्कलादीक्षायुक्तिं शृण्वन्तु देवताः ॥
क्रमेण कादिका वर्णा यत्र द्वादश संस्थिताः ।
विलोमा भादिका यत्र तत्र स्थानद्वये कलाः ॥
भावनीयास्तु सूर्यस्य षोडशासु विधोस्तथा ।
यकारादिस्थले वह्नेर्भावनीयाः कला दश ॥
ततो वर्णकलानां तु वर्णस्थानाच्च संहृतिः ।
पुनश्च जनयेच्छिष्यं कलादीक्षाविधिः स्वयम् ॥

इति कलावती दीक्षा ।

अथ वेधमयी दीक्षा तत्रैव ।

दीक्षां वेधमयीं वक्ष्ये या लब्ध्वा त्यजते जनः ।
तत्कालमेव संसारं जीवन्मुक्तोऽभिजायते ॥
मूलाधारेऽपि शिष्यस्य ध्यायेत् कञ्जं चतुर्दलम् ।
तस्य मध्ये त्रिकोणं च तन्मध्ये चापि कुण्डलीम् ॥
त्रिरावर्त्तमयीं देवीं विद्युत्पुञ्जस्वरूपिणीम् ।
महादेवमयीं साक्षाज्ज्ञानमात्रशरीरिणीम् ॥
अणोरणीयसीं देवीं चक्रषट्कप्रभेदिनीम् ।
सुषुम्णावर्त्मना दिव्यां यान्तीं शिवगृहं प्रति ॥

सान्तवादितलस्थार्णान् पद्मस्थाने समाहरेत्।
षड्दले कमले तां तु लान्तवाद्यर्णयुग्दले।
स्वाधिष्ठाने गुरुं सम्यग्योजयित्वा तु वेधयेत्।
तद्वर्णानानयेद्विष्णौ विष्णुं तं नाभिपङ्कजे॥
फान्तडाद्यर्णसंयुक्ते दिग्दले वेधयेत् स्वयम्।
वर्णाँस्तान् योजयेद्रुद्रे रुद्रं तं हृत्सरोरुहे॥
कान्तथाद्यर्णपत्राब्जे वेधयेदीश्वरे स्वयम्।
वर्णाँस्तानाहरेदस्मिन् कण्ठपद्मे च तं तथा॥
कलादलमये पद्मे स्वरान् संयोज्य यत्नतः।
सदाशिवेऽथ संयोज्य ताँस्तद्भ्रूमध्यपद्मके॥
द्विदले हक्षसंयुक्ते वेधयित्वा तु देशिकः।
शक्त्या सहैवमात्मानं नयेत् परशिवावधि॥
देशिकाज्ञावशाच्छिष्यो दग्ध्वाऽज्ञानं तदा क्षितौ।
पतेदवाप्तविज्ञानः सर्वज्ञो जायते ततः॥
सदाशिवः स्वयं भूयात् सत्यमेव न संशयः।
इयं ज्ञानप्रदा प्रोक्ता दीक्षा वेधात्मिका शुभा॥

इति वेधमयी दीक्षा।

अथ पञ्चायतनी दीक्षा। तत्र मुख्यकलशं मध्ये संस्थाप्य चतुर्षु कोणेषु चतुरः कलशान् संस्थाप्य पञ्चदेवता आवाह्य पूजयेत्।

अथ वा एकमेव कलशं संस्थाप्य वक्ष्यमाणक्रमेण देवताः पूजयेत्। 'प्रोक्तं नैवं कलशविधिर्नैकेन वा नैककुम्भै'रिति (प्रपञ्चसार-) वचनात्।

तत्र देवतास्थापनक्रम उक्तो (ज्ञानमालायाम्)।

यदा तु शङ्करं मध्ये ऐशान्यां श्रीपतिं यजेत्।
आग्नेय्यां च तथा हंसं नैर्ऋत्यां पार्वतीसुतम्॥

वायव्यां च सदा पूज्या भवानी भक्तवत्सला ।
यदा तु मध्ये गोविन्दमैशान्यां शङ्करं यजेत् ॥
आग्नेय्यां गणनाथं च नैर्ऋत्यां तपनं तथा ।
वायव्यामम्बिकां चैव यजेन्मन्त्री समाहितः ॥
सहस्रांशुं यदा मध्ये ऐशान्यां पार्वतीपतिम् ।
आग्नेय्यामेकदन्तं च नैर्ऋत्यामच्युतं यजेत् ॥
वायव्यां पूजयेद्देवीं भोगमोक्षैकदायिनीम् ।
भवानीं तु यदा मध्ये ऐशान्यां माधवं यजेत् ॥
आग्नेय्यां पार्वतीनाथं नैर्ऋत्यां गणनायकम् ।
प्रद्योतनं च वायव्यामाचार्यस्तु प्रपूजयेत् ॥
हेरम्बं तु यदा मध्ये ऐशान्यामच्युतं यजेत् ।
आग्नेय्यां पञ्चवक्त्रं तु नैर्ऋत्यां जगदम्बिकाम् ॥
वायव्यां द्युमणिं चैव यजेन्मन्त्री ह्यतन्द्रितः ।
स्वस्थानवर्जिता देवाः शोकदुःखभयप्रदाः ॥
तन्मण्डलस्थितो राजा साधकश्च विनश्यति ।

तन्त्रान्तरे—

शम्भौ मध्यगते हरीनहरभूदेव्यो हरौ शङ्करे-
भास्येनागसुता रवौ हरगणेशाजाम्बिकाः स्थापिताः ।
देव्यां विष्णुहरैकदन्तरवयो लम्बोदरेऽजेश्वरा-
र्येनाः शङ्करभागतो निगदिता व्यस्तास्तु ते हानिदाः ॥

(मेरुतन्त्रे)

इशेऽजेनशजाशिवा हरावीशेशजेनसाः ।
रवावीशेशजाजोमा देव्यां विशिगभास्कराः ॥

गणेशेऽजेशभादेभ्योऽभ्यर्च्या ईशादिकोणतः ।

पूजाक्रमस्तु तन्त्रान्तरे ।

मुख्ये पुष्पाञ्जलिं दत्वा गणेशाद्यर्चनं भवेत् ।
गणेश एव मुख्यश्चेत् तत्र सूर्यक्रमाद्भवेत्—इति ॥

इदं च ।

एकपीठे पृथक्पूजां विना यन्त्रं करोति यः ।
अङ्गाङ्गं तु परित्यज्य देवताशापमाप्नुयात् ॥

इति कलावतीवचनेन यन्त्रातिरिक्ताधारे पृथक्पूजाया निषेधात् प्रतिष्ठितयन्त्रादिविषयं पीठस्यार्चनमङ्गदेवजयनमित्यादि (सनत्कुमारीय-) वचनात् । अङ्गदेवतापूजाकालस्तु पीठार्चनानन्तरमिति (तन्त्रसारकृतः) । (महाकालसंहितायां-) तु पीठार्चनात् प्रागेव गणेशादिपूजनमुक्तम् ।

पञ्चायतनवानस्मिन्नेवावसर उत्सुकः ।
गणेशविष्णुसूर्येशान् पूजयेदुपचारकैः—इति ।

वस्तुतस्तु पीठास्यार्चनमङ्गदेवयजनमित्यादिवचनमेककलशपक्षे । पञ्चकलशपक्षे तु पञ्चसु सर्वतोभद्रमण्डलेषु पञ्चकलशानुक्तक्रमेण संस्थाप्य पञ्चदेवताः पृथक् पूजयेदिति न कश्चिद्विरोधः । (श्यामादौ) तु पञ्चायतनदीक्षाभाव उक्तः (चामुण्डातन्त्रे) ।

श्यामायां भैरवीताराछिन्नमस्तास्तु भैरवे ।
मञ्जुघोषे तथा रौद्रे पञ्चाङ्गो नेष्यते बुधैः ॥

इति पञ्चायतनदीक्षाविधिः ।

(षडन्वयमहारत्ने)

आणवी बहुधा दीक्षा शाक्तेयी शाम्भवी पुनः ।
एकधैवेति विद्वद्भिः पठ्यते शास्त्रकोविदैः ॥
आणवी बहुधेत्युक्त्वा तद्भेदं त्वधुनोच्यते ।
स्मार्त्ती मानसिकी यौगी चाक्षुषी स्पार्शनी तथा ॥

वाचिकी मान्त्रिकी होत्री शास्त्री चेत्यभिषेचिकी ॥

अथ स्मार्त्ती दीक्षा तत्रैव ।

विदेशस्थं गुरुं स्मृत्वा शिष्यं पाशत्रयं क्रमात् ।
विश्लिष्य लयभोगस्य विधानेन परे शिवे ।
सम्यग्योजनरूपैषा स्मार्त्ती दीक्षेति कीर्त्तिता ॥

इति स्मार्त्ती दीक्षा ।

अथ मानसी दीक्षा तत्रैव ।

स्वसन्निधौ समासीनमालोक्य मनसा शुचिम् ।
मलत्रयादुपायैर्या मोचकी सा तु मानसी ॥

इति मानसी दीक्षा ।

अथ योगदीक्षा तत्रैव ।

योगोक्तक्रमतो योगी शिष्यदेहं प्रविश्य तु ।
गृहीत्वा तस्य चात्मानं स्वात्मना योजनात्मिका ॥
योगदीक्षेति सा प्रोक्ता मलत्रयविनाशिनी ।

इति योगदीक्षा ।

अथ दृग्दीक्षा (मेरुतन्त्रे)

निमील्य नयने ध्यात्वा परमात्मनि देवताम् ।
तद्दर्शनानन्दपूर्णनेत्राभ्यां वीक्षयेद्गुरुः ॥
शिष्यं प्रसन्नचित्तः सन् पश्चादुपदिशेदिति ।
मन्त्रः शिष्यस्य सिद्ध्यै स्याद्दृग्दीक्षेयं फलप्रदा ॥

(षडन्वयमहारत्ने)

शिवोऽहमिति निश्चित्य वीक्षणं करुणार्द्रया ।
दृशा सा चाक्षुषी दीक्षा सर्वपापप्रणाशिनी ॥

इति दृग्दीक्षा ।

अथ स्पर्शदीक्षा तत्रैव ।

स्वयं परशिवो भूत्वा निःसंदिग्धमना गुरुः ।

शिवहस्तेन शिष्यस्य समन्त्रं मूर्ध्नि संस्पृशेत् ॥
स्पर्शदीक्षेति सा प्रोक्ता शिवाभिव्यक्तकारिणी ।

शिवहस्तेनेति ।

गन्धैर्मण्डलकं स्वीये विदध्याद्दक्षिणे करे ।
विधिना चार्चयेद्देवमित्थं स्याच्छिवहस्तकः—इति (सोमशम्भु–) प्रोक्तरूपेणेत्यर्थः ॥

(मेरुतन्त्रे)

गुरुः स्वस्य गुरुं ध्यायेत् स्वहस्ते शिवरूपिणम् ।
मूलविद्यां षडङ्गं च मातृकादिमनून् जपन् ॥
शिष्यस्य मस्तके दत्वा कृपया दक्षिणं करम् ।
पश्चादुपदिशेत् प्रोक्ता स्पर्शदीक्षाऽतिसिद्धिदा ॥

इति स्पर्शदीक्षा ।

अथ वाचिकी दीक्षा (षडन्वयमहारत्ने)

गुरुवक्त्रं निजं वक्त्रं विभाव्य गुरुरादरात् ।
गुरुवक्त्रप्रयोगेण दिव्यमन्त्रादिकं शिशौ ॥
मुद्रान्यासादिभिः सार्धं दद्यात् सेयं हि वाचिकी ।

(मेरुतन्त्रे)

सदाशिवे तु चिद्रूपे गुरुश्चित्तं निधापयेत् ।
मन्त्रान् समस्तांस्तज्जातान् ध्यायेत् स्वयं तदात्मकः ॥
जातो गुरोश्च कृपया केवलोऽहं सदाशिवः ।
इति ध्यायन्नुपविशेद्वाग्दीक्षा त्वियमीरिता ॥

इति वाचिकी दीक्षा ।

अथ मान्त्री दीक्षा (षडन्वयमहारत्ने)

दीक्षा परा तथा मन्त्रन्याससंयुक्तविग्रहः ।
स्वयं मन्त्रतनुर्भूत्वा सक्रमं मन्त्रमादरात् ॥

दद्याच्छिष्याय सा दीक्षा मान्त्री मलविघातनी ।

इति मान्त्री दीक्षा ।

अथ होत्री दीक्षा तत्रैव ।

कुण्डे वा स्थण्डिले वाऽपि निःक्षिप्याग्निं विधानतः ।
लयभोगक्रमेणैव प्रत्यध्वानं यथाक्रमम् ॥
मन्त्रवर्णकलातत्त्वपदविष्टपमेव च ।
शुद्ध्यर्थं होमयेदेषा होत्री दीक्षा समीरिता ॥

लयभोगक्रमेणेति । वेधदीक्षाक्रमेण मूलाधाराधिष्ठितवर्णदेवतासंहाररूपेणेत्यर्थः

इति होत्री दीक्षा ।

अथ शास्त्री दीक्षा तत्रैव ।

योग्यशिष्याय भक्ताय शुश्रूषार्चापराय च ।
साधं शास्त्रप्रदा त्वय्या शास्त्री दीक्षेति चोच्यते ॥

इति शास्त्री दीक्षा ।

अथाभिषेचिकी दीक्षा तत्रैव ।

शिवं च शिवपत्नीं च कुम्भे संपूज्य सादरम् ।
शिवकुम्भाभिषेकात् सा दीक्षा स्यादभिषेचिकी ॥

इत्यभिषेचिकी दीक्षा ।

अथ शाम्भवी दीक्षा (मेरुतन्त्रे)

गुरोरालोकमात्रेण भाषणात् स्पर्शनादपि ।
सद्यः संजायते ज्ञानं सा दीक्षा शाम्भवी स्मृता ॥

इति शाम्भवी दीक्षा ।

अथोपदेशदीक्षा (विश्वसारे)

तत्राप्यशक्तः कश्चिच्चेदब्जमभ्यर्च्य साक्षतम् ।
तदम्बुनाऽभिषिञ्च्याष्टवारं मूलेन के करम् ॥
निधायाष्टौ जपेत् कर्णे उपदेशे त्वयं विधिः ।

तत्रेति। पूर्वोक्तसंक्षेपदीक्षायामित्यर्थः। अब्जमिति शङ्खम्। के करं निधायेति। शिरसि हस्तं न्यस्येदित्यर्थः।

अथोपदेशदीक्षान्तरं तत्रैव।

महादीक्षा तथा दीक्षा उपदेशस्ततः परम्।
युगे युगे च कर्त्तव्या उपदेशः कलौ युगे॥
चन्द्रसूर्यग्रहे तीर्थे सिद्धिक्षेत्रे शिवालये।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते॥

(मेरुतन्त्रे)

भुक्तिमुक्तिप्रसिद्ध्यर्थं परीक्ष्य विधिवद्गुरुः।
पश्चादुपदिशेन्मन्त्रमन्यथा निष्फलं भवेत्॥
अन्यायेन च यो दद्यात् गृह्णात्यन्यायतश्च यः।
ददतो गृह्णतो वाऽपि कुल*शापो भविष्यति॥
गुरुशिष्यावुभौ मोहादपरीक्ष्य परस्परम्।
उपदेशं ददद्गृह्णन् प्राप्नुयातां पिशाचताम्॥
अशास्त्रीयोपदेशं तु यो गृह्णाति ददाति च।
भुञ्जाते तावुभौ घोरान् नरकानेकविंशतिम्॥
असंस्कृत्योपदेशं तु यः करोति विमूढधीः।
विनश्यन्ति च तन्मन्त्राः सैकते शालिबीजवत्॥
अनर्हे मन्त्रविज्ञानं न तिष्ठति कदा चन।
तस्मात् परीक्ष्य वक्तव्यमन्यथा निष्फलं भवेत्॥
सच्छिष्यायातिभक्ताय यज्ज्ञानमुपदिश्यते।
तत् प्राप्नोति प्रतीतिस्त्वं गोक्षीरात् तु यथा घृतम्॥

---

* कुलनाश इति २पु ०पा० ।

धनेच्छाभयलोभाद्यैरयोग्यं यदि दीक्षयेत् ।
देवताशापमाप्नोति कृतं च विकृतं भवेत् ॥

इत्युपदेशदीक्षाविधिः ।

अथ क्रमदीक्षाविधिः । (तन्त्रचिन्तमणि-) धृत-(शक्तिशङ्गमकुलार्णवा-) दिवचनानि ।

सुन्दरी तारिणी काली क्रमदीक्षाभिगामिनी ।
क्रमपूर्णो महेशानि क्रमाच्छम्भुर्भविष्यति ॥
चन्द्राग्निपक्षषोढाख्यपरानिर्वाणतत्परा ।
षट्शाम्भवं ततो देवि चक्रसंभेदमेव च ॥
स्वचक्रदेहविज्ञानं परकायप्रवेशनम् ।
एतज्ज्ञानाद्भवेन्मेधा दीक्षा प्रोक्ता मया तव ॥
हादाविदं निगदितं शृणु कादौ महेश्वरि ।
चन्द्राग्निरसराज्ञी च महाराज्ञी ततः शिवे ॥
महाकामकला काली गुह्यकाली ततः शिवे ।
गुह्यकाली द्विधा प्रोक्ता सकला निष्कला क्रमात् ॥
दशवक्त्रा तु सकला प्रोक्ता वा सृष्टिकारिका ।
उग्रा सौम्या महाक्रूरा त्रिधा साऽपि प्रकीर्त्तिता ॥
निष्कला गुह्यसंशान्तो काली भेदेन कीर्त्तिता ।
केवलेयं भवेन्मेधाह्वयी साम्राज्यरूपिणी ॥
चन्द्राग्निवेदपञ्चार्णा तथा नीला क्रमेण च ।
हंसतारा महानीला तदन्ते चीनसम्भवी ॥
केवला तु भवेन्मेधा ऋद्धिसिद्धिक्रिया द्विधा ।
त्रितया दिव्यसाम्राज्ये मेधा दीक्षा प्रकीर्त्तिता ॥
देवरूपा दिव्यरूपा मन्त्ररूपा महापरा ।

सर्वरूपा सर्वपूर्वा महासाम्राज्यमेधया ॥
ऋद्धिसिद्धिक्रमेणैव भेदबाहुल्यमीरितम् ।
विद्या राज्याभिधा दीक्षा छिन्नमस्ताविधौ स्मृता ॥
चन्द्रवह्निरसारक्तश्यामा च षोडशी तथा ।
परा षोढा सप्तदशी तदा जाता परा भवेत् ॥
दीपिनी मालिनी कुब्जा क्रमाद्विद्यादिराज्यदा ।
वगला या महेशानि साम्राज्यपरमे स्थिता ॥
चन्द्रवेदसूक्ष्ममेरुमन्त्रहीनं शिवान्तरम् ।
हृदयं च शतार्णं च पञ्चास्त्रं कुल्लुका तथा ॥
गायत्री क्रमयोगेन साम्राज्यपरमेष्ठ्यधृक् ।
एतत्पञ्चकसंयुक्तः सर्वसाम्राज्यबुद्धिधृक् ॥
श्रीदिव्यसर्वसाम्राज्यदीक्षासर्वोत्तरा भवेत् ।
ततोऽपि दीक्षा देवेशि नास्ति ब्रह्माण्डगोलके ॥
दश विद्याप्रभेदाश्च महाविद्याप्रभेदजाः ।
सिद्धिविद्याप्रभेदाश्च महामन्त्रास्तथैव च ॥
तदङ्गमन्त्रा देवेशि शावरं देशशावरम् ।
कालशावरकं देवि तथैव सिद्धिशावरम् ॥
त्रिधा दर्शनमन्त्राश्च तथाऽऽम्नायक्रमोद्भवाः ।
कादिहादिक्रमत्वेन ऊर्द्ध्वाम्नाये कलौ शिवे ॥
तथाऽऽयतनमन्त्राश्च यत् किं चिन्मन्त्रजालकम् ।
सर्वाधिकारो देवेशि एतद्दीक्षाविधौ भवेत् ॥
एतद्दीक्षासमायुक्तः साक्षाच्छ्रीकालिका स्वयम् ।

प्रहराष्टक्रमेणैव दशविद्यास्वरूपधृक् ॥
कामकलाभिधा विद्या सभेदा वृत्तिदेवता ।
अङ्गमन्त्रास्तथाऽन्येऽपि तस्य चास्त्रगताः सदा ॥
क्रमदीक्षा महेशानि पञ्चविद्यासु भेदतः ।
तदङ्गमन्त्रा गायत्रीकुल्लुकापञ्चकं शिवे ॥
अन्यविद्याविधौ प्रोक्तं रहस्यातिरहस्यकम् ।
श्रीविद्यायां कालिकायां तारायां परमेश्वरि ॥
क्रमदीक्षां विना देवि यो जपेत् साधकाधमः ।
स दरिद्री महाघोरी लक्ष्मीहीनस्तु निन्दितः ॥
अथ वा वातुलो भूयान्मन्त्रक्षोभमवाप्नुयात् ।
क्रमदीक्षासमायुक्तो राजा भवति निश्चितम् ॥
महाविभवसंयुक्तः सर्वसिद्धिसमन्वितः ।
वीजयी विनयी साधुः सिद्धश्च सिद्धिदः शुभः ॥
प्रहृष्टात्मा सर्ववेत्ता त्रिकालज्ञः कविः सुखी ।
कोटिसिद्धीश्वरः शूरः सुन्दरः काममोहनः ॥
आनन्दात्मा *परात्मा च पराजितगुणोत्तरः ।
राजराजेश्वरः साक्षान्महाकालसमः कलौ ॥
नैतद्विद्योपासकस्य दारिद्र्यं दीनता क्व चित् ।
गुरुहीनात् क्रमत्यागात् संप्रदायवियोगतः ॥
दारिद्र्यं प्रथमं भूयान्नात्र कार्या विचारणा ।
चिन्तामणिगृहं यत्र यत्र रत्नस्य मन्दिरम् ॥
नवरत्नात्मसोपानं सर्वैश्वर्यास्पदं गृहम् ।

---

* परानन्द इति २ पु० पा० ।

कल्पवृक्षवनं यत्र पारिजातवनं तथा ॥
स्पर्शमणेस्तु प्राकारो दारिद्र्यं तत्र कुत्र वै ।
तस्मात् क्रमविहीनस्य दारिद्र्यं तु पदे पदे ॥
क्रमयुक्तं गुरुं प्राप्य क्रमं संप्रार्थयेत् सुधीः ।
अन्यथा गुरुमौढ्येन दरिद्रत्वमवाप्नुयात् ॥
अल्पायुर्वा भवेद्देवि नात्र कार्या विचारणा ।

दीक्षापद्धतौ (वाडवानलीय)वचनम्

गविसूमापतीशाश्च कथ्यन्ते दिक्षु च क्रमात् ।
देशिकेन क्रमज्ञेन दीयन्ते यद्विधानतः ॥
क्रमदीक्षेति सा प्रोक्ता व्युत्क्रमो नैव सिद्धिदः ।
क्रमदीक्षाविधिर्यत्र तत्र पूर्णाभिषेचनम् ॥

इति क्रमदीक्षाप्रकारः ।

अथ पूर्णाभिषेकदीक्षाविधिः (मेरुतन्त्रे) पूर्वोक्तदीक्षाभेदानुक्त्वा—

एवं दत्वा गुरुर्दीक्षां कुर्यात् पूर्णाभिषेचनम् ।
विना येनाभिषेकेण साधकः पूर्णबोधताम् ॥
आचार्यत्वं न चाप्नोति सद्गतिं च समीहिताम् ।
तस्माद्गुरुः प्रियं शिष्यं बोधयित्वाऽभिषेचयेत् ॥

(शक्तिसङ्गमकुलार्णवादौ)

विना पूर्णाभिषेकेण पशुरूपः शिवोऽपि च ।
विना पूर्णाभिषेकेण देवता न प्रसीदति ॥
विना पूर्णाभिषेकेण कालीं तारां च यो जपेत् ।
तस्य क्रियां हरिष्यामि वातुलो जायते नरः ॥
विना पूर्णाभिषेकेण गुरुधर्मेण पार्वति ।
न जपो न तथा होमो न पूजा पूर्णता क चित् ॥

विशेषतः कौलिकानां पूर्णाभिषेक आवश्यकः ।

पूर्णाभिषेकहीनस्तु कौलिको म्रियते यदि ।
पिशाचत्वमवाप्नोति यावदाभूतसंप्लवम्—इति (कुलार्णववचनात्)।

तथा—

पूर्णाभिषेको देवेशि दशविद्याविधौ स्मृतः ।

पूर्णाभिषेककाला उक्ताः (तन्त्रराजे)

ग्रहाणां वैपरीत्येषु जन्मर्क्षे ग्रहणे द्वयोः ।
कुहूप्राप्तौ रिपुक्लेशे कुर्यात् पूर्णाभिषेचनम् ॥
तेन दोषाः स्पृशन्त्येनं न कदा चन तद्बलात् ।

(शक्तिसङ्गमादौ)

पूर्णाभिषेकदीक्षा तु चन्द्रसूर्यग्रहे भवेत् ।

अन्येष्वपि पुण्यकालेषु पूर्णाभिषेकदीक्षा कर्त्तव्यैव ।

सप्तसूक्तेषु कालेषु पुण्येष्वन्येषु वाऽऽदरात्—इति (तन्त्रराज-) वचनात् ।

विधानमाह ।

पूर्वोक्तमण्डपे स्थित्वा गुरुर्ध्यानपरायणः ।
अङ्कुरारोपणं वास्तुयागं कुर्यात् परेऽहनि ॥
कुण्डं निर्माय यत्नेन यथाविहितमादरात् ।
होमं कृत्वा गुरुकुलं मान्यं पूज्यमथादरात् ॥
वेदिकायामिष्टदेवं गुरुत्रितयमादरात् ।
वस्त्रालङ्करणैः पूज्या गुरुशक्तय एव च ॥
तथा दिव्यौघचरणं सिद्धौघचरणं शिवे ।
मानवौघं महेशानि स्वगुरूणां चतुष्ककम् ॥

(मेरुतन्त्रे)

विरच्य विपुलं चक्रं मण्डपेऽतिमनोहरम् ।

---

* अशुभफलदेषु ग्रहेषु सत्स्वति ।

† चन्द्रसूर्ययोरिति ।

‡ शत्रुभिः क्लेशे प्राप्ते इति ।

खारीतोयभृतं कुम्भं स्थापयेच्चक्रमध्यतः ॥
अन्येषु कलशाँस्तत्र वस्त्रहेमसमन्वितान् ।
दलेषु विविधाः स्थाप्यास्तत्रावाह्येष्टदेवताम् ॥
अभ्यर्च्य मध्ये चान्तेषु साङ्गावरणदेवताः ।

तन्त्रान्तरे ।

मध्ये मूलघटः स्थाप्यस्ततः पूजाक्रमेण च ।
सर्वावरणकुम्भाश्च स्थापनीयाः समन्ततः ॥

(तन्त्रराजे)

विरच्य विपुलं चक्रं प्रतियोनि च षोडश ।
त्रिकोणानि विधायात्र मध्ये कुम्भं च विन्यसेत् ॥
सौवर्णं राजतं ताम्रं काचं मार्त्तिकमेव च ।
पूरितं खारितोयेन क्वथितेनाक्षरौषधैः ॥
निःक्षिप्य नव रत्नानि धान्यानि विविधानि च ।
हिरण्यानि सताम्राणि वासोभ्यामभिवेष्टयेत् ॥
रक्ताभ्यां चन्दनैश्चूतपनसाश्वत्थपल्लवैः ।
शतक्रतुलताबद्धैर्मातुलुङ्गफलान्वितैः ॥
विधाय कलशानन्यानन्येष्वेकैकशो न्यसेत् ।
सार्धं सहस्रं षट्त्रिंशत्पञ्चसंख्याः क्रमोदिताः ॥

खारीतोयमिति । खारीलक्षणमुक्तं (स्कन्दपुराणे)

पलद्वयं तु प्रसृतिः कुडवं द्विगुणं मतम् ।
चतुर्भिः कुडवैः प्रस्थ आढकस्तैश्चतुर्गुणैः ॥
चतुर्गुणो भवेद्द्रोणः कुम्भस्तद्द्वयतः स्मृतः ।
कुम्भैस्तैरष्टभिः खारी .... इति ॥

(तन्त्रराजे)
मध्ये चक्रेषु तोयादि कृत्वा वात्वाऽभिपूज्य च ।
कालात्मनि च मन्त्राँश्च जपित्वा पूर्ववासरे ॥
जन्मर्क्षे प्रातरुत्थाय स्वनित्यान्ते प्रपूजयेत् ।
सहस्रं प्रजपेत् पश्चाद्धोमं कृत्वा समन्ततः ॥
(त्रिशक्तिरत्ने)
नानोपचारैः संपूज्य सहस्रं जुहुयाच्छुचौ ।
अभिषिञ्चेद्गुरुः शिष्यं नामास्मै प्रदिशेत् स्वयम् ॥
(तन्त्रराजे)
शृङ्गकाहलशङ्खादिवाद्यसङ्गीतनर्त्तनैः ।
मुदितैर्योगिनीवृन्दैरेकैकं देवतात्मभिः ॥
घृतैः सुपूजितैः सार्धमाभिषिञ्चेद्गुरुः स्वयम् ।
(मेरुतन्त्रे)
स्पृशँश्च मध्यकलशमाचार्यः प्रपठेदिति ।
साङ्गाँश्च चतुरो वेदाँस्ततस्तेन जलेन तु ॥
अभिषिञ्चेद्गुरुः शिष्यमिति पूर्णाभिषेचनम् ।
(तन्त्रराजे)
अथ वा खण्डवत्यष्ट कलशाँस्तत्र विन्यसेत् ।
तेषु शक्तीः समावाह्य संपूज्यैवाभिषेचयेत् ॥
एकं वा कलशं जन्मदिने कृत्वाऽभिषेचयेत् ।
तथा ।
सोमसूर्याग्निरूपत्वं जलस्य परिकीर्त्तितम् ।
तस्मादशेषदुःखार्त्तिशान्त्यै स्यादभिषेचनम् ॥
तन्त्रान्तरे ।
अभिषेकक्रियाभिज्ञ उद्वर्त्तनपुरःसरम् ।

स्नानद्वयं यथोक्तेन कृत्वा यत्नेन पार्वति ॥
पञ्चपल्लवयोगेन दूर्वाविल्वफलैस्तथा ।
वैदिकैस्तान्त्रिकैर्मन्त्रैः सेचयेच्छिष्यमादरात् ॥
अयमेव महादेवि पूर्णादीक्षाक्रमः स्मृतः ।
अन्यत् सर्वं महेशानि दीक्षापटलगोचरम् ॥

स्नानद्वयमिति । क्रियावत्यादिदीक्षोक्तमेकमपरं पूर्णाभिषेकरूपमित्यर्थः । तदुक्तं (तन्त्रराजे)

अथाभिषेकं द्विविधं समवाप्य तदाज्ञया ।
अनुग्रहादि कुर्वीत सिद्धये नान्यथा भवेत् ॥
विधाय चक्रं तन्मध्ययोन्यां कुम्भं विधाय तु ।
वर्णक्वाथैः समापूर्य अभिषिञ्च्य वदेन्मनुम् ॥
क्रमागतसमाचारनिरते भक्तिशालिनि ।
द्वितीयमभिषेकं च कुर्याद्दिव्यात्मसिद्धये ॥

(मेरुतन्त्रे)

देवेभ्यः सर्वतन्त्राणि तन्त्रेभ्यो मनवस्तथा ।
यतो यातास्ततः शिष्यः सर्वमन्त्रैकभाजनम् ॥
भवेदाचार्यनामा च कुर्यान्नामान्तरं गुरुः ।
एतादृशस्य यो दीक्षां गृह्णीयात् स तु सिद्धिभाक् ॥
सर्वमन्त्रप्रदानेषु समर्थः स तु जायते ।
सर्वे देवा वशास्तस्य वेदपन्थास्तु सात्त्विकः ॥
एष एव विधिस्तत्र मार्गे स्याद्दक्षिणाभिधे ।
विशेषस्तत्र तोयानि तीर्थानामाहरेत् सुधीः ॥
गङ्गाया यमुनायाश्च सरस्वत्या महोदधेः ।

सिन्धुगोदावरीरेवाकावेरीभ्यः पृथूदकात् ॥
महेन्द्रजायाः सरयूचर्मन्वत्योश्च पुष्करात् ।
महानद्या वेदिकाया क्षिप्रावेत्रवतीजलम् ॥
कुरुक्षेत्रस्य गण्डक्याः पूर्णाया मानसस्य च ।
घटे दत्वा जपेन्मन्त्रान् नानातन्त्रगतानपि ॥
अभिषिक्तस्तु तैस्तोयैः सिद्धास्ते मनवोऽस्य तु ।
प्रयोगार्थं तथा न्यस्य दानार्थम् .... इति ॥

(निरुत्तरतन्त्रे)

वैष्णवो गाणपत्यश्च सौरश्चैव कुलेश्वरि ।
अभिषेकं प्रकुर्वीत शाक्तश्च कुलभूषणः ॥

तथा ।

अभिषेकं चरेद्देवि अधिवासपुरःसरम् ।
वृद्धिशर्कि ततः कृत्वा शिवशक्तीः प्रपूजयेत् ॥
गुरुं संपूज्य विधिवत् स्वर्णालङ्कारभूषणैः ।
ततः संकल्पविधिना गुरूणां वरणं चरेत् ॥

तथा ।

शिवशक्ती च संपूज्य स्थापयेद्घटमुत्तमम् ।
नातिह्रस्वं नातिदीर्घं स्वर्णरूप्यादिनिर्मितम् ॥
विशेषार्घस्य यन्त्रे वा त्रिकोणे वाऽपि विन्यसेत् ।
कामबीजेन संप्रोक्ष्य वाग्भवेनैव ताडयेत् ॥
शक्त्या घटं समालोक्य मायया पूरणं जलैः ।
मन्त्रेणानेन तीर्थानि देशिकस्तत्र विन्यसेत् ॥
गङ्गाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ।
सर्वे समुद्राः सरितः सरांसि जलदा नदाः ॥

ह्रदाः प्रस्रवणाः पुण्याः स्वःपातालमहीगताः ।
सर्वतीर्थानि पुण्यानि घटे कुर्वन्तु सन्निधिम् ॥
श्रीबीजेन प्रजप्तेन पल्लवं प्रतिपादयेत् ।
कूर्चेन फलदानं स्यात् स्त्रीबीजेन स्थिरीकृतिः ॥
सिन्दूरं वह्निबीजेन पुष्पं प्रेतेन विन्यसेत् ।
मूलेन प्रणवेनापि दूर्वां दद्याद्विचक्षणः ॥
हुँ फट्स्वाहेति मन्त्रेण कुर्याद्दर्भेण ताडनम् ।
विचिन्त्य देवीपीठं च तत्रावाह्य प्रपूजयेत् ॥
अनेनैव विधानेन सर्वकर्मसु सुन्दरि ।
घटं संस्थापयेद्देवीभक्तेनैव विशेषतः ॥
महापूजां चरेद्धीमान् षोडशोपचारसंयुताम् ।
गुरूणां च महापूजां शक्तीनां च ततः परम् ॥
तत्पश्चात् साधकानां च क्रमेण परिपूजनम् ।
कुमारीभ्यो वलिं दत्वा कुलजाभ्यो विशेषतः ॥
अभिषेकं ततो देवि कुर्याच्च गुरुमार्गतः ।
स्वतन्त्रोक्तविधानेन मन्त्रस्योच्चारणैः सह ॥
चालयेच्च घटं मन्त्री मन्त्रेणानेन देशिकः ।
ॐ उत्तिष्ठ ब्रह्मकलश सेविताशेषसिद्धिद ॥
सर्वतीर्थाम्बुपूर्णस्त्वं पूरयस्व मनोरथम् ।
इशानेन्द्रस्मरक्षोणी तदन्ते भुवनेश्वरी ॥
मन्त्रेणानेन वाद्यानां निर्घोषैश्चालयेद्घटम् ।
अभिषिञ्चेद्गुरुः शिष्यं यजमानं पुरोहितः ॥

तथा—

अभिषेकस्य दक्षिणामूर्त्तिर्ऋषिरनुष्टुप्छन्दः शक्तिर्देवता सर्वसिद्धिसंकल्पसिद्धये विनियोगः ॥

ॐ राजराजेश्वरीशक्तिभैरवी *कालभैरवी ।
श्मशानभैरवी देवी त्रिपुरानन्दभैरवी ॥
त्रिपुरा त्रिपुरादेवी तथा त्रिपुरसुन्दरी ।
त्रिपुरेशी महादेवी तथा त्रिपुरमालिका ॥
नित्या च नित्यरूपा च वज्रप्रस्तारिणी तथा ।
सर्वचक्रेश्वरी देवी तथा नीलसरस्वती ॥
सर्वसिद्धिकरी देवी सिद्धगन्धर्वसेविता ।
उग्रतारा महादेवी तथा दक्षिणकालिका ॥
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ।
उग्रदंष्ट्रा महादंष्ट्रा शुभदंष्ट्रा कपालिनी ॥
भीमनेत्रा विशालाक्षी मङ्गला विजया जया ।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥
मङ्गला नन्दिनी भद्रा लक्ष्मीः कीर्त्तिर्यशस्विनी ।
पुष्टिर्मेधा शिवा साध्वी यशःशोभा जया धृतिः ॥
श्रीनन्दा च सुनन्दा च नन्दिन्यानन्दपूजिता ।
एतास्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥
विजया मङ्गला भद्रा स्मृतिः शान्तिः क्षमा धृतिः ।
सिद्धिस्तु परमा पुष्टिः श्री ऋद्धिश्च रतिस्तथा ॥
दीप्ता कान्तिर्यशोलक्ष्मीरीश्वरी बुद्धिरेव च ।

---

* पुरभैरवी इति २—३ पु० पा० ।

शक्तिर्मायावती ब्राह्मी जयन्ती चापराजिता ॥
अजिता मानवी श्वेता दितिस्त्वदितिरेव च ।
माया चैव महामाया मोहिनी क्षोभिणी तथा ॥
कमला विमला गौरी लावण्याम्बुधिसुन्दरी ।
दुर्गा क्रियाऽरुन्धती च घण्टाकर्णा कपालिनी ॥
चर्चिका चापरा ज्ञेया तथैव सुरपूजिता ।
वैवस्वती च कौमारी तथा माहेश्वरी परा ॥
वैष्णवी च महालक्ष्मीः कार्त्तिकी कौशिकी तथा ।
शिवदूती च चामुण्डा मुण्डमालाविभूषणा ॥
एतास्त्वा- .... इत्यादि ।
इन्द्रो वह्निर्यमश्चैव नैर्ऋतो वरुणस्तथा ॥
पवनो धनदेशानौ ब्रह्माऽनन्तो दिगीश्वराः ।

एतास्त्वा- .... इत्यादि ।

संवत्सरश्चायनौ च मासपक्षदिनानि च ।
तिथयश्चाभिषिञ्चन्तु मन्त्रपूतेन वारिणा ॥
रविः सोमः कुजबुधौ गुरुः शुक्रः शनैश्चरः ।
राहुः केतुश्च सततमभिषिञ्चन्तु ते ग्रहाः ॥
नक्षत्रं करणं योगोऽमृतसिद्धिस्ततः परम् ।
दग्धाः पापास्तथा भद्रा योगा वाराः क्षणास्तथा ॥
वारवेला कालवेला दण्डा ऋक्षादयस्तथा ।
अभिषिञ्चन्तु सततं मन्त्रपूतेन वारिणा ॥
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च ।
कपाली भीषणाख्यश्च संहारश्चाष्ट भैरवाः ॥

एते त्वा- .... इति ।
द्राविणीपुत्रिकाश्चैव डाकिनीपुत्रिकास्तथा ।
शाकिनीपुत्रिकाश्चान्याः काकिनीपुत्रिकाः पराः ॥
शाकिनीपुत्रिका भूयो हाकिनीपुत्रिकास्तथा ।
ततश्च राकिणीपुत्री देवपुत्री ततः परम् ॥
मातृणां च तथा पुत्री चोर्ध्वमुख्याः सुतास्तथा ।
अधोमुख्याः सुताश्चैव ज्वालामुख्याः सुताः पराः ॥
एतास्त्वा- .... इति ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।

एते त्वा- .... इति ।
पुरुषः प्रकृतिश्चैव विकाराश्चैव षोडश ।
आत्मा परात्मा ज्ञानात्मा ध्यानात्मा परमात्मनः ॥
आत्मानश्चात्मनश्चैव स्थूलसूक्ष्मौ च ये पराः ।

एते त्वा- .... इति ।
वेदादिबीजं हुँ बीजं स्त्रीबीजं तन्निकेतनम् ।
शक्तिबीजं रमाबीजं मायावीजं सुधाकरम् ॥
चिन्तारत्नं महाबीजं नारसिंहं च तारकम् ।
मार्तण्डभैरवं दौर्गं बीजं स्त्रीपौरुषोत्तमम् ॥
गाणपत्यं च वाराहं कालीबीजं भयापहम् ।
एतानि त्वाऽभिषिञ्चन्तु .... इति ।
गङ्गा गोदावरी रेवा यमुना च सरस्वती ।
आत्रेयी भारती चैव सरयू गण्डकी तथा ॥

करतोया चन्द्रभागा श्वेतगङ्गा च कौशिकी ।
भोगवती च पाताले स्वर्गे मन्दाकिनी तथा ॥
एतास्त्वा- .... इति ।
भैरवी भीमरूपा च शोणः सुमुख एव च ॥
सिन्धुश्चैव ह्रदः पुण्यस्तथा पातालसम्भवः ।
एते त्वा- .... इति ॥
यानि कानि च तीर्थानि पुण्यापुण्यतराणि च ।
तानि त्वा- .... इति ॥
जम्बूद्वीपादयो द्वीपाः सागरा लवणादयः ।
अनन्ताख्यस्तथा नागः सर्पा ये तक्षकादयः ॥
एते त्वा- .... इति ।
तारश्च वह्निजाया च वषट् कूर्चमतः परम् ॥
वौषट्कारस्तु फट्कारो ह्यभिषिञ्चतु सर्वदा ।
नश्यन्तु प्रेतकूष्माण्डा राक्षसा दानवाश्च ये ॥
पिशाचा गुह्यका भूता अभिषेकेण ताडिताः ।
अलक्ष्मीः कालकर्णी च पापानि सुमहान्ति च ॥
नश्यन्तु चाभिषेकेण तारबीजेन ताडिताः ।
रोगाः शोकाश्च दारिद्र्यं दौर्बल्यं चित्तविक्रिया ॥
नश्यन्तु चाभिषेकेण वाग्बीजेनैव ताडिताः ।
लोकानुरागत्यागाश्च दौर्भाग्यमपि दुर्यशः ॥
नश्यन्तु चाभिषेकेण मन्मथेनैव ताडिताः ।
तेजोह्रासः शक्तिह्रासो बुद्धिह्रासस्तथैव च ॥
नश्यन्तु चाभिषेकेण शक्तिबीजेन ताडिताः ।

विषाणि च महारोगा डाकिन्यो भीतयस्तथा ॥
घोराभिचाराः क्रूराश्च ग्रहा नागास्तथैव च ।
नश्यन्तु चाभिषेकेण कालीबीजेन ताडिताः ॥
नश्यन्तु विपदः सर्वाः संपदः सन्तु सुस्थिराः ।
अभिषेकेण शाक्तानां पूर्णाः सन्तु मनोरथाः ॥
एवं संसिच्य शिष्यं तु पुनः पूजां समाचरेत् ।
शिष्योऽपि तत्र संपूज्य गुरवे दक्षिणां ददेत् ॥
गोभूमिस्वर्णरूप्यं च नानारत्नानि पार्वति ।
सर्वस्वं गुरवे दद्यात् तदर्धं वाऽपि दक्षिणाम् ॥
श्रीविद्यां वा सिद्धिकालीं तारां वा महिषार्दिनीम् ।
शिष्याय भक्तियुक्ताय प्रदद्याद्देशिकः स्वयम् ॥

तन्त्रान्तरे ।

एवं कृत्वाऽभिषेकं च प्रधानकलशाम्भसा ।
तत्तन्मन्त्रं समुच्चार्य परिचारघटोदकैः ॥
अभिषिञ्चेत् ततस्तस्मै प्रदद्यान्मन्त्रमुत्तमम् ।
कृते पूर्णाभिषेके तु सर्वमन्त्राधिकारवान् ॥
शिष्यः संजायते तस्मादभिषिच्य मनुं ददेत् ।
पूर्वमल्पविधानेन उपदिष्टोऽपि चेन्मनुः ॥
पश्चात् सर्वाधिकारार्थं कुर्यात् पूर्णाभिषेचनम् ।
महामन्त्रोपमन्त्राश्च सिद्धिं दद्युर्न संशयः ॥

वाममार्गे तु प्रधानकलशो हेतुद्रव्येण पूरणीयः । कलशान्तराणि जलेनैव । तदुक्तं (मेरुतन्त्रे)

मध्ये तीर्थघटः स्थाप्यः शेषास्तोयघटा मताः ।
ये ये आवाहिता देवा गुरुणा तु सुरा घटे ॥

ते ते कुर्वन्ति सान्निध्यं मन्त्ररूपाश्च तन्मुखे ।
स्वयं सिद्ध्यति वागस्य मूर्द्धानं नैव नामयेत् ॥
यदर्थं नामितो मूर्द्धा तस्य मृत्युर्न संशयः ।
वाममार्गे गुरुर्यस्य ईदृक् सिद्धो यदा भवेत् ॥
शिष्यश्च निरहङ्कारः सदा दैवततत्परः ।
देवार्थं यस्य* नान्यत्र यस्य भोगे मनो न च ॥
स एव सिद्धो वामे स्यादन्यो निरयभाजनम् ।

कौलमार्गे विशेष उक्तस्तत्रैव ।

सजीवमीनयुक्तेन सुरया पूरितेन च ।
पञ्चामृतैस्तु संपूर्णं शङ्खेन कलशेन वा ॥
अभिषेकं ततः कुर्यात् कुलवृक्षोत्थपल्लवैः ।
अयं पूर्णाभिषेकोऽत्र कुलमार्गे प्रकीर्त्तितः ॥

कुलवृक्षाश्च ।

सहकारः कर्णिकारः केशरस्तिलकस्तथा ।
कदम्बः सिन्धुवारश्च कङ्कोलश्चम्पकाह्वयः ॥
श्लेष्मातकं कुरवको निम्बश्चलदलस्तथा ।
यज्ञाङ्गो जटिलो विल्वः कुलवृक्षा मता अमी——इति (कुलचूडामणौ) प्रोक्ताः ॥

तन्त्रान्तरे ।

अभिषिञ्चेद्गुरुः शिष्यं नामास्मै प्रदिशेत् स्वयम् ।
आनन्दनाथशब्दादि द्व्यक्षरं चतुरक्षरम् ॥
नियोज्यैवामुकोऽसीति गुरुरादौ तदाह्वयेत् ।
यथा नारी पितुर्गोत्रात् पत्युर्गोत्रं समाश्रयेत् ॥

---

* नाम ततो भोगे इति २ पु० पा० ।
नान्तश्चयं भोगे इति ३ पु० पा० ।

तथा शक्त्युपदेशेन कौलो गोत्रान्तरे व्रजेत् ।
अथोच्यते महेशानि कौलनां गोत्रमुत्तमम् ॥
दुर्लभं सर्वतन्त्रेषु शाम्भवं तत् प्रकीर्त्तितम् ।
कौलावधूतमार्गेषु तीर्थयात्रां न च व्रजेत् ॥
तीर्थाटनं च संन्यासं व्रतधारणमेव च ।
उपवासं मुण्डनं च सर्वथा परिवर्जयेत् ॥
पूर्णाभिषिक्ते शिरसि तेन तत्र न मुण्डनम् ।

पूर्णाभिषेकमाहात्म्यमाह (मेरुतन्त्रे)

रसेन्द्रेण यथा विद्धमयः सौवणतां व्रजेत् ।
दीक्षाविद्धस्तथा ह्यात्मा शिवत्वं लभते ध्रुवम् ॥

तथा ।

गतं शूद्रस्य शूद्रत्वं गता विप्रस्य विप्रता ।
दीक्षासंस्कारसंपन्ने जातिभेदो न विद्यते ॥
पूर्णाभिषेकं कृत्वा तु यत्र कुत्र मृतोऽपि च ।
स एव देवीरूपः स्यात् स देवो धन्यतामियात् ॥

तन्त्रान्तरे ।

पूर्णाभिषेकयुक्तस्य यत्किञ्चिदनृतं भवेत् ।
तस्य क्रिया च सफला देवता सुप्रसीदति ॥
पूर्णाभिषेकयुक्तो हि मन्त्रान् दत्वा जपेच्छिवे ।
तत्क्षणात् सिद्धिमाप्नोति नात्र कार्यविचारणा ॥
गुरुं विनाऽपि देवेशि त्वभिषेकी तु यं जपेत् ।
तं सभेदं साधयित्वा सिद्धिं दातुमथार्हति ॥
पूर्णाभिषेकसंयुक्तश्चाण्डालोऽपि भवेद्यदि ।
स ब्रह्मर्षिर्महेशानि नात्र कार्या विचारणा ॥

पूर्णाभिषेकहीनो य ऋषिवर्योऽपि पार्वति ।
स ब्राह्मणाधमः प्रोक्तस्त्वभिषेकी द्विजोत्तमः ॥
पूर्णाभिषेकी देवेशि यस्मिन् देशे विराजते ।
स देशो धन्यतां याति समन्तात् कोटियोजनम् ॥
न व्याधिर्न च वै मृत्युर्न शत्रूणां भयं क्वचित् ।
पूर्णरूपः शिवः प्रोक्तः शिव एव न संशयः ॥
को वा देहः कस्य देहः सुखं दुःखं च कस्य च ।
को जातः को मृतो देवि सर्वं ब्रह्मस्वरूपकम् ॥
यस्मिन् काले भवेद्देवि मन्त्रवर्यस्य विस्मृतिः ।
तदैव मरणं प्रोक्तं मरणं मरणं न हि ॥
पूर्णाभिषेकयुक्तानामधिकारो हि सर्वतः ।

इति पूर्णाभिषेकदीक्षाविधिः ।

अथ गुरुं विना मन्त्रिणां मन्त्रान्तरग्रहणोपायो (मेरुतन्त्रे)

अथ तान्त्रिकमन्त्राणां दीक्षां शृणु गुरुं विना ।
शुक्लपक्षे त्रयोदश्यां चन्द्रताराबलान्विते ॥
गत्वा च दक्षिणामूर्त्तेः सन्निधौ पूजयेच्च तम् ।
कलशस्थापनं कृत्वा तदग्रे वोपरि क्षिपेत् ॥
तालपत्रे मनुं लेख्यं* मन्त्रदेवं च पूजयेत् ।
देवो गुरुरिति ध्यात्वा मन्त्रं व्यक्तं तु वाचयेत् ॥
अष्टोत्तरशतं चैतन्मन्त्रग्रहणमुच्यते ।
एतत् तत्त्वं समाख्यातं गोप्यं मातरि जारवत् ॥

---

* लिखितमित्यर्थः ।

गुरौ लोभादयो दोषास्तस्मादुद्विजते मनः ।
अतः शास्त्रगुरुं कृत्वा दक्षिणामूर्त्तितो मनुः ॥
बिभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत-
स्रोतःशालिनि सन्निबन्धनसरित्संभेदमभ्यर्हितम् ।
गोरक्षाचलभूपनिर्मितपुरश्चर्यार्णवे पञ्चमः
सद्युक्तिस्फुटमौक्तिकोत्कररुचोत्तुङ्गस्तरङ्गो गतः ॥

इति श्रीमन्महाराजाधिराजप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे क्रियावतीदीक्षाप्रयोगपूर्वकदीक्षाभेदनिर्णयो नाम पञ्चमस्तरङ्गः ॥ ५ ॥

अथ पुरश्चरणविधिर्निरूप्यते ।

तत्र पुरश्चरणपदार्थ उक्तो (यामले)

वेदादिशावरान्तानां मन्त्राणां सिद्धिहेतवे ।
पुरतश्चरणीयत्वात् पुरश्चरणमुच्यते ॥

(मेरुतन्त्रेऽपि)

धर्मार्थकाममोक्षाणां साधनं मन्त्र उच्यते ।
तत्सिद्धये पुरो यच्च चर्यते तत् प्रकीर्तितम् ॥
पुरश्चरणकर्माख्यं वेदादौ शावरान्तके ।
मन्त्रे यन्त्रे तथाऽवश्यम् .... इति ॥

एतेन पुरश्चरणप्रयोजनमप्युक्तं भवति ।

(वायवीयसंहितायाम्)

साधनं मूलमन्त्रस्य पुरश्चरणमुच्यते ।

(वीरचूडामणौ)

पुरश्चरणहीनस्य मन्त्रसिद्धिर्न जायते ।
आदौ पुरस्क्रियां कुर्यान्नियमेन यथाविधि ॥

(योगिनीहृदयेऽपि)

गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः ।
ततः पुरस्क्रियां कुर्यान्मन्त्रसंसिद्धिकाम्यया ॥
जीवहीनो यथा देहः सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः ॥
तस्मादादौ स्वयं कुर्याद्गुरुं वा कारयेद्बुधः ।
गुरोरभावे विप्रं वा सर्वप्राणिहिते रतम् ॥

स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम् ।
स्त्रियं वा सद्गुणोपेतां सपुत्रां विनियोजयेत् ॥

पुरश्चरणस्वरूपमुक्तम् (कुलचूणामणौ)

पचाङ्गानि महादेवि जपो होमश्च तर्पणम् ।
अभिषेकश्च विप्राणामाराधनमपीश्वरि ॥
पूर्वपूर्वदशांशेन पुरश्चरणमुच्यते ।

(कुलमूलावतारे)

संसारे दुःखभूयिष्ठे यदिच्छेच्छ्रेय आत्मनः ।
पञ्चाङ्गोपासनेनैव मन्त्रजापी सुखं व्रजेत् ॥

(मुण्डमालायाम्)

यावद्यस्मिन् जपः प्रोक्तो मन्त्रं तावज्जपेत् पुरः ।
ततस्तु तद्दशांशं हि होमं कुर्याद्विचक्षणः ॥
तस्यापि च दशांशेन तर्पणं समुदाहृतम् ।
तद्दशांशं ततः कुर्यान्मार्जनं तु विशेषतः ॥
तस्यापि च दशांशेन प्रोक्तं ब्राह्मणभोजनम् ।
कुमारीभोजनं तद्वद् गुरवे दक्षिणां तथा ॥
एवं गुरुप्रसादेन पुरश्चरणकर्मकृत् ।
मन्त्रसिद्धिमवाप्नोति परमार्थं हि साधकः ॥

(मेरुतन्त्रे)

जपो होमस्तर्पणं च मार्जनं विप्रभोजनम् ।
पश्चाङ्गकर्मरूपं तदाहुः के चन तत्र तु ॥
चतुरङ्गास्तथा त्र्यङ्गा द्व्यङ्गा एकाङ्गिनोऽपि च ।
मन्त्रास्तिष्ठन्ति वेदेषु तथा मन्त्रेऽपि शावरे ॥
के चित् षडङ्गा मन्त्राः स्युस्तदङ्गानां जपादिति ।
अघमर्षणसूर्यार्घजलपानप्रणामकैः ॥

देवार्चया पञ्चभिश्च तैरेवं स्युर्दशाङ्गकाः ।
दूतीयागात् तथा चौलीकर्मतश्चक्रपूजनात् ॥
भगलिङ्गसमायोगजपाच्च वलिदानतः ।
महावलिप्रदानाच्च भवन्त्येकादशाङ्गकाः ॥
षोडशाङ्गः कौलिकानां वामिकानां द्विकोनिताः ।
अमर्यश्मरिसेवातोऽष्टादशाङ्गास्त्वघोरिणाम् ॥

(वैष्वक्सेन्याम्)

पङ्चाङ्गोऽयं महायागः पुरश्चरणसंज्ञकः ।
साधनं पुरुषार्थानामन्ये यागाः सहस्रशः ॥
अस्य पञ्चाङ्गयागस्य कलां नार्हन्ति षोडशीम् ।
विशेषतः कलियुगे जपयागः प्रशस्यते ॥

(मेरुतन्त्रे)

अयुताब्दे कलेर्याते त्यजेद्विष्णुशिला महीम् ।
तदर्धे जाह्नवीतोयं तदर्धे देवताशिला ॥
प्राप्ते कलियुगे घोरे वामाचारविमिश्रिते ।
भक्ष्याभक्ष्यविचारादिरहिते म्लेच्छसंकुले ॥
कामक्रोधादिभिर्व्याप्ते जने स्त्रीभिर्विनिर्जिते ।
क्व शिष्यः क्व गुरुर्मन्त्रः क्व तपः क्व च सिद्धयः ॥
जप एव कलौ श्रेयान् शालग्रामार्चनं तथा ।

(यामले)

साङ्गो जपो महादेवि पुरश्चर्येति गीयते ।
तस्यामाचरितायां च मन्त्रः सिद्ध्यति नान्यथा ॥

(पुरश्चरणचन्द्रिकायाम्)

विना येन न सिद्धिः स्यान्मन्त्रो वर्षशतैरपि ।
कृतेन येन लभते साधको वाञ्छितं फलम् ॥

पुरश्चरणसंपन्नो मन्त्रो हि फलदायकः ।
अतः पुरस्क्रियां कुर्यान्मन्त्रवित् सिद्धिकाङ्क्षया ॥
सम्यक्सिद्धैकमन्त्रस्य नासाध्यं विद्यते क्वचित् ।
बहुमन्त्रवतः पुंसः का कथा शिव एव सः ॥
किं होमैः किं जपैश्चैव किं मन्त्रन्यासविस्तरैः ।
रहस्यानां हि मन्त्राणां यदि न स्यात् पुरस्क्रिया ॥
पुरस्क्रिया हि मन्त्राणां प्रधानं बीजमुच्यते ।

(आदियामले)

अकृत्वा तु पुरश्चर्यां यो यत् कर्म समाचरेत् ।
तत् तस्यैवाभिचाराय जायते नात्र संशयः ॥
तस्मादादौ पुरश्चर्यां कृत्वा कर्माणि साधयेत् ।

कर्माणीति षट् कर्माणि ।

तथा ।

हेतुरप्यङ्कुरोत्पत्तौ जलसेकं विना यथा ।
नाङ्कुरं जनयेद्बीजं तथा मन्त्रोऽपि कीर्त्तितः ॥
पुरश्चर्याविहीनो हि सिद्धिहेतुर्न सिद्ध्यति ।
तस्मात् तत्सिद्धये मन्त्रो पुरश्चरणमाचरेत् ॥

तत्रादौ पुरश्चरणकाला (वैष्वक्सेन्याम्)

माधवे मार्गशीर्षे वा मकरस्थे दिवाकरे ।
आरभेत पुरश्चर्यां शुक्लपक्षे शुभेऽहनि ॥

(दक्षिणामूर्त्तिकल्पे)

आरभेत् प्रवरो विद्वान् पूर्वपक्षं समाश्रितः ।
पुण्ये मुहूर्त्ते नक्षत्रे तिथौ स्नात्वा यथाविधि ॥

पूर्वपक्षः शुक्लपक्षः । शाक्तादौ तु पक्षद्वयमपि प्रशस्तमेव ।

अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोरपि ।
आरभेत पुरश्चर्यां काले दीक्षोक्त एव हि—इति (यामल-)
वचनात् ।

(सुधार्णव-) धृतवचनम् ।

यस्मिन् काले भवेद्दीक्षा तस्मिन् काले भवेदिदम् ।

(मुण्डमालायाम्)

गुरोरनुज्ञां संप्राप्य विशेषेण शुभे दिने ।
समारभ्य पुरश्चर्यां विधिपूर्वं समापयेत् ॥

(वैशम्पायनसंहितायाम्)

चन्द्रतारानुकूले च शुक्लपक्षे शुभेऽहनि ।
आरभेन्मकरादौ तु सुप्ते विष्णौ जपेन्न च ॥

(श्रीनृसिंहपादार्चनपद्धतावपि)

प्रसुप्ते तु महाविष्णौ पुरश्चर्यां न चाचरेत् ।
मुह्यन्ति सकला मन्त्राः सुप्ते तस्मिन् जगद्गुरौ ॥

मुह्यन्तीति । सर्वेषां मन्त्राणां नारायणात्मकतया तस्मिन् योगरूपनिद्रामाश्रितं सर्वे मन्त्रास्तदीययोगनिद्रया व्यामोहिता भवन्तीत्यर्थः । तथा च मन्त्राणां व्यामोहकाले पुरश्चरणादिना सिद्धिर्न भवतीति भावः । न च तत्तन्मन्त्राणां तत्तद्देवतात्मकतया तन्मन्त्राणामेव तदात्मकत्वेन तन्मन्त्रातिरिक्तमन्त्राणामपि कथं तदात्मकत्वमस्तीति वाच्यम् । 'सर्वदेवमयो हरि'रित्यादिना भगवतः सकलदेवात्मकत्वे सिद्धे तत्तद्देवतात्मकतत्तन्मन्त्राणां तदात्मकत्वस्य सुवचत्वात् । एतेन हरिशयनकालिकपुरश्चरणनिषेधो विष्णुमन्त्रमात्रविषयो वैशम्पायनवचनस्य तत्प्रकरणीयत्वादित्यपास्तम् । 'मुह्यन्ति सकला मन्त्रा' इत्यत्र सकलपदमहिम्ना मन्त्रशब्दस्य वैष्णवावैष्णवमन्त्रपरत्वावगमात् । एवं च 'ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याये'त्यादौ ब्राह्मणादिपदस्य कौण्डिन्येतरब्राह्मणपरत्वदर्शनात् पुरश्चरणप्रकरणीयवैशम्पायनादिवचनविषिद्धकालातिरिक्तो दीक्षाप्रकरणीयसिद्धान्तशेखरादिवचनविहितश्च यः कालः स एव 'यस्मिन् काले भवेद्दीक्षा तस्मिन् काले भवेदिद'मिति सामान्यवचनेन गृह्यते । तेन दीक्षायां विहितोऽपि श्रावणादिः पुरश्चरणे निषिद्ध एव । हरिशयनकाले पुरश्चरणमेव निषिद्धम् । तदतिरिक्तजपपूजादेस्त्वावश्यकत्वमुक्तम् ।

तत्रैव ।

अर्चया स्तोत्रपाठेन जपेन नियमेन च ।
तत्प्रीतिकामुकैर्भक्तैः सेव्यः सुप्तो जनार्दन ॥
यः प्रसुप्तोऽपि जागर्त्ति विश्वसाक्षी चिदात्मकः ।
स भक्त्या तोषितो येन तस्यैव सफलं जनुः—इति ॥

शक्तिविषयेऽपि (वाडवानलीये)

घनागमे घनान्ते च पुष्पकाले च शाम्भवि ।
आराधयेज्जगद्धात्रीं दिवा वा यदि वा निशि ॥
एकैकदिवसे देव्याः प्रीतिः सांवत्सरी भवेत् ।
विशेषादेषु कालेषु येन नाराधिताऽम्बिका ॥
स दरिद्रो भयग्रस्तः क्षीणायुः साधको भवेत्—इति ।

केचन शाक्तास्तु ।

शिशिरश्च वसन्तश्च शरत्काल इति त्रयः ।
उत्तमा ऋतवो देव्याः पुरश्चरणकर्मणि ॥

इत्यादि-(यामल-) वचनेन हरिशयनकालान्तःपातिनि शरत्काले देवीमन्त्रपुरश्चरणविधानाद् 'विष्णौ सुप्ते जपेन्नचे'त्यादिवैशम्पायनीयवचनं देवीमन्त्रातिरिक्तमन्त्रपरमिति संकोचं परिकल्प्य हरिशयनकालेऽपि पुरश्चरणमाचरन्ति । अत्र शरत्कालशब्दः शरत्कालान्तःपातिदुर्गोत्सवकालपरः । तन्त्रोक्तवचनेन 'शरत्काले चतुर्थ्यादिनवम्यन्तं विशेषत' इत्यादिवक्ष्यमाण(-कालीकल्प-मुण्डमाला-)दिवचनेन च शक्तिमन्त्रपुरश्चरणविधानेऽपि तस्य हरिशयनाधिकरणीभूतयावत्कालं कर्तव्यताकत्वे प्रमाणाभावः । अन्यथा 'ऊर्जे तपसि राधे वा शुक्लपक्षस्तु वैष्णवे' इत्यादि (चन्द्रपीठादि) वचनेन 'वैशाखे कार्त्तिके तथे'त्यादिमत्स्यपुरश्चरणप्रकरणीय-(मेरुतन्त्र-)वचनेन च वैष्णवस्यापि मन्त्रस्य हरिशयनकालान्तःपातिनि कार्त्तिकादौ पुरश्चरणविधानाद्वैशम्पायनादिवचनस्य निर्विषयत्वापत्तेः । यदि च तन्त्रोपतन्त्राणामनन्तत्वेन चातुर्मास्येऽपि शक्तिमन्त्रपुरश्चरणविधायकवचनान्तरमुपलभ्येत तदा तु संकोचकल्पना न दुष्टा । अन्यथा दुष्टैवेति पुरश्चरणपद्धतिकृतः ।

प्राञ्चस्तु । निषिद्धमासपतितेऽपि ग्रहणादौ सकलमन्त्राणां विशेषपुरश्चरणविधानात् सामान्यपुश्चरणमेव हरिशयनकाले निषिद्धम् । विशेषपुरश्चरणे तु नायं निषेध इत्याहुः ।

वस्तुतस्तु । दुर्गोत्सवकालादौ शाक्तादिमन्त्रस्य कार्त्तिकादौ वैष्णवादिमन्त्रस्य भाद्रपदादौ गणेशादिमन्त्रस्य ग्रहणादौ मन्त्रमात्रस्य च पुरश्चरणविधानादनुक्तकालस्य विशेषपुरश्चरणस्याप्यनिषिद्धकाल एवाचरणाच्च निषिद्धकालान्तर्गतं यद्यत्कालावच्छेदेन यद्यद्देवतामन्त्रपुरश्चरणं विशेषवचनैर्विधीयते तत्तत्कालावच्छेदेन तत्तद्देवतामन्त्रपुरश्चरणं कर्त्तव्यमेव । समान्यवचनेन निषिद्धो विशेषवचनेनाविहितश्च यः कालस्तत्र कस्यापि मन्त्रस्य पुरश्चरणमात्रं नाचरणीयमिति सिद्धान्तस्थितिः ।

कार्त्तिके तु मन्त्रमात्रस्य पुरश्चरणं कर्त्तव्यम्।

सर्वेषामपि मन्त्राणां कुर्यादूर्जे पुरस्क्रियाम्—इति (साधन-समुच्चय-) वचनाद्वक्ष्यमाणमहाचीनादिक्रमेण पुरश्चरणे तु न कालादिनियमः। तदुक्तं (सारसंग्रहे)

सर्व एव शुभः कालो नाशुभो विद्यते क्व चित्।

तथा।

दिग्देशनियमो नात्र स्थित्यादिनियमो न हि।
न जपे कालनियमो नार्चादिषु बलिष्वपि॥
स्वेच्छानियम उक्तोऽत्र महामन्त्रस्य साधने।

इत्यादिमहामन्त्रशब्दस्तु मन्त्रमात्रोपलक्षकः। अन्यथा महाचीनक्रमेणोपं-मन्त्रपुरश्चरणे नियमपरिपालनापत्तेरत्रापि कालरद्महारात्रान्तर्गततत्तत्कालपरं न तु विहितनिषिद्धमासदिवसादिपरम्।

तथा च।

प्रातःकालं समारभ्य जपेन्मध्यं दिनावधि—इति।

पाशवकल्पोक्तौ।

गते तु प्रथमे यामे तृतीयप्रहरावधि।
निशायामेव जप्तव्यं रात्रिशेषे जपेन्न च—इति वीरकल्पोक्तश्च यः कालनियमः स चास्मिन् महाचीनक्रमेणास्तीति तदर्थः॥

न विशेषो दिवारात्रौ सन्ध्यायां वा महानिशि।
सर्वकाले यजेद्देवीमस्नातः कृतभोजनः॥

इति तत्रैवोक्तत्वात्।

कथमन्यथा।

वीराणां जपकालस्तु सर्वकालः प्रशस्यते।

इति (भावचूडामणि-) वचनं संगमनीयम्।

अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोरपि।
आरभेत पुरश्चर्यां काले दीक्षोक्त एव हि॥

इत्यादिवीरपुरश्चरणप्रकरणीय-(यामलादि-) वचनविरोधादुक्तयुक्त्या तु कालशब्दस्योक्तकालपरतया वीरशब्दस्य च कौलिकपरतया तदीयकल्पे दिवसस्य रात्रेश्च पुरश्चरणकालतया वक्ष्यमाणत्वान्न कश्चिद्विरोधः।

एवं महाकालक्रमेण पुरश्चरणेऽपि नोक्तकालनियमः। उक्तवचनानां तत्राप्युपलम्भात्।

अत्र केचित्।

न जपे कालनियमो महामन्त्रस्य साधने।

इत्यादि-(सिद्धान्तसंग्रह-) वचनान्महामन्त्रपुरश्चरणे कालनियमो नास्तीति वदन्ति।

तन्मते।

न देशकालनियमो भक्ष्यादिनियमो न हि।
शौचादिनियमो नास्ति महामन्त्रस्य साधने॥

इति तस्य वचनात्।

न शौचादिक्रियाः कार्याः स्मृतिशास्त्रप्रचोदिताः।
एकं लिङ्गे गुदे पञ्च इत्याद्या याः प्रकीर्त्तिताः॥

इति स्वच्छन्दभैरवादिवचनाच्च।

महामन्त्रपुरश्चरणे नियमसामान्याभावापत्त्या—

नियमास्तत्र भूयांसः प्रकर्त्तव्याः प्रयत्नतः।
अवैधकरणात् सिद्धिहानिः स्यान्नात्र संशयः॥

इत्यादिमहाविद्यापुरश्चरणप्रकरणीयमहाकालवचनविरोधः स्पष्ट एवेति संक्षेपः।

अथ देशाः (योगिनीतन्त्रे)।

आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते।
पुण्यक्षेत्रं नदीतीरं गुहापर्वतमस्तकम्॥
तीर्थप्रदेशः सिन्धूनां संगमः पावनं वनम्।
उद्यानानि विविक्तानि विल्वमूलं तटं गिरेः॥
तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम्।
अश्वथामलकीमूलं गोशाला जलमध्यतः॥
देवतायतनं कूलं समुद्रस्य निजं गृहम्।

तथा।

गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत्।

कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ ॥
म्लेच्छदुष्टमृगव्याधशङ्कातङ्कविवर्जिते ।
एकान्तोपवने निन्दारहिते भक्तिसंयुते ॥
सुदेशे धार्मिके देशे सुभिक्षे निरुपद्रवे ।
रम्ये भक्तजनस्थाने निवसेत् तापसप्रिये ॥
गुरूणां सन्निधाने च चित्तैकाग्रस्थले तथा ।
एषामन्यतमं स्थानमाश्रित्य जपमारभेत् ॥

(महाकपिलपञ्चरात्रे)

क्षेत्रतीर्थगृहारामदेवालयनदीह्रदाः ।
कुटी विविक्तमित्येते देशाः स्युर्मन्त्रसिद्धिदाः ॥

(प्रपञ्चसारे)

समुद्रतीरेऽप्यथ वाऽद्रिशृङ्गे
  समुद्रगानां सरितां च तीरे ।
जपेद्विविक्ते निज एव गेहे
  विष्णोर्गृहे वा पुरुषो मनस्वी ॥

(मामले)

म्लेच्छदुष्टमृगव्यालशङ्कातङ्कविवर्जिते ।
एकान्ते पावने चिन्तारहिते भक्तिसंयुते ॥
सुदेशे धार्मिके राष्ट्रे सुभिक्षे निरुपद्रवे ।
रम्ये भक्तगणस्थाने निवसेन्न पराश्रये ॥

देवताभेदेन पुरश्चरणस्थानभेदा उक्ता (मेरुतन्त्रे)

जपस्थानानि वक्ष्यामि कृत्तिमाकृत्तिमानि च ।
गुप्तानि सर्वतन्त्रेषु देवतानां पृथक् पृथक् ॥
महागणपतिक्षेत्रं मायूरं नर्मदातटम् ।
महाश्मानं मायूरं गणेशमनुसिद्धिदम् ॥

प्रभासं च कुरुक्षेत्रं पुष्करं भृगुपर्वतम् ।
यमुनायास्तटं काशी दिनेशमनुसिद्धिदम् ॥
अयोध्या मथुरा माया काशी वदरिकाश्रमः ।
गया च गण्डकीतीरं द्वारिका विष्णुसिद्धिदा ॥
केदारस्त्र्यम्बकं काशी काञ्च्यवन्त्यौ वनानि च ।
गङ्गातीरं वैद्यनाथो रामेशः शिवसिद्धिकृत् ॥
ज्वालामुखी प्रयागश्च कामिनी मालिकापदम् ।
सरस्वत्यास्तथा तीरं शक्तिमन्त्रस्य सिद्धिकृत् ॥
तीरं च कमलेश्वर्या मेखला यक्षपर्वतः ।
अङ्गवङ्गकलिङ्गाश्च क्षुद्रदैवतसिद्धिदाः ॥
कामरूपं च नेपालं हिङ्गुला विन्ध्यवासिनी ।
जालन्धरं पूर्णगिरिर्वाममार्गेण सिद्धिदाः ॥
तटं पद्माकराणां च कदलीक्ष्वर्कवाटिका ।
विद्रुमाकुलितो ग्रामो गणेशस्यातिवल्लभः ॥
पद्माकरतटारण्यकरवीरार्कवाटिका ।
गोधूमदूर्वाक्षेत्राणि शिलाभानुमतः प्रिया ॥
तुलस्यश्वत्थ*धात्रीक्षुशालग्रामादिसन्निधौ ।
गोष्ठे श्रोत्रिययुग्ग्रामे हरेर्मुद्वैदिकान्तिके ॥
पश्चिमाभिमुखे लिङ्गे नन्दिवर्जे शिवालये ।
शिवतोषे वटस्यारात् संगमे विपिने ह्रदे ॥
कदलीचूतचम्बेलीसेवन्तीवर्बरीवने ।
†पञ्चख्यातनदीतीरे शक्तेः प्रीतिश्च निर्जने ॥

---

* शालीक्षु—इति २ पु. पा. ।
† मन्यख्यात—इति २-३ पु. पा. ।

पल्वलारान्निम्बकोलशाखोटमधुकाकुले ।
वल्मीके शुष्कनद्यां च मोदन्ते क्षुद्रदेवताः ॥
पितृगेहे श्मशाने च त्रिपथे च चतुष्पथे ।
शून्यालये शिवाकीर्णभुवि तुष्यन्ति वामगाः ॥
गृहे गोष्ठे तथोद्याने वने पर्वतमस्तके ।
नद्यां तत्संगमे देवालये स्याद्वैदिकोऽधिकः ॥
यस्मिन् देशे न गोहत्या नापि ब्रह्मवधो भवेत् ।
न श्रावयन्ति शूद्राश्च सिद्धिस्तत्र तु वैदिकी ॥
म्लेच्छाः पाखण्डिनो धूर्त्ता राजानः सचिवादयः ।
युवत्यश्च न वर्त्तन्ते तत्र सिद्धिरदूरतः ॥

अथ निषिद्धस्थानानि तत्रैव ।

जीर्णदेवालयोद्यानगृहवृक्षतलेषु च ।
नदीकूलाद्रिकूटेषु भूच्छिद्रादिषु नो वसेत् ॥

जीर्णत्वं वृक्षपर्यन्तमन्वेति । नदीकूलनिषेधस्तु समुद्रगाकुलभिन्नपरः ।
(यामले)

राजानः सचिवा राजपुरुषाः प्रभवो जनाः ।
चरन्ति येन मार्गेण न वसेत् तत्र तत्त्ववित् ॥

(मेरौ)

एवं विचार्य मतिमान् कुर्याद्भूमिपरिग्रहम् ।

अथ पुरश्चरणे भक्ष्यादिनियमो (यामले)

शाकं मूलं फलं भक्ष्यं हविष्यं शक्तवोऽथ वा ।
अथ वा क्षीरमात्रं स्यात् पुरश्चरणवृत्तये ॥

हविष्याण्युक्तानि (स्मृतौ)

हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः ।

कलायकङ्गुनीवारा वास्तुकं हिलमोचिका ॥
षाष्टिका कालशाकं च मूलकं केमुकेतरत् ।
लवणे सैन्धवसामुद्रे गव्यं च दधि सर्पिषाम् ॥
पयोऽनुद्धृतसारं च पनसाम्रहरीतकी ।
पिप्पली जीरकं चैव नागरङ्गकतिन्तिडी ॥
कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ।
अतैलपक्कं मुनयो हविष्यान्नं प्रचक्षते ॥

(मेरुतन्त्रे)

सत्कन्दफलमूलाशी सद्भिक्षाशी हविष्यभुक् ।
पयोव्रती भवेच्छ्रेष्ठस्तेषाम् .... इति ॥

तत्रैव ।

श्रेष्ठं गवां दुग्धमुक्तं मध्यमं सुरभीभवम् ।
अधमं माहिषं चान्यद्रूतस्थानां निषिध्यते ॥

(कुलार्णवे)

यस्यान्नपानपुष्टाङ्गः कुरुते धर्मसंचयम् ।
अन्नदातुः फलस्यार्धं कर्त्तुश्चार्धं न संशयः ॥
तस्मात् सर्वप्रयेत्नन परान्नं वर्जयेत् सुधीः ।
पुरश्चरणकाले तु सर्वकर्मसु शाम्भवि ॥
जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
मनो दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने ॥

परान्नमिति भिक्षेतरविषयम् । भिक्षायां तु विहितत्वान्न दोषः ।
तदुक्तं (मेरुतन्त्रे)

वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम् ।
सत्कुलस्थानजातानां भिक्षाशी चाग्रजन्मनाम् ॥
चरुमूलफलक्षीरदधिभिक्षान्नशक्तवः ।

एतत् सप्तविधं भीक्षालब्धं भक्ष्यं व्रतस्थितैः ॥

(अगस्त्यसंहितायाम्)

दधि क्षीरं घृतं गव्यमैक्षवं गुडवर्जितम् ।
तिलाश्चैवासिता मुद्गाः कन्दः केमुकवर्जितः ॥

(पद्धतौ)

कन्दाश्च पिण्डारुकसेरुकाद्या
गवां दधिक्षीरघृतानि सैन्धवम् ।
मुद्गा यवाः कृष्णतिलाः कलायाः
प्रियङ्गवः षष्टिकतण्डुलाश्च ॥
कदम्बजम्बूपनसाम्रनिम्बा
नारङ्गधात्रीकदलीफलानि ।
कपित्थमिष्टीमृदुदाडिमानि
भक्ष्याणि चैतानि पुरस्क्रियायाम् ॥

मिष्टी मधुररसविशिष्टफलविशेषः । मृदुर्मृद्वीका । इतराणि प्रसिद्धानि । एतद्भिन्नान्यप्यनिषिद्धानि यावकनारिकेलादीनि भक्ष्याण्येव ।

अथ निषिद्धानि ।

क्षारं च भौमं लवणं तथाऽऽढकी
माषा मसूराश्चणकाश्च कोद्रवाः ।
तैलं सितं मुद्गकमारनालकं
क्षौद्रं गुडं फाणितमामिषादिकम् ॥
कूष्माण्डवृन्ताकपलाण्ड्वलाबु-
च्छत्राकनालं लशुनं करीरः ।
पटोलताम्बूलविभीतकाद्य
मन्यच्च संजातरसान्तरं यत् ॥

अन्धस्तथा पर्युषितं च दग्धं
त्याज्यानि चैतानि वदन्ति धीराः ।

पटोलं पडवर इति प्रसिद्धम् । अलाबुस्तुम्बीफलम् । करीरो वंशाङ्कुरः । अन्ध इत्यन्नम् । अन्यान्यपि निषिद्धानि गृञ्जरकरञ्जादीनि त्याज्यान्येव । गृञ्जरं च गाजर इति मध्यदेशीयभाषया प्रसिद्धा ।

अथासनानि (मेरुतन्त्रे)

आसनं तु द्विधा प्रोक्तं नित्यकामिकभेदतः ।
कुशाजिनाम्बरैर्युक्तं चतुरङ्गुलमूर्द्धतः ॥
चतुरस्रं द्विहस्तं च सुन्दरं मृदुनिर्मलम् ।
इदं सुखासनं नित्यं जपसिद्धिविधायकम् ॥
अथ काम्यानि वक्ष्यन्ते ज्ञानसिद्ध्यै मृगाजिनम् ।
सर्वसिद्ध्यै व्याघ्रचर्म त्वाविकं रोगनाशनम् ॥
कौशेयं पौष्टिकं प्रोक्तं वेत्रजं श्रीविवर्द्धनम् ।
श्वेते तु कम्बले धर्मसिद्धी रक्तेऽर्थसिद्धयः ॥
पीते कामो द्विजान्येषां मोक्षदः कृष्णकम्बलः ।
दुःखमुक्त्यै रञ्जितं तु नीलरङ्गो न शोभनः ॥

(पुरश्चरणचन्द्रिकायाम्)

अभिचारे कृष्णवर्णं रक्तं वश्यादिकर्मणि ।
शान्तिके धवलं प्रोक्तं चित्रकं सर्वकर्मसु ॥
स्तम्भने गजचर्म स्यान्मारणे माहिषं तथा ।
मैषीचर्म तथोच्चाटे खड्गिजं वश्यकर्मणि ॥
विद्वेषे जाम्बुकं प्रोक्तं भवेद्गोचर्म शान्तिके ।

अथ निषिद्धानि (मेरुतन्त्रे)

त्यजेन्निषिद्धमप्राप्तौ न निषिद्धे तु संविशेत् ।
निषिद्धान्यथ वक्ष्यन्ते शोकः स्याद्दारुजासने ॥

वंशासने दरिद्रः स्याद्वस्त्रे स्थानाद्विनाशनम् ।
पाषाणे च तथोच्चाटो ज्वरी स्यान्मृण्मयासने ॥
क्षित्यासने भवेत् पीडा पल्लवे चित्तविभ्रमः ।
तृणासने भवेत् पीडा निषिद्धं त्विष्टिकासनम् ॥
चित्तक्षोभो गृहस्थस्य कृष्णसाराजिने भवेत् ।
वटुर्वनस्थः संन्यासी स्नातकः सिद्धिमाप्नुयात् ॥

(पुरश्चरणचन्द्रिकायाम्)

न दीक्षितो विशेज्जातु कृष्णसाराजिने गृही ।
विशेद्यतिर्वनस्थश्च ब्रह्मचारी च स्नातकः ॥
कुशाजिनाम्बरेणाढ्यं चतुरस्रं समन्ततः ।
एकहस्तं द्विहस्तं वा चतुरङ्गुलमुच्छ्रितम् ॥
स्वस्तिकादिक्रमेणाथ विशेत् तत्र निराकुलः ।
स्वस्तिकं भद्रकं वीरं *कूर्मं चेति चतुष्टयम् ॥
जपेत् प्रशस्तमन्येषां प्रसङ्गादेव कीर्त्तनम् ।
उद्देशानुक्रमेणैव वक्ष्याम्येषां तु लक्षणम् ॥
जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ।
ऋजुकायः समासीनः स्वस्तिकं तदुदीरितम् ॥
गुल्फौ तु वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
पार्श्वे पादौ तु पाणिभ्यां दृढं बध्वा सुनिश्चलम् ॥
भद्रासनं भवेदेतत् सर्वव्याधि†विनाशनम् ।
एकं पादमथैकस्मिन् विन्यस्योरुणि‡ संस्थितः ॥

---

* सिद्धं चेति २-३ पु. पा. । † विषापहम् २-३ पु. पा. ।
‡ तान्त्रिकप्रयोगः

इतरस्मिँस्तथा चोरौ वीरासनमुदाहृतम् ।

तन्त्रान्तरे तु ।

वामोरुन्यस्तदक्षाङ्घ्रिं वीरासनमुदाहृतम्—इत्युक्तम् ।

गुदं निरुद्ध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ॥
कूर्मासनं भवेदेतत् कूर्ममुत्तानकूर्मकम् ।
गोमुखं कुक्कुटं मात्स्यं धनुःपश्चिमतानकम् ॥
मयूरं लावकं सिद्धं पद्मं सिंहं शवासनम् ।
स्वस्तिकं पद्मकं वीरमिति योगविदो विदुः ॥
कुक्कुटासनबन्धस्थो दोर्भ्यां संबध्य कन्धराम् ।
शेते कूर्मवदुत्तान एतदुत्तानकूर्मकम् ॥
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे निवेशयेत् ।
दक्षिणे च तथा सव्यं गोमुखं गोमुखं यथा ॥
पद्मासनं तु संयोज्य जानूर्वोरन्तरे करौ ।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम् ॥
वामोरुमूलार्पितदक्षपादं
    जानोर्बहिर्वेष्टितदक्षदोष्णा ।
प्रगृह्य तिष्ठेत् परिवर्त्तिताङ्गः
    श्रीमत्स्यनाथोदितमासनं तत् ॥
पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षणं कुर्याद्धनुरासनमीरितम् ॥
प्रसार्य पादौ भुवि दण्डरूपौ
    दोर्भ्यां च पादद्वितयं गृहीत्वा ।
जानौ परिन्यस्तललाटदेशो
    वसेदिदं पश्चिमतानमाहुः ॥

अवष्टभ्य धरां सम्यक् तलाभ्यां तु करद्वयम् ।
हस्तयोः कुर्परे चापि स्थापयेन्नाभिपार्श्वयोः ॥
समुन्नतशिरःपादो दण्डवद्व्योम्नि संस्थितः ।
मयूरासनमेतत् तु सर्वरोगहरं परम् ॥
भूमौ स्वमस्तकं स्थाप्यं हस्तयोः कुर्परे तथा ।
पादौ खे दण्डवत् कुर्यान्नरकासनमीरितम् ॥
मेढ्रादुपरि निःक्षिप्य सव्यं गुल्फं ततोपरि* ।
गुल्फान्तरं च निःक्षिप्य मुक्तासनमितीरितम् ॥
एतत् सिद्धासनं प्राहुरन्ये वज्रासनं विदुः ।
मुक्तासनं वदन्त्येके प्राहुर्गुप्तासनं परे ॥
वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा
याम्योरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविघातकारि यमिनां पद्मासनं प्रोच्यते ॥
गुल्फौ च वृषणस्याधः सविन्याः पार्श्वयोर्न्यसेत् ।
दक्षिणे सव्यगुल्फं च दक्षगुल्फं च सव्यके ॥
हस्तौ जान्वोस्तु संस्थाप्य स्वाङ्गुलीः संप्रसार्य च ।
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ॥
सिंहासनं भवेदेतत् पूजितं योगिभिः सदा ।
उत्तानशववद्भूमौ शयनं तु शवासनम् ॥
शवासनं चार्त्तिहरं चित्तविश्रान्तिसाधनम् ।
(यामले)
ऊर्वोः पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मुखाङ्गुलीः ।

---

* अयं 'तस्योपरी'त्यर्थे तान्त्रिकप्रयोगः ।

करौ निदध्यादाख्यातं वज्रासनमनुत्तमम् ॥

(गोरक्षशतके)

योनिस्थानकमङ्घ्रिमलघटितं कृत्वा दृढं विन्यसेन्-
मेढ्रे पादमथैकमेव नियतं कृत्वा समं विग्रहम् ।
स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्यन् भ्रुवोरन्तरं
चैतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रोच्यते ॥

तथा ।

आसनानि च तावन्ति यावन्तो जीवजन्तवः ।
एतेषामखिलान् भेदान् विजनामि महेश्वरः ॥

अथ मालाभेदा (मेरुतन्त्रे)

अथ मालां प्रवक्ष्यामि द्विविधा सा स्थिरा चला ।
स्थिरा तु स्थिरचित्तानां चञ्चला चलचेतसाम् ॥

(यामले)

माला तु त्रिविधा प्रोक्ता प्रथमा वर्णमालिका ।
द्वितीया चरमालोक्ता तृतीया करमालिका ॥

(मेरुतन्त्रे)

अकारादिक्षकारान्तैर्बिन्दुवन्मातृकाक्षरैः ।
अनुलोमविलोमस्थैः क्लृप्तया वर्णमालया ॥
प्रत्येकवर्णयुग्मन्त्राः जप्ताः स्युः सर्वसिद्धिदाः ।
आर्याद्या अपि किं चान्यत् प्रोक्तेयं स्थिरमालिका ॥

(त्रिशक्तिरत्नेऽपि)

अथ वा मातृकामय्या मालया प्रजपेद्बुधः ।
एकैकं वर्णमुच्चार्य वर्णेनान्तरितं जपेत् ॥
सुधीरेव लकारान्तं तत आन्तं समानयेत् ।
मेरुरूपं क्षकारं हि साधको नैव लङ्घयेत् ॥

(मुण्डमालायाम)

मेरुहीना च या माला मेरुलङ्घ्या च या भवेत् ।
अशुद्धा तु भवेदत्र सा माला निष्फला भवेत् ॥
विचित्रा * विशतन्त्वाभा ब्रह्मनाडीगता तु या ।
तया संग्रथिता ध्येया सर्वकामफलप्रदा ॥
अष्टोत्तरशतजपे त्वादौ क्लीबं समुच्चरेत् ।
ऋ-ॠ-ऌ-ॡ-वर्णचतुष्टयं क्लीबं प्रचक्षते ॥
वर्णानामष्टकं वाऽपि काम्यभेदक्रमेण तु ।
अ-क-च-ट-त-प-य-शा इत्येवं चाष्टवर्गकम् ॥

अष्टोत्तरशतजपे कर्त्तव्ये क्लीबचतुष्टयमादावुच्चार्य विलोमसमाप्तौ चापि तच्चतुष्टयं विलोमेन जपेदित्येकः पक्षः ।

अनुलोमविलोमाभ्यां पञ्चाशद्वर्णमुच्चार्य शेषेऽष्टवर्गाक्षराण्युच्चरेदित्यपरः पक्ष इत्यर्थः । क्षकारश्च मेरुत्वेन सकृदेवोच्चार्यस्तदुत्तरं मन्त्रो नोच्चार्य इति तत्र विवेकः ।

प्रकारान्तरमुक्तं (साधनसमुच्चये)

श्रीमायाकामवाग्योगान्मातृकावर्णयोगतः ।
अनुलोमविलोमाभ्यामष्टोत्तरशतं जपेत् ॥

तन्त्रान्तरे ।

त्रयं गुरो त्रयं देवि गणपाय प्रकीर्त्तितम् ।
न्यूनातिरिक्ते द्वितयं शेषमिष्टाय योजयेत् ॥

(मेरुतन्त्रे)

चराऽथ कथ्यते मालाऽभिचारे तिथिसङ्ख्यकैः ।
मुक्त्यार्थं पञ्चविंशत्या †संतुष्ट्यै सर्वदा जपेत् ॥
त्रिंशद्भिर्धर्मवृद्धिः स्याच्चतुष्पञ्चाशतेप्सितम् ।
शतात् सौख्यं तथाऽष्टाभिः शतात् सफलसिद्धयः ॥

---

* चित्रिणी इति २–३ पु० पा० ।

† ससङ्ख्यैः इति २–३ पु० पा० ।

समस्तसिद्ध्यै रुद्राक्षा मणयो धनदा मताः ।
गतप्राप्तिकरः शङ्खो भोगकृत् स्फाटिको मतः ॥
पुत्रप्रदाः पुत्रजीवाः पद्माक्षाः पुष्टिवर्द्धनाः ।
विद्रुमोत्था वश्यकरा मौक्तिका मुक्तिदा मताः ॥
पापापहाः कुशमयाः स्वर्णजाः कामदायकाः ।
कामवृद्धिस्तारजातैरिन्द्राक्षैः स्याद्गतं पदम् ॥
स्त्रीवश्यार्थं हरिद्राया दार्वी पुरुषवश्यकृत् ।
ज्वरहर्त्री तु लाक्षायाः खड्गस्य पितृतृप्तिकृत् ॥
अर्कस्योच्चाटने कार्या श्रीफलैर्ज्ञानसाधने ।
गजदन्तस्य सर्वार्थं मोहने ताम्रजा मता ॥
मारणे चायसी प्रोक्ता धनार्थं श्वेतपद्मजा ।
विषोत्तारे चन्दनोत्था शान्तिकृच्छ्वेतकाष्ठजा ॥
रक्तचन्दनबीजोत्था यक्षिण्यादिकसाधने ।
पद्मकाष्ठोद्भवा तुष्ट्यै देवदारुभवैर्विरुक् ॥
कृष्णकाष्ठसमुद्भूतैस्तामसं कर्म सिद्ध्यति ।
भूतस्तम्भे निम्बजाता जनस्तम्भे समीभवा ॥
महानिम्बेन डाकिन्या भूनिम्बैः स्तम्भनं रुजाम् ।
इन्द्रवृक्षाद्व्रणस्तम्भोऽभिचारो वानरास्थितः ॥
ऋक्षास्थितो वन्यसिद्धिः शार्दूलात् तस्य देवताः ।
नरास्था राक्षसा वश्या वीरा वश्या हयास्थिभिः ॥
रासभास्था क्षुद्रसिद्धिर्मान्यता तु गजास्थिभिः ।
मृत्तिका*भृष्टमणिजा माला शावरसिद्धिदा ॥

(पुरश्चरणचन्द्रिकायाम्)

रुद्राक्षशङ्खपद्माक्षपुत्रजीवकमौक्तिकैः ।

---

* भृष्टं जलोपसेकं विना वालुकाग्निसंयोगेन पक्वम् ।

स्फाटिकैर्मणिरत्नैश्च हेमराजतवैद्रुमैः ॥
कुशैः पूर्वोदितैः सर्वैः पर्वभिर्मातृकाक्षरैः ।
गर्दभाश्वनराणां वै दन्तैरप्यभिचारकैः ॥
वैष्णवे तुलसी माला गजदन्तैर्गणेश्वरे ।
त्रिपुराया जपे शस्ता इन्द्राक्षै रक्तचन्दनैः ॥
महाशङ्खमयी ज्ञेया नीलसारस्वते मनौ ।

(त्रिशक्तिरत्नेऽपि)

रहस्यमालया जप्ता तारिणी सिद्धिदा भवेत् ।
अतस्तया प्रजप्तव्या मालया सिद्धिमिच्छता ॥
महाशङ्खमयी माला पञ्चाशन्मणिनिर्मिता ।
रहस्यमाला संप्रोक्ता गोपनीया प्रयत्नतः ॥
कर्णनेत्रान्तरालस्थो महाशङ्खः प्रकीर्त्तितः ।
तदभावे तु कस्यापि कर्त्तव्याऽवयवस्य वै ॥

(यामले)

नरेभाश्वोष्ट्रमुण्डानां छिन्नानां रणसंकटे ।
मालां वै कारयेद्वृत्तां महाविद्यासु साधकः ॥
तदभावे स्फाटिकी स्यान्माला सर्वसमृद्धिदा ।

(वीरतन्त्रे)

रहस्यमालया जप्ता कालिका सर्वसिद्धिदा ।
महाशङ्खास्थिमालोक्ता तारिणीकालिकाविधौ ॥
तदभावे स्फाटकी स्यात् तथा पद्माक्षसंभवा ।

तन्त्रे* ।

स्वयम्भूमालिका देवि भैरव्यां कालिकाविधौ ।

---

* रुद्रयामले इति २ पु ०पा ० ।

छिन्नमस्ताविधौ देवि महाशङ्खास्थिमालिका ॥
बालायां भुवनेश्वर्यां स्फाटिकी परिकीर्त्तिता ।
गुञ्जामाला तु मातङ्ग्यां धूम्रायां खरदन्तजा ॥
हरिद्रा वगलायां च कमलाक्षा रमाविधौ ।

तथा ।

पूर्वाम्नाये स्फाटिकजैर्दक्षिणे रुद्रनेत्रजैः ।
प्रवालैर्मौक्तिकैर्देवि पश्चिमाम्नायदेवते ॥
उत्तराम्नायदेवीनां महाशङ्खास्थिमालिका ।
ऊर्ध्वाम्नाये स्वयम्भूत्था पाताले रत्नसम्भवा ॥
प्रवालैः सूर्यमन्त्रे च मौक्तिकैः शक्तिमात्रके ।
शिवशक्तिमयी माला रौद्राक्षी स्फाटिकी तथा ॥
रुद्राक्षस्वर्णसंयुक्ता मालां विद्धि शिवात्मिकाम् ।
सर्वतन्त्रेषु रुद्राक्षाः शक्तिमन्त्रे दिवा न हि ॥

(यामले)

रुद्राक्षैर्विहिता माला सर्वकामप्रसाधनी ।
निर्मिता शङ्खमालाभिर्धनं कीर्त्तिं च यच्छति ॥
पद्माक्षैः पुष्टिलक्ष्मीदा शत्रुनाशकरी तथा ।
पुत्रजीवभवा पुत्रपशुश्रीधान्यऋद्धिदा ॥
मुक्ताभी रचिता माला सौभाग्यं विपुलं श्रियम् ।
मन्त्रप्रत्यक्षदा सिद्धिं शान्तिकं चाथ पौष्टिकम् ॥
मुक्तिं च तनुते तद्वत् स्फाटिक्यप्यक्षमालिका ।
सारस्वते पद्मरागा पुष्कले च धने तथा ॥
सौवर्णी राजती माला सर्वान् कामान् प्रयच्छति ।
सारस्वते प्रवालोत्था वश्येऽधिकधनागमे ॥

पापक्षयकरी कौशी रुद्राक्षादिकुशान्तकैः ।
सर्वैरेतैर्विरचिता माला स्यान्मुक्तये नृणाम् ॥
नित्यं जपं प्रकुर्वीत पर्वभिर्वर्णमालिका ।
स्थिरेण मनसा न्यस्ता सर्वान् कामान् प्रयच्छति ॥
उच्चाटनेऽश्वदन्तानां माला प्रोक्ताऽश्ववालकैः ।
खरदन्तैरधोभूतैर्मनुष्यस्नायुतन्तुना ॥
ग्रथितैर्निर्मिता माला शत्रूणां नाशिते मता ।
प्रेतदन्तैरधोभूतैः कर्त्तव्या जपमालिका ॥
साध्यदेहभवैः केशैः प्रोतव्या द्वेषकर्मणि ।
अङ्गुलीजपसंख्यानमेकमेवमुदाहृतम् ॥
पुत्रजीवैर्दशगुणैः शतं शङ्खैः सहस्रकम् ।
प्रवालैर्मणिरत्नैश्च दशसाहस्रकं स्मृतम् ॥
तदेत्र स्फादिकं प्रोक्तं मौक्तिकैर्लक्षमुच्यते ।
पद्माक्षैर्दशलक्षं स्याद्राजतैः कोटिरुच्यते ॥
सौवर्णैर्द्विगुणा सैव सर्वैः शतगुणा स्मृता ।
कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं फलम् ॥
श्वेतपद्माक्षमालाभिरपि स्यादमितं फलम् ।
मातृकावर्णसंभूतमालयाऽपि तदेव तु ॥

(मेरुतन्त्रे)

कुशग्रन्थ्या जपेद्विप्रः सुवर्णमणिभिर्नृपः ।
पुत्रजीवैर्जपेद्वैश्यः पद्माक्षैः सर्व एव हि ॥
रुद्राक्षस्फाटिकेन्द्राक्षमध्ये किंचिन्न दापयेत् ।
मध्ये दत्वा जपं कुर्वन् काममोक्षौ विनाशयेत् ॥

रुद्राक्षप्रभेदकथनपूर्वकं तन्माहात्म्यमाह तत्रैव ।

धात्रीफलोपमश्श्रेष्ठो मध्यो बदरसन्निभः ।
अधमश्चणकाभः स्यात् ततो हीनो विपत्तिकृत् ॥
श्वेतरक्तसुवर्णाभकृष्णवर्णा द्विजादितः ।
एतेषु ब्राह्मणः श्रेष्ठो जपमालाकृते भृशम् ॥
अलाभे तु द्विजातीनामपि वा स्वस्वजातयः ।
कलौ तु दुर्लभा विद्या यथा विप्राः स्वधर्मगाः ॥
अतिस्थूलोऽतिसूक्ष्मश्च स्फुटितो भङ्गुरो लघुः ।
भिन्नः पुराधृतो जीर्णो रुद्राक्षो न शुभप्रदः ॥

तथा ।

एकवक्त्रैर्द्विवक्त्रैश्च चतुर्वक्त्रैश्च पञ्चभिः ।
षड्वक्त्रैर्वाऽथ कर्त्तव्या मिथो मिश्राँस्तु वर्जयेत् ॥
एकवक्त्रः शिवस्तस्य माला तु जपतो हरेत् ।
ब्रह्महत्यादिपापानि तथा राज्यादिकेष्टदा ॥
उमाशङ्करनामा यो द्विमुखोऽयं व्यपोहति ।
गोहत्यादिकपापानि गार्हस्थाश्रमसौख्यदः ॥
त्रिमुखस्त्वग्निरूपः स्यात् स्त्रीहत्यादिकपापहा ।
धर्मार्थकामाः सिध्यन्ति धारणात् तज्जपादपि ॥
चतुर्मुखो भवेद्ब्रह्मा भ्रूणहत्यादिनाशकः ।
स्फुरन्ति सकला विद्या वाक्सिद्धिश्चापि जायते ॥
पञ्चवक्त्रः शिवः साक्षात् सर्वपापहरः स्मृतः ।
शैवगाणेशशाक्तानां द्रुतं सिद्धिस्तु तज्जपात् ॥
कार्त्तिकेयस्तु षड्वक्त्रः स्खलितव्रतपापहा ।

विधिना दक्षिणे बाहौ धारणात् समरे जयः ॥
सप्तवक्त्रो महानागोऽनन्तो नामाथ तज्जपात् ।
अनन्ता सिद्धयः सर्पविषभीश्च न जायते ॥
अष्टवक्त्रो गणेशः स्यात् सर्वविघ्ननिवारकः ।
नश्यन्ति तज्जपात् सर्वे कामक्रोधादिशत्रवः ॥
नववक्त्रो भैरवः स्याद्वाममार्गस्थदेवताः ।
जपादेव प्रसीदन्ति वामबाहौ स्थितौघहा ॥
जनार्दनो दशमुखो जपान्नश्यन्ति धारणात् ।
पिशाचग्रहवेतालब्रह्मराक्षसपन्नगाः ॥
एकादशमुखः साक्षाद्रुद्र एवास्य धारणात् ।
जपाच्च हयमेधादियज्ञानां फलभाग्भवेत् ॥
द्वादशास्यो भास्करः स्यात् तज्जपाद्धारणात् तथा ।
तेजस्वी च प्रतापी च गोमेधफलभाग्भवेत् ॥
त्रयोदशमुखः साक्षाद्विश्वेदेवात्मकः स्मृतः ।
श्राद्धकाले धृतो दद्यात् पितृणामक्षयां गतिम् ॥
चतुर्दशमुखे जप्तं तदाऽनन्ताय जायते ।
पूज्यते देवमनुजैरक्षयां लभते गतिम् ॥

तथा ।

देवान् पुष्णन्ति ये देवा पशवस्ते तु वैदिकाः ।
तान् पातयन्ति ये कौले तेषां शास्ता स्वयं यमः ॥
तेषां संरक्षणार्थाय नान्यो रुद्राक्षतो भुवि ।
रुद्राक्षाः सर्वदेवानां मन्त्रसिद्धिविधायकाः ॥
रुद्राक्षं कण्ठमाश्रित्य शुनको म्रियते यदि ।

सोऽपि रुद्रत्वमाप्नोति किं पुनर्मानुषादयः ॥
उच्छिष्टो वा विकर्मस्थो युक्तो वा सर्वपातकैः ।
मुच्यते सर्वपापेभ्यो नरो रुद्राक्षधारणात् ॥
रुद्राक्षमालिकां कण्ठे धारयेद्भक्तिवर्जितः ।
पापकर्माऽपि यो नित्यं रुद्रलोके महीयते ॥
अरुद्राक्षधरो भूत्वा यत्किंचित् कर्मवैदिकम् ।
कुर्याद्विप्रस्तु यो मौढ्यान्नासावाप्नोति तत्फलम् ॥

रुद्राक्षधारणप्रकारस्तत्रैव ।

शिरोमाला तु षड्विंशद्द्वात्रिंशत्कण्ठमालिका ।
कूर्परे षोडश प्रोक्ता द्वात्रिंशन्मणिबन्धयोः ॥
अष्टोत्तरशतैर्युक्तमुपवीतं विधीयते ।
तदर्धमुरसो माला शिखायामेकमुच्यते ॥
कर्णयोश्चापि षट्संख्या धारणक्रम ईरितः ।
संख्याहीनं न कर्त्तव्यमधिकं नैव दूष्यति ॥

तन्त्रान्तरे ।

रुद्राक्षान् कण्ठदेशे दशनपरिमितान् मस्तके विंशती द्वे
षट् षट् कर्णप्रदेशे करयुगलकृते द्वादश द्वादशैव ।
बाह्वोरिन्दोः कलाभिर्नयनयुगकृते चैकमेकं शिखायाम्
वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः ॥
रुद्राक्षान् धारयत्येवं देहान्ते स शिवो भवेत् ।
बहुलं लभते पुण्यं भाग्यवानिह जायते ॥
स्नाने दाने जपे होमे वैश्वदेवे सुरार्चने ।
प्रायश्चित्ते तथा श्राद्धे दीक्षाकाले विशेषतः ॥
रुद्राक्षधारी भूत्वा च यत्किंचित् कर्म वैदिकम् ।

यो विप्रः सततं कुर्यात् तत् कर्म सफलं भवेत् ॥
कण्ठे शिरसि हस्ते च कर्णयोरुपवीतके ।
रुद्राक्षधारणादेव रुद्रो भवति मानवः ॥
खादन्मांसं पिबन्मद्यं संगच्छन्मर्त्यजातिषु ।
सद्यो भवति पूतात्मा रुद्राक्षं मूर्ध्नि धारयन् ॥

देवताभेदेन मालाग्रथनकालभेद उक्तस्तत्रैव ।

चतुर्थ्यां प्रोतयेन्मालां गणनाथस्य मन्त्रकैः ।
मध्याह्नेऽर्कस्य सप्तम्यां रवौ वातस्य मन्त्रकैः ॥
द्वादश्यां वैष्णवी माला प्रोतव्या विष्णुमन्त्रतः ।
त्रयोदश्यां तु सन्ध्यायां तन्मन्त्रैः शिवमालिकाम् ॥
अष्टम्यां वा चतुर्दश्यां नवम्यां भूमिनन्दने ।
शक्तीनामपि कर्त्तव्या भुक्त्वा रात्रौ यथाविधि ॥

सूत्रभेदा उक्तास्तत्रैव ।

ग्रथिता पट्टसूत्रेण देव्याः प्रीत्यै तु मालिका ।
कार्पासैर्वैष्णवी माला वल्मसूत्रैरथापि वा ॥
ऊर्णाभिर्वा वल्कलैर्वा शैवी कार्या ससूत्रजा ।
प्रायशः सर्वदेवानां सूत्रोत्पत्तिविधिं शृणु ॥
सूत्रं द्विजेन्द्रपुण्यस्त्रीनिर्मितं ग्रन्थिवर्जितम् ।
त्रिगुणं त्रिगुणीकृत्य ग्राह्यं प्रक्षाल्य यत्नतः ॥

(उमामहेश्वरे)

या जीवत्पुत्रका नारी सुन्दरी पतिवत्सला ।
तया कर्त्तितसूत्रेण व्यूढा माला सुभावहा ॥

तन्त्रान्तरे ।

कन्याकर्त्तितसूत्रेण दुर्वर्णस्वर्णजैरपि ।

दुर्वर्णं रजतम् ।

मालाग्रथनप्रकारस्तत्संस्कारश्च (पुरश्चरणचन्द्रिकायाम्)

अथातो ग्रथनं वक्ष्ये मालानां तन्त्रबोधितम् ।
एकभक्तं विधायादौ साधको ग्रथयेत् स्वयम् ॥
स्वयं च माला ग्रथिता स्वघृष्टं
    न धार्यते चन्दनमित्यनेन ।
निषिध्यते चन्दनसन्निधानात्
    स्रगत्र पुष्पस्य न चाक्षमाला ॥
कृतनित्यक्रियाशुद्धः उक्तेष्वृक्षेषु मन्त्रवित् ।
यथाकामं यथालाभादक्ष्याण्यानीय यत्नतः ॥
अन्योन्यसमरूपाणि नातिस्थूलकृशानि च ।
कीटादिभिरदुष्टानि न जीर्णानि नवानि वै ॥
गव्यैस्तु पञ्चभिस्तानि प्रक्षाल्य च पृथक् पृथक् ।

पञ्चगव्येषु विशेष उक्तो (मेरुतन्त्रे)

दुग्धकाञ्चनवर्णायाः श्वेतायाश्चैव गोमयम् ।
गोमूत्रं ताम्रवर्णाया नीलायाश्च भवेद्दधि ॥
घृतं तु कृष्णवर्णाया एवं पञ्चामृतेऽपि च ।
गवां वर्णास्तु सुलभाः सन्ति देशेषु कुत्र चित् ॥
तत्र वर्णविभागेन पञ्चगव्यानि चाहरेत् ।
वर्णालाभेन दोषोऽस्ति मात्राहीनं तु वर्जयेत् ॥
गोसकृद्द्विगुणं मूत्रं सर्पिर्दद्याच्चतुर्गुणम् ।
क्षीरमष्टगुणं प्रोक्तं पञ्चगव्यं तथा दधि ॥
गायत्र्याऽऽदाय गोमूत्रं गन्धद्वारेति गोमयम् ।

*आप्यायस्वेति च क्षीरं †दधि क्राव्णोति वै दधि ॥
‡तेजोऽसि शुक्रमित्याज्यं §देवस्य त्वा कुशोदकम् ।
क्षालयेत् पञ्चगव्याद्यैः .... इति ॥

(पुरश्चरणचन्द्रिकायाम्)

अश्वत्थपत्रैर्नवकैः पद्माकारेण कल्पिते ।
सूत्रे मणीन् सगन्धाभिक्षालितांस्तत्र निःक्षिपेत् ॥
तारं शक्तिं मातृकाञ्च सूत्रे चैव मणिष्वथ ।
विन्यस्य पूजयेदाज्यैर्जुहुयाच्चैव शक्तितः ॥
मालामेकैकमादाय सूत्रे वै योजयेत् सुधीः ।
मुखं मुखे तु संयोज्य पुच्छं पुच्छे तु योजयेत् ॥
गोपुच्छसदृशी कार्या यद्वा सर्पाकृतिः शुभा ।
तत्सजातीयमेकाक्षं मेरुत्वेनाग्रतो न्यसेत् ॥

(मेरुतन्त्रे)

एको मेरुस्तत्र देयः सर्वेभ्यः स्थौल्ययुक् च यः ।
आद्यं स्थूल ततस्तस्मान्न्यूनं न्यूनतरं ततः ॥
सर्पाकारां प्रकुर्वीत ब्रह्मग्रन्थिमणिं प्रति ।
अथ वा ग्रन्थिरहितं दृढरश्मिसमन्वितम् ॥
त्रिरावृत्त्याऽथ मध्येन चार्धावृत्त्याऽन्तदेशतः ।
ग्रन्थिः प्रदक्षिणावर्त्तः स ब्रह्मग्रन्थिरुच्यते ॥
अन्योन्यघर्षणाद्देव जपहानिर्भवेद्ध्रुवम् ।
मध्यतो ग्रन्थयः कार्या नात्र मुक्तादि विन्यसेत् ॥

---

* वाजसनेयिसंहितायाम् १२ अ० ११४ मन्त्रः ।
† वाजसनेयिसंहितायाम् २३ अ० ३२ मन्त्रः ।
‡ वाजसनेयिसंहितायाम् २२ अ० १ मन्त्रः ।
§ वाजसनोयिसंहितायाम् १ अ० १० मन्त्रः ।

(पुरश्चरणचन्द्रिकायाम्)

एकैकमणिमध्ये तु ब्रह्मग्रन्थिं प्रकल्पयेत् ।
जपमालां विधायेत्थं ततः संस्कारमाचरेत् ॥
क्षालयेत् पञ्चगव्येन सद्योजातेन सज्जलैः ।
ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ॥
भवे भवे नाति भवे भवस्व मां भवोद्भवाय नमः ।
चन्दनागुरुगन्धाद्यैर्वामदेवेन घर्षयेत् ॥

ॐ वामदेवाय नम ।
ॐ ज्येष्ठाय नमः ।
ॐ श्रेष्ठाय नमः ।
ॐ रुद्राय नमः ।
ॐ कालाय नमः ।
ॐ कलविकरणाय नमः ।
ॐ बलप्रमथनाय नमः ।
ॐ सर्वभूतदमनाय नमः ।
ॐ मनोत्मनाय नमः ।

धूपयेत् तामघोरेण—

ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः सर्वतः सर्वसर्वेभ्यः ।

लेपयेत् तत्पुरुषेण तु ।

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।

मन्त्रयेत् पञ्चमेनैव प्रत्येकं तु शतं शतम् ॥

ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्माशिषो मेऽस्तु सदा शिवोम् ।

मेरुश्च पञ्चमेनैव ततो मन्त्रेण मन्त्रयेत् ।
संस्कृत्यैवं बुधो मालां तत्प्राणाँ स्थापयेत् ततः ॥

(क्रियासंग्रहे)

मन्त्रयेन्मूलमन्त्रेण क्रमेणोत्क्रमयोगतः ।

तथैव मात्रिकावर्णैर्मन्त्रयेन्मन्त्रतत्त्ववित् ॥
पूजयित्वा यथान्यायमिष्टदेवमनुक्रमात् ।
न्यासपूर्वं जपेन्मन्त्रमष्टोत्तरसहस्रकम् ॥
जुहुयाच्च दशांशेन यस्य देवस्य यत् प्रियम् ।

(योगिनीतन्त्रे)

होमकर्म ततः कुर्याद्देवताभावसिद्धये ।
अष्टोत्तरशतं हुत्वा संपाताज्यं विनिःक्षिपेत् ॥
होमकर्मण्यशक्तश्चेद्द्विगुणं जपमाचरेत् ।
त्वं माले सर्वलोकानां सर्वसिद्धिप्रदा मता ॥
तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ।
इत्युक्त्वा परिपूज्याथ गोपयेद्यत्नतो गृही ॥

(यामले तु)

माले माले महामाले सर्वतत्त्वस्वरूपिणि ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
मायाबीजादिकं कृत्वा रक्तपुष्पैः समर्चयेत्—इत्युक्तम् ।

(पुरश्चरणचन्द्रिकायाम)

एवं कृत्वाऽक्षमालायां जपेन्मातृकया सुधीः ।
मातृकावर्णभेदेभ्यः सर्वे तन्त्राः प्रजज्ञिरे ॥
अतः सकलमन्त्राणां जपः कार्योऽनया स्रजा ।
गुरुं संपूज्य तद्धस्ताद्गृह्णीयात् सर्वसिद्धये ॥
गायत्रीं तु जपन् कश्चिन्मालां ग्रथ्नाति तान्त्रिकः ।
न हीत्थं ग्रथनं क्वापि मन्त्रशास्त्रे निरूपितम् ॥
अशुचिर्न स्पृशेदेनां करभ्रष्टां न कारयेत् ।

(मेरुतन्त्रे)

येन मन्त्रेण या माला कृता तं तु जपेत् तया ।
अन्यमन्त्रजपाच्छापो देवतायाः प्रजायते ॥
दृढसूत्रं नियुञ्जीत जपे त्रुट्यति नो यथा ।
जीर्णे सूत्रे पुनः सूत्रं ग्रन्थयित्वा शतं जपेत् ॥

(पुरश्चरणचन्द्रिकायाम्)

प्रमादात् पतिते हस्ताच्छतमष्टोत्तरं जपेत् ।
तावन्निषिद्धं संस्पर्शे क्षालयित्वा यथोदितम् ॥

(मेरुतन्त्रे)

तर्जन्या न स्पृशेत् सूत्रं कम्पयेन्नैव धूपयेत् ।
न स्पृशेद्वामहस्तेन करभ्रष्टां न कारयेत् ॥
अक्षाणां चालनेऽङ्गुष्ठश्चान्यमक्षं न संस्पृशेत् ।
जपकाले सदा विद्वान्मेरुं चैव न लङ्घयेत् ॥
परिवर्त्तनकाले तु संघट्टं नैव कारयेत् ।
कलिः खटखटाशब्दे दोलमाने चलेन्मतिः ॥
चलिते चैव विद्वेषः स्फुटिते व्याधिसम्भवः ।
हस्तच्युते महाविघ्नः सूत्रच्छेदे विनाशकृत् ॥

(क्रियासंग्रहे)

छिन्ने सूत्रे तु मालायाः पुनः संस्कारमाचरेत् ।
अष्टोत्तरसहस्रं तु जपेद्वाऽष्टोत्तरं शतम् ॥

(शैवागमे)

यदा संत्रुट्यते माला ग्रन्थयित्वा च पूर्ववत् ।
प्रतिष्ठितायां तस्यां तु मन्त्रं जप्यादनन्यधीः ॥

अन्यत्रापि ।

त्रुटिता चेत् स्वयं माला प्रायश्चित्तं समाचरेत् ।

गजान्तकसहस्रं तु जपहोमं समाचरेत् ॥
पुनः संग्रथनं कृत्वा प्राणस्थापनपूर्वकम् ।
तदा माला सिद्धिदा स्यान्नान्यथा शाङ्करं वचः ॥
अग्निदग्धे जपेल्लक्षं नष्टे भग्ने द्विलक्षकम् ।
चौरनीते षट्सहस्रं पतिते तु शतं जपेत् ॥

(पुरश्चरणचन्द्रिकायाम्)

अङ्गुष्ठस्थामक्षमालां चालयेन्मध्यमाग्रतः ।
तर्जन्या न स्पृशेत् सोऽयं मुक्तिदो गणनक्रमः ॥
भुक्तौ मुक्तौ तथा हृष्टौ मध्यमायां जपेत् सुधीः ।
अङ्गुष्ठानामिकाभ्यां तु जपेदुत्तमकर्मणि ॥
तर्जन्यङ्गुष्ठसंयोगाद्विद्वेषोच्चाटने जपः ।
कनिष्ठाङ्गुष्ठसंयोगाज्जपेन्मारणकर्मणि ॥
अन्यकाले इमां मालां पूजयित्वा तु गोपयेत् ।
गुरुं प्रकाशयेद्विद्वान्न तु मन्त्रं कदा चन ॥
अक्षमालां च मुद्रां च गुरोरपि न दर्शयेत् ।
भूतराक्षसवेतालाः सिद्धगन्धर्वचारणाः ॥
हरन्ति प्रकटं यस्मात् तस्माद्गुप्तं जपेत् सुधीः ।

अथ स्त्रीशूद्राणां मालासंस्कारः (मेरुतन्त्रे)

शूद्रार्थं वा स्त्रियामर्थे मालासंस्कार उच्यते ।
गणेशसूर्यविष्णवीशदुर्गाः संपूज्य भक्तितः ॥
मालायामथ तां मालां हूसौँ बीजेनाभिमन्त्रिताम् ।
अष्टोत्तरशतं पञ्चगव्ये तां स्थापयेत् त्र्यहम् ॥
चतुर्थे तु समुद्धृत्य क्षालयेदस्त्रमन्त्रतः ।
हृन्मन्त्रेण ग्रन्थयित्वा स्थण्डिले तां निधापयेत् ॥

तस्मादुत्तोल्य तां मालां स्थापयेद्धेमपात्रके ।
पञ्चामृतेन संस्नाप्य शीतलेन जलेन च ॥
चन्दनेन सुगन्धेन कस्तूरीकुङ्कुमादिभिः ।
अभिषेकं ततः कुर्याद्ह्सौँ मन्त्रेण साधकः ॥
नव ग्रहान् पूजयित्वा दिक्पालाँश्चापि पूजयेत् ।

अत्रापि मातृकावर्णैर्मूलमन्त्रेण च मालामभिमन्त्र्य तस्यां प्राणप्रतिष्ठापूर्वकमिष्टदेवतार्चनं पूर्ववत् कार्यमिति संप्रदायविदः ।

तथा ।

तिलेन घृतयुक्तेन शक्तितो होमयेत् ततः ।
स्वर्णं तु दक्षिणां दद्याद्गुरवे मणिसंख्यकाम् ॥
तन्मन्त्रजापिनो विप्रान् भोजयेद्वाऽथ वैदिकान् ।
अभावे स्वर्णपात्रस्य ग्राह्यमश्वत्थपत्रकम् ॥
मालासंस्कार इत्युक्तो जपे स्यात् सिद्धिदायकः ।

अथ वाममार्गिणां मालासंस्कारस्तत्रैव ।

कीकशादिकमालानां कौलिकानां च वामिनाम् ।
सिद्ध्यै वक्ष्यामि संस्कारं सर्वतन्त्रेषु गोपितम् ॥
शिल्पिनं पूजयेदादौ वस्त्रगन्धानुलेपनैः ।
संहृष्टः कलयेन्मालां मन्त्रपूतं पिबेन्मधु ॥
पञ्चाशन्मणिभिः कार्या ऋतुमत्या भगे क्षिपेत् ।
निशामेकां समुद्धृत्य कारणैः क्षालयेत् ततः ॥
शुद्धोदैर्मूलमन्त्रेणाभिषिञ्चेद्विजयारसैः ।
प्रक्षाल्य धूपयेत् पश्चात् प्रोतयेदिष्टसूत्रकैः ॥
सूत्रं स्वेष्टजपे नीलं कृष्णं मारणकर्मणि ।
मोहने हरितं स्तम्भे धूमाभं द्विषि तालभम् ॥

शान्तौ पुष्टौ सितं द्वेषे रक्तमुच्चाटने भवेत् ।
वश्ये पीतं कषायं तु विक्षेपकरणे मतम् ॥
चक्रपूजां ततः कुर्यात् साष्टोत्तरसहस्रकम् ।
हुनेन्मद्यपलाभ्यां च मूलमन्त्रेण साधकः ॥
ततो वलिं यथान्यायं महिषादेः प्रदापयेत् ।
शक्तीश्च साधकाश्चाँपि भोजयेन्मणिसंख्यकान् ॥
एवं संसाधितां मालां पशवे न प्रदापयेत् ।

अथ करमाला (बालातन्त्रे)

तर्जनी मध्यमाऽनामा कनिष्ठा चेति ताः क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्वाणो मध्यमा चैकपर्विका ॥
पर्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत् ।

तन्त्रान्तरे ।

अनामामध्यमारभ्य कनिष्ठानुक्रमेण च ।
तर्जनीमूलपर्यन्ता करमाला प्रकीर्त्तिता ॥

सनत्कुमारोऽपि ।

अनामामध्यमारभ्य कनिष्ठादित एव च ।
तर्जनीमूलपर्यन्तं जपेद्दशसु पर्वसु ॥
अनामामूलमारभ्य कनिष्ठादित एव च ।
तर्जनीमध्यपर्यन्तमष्टपर्वसु संजपेत् ॥

अयमुत्तरः श्लोकश्चाष्टोत्तरशतसंख्यजपे कर्त्तव्ये शतजपोत्तरमष्टजपपरः । इदं च वैष्णवविषयम् ।

शक्तिविषये तु ।

आरभ्यानामिकामूलात् प्रादक्षिण्यक्रमेण तु ।
मध्यमामूलपर्यन्तं जपेदष्टसु पर्वसु ॥
अनामामध्यमं पर्व मेरुं कृत्वा न लङ्घयेत् ।

तर्जन्यग्रे तथा मध्ये यो जपेत् तत्र मानवः ॥
चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो धनम् ।

इति (सिद्धान्तसारे) प्रोक्तम् ।

तत्रैव ।

अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
तर्जनीमूलपर्यन्तं जपेन्नवसु पर्वसु ॥

इदं च द्वादशावृत्त्याऽष्टोत्तरशतसंख्यजपपरम् ।

श्रीविद्यायां तु (यामले) ।

अनामामध्यमायाश्च मूलाग्रं तु द्वयं द्वयम् ।
कनिष्ठायाश्च तर्जन्यास्त्रयं पर्व महेश्वरि ॥
अनामामध्यमायाश्च मेरुः स्याद् द्वितयं शुभम् ।
प्रदक्षिणक्रमाद्देवि जपेत् त्रिपुरसुन्दरीम्—इति विशेष उक्तः ॥

(मेरुतन्त्रे)

अङ्गुलीर्न वियुञ्जीत जपकाले कदा चन ।
अङ्गुलीनां वियोगेन छिद्रेषु स्रवते जपः ॥
नोल्लङ्घयेच्च गणनां किंचित् संकोचयेत् तलम् ।
न दर्शयेत् करं नो चेत् फलं गृह्णन्ति राक्षसाः ॥

(पुरश्चरणचन्द्रिकायाम्)

अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्वसन्धिषु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥
गणनाविधिमुल्लङ्घ्य यो जपेत् तु प्रमादतः ।
गृह्णन्ति राक्षसा यस्मान्नियतं गणयेद्बुधः ॥

(रुद्रयामले)

नाक्षतैर्हस्तपर्वैर्वा न धान्यैर्नैव पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसंख्यां न कारयेत् ॥
लाक्षाकुसितसिन्दूरं गोमयं च करीषकम् ।

विलोड्य गुडिकां कृत्वा जपसंख्यां तु कारयेत् ॥

(मन्त्रतन्त्रप्रकाशे)

तत्राङ्गुलिजपं कुर्वन् साङ्गुष्ठाङ्गुलिभिर्जपेत् ।
अङ्गुष्ठेन विना कर्म कृतं तन्निष्फलं भवेत् ॥

(मुण्डमालायाम्)

नित्यं जपं करे कुर्यान्न तु काम्यं कदा चन ।
काम्यमपि करे कुर्याद्यदि माला न विद्यते ॥

अथ मुद्राप्रकरणम् ।

तत्र मुद्रापदार्थ उक्तः (कुलार्णवे)

मुदं कुर्वन्ति देवानां मनांसि द्रावयन्ति च ।
तस्मान्मुद्रा इति ख्याता दर्शितव्याः कुलेश्वरि ॥

(मेरुतन्त्रेऽपि)

मुदं स्वरूपलाभाभ्यां देहद्वारेण चात्मनः ।
या अर्पयन्त्ययत्नेन मुद्रास्ताः शक्तयो मताः ॥
मोदयन्ति ग्रहादिभ्यः पापौघं द्रावयन्ति च ।
मोदनं द्रावणं यस्मादतो मुद्राः प्रकीर्त्तिताः ॥

(यामले)

मोदनात् सर्वदेवानां द्रावणात् पापसन्ततेः ।
तस्मान्मुद्रेयमाख्याता सर्वकर्मार्थसाधिनी ॥
अथ मुद्राः प्रवक्ष्यामि सर्वतन्त्रेषु गोपिताः ।
याभिर्विरचिताभिश्च मोदन्ते मन्त्रदेवताः ॥
अर्चयेज्जपकाले च ध्याने काम्ये च कर्मणि ।
स्नाने चावाहने शङ्खे प्रतिष्ठायां च रक्षणे ॥
नैवेद्ये च तथाऽन्यत्र तत्तत्कल्पप्रकाशिते ।
स्थाने मुद्रा दर्शितव्याः स्वस्वलक्षणलक्षिताः ॥

आवाहनादिका मुद्रा नव साधारणा मताः ।
तथा षडङ्गमुद्राश्च सर्वमन्त्रेषु योजयेत् ॥
एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः ।
शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥
वनमाला तथा ज्ञानमुद्रा विल्वाह्वया तथा ।
गरुडाख्या तथा मुद्रा विष्णोः सन्तोषवर्धिनी ॥
नारसिंही च वाराही हयग्रीवी धनुस्तथा ।
वाणमुद्रा ततः पर्शुर्जगन्मोहनिका तथा ॥
काममुद्रा परा ख्याता शिवस्य दश मुद्रिकाः ।
लिङ्गयोनित्रिशूलाख्या मालेष्टाभीमृगात्मिकाः ॥
खट्वाङ्गा च कपालाख्या डमरुः शिवतोषकः ।
सूर्यस्य चैव पद्माख्या सप्त मुद्रा गणेशितुः ॥
दन्तपाशाङ्कुशा विघ्नपर्शुलड्डुकसंज्ञकाः ।
बीजपूराह्वया मुद्राः विज्ञेया विघ्नपार्चने ॥
पाशाङ्कुशवराभीतिखड्गचक्रधनुःशराः ।
मौशली मुद्रिका दौर्गी मुद्राः शक्तेः प्रियङ्कराः ॥
लक्ष्मीमुद्राऽर्चने लक्ष्मीवाग्वादिन्यास्तु पूजने ।
अक्षमाला तथा वीणा व्याख्या पुस्तकमुद्रिका ॥
सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने ।
मत्स्यमुद्रा च कूर्माख्या लेलिहा मुण्डसंज्ञका ॥
महायोनिरिति ख्याता सर्वसिद्धिसमृद्धिदा ।
शक्त्यर्चने महायोनिः श्यामादौ मुण्डमुद्रिका ॥
मत्स्यकूर्माख्यलेलिहाः सर्वसाधारणे मताः ।

दशेमा मुद्रिका ज्ञेयास्त्रिपुरायाः प्रपूजने ॥
संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः ।
खेचरी बीजयोन्याख्या त्रिखण्डा परिकीर्त्तिता ॥
कुम्भमुद्राऽभिषेके स्यात् पद्ममुद्राऽऽसने तथा ।
कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्मणि ॥
गालिनी च प्रयोक्तव्या जलशोधनकर्मणि ।
श्रीगोपालार्चने वेणुर्नृहरेर्नारसिंहिका ॥
वराहस्य च पूजायां वाराहास्यां प्रदर्शयेत् ।
रामार्चने धनुर्बाणमुद्रे पर्शुस्तथाऽर्चने ॥
पर्शुरामस्य विज्ञेया जगन्मोहनसंज्ञका ।
वासुदेवाह्वया ध्याने कुम्भमुद्राऽनुरक्षणे ॥
सर्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रयोजयेत् ।
उद्देशानुक्रमादासामुच्यन्ते लक्षणानि च ॥

आवाहनादिका मुद्रा मातृकान्यासमुद्राश्च प्रागुक्तास्तदन्या इहोच्यन्ते ।

तत्रैव ।

अङ्गुष्ठा ऋजवो हस्तशाखा
  भवेन्मुद्रा हृदये शीर्षके च ।
अधोऽङ्गुष्ठा खलु मुष्टिः शिखायां
  करद्वन्द्वाङ्गुलयो वर्माणि स्युः ॥
नाराचमुष्टिर्धृतबाहुयुग्म-
  काङ्गुष्ठतर्जन्युदितो ध्वनिस्तु ।
विष्वग्विभक्तः कथितास्तु मुद्रा
  यत्राक्षिणी तर्जनिमध्यमे स्तः ॥

नेत्रत्रयं तत्र भवेदनामा
षडङ्गमुद्राः कथिता यथावत् ।
वैष्णवीनां तु मुद्राणां कथ्यन्ते लक्षणान्यथ ।
वामाङ्गुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना ॥
कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठं तु प्रसारयेत् ।
वामाङ्गुल्यस्तथाऽऽश्लिष्टाः संयुक्ताः संप्रसारिताः ॥
दक्षिणाङ्गुष्ठसंस्पृष्टा मुद्रैषा शङ्खसंज्ञिका ।
हस्तौ तु संमुखौ कृत्वा संलग्नौ सुप्रसारितौ ॥
कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञका ।
अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली ॥
अङ्गल्यौ मध्यमे भूयः संलग्ने सुप्रसारिते ।
गदा मुद्रेयमाख्याता विष्णोः सन्तोषवर्धिनी ॥
हस्तौ तु संमुखौ कृत्वा संनतावुन्नताङ्गुली ।
तलान्तनिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका ॥
ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ।
दक्षिणाङ्गुष्ठसंयोगात् कनिष्ठा सुप्रसारिता ॥
तर्जनीमध्यमानामाः किंचित् संकोच्य चालिताः ।
वेणुमुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेः ॥
अन्योन्यस्पृष्टकरयोर्मध्यमानामिकाङ्गुलीः ।
अङ्गुष्ठेन तु बध्नीयात् कनिष्ठामूलसंस्थिते ॥
तर्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञका ।
अनामापृष्ठसंलग्नां दक्षिणस्य कनिष्ठिकाम् ॥
कनिष्ठयाऽन्यया बद्ध्वा तर्जन्या दक्षया तथा ।

वामानामां च बध्नीयाद्दक्षिणाङ्गुष्ठमूलके ॥
अङ्गुष्ठमध्यमे वामे संयोज्य सरलाः पराः ।
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञका ॥
स्पृशेत् कण्ठादिपादान्तं तर्जन्यङ्गुष्ठया तथा ।
करद्वयेन माला चेन्मुद्रेयं वनमालिका ॥
तर्जन्यङ्गुष्ठकौ शक्तावग्रतो हृदि विन्यसेत् ।
वामहस्ताम्बुजं वामजानुं मूर्ध्नि प्रविन्यसेत् ॥
ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी ।
अङ्गुष्ठं वाममुद्दण्डितमितरकराङ्गुष्ठकेनाथ बद्ध्वा
तस्याग्रं पीडयित्वाऽङ्गुलिभिरपि च ता वामहस्ताङ्गुलीभिः ।
बद्ध्वा गाढं हृदि स्थापयतु विमलधीर्व्याहरन्मारबीजं
विल्वाख्या मुद्रिकैषा स्फुटमिह कथिता गोपनीया विधिज्ञैः ॥
हस्तौ तु विमुखौ कृत्वा ग्रन्थयित्वा कनिष्ठिके ।
मिथस्तर्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा ॥
मध्यमे नामिके द्वे तु द्वौ पक्षाविव चालयेत् ।
एषा गरुडमुद्राख्या विष्णोः सन्तोषवर्धिनी ॥
जानुमध्ये करौ कृत्वा चिबुकौष्ठौ समावृतौ ।
हस्तौ च भूमिसंलग्नौ कम्पमानः पुनः पुनः ॥
मुखं विवृतकं कुर्याल्लेलिहानश्च जिह्विकाम् ।
नारसिंही भवेदेषा मुद्रा तत्प्रीतिवर्धिनी ॥
अङ्गुष्ठाभ्यां च करयोरथाक्रम्य कनिष्ठिके ।
अधोमुखीभिः सर्वाभिर्मुद्रेयं नृहरेर्मता ॥
देवोपरि करं वामं कृत्वोत्तानमधः सुधीः ।

नामयेदिति संप्रोक्ता मुद्रा वाराहसंज्ञिका ॥
दक्षहस्तं चोर्ध्वमुखं वामहस्तमधो मुखम् ।
अङ्गुल्यग्रं तु संयुक्तं मुद्रा वाराहसंज्ञिका ॥
वामहस्ततले दक्षा अङ्गुलीस्तास्त्वधोमुखीः ।
संरोप्य मध्यमां तासामुन्नाम्याधो विकुञ्चयेत् ॥
हयग्रीवप्रिया मुद्रा तन्मूर्त्तेरनुकारिणी ।
वामस्य मध्यमाग्रं तु तर्जन्यग्रेण योजयेत् ॥
अनामिकां कनिष्ठां च तस्याङ्गुष्ठेन पीडयेत् ।
दर्शयेद्वामके स्कन्धे धनुर्मुद्रेयमीरिता ॥
दक्षमुष्टिस्थतर्जन्या दीर्घया बाणमुद्रिका ।

यद्वा (ज्ञानार्णवे)

यथा हस्तगतं चापं तथा हस्तं प्रिये कुरु ।
चापमुद्रेयमाख्याता वामहस्ते त्ववस्थिता ॥
कल्पद्रुमा धनुर्मुद्रा यशःकीर्त्तिविवर्धिनी ।
यथा हस्तगतो बाणस्तथा हस्तं कुरु प्रिये ॥
बाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तिनी ।
तले तलं तु करयोस्तिर्यक् संयोज्य चाङ्गुलीः ॥
संहताः प्रसृताः कुर्यान्मुद्रा परशुसंज्ञका ।
ऊर्ध्वस्थाङ्गुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी ॥
हस्तौ तु संपुटीकृत्वा प्रसृताङ्गुलिकौ तथा ।
तर्जन्यौ मध्यमापृष्ठे अङ्गुष्ठौ मध्यमास्थितौ ॥
काममुद्रेयमुदिता सर्वदेवप्रियङ्करी ।
महादेवप्रियाणां च कथ्यन्ते लक्षणान्यथ ॥

उच्छ्रितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन बन्धयेत् ।
वामाङ्गुलीभिर्दक्षाभिरङ्गुलीभिश्च बन्धयेत् ॥
लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ।
मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके ॥
अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ।
अङ्गुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता ॥
अङ्गुष्ठेन कनिष्ठां तु बद्ध्वा श्लिष्टाङ्गुलित्रयम् ।
प्रसारयेत् त्रिशूलाख्या मुद्रैषा परिकीर्त्तिता ॥
अङ्गुष्ठतर्जन्यग्रे तु ग्रन्थयित्वाऽङ्गुलित्रम् ।
प्रसारयेदक्षमाला मुद्रेयं परिकीर्त्तिता ॥
अधःस्थितो दक्षहस्तः प्रसृतावरमुद्रिका ।
ऊर्ध्वीकृतो वामहस्तः प्रसृतोभयमुद्रिका ॥
मिलितानामिकाङ्गुष्ठं मध्यमाग्रे नियोजयेत् ।
श्लिष्टाङ्गुल्यश्रिते कुर्यान्मृगमुद्रेयमीरिता ॥
पञ्चाङ्गुल्यो दक्षिणास्तु मिलिता ह्यूर्ध्वमुन्नताः ।
खट्वाङ्गमुद्रा विख्याता शिवस्यातिप्रिया मता ॥
पात्रवद्वामहस्तं च कृत्वाऽङ्के वामके तथा ।
निधायोच्छ्रितवत् कुर्यान्मुद्रा कापालिकी मता ॥
मुष्टिं च शिथिलां बद्ध्वा ईषदुच्छ्रितमध्यमाम् ।
दक्षिणामूर्ध्वमुन्नम्य कर्णादेशे प्रचारयेत् ॥
एषा डमरुमुद्राख्या सर्वविघ्नविनाशिनी ।
ततो गणेशमुद्राणामुच्यन्ते लक्षणान्यथ ॥
उत्तानोर्ध्वमुखी मध्या सरला बद्धमुष्टिका ।

दन्तमुद्रा समाख्याता सर्वागमविशारदैः ॥
वाममुष्टिस्थतर्जन्या दक्षमुष्टिस्थतर्जनीम् ।
संयोज्याङ्गुष्ठकाग्रे तु तर्जन्यग्रे स्वके क्षिपेत् ॥
एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्त्तिता ।
ऋज्वीं च मध्यमां कृत्वा तर्जनीं मध्यपर्वणि ॥
संयोज्याकुञ्चयेत् किंचिन्मुद्रैषाऽङ्कुशसंज्ञिका ।
तर्जनीमध्यमानामाकनिष्ठाङ्गुष्ठमुष्टिका ॥
अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका ।
पर्शुमुद्रा निगदिता प्रसिद्धा लड्डुमुद्रिका ॥
बीजपूराह्वया मुद्रा प्रसिद्धत्वादुपेक्षिता ।
शाक्तेयानां च मुद्राणां कथ्यन्ते लक्षणान्यथ ॥
पाशाङ्कुशवराभीतिधनुर्बाणाः समीरिताः ।
कनिष्ठानामिके बद्ध्वा स्वाङ्गुष्ठेनैव दक्षतः ॥
श्लिष्टाङ्गुली तु प्रसृते संसृष्टे खड्गमुद्रिका ।
वामहस्तं तथा तिर्यक् कृत्वा चैव प्रसार्य च ॥
आकुञ्चिताङ्गुलिं कुर्याच्चर्ममुद्रेयमीरिता ।
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणाम् ॥
कुर्यान्मुशलमुद्रेयं सर्वविघ्नविनाशिनी ।
कृत्वा शिरसि संयोज्य दुर्गामुद्रेयमीरिता ॥
चक्रमुद्रां तथा बद्ध्वा मध्यमे द्वे प्रसार्य च ।
कनिष्ठिके तथाऽऽनीय तदग्रेऽङ्गुष्ठकौ क्षिपेत् ॥
लक्ष्मीमुद्रा परा ह्येषा सर्वसंपत्प्रदायिनी ।
वीणावादनवद्धस्तौ कृत्वा संचालयेच्छिरः ॥

वीणामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी ।
वाममुष्टिं स्वाभिमुखीं कृत्वा पुस्तकमुद्रिका ॥
दक्षिणाङ्गुष्ठतर्जन्योरग्रलग्ने पराङ्गुलीः ।
प्रसार्य संहितोत्ताना एषा व्याख्यानमुद्रिका ॥
श्रीरामस्य सरस्वत्या अत्यन्तं प्रेयसी मता ।
मणिबन्धस्थितौ कृत्वा प्रसृताङ्गुलिकौ करौ ॥
कनिष्ठाङ्गुष्ठयुगले मिलितौ तु प्रसारयेत् ।
सप्तजिह्वाख्यमुद्रेयं वैश्वानरप्रियङ्करी ॥
कनिष्ठाङ्गुष्ठकौ शक्तौ करयोरितरेतरम् ।
तर्जनीमध्यमानामाः संहता भुग्नवर्जिताः ॥
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता ।
दत्ताङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु ॥
सावकाशात्मकां मुष्टिं कुर्यात् सा कुम्भमुद्रिका ।
मुष्ट्योरूर्ध्वकृताङ्गुष्ठौ तर्जन्यग्रे तु विन्यसेत् ॥
सर्वरक्षाकरी ह्येषा कुम्भमुद्रेयमीरिता ।
प्रसृताङ्गुलिकौ हस्तौ मिथःश्लिष्टौ तु संमुखौ ॥
कुर्यात् स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका ।
अञ्जल्यञ्जलिमुद्रा स्याद्वासुदेवाभिधा च सा ॥
अङ्गुष्ठावुन्नतौ कृत्वा मुष्ट्योः संलग्नयोर्द्वयोः ।
तावेवाभिमुखौ कुर्यान्मुद्रा सा कालकर्णिका ॥
दक्षिणा निविडा मुष्टिर्नासिकार्पिततर्जनी ।
मुद्रा विस्मयसंज्ञा स्याद्विस्मयावेशकारिणी ॥
मुष्टिरूर्ध्वीकृताङ्गुष्ठा दक्षिणा नादमुद्रिका ।

तर्जन्यङ्गुष्ठसंयोगादग्रतो विन्दुमुद्रिका ॥
अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम् ।
क्षिप्त्वाऽङ्गुलीरङ्गुलीभिः संग्रन्थ्य परिवर्त्तयेत् ॥
एषा संहारमुद्रा स्याद्विसर्जनविधौ स्मृता ।
दक्षपाणिपृष्ठदेशे वामपाणितलं स्पृशेत् ॥
अङ्गुष्ठौ चालयेत् सम्यग्मुद्रेयं मत्स्यरूपिणी ।
वामहस्तस्य तर्जन्या दक्षिणस्य कनिष्ठिकाम् ॥
तस्य दक्षिणतर्जन्यां दक्षिणस्य कनिष्ठिकाम् ।
तथा दक्षिणतर्जन्यां वामाङ्गुष्ठं नियोजयेत् ॥
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ॥
वामस्य पितृतीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्याद्दक्षिणस्य करस्य च ॥
कूर्मपृष्ठसमं कुर्याद्दक्षपाणिं च सर्वतः ।
कूर्ममुद्रेयमाख्याता देवताध्यानकर्मणि ॥
पृष्ठे क्रोडे ।
अन्तराङ्गुष्ठमुष्टिं तु कृत्वा वामकरस्य च ।
मध्यमाग्रं तु दक्षस्य तथाऽलम्ब्य प्रयत्नतः ॥
मध्यमेनाथ तर्जन्या अङ्गुष्ठाग्रे तु योजयेत् ।
दक्षिणं योजयेत् पाणिं वाममुष्टौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे मुण्डमुद्रेयमुच्यते ।
तर्जनीमध्यमानामाः समं कुर्यादधोमुखम् ॥
अनामायां क्षिपेद्वृद्धामृज्वीं कृत्वा कनिष्ठिकाम् ।
लेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्त्तिता ॥

तर्जन्यनामिकामध्ये कनिष्ठाक्रमयोगतः ।
करयोर्योजयेच्चैव कनिष्ठामूलदेवताम् ॥
अङ्गुल्यग्रे तु निःक्षिप्य महायोनिः प्रकीर्त्तिता ।
(वामकेश्वर-)तन्त्रोक्ताः प्रकाश्यन्तेऽत्र मुद्रिकाः ॥
शृणु देवि प्रवक्ष्यामि मुद्राः सर्वार्थसिद्धिदाः ।
याभिर्विरचिताभिस्तु सान्निध्यं त्रैपुरं भवेत् ॥
परिवृत्य करौ स्पृष्टावङ्गुष्ठौ कारयेत् समौ ।
अनामान्तर्गते कृत्वा तर्जन्यौ कुटिलाकृती ॥
कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरि ।
त्रिखण्डेयं समाख्याता त्रिपुराध्यानकर्मणि ॥
मध्यमामध्यगे कृत्वा कनिष्ठाङ्गुष्ठरोधिते ।
तर्जन्यौ दण्डवत् कृत्वा मध्यमोपर्यनामिके ॥
एषा च प्रथमा मुद्रा सर्वसंक्षोभकारिणी ।
एतस्या एव मुद्राया मध्यमे सरले यथा ॥
क्रियते परमेशानि सर्वविद्राविणी तथा ।
मध्यमातर्जनीभ्यां च कनिष्ठानामिके समे ॥
अङ्कुशाकारमुद्राभ्यां मध्यमे परमेश्वरि ।
अङ्गुष्ठं तु नियुञ्जीत कनिष्ठानामिकोपरि ॥
इयमाकर्षणी मुद्रा त्रैलोक्याकर्षणी परा ।
पुटाकारौ करौ कृत्वा तर्जन्यावङ्कुशाकृती ॥
परिवर्त्य क्रमेणैव मध्यमे तदधोगते ।
क्रमेण देवि तेनैव कनिष्ठानामिकादयः ॥
संयोज्या निविडाः सर्वा अङ्गुष्ठावग्रदेशतः ।

मुद्रेयं परमेशानि सर्ववश्यकरी मता ॥
संमुखौ तु करौ कृत्वा मध्यमामध्यगेऽन्त्यजे ।
अनामिके तु सरले तद्बहिस्तर्जनीद्वयम् ॥
दण्डाकारौ ततोऽङ्गुष्ठौ मध्यमानखदेशगौ ।
मुद्रैषोन्मादिनी नाम क्लेदिनी सर्वयोषिताम् ॥
अस्यास्त्वनामिका युग्ममधः कृत्वाऽङ्कुशाकृती ।
तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् ॥
इयं महाङ्कुशा मुद्रा सर्वकामार्थसधिनी ।
सव्यं दक्षिणदेशे तु सव्यदेशे तु दक्षिणम् ॥
बाहुं कृत्वा महादेवि हस्तौ संपरिवर्त्य च ।
कनिष्ठानामिके देवि मुक्त्वा ते तु क्रमेण तु ॥
तर्जनीभ्यां समाक्रान्ते सर्वोर्ध्वमपि मध्यमे ।
अङ्गुष्ठौ च महेशानि सरलावपि कारयेत् ॥
इयं सा खेचरीनाम्ना पार्थिवस्थानयोजिता ।
परिवर्त्त्य करौ स्पृष्टावर्धचन्द्राकृती प्रिये ॥
तर्जन्यङ्गुष्ठयुगलं युगपत् कारयेत् ततः ।
अधःकनिष्ठावष्टब्धे मध्यमे विनियोजयेत् ॥
तथैव कुटिले योज्ये सर्वाधस्तादनामिके ।
बीजमुद्रेयमचिरात् सर्वसिद्धिप्रवर्धिनी ॥
मध्यमे कुटिले कृत्वा तर्जन्युपरिसंस्थिते ।
अनामिके मध्यगते तथैव हि कनिष्ठिके ॥
सर्वा एकत्र संयोज्य अङ्गुष्ठपरिपीडिताः ।
एषा तु प्रथमा मुद्रा योनिमुद्रेति संज्ञिता ॥

एता मुद्रा महेशानि त्रिपुराया मयोदिताः ।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥
बद्ध्वा तु योनिमुद्रां वै मध्यमे कुटिले कुरु ।
अङ्गुष्ठेन तदग्रे तु मुद्रेयं भूतिनी मता ॥
वामहस्तेन मुष्टिं तु बद्ध्वा कर्णप्रदेशके ।
तर्जनीं सरलां कृत्वा भ्रामयेन्मनुवित्तमः ॥
सौभाग्यदण्डिनी मुद्रा न्यासकालेऽपि सूचिता ।
अन्तरङ्गुष्ठमुष्ट्या तु निबद्ध्य तर्जनीमिमाम् ॥
रिपुजिह्वाग्रहा मुद्रा न्यासकाले च सूचिता ।
मध्यमानामिकाङ्गुष्ठाः संलग्नाग्रा अधोमुखाः ॥
अन्याप्रसारिताङ्गुल्यो गोमुखी सा प्रकीर्त्तिता ।
त्यक्तप्रदेशिनी मुष्टी सूची मुद्रेति कीर्त्तिता ।
रक्षा मुद्रेति सैवोक्ता समन्ताद्भ्रमणं यदि ॥
द्वौ करौ पृष्ठसंलग्नौ भ्रामयेद्ग्रन्थिताङ्गुली ।
छोटिकेति समाख्याता प्रणामे तां प्रदर्शयेत् ॥
अङ्गुष्ठो भैरवस्थानं चण्डिकायास्त्वनामिका ।
अतस्ताभ्यां तर्पणीयं यत एतत् तयोः प्रियम् ॥
अङ्गुष्ठानामिकायोगाद्वामहस्तस्य पार्वति ।
तत्त्वमुद्रा समाख्याता तर्पणे तां नियोजयेत् ॥
(यामले)
अङ्गुष्ठानामिकाभ्यां तु दक्षहस्तेन तर्पयेत् ।
(समयाचारे)
अङ्गुष्ठतर्जनीमध्ये शुद्धिं संगृह्य वामतः ।
वामेन दक्षिणेनापि देवीं संतर्पयेत् सुधीः ॥

एतद्वचनत्रयं च मार्गभेदेन व्यवस्थापनीयम् ।

तत्त्वं तर्पणमात्रं तु वामहस्तेन दक्षिणे ।
दक्षहस्तेन वामेऽपि विशेषः परिकीर्त्तितः ॥
दक्षवामक्रियायुक्तः कौलश्चोभयमिश्रितः ।

इति प्रागिलिखितप्रामाणाद्दक्षिणमार्गिणां दक्षहस्तेन पूजनं वामहस्तेन तर्पणम् । वाममार्गिणां वामहस्तेन पूजनं दक्षहस्तेन तर्पणम् । कौलिकानां तु देवतर्पणे करयोरैच्छिको विकल्प इति विवेकात् ।

तर्पणे च कामनाभेदेनाङ्गुलिभेद उक्तस्तन्त्रान्तरे ।

अङ्गुष्ठानामिकाभ्यां तु वश्यकर्मणि तर्पयेत् ।
अङ्गुष्ठमध्यमाभ्यां तु तर्पयेच्छान्तिकर्मणि ॥
तर्जन्यङ्गुष्ठयोगेन तर्पयेदभिचारिके ।
कनिष्ठाङ्गुष्ठयोगेन स्तम्भने तर्पयेत् प्रिये ॥

तन्त्रान्तरे ।

मिथः पृष्ठार्पितौ हस्तावन्योन्यग्रथिताङ्गुली ।
कृत्वा बद्ध्वा परावृत्य नत्वा सा स्यात् क्षमापिनी ॥

(भैरवतन्त्रे)

योनिश्च भूतिनी चैव बीजाख्या दैत्यधूपिनी ।
लेलिहानेति संप्राप्ताः पञ्च मुद्राः प्रकीर्त्तिताः ॥

आद्यास्तिस्रः प्रागुक्ताः ।

अन्त्ययोर्लक्षणे तु तत्रैव ।

परिवर्त्त्य करौ कृत्वा कनिष्ठाकृष्टमध्यमाम् ।
अनामयोर्युगं चाधस्तर्जनीयुगलं पृथक् ॥
अन्योन्यं निविडं बद्ध्वा अङ्गुष्ठाग्रे अनामिकाः ।
दैत्यानां धूमकेत्वाख्या मुद्रैषा कथिता प्रिये ॥
वक्त्रं विस्फारितं कृत्वाऽप्यधो जिह्वां च चालयेत् ।
पार्श्वस्थमुष्टियुगलं लेलिहानेति कीर्त्तिता ॥

इति मुद्राप्रकरणम् ।

अथ नियमाः (कुलार्णवे)

नियमव्यतिरेकेण यद्यत् कर्म करोति यः ।
किं चिदप्यस्य न फलं सिद्ध्यत्यक्रमदोषतः ॥
न्यूनातिरिक्तकर्माणि न फलन्ति कदा चन ।
यथाविधि कृतानीह तत्कर्माणि फलन्ति हि ॥
तद्विधानकृतं कर्म जपहोमार्चनादिकम् ।
देवताप्रीतिदं भूयाद्भुक्तिमुक्तिफलप्रदम् ॥

(यामले)

ब्राह्मे मुहूर्त्ते चोत्थाय संस्मृत्य गुरुपादुकाम् ।
प्रातःकृत्यं विधायाथ कृत्वा शौचादिकं ततः ॥
दन्तान् प्रधाव्य तीर्थादौ गत्वा स्नानं समाचरेत् ।
सन्ध्यामुपास्य विधिवद्देवर्षिपितृतर्पणम् ॥
समाप्य दत्वा दानानि मौनी जपगृहं व्रजेत् ।
नित्यार्चनं ततः कृत्वा नित्यहोमं विधाय च ॥
कृत्वा नैमित्तिकीं पूजां विधिवज्जपमाचरेत् ।

तथा ।

एवं कृत्वा साधकेन्द्राः सिद्ध्यन्ति देवतार्चनात्* ।

(स्वतन्त्रतन्त्रे)

नित्यनैमित्तिकं काम्यं सापेक्षं पूर्वपूर्वतः ।
अन्यथा तु भवेद्व्यर्थं कुर्यादावश्यकं ततः ॥

तन्त्रान्तरे ।

त्रिसन्ध्यमर्चयेद्देवं भक्तिं कृत्वा विधानतः ।

(पुरश्चरणचन्द्रिकायाम)

संपूज्यैवं जपं कुर्यान्न मन्त्रं केवलं जपेत् ।

---

* एवं कुर्यात् साधकेन्द्रस्त्रिसन्ध्यं देवतार्चनम् ३ पु० पाठः ।

गौतमः ।

शक्त्या त्रिषवणं *स्नानमथ वा द्वे सकृच्च वा ।
त्रिसन्ध्यं प्रजपेन्मन्त्रं पूजनं तत्समं भवेत् ॥
एकदा वा भवेत् पूजा न जपेत् पूजनं विना ।
जपान्ते च भवेत् पूजा पूजान्ते वा जपेन्मनुम् ॥

अन्यत्रापि ।

मन्त्रं साधयमानस्तु त्रिसन्ध्यं देवमर्चयेत् ।
द्विसन्ध्यमेकसन्ध्यं वा न मन्त्रं केवलं जपेत् ॥

(मुण्डमालायाम)

यदि पूजाद्यशक्तः स्याद्द्रव्याभावेन सुन्दरि ।
केवलं जपमात्रेण पुरश्चर्या विधीयते ॥

स्त्रीणां विशेषमाह (यामले)

नियमः पुरुषे ज्ञेयो न योषित्सु कदा चन ।

(वीरतन्त्रे)

न न्यासो योषितां चात्र न ध्यानं न च पूजनम् ।
केवलं जपमात्रेण मन्त्राः सिद्ध्यन्ति योषिताम् ॥

(चन्द्रिकायाम)

देवी चित्तगता कार्या कार्यं च हृदयं स्थिरम् ।
मन्त्रजपान्नपानीयैः कुर्यात् पानादिभोजनम् ॥
नित्यं नैमित्तिकं कुर्यात् सङ्गमं साधुभिः सह ।
स्नायात् तु पञ्चगव्येन केवलामलकेन वा ॥
आज्येन दध्ना क्षीरेण तिलकल्केन वा कृतम् ।
पुरश्चर्याविधौ तद्वत् स्नानं कुर्याद्विशुद्धये ॥
अस्नातस्य फलं नास्ति न चातर्पयतः पितॄन् ।

---

* त्रैकालिकम् ।

(कुम्भसम्भवः)

गुरुदेवात्ममन्त्राणामैकभावेन चिन्तनम् ।

(योगिनीहृदये)

शयीत कुशशय्यायां शुचिवस्त्रधरः सदा ।
प्रत्यहं क्षालयेच्छय्यामेकाकी निर्भयः स्वपेत् ॥

(कुलार्णवे)

भूशय्या ब्रह्मचर्यं च मौनमाचार्यसेवनम् ।
नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनम् ॥
नैमित्तिकार्चनं चैव विश्वासो गुरुदेवयोः ।
जपनिष्ठा द्वादशैते धर्माः स्युर्मन्त्रसिद्धिदाः ॥

तन्त्रान्तरे ।

मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम् ।
अव्यथत्व*मनिर्वेदो जपसम्पत्तिकारकम् ॥

(मेरुतन्त्रे)

मनोनिरोधो मन्त्रार्थचिन्तनं नित्यकर्म च ।
नैमित्तिकं शौचमौने बालस्य दमनं तथा ॥
भूमिशय्या त्रिषवणं स्नानं प्रत्याह्निकार्चनम् ।
नित्यदानं गुरोः पादपुजाऽऽहारनियन्त्रणा ॥
स्नानं च पञ्चगव्येन पवित्रकरधारणम् ।
त्रिसन्ध्यावन्दनं पञ्च यज्ञास्तर्पणकं तथा ॥

(यामले)

एवमुक्तविधानेन विलम्बं त्वरितं विना ।
उक्तसङ्ख्यं जपं कुर्यात् पुरश्चरणसिद्धये ॥
देवतागुरुमन्त्राणामैक्यं संभावयन् धिया ।
जपेदेकमनाः प्रातःकालान्मध्यन्दिनावधि ॥

---

* अव्यग्रत्वम् २-३ पु० पाठः ।

यत्सङ्ख्यया समारब्धं तत्कर्त्तव्यमहर्निशम् ।
यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टो भवेन्नरः ॥

मध्यन्दिनावधीत्यवधिमात्रबोधकं न तु नियमपरम् । अन्यथा मध्याह्नकाले कदा चिज्जपसङ्ख्याया अपूर्त्तौ नियमभङ्गः स्यादिति तन्त्रसारकृतः ।

(सिद्धान्तसारे)

वशीकृतेन्द्रियग्रामो भक्तियुक्तः प्रसन्नधीः ।
अधःशायी ब्रह्मचारी निशाशी प्रजपेन्मनुम् ॥

अथ वर्ज्यानि ।

आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् ।
नीचसंस्पर्शनं कोपं जपकाले विवर्जयेत् ॥

(मेरुतन्त्रे)

त्यजेद्विंशतिकर्माणि सिद्धिविघ्नकराणि च ।
लोभं क्रोधं च मात्सर्यं कामं द्वेषं च ताडनम् ॥
दम्भमुच्चाटनाभ्यङ्गाप्रियमिथ्यावचस्तथा ।
गीतं वाद्यं मधु च्छायां विभीतककरञ्जयोः ॥
मांसं प्रतिग्रहं माल्यं ताम्बूलं पापिभाषणम् ।
एतानि वर्जयेद्विद्वान् .... इति ॥

(कुलार्णवे)

स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् ।
असत्यभाषणं जिह्मभाषणं परिवर्जयेत् ॥
सत्येनापि न भाषेत जपहोमार्चनादिषु ।
अन्यथाऽनुष्ठितं सर्वं भवत्येव निरर्थकम् ॥
नैरन्तर्यविधिः प्रोक्तो न दिनं व्यतिलङ्घयेत् ।
दिवसातिक्रमात् पुंसां मन्त्रसिद्धिर्भवेन्न हि ॥

(पुरश्चरणचन्द्रिकायाम्)

त्यजेदुष्णोदकस्नानमनिवेदितभोजनम् ।

तन्त्रान्तरे ।

भोजनं कांस्यपात्रे च दिवाभोजनमेव च ।

(योगिनीतन्त्रे)

कौटिल्यं क्षीरमभ्यङ्गमनिवेदितभोजनम् ।
असंकल्पितकृत्यं तु वर्जयेन्मर्दनादिकम् ॥

(पुरश्चरणचन्द्रिकायाम्)

वर्जयेद्गीतवाद्यादि श्रवणं नृत्यदर्शनम् ।
अभ्यङ्गं गन्धलेपं च पुष्पधारणमेव च ॥
मैथुनं तत्कथालापं तद्गोष्ठीं परिवर्जयेत् ।
अस्नातांश्च द्विजान् शूद्रान् स्त्रियो नैव स्पृशेत् तथा ॥
प्राणिहिंसां न कुर्वीत पुरश्चरणकृद्द्विजः ।
गोशुश्रूषादिकं तत्तत्कल्पोक्तं विधिवच्चरेत् ॥
विहाय वह्निं न हि वस्तु किंचिद्-
ग्राह्यं परेभ्यः सति संभवे च ।
असंभवे तीर्थबहिर्विशुद्धात्
पर्वातिरिक्ते प्रतिगृह्य जप्यात् ॥
तत्रासमुत्थानुदिनं विशुद्धा-
द्याचेत यावद्दिनमात्रभक्ष्यम् ।
गृह्णाति रागादधिकं न सिद्धिः
प्रजायते कल्पशतैरमुष्य ॥

अत्र तिलतैलाभ्यङ्गस्तु गृहस्थानां न निषिद्धः ।

तिलतैलं मन्त्रपूतं पावनं देवदुर्लभम् ।
मर्दयित्वा गृहस्थेन स्नानं कार्यं हि सर्वदा ॥

इति (मेरुतन्त्र) वचनात् ।
ऋतुकाले निजस्त्रीसंभोगोऽपि न निषिद्धः ।

ऋतुकालं विना मन्त्री न स्वस्त्रियमपि स्पृशेत् ।

इति (गौतमीयतन्त्र) वचनात् ।

(यामले)

अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा ॥
प्रलपन् प्रजपेद्यावत् तावन्निष्फलमुच्यते ।
विड्मूत्रोत्सर्गशङ्कादियुक्तः कर्म करोति यः ॥
जपार्चनादिकं सर्वमपवित्रकरं प्रिये ।
मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः ॥
यो जपेत् तं दहत्याशु देवता गुप्तिसंस्थिता ।

तथा ।

नैकवासा जपेन्मन्त्रं बहुवासाकुलोऽपि वा ॥
उष्णीषी कञ्चुकी नग्नो मुक्तकेशोऽङ्गनावृतः ।
अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् क्वचित् ॥
अनासनः शयानो वा गच्छन् भुञ्जान एव वा ।
रथ्यायामशिवस्थाने न जपेत् तिमिरालये ॥
उपानद्गूढयानो वा यानशय्यागतस्तथा ।
प्रसार्य न जपेत् पादावुत्कटासन एव च ॥
व्यग्रतां मनसश्चैव साधकः परिवर्जयेत् ।

अथ प्रायश्चित्तानि ।

(मेरुतन्त्रे)

सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् ॥
प्रोक्ते पामरशब्देऽपि प्राणायामं सकृच्चरेत् ।
बहुप्रलापे चावश्यं न्यस्याङ्गानि ततो जपेत् ॥
क्षुतेऽप्येवं तथाऽस्पृश्यस्थानानां स्पर्शने तथा ।
मौनत्यागे जपेन्मन्त्रं वैष्णवं वा स्मरेद्धरिम् ॥

पतितान्त्यजसंदर्शे तेजोवन्तं निरीक्षयेत् ।

तेजोवन्तश्च ।

सूर्योऽग्निश्चन्द्रमाश्चैव मुनयो भानि तारकाः ॥
विद्वान् गौर्ब्राह्मणश्चेति .... इति तत्रैवोक्ताः ।

अन्यत्रापि ।

पतितानामन्त्यजानां दर्शने भाषणे श्रुते ।
क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् ॥
तथा तस्य च तत्प्राप्तौ प्राणायामं षडङ्गकम् ।
कृत्वा सम्यग्जपेच्छेषं यद्वा सूर्यादिदर्शनम् ॥
मार्जारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं खरं कपिम् ॥
दृष्ट्वाऽऽचम्याचरेत् कर्म स्पृष्ट्वा स्नानं विधीयते ।

(साधनसमुच्चये)

जपकाले यदाऽकस्मान्म्लेच्छानां दर्शनं भवेत् ।
तदाऽऽचम्य हरिं स्मृत्वा तेजोवन्तं विलोक्य च ॥
गायत्रीं विष्णुमन्त्रं वा शतमष्टोत्तरं जपेत् ।
स्वप्नेऽपि यदि जायेत म्लेच्छादीनां च दर्शनम् ॥
कामिन्या सह सङ्गम्य रेतसो वा च्युतिर्भवेत् ।
दीपं दत्वा विष्णुगेहे गायत्रीं शतधा जपेत् ॥

तथा ।

शुचिर्भूत्वा जपेन्मत्रं नाशुचिर्जपमाचरेत् ।

मानसजपे तु नायं नियमः ।
तदुक्तं तन्त्रान्तरे ।

अशुचिर्वा शुचिर्वाऽपि गच्छँस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैवं सदाऽभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्वदेशेऽपि सर्वदा ।

जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत्—इति ।

(मेरुतन्त्रे)

दैवादसत्यभाषी चेत् स रौद्रं पौरुषं जपेत् ।
बहुवस्त्रैकवस्त्रो वा मुक्तकेशोऽङ्गनावृतः ॥
उष्णीषी कञ्चुकी नग्नः शिरसि प्रावृतोऽपि वा ।
चिन्ताव्याकुलचित्तो वा क्रुद्धो भ्रान्तः क्षुधान्वितः ॥
उपानद्गूढपादो वा यानशय्यागतस्तथा ।
शयानो वाऽधौतपादः पश्चाद्वा दक्षिणामुखः ॥
म्लानवस्त्रोऽर्धवस्त्रश्च तथा द्विगुणवस्त्रकः ।
च्युतवस्त्रो रक्तवस्त्रः स्निग्धवस्त्रो द्विकच्छकः ॥
बहिःकच्छोऽनुत्तरीयो विकच्छोऽनेककच्छकः ।
कौपिनी प्रौढपादश्च तथाऽऽसी पीतवस्त्रवान् ॥
जपाशक्तः प्रमादाच्चेद्राक्षसैर्गृह्यते फलम् ।
तत्कारणं परित्यज्य तज्जपं पुनराचरेत् ॥
स्वभार्यायां प्रमादेन चलितश्चेत् तदोषसि ।
स्नात्वाऽऽर्द्रवासा मौनेन दशकुम्भमितं जलम् ॥
श्रोत्रियस्य गृहे दद्यात् परनार्यां सहस्रकम् ।

(सिद्धान्तसंग्रहे)

अज्ञानात् स्वस्त्रियं गत्वा धेनुमेकां पयस्विनीम् ॥
दद्याद्विप्राय धेनूनां परस्त्रीगमने शतम् ।

अथपुरश्चरणार्थं भूमिपरिग्रहः ।

(मेरुतन्त्रे) पूर्वोक्तस्थानान्युक्त्वा—

एवं विचार्य मतिमान् कुर्याद्भूमिपरिग्रहम् ॥
पृथ्वीं वराहं संपूज्य भूसुतस्य बलेन च ।
ब्रूयादमुकमन्त्रस्य पुरश्चरणसिद्धये ॥

मयेयं गृह्यते भूमिर्मन्त्रोऽयं सिद्ध्यतामिति ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षान्यतरवृक्षजान् ॥
वितस्तिप्रमितान् वृत्तान् गृह्णीयात् कीलकान् दश ।
अष्टौ निखातयेदष्टदिशास्वीशानपूर्वयोः ॥
मध्ये निखन्यान्नवममूर्ध्वबुद्ध्या तथाऽप्यधः ।
पश्चान्नैर्ऋत्ययोर्मध्ये त्वस्त्रमन्त्रेण कीलयेत् ॥
पूजां तथाऽस्त्रमन्त्रेण तेष्वस्त्रं च प्रपूजयेत् ।
क्षेत्रे च कीलिते मन्त्री न विघ्नैः परिभूयते ॥
दिक्पालेभ्यो माषभक्तबलिं दिक्षु प्रकल्पयेत् ।
क्षेत्रमध्ये क्षेत्रपालं पूजयेच्च गणेश्वरम् ॥
तृतीयं वास्तुपुरुषं तेभ्यो दद्याद्बलित्रयम् ।

(यामले)

पुण्यक्षेत्रादिकं गत्वा कुर्याद्भूमिपरिग्रहम् ।

तथा ।

भूमेः परिग्रहं कृत्वा परिमाणाच्च सर्वतः ।
ग्रामे क्रोशमितं स्थानं नगरे तद्द्वयं स्मृतम् ॥
नदीपर्वततीर्थादौ परिमाणेन वर्जितम् ।
आहारादिविहारार्थं तावतीं भूमिमाक्रमेत् ॥
क्षीरवृक्षमयान् कीलानस्त्रमन्त्राभिमन्त्रितान् ।
निखनेद्दशदिग्भागे तेष्वस्त्रं च प्रपूजयेत् ॥

(माहेश्वरीये)

ये चात्र विघ्नकर्त्तारो दिवि भुव्यन्तरिक्षगाः ।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु ॥

मयैतत् कीलितं क्षेत्रं परित्यज्य विदूरतः ।
अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥
पठित्वेत्येवमस्त्रेण निखनेत् कीलकान् सुधीः ।
कीलेषु तेषु विधिवत् पूजयेदस्त्रदेवताम् ॥
क्षेत्रपालादिकान् मध्ये पूजयेद्विधिवित्तमः ।
दिक्पतिभ्यो वलिं दत्वा ततः क्षेत्रं समाश्रयेत् ॥

तथा ।

स्ववीजं पूर्वमुच्चार्य सम्बुद्ध्यन्तं सुरं ततः ।
इमं पदं माषभक्तवलिं गृह्णपदद्वयम् ॥
ठद्वयान्तो दशानां च दिक्पालानां वलेर्मनुः ।

दिक्पालवीजानि तु ।

लँ रँ मँ क्षँ वँ यँ सँ हँ आँ अँ—इति ।

(मेरुतन्त्रे)

जपस्थाने ततः कुर्यात् त्रिकोणं वर्तुलं बहिः ।
तद्बहिश्चतुरस्रं च तत्र क्षेत्रे समर्चयेत् ॥
इहागच्छेत्यादिवाक्यैस्त्रिकोणादग्रतः पुनः ।
अन्नोदकादिसंपूर्णं वलिपात्रं निधापयेत् ॥
वामिभिर्माहिषो देयः कौलिकैर्वर्करस्तथा ।
अविः सिद्धान्तिभिस्तत्र निवेद्यो मनुनाऽमुना ॥

वर्करश्छागः । अविर्मेषः ।

क्षेत्रपालवलिदानमन्त्र उक्तः (प्रथमतन्त्रे)

क्षेत्रपालं च संपूज्य वलिं दद्याद्यथाविधि ।
पूर्वमेहि द्वयं पश्चाद्विदुषि स्यान्मुरुद्वयम् ॥
भञ्जयद्वितयं भूयो नर्त्तयद्वितयं पुनः ।
ततो विघ्नपदद्वन्द्वं महाभैरवतत्परम् ॥

क्षेत्रपालबलिं गृह्णद्वयं पावकसुन्दरी ।
बलिमन्त्रोऽयमाख्यातः सर्वसिद्धिफलप्रदः ॥

गणेशबलिदानमन्त्रस्तु दीक्षाप्रकरणोक्त एव ग्राह्यः ।
वास्तुबलिदानमन्त्रो यथा ।

तारो वास्तोष्पते चेमं माषभक्तबलिं ततः ।
गृह्णद्वयान्ते स्वाहा च वास्तोर्बलिमनुः स्मृतः ॥

(वीरचूणामणौ) तु वीरकल्पे विशेष उक्तः ।

ऋषिच्छन्दा*दि विन्यस्य दिग्देवेभ्यो बलिं हरेत् ।
असिताङ्गभैरवब्राह्मीपदं ङेन्तं समालिखेत् ॥
बलिं गृह्ण द्विधा कुर्याद्द्विठान्तो दिग्बलेर्मनुः ।
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तभैरवः ॥
कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः ।
ब्राह्मी माहेश्वरी पश्चात् कौमारी वैष्णवी तथा ॥
वाराही च तथेन्द्राणी चामुण्डा तदनन्तरम् ।
महालक्ष्मीः समाख्याता स्वस्वबीजाद्यनुक्रमात् ॥
धूपदीपैः समभ्यर्च्य पश्चात् कीलं निवेशयेत् ।
प्रणवं पूर्वमुच्चार्य माया लक्ष्मीश्च मन्मथः ॥
इन्द्राण्यै पदमुच्चार्य चामुण्डे च पदं ततः ।
विच्चे इति पदं पश्चादिदं क्षेत्रं च कीलय ॥
रक्तरक्षपदं पश्चात् कालिकेति समालिखेत् ।
वह्निजायान्तमन्त्रोऽयं पूर्वादिक्रमशो न्यसेत् ॥
मूलमन्त्रं समुच्चार्य आग्नेय्यै पदमुच्चरेत् ।
याम्यै इति पदं पश्चान्नैर्ऋत्यै च मनुं पुनः ॥

---

* तान्त्रिकोऽयं प्रयोगः ।

वारुण्यै वायवी चेति कौवेरीशानभैरवी ।
आदौ मन्त्रं समुच्चार्य पुनर्देवीं वदेत् प्रिये ॥
वलिं दद्यात् क्रमेणैव दिग्विदिक्षु वलिं हरेत् ।
प्रणवं पूर्वमुद्धृत्य हृल्लेखाबीजमुद्धरेत् ॥
वटुकाय पदं पश्चादापदुद्धारणाय च ।
कुरुद्वयं समुच्चार्य मायां तारं समुद्धरेत् ॥
वह्निजायान्वितो मन्त्रो वटुकस्य वलिं हरेत् ।
आग्नेय्यां वलिमुत्सृज्य माया लक्ष्मीश्च मन्मथः ॥
वाराही बीजमद्धृत्य बीज पश्चान्तकं पुनः ।
गणपतये पदं पश्चाद्वरवरदं तथा पुनः ॥
सर्वजनं वदेच्चैव वदेन्मे वशमानय ।
अन्ते वह्निवधूं दद्याद्गणनाथमहामनुः ॥

वाराहीबीजं ग्लैँ ।

रौद्रं त्रिगुणमुद्धृत्य नारायणं तथोद्धरेत् ।
बीजं सूक्ष्मेशमुद्धृत्यामरेशं बीजमुद्धरेत् ॥
ङेन्तं तु क्षेत्रपालं तु वलिं गृह्णद्वयं ततः ।
वह्निजायान्वितो मन्त्रः क्षेत्रपालस्य कीर्त्तितः ॥
वायुबीजं त्रिधाऽऽलिख्य अनन्तो माधवस्तथा ।
वर्त्तुलाक्षीमथोद्धृत्य योगिनीभ्यस्तथैव च ॥
वह्निजायान्वितो मन्त्रो वायव्यां योगिनीवलिः ।

रौद्र शकारः* । त्रिगुणम् त्रिवारम् । नारायणं आँ । सूक्ष्मेशः ईँ । अमरेश उँ ।
वायुबीजं यकारः । अनन्त आकारः । माधव इकारः । वर्त्तुलाक्षी उकारः ।

क्षकारं कालमारूढं तदन्ते माऽनलात्तरम् ।
सर्वविघ्नपदं कृद्वयः सर्वेभ्यो भूत उद्धरेत् ॥

---

* रौद्रं सकारः २-४ पु. पा.

भ्यो वर्म फट् समुद्धृत्य वलिं गृह्लद्वयं ततः ।
द्विठान्तः सिद्धिदः प्रोक्तः सर्वभूतवलिं हरेत् ॥

कालो मकारः । मा ईकारः । अनलात्परं रेफः । तेन क्ष्म्रीँ ।

ओदनं पायसं क्षीरं मत्स्यमांसं तथैव च ।
मोदकं पूलिकापूपं वटकं त्रिविधा सुरा ॥
हृद्यौदनादि पक्वान्नमाज्यं मधु सशर्करम् ।
सर्वत्र विधिवत् कुर्याद्दुग्धेनोत्सर्गमाचरेत्—इति ॥

(यामले)

क्षेत्रं समाश्रयेद्यस्तु क्षेत्रपालार्चनं विना ।
वाध्यते स महाविघ्नैस्तस्मात् क्षेत्रेशमर्चयेत् ॥

अत्रायं विशेषः । यस्य क्षेत्रस्य नामाद्यवर्णो यस्य क्षेत्रपालस्य नामाद्यः स एव क्षेत्रपालस्तस्मिन् क्षेत्रे पूज्यः । क्षेत्रपाला उक्तास्तन्त्रान्तरे ।

अजरश्चापकुम्भश्च इडारम्भस्तथैव च ।
ईन्द्रमूर्त्तिश्च उल्कास्य ऊष्माद ऋपुसूदनः ॥
ॠमुक्तो ऌप्तकायश्च ॡपाद एकदंष्ट्रकः ।
ऐरावतश्च ओद्याम्बुरौषधीशोऽन्तवाहकः ॥
अस्तकोऽप्यर्थवाहश्च कमलश्च खराननः ।
गोमुखश्चैव घण्टालो ङणामश्चन्द्रधारकः ॥
छटाटोपो जटालाख्यो झङ्कारो ञमटेश्वरः ।
टङ्कपाणिस्तथा चान्यष्ठाण्डबन्धश्च डामरः ॥
ढेढकर्णो णावीकान्तस्तन्त्रीजिह्वस्तु थाविरः ।
दन्तुरो धनदश्चैव नागकर्णः प्रचण्डकः ॥
फेत्कारो वीरसिद्धिश्च भ्रुकुटिर्मेघभासुरः ।
युगान्तो रौरवश्चैव लम्बोष्ठश्च वसन्तकः ॥

शुकमुण्डः षडालास्यः सुमनो हूनकस्तथा ।
क्षपान्तकश्च पञ्चाशद्वर्णास्था: क्षेत्रपालकाः ॥

एकलिङ्गादौ क्षेत्रपालविशेषास्तत्रैवोक्ताः ।

शेषा वर्णविहीनास्तु क्षेत्रपालास्तथैव च ।
एकलिङ्गे च हुँकारः श्मशाने च भयावहः ॥
महालक्ष्मीवने घोरो ज्वालामुखो वनोत्सवे ।
एकवृक्षवने वाऽथ विडालवदनो वसेत् ॥
घण्टारवो गुहावासः पद्मखण्डे जरामरः ।
सङ्गमे भूरिधारौघः पर्वते मारुतस्तथा ॥
निर्जरे श्रवणे वह्नौ निधाने मणिभद्रकः ।
रसक्षेत्रे धनाध्यक्षो यज्ञवाटेषु क्रोष्टकः ॥
अरण्ये शम्बरं विद्यादुद्याने मकरस्तथा ।
चतुःषष्टिर्महाविद्याः पालयित्वा जगत् स्थिताः ॥
तत्तत्क्षेत्रे सदा काले वलिपूजां निवेदयेत् ।

अथ कूर्मचक्रम् ।



(यामले)

क्षेत्रमध्यं समाश्रित्य कूर्मचक्रं विचिन्तयेत् ।
कूर्मचक्रमविज्ञाय यः कुर्याज्जपयज्ञकम् ॥
तज्जपस्य फलं नास्ति सर्वानर्थाय कल्पते ।

(मेरुतन्त्रे)

कूर्मचक्रमविज्ञातुर्महाविघ्नोऽभिजायते ।

(सारसंग्रहे)

तच्चतुर्धा स्थितं लोके तत्प्रकारस्तयोच्यते ।
प्रथमस्तु परः कूर्मचक्रो देशगतस्तथा ॥
ग्रामगो गृहगश्चेति चतुर्धा स व्यवस्थितः ।

(तन्त्रराजे)

व्यञ्जनं देशकूर्मे स्याद्गृहकूर्मे स्वरास्तथा ।
ग्रामकूर्मे तद्द्वितयं परकूर्मे न तद्द्वयम् ॥

(गौतमीये)

देशं ग्रामं गृहं वाऽपि नवधा विभजेन्नरः ।
प्रागादिपश्चिमान्तं तु कादिमान्तानि विन्यसेत् ॥
अक्षराण्यय यादीनि तथाऽष्टौ कोष्ठयोर्न्यसेत् ।
ईशद्वयमधो मध्ये स्वरान् प्रागादि विन्यसेत् ॥
शसान्तास्तु दिशः पश्चान्नामाद्यक्षरतो भवेत् ।
तन्मुखं पार्श्वयोः पाणी कुक्षी पादौ ततस्ततः ॥
पुच्छमेकमथो मध्यं पृष्ठमेवं षडङ्गवान् ।

(मेरुतन्त्रे)

परदेशग्रामगृहभेदात् कूर्मश्चतुर्विधः ।
वृत्तद्वयं प्रकुर्वीत नवकोष्ठकभेदितम् ॥
कवर्गाद्याः सप्त लेख्याः पूर्वाशादिषु लक्षकौ ।

ऐशान्यां विलिखेन्मध्ये वृत्तकोष्ठे द्वयं द्वयम् ॥
स्वराणां पूर्वतो लेख्यं श्रीबीजं मध्यकोष्ठके ।
प्राङ्मुखः परकूर्मस्तु सर्वदैव प्रजायते ॥
देशनामादिमो वर्णो यस्यां दिशि व्यवस्थितः ।
देशकूर्ममुखं तस्यां दिशि स्याद्ग्रामकूर्मके ॥
मुखद्वयं तु विज्ञेयं स्वराद्व्यञ्जनतस्तथा ।
गृहकूर्मस्य वदनमुदग्द्वारमुखं भवेत् ॥
मुखस्य पार्श्वयोः पाणी कुक्षी पादौ ततस्ततः ।
पुच्छमेकमथो मध्ये पृष्ठमेवं षडङ्गवान् ॥

(यामले)

दीपस्थानं समाश्रित्य कृतं कर्म शुभावहम् ।
चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत् ॥
पूर्वादिकोष्ठे विलिखेत् सप्त वर्गाननुक्रमात् ।
लक्ष्मीशस्वरान् युग्मक्रमाच्चैव लिखेत् ततः ॥
दिक्षु पूर्वादितो यत्र क्षेत्राख्याद्यक्षरं स्थितम् ।
मुखं तस्य तु जानीयाद्धस्तावुभयतः स्थितौ ॥
कोष्ठे कुक्षी उभे पादौ द्वौ शिष्टं पुच्छमीरितम् ।
क्रमेणानेन विभजेन्मध्यस्थमपि साधकः ॥
मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनः ।
उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात् ॥
पुच्छस्थः पीड्यते मन्त्री बन्धनोच्चाटनादिभिः ।

गौतमः ।

मुखे सर्वार्थसिद्धिः स्यात् करयोरल्पसिद्धयः ।
कुक्षौ तु नित्यं नैष्फल्यं पादयोर्नैव सिद्धयः ॥

पुच्छे मृत्युस्तु नियतः पृष्ठे सर्वार्थसिद्धयः ।
तस्मात् तत् साधु विज्ञाय कुर्यात् सर्वजयादिकम् ॥

गृहकूर्मे गृहनामज्ञानप्रकारस्तु ज्योतिःशास्त्रे ।

विस्तार आयामगुणैश्च भक्ते
यच्छेषमायः स भवेद्ध्वजादिः ।
ध्वजो धूम्रश्च सिंहः श्वा सारमेयः खरो गजः ॥
ध्वाङ्क्षश्चेति क्रमेणैव दायाष्टकमुदाहृतम् ।

प्रकारान्तरमपि ।

विस्तारं च तथाऽऽयाममेकीकृत्य त्रिधा पुनः ।
मन्त्रसाधकगेहानामेकं चेत् प्रथमाक्षरम् ॥
किं तदा पुण्यतीर्थेन पुण्यक्षेत्राटनेन वा ।

प्रयोजनमिति शेषः
(मेरुतन्त्रे)

क्षेत्रसाधकमन्त्राणामेकमेवाद्यमक्षरम् ।
यदि स्यात् स ध्रुवं मन्त्रः सर्वसिद्धिफलप्रदः ॥

(गौतमीये)

मन्त्राक्षेरण मैत्रश्च दीपनाम्नो भवेद्यदि ।
साधकस्य च नाम्ना च किं न सिद्ध्यति मन्त्रिणः ॥
पञ्चाशद्वर्णरूपेण क्षेत्रेशा विभुविग्रहाः ।
तस्मात् तत् सगुणं क्षेत्रं सिद्धये स्यान्न चान्यथा ॥
विगुणश्चेन्मुखस्थोऽपि न तेन सिद्धिमाप्नुयात् ।
तस्माच्चक्रं विचार्यैव मित्रं च सर्वसिद्धिदम् ॥
यस्मिन् देशे द्वीपपतिः सगुणं नाममन्त्रयोः ।
तत्र यत्नेन गन्तव्यं सपीठो दुर्लभो मतः ॥

(कालिकोद्भवे)

स्थानसाधकयोर्नाम्नोरमैत्रं यत्र विद्यते ।
तदृक्षशास्त्रतो ज्ञात्वा तत्तत् स्थानं परित्यजेत् ॥

मैत्रामैत्रमुक्तं तन्त्रान्तरे ।

अरित्वमद्वयस्योक्तं गकारेण परस्परम् ।
ऋद्वयस्य चकारेण मकारस्य खकारतः ॥
लृद्वयस्य यकारेण पकारस्य च लृद्वये ।
ओद्वयस्य षकारेण षकारस्यौयुगेन तु ॥
जकारस्य ढकारेण ऊकारस्य खकारतः ।
उकारस्य तकारेण फकारस्य धकारतः ॥
मकारस्य च रेफेण यकारस्य सकारतः ।
अरित्वमेषां वर्णानामन्येषां मित्रभावना ॥
स्थानसाधकयोर्नाम्नोररित्वं यत्र विद्यते ।
तदृक्षशास्त्रतो ज्ञात्वा साधको यत्नतस्त्यजेत् ॥
यथा गर्गस्य वैरी स्यादट्टहासं महापुरम् ।
औड्डियानं षण्मुखस्य ऋजुभट्टस्य चक्रकम् ॥
जयन्ती ढङ्कणस्यारिः खधार ऊझकस्य च ।
उकदेवस्य ताराख्यं फजेर्घूमाख्यमेव च ॥
भद्रस्य रम्यकं सोमनगरं यज्ञशर्मणः ।
एवं क्रमेण विज्ञाय रिपुस्थानं त्यजेद्बुधः ॥

(मेरुतन्त्रे)

महारित्वे जीवनाशो वैरे स्याद्धननाशनम् ।
किञ्चिद्वैरे सुखाल्पत्वं तदिदानीं निगद्यते ॥
अगौ ऋचौ झपौ जहौ मखौ जथौ इवौ उतौ ।

फधौ भरौ यसौ चेति महारी परिकीर्त्तितौ ॥
ऋङ्छौ ओह्यषौ तद्वज्जटौ ऊषौ वधौ ढलौ ।
वैरं तु पञ्चमे वर्गे तत्किञ्चित् कटयोर्भवेत् ॥
चटयोः पचयोश्चापि तढयोर्ढशयोरपि ।
एकवर्गे यदा प्रीतिः स्ववर्गं द्विगुणं कुरु ॥
स्थानवर्गयुतं तष्टमष्टाभिश्चाय उच्यते ।
स्थानवर्गो द्विगुणितः स्ववर्गश्चाष्टशेषितः ॥
स्थानाय उभयोः कार्यमन्तरं यस्य शेषकम् ।
यावत् स्थितं सोऽर्थदः स्यात् साधकोऽर्थप्रदो न सः ॥
वैरं तु पञ्चमे .... इति ।

यदुक्तं ज्योतिःशास्त्रेऽपि ।

अकचटतपयशवर्गाः खगेशमार्जारसिंहशुनाम् ।
सर्पाखुगजावीनां निजपञ्चमवैरिणामष्टौ ॥

स्ववर्गादेर्द्विगुणीकरणादौ स्वरज्ञानप्रकारोऽपि तत्रैवोक्तः ।

गजशरर्त्तुयुगाश्वमहीगुणा
  द्विसहिता मघवादिदिशः क्रमात् ।
गृहपतेरभिधापुरदिङ्मिता नवहृता
  भवनस्य दशा च सा—इति ॥

तन्त्रान्तरे ।

रिपुत्वे निश्चिते तस्य द्वितीयार्णादि शोधयेत् ।
इत्थं स्थानगृहं कृत्वा तत्र मन्त्री बलिं हरेत् ॥

(गौतमीये)

द्वीपनाथं लिखेन्मध्ये पूजयेत् तं विभावयेत् ।

तन्त्रे ।

पूर्वादिनवकोष्ठेषु क्षेत्रेशाँस्तत्र पूजयेत् ।

अमृतः प्रथमे प्रोक्तो द्वितीये वृषभस्तथा ॥
शैलराजस्तृतीये स्याच्चतुर्थे वासुकिः स्मृतः ।
अर्थकृत् पञ्चमे प्रोक्तः शक्तिकृत् षष्ठ ईरितः ॥
पद्मयोनिः सप्तमे स्यान्महाशङ्खोऽष्टमे स्मृतः ।
छायाछत्रगणाः प्रोक्तो नवमे मन्त्रिनायकैः ॥

(मेरुतन्त्रे)

अमृतो वृषभः शैलराजो वासुकिरेव च ।
अर्थकृच्छक्तिकृत् पर्वकाष्ठादौ वलिनाऽर्चयेत् ॥
पद्मयोनिं महाशङ्खं छायाख्यं चापि मध्यमे ।
कूर्मपृष्ठे गृहं कृत्वा गृहस्थो जपमाचरेत् ॥

(यामले)

महापीठेषु शाक्तेषु कामरूपादिकेषु च ।
यदि कुर्यात् पुरश्चर्यां तदा कूर्मं न चिन्तयेत् ॥

कामरूपादिपीठान्युक्तानि (योगिनीहृदयादौ)।

कामरूपं* च काशी च नैपालं पौण्ड्रवर्धनम् ।
काश्मीरं कान्यकुब्जं च पूर्णशैलं तथाऽर्बुदम्† ॥
आम्रातकेश्वरैकाम्र त्रिस्रोतः‡ कामकोटकम् ।
कैलासं भृगुनगरं केदारश्चन्द्रपूरकम् ॥
श्रीपीठमोङ्कारपीठं जालन्धरं च मालवम् ।
कुलान्तकं देवीकोटं गोकर्णं मारुतेश्वरम् ॥
अट्टहासं च विरजं राजगृहं महापथम् ।
कोलागिरिर्मैलापुरं कालेश्वरं जयन्तिका ॥

---

* कापुरस्थितमिति पाठ ।
† अर्बुदं शैलविशेषः ।
‡ त्रिस्रतां गङ्गा ।

उज्जयिनी विचित्रं* च क्षीरकं हस्तिनापुरम् ।
उड्डीशं च प्रयागाख्यं षष्ठीमाया जलेश्वरम् ॥
मलयश्चैव श्रीशैलो मेरुर्गिरिवरस्तथा ।
माहेन्द्रं वामनं चैव हिरण्यपुरमेव च ॥
महालक्ष्मीरुड्डियानं छायाछत्रमतः परम् ।
एते पीठाः समुद्दिष्टा मातृकारूपमास्थिताः ॥

तन्त्रातरे । दाक्षायिण्या इत्यधिकृत्य—

योनेर्हृदो गुदाद्वामनेत्राद्वामश्रुतेरथ ।
दक्षकर्णात् तथा घ्राणाद्वामवक्षोरुहादपि ॥
दक्षगण्डान्नखेभ्यश्च बलीपरिसरादथ ।
नाभेस्तथाऽङ्गुलीभ्यश्च दन्तेभ्यो दक्षपाणितः ॥
वामगण्डान्मस्तकाच्च बाहोर्दक्षस्तनादपि ।
स्कन्धाच्च दक्षिणात् कक्षाद्वामकक्षात् तथोदरात् ॥
तत ऊर्ध्वं बलेर्मध्यबलेस्तलबलेरथ ।
ततो वस्तेर्नितम्बाच्च जघनाद्दक्षिणोरुतः ॥
वामोरुतो दक्षिणाच्च जानुतो वामजानुतः ।
जङ्घाकाण्डात् ततो दक्षाद्वामाच्च दक्षगुल्फतः ॥
वामगुल्फाद्दक्षनेत्राद्दक्षाद्वामाच्च पार्ष्णितः ।
रक्तात् पित्तात् तथा मेदोजिह्वामज्जाभ्य एव च ॥
दक्षिणात् पादुकाङ्गुष्ठाद्वामादपि च तेजसः ।
नाडीततेश्च छायायाः केशपाशादिति क्रमात् ॥
तत्तत्स्थानेषु पतितात् सर्वसिद्धिकराणि वै ।

---

* योगिनीति पाठः ।

पीठानि चैकपञ्चाशत् कामरूपादिकानि च ॥
अकारादिक्षकारान्तवर्णरूपाणि जज्ञिरे ।
अङ्गान्तरास्थिलोमभ्यो भूषणानां च संहतेः ॥
उपपीठान्यसंख्यानि प्रादुर्भूतानि सर्वतः ।

(मेरुतन्त्रे)

कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ।
महाकाले च काश्यां च कूर्मस्थानं न चिन्तयेत् ॥

(गौतमीये)

पर्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे ।
यदि कुर्यात् पुरश्चर्यां तत्र कूर्मं न चिन्तयेत् ॥

(यामले)

अट्टाट्टके शक्तिपीठे तीर्थे क्षेत्रेषु वा पुनः ।
अरण्ये पर्वते पुण्ये कूर्मचक्रं न चिन्तयेत् ॥

(पुरश्चरणचन्द्रिकायाम्)

कूर्मचक्रमिति प्रोक्तं मन्त्राणां सिद्धिसाधनम् ।
मुखं तस्य समाश्रित्य वातालयसहां कुटीम् ॥
चतुरस्रां चतुर्हस्तां हस्तोन्नतसुवेदिकाम् ।
चन्द्रातपपताकाद्यैस्तोरणैरप्यलङ्कृताम् ॥
विविक्तामभिलिप्तां च प्राकारेणाभिवेष्टिताम् ।
निर्ममेच्च ततः कुर्यादेकभक्तं शुभे दिने ॥
प्रातः स्नात्वा च गायत्र्या अयुतं प्रयतो जपेत् ।
ज्ञाताज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः ॥

गायत्री स्वेष्टदेवस्य (मेरुतन्त्रे)

शुभे मुहूर्ते नक्षत्रे तिथौ स्नात्वा यथाविधि ।
विप्रान् सन्तर्प्य यत्नेन भोजनाच्छादनादिभिः ॥

भूवित्तवस्त्रभूषाद्यैः संतोष्य गुरुमात्मनः ।
आरभेत पुरश्चर्यां तदनुज्ञापुरःसरम् ॥

(सिद्धान्तसारे)

प्रातःकृत्यादिपूजान्तं कृत्वा तु जपमारभेत् ।

(यामले)

प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयते ।
विफला तस्य पूजा तु शौचहीना यथा क्रिया ॥

तस्मादौ प्रातःकृत्यं कुर्यात् । तदुक्तं (सिद्धान्तसारे)

मुहूर्त्ते ब्रह्मणो विद्वान् मुक्तस्वापो निराकुलः ।
तल्पादुत्थाय शुक्लेऽब्जे शिरःस्थे श्रीगुरुं स्मरेत् ॥

(मेरुतन्त्रे)

निशायाः पश्चिमे यामे स्मरेदिष्टां च देवताम् ।
उत्थाय दक्षिणाङ्गेन वामपादं न्यसेद्भुवि ॥
ततो गृहाद्बहिर्गत्वा कृत्वाऽवश्यकमादरात् ।
रात्रिवासः परित्यज्य वाससी परिधाय च ॥
आचम्य शुद्धदेहः सन् .... इति ।

(पुरश्चरणचन्द्रिकायाम्)

कृत्वाऽवश्यक्रियां धीर उपविश्यासने शुभे ।

(यामले)

बद्धपद्मासनो मन्त्री समकायशिरोधरः ।

(मेरुतन्त्रे)

ततः स्वमस्तके चिन्त्यं सहस्रदलपद्मकम् ।
कर्पूराभं स्मरेत् तत्र श्रीगुरुं निजरूपिणम् ॥
सुप्रसन्नं लसद्भूषामण्डितश्वेतचन्दनम् ।
वराभयज्ञानमुद्रापुस्तकव्याप्तैः करैः ॥

युक्तं श्वेताम्बरं शान्तं श्वेतपुष्पविभूषितम् ।
वामाङ्कगतया शक्त्याऽऽलिङ्गितं रक्तवर्णया ॥
रक्तवस्त्राभरणया रक्तचन्दनमालया ।
वामे लीलाकमलयाऽऽलिङ्गन्त्या दक्षिणेन च ॥
ध्यायेदन्तर्मुखं शान्तं योगिनं शिवरूपिणम् ।

(कालानलतन्त्रे)

शुद्धस्फटिकसंकाशमज्ञानतिमिरापहम् ।
शुभांशुशुद्धसंकाशं क्षौमद्वयविराजितम् ॥
गन्धानुलेपनं शान्तं वराभयकरद्वयम् ।
वामोरुशक्तिसंयुक्तं रक्ताम्बरविभूषया ॥
स्वशक्त्या दक्षहस्तेन धृतचारुकलेवरम् ।
वामे धृतोत्पलया च रक्तया च सुशोभितम् ॥
परानन्दरसोल्लासलोचनद्वयपङ्कजम् ।

(मेरुतन्त्रे)

तत्पादपद्मयुगलश्रुतपीयूषधारया ।
अभिषिक्तः स्वस्य देह एवं शिष्यो विचिन्तयेत् ॥
अर्चयेद्गन्धपुष्पाद्यैर्वाह्यस्थैर्मानसैश्च वा ।
नामभिस्तस्य संकेतसंसिद्धैर्गुरुकीर्त्तकैः ॥
प्रणम्येत्थं हृन्मनुना भावयेत् तल्लयं हृदि ।

तन्त्रान्तरे ।

तदाज्ञां च समादाय संस्मरेदिष्टदेवताम् ।
मूलादिब्रह्मरन्ध्रान्तं कुण्डलीरूपतः स्थिताम् ॥
तडित्कोटिप्रभादीप्तां विशतन्तुतनीयसीम् ।
सार्धं त्रिवलयाकारां प्रसुप्तभुजगाकृतिम् ॥

(श्यामापद्धतौ)

प्रसुप्तभुजगाकारां मूलाधारनिवासिनीम् ।
सुषुम्णावर्त्मनोत्थाप्य परदेवीस्वरूपिणीम् ॥
आनीय ब्रह्मरन्ध्रान्तं योजयेच्छम्भुना सह ।
सामरस्यं ततस्तस्या विभाव्य च विचक्षणः ॥
सुधावृष्टिं ततः कृत्वा पूर्वस्थाने नियोजयेत् ।

(मेरुतन्त्रे)

ततस्तु मूलाधारादि ब्रह्मरन्ध्रान्तमुद्यतम् ।
तेजोदण्डं सुषुम्णान्तः सहस्ररविसन्निभम् ॥
तदात्मकं मूलमन्त्रं ध्यात्वा तं तेजसा वृतम् ।
स्वशरीरं विचिन्त्येति प्राणायामत्रयं चरेत् ॥
मूलमन्त्रेण मन्त्रस्य ऋष्यादिन्यासमाचरेत् ।
अङ्गन्यासान् विधायाथ हृदि देवं विचिन्तयेत् ॥
मानसैरुपचारैस्तु पूजयित्वा मनुं जपेत् ।
यथाशक्त्याऽथ देवाय तं जपं च समर्पयेत् ॥
स्तुत्वा प्रणम्य देवाज्ञां श्लोकैरेभिश्च याचयेत् ।
त्रैलोक्यचैतन्यमयादिदेव
श्रीशङ्कर त्वच्चरणाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्त्तयिष्ये ॥
संसारयात्रामनुवर्त्तमानं
त्वदाज्ञया शङ्कर देवदेव ।
स्पर्द्धातिरस्कारकलिप्रमादा-
भयानि मां माऽभिभवन्तु नाथ ॥

इति संप्राथ्य देवेशम् .... इति ।

अथाजपाविधिः । तदुक्तं (वीरचूडामणौ),

हंसाख्याराधनं वक्ष्ये मन्त्रिणां हितकाम्यया ।
यस्य विज्ञानमात्रेण सर्वज्ञो भुवि जायते ॥
हंसात्मिकां भगवतीं जीवो जपति सर्वदा ।
अस्याः स्मरणमात्रेण जीवन्मुक्तो भवेन्नरः ॥
ऋषिर्हंसः समाख्यातः परहंसश्च देवता ।
अव्यक्ता छन्दो गायत्री विनियोगश्च सिद्धिदः ॥

(सुरेन्द्रसंहितायाम्)

ऋषिर्हंसोऽव्यक्तपूर्वा गायत्री छन्द उच्यते ।
देवता परमादिस्तु हंसो हँ बीज उच्यते ॥
अः शक्तिः कीलकः सोऽहं प्रणवस्तत्त्वमेव हि ।
उदात्तः स्वर इत्येवं मनोरस्य प्रकीर्त्तितः ॥
मोक्षार्थे विनियोगः स्यादेवं कुर्यात् सदा नरः ।

(वीरचूडामणौ)

सूर्यात्मने च हृद्देवि सोमात्मने शिरस्तथा ।
निरञ्जने शिखा ज्योतिर्निराभासा तथा परे ॥
अव्यक्तं नेत्रयोर्न्यस्य अनन्तोऽस्त्रे फडं यजेत् ।
एवं न्यासविधिं कृत्वा गणेशादौ समर्पयेत् ॥

(सुरेन्द्रसंहितायाम्)

हंसात्मिकां भगवतीं जीवो जपति सर्वदा ।
हकारेण बहिर्याति सकारेण विशेत् पुनः ॥
अस्याः संबोधमात्रेण जीवन्मुक्तो भवेन्नरः ।
प्राणायामप्रभावेण जीवन्मुक्तस्तु जायते ॥
एकविंशतिसाहस्रं षट्शताधिकमेव च ।

प्रजपेत् प्रत्यहं जीवो ब्रह्मानन्दमयीं पराम् ॥
उत्पत्तिर्जप आरम्भो मृतिरस्य निवेदनम् ।
विना जपेन सततं जपो भवति सर्वदा ॥
एवं जपस्तु विज्ञातो गणेशादौ निवेदयेत् ।

(योगशास्त्रे)

कुण्डलिन्याः समुद्भूता गायत्री प्राणधारिणी ।
प्राणविद्या महाविद्या यस्तां वेत्ति स योगवित् ॥
हकारेण बहिर्याति शकारेण विशेत् पुनः ।
हंसो हंस इमं मन्त्रं जीवो जपति सर्वदा ॥
षट्शतानि दिवा रात्रौ सहस्राण्येकविंशतिः ।
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्वदा ॥
अजपानामगायत्री योगिनां मोक्षदायिनी ।
अस्याः संकल्पमात्रेण सर्वपापैः प्रमुच्यते ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥

हंसध्यानमुक्तं (बालापद्धतौ)

अग्नीषोमगरुद्वयं प्रणवकं विन्दुत्रिनेत्रोज्ज्वलं
भास्वदुद्रमुखं शिवाङ्घ्रियुगलं पार्श्वस्थकालानलम् ।
उद्यद्भास्करकोटिकान्तिसदृशं हंसं जगद्व्यापिनं
नित्यानन्दमयं हृदम्बुजकुटीनीडे सदा भावयेत् ॥

तत्रैव ।

गणेश्वरो विधिर्विष्णुः शिवो जीवो गुरुस्तथा ।
षडेते हंसतामेत्य मूलाधारादिषु स्थिताः ॥

हंसतामेत्येति। सहस्रदलकमलकर्णिकावस्थितहंसरूपपरमात्मभेदरूपं प्राप्येत्यर्थः । एषा हंसैक्यभावना तत्रैवोक्ता ।

34

हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्च शम्भुः ।
हंसो हि जीवो गुरुरेव हंसो हंसोऽहमात्मा परमार्थरूपः ॥

हंसावस्थायामेषां स्थानभूतानि षड्चक्राण्युक्तानि (योगसारे)

गुदाच्च द्व्यङ्गुलादूर्ध्वं मेढ्राच्च द्व्यङ्गुलादधः ।
मूलाधारमिदं प्रोक्तं पीतवर्णं चतुर्दलम् ॥
तोयवर्णादिभिर्वर्णैश्चतुर्भिः समलङ्कृतम् ।
गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ॥

तथा ।

तदेव कामरूपाख्यं पीठं कामफलप्रदम् ।
स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूले षडारकम् ॥
बालार्कवर्णपृष्ठादिषडक्षरसमन्वितम् ।
नाभिदेशे स्थितं चक्रं दशारमणिपूरकम् ॥
नीलप्रभाण्डादिवर्णैर्दशाभिः समलङ्कृतम् ।
द्वादशारं महाचक्रं हृदयेनाहताह्वयम् ॥
क्रोधीशाद्यक्षरोपेतमिन्द्रगोपसमप्रभम् ।
तदेतत् पूर्णगिर्याख्यं पीठं तव वरानने ॥
कण्ठदेशे विशुद्धाख्यं यच्चक्रं षोडशारकम् ।
धूम्रप्रभं षोडशाभिः श्रीकठादिस्वरैर्युतम् ॥
पीठं जालन्धरं नाम तिष्ठत्यत्रामरेश्वरि ।
आज्ञा नाम भ्रुवोर्मध्ये द्विदलं *चक्रकेशरम् ॥
अन्त्यवर्णद्वयोपेतं शरच्चन्द्रसमद्युतिम् ।
उद्यानाख्यं महापीठमुपरिष्टात् प्रतिष्ठितम् ॥
सहस्रारं महापद्मं विसर्गाधः प्रतिष्ठितम् ।

---

* चक्रमुत्तममिति ४ पु० पा० ।

अधोमुखं सर्ववर्णयुक्तमारक्तकेशरम् ॥
एतदेव हि कैलाशसंज्ञकं चक्रमुच्यते ।
यत्र नित्योदितश्चन्द्रस्त्रिशृङ्गोऽमृतवर्षणः ॥

तथा ।

सहस्रारे तु देवेशि हंसरूपी परः शिवः ।
स्थानान्येतानि देवेशि शक्तिर्येषु प्रकाश्यते ॥

मूलाधारादौ गणेशादिध्यानमुक्तम् (बालार्चनपद्धतौ)

वशषसदलयुक्ते सम्यगाधारपद्मे
तरुणमरुणगात्रं वारणास्यं त्रिनेत्रम् ।
अभयवरदहस्तं* चारुपाशाङ्कुशोद्यत्-
कररुचिरसमन्वं चिन्तयेदादिमूर्तिम् ॥

स्वाधिष्ठाने ब्रह्मध्यानं यथा ।

बभमयरल†संज्ञैरक्षरैः क्लृप्तपद्मे
सुरुचिरमुपदिष्टे पङ्कजैः सन्निधानम् ।
अभयवरदहस्तं कुण्डिकां चाक्षमालां
दधतममलमूर्त्तिं चिन्तयेद्विश्वयोनिम् ॥

मणिपूरचक्रे विष्णुध्यानं यथा ।

डाद्यैः फान्तगतैः प्रकल्पितदले पद्मे निविष्टं हरिं
मार्त्तण्डद्युतिमादिपूरुषमजं नारायणं चिन्मयम् ।
हस्तन्यस्तगदारिशङ्खकमलं पीताम्बरं कौस्तुभं
श्रीवत्साङ्कितमिन्द्रनीलसदृशं ध्यायेज्जगन्मोहनम् ॥

अनाहतचक्रे शिवध्यानं यथा ।

---

* सिद्धिलक्ष्म्या समेतं दधत वरदमूर्त्तिं भावयेच्छ्रीगणेशम् इति ४ पु. पा. ।
† युक्तं लिङ्गमूलस्थपद्मे इति ४ पु. पा० ।

काद्यैष्टान्तगतैः प्रकल्पितदले पङ्केरुहे पार्वती-
कान्तं पूर्णशशाङ्ककोटिसदृशं प्रख्यं कपर्दोज्ज्वलम् ।
शान्तं टङ्कमृगाभयास्पदकरं नागादिभूषोज्ज्वलं
ग्रैवेयाङ्गदहारकुण्डलधरं चर्माम्बरं चिन्तयेत् ॥

विशुद्धचक्रे जीवात्मध्यानं यथा ।

मूर्त्यङ्गेषु निविष्टमङ्गरहितं शान्तं रुचा भासुरं
व्याप्ताशेषचराचरं गुणमयं भावेन सच्चिन्मयम् ।
मूर्त्तामूर्त्तममूर्त्तमेकममलं ज्योतिःप्रदीपोपमं
साक्षात्षोडशपत्रवर्णकमले जीवं परं चिन्तयेत् ॥

आज्ञाचक्रे गुरुध्यानं यथा ।

हक्षार्णद्वयचारुपत्रकमले दिव्ये जगत्कारणे
विश्वोत्तीर्णमनेकदेहनिलयं स्वच्छन्दमात्मेच्छया ।
तत्तद्योग्यतया स्वदेशिकतनुं भावैकसच्चिन्मयं
प्रत्यक्षाक्षरविग्रहं गुरुवरं ध्यायेत् परं दैवतम् ॥

सहस्रदलकमले परमात्मध्यानं यथा ।

विश्वव्यापिनमादिदेवममलं नित्यं परं निष्कलं
नित्योद्बुद्धसहस्रपत्रकमले लिप्यक्षरैर्मण्डिते ।
नित्यानन्दमनन्तपूर्णपरचित्सत्तास्फुरत्तात्मकं
स्मृत्वाऽऽत्मानमनुप्रविश्य कुहरे स्वच्छन्दतः सर्वतः ॥

एषां शक्तयोऽपि तत्रैवोक्ताः ।

शक्तिः सिद्धिर्गणेशस्य ब्रह्मणश्च सरस्वती ।
लक्ष्मीर्नारायणस्यापि पार्वती च पिनाकिनः ॥
अविद्या चैव जीवस्य गुरोर्ज्ञानं परापरम् ।
मोक्षबीजात्मिका विद्या शक्तिश्च परमात्मनः ॥

तत्रैव।

एवं ध्यात्वा परात्मानमिष्टदेवीस्वरूपिणम्।
निवेदयेद्यथासंख्यं क्रमेणैवाजपाजपम्॥
षट्शतानि गणेशाय ब्रह्मणे षट्सहस्रकम्।
विष्णवे षट्सहस्रं च षट्सहस्रं पिनाकिने॥
सहस्रमात्मने चैव गुरवे च सहस्रकम्।
परात्मने सहस्रं च यथाविधि निवेदयेत्॥

यथाविधि इति मानसैरुपचारैरभ्यर्च्य—

सिद्धिशक्तिसहिताय गणेशाय षट्शतसंख्याकमजपाजपमहं निवेदयामि नमः।

एवम्—

सरस्वतीशक्तिसहिताय ब्रह्मणे षट्सहस्रसंख्याकमजपाजपमहं निवेदयामि नमः।

एवम्—

लक्ष्मीशक्तिसहिताय*विष्णवे षट्सहस्रसंख्याकमजपाजपमहं निवेदयामि नमः।

एवम्—

पार्वतीशक्तिसहिताय महेश्वराय षट्सहस्रसंख्याकमजपाजपमहं निवेदयामि नमः।

एवम्—

अविद्याशक्तिसहिताय जीवात्मने सहस्रसंख्याकमजपाजपमहं निवेदयामि नमः।

एवम्—

परापरज्ञानशक्तिसहिताय गुरवे सहस्रसंख्याकमजपाजपमहं निवेदयामि नमः।

---

* नारायणाय-इति २-३ पु. पा.

एवम्—

सूर्यकोटिप्रकाशाय चन्द्रकोटिसुशीतलाय विद्याशक्तिसहिताय परमात्मने सहस्रसंख्याकमजपाजपमहं निवेदयामि नमः ।

इत्येवं निवेदयेदित्यर्थः ।

ताराविषये तु (वीरचूडामणौ)

आज्ञायां विद्युदाभायां शुभ्रौ दत्तौ नियोजयेत् ।
परमात्मनि पराशक्तौ सहस्रं च समर्पयेत् ॥
कर्पूरद्युतिसंराजत्सहस्रदलपङ्कजे ।
नीलात्मकं गुरुं ध्यायेत् सहस्रं च समर्पयेत् ॥

इति विशेष उक्तः ।

तथा ।

ततः स्तुत्वा च नत्वा च संकल्प्य च विधानः ।
तदाज्ञां च समादाय कुर्यादावश्यकीः क्रियाः ॥

संकल्प्येति ।

अद्यतनसूर्योदयादारभ्य श्वस्तनसूर्योदयपर्यन्तं श्वासोच्छ्वासरूपेण षट्शताधिकैकविंशतिसहस्रसंख्याकमजपागायत्रीजपमहं करिष्ये ।

इति संकल्प्येत्यर्थः ।

(मेरुतन्त्रे)

प्रार्थतित्वा वरान् श्वासयुक्तं पादं निधापयेत् ।
समुद्रमेखले देवि पर्वतस्तनमण्डले ॥
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ।

अथ शौचविधिस्तत्रैव ।

ततो गृहाद्बहिर्याम्यां नैर्ऋतीं वा दिशं व्रजेत् ।
पदे पदे स्मरेदस्त्रं दूरे यायान्निजालयात् ॥

अतीत्य बाणमात्रां तु भुवं ग्रामाद्विलोक्य च ।
कीटतोयादिरहितं शौचस्थानमिदं पठेत् ॥
उत्तिष्ठन्त्वृषयो देवा गन्धर्वा यक्षराक्षसाः ।
परितस्त्यज्यतां स्थानं विण्मूत्रोत्सर्जनाय मे ॥
अनेन मनुना लोष्टतृणैरुद्वास्य देवताः ।
कुर्यान्मलच्युतिं तत्र वाससा कं प्रवेष्ट्य च ॥
खं दिशश्च न पश्येत शौचमुद्धृत्य वारिभिः ।
एका लिङ्गे गुदे सप्त दश वामकरे तथा ॥
उभयोः सप्त दातव्यास्तिस्रोऽङ्घ्र्योश्चापि मृत्तिकाः ।
मूत्रोत्सर्गे वामहस्ते लिङ्गे पञ्च च मृत्तिकाः ॥
त्रिः करद्वितये चैका पादयोरथ वाऽऽचरेत् ।
गन्धलेपक्षयकरं मनोग्लानिहरं परम् ॥
कुर्याद्द्वादशगण्डूषान् पुरीषोत्सर्जनोत्तरम् ।
मूत्रत्यागे तु चतुर आचमेत् त्रिस्ततः परम् ॥

अथ दन्तधावनविधिस्तत्रैव ।

अर्कन्यग्रोधखदिरकरम्भककुभादिजम् ।
कनिष्ठाग्रसमस्थौल्यं प्रगुणं द्वादशाङ्गुलम् ॥
क्लीमुक्त्वा कामदेवाय सर्वजनप्रियाय च ।
नमोऽन्तस्थितिवर्णोऽयं मन्त्रो दन्तविशोधने ॥
प्रक्षाल्य दन्तकाष्ठं च शुद्धदेशे पुरस्त्यजेत् ।
वक्त्रं मूलाणुना नित्यं क्षालयेत् सिद्धिहेतवे ॥

तन्त्रान्तरे ।

मन्त्रार्थं संस्मरँस्तीर्थं गत्वा स्नानं समाचरेत् ।

अथ स्नानविधिः । तदुक्तं (मेरुतन्त्रे)

अथ पूजाहोमकर्मसिद्धये स्नानमुच्यते ।
शङ्कुनास्त्राभिजप्तेन शुचिस्थानात् तु मृतिकाम् ॥
गृहीत्वाऽस्त्रेण संसिच्य यायाज्जलनिकेतनम् ।

तन्त्रान्तरे ।

दर्भाँस्तिलान् गोमयं च समादाय व्रजेत् ततः ।
तर्जन्या रजतं धार्यं स्वर्णं धार्यमनामया ॥
एष एव कुशः प्रोक्तो न दर्भा वनसंभवाः ।

(रुद्रयामले)

त्रयो दर्भाः समुद्दिष्टाः सुवर्णौ रजतैः कुशैः ।
तत्र शाक्ते द्वयं वाद्यमन्येषां तु त्रयो मताः ॥
सुवर्णौ रजतं चैव जपपूजादिकर्मसु ।
कुशकार्यकरं प्रोक्तं न तु वन्यकुशाः कुशाः ॥

(मेरौ)

तत्रादौ जलकूलं तु क्षालयेदस्त्रवारिणा ।
मृदं कृत्वा त्रिधा तत्र एकभागोपगं ततः ॥
निधाय गोमयं दर्भाँस्तिलाँश्चाप्यभिमन्त्रितान् ।
मृत्तिकागोमयाभ्यां च कद्यन्तं स्नानमाचरेत् ॥
बहिरुद्धृततोयेन मलस्नानं ततः परम् ।
विधाय वैदिकं स्नानं तदङ्गतर्पणं तथा ॥
ततस्तान्त्रिकस्नानस्य विधिरस्त्रेण मृत्तिकाम् ।
समादायास्त्रमन्त्रेण मन्त्रयित्वा तृणादिकम् ॥
शिखामन्त्रेणापहृत्य त्रिर्मूलेनाभिमन्त्रयेत् ।
मूर्धादिपादपर्यन्तं विलिप्य प्रणमेज्जलम् ॥

आधारः सर्वभूतस्य विष्णोरतुलतेजसः ।
तद्रूपाश्च ततो जातास्ता आपः प्रणमाम्यहम् ॥
संमुखीकरणीं मुद्रां बद्ध्वा प्राणं निरुद्ध्य च ।
निमज्ज्य तूष्णीमुत्थाय नाभिमात्रे जले स्थितः ॥
तान्त्रिकस्नानसंकल्पं मासोल्लेखादिपूर्वकम् ।
कृत्वा तु मूलमन्त्रेण प्राणायामत्रयं चरेत् ॥
विन्यस्य च षडङ्गानि कल्पयेत् तीर्थमग्रतः ।
चतुरस्रे हस्तमात्रे तज्जले परिकल्पिते ॥
ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन देवेश तीर्थं देहि दिवाकर ॥
इति सूर्यं प्रार्थयित्वा क्रोमित्यङ्कुशमुद्रया ।
भित्वाऽर्कमण्डलं तस्मात् तीर्थान्यावाहयेदिह ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥
एवमुक्त्वा तु तीर्थानि तस्मिँस्तोये नियोजयेत् ।
मूलमन्त्रेणाथ तीर्थशक्तिं तत्र समाह्वयेत् ॥
अर्कस्य मण्डलं ध्यात्वा तन्मन्त्रेण च पूजयेत् ।
सर्वानन्दमयीमशेषदुरितध्वंसां मृगाङ्कप्रभां
त्र्यक्षामूर्ध्वकरद्वयेन दधतीं पाशं श्रृणिं वामतः ।
अन्तश्चामृतपूर्णहेमकलशौ मुक्ताक्षमालां वरं
गङ्गां सिन्धुसरिद्द्वयादिसहितां श्रीतीर्थशक्तिं भजे ॥

तीर्थशक्तिमन्त्रस्तन्त्रान्तरे ।

आकाशा वह्निमारूढा विन्दुनादविभूषिताः ।
षड्दीर्घस्वरसंभिन्ना सर्वानन्दमये पदम् ॥

संबुद्ध्यन्तां तीर्थशक्तिमेह्येहि वह्निगेहिनी ।
एकविंशाक्षरः प्रोक्तस्तीर्थशक्तेर्महामनुः ॥

(मेरुतन्त्रे)

तज्जलं गाङ्गमन्त्रेण मन्त्रयेदष्टवारकम् ।
तारो नमो भगवति ब्रूयादन्ते ततोऽऽम्बिके ॥
अम्बालिके महामालिन्येह्येहि भगवत्यथ ।
अशेषतीर्थालवाले मायाश्रीवीजमुच्चरेत् ॥
शिवजटाधिरूढे च गङ्गे गङ्गाम्बिके द्विठः ।
गङ्गाविद्येयमाख्याता त्रिपञ्चाशद्भिरक्षरैः ॥
भुवनेश्या समालोड्यामृतीकृत्य सुधाणुना ।
कवचेनावगुण्ठ्याथ संरक्ष्यास्त्रेण मन्त्रवित् ॥
मूलेन देवतां तत्र साङ्गां सावरणां तथा ।
समावाह्य जले ध्यात्वा तत्पादद्वयनिर्गतम् ॥
ध्यात्वा तीर्थं स्मरन्मूलमन्त्रं स्नायाज्जले त्रिशः ।
हृदि देवं स्मरन् पश्चात् सिञ्चेत् कं कुम्भमुद्रया ॥
त्रिभिः श्लोकैर्मूलमन्त्रं तारकं बीजपूर्वकैः ।
सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापते ॥
मातरः सर्वभूतानामापो देव्यः पुनन्तु माम् ।
अलक्ष्मीर्मलरूपा याः सर्वभूतेषु संस्थिताः ॥
क्षालयन्ति निजं स्पर्शादापो देव्यः पुनन्तु माम् ।
यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ॥
ललाटे कर्णयोरक्ष्णोस्तमापो घ्नन्तु वो नमः ।
ततः स्वाहात्ममूलेन त्रिराचमनमाचरेत् ॥

(गन्धर्वतन्त्रे)

मूलं पठन्मूर्ध्नि तोयं मुद्रया कुम्भसंज्ञया ।
क्षिप्त्वा वारत्रयं पश्चादाचामेत् साधकाग्रणीः ॥
आत्मविद्याशिवैस्तत्त्वैः .... इति ।

कुम्भमुद्रा वक्ष्यते (मेरुतन्त्रे)

त्रिधा देवं च संतर्प्य तोयमध्यात् तटे व्रजेत् ।
धौतं वस्त्रयुगं धृत्वा प्रक्षाल्योरू करौ तथा ॥
मृदद्भिस्तत आचामेदेवं स्नानविधिः स्मृतः ।

अथ मन्त्रस्नानविधिस्तत्रैव ।

मन्त्रस्नानं प्रकर्त्तव्यं शीतयोर्देशकालयोः ।
तोयाभावेऽगमे दुर्गे कार्येऽस्वास्थ्ये च वार्द्धके ॥
प्रक्षाल्य पादावाचम्य प्रोद्धृतेन तु वारिणा ।
स्थानं दश दिशः प्राग्वत् संशोध्योपविशेत् ततः ॥
अस्त्रं हस्ततले न्यस्य क्रमान्न्यासाँस्ततश्चरेत् ।
मातृकादीँस्तथा मूलमन्त्रन्यासानशेषतः ॥
न्यासान्ते संस्पृशेत् तोयं मन्त्रस्नानमिदं वरम् ।
केवलादुदकस्नानात् संस्कारपरिवर्जितात् ॥
प्रभासादिषु तीर्थेषु यत् फलं स्नातकस्य तु ।
ज्ञेयं दशगुणं तस्मान्मन्त्रस्नानस्य निश्चयात् ॥

अथ ध्यानस्नानं तत्रैव ।

ध्यानस्नानमथो वक्ष्ये द्वाभ्यामपि परं च यत् ।
खस्थितं पुण्डरीकाक्षं मन्त्रमूर्त्तिं प्रभुं स्मरेत् ॥
तत्पादोदकजां धारां निपतन्तीं स्वमूर्धनि ।
चिन्तयेत् सूक्ष्मरन्ध्रेण प्रविशन्तीं स्वकां तनुम् ॥

तया संक्षालयेत् सर्वमेतद्देहगतं मलम् ।
तत्क्षणाद्विरजा मन्त्री जायते स्फटिकोपमः ॥
इदं स्नानवरं मन्त्रस्नानाच्छतगुणं मतम् ।
मनसा यस्तु संशुद्धः स शुद्धः सर्वकर्मसु ॥

पुण्डरीकाक्षमित्युपलक्षणम् । यस्य या देवता स तां स्मरेदिति वदन्ति ।
अथ मानसस्नानं तत्रैव ।

अथ मानसिकं स्नानं मनसा मूलमन्त्रतः ।
प्राणायामं प्रकुर्वीत इष्टतीर्थेषु भावतः ॥

(शैवागमेऽपि)

मनसा मूलमन्त्रेण प्राणायामपुरस्सरम् ।
कुर्वीत मानसं स्नानं सर्वत्र विहितं च यत् ॥

(मेरुतन्त्रे)

यद्वा शिवात्मकैर्मन्त्रैः कृत्वा तीर्थं शिवात्मकम् ।
मार्जनं संहितामन्त्रैः शिवस्नानमितीरितम् ॥
स्नानपूर्वाः क्रियाः सर्वाः शुद्धाः सिद्धिं प्रयान्ति च ।
तस्मात् स्नानं पुरा कुर्यादेष्वेकं देहशक्तितः ॥

अथ तिलकधारणविधिस्तत्रैव ।

ततस्तु तिलकं कुर्याज्जातेर्वा दैवतस्य वा ।
यद्यच्छुभफलं तीर्थे मृद्भिर्वा भक्तिभावतः ॥
ब्राह्मणस्योर्ध्वपुण्ड्रः स्यात् क्षत्रियस्य त्रिपुण्ड्रकम् ।
अर्धचन्द्रं तु वैश्यस्य शूद्राणां वर्त्तुलाकृतिः ॥
ऊर्ध्वपुण्ड्रं मृदा कुर्यात् त्रिपुण्ड्रं चापि भस्मना ।
केशरेण च कस्तूर्या शेषे शीतं यथारुचि ॥
वैष्णवस्योर्ध्वपुण्ड्रं स्यात् त्रिपुण्ड्रं शिवसेवितुः ।
अर्धचन्द्रो गणेशस्य देवीभक्तस्य वर्त्तुलम् ॥

नारायणपरो यस्तु चन्दनस्य त्रिशूलकम् ।
भाले बिभर्त्ति वन्द्योऽसौ ब्रह्मविष्णाशिवात्मकम् ॥

अथ विभूतिधारणविधिस्तत्रैवोक्तः ।

भूतिदातुर्विभूतिः स्याद्विधिना विधृता यदि ।
यथाकथञ्चिद्विधृता भस्मसात्कुरुते जनम् ॥
शिवाग्रे भस्म संग्राह्यमग्निहोमोद्भवं तु यत् ।
वैवाह्यग्न्युद्भवं वाऽपि पक्वं शुचि सुगन्धि च ॥
कपिलायां सकृच्छ्रेष्ठं गृहीतं गगने पतत् ।
न क्लिन्नं नापि कठिनं न दुर्गन्धि न चोषितम् ॥
उपर्यधः परित्यज्य गृह्णीयात् पतितं यदि ।
पिण्डीकृत्य शिवाग्नौ तु तत् क्षिपेन्मूलमन्त्रतः ॥
अपक्वमपि पक्वं च संत्याज्यमसितं सितम् ।
आदाय वाससाऽऽलोड्य भस्माधारे विनिःक्षिपेत् ॥
भस्मसंग्रहणं कुर्याद्देवेऽनुद्वासिते सति ।
उद्वासने कृते यस्माच्चण्डभस्म प्रजापते ॥
यद्वा द्विजा भस्म कुर्युः सव्येनानीय गोमयम् ।
वामेन पात्रे संयोज्याघोरमन्त्रेण निर्दहेत् ॥
पुरुषेण समुद्धृत्य ईशानेन विशोधयेत् ।
इत्थं तु संस्कृतं भस्म अग्निरित्यादिमन्त्रितः ॥
तद्रुद्रायेति यजुषा मन्त्रयेद्रुद्रसंख्यया ।
प्रणवाद्यैश्चतुर्थीहृदन्तैर्नामभिरंशकैः ॥
पञ्चवर्णाद्युत्तराद्यैः भालांसोदरहृत्सु च ।
त्रिपुण्ड्रधारणं कुर्यात् मूर्ध्नि पञ्चाक्षरेण च ॥

एभिश्च नामभिर्धार्यं पुनर्भस्म द्विजादिभिः ।
ब्रह्मा ललाटे विज्ञेयो हृदये हव्यवाहनः ॥
नाभौ स्कन्दो गले पूषा रुद्रो दक्षिणबाहुके ।
आदित्यो बाहुमध्ये च शशी च मणिबन्धके ॥
वामदेवो वामबाहौ बाहुमध्ये प्रभञ्जनः ।
मणिबन्धे च वसवः पृष्ठदेशे हरिः स्मृतः ॥
शम्भुः ककुदि संप्रोक्तः परमात्मा शिरःस्मृतः ।
कस्तूर्यादिकसंयुक्तं भस्म शाक्तस्तु धारयेत् ॥
अद्विजैर्मूलमन्त्रेण शिवपञ्चाक्षरेण च ।
त्रिपुण्ड्रं कारयेद्भाले ब्रह्मविष्णुशिवात्मकम् ॥
मध्याङ्गुलिभिरादाय तिसृभिर्मूलमन्त्रितम् ।
अनामामध्यमाङ्गुष्ठैरथ वा स्यात् त्रिपुण्ड्रकम् ॥

अथ सन्ध्याविधिः (भैरवीतन्त्रे)

आचम्य प्राङ्मुखो भूत्वा उपविश्य च मन्त्रवित् ।
वैदिकीं तान्त्रिकीं कुर्यात् ततः सन्ध्यां समाहितः ॥

(मेरुतन्त्रे)

वक्ष्येऽथ तान्त्रिकीं सन्ध्यां मूलेनाचमनत्रयम् ।
शिखां बध्वा च मूलेन प्राणायामत्रयं चरेत् ॥
अङ्गानि विन्यसेद्देहे करन्यासपुरःसरम् ।
अमृतीकृत्य पुरतो जलं च धेनुमुद्रया ॥
अभिमन्त्र्य च मूलेन सप्तवारं ततः परम् ।
अकारादिक्षकारान्तैर्मातृकार्णैः सविन्दुभिः ॥
प्रत्यर्णं प्रोक्षयेन्मूर्ध्नि कुशैर्मूलेन च त्रिधा ।
देवं ध्यात्वाऽथ मनुविद्भानुमण्डलसंस्थितम् ॥

आदाय तोयमामन्त्र्य बीजैर्भूतात्मकैस्तथा ।
लँ वँ रँ यँ हँ इति च तान्येतैः सप्तधा जलम् ॥
मन्त्रयित्वा पुनः सप्तवारं मूलेन मन्त्रयेत् ।
तज्जलं वामहस्तेन धार्यं तत्स्रुतविन्दुभिः ॥
दक्षहस्तेन संप्रोक्ष्य कं पठन्मूलमन्त्रकम् ।
हस्तव्यत्यासतो वामाचारी सेचनमाचरेत् ॥
नासामाश्लिष्य शिष्टेन तेजोरूपेण तेन तु ।
प्रविश्यान्तर्गतं सर्वं मलं संशोध्य निर्गतम् ॥
दक्षनासापुटेनैतत् स्मृत्वा दक्षिणहस्तकम् ।
वामभागे वज्रशिलां ध्यात्वाऽस्त्रेण च तत् क्षिपेत् ॥
प्रक्षाल्य हस्तावाचम्य मूलमन्त्रेण मन्त्रवित् ।
गायत्र्या वाऽथ मूलेन दद्यादर्घत्रयं ततः ॥
रविमण्डलसंस्थाय स्वेष्टदेवाय तर्पयेत् ।
जलेन मूलमन्त्रान्ते ह्यमुकं तर्पयामि च ॥
उक्त्वा त्रिधा तर्पणीयं वामकैः कारणेन तु ।
इष्टदेवस्य गायत्रीमष्टाविंशतिसंख्यकाम् ॥
जपेदभावे ब्राह्मीं तु वैदिकं मतमाश्रितः ।
तान्त्रिकः शिवगायत्रीं जपेत् साऽथ निरूप्यते ॥

ॐ तन्महेशाय विद्महे वाग्विशुद्धाय धीमहि तन्नः शिवः प्रचोदयात् ।

तन्त्रान्तरे ।

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्—इति शिवगायत्री उक्ता ।

अथ गणेशगायत्री (यामले)

ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात् ।

अथ सूर्यगायत्री (मेरुतन्त्रे)

ॐ सप्ततुरगाय विद्महे सहस्रकिरणाय धीमहि तन्नो रविः प्रचोदयात् ।

इयं तु सूर्यगायत्री जपतामिष्टदायिनी ।
भग्नानां राजपुत्राणां क्षत्रतेजोविधायिनी ॥

अथ विष्णुगायत्री तत्रैव ।

ॐ नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ।

अथ नृसिंहगायत्री (तत्त्वरणार्चनपद्धतौ)

ॐ नृसिंहाय विद्महे तीक्ष्णदंष्ट्राय धीमहि तन्नः सिंहः प्रचोदयात् ।

रामगायत्री पूर्वमुक्ता ।

अथ गोपालगायत्री (मेरुतन्त्रे)

ॐ दामोदराय विद्महे वासुदेवाय धीमहि तन्नः कृष्णः प्रचोदयात् ।

अथ सुदर्शनगायत्री तत्रैव ।

ॐ सुदर्शनाय विद्महे महाज्वालाय धीमहि तन्नश्चक्रः प्रचोदयात् ।

अथ हयग्रीवगायत्री तत्रैव ।

ॐ वागीश्वराय विद्महे हयग्रीवाय धीमहि तन्नो हंसः प्रचोदयात् ।

अथ श्यामागायत्री (कुमारीतन्त्रे)

कालिकायै पदं चोक्त्वा विद्महे तदनन्तरम् ।
श्मशानवासिनी ङेन्ता धीमहीति ततो वदेत् ॥

तन्नो घोरे पदं प्रोच्य प्रवदेच्च प्रचोदयात् ।
अस्याः प्रसादमात्रेण महापातककोटयः ॥
सद्यः प्रलयमायान्ति साधकस्य च नान्यथा ।

तथा ।

महापातकयुक्तोऽपि प्रजपेद्दशधा यदि ।
सत्यं सत्यं महादेवि मुक्तो भवति तत्क्षणात् ॥

(भैरवतन्त्रे तु)

कामोपराक्षिणादान्तो दक्षिणा ङेयुता पुनः ।
विद्महे कूर्चबीजं च चामुण्डा ङेयुता ततः ॥
धीमहीति वदेत् तन्नः काली प्रचोदयात् ततः ।
गायत्र्येषा मया प्रोक्ता सर्वतन्त्रेषु गोपिता ॥
यां विना सकला विद्या न सिद्ध्यन्ति कदा चन—इत्युक्तम्।

अथ नक्षत्रविद्यायाः (कालिकार्णवे)

ऐँ भगवत्येकजटे विद्महे च पदं ततः ।
विकटदंष्ट्रे धीमहि तन्नस्तारे प्रचोदयात् ॥

(मालिनीतन्त्रे)

महोग्रायै च विद्महे तारायै धीमहि प्रिये ।
तन्नो देवी च शब्दान्ते धियो यो नः प्रचोदयात् ॥

(वीरचूडामणौ)

वाग्भवं च समुच्चार्य एकजटायै विद्महे ।
देवीं स्त्रीँ च समुच्चार्य नीलसरस्वत्यै धीमहि ॥
हृल्लेखां च समुच्चार्य ततस्तारे प्रचोदयात् ।

त्रिपुरसुन्दर्या (ज्ञानार्णवे)

वाग्भवं त्रिपुरादेव्यै विद्महे तदनन्तरम् ।
कामबीजं समुच्चार्य कामेश्वर्यै च धीमहि ॥

तन्नः क्लिन्ने पदं चोक्त्वा वदेत् पश्चात् प्रचोदयात् ।

भैरव्यास्तत्रैव ।

त्रिपुरां च तथा ङेन्तां विद्महे पदमुद्धरेत् ।
भैरव्यै च ततश्चोक्त्वा धीमहीति ततो वदेत् ॥
ततो देवीपदं चोक्त्वा प्रचोदयादुदीरयेत् ।
गायत्री त्रैपुरा ख्याता वाग्भवाद्यं समुद्धरेत् ॥

भुवनेश्वर्यास्तन्त्रान्तरे ।

मायाबीजं समुच्चार्य भुवनेश्वर्यै च विद्महे ।
आद्यायै पदमुच्चार्य धीमहि तदनन्तरम् ॥
तन्नो देवीपदं प्रोच्य ततो देयं प्रचोदयात् ।

अथ छिन्नमस्तायास्तत्रान्तरे ।

वैरोचन्यै विद्महे च छिन्नमस्तायै च धीमहि ।
तन्नो देवीपदं चोक्त्वा योजनीयं प्रचोदयात् ॥

अथ धूमावत्याः ।

धूमिति बीजमुच्चार्य धूमावतीति विद्महे ।
विवर्णा देवीपदतो धीमहि पदमुद्धरेत् ॥
धूमादेव्यास्तु गायत्री तन्नो घोरे प्रचोदयात् ।

अथ मातङ्ग्याः ।

ॐ शुकप्रियायै विद्महे श्रीकामेश्वर्यै धीमहि तन्नः श्यामा प्रचोदयात् ।

अथ वगलामुख्याः ।

स्थिरमायां समुच्चार्य वगलापदतो मुखी ।
विद्महे दुष्टपदतः स्तम्भनीपदमुच्चरेत् ॥
धीमहीति पदस्यान्ते तन्नो देवी प्रचोदयात् ।

अथ लक्ष्मीगायत्री ।

महालक्ष्मीपदं प्रोच्य विद्महे तदनन्तरम् ।
महाश्रियै पदं चोक्त्वा धीमहीति पदं वदेत् ॥
तन्नः शब्दाच्छ्रीपदं च ततो दद्यात् प्रचोदयात् ।

गौरीगायत्री (मेरुतन्त्रे)

ॐ सुभगायै विद्महे काममालिन्यै धीमहि तन्नो गौरी प्रचोदयात् ।

अथ गुह्यकालीगायत्री (महाकालसंहितायाम्)

क्रमेण वक्ष्ये गायत्रीं तत्तन्मन्त्रजपाय हि ।
त्रिपदा सा च विज्ञेया त्रिका त्रिपदिकाऽपि च ॥
पदद्वयं ङेन्तमादौ शेषे चैव सुवन्तकम् ।
त्रिकात्रिपादिकस्यापि विशेषं वच्मि किं चन ॥
सर्वादौ विद्महे ह्येवं मध्ये धीमहि चेत्यपि ।
सुवन्तीयपदस्यान्ते पदमेकं प्रचोदयात् ॥
तत्पूर्वं तत इत्येवमित्युद्धारो मयोदितः ।

तथा ।

शवात् कापालिनी सिद्धिः कराली तदनन्तरम् ।
शेषे गुह्या भारतीयषोडशार्णस्य वै मनोः ॥
करालिनी वधूवीजान्मुण्डमालिन्यतः परम् ।
देवी भवेत् सर्वशेषे गायत्री च्यावनी त्वियम् ॥
फेत्कारिण्युग्रचण्डा च विकटदंष्ट्रा ततः परम् ।
शेषे चण्डी च हारीतोपासिता त्रिपदा त्वियम् ॥

तथा ।

अट्टाट्टहासिनी ह्यादौ घोरदंष्ट्रा ततः परम् ।
शेषे घोरा रामचन्द्रोपासिता त्रिपदा स्मृता ॥

अथ कामकलागायत्री तत्रैव ।

ॐ अनङ्गाकुलायै विद्महे मदनातुरायै धीमहि तन्नः कामकलाकाली प्रचोदयात् ।

दुर्गागायत्री तन्त्रान्तरे ।

ॐ कात्यायन्यै विद्महे कन्याकुमारी धीमहि तन्नो दुर्गा प्रचोदयात् ।

अथ कामगायत्री (मेरुतन्त्रे)

ॐ कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनङ्गः प्रचोदयात् ।

अथ गरुडगायत्री तत्रैव ।

सर्पभीतिहरीं वक्ष्ये गायत्रीं सर्वकामदाम् ।

ॐ सुपर्णाय विद्महे पक्षिराजाय धीमहि तन्नो गरुडः प्रचोदयात् ।

अथ हनुमद्गायत्री तन्त्रान्तरे ।

हँ हनुमते विद्महे आञ्जनेयाय धीमहि तन्नो वीरः प्रचोदयात् ।

(मेरुतन्त्रे)

.... मूलमष्टोत्तरं शतम् ।
जपित्वा चार्पयेद्देवे स्तुत्वा नत्वेष्टदेवताम् ॥
सूर्यमण्डलतो देवं विन्यसेद्धृदये स्वके ।
ततो गुरुं च प्रणमेदिति सन्ध्या तु तान्त्रिकी ॥
त्रिकालमेवं कर्त्तव्या सन्ध्यालोपात् फलं न हि ।
दैवतो यदि लोपश्चेत् तदा मूलं शतं जपेत् ॥
प्रायश्चित्ताय तां कृत्वा कुर्वीत समयागताम् ।

(शैवागमेऽपि)

सन्ध्यालोपो न कर्त्तव्यः शम्भोराज्ञैवमेव हि ।

दीक्षितः सन्ध्यया हीनो न दीक्षाफलमाप्नुयात् ॥

(गौतमीये)

संक्षेपसन्ध्यामथ वा कुर्यान्मन्त्री ह्यशक्तितः ।
सायं प्रातश्च मध्याह्ने कृष्णं ध्यात्वा जपेन्मनुम् ॥

कृष्णमित्युपलक्षणं स्वेष्टदेवतां ध्यात्वेत्यर्थः ।

सन्ध्यायां पतितायां वा गायत्रीं दशधा जपेत् ।

अथ तर्पणं (मेरौ)

वैदिकं तर्पणं कृत्वा ततस्तान्त्रिकमाचरेत् ।
प्राणायामत्रयं कृत्वा मूलेन न्यासमाचरेत् ॥
ऋष्यादित्रितयस्याथ पुरतो धेनुमुद्रया ।
वँ जपन्नमृतीकृत्य जलं तत्र सचक्रकम् ॥
साङ्गं सावरणं देवं ध्यात्वा मूलं समुच्चरेत् ।
अमुकं तर्पयामीति प्रोच्य चाष्टोत्तरं शतम् ॥
तदर्धमथवा विंशदष्टयुक्तं मुखाब्जके ।
देवस्यामृतबुद्ध्या तत्तीर्थतोयैः प्रतर्पयेत् ॥
तदावरणदेवाँश्च तद्वदेकैकवारकम् ।
सन्तर्प्य देवं स्वहृदि तीर्थं सूर्ये विसर्जयेत् ॥

(नन्दिकेश्वरसंहितायाम)

यावन्न दीयते चार्घं भास्कराय निवेदनम् ।
तावन्न पूजयेद्विष्णुं शङ्करं वा सुरेश्वरि ॥

(माहेश्वरीये)

संस्मृत्य भैरवं देवं मार्त्तण्डाख्यमुमापतिम् ।
मूलेन मनुना देवि सूर्यस्य मनुनाऽथ वा ॥
मायाबीजं समुद्धृत्य सोऽहं तु विपरीतकम् ।
मार्त्तण्डभैरवं ङेन्तं प्रकाशशक्तिसंयुतम् ॥

एष तेऽर्घोऽग्निजायेति दद्यादर्घत्रयं सुधीः ।
(मेरौ) तु पूजागृहं गत्वा सूर्यार्घदानमुक्तं यथा ।
गुरुं दिगीशांश्च खगान् नत्वा भाण्डकरं दधत् ।
जलपूर्णं व्रजेन्मौनी स्वेष्टदेवं हृदि स्मरन् ॥
एकान्तं निर्जनं यायान्मनोज्ञं दोषवर्जितम् ।
दिगन्तरं न वीक्षेत यावत् प्राप्नोति वै गृहम् ॥
प्रदक्षिणं यज्ञवाटं कृत्वा पादौ च हस्तकौ ।
प्रक्षाल्याचम्य पूजाया गृहाद्दण्डान्तरे स्थितः ॥
गृहे च द्वारदेशस्थः प्रणम्य मनसा गुरुम् ।
मणमेदिष्टदेवं स्वं दिक्पालानपि चेतसा ॥
यत् पूर्वमर्जितं पापं तद्दिनेऽन्यदिनेऽपि वा ।
तत्पापस्यापनोदार्थं मन्त्रद्वयमुदीरयेत् ॥
हे देव प्राकृतं चित्तं पापाक्रान्तमिदं मम ।
तन्निःसारय चित्तान्मे पापं फट् फट् च ते नमः ॥
सूर्यः सोमो यमः कालो महाभूतानि पञ्च च ।
एते शुभाशुभस्येह कर्मणो नव साक्षिणः ॥
हुँ फडिति ब्रुवन् क्रोधदृष्ट्या पश्येच्च पार्श्वयोः ।
एवं कृते प्रथमतः पापोत्सादनकर्मणि ॥
यत् स्याद्दृढतरं पापं तद्दूरे वाऽवतिष्ठते ।
अतीते पूजनस्थाने स्वं प्रयाति पुनश्च तत् ॥
यत् स्यादल्पतरं पापं तन्नाशमुपगच्छति ।
पूजने त्यक्तपापस्य काममिष्टं क्षणाद्भवेत् ॥
ततः प्रक्षाल्य पादौ च हस्तावाचम्य यत्नतः ।

दद्यादर्घं दिनेशाय तत्प्रकार इहोच्यते ॥
गोमयेनोपलिप्तायां भूमौ कृत्वा तु मण्डलम् ।
सिन्दूरेण ततः पश्चादुपविश्य निजासने ॥
प्राङ्मुखः प्रणमेदिष्टदेवतां भक्तितत्परः ।
प्राणायामत्रयं कृत्वा सूर्यमन्त्रेण मन्त्रवित् ॥
ह्राँ ह्रीँ स इति सूर्यस्य त्र्यक्षरो मन्त्र उच्यते ।
विन्यस्य च तथेन्द्रादीन् ध्यात्वा सूर्यमनन्यधीः ॥
पद्मद्वयाभयवरान् दधतं कराब्जै-
    र्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम् ।
रक्ताम्बुजासनमशेषगुणैकसिन्धुं
    भानुं समस्तजगतामधिपं भजामि ॥
तत्कल्पोक्तविधानेन पूजयेदुपचारकैः ।
पुरतो मण्डलं कृत्वा जलेन चतुरस्रकम् ॥
निधाय तत्र साधारं सजलं ताम्रपात्रकम् ।
गन्धपुष्पाक्षतान् दर्भान् दूर्वासर्षपसंयुतान् ॥
सतिलान्रक्तपुष्पाणि यवाँश्चापि प्रविन्यसेत् ।
सूर्यमन्त्रेण तत्पात्रं स्पृशन्नष्टोत्तरं शतम् ॥
अभिमन्त्र्य च तत्पात्रं समुत्थाय करद्वयात् ।
मूर्धान्तं सूर्यमन्त्रेण दद्यादर्घं विचक्षणः ॥
ह्राँ ह्रीँ सः सग्रहराशिनक्षत्रपदमुच्चरेत् ।
ततश्च योगकरणपरिवृत्तासनेति च ॥
संस्थित श्रीसूर्यायैष तेऽर्घः स्वाहा मनुः स्मृतः ।
चतुस्त्रिंशदक्षरोऽयं सूर्यस्यार्घनिवेदने ॥

जपेत् ततो यथाशक्त्या सर्वमन्त्रमनन्यधीः ।
तदर्घाम्बुप्लुतं सूर्यं ध्यायेद्देशिकसत्तमः ॥
स्तुत्वा प्रणम्य विसृजेन्मण्डलान्तं दिवाकरम् ।
तत उत्थाय विधिवद्द्वारपूजां समारभेत् ॥

द्वारपूजाविधिस्तु दीक्षातरङ्गे उक्तः ।

अथ नित्यपूजाविधिः ।

(क्रियासंग्रहे)

नित्यपूजामथो वक्ष्ये संक्षेपेण यथोदिताम् ।
पूजास्थानं समागम्य कुर्यादाचमनत्रयम् ॥
उपविश्यासने मन्त्री कुर्यात् संकल्पमादरात् ।

संकल्पस्तु—

अमुकदेवताप्रीतये तन्नित्यार्चनमहं करिष्ये—इत्येवंरूपः ।

तथा ।

दद्यादर्घं दिनेशाय साक्षिणे सर्वकर्मणः ।
गुरुं गणपतिं नत्वा प्रणमेदिष्टदेवताम् ॥
तालत्रयं पुरस्कृत्य बध्नीयाच्च दिशो दश ।
भूतशुद्ध्यादिकं कृत्वा प्राणायामं समाचरेत् ॥
कुर्याच्च मातृकान्यासं मूलन्यासं तथैव च ।
हृदये देवतां ध्यात्वा मानसैरुपचारकैः ॥
पूजयेद्देवतारूपमात्मानं मन्त्रवित्तमः ।
वाह्यस्थैरुपचारैश्च यजेन्नैवेद्यवर्जितैः ॥
ततः कल्पोदिता मुद्रा दर्शयित्वा विधानवित् ।
अर्घादिकं च संस्थाप्य पूजाद्रव्याणि शोधयेत् ॥
यथोक्तां देवतां ध्यात्वाऽऽवाहयेन्मूलमन्त्रतः ।

(मेरुतन्त्रे)

संस्थापनं सन्निधानं सन्निरोधं ततश्चरेत् ।
संमुखीकरणं चापि सकलीकरणं ततः ॥
ततोऽवगुण्ठनं कार्यममृतीकरणं ततः ।
परमीकरणं कुर्यात् क्रमतः स्वस्वमुद्रया ॥

(क्रियासंग्रहे)

आवाहनादिका मुद्राः प्रदर्श्य स्थापयेदसून् ।
कल्पयेदुपचारांश्च यथासंभवमादरात् ॥
संपूज्य मूलमन्त्रेण प्रसूनाञ्जलिभिस्त्रिभिः ।
पूजयेद्विधिवन्मन्त्री यथोक्तावृतिदेवताः ॥
साङ्गां सवाहनां सालङ्करणां च समुद्रिकाम् ।
सायुधां सपरीवारां देवतामर्चयेत् ततः ॥
ततो जपेन्मूलमन्त्रमष्टोत्तरशतं सुधीः ।
तं जपं भक्तितो मन्त्री देवतायै निवेदयेत् ॥
स्तुत्वा च विविधैः स्तोत्रैः साष्टाङ्गं प्रणमेद्भुवि ।
ततो वरान् प्रार्थयित्वा देवमुद्वासयेद्धृदि ॥
निर्माल्यं शिरसि धार्यं देवतोच्छिष्टभोजिने ।
दत्वा भुञ्जीत नैवेद्यमेतन्नित्यार्चनं स्मृतम् ॥

पूजायाः क्रममात्रमिदं दर्शितम् । अत्र यद्यत् कर्त्तव्यमुक्तं तत्तत् सर्वं दीक्षातरङ्गे द्रष्टव्यम् ।

अथ नित्यहोमविधिः ।

तदुक्तं (सोमभुजगावल्याम्)

नाजप्तः सिद्ध्यते मन्त्रो नाहुतश्च फलप्रदः ।
नानिष्टो यच्छते कामान् तस्मात् त्रितयमाचरेत् ।

पूजया लभते पूजां जपात् सिद्धिर्न संशयः ॥
विभूतिं चाग्निकार्येण सर्वासिद्धिं च विन्दति ।

(ज्ञानार्णवे)

संकल्प्य परमेशानि नित्यहोमविधिं चरेत् ।

संकल्पस्तु—

अमुकदेवताप्रीतये एतावदाहुतीर्होष्यामि—इत्येवंरूपः ।

(नीलतन्त्रे)

नित्यहोमं प्रवक्ष्यामि सवार्थं येन विन्दति ।
सपर्यां सम्यगापाद्य वलिं पूर्ववदाचरेत् ॥
ततो जपं तर्पणं च स्मरेत् साधकसत्तमः ।
वलिं वैश्वादिकं चैव व्राह्मणः समुपाचरेत् ॥
विधिवदग्निमादाय क्रव्यादेभ्यो नमस्तथा ।
मूलमन्त्रं समुच्चार्य कुण्डे वा स्थण्डिलेऽपि वा ॥
भूमौ वा संस्तरेद्वर्हिं व्याहृतित्रितयेन तु ।
स्वाहान्तेन त्रिधा हुत्वा षडङ्गहवनं ततः ॥
ततो देवीं समावाह्य मूलेन षोडशाहुतिम् ।
हुत्वा स्तुत्वा नमस्कृत्य विसृजेदिन्दुमण्डले ॥

(सारसंग्रहे)

इत्थं तु संहृते वह्नौ देवमावाह्य मन्त्रवित् ।
संपूज्य मूलमनुना पञ्चविंशतिमाहुतिम् ॥
हुनेदाज्येन हविषा तिलैर्वा पायसैः शुभैः ।
तण्डुलैस्तिलसंमिश्रैः केवलैर्वाऽथ पुष्पकैः ॥
अङ्गावरणदेवानामेकैकामाहुतिं हुनेत् ।
उद्वास्य देवं वह्निं च पूजास्थानं व्रजेत् ततः ॥

अयं होमो नैवेद्यदानान्तरं पूजासमाप्त्यनन्तरं वा कार्यः ।
तदुक्तं (माहेश्वरीये)

निवेदयित्वा नैवेद्यं वैश्वदेवं समाचरेत् ।
अर्चायां वा समाप्तायां होमं कुर्याद्विधानतः ॥
नित्ये नैमित्तिके काम्ये चैतदग्निमुखं स्मृतम्—इति ।

(अगस्त्यसंहितायाम्)

पूर्ववत् संस्कृते वह्नौ देवमावाह्य मन्त्रवित् ।

इति (मेरुतन्त्रे) चोक्तत्वादत्र वह्निसंस्कारः कर्त्तव्य एवेति श्रीविद्यापद्धतिकृतः ।

अग्न्याधानादिकं कर्म नित्यहोमे न विद्यते ।

इति (वसिष्ठसंहिताया) वचनेन निषेधान्नित्यहोमे एवाग्निसंस्कारो नास्तीत्यन्ये । विधिनिषेधयोः श्रवणादैच्छिको विकल्पो यथा षोडशपञ्चविंशाहुत्योर्विकल्प इति के चित् ।

सुधार्णवकृतस्तु-(नीलतन्त्रोक्त) एवात्र वह्नेः संस्कारः कर्त्तव्यो नाधिको विशेषवचनेन निषेधादित्यहुः ।

इति नित्यहोमविधिः ।

कुम्भसंभवः ।

ततः संकल्प्य कुर्वीत पुरश्चरणमादरात् ।

(मेरुतन्त्रे)

प्रारभेत पुरश्चर्यां दीक्षोक्तदिवसे शुभे ।
प्रणम्यादौ गुरून् विप्रान् गणेशं परिपूज्य च ॥
पुण्याहवाचनं कृत्वा कुशहस्तो वदेदिति ।
सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा ॥
पवनो दिक्पतिर्भूमिराकाशं खेचरामराः ।
ब्राह्मयशासनमाधाय कल्पन्तामिह सन्निधिम् ॥
वदित्वेत्थं ताम्रपात्रे कृत्वा कुशतिलाक्षतान् ।
उदङ्मुखस्तु संकल्पं कुर्यात् संवत्सरादिकान् ॥

कामनान्तानुच्चरेत् तु त्रयोविंशतिसंख्यकान् ।
संवत्सरायने मासपक्षपञ्चाङ्गमेव च ॥
नवग्रहस्थितिं घस्रभागं मौहूर्त्तिकं त्विति ।
स्वदेशभेदाँस्तत्तुल्यान् कामनासहितान् वदेत् ॥
द्वीपेऽमुकेऽमुके खण्डेऽमुके वर्षे च नीवृति ।
अमुके चामुके क्षेत्रे गोत्रप्रवरमुच्चरेत् ॥
स्वनामजातिनामान्तं द्विजाच्छर्म च वर्म च ।
गुप्तो दासोऽथामुकस्य मन्त्रस्य सिद्धिकामुकः ॥
करिष्येऽहं पुरश्चर्यामेतत्संख्यजपात्मिकाम् ।
अद्यारभ्य दिनैरेतैरसति प्रतिबन्धके ॥
करिष्ये इति संकल्पं मनसैव प्रकल्पयेत् ।
वदेद्वाचाऽभिलाषं च कर्मणा चोपपादयेत् ॥

(सनत्कुमारसंहितायाम्)

प्रणवं तत्सदद्येति मासपक्षतिथीरपि ।
अमुकगोत्रोऽमुकोऽहं मूलमुच्चार्य तत्परम् ॥
सिद्धिकामोऽस्य मन्त्रस्य इयत्संख्याजपं ततः ।
दशांशं हवनं होमाद्दशांशं तर्पणं ततः ॥
दशांशं मार्जनं तस्माद्दशांशं विप्रभोजनम् ।
पुरश्चरणमेवं हि करिष्ये प्रागुदङ्मुखः ।

(नारदपञ्चरात्रे)

संपूज्याथ जपं कुर्याद्यावद्वै प्रहरद्वयम् ।

(तन्त्रदीपे)

विधाय विधिवद्विद्वान् मण्डपं सुमनोहरम् ।
तस्मिन् कलशमारोप्य तीर्थतोयैः प्रपूजयेत् ॥

निःक्षिप्य नवरत्नानि तत्र गन्धाष्टकं पुनः ।
आवाह्य पूजयेत् तत्र देवमावरणैः सह ॥
कलशाग्रे जपेन्मन्त्री यावत् संख्या न पूर्यते ।
ततः पूर्णे समागत्य गुरुर्देवो विधानतः ॥
अभिषिञ्चेच्छिष्यमूर्ध्नि कलशोदकवारिभिः ।
ततः शिष्यः प्रयत्नेन धनाद्यैस्तोषयेद्गुरुम् ॥

दीक्षोक्तक्रमेण कलशं संस्थाप्य तत्र देवतामावाह्य यथाशक्ति संपूज्य जपं कुर्यादित्यर्थः ।

(पुरश्चरणचन्द्रिकायाम्)

एतान्यन्यानि पूजायां साधनानि बहून्यपि ।
उत्तमानि च मध्यानि न्यूनानि त्रिविधानि च ॥
स्वस्थः समर्थः कुर्वीत उत्तमैरेव साधनैः ।
मध्यमो मध्यमैरेव न्यूनो न्यूनैस्तु साधनैः ॥
आपन्नश्चेत् समर्थोऽपि न्यूनैरेव समाचरेत् ।
पूजाकर्मविशेषेण देशकालानुसारतः ॥
यथाशक्ति यथान्यायं यथालोकावगर्हितम् ।
पूजां विस्तरतः कर्त्तुं यो न शक्नोति साधकः ॥
यदि वाह्येन्द्रवज्राद्यैः पूजयेदिष्टदेवताम् ।
अथ वा देवतामन्त्रं ध्यात्वा सम्यक् प्रपूजयेत् ॥
अथ वा मानसीं कुर्यादात्मपूजामथापि वा ।
अथ वा केवलां पूजां वाह्यां कुर्याद्विचक्षणः ॥

तथा ।

पूर्वपूर्वस्य चाशक्त्या उत्तरोत्तरमाचरेत् ।
यद्येतदन्यथा कुर्यात् तदाऽनिष्टफलं स्मृतम् ॥

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तयेत् ।
न सांपरायिकं तस्य दुर्मतेर्जायते फलम् ॥
इति विज्ञाय सामर्थ्यमेकं पन्थानमाचरेत् ।

कलशस्थापनाशक्तस्तु यन्त्रादौ पूजां कुर्यात् ।

तदुक्तं (सिद्धान्तसारे)

कलशस्थापनाशक्तो यन्त्रादौ पूजनं चरेत् ।

आदिशब्देन प्रतिमाशिवलिङ्गशालग्रामादयः संगृह्यन्ते ।

तदुक्तं (मेरुतन्त्रे)

गणेशसूर्यविष्णवीशदेवीनां पूजनं क्रमात् ।
दशस्थानानि देवानां पूजार्थं कल्पितानि च ॥
शिवलिङ्गे मणौ यन्त्रे शालग्रामे घटे रवौ ।
स्थण्डिलेऽग्नौ मूर्ध्नि हृदि स्थानेष्वेतेषु पूजयेत् ॥
भूमावेव कृता पूजा पुत्रायुर्धननाशिनी ।

तत्रैव ।

ततः प्रणम्य च गुरुं पूजाचक्रं समुद्धरेत् ।
सुवर्णरचिते पीठे भूपाला वशवर्त्तिनः ॥
रजतेन कृतं यन्त्रमायुरारोग्यकामदम् ।
ताम्रेण रचितं यन्त्रं सर्वैश्वर्यप्रदं मतम् ॥
यन्त्रं तु स्फाटिकं स्वच्छं मनोभिलषितप्रदम् ।
माणिक्यरचितं यन्त्रं राज्यदं भुक्तिमुक्तिदम् ॥
कृतं मरकतैर्यन्त्रं सर्वशत्रुविनाशनम् ।
लोहत्रयोद्भवं यन्त्रं सर्वशक्तिकरं मतम् ॥
श्रीखण्डं शान्तिदं ज्ञेयं पुष्टिदं रक्तचन्दनम् ।
श्रीपर्णीपीठमुद्दिष्टं पूजार्थं धनराज्यदम् ॥
वैद्रमे बहुला संपद्भूर्यपत्रे चतुष्पदाः ।

गण्डकीभवपाषाणे भुक्तिर्मुक्तिरदूरतः ॥
भूमौ सिन्दूररजसा रचितं सर्वकामदम् ।
सीसकांस्यादिषु कृते सम्पत्तिं सन्ततिं हरेत् ॥
फलकायां पटे भित्तौ स्थापयेन्न कदाचन ।
स्थापितं यदि मोहेन नाशयेत् तद्धं कुलम् ॥
अब्ध्यङ्गुलसुविस्तारं प्राक्प्रत्यग्दक्षिणोत्तरम् ।
पलप्रमाणं कर्त्तव्यमर्चापीठं मनोहरम् ॥
यवार्धोच्चं प्रकुर्वीत चतुरस्रं समन्ततः ।
तस्मिन् पीठे तु निर्माणं पूजाचक्रस्य कारयेत् ॥
(रत्नसागरे)

अब्ध्यङ्गुलेन स्वर्णस्य रजतस्य तथैव च ।
ताम्रस्य पूर्णसंख्यैव माणिक्यादौ यथेच्छया ॥
(मेरुतन्त्रे)

माणिक्यादिकपीठे तु माननूनं न दोषकृत् ।
श्रीपर्णीचन्दनादीनामाधिकं चेन्न दोषकृत् ॥

एतद्भिन्ने तु (रुद्रयामले)।

एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम् ।
स्वेच्छातोलं नरः कृत्वा प्रत्यवायं समश्नुते ॥

स्वेच्छातोलमिति। तोलकचतुष्टयपरिमितेन स्वर्णादिना यन्त्रस्य निर्माणासंभवे स्वेच्छया तदाधिकं न कुर्यादित्यर्थः।

प्रसङ्गात् स्थिररेखयन्त्रप्रतिष्ठाविधिमाह (मेरौ)

लग्ने शुभग्रहोपेतेऽनुकूलगुणशालिनि ।
प्रतिष्ठां कारयेदेषां स्वर्क्षतिथ्यादिके क्षणे ॥

तथा।

आदौ वेदोदितैर्मन्त्रैर्विप्रोऽग्न्युत्तारणं चरेत् ।

धातुनिर्म्मितयन्त्राणां मूर्त्तीनां च विशेषतः ॥
अग्निः सप्तिं वाजमिति सप्तर्चा सप्तिरुच्यते ।
मुनिस्त्रिष्टुप् छन्द उक्तं देवताऽग्निः प्रकीर्त्तितः ॥
अग्निशब्देन रहितं सूक्तमेतच्छतं पठेत् ।
अभिषिञ्चेच्छुद्धतोयैस्ततः संपूर्णसूक्तकैः ॥
अभिषिञ्चेच्छतावृत्त्याऽग्न्युत्तारणमिदं स्मृतम् ।

तथा ।

क्षौद्राज्यदुग्धैः प्रथमं नारिकेलाम्भसा ततः ।
अभिषिञ्च्याथ तोयेन क्वथितेनाद्वरौषधैः ॥
आवाह्याभ्यर्च्य तल्लग्ने चक्रं संस्थाप्य पूजयेत् ।
गन्धपुष्पैर्नवैर्धूपैर्दीपैर्नैवेद्यतर्पणैः ॥
त्रिरात्रं पूजयेद्देवीं त्रिसन्ध्यं च यथाविधि ।

(वामकेश्वरतन्त्रे)

भैरव्युवाच ।
चक्रभेदं महादेव त्वत्प्रसादान्मया श्रुतम् ।
इदानीं श्रोतुमिच्छामि प्रतिष्ठाकर्मनिर्णयम् ॥
श्रीशङ्कर उवाच ।
शृणु देवि महाभागे जगत्कारिणि कौलिनि ।
यन्त्रप्रतिष्ठाकर्माङ्गसर्ववर्णविनिर्णयम् ॥
स्नात्वा संकल्पयेन्मन्त्री गुरोरर्चनमाचरेत् ।
पञ्चगव्यं ततः कुर्याच्छिवमन्त्रेण मन्त्रितम् ॥
तत्र चक्रं क्षिपेन्मन्त्री प्रणवेन समाकुलम् ।
तदुद्धृत्य ततश्चक्रं स्थापयेत् स्वर्णपीठके ॥
स्पृष्ट्वा यन्त्रं कुशाग्रेण गायत्र्या चाभिमन्त्रयेत् ।

अष्टोत्तरशतं देवि देवताभावसिद्धये ॥
आत्मशुद्धिं ततः कृत्वा षडङ्गैर्देवतां यजेत् ।
तत्रावाह्य महादेवीं जीवन्यासं च कारयेत् ॥
उपचारैः षोडशभिर्महामुद्रादिभिस्तथा ।
फलैर्नैवेद्यताम्बूलैर्देवीं तत्र समर्चयेत् ॥
पट्टसूत्रादिकं दद्याद्वस्त्रालङ्करणादिभिः ।
मुकुरं चामरं घण्टां यथायोग्यं महेश्वरि ॥
सर्वमेतत् प्रयत्नेन दद्यादात्महिते रतः ।
ततो जपेत् सहस्रं च सकलेप्सितसिद्धये ॥
वल्ल्यादिकं प्रदत्वा च प्रणमेच्चक्रराजकम् ।
अष्टोत्तरशतं हुत्वा संपाताज्यं विनिःक्षिपेत् ॥
अष्टोत्तरशतं हुत्वा साज्यधान्यतिलेन च ।
मूलमन्त्रं समुच्चार्य मन्त्री यन्त्राङ्गमाचरेत् ॥
होमकर्मण्यशक्तश्चेद्द्विगुणं जपमाचरेत् ।
धेनुमेकां समानीय स्वर्णशृङ्गाद्यलङ्कृताम् ॥
गुरवे दक्षिणां दद्यात् ततो देव्या विसर्जनम् ।

शिवमन्त्रः प्रसादः ।
(सिद्धान्तसंग्रहे)

पञ्चगव्येन संशोध्य स्नाप्य पञ्चामृतैः पृथक् ।
अष्टाभिस्तीर्थकलशैः स्नापयेन्मूलमन्त्रतः ॥
ततोऽभिमन्त्रयेद्यन्त्रं गायत्र्या वक्ष्यमाणया ।
अष्टोत्तरशतं मन्त्री मूलेनापि तथैव च ॥
यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात् ।

ततो देवं समावाह्य प्राणान् संस्थाप्य मन्त्रवित् ।
उपचारैः षोडशभिः पूजयेदिष्टदेवताम् ॥
अष्टोत्तरसहस्रं च संस्कृते हव्यवाहने ।
घृतेन जुहुयात् तत्र संपाताज्यं विनिःक्षिपेत् ॥
ब्राह्मणान् भोजयेत् पश्चात् साधको देवताधिया ।
एवंसंसाधिते यन्त्रे देवः सन्निहितो भवेत् ॥

(मेरुतन्त्रे) ।

आवाह्याऽभ्यर्च्य तल्लग्ने चक्रं संस्थाप्य पूजयेत् ।
गन्धपुष्पैर्नवैर्धूपैर्दीपैर्नैवेद्यदर्पणैः ॥
त्रिरात्रं पूजयेद्देवीं त्रिसन्ध्यं च तथा निशि ।

वामाचारे कुलाचारे च यो विशेषस्तमाह ।

मकारैः पञ्चभिर्युक्तं चरेयुर्वामिनोऽर्चनम् ।
निशायां शक्तिपूजां च दूतीयागं च कौलिकाः ॥
एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भजेत् ।
एवं देवीप्रतिष्ठायां क्रमः सान्निध्यकारकः ॥
स्त्रीशूद्राणां वामिनां च कौलिकानामयं विधिः ।

तथा ।

महापापं न कुर्वन्ति पशुवद्वेदमार्गगाः ।
अग्निः शुचिव्रततमः शुचिर्विप्रः शुचीरितम् ॥
अज्ञानतश्च लघुभिः सन्ध्यावन्दननाशितैः ।
पातकैस्तैर्न लिप्यन्ते तस्मात् ते पशवः स्मृताः ॥
वामेनोपासितं यन्त्रं तेषां दृष्टिपथे गतम् ।
तद्देवताक्षोभकरं विक्षिप्तः साधको भवेत् ॥
दक्षिणोपासितं यन्त्रं सूर्याग्निसमतेजसम् ।

पापिनां दृष्टिदहनमुलूकानां यथा रविः ॥
यथा नृभिर्दिनकरोदये सर्वं निरीक्ष्यते ।
दत्तसंस्थापितं यन्त्रं तथा पुण्यात्मनां मतम् ॥
सान्निध्यं सर्वदेवानामवश्यं मन्त्रतो भवेत् ।
मन्त्रस्तु बीजवत् प्रोक्तः प्रतिमाद्यं शरीरवत् ॥
सिद्धायामपि सामग्र्यां विना मन्त्रं फलं न हि ।

तथा ।

दशाङ्गुलप्रमाणा वा तिथ्यङ्गुलमिताऽपि वा ।
अभ्यर्च्य प्रतिमां विष्णोर्गृहेषु गृहमेधिभिः ॥
पञ्चसूत्रसमायुक्तं शिवलिङ्गं समर्चयेत् ।
गृहस्थानां भुक्तिमुक्तिधनारोग्यप्रदं तु तत् ॥
लिङ्गमस्तकविस्तारो यावांस्तावच्च दीर्घता ।
लिङ्गस्य लिङ्गशालक्या जलहर्यास्तथैव च ॥
लिङ्गपीठस्य पञ्चानां समता पञ्चसूत्रिका ।

तत्रैव ।

एकपीठे पृथक् पूजां विना यन्त्रं करोति यः ।
तन्त्रेण पूजयेद्यन्त्रं स दैवं शापमाप्नुयात् ॥
आवाह्य देवतामेकामर्चयेच्चान्यदेवताम् ।
अन्ययन्त्रेण पूजां वा देवता शापकारिणी ॥
पूजनं बहुमूर्त्तीनामेकपीठे भवेद्यदि ।
पृथक् चन्दनपुष्पाणि धूपदीपादि तन्त्रतः ॥

तन्त्रमपार्थक्यम् ।

खण्डिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते ।
व्यङ्गेऽनर्हपशुस्पृष्टे पतिते दुष्टभूमिषु ॥

अन्यमन्त्रार्चिते चैव पतितस्पर्शदूषिते ।
दशस्वेतेषु नो कुर्युः सन्निधानं दिवौकसः ॥

तत्रैव ।

देवस्य मन्त्ररूपस्य यन्त्रव्याप्तिमजानताम् ।
कृतार्चनादिकं सर्वं व्यर्थं भवति शाम्भवि ॥

यन्त्रपदार्थ उक्तस्तत्रैव ।

कामक्रोधादिदोषोत्थसर्वदोषनियन्त्रणात् ।
यन्त्रमित्याहुरेतस्मिन् देवस्तुष्यति पूजितः ॥

(पुरश्चरणचन्द्रिकायाम्)

तत्तत्कल्पोक्तद्रव्येण विलिखेद्यन्त्रमुत्तमम् ।
सौवर्णे राजते ताम्रे पीठे भूर्जे परे भुवि ॥
विना यन्त्रेण चेत् पूजा देवता न प्रसीदति ।

यन्त्रलिखनद्रव्यमुक्तम् (मेरुतन्त्रे)

पूजायन्त्रं दक्षमार्गे तत्तद्गन्धाष्टकेन च ।
लिखेद्वा केशराहिमरोचनाभिः समालिखेत् ॥
वाममार्गे लिखेदाद्यपुष्पेण यदि यन्त्रकम् ।
षण्मासं पूजनात् तत्र त्वरितं सिद्धिमाप्नुयात् ॥
तदभावे तु रुधिरं महिषस्य प्रशस्यते ।
तदभावे तु कुसुमं ग्राह्यं चैवापराजिताम् ॥
तस्योर्ध्वभागे निःक्षिप्य घर्षितं रक्तचन्दनम् ।

(स्वतन्त्रतन्त्रे)

स्वर्णे वा राजते ताम्रे पाषाणे चाष्टधातुषु ।
स्वयम्भूकुसुमं कुण्डगोलोत्थरोचनागुरुः ॥
काश्मीरं मृगनाभिश्च कुलं च मलयोद्भवम् ।
एष गन्धः समाख्यातः सर्वदा चण्डिकाप्रियः ॥

एतेन गन्धयोगेन योनिचक्रं समालिखेत् ।

वीरपरमिदम् ।

(रुद्रयामले)

ततः कुङ्कुमसिन्दूरैः कार्यं यन्त्रं तु योगिना ।
सौवर्णे राजते ताम्रे स्फाटिके वैद्रुमे तथा ॥
चक्रे यथोक्तविधिना पूज्या देवी नरोत्तमैः ।

(सारसंग्रहे)

ताम्रे द्वादशकं वर्षं स्फाटिकादौ तु सर्वदा ।
तेषां मध्ये स्फाटिकं तु सर्वसिद्धिप्रदं भवेत् ॥
यावज्जीवं सुवर्णं स्याद्रौप्यं द्वात्रिंशतिः प्रिये ।
ताम्रे द्वादशकं वर्षं तदर्धं भूर्जपत्रके ॥

इदं च स्थिररेखारूपयन्त्रपरम् ।

(रुद्रयामलेऽपि)

ताम्रे लक्षगुणं प्रोक्तं रौप्ये कोटिगुणं भवेत् ।
सौवर्णेऽनन्तफलदं मण्यादौ किं वदामि ते ॥
विद्रुमे रचिते यन्त्रे पद्मरागेऽथ वा प्रिये ।
इन्द्रनीलेऽथ वैदूर्ये स्फाटिके मरकते तथा ॥
धनं पुत्रं तथा दारान् यशांसि लभते ध्रुवम् ।

(गौरीयामले)

चातुर्विध्यं हि चक्रस्य प्रस्ताराश्च भवन्ति हि ।
भूकूर्मपद्मप्रस्तारा मेरुश्चापि तथाविधः ॥
निम्नरेखासमायोगो भूप्रस्तारो मयोदितः ।
कूर्मपद्मकप्रस्तार ऊर्ध्वरेखं मयोदितम् ॥

(सौत्रामणीतन्त्रे)

ऋजुलेखे भवेल्लक्ष्मीर्वक्ररेखे दरिद्रता ।

(कुलार्णवे)

आदिरूपाच्च बिम्बस्य पूजायां च विशेषतः ।
साधकस्य च विश्वासाद्देवतासन्निधिर्भवेत् ॥

(यामले)

एवं यन्त्रं विनिर्माय तत्र देवीं प्रपूजयेत् ।

देवीमित्युपलक्षणम् । स्वेष्टदेवतामित्यर्थः ।
पूजाप्रकारस्तु दीक्षातरङ्गे एवोक्तः ।

(कुलार्णवे)

मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः ।
न सिद्ध्यति वरारोहे कल्पकोटिशतैरपि ॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥
लुप्तबीजाश्च ये मन्त्रा न दास्यन्ति फलं प्रिये ।
मन्त्राश्चैतन्यसहिताः सर्वसिद्धिकराः स्मृताः ॥
चैतन्यरहिता मन्त्राः प्रोक्ता नैव फलप्रदाः ।
सूतकद्वयसंयुक्ता न च मन्त्राः फलप्रदाः ॥

मन्त्रार्थो गुरुमुखाद्बोध्यः ।
मन्त्रचैतन्यं वक्ष्यते । योनिमुद्रा द्वितीयतरङ्गे उक्ता । सूतकादिज्ञानप्रकारस्तत्रैव ।

जातसूतकमादौ स्यादन्ते च मृतसूतकम् ।
सूतकद्वयसंयुक्तो यो मन्त्रः स न सिद्ध्यति ॥
गुरुकुण्डलिनीध्यानं विवाहः परिकीर्त्तितः ।
द्विरागमो भवेत् स्नानं संयोगः सन्ध्यया भवेत् ॥
अर्घदानं भवेद्गर्भो गायत्री त्वष्टमासिकम् ।
भूतशुद्ध्यादिप्राणान्तं तत्रावयवकल्पनम् ॥
देही भवेन्मातृकायाः प्राणायामस्तु संस्क्रिया ।

ध्यानोच्चारे महेशानि बालकोत्पत्तिरीरिता ॥
मन्त्रोच्चारणतो देवि जातसूतकमीरितम् ।
जातसूतकदोषस्य शमनार्थं महेश्वरि ॥
दशविंशति पञ्चाशद्यथाशक्त्या जपेच्छिवे ।
इदमादौ समादिष्टं मृतिं संशृणु सादरम् ॥
अङ्गज्ञानं च तादात्म्यं तदनन्तरमीरितम् ।
विसर्जनं महेशानि मृतसूतकमीरितम् ॥
मृतसूतकशान्त्यर्थं दशविंशति वा जपेत् ।
तेन तस्य निवृत्तिर्हि भवत्येव न संशयः ॥

यद्वा ।

ब्रह्मबीजं मनोर्दत्वा आद्यन्ते परमेश्वरि ।
सप्तवारं जपेन्मन्त्रं सूतकद्वयमुक्तये ॥

ब्रह्मबीजं प्रणवः ।

अथ मन्त्राणां स्वापप्रबोधकालौ (पञ्चरात्रे)

स्वापकाले तु मन्त्रस्य जपो न च फलप्रदः ।
स्वापकालो वामवहो जागरो दक्षिणावहः ॥
आग्नेयस्य मनोः सौम्यमन्त्रस्यैतद्विपर्ययः ।
प्रबोधकालं जानीयादुभयोरुभयोरपि ॥
ज्ञेया मन्त्रास्तु आग्नेया विद्याः सौम्याः प्रकीर्त्तिताः ।

मन्त्रविद्ययोर्भेदस्तु प्रथमतरङ्गे उक्तः ।

अथ मन्त्रशिखाज्ञानं तन्त्रान्तरे ।

शृणु देवि परं तत्त्वं सर्वज्ञानोत्तमोत्तमम् ।
येन विज्ञातमात्रेण क्षिप्रं विद्या प्रसीदति ॥
मूलकुण्डे तु या शक्तिर्भुजङ्गाकाररूपिणी ।

तद्भ्रमावर्त्तवातोऽयं प्राण इत्यभिधीयते ॥
तं त्यक्त्वाऽव्यक्तमधुरं कूजन्ती सहसोत्थिता ।
गच्छन्ती ब्रह्मरन्ध्रेण प्रविशन्ती पुनस्तनुम् ॥
यातायातक्रमेणैव तत्र कुर्यान्मनोलयम् ।
तेन मन्त्रशिखा जाता सर्वमन्त्रप्रदीपिनी ॥
तमःपूर्णे गृहे यद्वन्न किञ्चित् प्रतिभासते ।
शिखाहीनास्तथा मन्त्रा न सिद्ध्यन्ति कदा चन ॥
शिखोपदेशः सर्वत्र गोपितः परमेश्वरि ।
विना येन न सिद्धिः स्याद्वर्षकोटिशतैरपि ॥
तस्माद्यत्नेन कर्त्तव्यं शिखाया भावनं मनोः ।

अथ मन्त्रचैतन्यं तत्रैव ।

मन्त्ररूपी भवेद्देवो देवरूपी गुरुर्भवेत् ।
गुरुरूपी भवेदात्मा आत्मरूपी मनुर्भवेत् ॥
इति ते कथितं देवि मन्त्रचैतन्यमुत्तमम् ।
यस्य विज्ञानमात्रेण अद्वैतं ज्ञानमुत्तमम् ॥

अथ कुल्लुका (यामले) ।

श्रीदेव्युवाच ।
अथ वै कुल्लुकोत्पत्तिं कथयस्व ममाधुना ।
कुल्लुका कीदृशी नाथ सेतुर्वा देव कीदृशः ॥
कीदृशो वा महासेतुनिर्वाणं त्वथ कीदृशम् ।
अन्यद्वा कथितं यन्मे कीदृशं तद्वद प्रभो ॥
श्रीशिव उवाच ।
रहस्यमपि ते देवि कथ्यते शृणु साम्प्रतम् ।

विना येन महेशानि निष्फलं तु जपादिकम् ॥
कुल्लुका च तथा सेतुर्महासेतुस्तथैव च ।
निर्वाणं कुण्डलीषष्टीसर्वोत्पत्तिं शृणु प्रिये ॥
विद्यानां कुलपूज्यत्वात् कुल्लुका तेन कीर्त्तिता ।
विद्यासम्बन्धिदोषाणां भक्षयन्ती यतः शिवे ॥
तेनेयं कुल्लुकानाम्नी सर्वतन्त्रेषु गोपिता ।
विद्यासिद्ध्यर्णवे देवि येन पारं प्रगच्छति ॥
तेन सेतुर्महेशानि विद्यामार्गः प्रकीर्त्तितः ।
महाविद्याप्तिसंदर्शो महासेतुर्महेश्वरि ॥
महाविद्यार्णवस्याथ चैतन्यस्य प्रदर्शकः ।
महासेतुर्महादेवि महाविद्यास्वरूपधृक् ॥
देवतायास्तु निर्वाणं चैतन्यं यच्च कीर्त्तितम् ।
निर्वाणं कथितं भद्रे विद्यावाङ्मातृकार्णकैः ॥
निर्वाणं परमेशानि चतुश्चरणरूपधृक् ।
निर्वाणं च महेशानि परब्रह्मात्मिका मता ॥
चतुर्थं कथितं भद्रे विद्याचरणमीरितम् ।
पञ्चमी कुण्डली देवी यथावदवधारय ॥
मूलाधारादाविलान्तं विसतन्तुतनीयसीम् ।
सर्वदेवस्वरूपां च सर्ववर्णप्रदीपिनीम् ॥
महाकुण्डलिनीं देवीं समलीं कुण्डलीं पराम् ।

श्रीदेव्युवाच ।

क्रमेण दशविद्यायाः कुल्लुकाया विधिं वद ।

श्रीशिव उवाच ।

पञ्चाक्षरी कालिकायाः कुल्लुका परिकथ्यते ।
कालीकूर्चं च धूमायाः फडन्ताः परमेश्वरि ॥
अघोराख्य ऋषिः प्रोक्तो विराट्छन्दः प्रकीर्त्तितम् ।
देवता कुल्लुका काली बीजं मायाभिधं मतम् ॥
कामशक्तिस्तथा कूर्चं कीलकं परिकीर्त्तितम् ।
षड्दीर्घाढ्येन कामेन षडङ्गन्यास ईरितः ॥
ध्यानपूजादिकं सर्वं कालिकावत् समाचरेत् ।
मायावधूस्तथा कूर्चं तारिणीकुल्लुका मता ॥
तारिणीकुल्लुकायाश्च विरूपाक्ष ऋषिः स्मृतः ।
उष्णिक्छन्दः समाख्यातं देवता नीलतारिणी ॥
कूर्चबीजं तथा माया शक्तिर्वधूश्च कीलकम् ।
मायया तु षडङ्गानि सर्वं नीलसरस्वती ॥

(त्रिशक्तिरत्ने)

अजप्त्वा कुल्लुकामन्त्रमस्मृत्वा श्रीपतिं हरिम् ।
यो जपेत् तारिणीमन्त्रं नरके स विलीयते ॥
जपित्वा कुल्लुकामन्त्रमष्टोत्तरशतं सुधीः ।
प्रजपेत् तारिणीं पश्चान्नान्यथा सिद्धिमाप्नुयात् ॥

कुलसर्वस्वनामसहस्रनामस्तोत्रकथनान्तरम् ।

हरेर्नाम न गृह्णीयान्न स्पृशेत् तुलसीदलम् ।

इति वचनं तु वीरपरमिति ज्ञेयम् ।
उक्तस्तोत्रोपात्तहरेर्नामग्रहणं तु वीरकल्पेऽपि न निषिद्धम् ।

यानि नामानि सन्त्यत्र प्रसङ्गान्मुरवैरिणः ।
ग्राह्याणि तानि कल्याणि नान्यानि तु कदा चन ॥

इति तत्रैवोक्तत्वात् ।

(यामले)

छिन्नायाश्च महेशानि कुल्लुकाऽष्टाक्षरी भवेत् ।
वज्रवैरोचनीये च अन्ते वर्म प्रकीर्त्तयेत् ॥
अतिकाल ऋषिः प्रोक्तो गायत्रीछन्द ईरितम् ।
हँबीजं हुँ तथा शक्तिः कीलकं रोचनी मता ॥
शिवषड्दीर्घयुक्तेन षडङ्गन्यासमाचरेत् ।
ध्यानपूजादिकं सर्वं छिन्नावत् समुपाचरेत् ॥
सुन्दर्याः कुल्लुका देवि संप्रोक्ता द्वादशाक्षरी ।
वाग्भवं कामराजं च लज्जा च त्रिपुरेपदम् ॥
भगवतीति पदं प्रोच्य तदन्ते ठद्वयं वदेत् ।
सुन्दरीकुल्लुकायास्तु ऋषिरानन्दभैरवः ॥
गायत्रीछन्द आदिष्टं वाग्भवं बीजमीरितम् ।
लज्जा शक्तिर्महेशानि कामबीजं च कीलकम् ॥
देवता त्रिपुरेशी च षडङ्गं त्रिद्वयेन च ।
ध्यानपूजादिकं सर्वं सुन्दरीवत् समाचरेत् ॥
संपत्प्रदाया प्रथमं बीजं श्रीभैरवीमनौ ।
विकराल ऋषिः प्रोक्तः पङ्क्तिछन्दः प्रकीर्त्तितम् ॥
देवता भैरवीनाम्ना कुल्लुका परिकीर्त्तिता ।
हँ बीजं सँ महाशक्तिरमन्त्र कीलकं मतम् ॥
षड्दीर्घाढ्येन बीजेन षडङ्गन्यासमाचरेत् ।
मातङ्गीवगलालक्ष्मीधूमोच्छिष्टाक्रमे शृणु ॥
तारकूर्चनारसिंहैः पञ्चानां कुल्लुका मता ।

ऋषिर्भैरवनामा च यावच्छन्दांसि पार्वति ॥
देवतासर्वबीजादिस्वस्वदेवक्रमेण च ।
ध्यानपूजादिकं सर्वं स्वदैवतवदाचरेत् ॥
इयं ते कथिता देवि संक्षेपात् कुल्लुका मया ।
अज्ञात्वा कुल्लुकामेतां जपते योऽधमः कुधीः ॥
पञ्चत्वमाशु लभते सिद्धिहानिः प्रजायते ।
मन्त्राः पराङ्मुखा यान्ति मन्त्रहानिश्च जायते ॥
तथा जपादिकं सर्वं निष्फलं नात्र संशयः ।
तस्मात् सर्वप्रयत्नेन यां जपेन्मूर्ध्नि कुल्लुकाम् ॥

(रुद्रयामले)

कुल्लुकां मूर्ध्नि संचिन्त्य हृदि सेतुं विचिन्तयेत् ।
महासेतुं विशुद्धौ च सहस्रारे समुद्धरेत् ॥
मणिपूरे तु निर्वाणं महाकुण्डलिनीमधः ।

अथ सेतुः (मेरुतन्त्रे)

मन्त्राणां प्रणवः सेतुर्द्विजानां परिकीर्त्तितः ।
चतुर्दशस्वरोऽन्येषां चन्द्रानुस्वारसंयुतः ॥

यद्वा (रुद्रयामले)।

विप्राणां प्रणवः सेतुः क्षत्रियाणां तथैव च ।
वैश्यानां तु फडर्णः स्यान्माया शूद्रस्य कथ्यते ॥
अजप्त्वा हृदि देवेशि यो वै मन्त्रं समुच्चरेत् ।
सर्वेषामेव मन्त्राणामधिकारो न तस्य हि ॥
महासेतुं च देवेशि सुन्दर्या भुवनेश्वरि ।
कालिकायाः स्वबीजं तु तारायाः कूर्चबीजकम् ॥

अन्यासां तु वधूबीजं महासेतुर्वरानने ।
आदौ जप्त्वा महासेतुं जपेन्मन्त्रमनन्यधीः ॥
धनैर्धनेशतुल्योऽसौ वाण्या वागीश्वरोपमः ।
बुद्धौ कृतान्तसदृशो नारीणां मदनोपमः ॥
जपकालो भवेत् तस्य सर्वकालो न संशयः ।

(मेरुतन्त्रे)

निःसेतुकं यथा तोयं क्षणान्निम्नं प्रसर्पति ।
मन्त्रस्तथैव निःसेतुः क्षणात् क्षरति यज्वनाम् ॥
तस्मात् सर्वत्र मन्त्रेषु चतुर्वर्णा द्विजादयः ।
पार्श्वयोः सेतुमादाय जपकर्म समाचरेत् ॥

अथ निर्वाणम् (रुद्रयामले)

अथ वक्ष्यामि निर्वाणं शृणु सावहिताऽनघे ।
प्रणवं पूर्वमुच्चार्य मातृकाद्यं समुच्चरेत् ॥
अथ मूलं महेशानि ततो वाग्भवमुच्चरेत् ।
मातृकां च समस्तां च पुनः प्रणवमुच्चरेत् ॥
एवं पुटितमूलं तु प्रजपेन्मणिपूरके ।
एवं निर्वाणमीशानि यो न जानाति पामरः ॥
वर्षकोटिशतेनापि सिद्धिस्तस्य न जायते ।
तस्मात् सर्वप्रयत्नेन यदुक्तं तन्महेश्वरि ॥
तत्तदाचार्यविधिवज्जपेन्मन्त्रमनुत्तमम् ।
ऋषिश्छन्दो देवता च बीजं शक्तिश्च कीलकम् ॥
भावयेद्यत्नतो देवि ततः स्वेष्टादिकं जपेत् ।
एवं यदि जपेन्मन्त्री मन्त्रराजमनुत्तमम् ॥

षण्मासात् सिद्धिमाप्नोति नात्र कार्या विचारणा ।
साक्षात् स एव जगतामधीशो नात्र संशयः ॥
स धन्यः स च विज्ञानी स एव मन्त्रतत्त्ववित् ।
स एव निर्वृतो भूमौ विहरेत् तु यथासुखम् ॥
तस्य दर्शनमात्रेण पलायन्ते च वैरिणः ।
एवं कृत्वा प्रणवपुटितं यो जपेन्मन्त्रराजं
    तन्निर्वाणं भुवनमहिते कुल्लुकानां च जप्त्वा ।
तेषां तद्वन्निखिलभुवनं सिद्धयोऽष्टौ च हस्ते
    स्नेहादुक्तं रहसि वचनं जन्मजन्मान्तरेषु ॥

अथ जिह्वाशोधनमन्त्रः (यामले) ।

अपरैकं प्रवक्ष्यामि जिह्वाशोधनमुत्तमम् ।
यन्न कृत्वा महादेवि जपपजा वृथा भवेत् ॥
अशुद्धजिह्वया देवि यो जपेत् स तु पापकृत् ।
तस्मात् सर्वप्रयत्नेनन जिह्वाशोधनमाचरेत् ॥
श्रीदेव्युवाच ।
देवदेव महादेव शूलपाणे पिनाकधृक् ।
पृथक्पृथङ्महादेव कथयस्व दयानिधे ॥
शोधनं सर्वविद्यानां मुखस्य शोधनं शुभम् ।
श्रीशिव उवाच ।
श्रीबीजं प्रणवं लक्ष्मीतारं श्रीप्रणवं तथा ।
इदं षडक्षरी विद्या सुन्दर्या दशधा जपेत् ॥
भैरव्यां शृणु चार्वङ्गि मुखशोधनमुत्तमम् ।
प्रणवं च ह्सौँ बीजं प्रणवं सुरवन्दिते ॥

इमं हि त्र्यक्षरं मन्त्रं दशधा प्रथमं जपेत् ।
शृणु सुन्दरि श्यामाया मुखशोधनमुत्तमम् ॥
निजबीजत्रयं देवि प्रणवत्रितयं पुनः ।
कामत्रयं* वह्निविन्दुरतिबीजयुतं त्रिकम् ॥
एषा नवाक्षरी विद्या जिह्वाशोधनकारिणी ।
तारायाः शृणु चार्वङ्गि अपूर्वं मुखशोधनम् ॥
जीविनी भुवना लज्जा भुवनेशी ततः प्रिये ।
त्र्यक्षरीयं महाविद्या विज्ञेयाऽमृतवर्षिणी ॥
दुर्गायाः शृणु चार्वङ्गि मुखशोधनमुत्तमम् ।
द्वादशस्वरमुद्धृत्य विन्दुयुक्तं त्रिकं तथा ॥
अपरैकं प्रवक्ष्यामि वगलामुखशोधनम् ।
वाग्भवं भुवनेशानि वाग्बीजं सुरवन्दिते ॥
मातङ्ग्याः शोधनं देवि अङ्कुशं वाग्भवं तथा ।
बीजं चाङ्कुशमेताद्धि विज्ञेयं त्र्यक्षरीयकम् ॥
लक्ष्म्याश्च शोधनं देवि श्रीबीजं कमलानने ।
प्रणवं दान्तमुद्धृत्य वामकर्णविभूषितम् ॥
पुनः प्रणवमुद्धृत्य विज्ञेयं त्र्यक्षरी मता ।
वालादीनां च अन्यासां प्रणवं मुखशोधनम् ॥
स्त्रीशूद्राणां महेशानि औंकारेण तु शोधनम् ।
मुखशोधनमात्रेण जिह्वाऽमृतमयी भवेत् ॥
अन्यथा मलविड्युक्ता जिह्वा भवति सर्वदा ।
भक्षणे दूषिता जिह्वा मिथ्यावाक्येन दूषिता ॥

---

* कामाक्षरम् इति-२ पु. पा.।

कलहैर्दूषिता जिह्वा तत्कथं प्रजपेन्मनुम् ।
तच्छोधनमनाचार्य न जपेत् पामरः क्वचित् ॥
शैवशाक्तवैष्णवानां सर्वेषामप्यवश्यकम् ।
अन्यथा प्रजपेन्मन्त्रं मोहेन यदि भाविनि ॥
सर्वं तस्य वृथा देवि मन्त्रसिद्धिर्न जायते ।
अन्ते नरकमाप्नोति भवेत् साऽपि न चान्यथा ॥
देवो यदि जपेन्मन्त्रमकृत्वा मुखशोधनम् ।
पतनं तस्य वै देवि किं पुनर्मर्त्यवासिनाम् ॥

(गौतमीये)

पशुभावे स्थिता मन्त्राः केवला वर्णरूपिणः ।
स्वस्वध्वनिप्रोच्चरिताः प्रभुत्वं प्राप्नुवन्ति ते ॥
मन्त्राक्षराणि विण्मूत्रे प्रोतानि परिभावयेत् ।
तामेव परमव्योम्नि परमामृतसंज्ञके ॥
दर्शयेदात्मसद्भावं पूजाहोमादिभिर्विना ।

(रुद्रयामले)

जपं यस्य शृणोत्यन्यः स मन्त्रः शून्य उच्यते ।
ऋषिच्छन्दोदेवताभिः परित्यक्तो भुजङ्गमः ॥

अथ मन्त्राणामवयवज्ञानम् ।

तदुक्तं (विशुद्धेश्वरादौ)

मन्त्रं नीत्वा गुरोः पार्श्वे गुरुभक्तिपरायणः ।
मन्त्रश्रोत्रास्यहृन्नेत्रप्राणान् विज्ञाय तत्त्वतः ॥
यत्नाच्च कीलकं ज्ञात्वा कुर्यान्मन्त्रपुरस्क्रियाम् ।
मन्त्राणां प्रणवः श्रोत्रं मुखं रेफः प्रकीर्त्तितम् ॥
स्वराश्च चक्षुषी ज्ञेया मन्त्रविद्भिरनन्तरम् ।
अतिरिक्ताश्च ये वर्णा हृदयं परिकीर्त्तितम् ॥

(भूतडामरयत्तडामरयोर्बीजकोशे)

श्रवणास्यहृदयनेत्रज्ञानान्मोक्षो मनोः सद्यः ।
सिद्धिः सर्वविधीनां स्यात् सात्ताच्छिव एव साधको वन्द्यः ॥
श्रोत्रादीनां ज्ञानाभावे मन्त्रस्य ग्रहणमात्रात् ।
दारिद्र्यं च विपत्तिर्नरकप्राप्तिरयशोवंशः ॥
दीनोऽतिदुःखभागी पराजितः शत्रुपीडितः शोकी ।
कुर्यादवस्थितचित्तो मन्त्री श्रोत्रादिविज्ञानम् ॥
स्वनातिभक्त्या श्रोत्रादीनां ज्ञानं गुरोर्भवति तदा ।
कृतकृत्यो लोकत्रयपूजितोऽनवद्यो मन्त्री ॥

तथा ।

लयश्रोत्रासृगास्या हृच्छून्याः सेनदृशस्वराः ।
गर्जिनोधूम्रभैरव्योरभावे तु दृशः स्मृताः ॥
मूलार्णं मुखमादिष्टं हृदयं स्वरशक्तयः ।
आदिमध्यावसानेषु पूर्वाभावे यथोत्तरम् ॥

तथा ।

सौरे तथा गाणपत्ये दौर्गे शैवेऽथ वैष्णवे ।
भौतिके च मनावास्यहृन्नेत्रं द्योतते यथा ॥
मूलाक्षरे विचारोऽयं मूलार्णं बीजमुच्यते ।
विषे विचारः कर्त्तव्यो बीजे सति विषान्विते ॥

तथा ।

एभिरशेषमन्त्राणां हृन्नेत्रवदनानि च ।
असवोऽस्य परिज्ञेयाः सर्वतन्त्रेषु गोपिताः ॥
बीजे रक्तमुखाः सर्वे मूलार्णं हृदयं स्वराः ।
दत्तवामदृशौ चण्डी विकला मध्यमानतः ॥

बीजाभावे मनोविद्युन्नेत्रमास्यं मनोहरा ।
मूलार्णो हृदयं दण्डी प्राणोऽपि स्वरशक्तयः ॥
चिन्तामणिनृसिंहाख्ये नेत्रास्यप्राणहृच्छ्रुती ।
यत्र बीजाक्षरं मन्त्रस्तत्र सर्वं स एव हि ॥
प्रधानपूर्वपरगा विकला यत्र दृश्यते ।
तत्र नेत्रं विजानीयान्मुखं च क्षतजोक्षितम् ॥
रक्तवर्जमनोर्मूलवर्णमास्यं प्रकल्पितम् ।
विद्युन्नेत्रं विनिर्दिष्टं विकला चण्डवर्जिते ॥
विद्युदेवास्यहृन्नेत्रं हृद्वक्त्रप्राणवर्जिते ।
श्रोत्रहीनो मनुः कायक्लेशदो विघ्नकारकः ॥

तथा ।

हृदये मूर्त्तिमास्थाय दृढचित्तः समाहितः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥
मनो हृत्वेन्द्रियार्थाच्च सर्वभावेन साधकः ।
पश्यतीति लयश्रोत्रं नान्यथा शृणुयात् ततः ॥

असृक् रेफः । शून्यं हकारः । सेनो विसर्गः । गर्जिनी इकारः । धूम्रभैरवी ईकारः विषं प्रणवः । रक्तं रेफः । चण्डी विसर्गः । विकलाऽनुस्वारः । विद्युत् अकारः । मनोहरा स्वाहा । दण्डी यकारः । चिन्तामणिबीजं नृसिंहबीजं चाग्रे वक्ष्यते । क्षतजोक्षितं रेफः ।

देवतामन्त्रयोर्वाच्यवाचकभाव उक्तस्तन्त्रान्तरे ।

वाच्यवाचकभावेन सर्वे मन्त्राः प्रतिष्ठिताः ।
यद्देवताया यो मन्त्रः सा वाच्या स च वाचकः ॥

अथ जपप्रारम्भः ।

(मेरुतन्त्रे)

गुरुं गणपतिं दुर्गां मातॄर्नत्वा च पूजनम् ।
कृत्वा स्वमूलमन्त्रेण प्राणायामत्रयं चरेत् ॥

कृत्वा ऋष्यादिविन्यासं मन्त्रन्यासं तथैव च ।
ध्यायेच्च हृदये देवं पात्रे संस्थाप्य मालिकाम् ॥
(उत्तरतन्त्रे)
जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः ।
विधाय मण्डलस्थां तां सव्यहस्तगतां च वा ॥
इष्टमन्त्रेण मालायाः प्रोक्षणं परिकीर्त्तितम् ।
(मेरुतन्त्रे)
अर्घ्योदकेन संप्रोक्ष्य ततस्तां प्रार्थयेदिति ।
ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ॥
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ।
पूजयित्वा ततो मालां गृह्णीयाद्दक्षिणे करे ॥
बीजं गणपतेः पूर्वमुच्चार्य तदनन्तरम् ।
अविघ्नं कुरु माले त्वां गृह्णीयात् तदनन्तरम् ॥
हस्ते च दक्षिणे पश्चाच्चिन्तयेन्मनसा शिवम् ।
चिन्तयेच्च गुरुं मूर्ध्नि यथा वर्णादिकं भवेत् ॥
मन्त्रं ध्यायेत् कण्ठमध्ये पीतवर्णं हिरण्मयम् ।
महामायां च हृदये स्वात्मानं गुरुपादयोः ॥
आज्ञाचक्रे ततः पश्चाद्गुरोर्मन्त्रस्य चात्मनः ।
देव्याश्चाप्येकतां नीत्वा सुषुम्णावर्त्मना ततः ॥
तत्त्वस्वरूपमेकं तद्यच्चक्रं प्रतिलङ्घयेत् ।
षट्चक्रेऽपि महामायां क्षणं ध्यात्वा प्रयत्नतः ॥
लम्बयेन्मूलमन्त्रेण चादिषोडशचक्रकम् ।
आदिषोडशमध्यस्थां साधकानन्ददायिनीम् ॥
चिन्तयेत् साधको देवीं जपकर्म समारभेत् ।

भ्रुवोरुपरि नाडीनां तिसृणां व्रात उच्यते ॥
तद्व्रातं त्रिपथस्थानं षट्कोणं चतुरङ्गुलम् ।
रक्तश्च कुलयोगज्ञैराज्ञाचक्रमितीरितम् ॥
कण्ठे तिसृणां नाडीनां वेष्टनं विद्यते नृणाम् ।
सुषुम्णेडापिङ्गलानां षट्कोणं तत्षडङ्गुलम् ॥
तत्षट्चक्रमिति प्रोक्तं शुक्लं कण्ठस्य मध्यगम् ।
तिसृणामपि नाडीनां हृदये चैकता भवेत् ॥
तत्स्थानं षोडशारं स्यात् सप्ताङ्गुलप्रमाणतः ।
तत् पीतमुक्तं योगज्ञैरादिषोडशचक्रकम् ॥
ध्येयानामथ मन्त्राणां चिन्तितस्य जपस्य च ।
यस्मादाद्यं तु हृदयं तस्मादादि निगद्यते ॥

(क्रियासंग्रहे)

गुरुं च देवतां मन्त्रं तथा स्वात्मानमेव च ।
एकीभूतमिति ध्यायेदादिषोडशचक्रके ॥

(मेरुतन्त्रे)

एवं विचिन्त्य मध्याया मध्यभागे तु मालिकाम् ।
अस्पृशँस्तर्जनीं मालामङ्गुष्ठाग्रेण चालयेत् ॥
पूर्वं मन्त्रं जपन् यस्तु संस्पृशेदपरं मणिम् ।
अङ्गुष्ठेन भवेत् तस्य निष्फलं स जपः सदा ॥
मालां स्वहृदयासन्नां धृत्वा दक्षिणपाणिना ।
देवीं विचिन्तयन् जप्यं कुर्याद्वामेन न स्पृशेत् ॥
एकचित्तः प्रशान्तात्मा ह्यक्षसूत्रकरः शुचिः ।
भुग्नग्रीवोन्नतः शान्तः कण्डून्मीलनवर्जितः ॥
सविसर्गं समात्रं च सविन्दुं साक्षरं स्फुटम् ।

न द्रुतं वाऽपि विश्रान्तं क्रमान्मन्त्रं जपेत् सुधीः ॥

(यामले)

अतिद्रुतो* व्याधिहेतुरतिदीर्घो वसुक्षयः ।
अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥

(मेरुतन्त्रे)

तन्निष्ठस्तद्गतप्राणस्तच्चित्तस्तत्परायणः ।
तत्पदार्थानुसन्धानं कुर्वन्मन्त्रं शनैर्जपेत् ॥
जपाच्छ्रान्तः पुनर्ध्यायेद्ध्यानाच्छ्रान्तः पुनर्जपेत् ।
जपध्यानादियुक्तस्य क्षिप्रं मन्त्रः प्रसिध्यति ॥

सनत्कुमारः ।

मनः संहृत्य विषयान्मन्त्रार्थगतमानसः ।
न द्रुतं न विलम्बित्वं जपेन्मौक्तिकपङ्क्तिवत् ॥
जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ।
जिह्वोष्ठौ चालयेत् किंचिद्देवतागतमानसः ॥
किंचिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः ।
मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
वाचिकाल्लक्षगुणित उपांशुः परिकीर्त्तितः ।
उपांशोः कोटिगुणितो मानसस्तु प्रशस्यते ॥

तन्त्रान्तरे ।

मनसा यः स्मरेत् स्तोत्रं वचसा च मनुं जपेत् ।
उभयं निष्फलं याति भिन्नभाण्डोदकं यथा ॥

---

* अतिह्रस्वो-इति ३-४—५ पु. पा. ।

(कुलार्णवे)

मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः ।
वाचिको मारणे चैव प्रशस्तो जप ईरितः ॥

(मेरौ)

षट्कर्मकृद्वाचिकः स्यात् कायिकः सर्वसिद्धिकृत् ।
मानसः साधयेन्मोक्षं ततोऽन्यः क्षुद्रकर्मकृत् ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
जपात् सिद्धिर्जपात् सिद्धिर्जपात् सिद्धिर्न *दूरतः ॥
यथा धनेन सन्तुष्टो जायते क्षुल्लकः प्रभुः ।
तथैव वलिदानेन पूजया क्षुद्रदेवताः ॥
यथा महागुणैर्वश्यो जायते गुणवान् प्रभुः ।
तथाऽहं त्वं च विष्णुश्च जपादेव फलप्रदाः ॥

(पाद्मे)

यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः ॥

वैशम्पायनः ।

यज्जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा ।
जपो होमस्तथा दानं सर्वं तन्निष्फलं भवेत् ॥

(रुद्रयामले)

अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः ।
जनसंगौष्ठलौलश्च षड्भिर्मन्त्रो विनश्यति ॥
विश्वासास्तिक्यकरुणाश्रद्धानियमनिश्चयैः ।
सन्तोषैः शुद्धकर्मादिगुणैर्युक्तो जपेत् प्रिये ॥

---

* संशयः—४ पु पा.

सनत्कुमारः ।

कृत्वा जपं पुरा चैवं तेजोरूपं समर्पयेत् ।
देवस्य दक्षिणे हस्ते कुशपुष्पार्घवारिभिः ॥

शक्तिविषये तु

एवं जपं पुरा कृत्वा गन्धाक्षतकुशोदकैः ।
जपं समर्पयेद्देव्या वामहस्ते विचक्षणः ॥

इति (यामलादौ) प्रोक्तम् ।

तथा ।

न न्यूनं नाधिकं चापि जपं कुर्याद्दिने दिने ।
यदि कुर्यात् प्रमादात् तु नेष्टं फलमवाप्नुयात् ॥

(मेरुतन्त्रे)

जपान्तेऽष्टोत्तरशतं जप्त्वा शिरसि धारयेत् ।
मालामन्त्रस्तु ह्रीँ सिद्ध्यै नमः सम्प्रार्थयेदिति ॥
त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ।
शिवं कुरुष्व मे भद्रे यशोवीर्यं च वर्द्धय ॥
ग्रहणे स्थापने पूजायां प्रोक्तो मालिकामनुः ।
पश्चाक्षरस्ततो देवं स्वेष्टं सम्प्रार्थयेदिति ॥
गुह्यातिगुह्यगुप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादाज्जगत्पते ॥
मूलमन्त्रं समुच्चार्य देवहस्ते निवेदयेत् ।
तं जपं चार्घतोयेन मध्याह्ने समये त्विदम् ॥
तदूर्ध्वं पूर्ववत् स्नात्वा विशेषेण विधानवित् ।
न्यासावसानमखिलं कर्म कुर्यात् पुरोदितम् ॥
पूजाग्निहोमपर्यन्तं ततश्च जपमारभेत् ।
यावद्दिनावसानं तु भूयः स्नात्वा ततो द्विज ॥

२९

उपास्य पूर्ववत् सन्ध्यां देवं सम्पूजयेत् पुनः ।
विसृज्य भोजनं कुर्यात् सततं तारकोदये ॥
(यामले)
नक्तं हविष्यं भुञ्जीत पुरश्चरणकृन्नरः ।
नक्तपदार्थ उक्तो (भविष्ये) ।
मुहूर्त्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः ।
नक्षत्रदर्शनान्नक्तमहं मन्ये *नराधिप—इति ॥
अत्र सूर्यमन्त्रपुरश्चरण एव मुहुर्त्तोनदिने भोजनं कार्यम् ।
आत्मद्विगुणच्छायायां यदा सन्तिष्ठते रविः ।
सौरं नक्तं विजानीयादन्यत्र निशि भोजनम्—इति (मात्स्यात्) ॥
(मेरौ)
द्विजैस्तु भोजनं कार्यमुपस्तीर्याभिधार्य च ।
पावयेद्वैदिकैर्मन्त्रैः प्रोक्षणादिककर्मणा ॥
पुनर्मूलेन संमन्त्र्य भुञ्जीयाद्धृदयाणुना ।
मूलाभिमन्त्रितं तोयं भोजने तृषितः पिवेत् ॥
पलाशपत्रे भुञ्जीयान्मध्यपत्रविवर्जिते ।
तदभावे कदल्यां वा मधूके सर्जकेऽपि च ॥
भुक्त्वा शयीत शयने संशुद्धे वसुधातले ।
अहतास्तरणास्तीर्णे सदर्भशयने शुचौ ॥
मन्त्रिते मूलमन्त्रेण जितक्रोधो जितेन्द्रियः ।
अभीष्टदेवतां ध्यायन् प्राक्शिरस्को निशि स्वपेत् ॥
अर्धरात्रे समुत्थाय पादशौचं विधाय च ।
आचम्य देवं संस्मृत्य शीघ्रं सम्पूज्य पूर्ववत् ॥
जपं कुर्याद्यथाशक्तिरर्पयेच्च तथेश्वरे ।

---

* गणाधिप इति २ पु पा. ।

स्वपेत् ततस्तु यद्दृष्टं स्वप्नं तं गुरवे वदेत् ॥
जपश्चायं वनस्थानां प्रोक्तोऽयं ब्रह्मचारिणाम् ।
देशाद्युपद्रवत्रासात् त्वरया चेत् समापनम् ॥
कर्त्तव्यं चेदयं कालः प्रोक्तोऽत्यावश्यकेऽपि च ।
आमध्याह्नं जपः श्रेष्ठो मध्यमः प्रहरत्रयम् ॥
सार्धं यामत्रयं हीनोऽवश्यके प्रोक्तलक्षणः ।

वैशम्पायनः ।

कल्पोक्तैव कृते सङ्ख्या त्रेतायां द्विगुणा भवेत् ।
द्वापरे त्रिगुणा प्रोक्ता कलौ सङ्ख्या चतुर्गुणा ॥

(एकवीराकल्पे)

भावनारहितानां च शूद्राणां क्षुद्रचेतसाम् ।
चतुर्गुणो जपः प्रोक्तः सिद्धये नान्यथा भवेत् ॥

(वाराहीतन्त्रे)

एषां जपे च होमे च सङ्ख्या नोक्ता मनीषिभिः ।
तेषामष्टसहस्राणि सङ्ख्या स्याज्जपहोमयोः ॥

(क्रियासंग्रहे)

पूर्णायां जपसङ्ख्यायां विधिवत्संस्कृतानले ।
तैस्तैः कल्पोदितैर्द्रव्यैर्दशांशं हवनं चरेत् ॥
होमद्रव्येण विहिते सर्पिषा होममाचरेत् ।
होमव्यवस्था संप्रोक्ता पुरश्चरणसिद्धये ॥

होमार्थमग्निसंस्कारो होमविधिश्च दीक्षाविधौ विशदीकृत एवेति नेह वितन्यते ।

अथ तर्पणम् ।

(कुलार्णवे)

तर्पणं तु ततः कुर्यात् तीर्थोदैश्चन्द्रमिश्रितैः ।
जले देवं समावाह्य पाद्याद्यैरुदकात्मकैः ॥

संपूज्य विधिवद्भक्त्या परिवारसमन्वितम् ।
एकैकमञ्जलिं तोयं परिवारान् प्रतर्पयेत् ॥
ततो होमदशांशेन तर्पयेत् परदैवतम् ।

(पुरश्चरणचन्द्रिकायाम)

मूलमन्त्रं समुच्चार्य तदन्ते देवताभिधाम् ।
द्वितीयान्तामहं पश्चात् तर्पयामि नमोऽन्तकः ॥
तर्पणस्य मनुः प्रोक्तस्त्वङ्गादीनां च कल्पयेत् ।

शक्तिविषये तु (यामलादौ)

मन्त्रान्ते नाम चोच्चार्य तर्पयामि ततः परम् ।
वह्निजायान्तमन्त्रेण तर्पयेत् परदेवताम् ॥

तथा ।

मूलमन्त्रं समुच्चार्य मन्त्रान्ते देवताभिधाम् ।
तर्पयामि नमः प्रोच्य तर्पयेत् कुलनायिकाम् ॥

इति वह्निजायान्तनमोऽन्तयोर्विकल्पः। वैष्णवेऽपि नमोऽन्त एव तर्पणमन्त्रः ।

तदुक्तं (गौतमीये)

आदौ मन्त्रं समुच्चार्य श्रीपूर्वं कृष्णमित्यपि ।
तर्पयामि पदं चोक्त्वा नमोऽन्तं तर्पयेन्नरः ॥

तथा ।

तर्पयामि पदं योज्यं मन्त्रान्तेष्वेषु नामसु ।
द्वितीयान्तेषु चेत्येवं तर्पणस्य मनुर्मतः ॥

अथ मार्जनम् ।

(नीलतन्त्रे)

नमोऽन्तं मन्त्रमुच्चार्य तदन्ते देवताभिधाम् ।
द्वितीयान्तामहं पश्चादभिषिञ्चाम्यनेन तु ॥
अभिषिञ्चेत् स्वमूर्धानं तोयैः कुम्भाख्यमुद्रया ।

वैशम्पायनः ।

तर्पणस्य दशांशेन नमोन्तं मन्त्रमुच्चरन् ।
अभिषिञ्चेत् स्वमूर्धानं जलैः कुम्भाख्यमुद्रया ॥

अन्यत्रापि ।

मन्त्रान्ते नाम चोच्चार्य सिञ्चामीति नमः पदम् ।

अत्र मूलमन्त्रमुच्चार्य—

अमुकदेवतामभिषिञ्चामि नमः——इति योजयन्ति ।

अथ ब्राह्मणभोजनम् ।

(पुरश्चरणचन्द्रिकायाम्)

मार्जनस्य दशांशेन ब्राह्मणानपि भोजयेत् ।
ब्राह्मणामन्त्रणं कृत्वा भक्ष्यं संपाद्य षड्रसम् ॥
समावाह्यासनं दद्यान्मूलेनैवेष्टदेवताम् ।
ध्यात्वा चावाहनं कुर्याद्ब्राह्मणाँश्च यथोदितान् ॥
पाद्याद्यैरर्चयादिष्टदेवतारूपभूसुरान् ।
भक्षैर्नानारसोपेतैर्भोजयेद्देवताधिया ॥

(मेरुतन्त्रे)

विप्राराधनमात्रेण व्यङ्गं साङ्गं प्रजायते ।
यानि यान्यपि कर्माणि हीयन्ते द्विजभोजनैः ॥
निरर्थकानि तानि स्युर्बीजान्युषरगाणि च ।
गुरुं सन्तोषयेत् पश्चाद्गोहिरण्याम्बरादिभिः ॥
गुरौ तुष्टे हि सन्तुष्टो मन्त्रः सिद्ध्यति मन्त्रिणः ।

तन्त्रान्तरे ।

गुरवे दक्षिणां दद्याद्भोजनाच्छाजनादिभिः ।
गुरुसन्तोषमात्रेण सर्वसिद्धिर्भवेद्ध्रुवम् ॥
गुरुमूलमिदं सर्वमित्याहुस्तन्त्रवेदिनः ।

(मेरुतन्त्रे)

पञ्चधाऽत्र विधिः प्रोक्तो जपसम्पूर्णकारकः ।
आद्यः कल्पः प्रतिदिनमामध्याह्नं जपं चरेत् ॥
तद्दशांशेन कल्पोक्तं द्रव्यैर्होमं प्रकल्पयेत् ।
तर्पणं मार्जनं कृत्वा तथा ब्राह्मणभोजनम् ॥
तद्दशांशं ततश्चायं प्रथमः कल्प ईरितः ।
अयं द्वितीयः कल्पस्तु लक्षमेकं जपं चरेत् ॥
होमादिकं तस्य कृत्वाऽग्रिमं लक्षं समारभेत् ।
अयं तृतीयः कल्पस्तु सम्पूर्णजपमाचरेत् ॥
पूर्णहोमे तर्पणादिपूर्वमेवाचरेदिति ।
चतुर्थस्तु तथा कल्पो दारिद्रैर्द्विगुणो जपः ॥
होमाद्यभावे कर्त्तव्यस्त्र्यादिनिघ्नैर्नृपादिकैः ।
पञ्चमस्तु तथा कल्पो यस्य देवस्य यत् प्रियम् ॥
तदेव द्विगुणं कार्यं शीघ्रं दैवततुष्टये ।
जपप्रियाः सर्वदेव्यो वाममार्गे वलिप्रियाः ॥
पानप्रियास्तु सिद्धान्ते कौलिके तु रतिप्रियाः ।
होमप्रियो महादेवो भास्करस्तर्पणप्रियः ॥
मार्जनं तु गणेशस्य विष्णोर्ब्राह्मणभोजनम् ।
प्रायश्चित्तं तु न कृतं तदाऽशुद्धो भवेद्द्विजः ॥
प्रायश्चितचतुष्केण द्विजाद्यैः क्षत्रियादिकाः ।

(यामले)

होमकर्माद्यसक्तानां विप्राणां द्विगुणो जपः ।
इतरेषां तु वर्णानां त्रिचतुष्पञ्चसङ्ख्यया ॥

द्वैगुण्यादिहोमाद्यपत्त एव ।

सनत्कुमारः ।

यद्यदङ्गं भवेद्भङ्गं तत्सङ्ख्याद्विगुणो जपः ।
होमाभावे जपः कार्यो होमसंख्याचतुर्गुणः ॥
विप्राणां क्षत्रियाणां च रससंख्यागुणः स्मृतः ।
वैश्यानां वसुसङ्ख्याकमेषां स्त्रीणामयं विधिः ॥
यं वर्णमाश्रितः शूद्रः स च तस्य विधिं चरेत् ।

तन्त्रान्तरे ।

होमाभावे द्विजानां च यः प्रोक्तः सूरिभिर्जपः ।
तत्सुश्रुवाश्च तद्भक्ताः शूद्राणां च स एव हि ॥

(मेरुतन्त्रे)

अथ वक्ष्ये दरिद्रस्य मन्त्रसिद्धिर्यथा भवेत् ।
होमकर्मण्यशक्तस्य विप्रस्य द्विगुणो जपः ॥
इतरेषां तु वर्णानां त्रिगुणादि विधीयते ।
होमद्विगुणजपेन सम्पूर्णतर्पणं भवेत् ॥
अकृते मार्जने प्रोक्तं तर्पणद्विगुणो जपः ।
प्रत्याम्नाये ब्रह्मभोज्यो न कुत्रापि मया श्रुतः ॥
सर्वथा भोजयेद्विप्रान् कृतसाङ्गत्वसिद्धये ।

अत्र ।

स्त्रीशूद्राभ्यां न होतव्यं मन्त्रोच्चारणपूर्वकम्—इति वचनात् ।

स्त्रीशूद्रयोस्तु होमस्थाने यथोक्तजप एव न तु शक्तावपि होम इति सुधार्णवकृतः ।

तथा च (नारदपञ्चरात्रे) ।

त्रयाणामेव वर्णानां होमविधिरुदीरितः ।
शूद्रस्तु तत्फलाकाङ्क्षी होमात् तद्द्विगुणं जपेत् ॥

(क्रियासंग्रहे)

होमस्तु ब्राह्मणद्वारा स्त्रीशूद्राणां निगद्यते ।
होमसङ्ख्यापञ्चगुणं द्विगुणं वा जपं चरेत् ॥

(वाराहीतन्त्रे तु)

शूद्राणामधिकारोऽस्मिँस्तान्त्रिके होमकर्मणि ।
वह्निजायां परित्यज्य स्वाहान्ते च नमो मतः—इत्युक्तम् ॥

तन्त्रान्तरे ।

पुरश्चरण आरब्धे सूतकादिः पतेत चेत् ।
आरब्धं न परित्याज्यमन्यथा दोषभाग्भवेत् ॥

तथा च (स्मृतौ)

यज्ञव्रतविवाहेषु श्राद्धे होमेऽर्चने जपे ।
आरब्धे सूतकं न स्यादनारम्भे च सूतकम् ॥
प्रारम्भो वरणं यज्ञे संकल्पो व्रतजाप्ययोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिष्क्रिया ॥

तन्त्रेऽपि ।

जपो दीक्षार्चनविधिः कार्यो दीक्षान्वितैर्नरैः ।
नास्ति पापं यतस्तेषां सूतकं वा यतात्मनाम् ॥
सूतके मृतके चैव धूमोद्गारादिके तथा ।
जपं चार्घं तथा कुर्यान्मन्त्रन्यासपुरःसरम् ॥

(पुरश्चरणचन्द्रिकायाम्)

पुरश्चर्यां विधायेत्थं सम्यक् साधकसत्तमः ।
तदन्ते महतीं पूजां कुर्याद्ब्राह्मणभोजनम् ॥
बहुभिर्वस्त्रभूषाभिः पूजयेद्गुरुमात्मनः ।
दीपनाथाँश्च सन्तोष्य मन्त्राः सिद्ध्यन्ति मन्त्रिणाम् ॥

होमाङ्गनिरूपणम् ।

जपहोमार्चनैर्मन्त्रा नियतस्यास्य सिद्धिदाः ।

जपेन द्विगुणेनापि मनवः सिद्धिदाः स्मृताः ॥

(रुद्रयामले)

भोजनेन विना देवीतर्पणेन विना पुनः ।
होमेनापि विना सिद्ध्यै मन्त्राणां त्रिगुणं जपेत् ॥

(अगस्त्यसंहितायाम्)

सम्यक्सिद्धैकमन्त्रस्य पञ्चाङ्गोपाशनेन च ।
सर्वे मन्त्राः प्रसिद्ध्यन्ति त्वत्प्रसादान्महेश्वरि ॥

तन्त्रान्तरे ।

दुर्लभं त्रिषु लोकेषु सिद्धमन्त्रस्य मन्त्रिणाम् ।
न किंचिदस्ति देवेशि तस्मान्मन्त्रं प्रसाधयेत् ॥

अन्यत्रापि ।

श्रेयांसि बहुविघ्नानि कथितानि मनीषिभिः ।
तस्माद्विघ्नानि निर्जित्य मन्त्रसाधनमाचरेत् ॥
ततः सिद्धमनुर्मन्त्री साधयेत् स्वमनोरथान् ।

(मेरुतन्त्रे)

एकस्मिन् साधिते कार्ये मन्त्रो याति सकुण्ठताम् ।
तावज्जपं पुनः कृत्वा चैककार्यक्षमो भवेत् ॥

तत्रैव ।

मन्त्रान्तरे च संसिद्धो गुरुर्मन्त्रं प्रयच्छति ।
यथोक्ताचरणात् तस्य सिद्धिः शिष्यस्य जायते ॥
कृपा च स्यात् सिद्धमन्त्रं ददाति च यथा गुरुः ।
विना जपं विना पूजां सिद्धयस्तत्करे स्थिताः ॥

(क्रियासंग्रहे)

गुरौ च देवतायां च भक्तिरव्यभिचारिणी ।
मन्त्रे शास्त्रे च विश्वासः सिद्धेर्बीजं विदुर्बुधाः ॥

(प्रत्यङ्गिराकल्पे)

भक्तिमारुतनुन्नेन पुरश्चरणवह्निना ।
दग्धे पापेन्धनव्यूहे मन्त्राः सिद्ध्यन्ति मन्त्रिणाम् ॥

इति सामान्यपुरश्चरणविधिः।

विभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत-
  स्रोतःशालिनि सन्निबन्धनसरित्संभेदमभ्यर्हितम् ।
षष्ठः श्रीनरदेवनिर्मितपुरश्चर्यार्णवे प्रस्फुरन्
  सद्युक्तिस्फुटमौक्तिकोत्कररुचोत्तङ्गस्तरङ्गो गतः ॥

इति श्रीमन्महाराजाधिराजश्रीप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे सामान्यपुरश्चरणविधिर्नाम षष्ठस्तरङ्गः ॥

* * *

मन्त्रसिद्धिलक्षणम् ।

अथ पुरश्चरणभेदमन्त्रसिद्धिलक्षणादिषु नीरूपणीयेषु सूचीकटाहन्यायेन मन्त्रसिद्धिलक्षणमादौ निरूप्यते ।

तदुक्तं (पञ्चरात्रे)

अथातः संप्रवक्ष्यामि मन्त्रसिद्धेस्तु लक्षणम् ।
मनोरथानामक्लेशे सिद्धिरुत्तमलक्षणम् ॥
मृत्यूनां हरणं तद्वद्देवतादर्शनं तथा ।
प्रयोगानां क्लेशसिद्धिः सिद्धेस्तु लक्षणं तथा ॥

तथा ।

परकायप्रवेशश्च पुरप्रवेशनं तथा ।
ऊर्ध्वोत्क्रमणमेवं हि चराचरपुरे गतिः ॥
खेचरीमेलनं चैव तत्कथाश्रवणादिकम् ।
भूच्छिद्राणि प्रपश्येत् तु तस्मादुत्तमलक्षणम् ॥
स्मरणे कीर्त्तने विष्णोरानन्दाश्रुविमोचनम् ।
रोमाञ्चोद्गद्गदालापश्चित्तस्यैकाग्रता तथा ॥
विषयेषु च वैराग्यं प्रीतिश्च परमेश्वरे ।
तत्कथाश्रवणौत्सुक्यं तत्पादसेवने रतिः ॥
तद्गुणस्तुतिकाव्यानामविलम्बितकर्त्तृता ।
तत्पादाम्बुजचिह्नानां दर्शनं पूजनादिषु ॥
अनाहतस्य शब्दस्य भवेदाकस्मिकी श्रुतिः ।
विनाऽपि योगाभ्यसनं चैतदुत्तमलक्षणम् ॥
ख्यातिर्वाहनभूषादिलाभः सुचिरजीवनम् ।

नृपाणां तद्गतानां च वशीकरणमुत्तमम् ॥
सर्वत्र सर्वलोकेषु चमत्कारकरः शुचिः ।
रोगापहरणं दृष्ट्या विषापहरणं तथा ॥
पाण्डित्यं लभते मन्त्री चतुर्विधमयत्नतः ।
वैराग्यं च मुमुक्षुत्वं त्यागिता सर्ववश्यता ॥
अष्टाङ्गयोगाभ्यसनं भोगेच्छापरिवर्जितम् ।
सर्वभूतेष्वनुकम्पा सार्वज्ञादिगुणोदयः ॥
इत्यादिगुणसंपत्तिर्मध्यसिद्धेस्तु लक्षणम् ।
ख्यातिर्वाहनभूषादिलाभः सुचिरजीवनम् ॥
नृणामङ्गनानां च वात्सल्यं लोकवश्यता ।
महैश्वर्यं धनित्वं च पुत्रादिधनसंपदः ॥
अधमाः सिद्धयः प्रोक्ता मन्त्रिप्रथमभूमिकाः ।
सिद्धमन्त्रस्तु यः साक्षात् स शिवो नात्र संशयः ॥
(साधनसमुच्चये)
सिद्धो यस्य महामन्त्रः साधनेन बलीयसा ।
देवानामपि दुष्प्रापाः सिद्धयस्तत्करे स्थिताः ॥
दिक्करी खेचरी सिद्धिः पादुकासिद्धिरेव च ।
अन्तर्द्धिसिद्धिर्वैतालसिद्धिः कायप्रवेशनम् ॥
यक्षिणी भैरवीसिद्धिः खड्गसिद्धिस्तथैव च ।
आज्ञासिद्धिर्धातुवादगुटिकाञ्जनसिद्धयः ॥
आकर्षणवशीकारौ द्रावणं मोहनं तथा ।
उच्चाटनं स्तम्भनं च द्वेषणं मारणं तथा ॥
उन्मादनं शोषणं च मूर्छनं क्षोभणं तथा ।
ग्रहाणां च गतिस्तम्भं वेगस्तम्भं नभस्वतः ॥

नदीमहार्णवस्तम्भं वाक्स्तम्भं प्रतिवादिनाम् ।
गन्धर्वोरगदैत्यानां किन्नराणां च रक्षसाम् ॥
सिद्धविद्याधरादीनां कन्यकाकर्षणं तथा ।
नृपाणां देवतानां च क्षणादाकर्षणं भवेत् ॥
शीतलीकरणं वह्नेः सर्पाणां निर्विषीक्रिया ।
शोषणं सागरस्यापि त्रैलोक्यस्य वशीकृतिः ॥
अमोघवचनत्वं च शापे चानुग्रहे तथा ।
कामरूपं कामगतिः कामदातृत्वमेव च ॥
अणिमा महिमा चैव गरिमा लघिमा तथा ।
ईशित्वं च वशित्वं च प्राकाम्यं प्राप्तिरेव च ॥
इत्याद्याः सिद्धयः सर्वा जायन्ते नात्र संशयः ।
बहुनाऽत्र किमुक्तेन सिद्धमन्त्रस्य मन्त्रिणः ॥
यद्यदिष्टं च तत्सर्वं करामलकवद्भवेत् ।

(नारदपञ्चरात्रे)

मन्त्राराधनशक्तस्य प्रथमे वत्सरत्रये ।
जायन्ते बहवो विघ्ना नियमस्थस्य नारद ॥
नोद्वेगं साधको याति कर्मणा मनसा यदि ।
तृतीयवत्सरादूर्ध्वं राजानश्च महीभृतः ॥
प्रार्थयन्तेऽनुरोधेन गर्विता अपि मानिनः ।
प्रसादः क्रियतां नाथ ममोद्धारणकारणम् ॥
प्रज्वलन्तं च पश्यन्ति तेजसा विभवेन च ।
अतस्ते मुनिशार्दूल निष्ठुरं वक्तुमक्षमाः ॥
नवमाद्वत्सरादूर्ध्वं स्वयं सिद्ध्यति मन्त्रराट् ।

नानाश्चर्याणि हृदये मन्त्रसिद्धिमयानि वै ॥
अत्यानन्दप्रदान्याशु प्रत्यक्षेण बहिस्तथा ।
जडधीस्तु क्षणं विप्रः क्षणमस्ति प्रहर्षितः ॥
क्षणं दुन्दुभिनिर्घोषं शृणोत्यप्यन्तरिक्षगम् ।
क्षणं च मधुरं वाद्यं नानागीतसमन्वितम् ॥
आजिघ्रति क्षणं गन्धान् कर्पूरमृगनाभिजान् ।
उत्पतन्तं क्षणं वाऽपि पश्यत्यात्मानमात्मना ॥
चन्द्रार्ककिरणाकीर्णं क्षणमालोकयन् नभः ।
गजगोवृषनादांश्च शृणुयाच्च क्षणं द्विजः ॥
निर्भराम्बुदसंक्षोभं क्षणमाकर्षयत्यपि ।
तारकाणि विचित्राणि योगिनो नभसि स्थितान् ॥
पश्यत्युद्ग्राहयन्तं च क्षणं मन्त्रवतां सदा ।
क्षणं किलिकिलारावं हंसवर्हिरवं तथा ॥
क्षणं मेघोदयं पश्येत् क्षणं रात्रिं दिने सति ।
रात्रौ च दिवसालोकं ससूर्यं क्षणमीक्षते ॥
बलेन परिपूर्णश्च तेजसा भास्करोपमः ।
पूर्णेन्दुसदृशः कान्त्या गमने विहगोपमः ॥
शमेन युक्तः प्रौढेन गाम्भीर्येण सुखेन च ।
स्वल्पाशनेनाकृशता बहुनाऽपि निखिद्यते ॥
विण्मूत्रयोरल्पता हि भवेन्निद्राक्षयस्तथा ।
जपध्यानगतो मन्त्री न खेदमधिगच्छति ॥
विना भोजनपानाभ्यां पक्षमासादिकं मुने ।
इत्येवमादिभिश्चिह्नैर्महाविस्मयकारिभिः ॥
प्रवृत्तैः संप्रबोद्धव्यं प्रसन्नो मन्त्रराडिति ।

बौधायनः ।

सिद्धेस्तु त्रीणि चिह्नानि दाता भोक्ता अयाचकः ।

(भैरवीतन्त्रे)

ज्योतिः पश्यति सर्वत्र शरीरं वा प्रकाशयुक् ।
निजं शरीरमथ वा देवतामयमेव हि ॥

(वक्रतुण्डकल्पे)

चित्तप्रसादो मनसश्च तुष्टि-
रल्पाशिता स्वप्नपराङ्मुखत्वम् ।
स्वप्नेषु यानाद्युपलम्भनं तु
सिद्धस्य चिह्नानि भवन्ति सद्यः ॥

(मेरुतन्त्रे)

एवं सिद्धे मनौ देवा मोक्षमार्गनिरोधकाः ।
तपःक्षयकराश्चैव जायन्तेऽनेकसिद्धयः ॥
स्वल्पसिद्धौ निमग्नश्चेन्न जायन्तेऽणिमादयः ।
अणिमादिनिमग्नश्चेन्मोक्षवार्त्ताऽतिदुर्लभा ॥

(नारसिंहेऽपि)

यथा स्वल्पसुखे मग्नो न प्राप्नोति महत् सुखम् ।
तथा सिद्धौ निमग्नस्य मुक्तिर्दूरे प्रवर्त्तते ॥
तस्मात् सिद्धीस्तृणीकृत्य भजेन्नृहरिपादुकाम् ।
अखण्डैकरसानन्दं ततः प्राप्नोति नान्यथा ॥
पुरश्चरणसामर्थ्यात् सर्वसिद्ध्याश्रयोऽपि सन् ।
न त्याज्या भगवद्भक्तिः साधकैर्मुक्तिकामुकैः ॥
बुभुक्षवः सन्त्यनेके के चित् सन्ति मुमुक्षवः ।
भोगमोक्षनिराकाङ्क्षी विरलो भजते हरिम् ॥
स एव जीवन्मुक्तः स्यान्नारायणमनामयम् ।

सिद्धौ सत्यामसत्यां च भजते योगनिस्पृहः ॥
(मेरुतन्त्रे)
अल्पं तपः क्षणान्नश्येन्मध्यमं चापि गर्वतः ।
सिद्धिद्वारा महत् तस्य चिह्नं लक्षणमुच्यते ॥
स्वप्ने वाऽक्षिसमक्षं वा आश्चर्यमिति हर्षदम् ।
अकस्माद्यदि जायेत नाख्यातव्यं गुरोर्विना ॥
प्रकाशनीयं न क्वापि ऐहिकीं सिद्धिमिच्छता ।
प्रकाशयति यो मोहादौत्सुक्यान्मन्त्रजं सुखम् ॥
निकटस्थाश्च तास्तस्य सिद्धयो यान्ति दूरतः ।
आविर्भवन्ति दुःखानि शोकाश्च विविधा अपि ॥
अल्पाशनं स्वल्पनिद्रा सदा चित्तप्रसन्नता ।
प्रकाशयुक् शरिरं च वाक्यं सत्यं प्रजायते ॥
तथा ।
वाङ्मनोरथसंसिद्धो दाता भोक्ता अयाचकः ।
(प्रपञ्चसारे)
ततोऽस्य प्रत्ययास्त्वेवं जायन्ते जपतो मनुम् ।
अधिष्ठितं निश्यदीपं निस्तमिश्रं गृहं भवेत् ॥
अर्काभस्तेजसाऽसौ भवति नलिनजा सन्ततं किङ्करी स्याद्-
रोगा नश्यन्ति दृष्ट्या द्रुतमथ धनधान्याकुलस्तत्समीपम् ।
देवा नित्यं नमोऽस्मै विदधति फणिनो नैव दंशन्ति पुत्रान्
पौत्रान् मित्राणि वृद्धाँस्तनुविपादि परं धाम विष्णोः प्रयाति ॥
इति सिद्धिचिह्नानि ।
(फेत्कारिणीतन्त्रे)
कर्मणा प्रबलेनैव प्रतिबन्धाविरोधिना ।
यदि सिद्धिं न लभते द्विस्त्रिर्वा पुनराचरेत् ॥

अथ द्वित्रैरपि पुरश्चरणैर्मन्त्राणामसिद्धौ तत्सिद्ध्यर्थमुपायानाह ।
(मेरुतन्त्रे)

असिद्धत्वाद्गुरोर्दैवात् शिष्ये सिद्धिर्न जायते ।
तदोपायं प्रकुर्याद्धि यद्गोप्यमधुनोच्यते ॥
अनुलोमविलोमेन विन्दुवन्मातृकाक्षरैः ।
जपेत् संपुटितं मन्त्रं प्रत्यहं शतसङ्ख्यया ॥
एकमासं ततो होमादिकात् सिद्धो भवेन्मनुः ।
पुरश्चर्योक्तमखिलमाह्निकं च समाचरेत् ॥

वैदिकमन्त्रे तु विशेष उक्तस्तत्रैव ।

एवं वैदिकमन्त्रस्य सिद्धयेऽद्रिरसार्णकाः ।
वर्णा देया विन्दुयुक्ताः क्रमतश्चोत्क्रमेण च ॥
ह्रस्वदीर्घप्लुतैर्भेदैर-इ-उ-ऋ त्रिधा मताः ।
ह्रस्वः प्लुतो लृद्विविध एचोऽपि द्विविधा मताः ॥
दीर्घप्लुतविभेदेन ह्यनुस्वारो विसर्गकः ।
चतुर्विंशतिराख्याताः स्वरा एवं यमैः सह ॥
चत्वारः कादिका वर्णा जिह्वामूलीययुक् च कः ।
एवं कवर्गो दशधा चाद्याः पञ्चदश स्मृताः ॥
उपध्मानीयसंयुक्तः पकारस्तेन तत्र षट् ।
याद्यष्टाविति संप्रोक्ता यजुर्वेदे तु मातृकाः ॥
लक्षौ द्वावधिकौ ऋक्षु* ज्ञोऽधिकोऽथर्वणि स्मृतः ।
जपश्चाष्टोत्तरशतं प्रत्यहं मासमात्रकम् ॥
अनध्यायं वर्जयित्वा चत्वारिंशद्दिनं तथा ।
होमादिसकलं प्राग्वन्नित्यमेवं प्रकल्पयेत् ॥

---

* ऋग्वेदेषु—इति ।

उपायन्तरमाह तत्रैव ।

कुलदैवतमन्त्रं तु भूतलिप्या पुटीकुरु ।
क्रमोत्क्रमाच्छतावृत्तिं कुर्यात् सिद्धिस्तु मासतः ॥

तथा ।

अत्युग्रदेवताजप्यस्त्वष्टोत्तरसहस्रकम् ।
त्रिकालं गन्धपुष्पाद्यैर्निशीथे पञ्चमैः पुनः ॥
षण्मासं कौलिकाद्यैश्चेदर्चिता सुप्रसीदति ।

भूतलिपिरग्रे वक्ष्यते ।

अथोपायान्तराणि ।

(गन्धर्वतन्त्रे)

अनुष्ठितो यथान्यायं यदि मन्त्रो न सिद्ध्यति ।
पुनस्तावत् प्रजप्तव्यस्ततः सिद्धो भवेत् पुनः ॥
पुनश्चानुष्ठितो मन्त्रो यदि सिद्धो न जायते ।
उपायास्तत्र कर्त्तव्याः सप्त शङ्करभाषिताः ॥

(मेरुतन्त्रे)

ब्रह्मद्वेषाद्गुरोर्दोषात् स्त्रीद्वेषाच्चेन्न जायते ।
शापतो वाऽकीलितत्वात् तत्रोपायाष्टकं भवेत् ॥
संपाताप्यायनं द्रावो बोधनं च वशीकृतिः ।
पीडनं पोषशोषौ च दहनं तत्क्रियोच्यते ॥
भूर्जपत्रं समानीय पद्ममष्टदलं लिखेत् ।
अष्टगन्धेन देवस्य रोचनाचन्दनेन वा ॥
साधकस्य तु नामार्णैर्मन्त्रसंदर्भितं लिखेत् ।
यावद्द्वयोः समाप्तिः स्यात् तस्य चाद्यन्तयोर्लिखेत् ॥
तारादिकं साधकस्य नामाथाष्टदलेषु तु ।
द्वौ द्वौ लेख्यौ स्वरौ तच्च सम्यक् ध्यायन् सुधात्मकम् ॥
तत् संवेष्ट्य मृदा सम्यग्वेष्टयेद्ब्राह्मणादिकम् ।

शुक्लादिवर्णाया पश्चात् सिक्थकेन च वेष्टयेत् ॥
क्षिपेत् त्रिमधुरे तत् तु मृण्मये लघुभाजने ।
क्षीरपूर्णे नवे कुम्भे तत् क्षिपेल्लघुभाजनै ॥
अग्निं संस्थापितं कृत्वा सन्निधौ तस्य तं घटम् ।
संस्थापयेत् त्रिमधुरैर्मूलमन्त्रेण होमयेत् ॥
अष्टादिकसहस्रं तु संपातं कलशे क्षिपेत् ।
होमं समाप्य तं कुम्भं निःक्षिपेच्च जलाशये ॥
स्वगुरुं ब्राह्मणाँश्चान्याँस्तोषयेद्दक्षिणादिभिः ।
संपाताप्यायनं चैतदुक्तं सिद्धिर्न चेद्भवेत् ॥
द्रावणं तु तदा कुर्यात् तत्प्रकार इहोच्यते ।
वँ बीजेन ग्रन्थयित्वा भूर्जपत्रे लिखेन्मनुम् ॥
उशीररोचनाभ्यां च शिलाकर्पूरकुङ्कुमैः ।
क्षीराज्यमधुतोयानां मध्ये तं लिखितं क्षिपेत् ॥
पूजनाच्च जपाद्धोमाद्द्रावितः फलदो भवेत् ।
द्रावितोऽपि न सिद्धश्चेद्बोधनं तस्य कारयेत् ॥
वाग्भवेन च बीजेन संपुटीकृत्य तं जपेत् ।
एवं बुद्धो भवेत् सिद्धो नो चेत् कुर्यात् वशीकृतिम् ॥
कुचन्दनमहादारुहरिद्रामदनीशिलाः ।
एतैस्तु लिखितो मन्त्रो भूर्जपत्रे सुशोभने ॥
कण्ठे धृतो भवेद्वश्यो नो चेत् कुर्यात् प्रपीडनम् ।
अनुदात्तस्वरेणाद्यमुदात्तेन द्वितीयकम् ॥
तृतीयमनुदात्तेन पठेत् तुर्यमुदात्ततः ।
एवं पदानि सर्वाणि पठेन्मन्त्रस्य साधकः ॥

अनुदात्तपदोच्चारे देवं ध्यायेदधःस्थितम् ।
ऊर्ध्वस्थितमुदात्तस्योच्चारेऽष्टाधिसहस्रकम् ॥
जपेन्मन्त्रं ततो भूर्जे भानुदुग्धेन लेखयेत् ।
मन्त्रं तमाक्रमेद्वामपादेनाथ च होमयेत् ॥
अष्टोत्तरशतं मन्त्रं पीडितः सन् प्रसीदति ।
न सिद्धश्चेत् तदा पोष्यः प्रोच्यते तत्क्रियाऽधुना ॥
ह्सौँ बीजपुटितं मन्त्रं विलिखेद्भूर्जपत्रके ।
रोचनाकुङ्कुमाभ्यां च धारयेद्दधिदुग्धयोः ॥
इदं पोषणमित्युक्तं दोषशोषणमुच्यते ।
यज्ञस्य भस्मना लेख्यं वायुबीजविदर्भितम् ॥
भूर्जपत्रे स्वेष्टमन्त्रं तत् कण्ठे धारयेदिति ।
एतच्छोषणमित्युक्तं दहनं प्रोच्यतेऽधुना ॥
पृथक् पृथक् च मन्त्राणां चतुर्दिक्षु समावृतान् ।
रँ बीजेन पलाशस्य वीजतैलेन संलिखेत् ॥
भूर्जपत्रेऽथ तद्धार्यं कण्ठे दाहक्रिया त्वियम् ।
उपायान्तराण्युक्तानि (यामलेश्वरगन्धर्वादौ ।
प्रणवो मातृका देवी हृल्लेखेत्यमृतत्रयम् ।
अमृतत्रयसंयोगाद्दुष्टमन्त्रोऽपि सिद्ध्यति ॥
*सुवर्णमर्कतैलं च पिष्टं मन्त्राम्भ एव च ।
एतल्लिप्ताङ्गसंजप्तो मन्त्रः कुण्ठोऽपि सिद्ध्यति ॥
(गौतमीये)
सुवर्णसूर्यतैलेन पिष्टेन निजवारिणा ।
तल्लिप्ताङ्गहुतः कुण्ठो मनुः सद्यः प्रसीदति ॥
इति मन्त्रसिद्ध्युपायाः

---

* सुवर्णमित्यारभ्य मन्त्रसिद्ध्युपा इत्यन्तम् ५ पु. अधिकः पाठः ।

*आदावन्ते च मन्त्रस्य हृल्लेखा कामबीजकम् ।
श्रीबीजं च विनिःक्षिप्य जपेन्मन्त्रं तु सिद्धये ॥
तारसंपुटितं वाऽथ कृत्वा मन्त्रं तु साधकः ।
लक्षमात्रं प्रजप्तव्यं दुष्टमन्त्रोऽपि सिद्ध्यति ॥

इत्युपायाः ।

अथ पुरश्चरणभेदाः (वाडवानलीये)

पुरश्चर्यां विना मन्त्रा न सिद्ध्यन्ति कदा चन ।
न ते मन्त्राः प्रयोगार्हा न ते मन्त्राः फलप्रदाः ॥
ये च मन्त्राः पुरश्चर्यावर्जिता वीरवन्दिते ।
कीर्त्तिता यस्य मन्त्रस्य जपसङ्ख्या तु भूयसी ॥
तावत्सङ्ख्याजपं कर्त्तुमसमर्थश्च साधकः ।
समुद्रगनदीकूले देवतायतनेऽथ वा ॥
माघे मासि हविष्याशी लक्षमात्रं जपेन्मनुम् ।
भक्त्या संपूजयेद्देवीं त्रिसन्ध्यं विविधार्हणैः ॥
होमादीनि ततः कुर्यात् तदङ्गानि विधानतः ।
एवंकृते महादेवि भवेन्मन्त्रः फलप्रदः ॥
दीक्षा हि विफला ज्ञेया पुरश्चर्यामकुर्वताम् ।

(मुण्डमालायाम)

कृष्णाष्टमीं समारभ्य यावत् कृष्णाष्टमी भवेत् ।
सहस्रसङ्ख्ये जप्ते तु पुरश्चरणमिष्यते ॥

तत्रैव ।

कृष्णां चतुर्दशीं प्राप्य तपस्यन्तं महोत्सवे ।
अष्टमीनवमीरात्रौ पूजां कुर्याद्विशेषतः ॥
दशम्यां पारणं कुर्यान्मत्स्यमांसादिभिर्युतम् ।

---

* आदावित्यारभ्य इत्युपाया इत्यन्तम् ५ पु. नोपलभ्यते ।

षट्सहस्रं जपेन्नित्यं भक्तिभावपरायणः ॥
तथा ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
चतुर्दशीं समारभ्य यावदन्या चतुर्दशी ॥
तावज्जप्ते महेशानि पुरश्चरणमिष्यते ।
केवलं जपमात्रेण मन्त्राः सिद्धा भवन्ति हि ॥
वलिहोमादिदानेन विशेषात् पीठपूजने ।
योनिपीठं महापीठं कामरूपं तथाऽपरम् ॥
तयोरेकतमं पूज्यं रुद्रदेह इवापरः ।
(चन्द्रपीठं)
महालक्ष्मीं समारभ्य आमहानवमीश्वरि ।
कृष्णाष्टम्या आनवमी मधौ शाक्ते मनौ स्मृतम् ॥
ऊर्जे तपसि राधे वा शुक्लपक्षस्तु वैष्णवे ।
एकादश्यन्त ऐशे तु भूतान्तः फाल्गुने स्मृतः ॥
भाद्रेऽपि वैघ्नराजे तु माघभाद्रौ स्ववासरात् ।
अन्येष्वपि च मन्त्रेषु पूर्वोक्तं नवरात्रकम् ॥
जपो मातृकया प्रातःकालान्मध्यन्दिनावधि ।
रात्रौ याममितः कार्यः पयोमूलफलाहृतिः ॥
चतुर्थयामे कर्त्तव्या मालामन्त्रे दशांशतः ।
विंशांशाद्वा दशांशाद्वा अन्येष्वपि हुतं मतम् ॥
दक्षिणा च यथोक्ता च वित्तशाठ्यं न कारयेत्
एवं मन्त्रःप्रयोगार्हो भवत्येव न संशयः ॥
(साधनसमुच्चये)
तद्देवतिथिमारभ्य यावत् तद्देवतातिथिः ।
नित्यं जपेत् षट्सहस्रं पुरश्चरणमिष्यते ॥

ऊर्जे कृष्णेतरे पक्षे आरभ्य प्रतिपत्तिथिम् ।
प्रजपेद्वैष्णवं मन्त्रं यावदेकादशीतिथिः ॥
होमादिभिः प्रभोज्यान्तं विदध्याद्द्वादशीदिने ।
विधिनाऽनेन सिद्ध्यन्ति मनवो मुरवैरिणः ॥

(कालिकाकल्पे)

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
शरत्काले चतुर्थ्यादिनवम्यन्तं विशेषतः ॥
भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकम् ।
जपेदेकस्तु विजने केवलं तिमिरालये ॥
अष्टम्यादिनवम्यन्तमुपवासपरो भवेत् ।
स भवेत् सर्वसिद्धीशो नात्र कार्या विचारणा ॥

शरत्काले देवीपक्षे । तावत्सहस्रं षट्सहस्रम् ।

(मुण्डमालायाम्)

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
शरत्काले महापूजा क्रियते या च वार्षिकी ॥
तस्मिन् पक्षे विशेषेण पुरश्चरणतत्परः ।
अष्टम्यादिनवम्यन्तमुपवासपरो भवेत् ॥
पूजयेद्भक्तितो रात्रौ षट्सहस्रं जपं चरेत् ।

अत्र प्रतिपदादिनवम्यन्तं जपो बोध्यः ।

(विश्वसारे)

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
पूजास्थाने विनिक्षिप्य नरमुण्डं तदूर्ध्वके ॥
कोमलासनमास्तीर्य पूजयेत् परदेवताम् ।
षट्सहस्रप्रमाणेन प्रत्यहं किं न सिद्ध्यति ॥

(कालीतन्त्रे)

अथ वाऽन्यप्रकारेण पुरश्चरणमिष्यते ।
कुजे वा शनिवारे वा नरमुण्डं समाहृतम् ॥
पञ्चगव्येन मिलितं चन्दनाद्यैर्विशेषतः ।
निःक्षिप्य भूमौ हस्तार्धमानतः काननान्तरे ॥
तत्र तद्दिवसे रात्रौ सहस्रं यदि साधकः ।
एकाकी प्रजपेन्मन्त्रं स भवेत् कल्पपादपः ॥

तत्रैव ।

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
शवमानीयं तद्वारे तेनैव परिखन्यते ॥
तद्दिनान्तदिनं यावत् तावदष्टोत्तरं शतम् ।

जपेदिति शेषः ।

स भवेत् सर्वसिद्धीशो नात्र कार्या विचारणा ।

तद्वारे इति । पूर्वोक्तशनिभौमवारे । तेनैवेति । हस्तार्धमानेनैवेत्यर्थः ।

तत्रैव ।

अथ वाऽन्यप्रकारेण पुरश्चरणमिष्यते ।
अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोरपि ॥
सूर्योदयात् समारभ्य यावत् सूर्योदयान्तरम् ।
तावज्जप्त्वा निरातङ्कं सर्वसिद्धीश्वरो भवेत् ॥

अत्र होमादिकमपि कर्त्तव्यं पुरश्चरणत्वश्रुतेः ।

तन्त्रान्तरे ।

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
सूर्योदयं समारभ्य यावत् सूर्योदयान्तरम् ॥
तावज्जप्त्वा निरातङ्कं सर्वसिद्धीश्वरो भवेत् ।

अत्र तिथिनियमो नोक्त इति पूर्वस्माद्विशेषः ।

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।

सूर्यास्तं च समारभ्य सूर्यास्तं यावदेव तु ॥
तावज्जप्त्वा निरातङ्कं सर्वसिद्धीश्वरो भवेत् ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ॥
सूर्योदयं समारभ्य यावदस्तमयो भवेत् ।
तावद्भक्त्या जपेद्देवि सर्वसिद्धीश्वरो भवेत् ॥
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
सूर्यास्तं च समारभ्य यावत् सूर्योदयो भवेत् ॥
तावज्जपेन्महेशानि सर्वसिद्धीश्वरो भवेत् ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ॥
शरत्काले चतुर्थ्यादिनवम्यन्तं महेश्वरि ।
होमरूपां पुरश्चर्यां कुर्यात् सिद्धीश्वरो भवेत् ॥
अथ तर्पणरूपां च पुरश्चर्यां ब्रवीमि ते ।
दुग्धेनाशवतोयेन रक्तैर्मज्जाभिरेव च ॥
मधुना गन्धतोयेन रक्तधाराभिरेव च ।
केवलं शुद्धतोयस्य तर्पणेन महेश्वरि ॥

अत्राधिकारिभेदेन तर्पणद्रव्यभेदो बोध्यः ।

(साधनसमुच्चये)

प्रतिपद्दिनमारभ्य नवम्यन्तं महोत्सवे ।
दिवा वा यदि वा रात्रौ षट्सहस्रं जपं चरेत् ॥
देवीं संपूज्य विधिवत् सर्वसिद्धीश्वरो भवेत् ।

तन्त्रान्तरे ।

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
दिवा जपेत् षट्सहस्रं रात्रावपि तथैव च ॥

एवं क्रमेण देवेशि सर्वसिद्धीश्वरो भवेत् ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ॥
दिवा जपेत् षट्सहस्रं तावद्धोमं चरेन्निशि ।
सर्वसिद्धीश्वरो भूयादतोऽन्यं शृणु पार्वति ॥
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
नित्यकृत्यं दिवा कृत्वा केवलं तिमिरालये ॥
रात्रौ जपेद्गानपरः सर्वसिद्धीश्वरो भवेत् ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ॥
गानमण्डलगो जप्त्वा त्रैलोक्याधिपतिर्भवेत् ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ॥
दिवा जपेद्दिक्सहस्रं रात्रौ पूजां चरन् जपेत् ।
सहस्रमात्रं प्रजपेदामिषान्नपरायणः ॥
सर्वसिद्धीश्वरो भूयाद्वेतालसिद्धिमाप्नुयात् ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ॥
प्रतिपद्दिनमारभ्य नवम्यन्तं महेश्वरि ।
एकान्ते पर्वते शून्ये केवलं तिमिरालये ॥
उदयास्तमयं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ॥
पर्वते विपिने शून्ये नवरात्रं जितेन्द्रियः ।
मुण्डोपरि भवेन्मुण्डकपालं च ततो*परि ॥
तत्र दीपं च प्रज्वाल्य दीपालोकनतत्परः ।

---

* तान्त्रिकप्रगोगोऽयम् ।

नवरात्रं जपेद्देवि दीपालोकनतत्परः ॥
मूलमन्त्रं कपालेषु कौमार्या बीजमुत्तमम् ।
सिन्दूरेण कृतं यन्त्रं सर्वसिद्धीश्वरो भवेत् ॥

(कालीतन्त्रे)

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
अष्टमीसन्धिवेलायामष्टोत्तरलतागृहम् ॥
प्रविश्य मन्त्री विधिवत् ताः समभ्यर्च्य यत्नतः ।
पूर्वोक्तकल्पमासाद्य पूजादिकं समाचरेत् ॥
केवलं कामदेवोऽसौ जपेदष्टोत्तरं शतम् ।
तासां च पत्रमूले च जप्त्वा संगृह्य मस्तके ॥
महासिद्धिर्भवेत् सद्यो लतापूजनदर्शनात् ।

अष्टमीसन्धिवेलायामष्टमीनवम्योः सन्धिवेलायाम् । अष्टोत्तरलतागृहं यथासम्भवमष्टपर्यन्तानां शक्तीनां गृहं मदनमन्दिरम् । पूर्वोक्तकल्पं दुतीयागाख्यम् । पत्रमूले वराङ्गे जप्त्वा बीजं निरस्य तदेव बीजं मस्तके संगृह्य तिलकं कृत्वेत्यर्थः । इदं वीरपरम् । एवमन्येषामपि तत्तन्मार्गपरत्वं सकलसाधारणत्वं च क्रियाविशेषाद्बोद्धव्यम् ।

तथा—

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
आकृष्टायाः कुलागारे लिखित्वा मन्त्रमेव च ॥
संपूज्य तत्र संस्कारं कृत्वा तस्यै निवेद्य च ।
किंचिज्जप्त्वा मनुं नीत्वा देवताभावतत्परः ॥
तां विसृज्य नमस्कृत्य स्वयं सुप्त्वा सुसंयतः ।
प्रातः स्त्रीभ्यो बलिं दत्वा मन्त्रसिद्धिर्न संशयः ॥

अत्र पूजनमात्रं न तु संभोगोऽपीति ठक्कुराः ।

तत्रैव ।

गुरुमानीय संस्थाप्य देववत्पूजनं विभोः ।

वस्त्रालङ्कारहेमाद्यैः सन्तोष्य गुरुमेव च ॥
तत्सुतं तत्सुतां चैव तत्पत्नीं चैव पूज्य* च ।
पूजयित्वा मनुं जप्त्वा स्वयं सिद्धीश्वरो भवेत् ॥
(मेरुतन्त्रे)
वाममार्गीयमन्त्राणामेवमेवान्यदुच्यते ।
कृष्णाष्टमीं समारभ्य यावत् कृष्णाचतुर्दशी ॥
देवं ध्यात्वा जपेन्मन्त्रमयुतानां चतुष्टयम् ।
दशांशं होमयेत् पश्चात् तर्पयेदभिषेचयेत् ॥
(कल्पलता-) धृतवचनानि ।
अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः ।
रात्रियोगेन देवेशि गत्वा च पितृकानने ॥
दिगम्बरो मुक्तकेशो भूत्वा च सुरसुन्दरि ।
प्रजपेदयुतं मन्त्री देवताभावतत्परः ॥
मन्त्रसिद्धिर्भवेत् तस्य देवीपुत्रस्य भूतले ।
(मुण्डमालायाम्)
यद्गुह्यं परमं देवि गोप्याद्गोप्यतरं प्रिये ।
तदेतत् कथयिष्यामि प्रकाशश्च प्रजायते ॥
गोप्तव्यं तु महादेवि रहस्यं यत् तु गद्यते ।
मनोहरे शुभे गेहे कर्पूरादिसुवासिते ॥
रक्तभित्तिसमालिप्ते रक्तचन्दनमालया ।
रक्तासनोपविष्टः सन् रक्तपुष्पाणि धारयेत् ॥
रक्तचन्दनसंलिप्तो रक्तवस्त्रावृतः सदा ।
जपेदयुतमेकं तु रक्तां ध्यायेत् सुरेश्वरीम् ॥

---

* तान्त्रिकप्रयोगोऽयम् ।

पश्चाद्रक्तवलिं दद्याद्रक्तपुष्पैः समर्चयेत् ।
दशांशं जुहुयाद्रक्तकुसुमैर्वज्रसंज्ञकैः ॥
मधुरत्रयसंसिक्तैः सिन्दूरारुणविग्रहः ।
कुमारीं भोजेत् पश्चाद्रक्तपुष्पासवादिभिः ॥
लभते वाञ्छितां सिद्धिमेवं कृत्वा हि साधकः ।

पुरश्चरणान्तरमाह ।

अथ वा कल्पयेद्गेहं सुधादिधवलीकृते ।
शुभ्रासने समाविश्य शुद्धस्फटिकमालया ॥
कर्पूरचन्दनालिप्ते शुभ्राम्बरधरः शुचिः ।
श्वेतपुष्पैः समभ्यर्च्य ध्यायन् शुभ्रां सुरेश्वरीम् ॥
जपेत् सहस्रदशकं पश्यन्नुद्योतितं जगत् ।
होमयेत् तद्दशांशेन पुण्डरीकदलैः शुभैः ॥
शर्करामधुसंयुक्तैः सर्पिःसंलोलितैस्तथा ।
श्वेताम्बरं सितां मालां श्वेतपुष्पादिभूषणाम् ॥
श्वेतानुलेपनं तद्वद्दद्याद्विप्राय दक्षिणाम् ।
कुमारीभ्यस्तथा दद्याद्भोजयेत् ताश्च भक्तितः ॥
स्वयं त्रिमधुरोपेतैः पश्चाद्भुञ्जीत साधकः ।
निवेद्य पुरतो देव्यै भक्त्या विशुद्धभावतः ॥
एवं कृत्वा पुरश्चर्या ज्ञानवृद्धिकरी परा ।
यशोवृद्धिकरी तद्वद्राज्यवश्यकरी तथा ॥
प्रसन्नहृदयं तद्वत् साधकं परिकल्पयेत् ।
अथ वाऽन्यप्रकारेण पुरश्चरणकर्मकृत् ॥
लभते वाञ्छितां सिद्धिं गुरुभक्तिपरायणः ।

सिन्दूरेण पुरस्कृत्य मण्डले मन्दिरोदरे ॥
तत्राष्टपत्रकमलं लिप्तं सिन्दूररेणुभिः ।
पत्राणि पीतहरितसितनीलं क्रमाल्लिखेत् ॥
कर्णिकां च हरिद्रायाश्चूर्णैरालिख्य निर्मलाम् ।
तत्रेष्टदेवतां मध्ये पूर्णकुम्भात्मिकां चरेत् ॥
निवेश्य पञ्चरत्नानि पञ्चामृतजलं तथा ।
रक्तवस्त्रावृतं कुम्भं कृत्वा साधकसत्तमः ॥
नमस्कृत्य गुरुं कुर्यादयुतं जपमुत्तमम् ।
होमं कुर्यात् प्रयत्नेन विल्वपत्रैः सहस्रकम् ॥
रक्तचन्दनसंसिक्तैः स्फुरत्त्रिमधुराप्लुतैः ।
वलिमष्टदले दद्याच्छागरक्तोक्षितैर्नरः ॥
सगुडैः पायसैर्मध्ये मधुलालितमस्तकम् ।
छागस्यैवार्चितं पूर्वं रक्तपुष्पस्य मालया ॥
वलिमुत्तममुत्सृज्य निरीक्षेत दिशस्ततः ।
पलायन्ते वैरिणस्ते भीता एव द्रुतं निशि ॥
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
भौमवारे चतुर्दश्यां वलिमादाय मन्दिरात् ॥
श्मशानं समुपागत्य वलिपूजां समाचरेत् ।
पुर्वोक्तमण्डपं कृत्वा ततो दद्याद्वलिं निशि ॥
भैरवं पूजयित्वाऽऽदौ ततो देवीं समर्चयेत् ।
व्याघ्राजिनोपविष्टः सन् मुक्तकेशो जपेत् सुधीः ॥
सहस्रदशकं देवि निर्भयो वीरसत्तमः ।
ततो नरकपालस्थं वलिं दद्यात् सुरादिकम् ॥

भैरवाय नमस्कृत्य देव्यै रक्तं सुरां तथा ।
पायसं दधि भक्तं च गुडोदनमथापि वा ॥
प्रणमेन्निर्भयो भूत्वा सानन्दो मन्दिरं व्रजेत् ।
महापातकनिर्मुक्तो जायते राज्यभाजनम् ॥
दुःसहो वैरिवृन्देन व्याख्यावागीश्वरो भवेत् ।
दृष्ट एव मनोहारी स्त्रीणां काम इवापरः ॥
अथ वा मन्दिरे शून्ये सिन्दूरारुणमण्डले ।
नारीं चतुर्दशीरात्रौ कृष्णपक्षे निशान्तरे ॥
आनीय रूपसंपन्नामलङ्कृत्य विभूषणैः ।
वस्त्रैर्माल्यैरङ्गरागैः समभ्यर्च्य विशेषतः ॥
न्यासं विधाय तस्यां तु यजेदानन्दनान्दिनीम् ।
भुञ्जन् सौगन्धिकं वस्तु सहस्रं तु शतोत्तरम् ॥
सदुग्धं तु वलिं दद्यात् सुरामधुरमिश्रितम् ।
निवेदयेत् तु नैवेद्यं तस्यै भक्तिसमन्वितम् ॥
ततो लभेत त्रैलोक्ये वशीकरणमुत्तमम् ।
कविताकौशलं सम्यगाकर्षणकरं तथा ॥
तस्यामनिन्दितायां तु प्रसन्ना परमेश्वरि ।
पूर्णानन्दो भवेदस्मान्नियतं साधकोत्तमः ॥
एतद्गुह्यतरं देवि न प्रकाश्यं कथं चन ।
साधकेन महासिद्धिमिच्छता दुर्लभं भुवि ॥
अथ वा शृणु देवेशि पुरश्चरणमुत्तमम् ।
हविष्याशी मुक्तकेशो जपेदयुतमादरात् ॥

गद्यपद्यमयी वाणी तस्य सर्वविधा भवेत् ।
अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ॥
दिवा परिस्कृते देवि रात्रौ दीपान् प्रदापयेत् ।
चतुःषष्टिं चतुर्दिक्षु मध्ये मण्डलमालिखेत् ॥
सिन्दूरैः पटवासैश्च पुनः षोडशपत्रकम् ।
ततोऽष्टदलमालिख्य मध्ये कुर्याच्च कर्णिकाम् ॥
त्रिकोणद्वयमालिख्य तत्र कुम्भं निधापयेत् ।
पुनः पञ्चामृतैः पूर्णं दूर्वाम्रादिदलान्वितम् ॥
आच्छाद्य मृदुवस्त्रेण लोहितं च विशेषतः ।
ततो दिग्बन्धनं कृत्वा द्वीपिचर्मासनस्थितः ॥
उपविश्यावाहयेद्देवीमिष्टां तत्रार्चयेत् ततः ।
पञ्चोपचारविधिना ततस्तु जपमारभेत् ॥
प्रथमं प्रहरं हित्वा तुरीयं च विवर्जयेत् ।
मध्ययोर्यामयोर्जप्यादङ्गन्यासादिपूर्वकम् ॥
जपान्ते तु वलिं दद्यात् कृष्णाच्छागं प्रयत्नतः ।
ततो जपानुक्रमेण होमादि प्रातराचरेत् ॥
तर्पणं मार्जनं कृत्वा तथा ब्राह्मणभोजनम् ।
ततः कुमारीं संपूज्य साधकाँस्तोषयेत् ततः ॥
एवं कृत्वा पुरश्चर्यां महासिद्धिकरी सदा ।
पुरश्चरणकर्त्तॄणां वश्यगा भैरवी स्वयम् ॥
सिद्धमन्त्रप्रभावेण त्रैलोक्यं वशमानयेत् ।
अपरं तु प्रवक्ष्यामि पुरश्चरणमुत्तमम् ॥

शृणु शैलसुते देवि शीघ्रं शीघ्रफलप्रदम् ।
कृष्णां चतुर्थीमारभ्य यावच्छुक्लचतुर्थिका ॥
प्रयतस्तु जपेन्मन्त्रं योषिन्नियमपूर्वकम् ।
ततो होमादिकं कार्यं ततः पूर्णं भवेदिदम् ॥
सोत्साहं तु ततो देवीं ध्यात्वा सुस्थो जपं चरेत् ।
ततः सिद्धिमवाप्नोति वाञ्छितां मन्त्रसाधकः ॥
अथ वा पुष्पशय्यायां मृदुवासाः सुभूषणः ।
कृत्वाऽङ्गरागं सानन्दस्त्रयोदश्यां कुजे दिने ॥
व्यभिचारवतीं नारीं विभूष्यानीय सन्निधिम् ।
पुष्पेण तां समालभ्य जपेदेकान्तमन्दिरे ॥
प्रवालमालया धीमान् मौक्तिकस्याक्षमालया ।
यथाशक्ति जपेन्मन्त्रं ततो देव्यै वलिं ददेत् ॥
पायसं मधुसर्पिर्भ्यां सितावलितमुत्तमम् ।
सुगन्धकुसुमैर्मालां निर्माय नवपल्लवैः ॥
निवेद्य देव्यै तां मालां तस्याः केशे निधाय च ।
न का चित् कामचेष्टां च विदध्यात् साधकोत्तमः ॥
तस्यै भूषादिकं दत्वा पुरो देव्यै निवेदयेत् ।
देव्यै दत्वा विशेषेण ततस्तां तु विसर्जयेत् ॥
रात्रिशेषं ततो विद्वान् जागरेण समापयेत् ।
कृतमेवंविधं कर्म देव्या हर्षविवर्द्धकम् ॥
साधको लभते सिद्धिमेवं कृत्वा तु मन्त्रतः ।
एतत तु सुकरं कर्म धैर्याधीनं सुरेश्वरि ॥

कथितं ते सुगोप्यं हि न प्रकाश्यं कथं चन ।
कौतुकार्थं किं चिदन्यत् कथयिष्यामि पार्वति ॥
साधकः करणाद्यस्य सर्वलोकप्रियो भवेत् ।
मण्डलं पुरतः कृत्वा हरिद्राचूर्णनिर्मितम् ॥
चतुर्द्वारि शुभां रम्भां स्थापयेत् तां दलान्विताम् ।
तासु दीपावलिं दत्वा कौशलेन विशेषतः ॥
अष्टम्यां प्रातरारभ्य तदहोरात्रकं जपेत् ।
वलिं च विधिवद्दत्वा होमाद्यन्तं समाचरेत् ॥
विधायोपोषणं प्रातर्दक्षिणान्तां क्रियां चरेत् ।
महासिद्धिं लभेन्मन्त्री हरितालकरः परः ॥
सुगोप्यमेतत् सर्वं हि कथितं तव भामिनि ।

(कालीतन्त्रे)

अथ वा विजने रम्ये अस्थिशय्यासने नरः ।
उभयास्तं मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥
निजे क्रोडे विल्वमूले शवमारोप्य यत्नतः ।
नृसिंहमुद्रया वीक्ष्य जपेन्मातृकया नरः ॥
सहस्रं तत्र जप्त्वा तु सर्वसिद्धीश्वरो भवेत् ।

(भैरवतन्त्रे)

अष्टाधिकं च साहस्रं कृत्वा प्रतिदिनं जपेत् ।
षण्मासात् सिद्धिसंयुक्तः कविर्विद्यानिधिर्भवेत् ॥

तन्त्रान्तरे ।

महापितृवने नक्तं शवशय्यासनस्थितः ।
षट्सहस्रं जपेन्मन्त्री सर्वसिद्धीश्वरो भवेत् ॥

एतत् त्रितयमपि प्रथमविद्याविषयम् ।

(साधनमुक्तये)

या तिथिर्यस्य देवस्य तस्यां वा साधकोत्तमः ।
सूर्योदयं समारभ्य यावदस्तमयो भवेत् ॥
सूर्यास्तं वा समारभ्य यावत् सूर्योदयो भवेत् ।
तावत्कालं जपेन्मन्त्रं पुरश्चर्येयमीरिता ॥
होमादिविप्रभोज्यान्तं कर्त्तव्यं पूर्ववद्बुधैः ।

(*अगस्त्यसंहितायाम्)

चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः ।
पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा ॥

तथा—

तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः ।
जपेदेकान्त आसीनो यावत् स्याद्दशमीदिनम् ॥
तेनैव स्यात् पुरश्चर्या दशम्यां भोजयेद्द्विजान् ।
भक्ष्यभोज्यैर्बहुविधैर्भक्त्या दद्याच्च दक्षिणाम् ॥
कृतकृत्यो भवेत् तेन सद्यो रामः प्रसीदति ।

तिथिनिर्णयमाह ।

चैत्रे शुद्धा तु नवमी पुनर्वसुयुता यदि ।
सैव मध्यान्हयोगेन महापुण्यतमा भवेत् ॥
नवमी चाष्टमी विद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥

(वाडवानलीये)

वक्ष्ये तत्राप्यशक्तानां पुरश्चरणमुत्तमम् ।

---

* 'अगस्त्यसंहिताया'मित्यारभ्य 'दशम्यामेव पारण'मित्यन्तं केवलं ५ पुस्तके उपलभ्यते ।

पक्षाद्यां तिथिमारभ्य यावत् तद्देवतातिथिः ॥
तावज्जपेद्वर्णमय्या मालया प्रहरद्वयम् ।
जपान्ते पूजनं कुर्यात् प्रत्यहं हवनादिकम् ॥
यस्य कस्यापि मन्त्रस्य पुरश्चरणमिष्यते ।

तत्रेति पूर्वोक्तलक्षजपरूपपुरश्चरण इत्यर्थः ।

अथ ग्रहणकालीनपुरश्चरणम् । तदुक्तं (मेरुतन्त्रे)

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः ॥
नद्यां समुद्रगामिन्यां नाभिमात्रे जले स्थितः ।
स्पर्शाद्विमुक्तिपर्यन्तं जपेन्मन्त्रं समाहितः ॥
तावत्कालं जपित्वेत्थं ततो होमादिकं चरेत् ।
ब्राह्मणान् भोजयेत् पश्चात् पुरश्चर्यासमं त्विदम् ॥
प्रायश्चित्ते प्रयोगस्य प्रत्यवायस्य नाशने ।
येषां जपे च होमे च सङ्ख्या तन्त्रेषु नोदिता ॥
तत्र सेयं पुरश्चर्या सर्वतन्त्रेषु गोपिता ।

तन्त्रान्तरेऽपि ।

ग्रहणे चन्द्रसूर्यस्य शुचिः पूर्वमुपोषितः ।
नद्यां समुद्रगामिन्यां नाभिमात्रे जले स्थितः ॥
यद्वा शुद्धोदके स्नात्वा शुचौ देशे समाहितः ।
स्पर्शाद्विमाक्तिपर्यन्तं जपं कुर्यादनन्यधीः ॥
अनन्तरं दशांशेन क्रमाद्धोमादिकं चरेत् ।
तदन्ते महतीं पूजां कुर्याद्ब्राह्मणभोजनम् ॥
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं संपूज्य तोषयेत् ।
ततः प्रयोगान् कुर्वीत मन्त्रवित् कल्पनोदितान् ॥

(कालीतन्त्रे)

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
चन्द्रसूर्यग्रहे चैव ग्रासावधि विमुक्तितः ॥
यावत्सङ्ख्यं मनुं जप्त्वा तावद्धोमादिकं चरेत् ।

(सनत्कुमारसंहितायाम्)

अथ वाऽन्यप्रकारेण पौरश्चरणिको विधिः ।
चन्द्रसूर्योपरागे च स्नात्वा प्रयतमानसः ॥
संस्पर्शादिविमोक्षान्तं जपेन्मन्त्रमनन्यधीः ।
दृष्ट्वा स्नात्वा च संकल्प्य विमोक्षान्तं जपं चरेत् ॥
तावद्धोमादिकं कुर्याद्ग्रहणान्ते शुचिः पुमान् ।
एवं जपान्मन्त्रसिद्धिर्भवत्येव न संशयः ॥

तावदिति यावान् जपो जात इत्यर्थः ।

तदुक्तं (सिद्धेश्वरीमतेऽपि)

चन्द्रसूर्यग्रहे देवि ग्रासावधि विमुक्तितः ।
यावत्सङ्ख्यमनुर्जप्तस्तावद्धोमादिकं चरेत् ॥
पञ्चाङ्गं तावदेव स्याज्जपहोमौ समौ स्मृतौ ।
सिद्धेश्वरीमतं प्रोक्तं सर्वसिद्धिप्रदायकम् ॥

(चन्द्रपीठमन्त्रदेवप्रकाशिकरत्नावल्यादौ)

उपवासत्रयं कृत्वा एवं वा शक्त्यपेक्षया ।
श्राद्धादि चातिसंक्षेपाद्ग्रहणे स्पर्शमात्रतः ॥
समुद्रगायां सरिति कण्ठमात्रे जले स्थितः ।
जपं कुर्यादुद्ग्रहान्तं होमाद्यं तद्दशांशतः ॥
संपूर्णां दक्षिणां दत्वा मन्त्रसिद्धिमवाप्नुयात् ।
ततः प्रयोगान् कुर्वीत मन्त्रवित् कल्पनोदितान् ॥

(तन्त्रचिन्तामणि) धृततन्त्रान्तरवचनानि ।

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
सूर्यचन्द्रोपरागे तु नाभिमात्रोदके स्थितः ॥
ग्रासाद्विमुक्तपर्यन्तं जपं कुर्यान्महेश्वरि ।
तद्दशांशं होमयेद्धि तद्दशांशैस्त्रयं क्रमात् ॥
अनेन क्रमयोगेन सङ्गमे संजपेच्च वा ।
एकाङ्गुष्ठोपरि स्थित्वा ग्रासावधि विमुक्तितः ॥
पञ्चाङ्गं चाथ वाऽष्टाङ्गं दशाङ्गाख्यपुरस्क्रियाम् ।
कुर्याद्यत्नेन देवेशि सर्वसिद्धीश्वरो भवेत् ॥

अथ वाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः ॥
घटिकार्धं पूर्वमेव ग्रहणं परिवर्त्तते ।
तदा स्नानं विधातव्यं ग्रस्ते संकल्पमाचरेत् ॥
जाताशौचं मृताशौचं ग्रहणे नास्ति पार्वति ।
विमोक्षान्तं जपं कुर्यात् सम्यग्ज्ञाते समापनम् ॥
सूर्ये छन्ने अनायातघटिकार्धं विचारयेत् ।
ततः समापनं कुर्यात् सिद्धमन्त्रो भवेद्ध्रुवम् ॥
प्रमादाद्गलिते यागे बहुविप्रान् प्रभोजयेत् ।
यद्यदङ्गं विहीयेत तत्साङ्गे द्विजभोजनम् ॥
दशांशं हवनं कुर्यात् तर्पणं तद्दशांशतः ।
मार्जनं तद्दशांशेन दशांशेनाभिषेचनम् ॥
दशांशं विप्रभोज्यं च देवरूपो नरो भवेत् ।
यद्यदङ्गं विहीयेत तत्सङ्ख्याद्द्विगुणो जपः ॥

द्वित्रिवेदबाणभेदैर्विप्रादीनां क्रमः स्मृतः ।

(वाडवानलीये)

चन्द्रसूर्योपरागे च जपेन्मन्त्रमनन्यधीः ।
स्पर्शाद्विमुक्तपर्यन्तं तावद्धोमादिकं चरेत् ॥
अथ वा तद्दशांशेन पुरश्चरणमुच्यते ।

अत्र स्पर्शपदं स्पर्शज्ञानपरम् ।

चक्षुषा दर्शनं राहोर्यत् तद्ग्रहणमुच्यते ।
तत्र कर्माणि कुर्वीत गणनामात्रतो न हि ॥

इति स्मार्त्तवचनात् ।

तथा च ।

सूर्यग्रहणकालादिर्नान्यः कालः प्रशस्यते ।
यस्तु श्राद्धानुरोधेन ग्रहणे चन्द्रसूर्ययोः ॥
न करोति पुरश्चर्यां नरके स विपच्यते ।

इत्यादिवचनान्मन्त्रिणां ग्रहणपुरश्चरणमावश्यकम् ।

सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने ।
अकुर्वाणस्तु नास्तिक्यात् पङ्के गौरिव सीदति ॥

श्राद्धकरणे स्मार्त्तनिन्दार्थवादस्तु दीक्षितान्यपर इति सुधार्णवकृतः ।
तदुक्तं सनत्कुमारेणापि ।

जपयज्ञं परित्यज्य पितृयज्ञं करोति यः ।
स भवेद्देवताद्रोही पितॄन् सप्त नयत्यधः ॥

इति केचित् प्रतिनिधिद्वारा श्राद्धमामनन्ति ।
अन्ये तु ।

अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।
हेमश्राद्धं सग्रहे च शूद्रः कुर्यात् स एव हि ॥

इति वचनाद्धेमश्राद्धं विधाय पुरश्चरणमाचरन्ति । हेमश्राद्धं च पित्रुद्देशेन यथाशक्तिसुवर्णदानम् ।

कल्पलताकृतस्तु—

जपयज्ञं परित्यज्येत्यादिसनत्कुमारवचनमारब्धपुरश्चरणमध्ये मध्याह्नपतितसूर्यग्रहणविषयमित्याहुः ।

वस्तुतः स्मार्त्तानां श्राद्धं तान्त्रिकाणां तु पुरश्चरणमावश्यकम् ।

तान्त्रिकस्तु जपं कुर्यात् स्मार्त्तः श्राद्धं समाचरेत् ।

इति (सिद्धान्तसार) वचनात् ।

ग्रहणपुरश्चरणसंकल्पस्तु—

ॐ अद्येत्यादिराहुग्रस्ते दिवाकरे निशाकरे वाऽमुकगोत्रोऽमुकशर्माऽमुकदेवताया अमुकमन्त्रसिद्धिकामो ग्रासाद्विमुक्तिपर्यन्तं जपरूपपुरश्चरणमहं करिष्ये—इति ।

अत्र क्वचित् ।

जपो होमस्तर्पणं च मार्जनं विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते ॥

तथा—

सिद्धिकामोऽस्य मन्त्रस्य यावत्सङ्ख्यं जपं ततः ।
दशांशं हवनं कुर्यात् तद्दशांशं तु तर्पणम् ॥
दशांशं मार्जनं कुर्याद्दशांशं विप्रभोजनम् ।

इत्यादिवचनादेकसंकल्पान्तरे तु पञ्चाङ्गोपासनमेव पुरश्चरणम् । ग्रहणपुरश्चरणादौ तु पुरश्चरणपदं भाक्तम् । तस्य जपमात्ररूपत्वादेकसंकल्पान्तारितपञ्चाङ्गोपासनत्वाभावात् । तत्र होमादिविधानं तु प्रधानीभूतपुरश्चरणतुल्यताबोधनायेत्याहुस्तच्चिन्त्यम् ।

(मेरुतन्त्रादौ) मुख्यपुरश्चरणेऽपि प्रथमतो जपमात्रसंकल्पोक्तत्वात् । मन्त्रमार्गादिभेदेन न्यूनातिरिक्ताङ्गस्य पुरश्चरणस्य च तत्रैवोक्तत्वादेव संकल्पान्तरितपञ्चाङ्गोपासनस्यैव पुरश्चरणपदवाच्यत्वे प्रमाणाभावात् । 'पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यत' इत्यादिवचनं च येषां मन्त्राणां पञ्चाङ्गमेव पुरश्चरणं तन्मन्त्रपुरश्चरणपरं न तु मन्त्रसामान्यपुरश्चरणपरम् । एकेनैव वाक्येन साङ्गजपसंकल्पस्तु लाघवार्थः ।

(साधनसमुच्चये)

दोषादल्पाद्भयं हित्वा ज्योतिःशास्त्रनिरूपितम् ।

राहुं दृष्ट्वा जपं कुर्यात् कोटिपुण्यफलप्रदम् ॥

ज्योतिःशास्त्रोक्तदोषप्रतीकारोऽप्युक्तस्तत्रैव ।

निर्माय राजतं चन्द्रं सौवर्णं च दिवाकरम् ।
पञ्चोपचारैरभ्यर्च्य दद्याद्विप्राय बुद्धिमान्—इति ॥

तथा—

ग्रासादिमुक्तिपर्यन्तं यदा संकल्पितो जपः ।
ग्रस्तास्ते शास्त्रतो ज्ञात्वा विमुक्तिं जपमुत्सृजेत् ॥
अदृष्ट्वा नैव भुञ्जीत सूर्यं वा रजनीकरम् ।

तथा—

यामत्रयं न भोक्तव्यं चन्द्रग्रहणपूर्वतः ।
सूर्यग्रहणतः पूर्वं प्रहराणां चतुष्टयम् ॥

यत्तु (मत्स्यपुराणे)

अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे ।
भुञ्जीत चेत् संगवे स्यान्न पूर्वं भुक्तिमाचरेत् ॥

इति वचनं तद्बालवृद्धातुरविषयम् ।

तदुक्तं वृद्धवसिष्ठेन ।

सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामाँस्त्रीन् बालवृद्धातुरैर्विना—इति ॥

अथ वर्णौषधिपुरश्चरणम् ।

(मेरुतन्त्रे)

अयोग्यगुरुतो लब्ध्वा वार्यादिस्थानमाश्रिताः ।
दुर्देशत्वात् पुरश्चर्यां कर्त्तुं चेच्छक्यते न हि ॥
राज्ञो भाग्यमतो वाऽपि सुकुमारस्य वा यथा ।
सिद्धिर्भवेत् तथा वक्ष्ये वर्णौषधिपुरस्क्रियाम् ॥
सप्तधा सा परिज्ञेया वर्णमासैस्तु सिद्धिदा ।
मन्त्रवर्णौषधीकाष्ठै रचयेद्गुटिकाः शुभाः ॥

वर्णक्रमेण ताः प्रोह्या अनुलोमविलोमतः ।
स्थूलादिकाश्च लघ्वन्ताः कर्त्तव्या मणयो यथा ॥
सर्पद्वयाकृतिर्माला भवेन्नित्यं तया जपेत् ।
मालया मणिसङ्ख्याकं प्रथमोऽयं जपः स्मृतः ॥
सर्वे समाना मणयः प्रोतव्याः स्वर्णसूत्रके ।
कण्ठे धार्या कण्ठमाला नित्यमेष द्वितीयकः ॥
तथैव राजते सूत्रे प्रोह्यैताः परिपूजयेत् ।
तद्देवकल्पमार्गेण प्रक्रमोऽयं तृतीयकः ॥
वर्णौषधीनां क्वाथेन नित्यस्नानं चतुर्थकः ।
वर्णौषधीरजो लिह्याद्गोघृतेन तु पञ्चमः ॥
तच्चूर्णोद्वर्त्तनं कुर्यादेष षष्ठः प्रकीर्त्तितः ।
तद्भस्मधारणं नित्यं कुर्यादिति तु सप्तमः ॥

वर्णौषध्यस्तु प्रागुक्ताः ।

अथवीरपुरश्चरणम् ।

अत्र रात्रिरेव कालो न दिवसस्तदुक्तम् (मुण्डमालायाम्)

गते तु प्रथमे यामे तृतीयप्रहरावधि ।
प्रजप्तव्यं निशायां तु रात्रिशेषे जपेन्न च ॥
हविष्यं भक्षयेन्नित्यमेकभक्तं सुसंयतः ।

(कुलचूडामणौ)

पुरश्चरणकाले तु परशक्तिं प्रपूजयेत् ।
दीक्षितो वस्त्रपुष्पाद्यैर्भोज्यैः पायससम्भवैः ॥
शून्यगेहे समानीय चार्घोदकविशोधितम् ।
अमृतीकरणं कृत्वा शक्तीरभिमुखं नयेत् ॥

समानीय शक्तिपूजोपयुक्तद्रव्याद्यमृतीकरणं तेषामेव ।

तथा—

अर्घोदकेन सर्वास्ताः संप्रोक्ष्य विधिपूर्वकम् ।
अमृतीकरणं कुर्यात् सकलीकरणं ततः ॥

अत्रामृतीकरणादिकं शक्तीनाम् ।

पूज्यशक्तीराह ।

अथाष्ट कन्यका वक्ष्ये देवीरूपधरा यतः ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलभूषणा ॥
वेश्या नापितकन्या च रजकी योगिनी तथा ।
विशेषवैदग्ध्ययुताः सर्वा एव कुलाङ्गनाः ॥
अष्टकन्यारुपभेदं विलोक्यामर्षचेष्टिताः ।
ब्राह्मण्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः ॥
गौरकृष्णादिकं रूपं सौम्यत्वं च गुणादिकम् ।

शक्तीनां नामानि वक्ष्यमाणस्तोत्र एव वक्तव्यानि ।

पूजाप्रकारमाह ।

आसनं प्रथमं दत्वा स्वागतं च वदेत् पुनः ।
अर्घ्यं पाद्यं च पानीयं मधुपर्कं जलं ततः ॥
स्नापयेद्गन्धपुष्पाद्भिः केशसंस्कारमाचरेत् ।
धूपयित्वा ततः केशं कौशेयं विनिवेदयेत् ॥
ततः स्नानान्तरे पीठमास्तीर्य पादुकाद्वयम् ।
दत्वा तत्र समासीनां नानालङ्कारभूषणैः ॥
भूषयित्वाऽनुलेपं च गन्धमाल्यं निवेदयेत् ।
तां तां शक्तिं समावाह्य मूर्ध्नि तासां समानयेत् ॥
भोज्यमण्डपमध्ये तु स्वर्णपात्रे सुशोभने ।
चर्व्यं चोष्यं लेह्यपेयं भोज्यं चैव हि भक्षणम् ॥

अदीक्षिता यदा स्युस्तास्तदा मायां निवेदयेत् ।

तां तामिति । यस्य नाम्ना या संकेतिता तस्याः शिरसि तां शक्तिमावाह्य पूजयेदित्यर्थः। इदं चावाहनं मध्येऽप्युक्तमादावेवार्हति सर्वत्र तथा दर्शनात् ।

तत्रासां सव्यकर्णेषु ततः स्तोत्रं समाचरेत् ।
मातर्देवि नमस्तेऽस्तु ब्रह्मरूपधरेऽनघे ॥
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ।
माहेशि वरदे देवि परमानन्दरूपिणि ॥
कृपया० .... ।
कौमारि सर्वविघ्नेशि कुमारक्रीडनेऽवरे ॥
कृपया० .... ।
*विष्णुरूपधरे देवि महागरुडवाहिनि ॥
कृपया० .... ।
वाराहि वरदे देवि दंष्ट्रोद्धृतवसुन्धरे ॥
कृपया० .... ।
शक्ररूपधरे देवि शक्रादिसुरपूजिते ॥
कृपया० .... ।
चामुण्डे मुण्डमालास्रक्चर्चिते विघ्ननाशिनि ॥
कृपया० .... ।
महालक्ष्मि महामोहक्षोभसंतापनाशिनि ॥
कृपया० .... ।
पितृमातृमये देवि पितृमातृबहिस्कृते ॥
एके बहुतरे देवि विश्वरूपे नमोऽस्तु ते ।

---

* इदं केवलं २ पु. उपलभ्यते ।

एतत् स्तोत्रं पठेद्यस्तु कर्मारम्भे सु संयतः ॥
विदग्धां वा समालोक्य तस्य विघ्नो न जायते ।
यदि व्रीडापरास्तास्तु भोजने तद्गृहाद्बहिः ॥
स्थित्वा स्तोत्रं पठेत् तावद्यावत् तृप्तिः प्रजायते ।
आचम्य मुखवासादि ताम्बूलं च निवेदयेत् ॥

तथा—

ततो दद्यात् पुनर्मालां चन्दनं पङ्क्तिं शुभम् ।
विसृज्य प्रदक्षिणीकृत्य वरं प्रार्थ्य सुखी भवेत् ॥
अन्या यदि न गच्छन्ति निजकन्या निजानुजा ।
अग्रजा मातुलानी वा जननी तत्सपत्निका ॥
वयस्या ज्ञातिजा वाऽपि निःपतिर्वा सभर्त्तृका ।
पूर्वाभावे परा पूज्या मदंशा योषितो यतः ॥
एका चेद्युवती तत्र पूजिता वा विलोकिता ।
सर्वा एव तदा देव्यः पूजिताः कुलभैरव ॥

इदं च पुरश्चरणस्यादौ मध्ये चान्ते च कर्त्तव्यम् ।
तथा हि तत्रैव ।

आदावन्ते च मध्ये च लक्षपूर्त्तौ विशेषतः ।
न पूजयाति चेत् कान्तां तदा विघ्नैर्विलुप्यते ॥

(वीरचूडामणौ)

क्षेत्रमादौ तु संशोध्य समसूत्रं मनोहरम् ।
वेदिकां कारयेत् तत्र मध्ये मुण्डं विनिःक्षिपेत् ॥
अलिना लेपनं कुर्यान्मध्ये चाष्टदलं लिखेत् ।
पूर्वादिक्रमतो ज्ञेयं स्वरयुग्मं लिखेत् क्रमात् ॥
वर्गाष्टकं लिखेत् तत्र मध्ये प्रासादमालिखेत् ।

गगनं विन्दुसंयुक्तं लाङ्गलीशं तथैव च ॥
सविसर्गं वरारोहे केशरेषु लिखेत् ततः ।
तत्राधारादि संपूज्य आसनं स्थापयेद्बुधः ॥
उपविश्यासने वीरो यत्र कुत्राप्यचूडके ।
पार्ष्णिघातत्रयं कुर्याच्छोटिकात्रितयं ततः ॥
दिग्बन्धमस्त्रमन्त्रेण पूर्वादिक्रमतो बुधः ।
वकेशान्ते पिनाकीशं नादविन्दुविभूषितम् ॥
पशुपदं समुच्चार्य रमान्तेऽस्त्रमनुत्तमम् ।
पाशुपताख्यविद्येयं सर्वविघ्नविनाशिनी ॥

वकेशः शकारः । पिनाकीशो लकारः ।

भूतशुद्धिं विधायादौ न्यासपूर्वं विधानतः ।

तथा—

गोमयेन विलिप्तायां भूमौ मण्डलमालिखेत् ।
अलिना लेपनं कुर्याद्यक्षकर्दमकेन वा ॥
सूत्रेण सूत्रितं पद्मं समसूत्रं मनोहरम् ।
रक्तं श्वेतं हरिद्वर्णं कृष्णपत्रं सुकेशरम् ॥
चतुरस्रं सुशोभाढ्यं तन्मध्ये योनियुग्मकम् ।
त्रिकोणं चैव तन्मध्ये शून्ये शून्यं विचिन्तयेत् ॥
योजयेद्दीपितां नारीं तत्र संपूजयेन्मनुम् ।
तत्रैव देवीं संस्थाप्य ईषद्धासां सुलोचनाम् ॥
षोडशाब्देन युवतीमप्रसूतां तपस्विनीम् ।
स्वाधीनां स्वच्छवस्त्रां च भीतिहीनाट्टहासिनीम् ॥
तीव्रशुद्धिं दृढाचारां मुक्तकेशीं दिगम्बराम् ।
योगमुद्राधरां वाऽपि योगाचारपरायणाम् ॥

ईदृशीं मन्त्रसंयुक्तां यागकाले प्रपूजयेत् ।
मातङ्गीं तन्तुकारीं च भवाब्धिभीतिनाशिनीम ॥
षट्वाकारीं चर्मकारीं शिल्पिनीं नापिताङ्गनाम् ।
हट्टनारीं विशेषात् तु सुपुष्पकेण कोमलाम् ॥
सामान्यार्घं विशेषाघ स्वपात्रं शक्तिपात्रकम् ।
तन्मध्य निःक्षिपेद्द्रव्यं सामरस्यामृतोद्भवम् ॥
तत्त्वपञ्चकमन्त्रण एकैकं शोधयेद्बुधः ।
वह्निसूर्यकलाचन्द्रकलान्ते हृदयं मनुम् ॥
त्रिकोणं विलिखेन्मध्ये त्रिकोणमकथादिकम् ।
खान्तं षान्तं तथा नान्तं यान्तं धान्तं सशत्रुकम् ॥
वामकर्णसमायुक्तं विन्दुनादैरलङ्कृतम् ।
रत्नेश्वरीति विद्याख्यं पञ्चरत्नात्मकं मनुम् ॥
षडङ्गेनैव संपूज्य मूलमन्त्रेण मन्त्रयेत् ।

(स्वतन्त्रतन्त्रे)

रात्रौ मांसासवैर्देवीं पूजयित्वा विधानतः ।
ततो नग्नां स्त्रियं नग्नो रमन् क्लेदयुतोऽपि वा ॥
जपेल्लक्षं ततो देवीं होमयेज्ज्वलितानले ।
योनिकुण्डे स्थितं सर्पिर्मत्स्यं मांसं फलं तथा ॥
दशांशं तर्पयेन्मद्यं मांसमिश्रैस्तु साधकः ।
तर्पणस्य दशांशं तु अभिषिञ्च्य जगन्मयीम् ॥
दशांशं भोजयेत् साधु साधकं कालिकाप्रियम् ।
मद्यं मांसं च मत्स्यं च चर्वणं च प्रदापयेत् ॥
ततस्तु तोषयेद्भक्त्या गुरुं स्वर्णादिभिः प्रिये ।

(तन्त्रशेखरे)

एवं प्रकुर्वतस्तस्य प्रथमे वत्सरत्रये ।
भवन्ति बहवो विघ्नाः श्रद्धाभावादयोऽशुभाः ॥
अस्मिन्नर्थे भवेन्मन्त्री यदि नोद्विग्नमानसः ।
सेत्स्यतीति च विश्वस्तस्तदाऽसौ सिद्धिभाग्भवेत् ॥

(कालीकल्पे)

न न्यासो योषितां तत्र न पूजा नापि चिन्तनम् ।
रात्रौ जपैकमात्रेण सिद्धिदा दक्षिणा भवेत् ॥
नवमाद्वत्सरादूर्ध्वं स्वयं सिद्ध्यति मन्त्रराट् ।

इति वीरपुरश्चरणविधिः ।

(मेरुतन्त्रे)

वाममार्गे द्रुतं सिद्धिः कर्मणा येन जायते ।
तदहं संप्रवक्ष्यामि सूक्ष्मसाधनमद्भुतम् ॥
अष्टम्यां वा चतुर्दश्यां कृष्णायां भौमवासरे ।
गृहीत्वा नृकपालं तु मद्यं मांसं तथोदनम् ॥
कुल्माषान् मिश्रितान् कृत्वा गच्छेदश्वत्थभूमिकाम् ।
एकान्ते निर्जने तस्य तले संलिप्य भूमिकाम् ॥
दण्डमात्रानष्टदिक्षु कीलान्मूलेन पूरयेत् ।
अष्टोत्तरसहस्रेण सप्ततन्तुकडोरकम् ॥
निबन्धयेत् तत्र पूजां देवतायाः समाचरेत् ।
देवीं तु हृदि संस्थाप्य तस्मिन् स्थाने सुदीपकम् ॥
कुर्याच्च नरतैलेनाभावे कपिलहव्यकैः ।
तदभावे तु तैलेन कुडवप्रमितेन च ॥
दीपं कुर्यादष्टशतसूत्राणां वर्त्तिका मता ।

तस्योपरि कपालं तत्कज्जलार्थं निवेशयेत् ॥
दीपं दृष्ट्वा जपेन्मन्त्रं नान्यतस्तु विलोकयेत् ।
अर्धे प्रज्वलिते तैले भूतप्रेतपिशाचकाः ॥
नानारूपा भिन्नशब्दाः साधकं भीषयन्ति ते ।
न भेतव्यं तदन्तं तु वामहस्तेन निःक्षिपेत् ॥
तेषामग्रे नान्यदृष्टिः प्रपश्येद्दीपमेव हि ।
किञ्चिच्छेषे दीपतैले देवी सा वरदा भवेत् ॥
तस्यै तत्र वलिं दत्वा श्रुत्वा संयाचयेद्वरम् ।
पूर्वकर्मविपाकेन यदि नायाति देवता ॥
दीपान्ते कज्जलं ग्राह्यं तत्र देवीं प्रपज्य च ।
आनयेत् तद्गृहे सिद्धं दत्वाऽक्ष्णोः स्याज्जगद्वशम् ॥
दत्वाऽक्ष्णोः कज्जलं तच्च प्रयोगानाचरेत् ततः ।
सर्व एवं प्रसिद्ध्यन्ति लोलुपे न गुरौ सति ॥
रक्षयेदञ्जनं सम्यङ्नो चेद्गच्छति भैरवः ।

तत्रैव ।

अथातः संप्रवक्ष्यामि सर्वतन्त्रेषु गोपितम् ।
सर्व*सिद्धिकरं दीपं न वाच्यं यस्य कस्य चित् ॥
शक्त्याद्यर्हगणार्केषु भक्तो वर्णाः प्रजायते ।
मन्त्रवर्णस्य दिवसे क्रमाद्दीपं प्रकल्पयेत् ॥
सायं तु कुडवाज्यस्य वर्त्तिर्भूपञ्चतन्तुभिः ।
यावज्ज्वलति दीपोऽसौ तावत् पश्यन्मनुं जपेत् ॥
मन्त्रार्णसङ्ख्यदीपेषु ज्वलितेष्वथ तद्दिने ।

---

* मन्त्रसिद्धिकरमिति २—४ पु. पा. ।

पुनर्दीपे कृते सा तु दीपे संदृश्यते स्फुटा ॥
इष्टं स्वकीयं कथयेद्याचयेन्मनसेप्सितम् ।
ददाति देवता तुष्टा गुह्यमेतत् प्रकाशितम् ॥

अथ दूतीयागविधिः ।

(रुद्रयामले)

दूतीयागस्य विधिना रममाणो वरस्त्रिया ।
जप्त्वा मन्त्रं साधकेन्द्रः सद्यः सिद्धिमवाप्नुयात् ॥

तन्त्रान्तरे ।

पुरुषेण विना किञ्चित् प्रकृत्या क्रियते न हि ।
तथा शक्तिं विना देवः फलं दातुं क्षमो न हि ॥
तस्मात् पुंशक्तिसंयोगं कृत्वा मन्त्रं प्रसाधयेत् ।

(कुमारीतन्त्रे)

नटी कपालिनी वेश्या रजकी नापिताङ्गना ।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ॥
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः ।
एतासु कां चिदानीय ततस्तद्योनिमण्डले ॥
पूजयित्वा महादेवीं ततो मैथुनमाचरेत् ।

(देवीयामले)

अथ पूजाफलं वक्ष्ये उत्तरोत्तरगोचरम् ।
स्वशक्त्या अयुतं पुण्यं परशक्तिप्रपूजने ॥
ततो वेश्याऽधिका ज्ञेया रजकी च ततोऽधिका ।
रजक्याः क्षुरकी श्रेष्ठा क्षुरक्याश्चर्मकारिणी ॥
ततोऽधिकतरा प्रोक्ता हेतुनारी वरानने ।
ततोऽप्यन्तजसम्भूता चाण्डाली च ततोऽधिका ॥
ततो मातङ्गिनी श्रेष्ठा मातङ्ग्याः पुष्कशी तथा ।

पुष्व.स्या अन्त्यजा श्रेष्ठा ततोऽतिसुन्दरी स्मृता ॥
सुन्दरी परतः प्रोक्ता प्रीतिमत्यनुरागिणी ।
तत्परा परमेशानि उन्मत्ता शुभलक्षणा ॥
समयाचारसंपन्ना मन्त्रज्ञा भयवर्जिता ।
विदग्धा त्वप्रसूता च धैर्यस्वातन्त्र्यसंयुता ॥
एवंगुणसमायुक्ताः पूजयेत् सर्वयोषितः ।

(महाकालसंहितायाम्)

ऋषिकन्यां न चाकर्षेन्मद्यपानां च कन्यकाम् ।
द्विजातीनां स्त्रियं चापि व्रतस्थानां स्त्रियं तथा ॥
गुर्वङ्गनां गुरोः पत्नीं सगोत्रां शरणागताम् ।
शिष्ययोषां न चाकर्षेत् पापिनां वनितां तथा ॥
नापुष्पितां गुर्विणीं वा बालापत्यां तथा पुनः ।

(देवीयामले)

आत्मीया च परा चैव शक्तिमात्रं महेश्वरि ।
मन्त्राधिदेवताबुद्ध्या पूज्याः सर्वोपचारकैः ॥
विविधैः फलताम्बूलैर्वस्त्रालङ्कारहेमभिः ।
संपूज्य विधिवद्भक्त्या बहुहेतुं प्रदापयेत् ॥
संभोगवासनां कृत्वा यः कुर्याच्छक्तिपूजनम् ।
स दारिद्र्यमवाप्नोति नारकी च भवेद्ध्रुवम् ॥

(वीरचूडामणावपि)

आनीय युवतीं रम्यां कुलकर्मविलासिनीम् ।
षोडशाब्देन युवतीं पीतोन्नतपयोधराम् ॥
उन्मत्तां मत्तमातङ्गीं सदा घूर्णितलोचनाम् ।
मृगशावकनेत्रां च सारङ्गीं मृदुहासिनीम् ॥

क्रोधलोभदयादम्भमोहमायाविवर्जिताम् ।
स्वामिधर्मरतां सत्यवादिनीं च सदा शुचिम् ॥
गणिकां नटीं चाण्डालीं जीविनीं जारजामथ ।
योगमुद्राधरां गोपीं चर्मकारीं च चित्रिणीम् ॥
चतुर्वर्णसमायुक्तामुत्तमां पर्वतोद्भवाम् ।
महाकालः ।
स्नातां दिव्याम्बरधरां नानालङ्कारभूषिताम् ।
युवतीं पीनवक्षोजां तथा चाकृतिभोजनाम् ॥
हस्ते गृहीत्वा वामोरौ स्थापयेच्छक्तिमुत्तमाम् ।
अशक्नुवानो वोढुं तां देवीं वामेऽथ वाऽऽसने ॥
(वीरचूडामणौ)
वामभागे समालिख्य त्रिकोणं पद्मवर्त्तुलम् ।
श्वेतरक्तसमायुक्तं नीलं सिन्दूरचर्चितम् ॥
साधकः प्राङ्मुखो भूत्वा देवीं प्रत्यङ्मुखां जपेत् ।
पीठशक्तिं विधानेन नव शक्तीः प्रपूजयेत् ॥
रतिः प्रीतिः प्रिया कान्तिः कामिनी काममालिनी ।
कन्दर्पदलिनी दुर्गा भाविनी नव शक्तयः ॥
वियद्भृगुं समुच्चार्य मनुविन्दुकलान्वितम् ।
महाप्रेतपदं पश्चाद्धृदयान्तमिमं मनुम् ॥
मूलं मन्त्रं समुच्चार्य संबुद्ध्या तारिणिपदम् ।
एह्येहि च पदं पश्चात् पादुकाभ्यां पुनः पुनः ॥
गृहीत्वा वामहस्तेन आसने चोपवेशयेत् ।
तारिणीपदमित्युपलक्षणं स्वेष्टदेवतानामेत्यर्थः ।
तथा—
रक्तचन्दनलिप्ताङ्गीं रक्तपुष्पविभूषिताम् ।

सर्वालङ्कारसंयुक्तां विवस्त्रां पूजयेत् प्रिये ॥
वारुणीमदमत्तां च हावभावसमावृताम् ।
यावदाकण्ठपर्यन्तं तावत् पानं प्रदापयेत् ॥
ध्यानं कुर्यान्महेशानि गह्वरे मकरानने ।
ताम्रचूडसमाकारं गजवक्त्रसमप्रभम् ॥
तत्रस्थां चिन्तयेद्देवीं विद्यां भुवनमोहनीम् ।
तारं वै हृदयान्ते च पश्चान्मदनमन्दिरम् ॥
चतुर्थ्यन्तं जपेद्देवि भगे पुष्पं विनिःक्षिपेत् ।
प्रक्षाल्य कुलद्रव्येण गन्धपुष्पैः समर्चयेत् ॥
धूपदीपादिकं कृत्वा पश्चादावरणं यजेत् ।
इच्छा ज्ञाना क्रिया पश्चाद्वामा ज्येष्ठा च रौद्रिका ॥
रतिः प्रीतिस्तथा कामं पुष्पबाणधनुर्धरम् ।
वसन्तं पूजयेत् पश्चात् पत्राङ्कुरसमन्वितम् ।
चिकुरं पूजयेद् देवि अलिस्यन्दसमन्वितम् ॥
विरिञ्चिं पूजयेन्नाभौ हृदये च हरं हरिम् ॥
स्तने वक्त्रे महेशानि त्रिमूर्त्तिं पूजयेत् ततः ।
कामेशीं चैव विश्वेशीं परां तु भगमालिनीम् ॥
भ्रुवोर्मूले महेशानि पञ्चबाणान् प्रपूजयेत् ।
द्रामाद्यां द्राविणीं मूर्ध्नि द्रीमाद्यां क्षोभिणीपदम् ॥
क्लीँ वशीकरणीं वक्त्रे गुह्ये ब्लूँ बीजपूर्विकाम् ।
आकर्षिणीं हृदि पुनः सर्गान्तभृगुसंयुताम् ॥
संमोहिनीं क्रमादेवं बाणपूजनमीरितम् ।
कर्णयोः पूजयेच्चक्रे भानुं चन्द्रं क्रमेण च ॥

रसनायां वह्निः पूज्यो नेत्रे नक्षत्रमालिनी ।
प्राणं संपूजयेद्घ्राणे आज्ञायां त्रिपथगामिनीम ॥
अक्षोभ्यं पूजयेन्मूर्ध्नि गन्धपुष्पोपहारकैः ।
पुष्पमालां गले दद्यादथ शक्त्या जपेद्बुधः ॥

अक्षोभ्यं पूजयेदिति ताराविषये ।

(ज्ञानार्णवे)

पञ्चमं गजदन्तस्य हेमरूप्यादिनिर्मितम् ।
विशुद्धक्षौमरचितां तूलिकां तत्र योजयेत् ॥
पुष्पाण्याकीर्य मध्ये तु कर्पूरस्य रजस्तथा ।
मण्डूकादीँस्तत्र देवि उपर्युपरि शैलजे ॥
मण्डूकं पूजयेदादौ रुद्रं कालाग्निसन्निभम् ।
आधारशक्तिं कूर्मं च तथाऽनन्तं वराहकम् ॥
पृथिवीं च तथा कन्दं नालं पद्मं दलं तथा ।
केशरालिञ्च संपूज्य कर्णिकां पूजयेत् ततः ॥
मञ्चकं च समभ्यर्च्य तत्र पादचतुष्टये ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च क्रमाद्यजेत् ॥
अपूर्वान् पूजयेदेताँस्तत्पादानां समीपके ।
आत्मान्तरात्मपरमज्ञानात्मनः प्रपूजयेत् ॥
मञ्चकाग्रेषु संपूज्य गुणत्रयमथार्चयेत् ।
दूतीं सुलक्षणां रम्यां सर्वलक्षणलक्षिताम् ॥
नानालङ्कारसुभगां स्ववशां शारदामिव ।
पूजयेत् परमेशानि पञ्चकामशरैस्तथा ॥
वटुकादींश्चतुर्दिक्षु पूजयेत् सिद्धिहेतवे ।
मातृकां विन्यसेत् तस्माद्देहे कामशरान्विताम् ॥

त्रिकोणं विन्यसेन्मूर्ध्नि तत्र पूजां यजेत् क्रमात् ।
त्रिकोणमध्ये बालाख्यां कामेशीं परिपूजयेत् ॥
गणेशं च कुलाध्यक्षं तथा लक्ष्मीं सरस्वतीम् ।
त्रिकोणेषु च संपूज्य वसन्तं मदनं प्रिये ॥
स्तनयोः पूजयेत् पश्चान्मुखे तस्याः कलाधरम् ।
वाग्भवं कामराजं च स्त्रीबीजं कामराजकम् ॥
हसक्लेमात्मकं दत्वा आधारशक्तिमुच्चरेत् ।
श्रीपादुकां ततो दत्वा पूजयामि वदेत् ततः ॥
अनेन मनुना तस्य ललाटे सुमनोहरम् ।
त्रिकोणं तत्र संलिख्य सिन्दूराद्यैर्विशेषतः ॥
वटुकं योगिनीं चैव क्षेत्रपालं गणेश्वरम् ।
लक्ष्मीं सरस्वतीं चैव पूजयेत् तत्र सुन्दरि ॥
कामबीजं समुच्चार्य कामराजं ततः परम् ।
श्रीपादुकां ततो दत्वा पूजयामि वदेत् ततः ॥
दक्षपादतले देवि पूजयेन्मनुनाऽमुना ।
वँ वसन्तं समुच्चार्य नादहीनारमाततः ॥
पादुकां पूजयामीति तस्या वामकरे न्यसेत् ।
शक्तिबीजं समुच्चार्य सोमपादपदं ततः ॥
श्रीपादुकां ततो दत्वा पूजयामि स्तनद्वये ।
आरोहक्रमतः कामकलान्यासं चरेत् सुधीः ॥

(स्मरदीपिकायाम्)

पादे गुल्फे तथोरौ च भगे नाभौ कुचे हृदि ।
कण्ठे कक्षे तथौष्ठे च गण्डे नेत्रे श्रुतावपि ॥

शीर्षे सर्वशरीरं च वसेत् कामः स्थितिक्रमात् ।

इति स्थानान्युक्तानि ।

कलानां नामानि तु तन्त्रे ।

श्रद्धा प्रीती रतिश्चैव धृतिः शान्तिर्मनोहरा ।
मनोरमा मनोरामा मदनोन्मादिनीति च ॥
मोहिनी दीपनी चैव शोषिणी च वशङ्करी ।
रञ्जिनी सुभगा देवी षोडशी प्रियदर्शना ॥
अकारादिस्वरैरर्च्याः कलाः कुसुमधन्वनः ।
पूषाऽर्यमा सुमनसा रतिः प्रीतिस्तथा धृतिः ॥
ऋद्धिः सौम्या मरीचिश्च दशमी चांशुमालिनी ।
अङ्गिरा शशिनी चैव च्छाया संपूर्णमण्डला ॥
पुष्टिश्चैवामृता चेति कला सोमस्य षोडश ।
अकारादिस्वरयुताः पूजनीया मनीषिभिः ॥
दक्षपादादि मूर्धान्तं वामे मूर्धादि सुन्दरि ।
पादान्तं पूजयेत् सर्वाः कला वै कामसोमयोः ॥

तन्त्रान्तरे ।

पृष्ठवंशात् समारभ्य शिरोऽन्तं कामवाचकम् ।
विन्यस्य विधिवन्मन्त्री पूजयेत् तत् तु मूर्धनि ॥
धर्मात्मकं समुच्चार्य कामचापपदं ततः ।
पादश्रीपादुकां दत्वा पूजयामीति पूजयेत् ॥
मूर्ध्नि पादे मुखे गुह्ये हृदये च यथाक्रमात् ।
पञ्चबाणैः पञ्चबाणान् यथास्थानेषु पूजयेत् ॥
द्राँ द्रावणपदं दत्वा बाणपादपदं ततः ।
श्रीपादुकां वदेत् पश्चात् पूजयामीति पूजयेत् ॥

ह्रीमात्मकं समुच्चार्य उन्मादबाणमुच्चरेत् ।
पादश्रीपादुकां दत्वा पूजयामीति पूजयेत् ॥
कामबीजं ततो दत्वा मोहबाणपदं ततः ।
पादश्रीपादुकां दत्वा पूजयामीति पूजयेत् ॥
ब्रह्मात्मकं समुच्चार्य संदीपनपदं ततः ।
बाणपादपदं दत्वा श्रीपादुकां ततो वदेत् ॥
पूजयामीति संपूज्य शेषे बाणं समुच्चरेत् ।
शोषणं च समालिख्य बाणपादपदं ततः ॥
श्रीपादुकां ततो दत्वा पूजयामीति पूजयेत् ।
ललाटमण्डले पश्चात् त्रिकोणं पूजयेत् ततः ॥
वाग्भवं शुभपादं च श्रीपादुकां ततो वदेत् ।
पूजयामि ततो दत्वा दक्षरेखासु पूजयेत् ॥
ह्रीमात्मकं समुच्चार्य भगपादपदं ततः ।
श्रीपादुकां ततो दत्वा पूजयामीति पश्चिमे ॥
कामबीजं समुच्चार्य भगसर्पिःपदं ततः ।
श्रीपादश्रीपदं दत्वा पादुकां च ततो वदेत् ॥
पूजयामीति चोच्चार्य पूजयेद्वामपार्श्वके ।
ह्सैँरात्मकमालिख्य भगावहपदं ततः ॥
पादश्रीपादुकां दत्वा पूजयेन्मध्यदेशतः ।
श्रीउड्डीशपदं दत्वा देवीमुड्डीश्वरीं ततः ॥
नाथदेवपदं दत्वा श्रीरक्ताम्बां ततो वदेत् ।
श्रीचर्यानाथमालिख्य पादश्रीपादुकां ततः ॥
पूजयामीत्युड्डियाने पूजयेद्धृदि सुव्रते ।

श्रीपादं च समालिख्य जालन्धरपदं ततः ॥
महापीठं समालिख्य नादहीना रमा ततः ।
जालेश्वरीपदं दत्वा देवीजालीशमालिखेत् ॥
नाथदेवपदं दत्वा श्रीजालाम्बापदं ततः ।
श्रीषष्ठीशपदं दत्वा नाथदेवपदं ततः ॥
पादश्रीपादुकां दत्वा पूजयामीति पूजयेत् ।
अनेन मनुना देवि पूजयेन्नाभिमण्डले ॥
श्रीपदं च ततो दत्वा पूर्णेश्वरीं वदेत् ततः ।
देवीश्रीपादश्रीपूर्णनाथदेवपदं तथा ॥
श्रीचामुण्डापदमाभाष्य देवीश्रीपदमालिखेत् ।
उड्डीशनाथमालिख्य देवपादपदं ततः ॥
श्रीपादुकां ततो दत्वा कामेश्वरीपदं ततः ।
देवीश्रीपदमाभाष्य कामेश्वरानन्दनाथ च ॥
श्रीमहापदमाभाष्य तुष्टाम्बाश्रीपदं ततः ।
मित्रीशनाथमाभाष्य पादश्रीपादुकां ततः ॥
पूजयामि ततो दत्वा पूजयेत् कामनाशने ।

तन्त्रान्तरे ।

शक्तेः सर्वशरीरं यत् पीठं पूर्णगिरिर्मतः ।
तस्याः शिरश्चन्द्रभागे उद्यानं परिकीर्त्तितम् ॥
स्तनौ जालन्धरं प्रोक्तं कामरूपं भगं स्मृतम् ।

तन्त्रान्तरे ।

गुह्यपीठस्य वामे तु गुरुपाङ्क्तिं जपेत् सुधीः ।
अनङ्गकुसुमाद्येन हृत्सरोजे यजेत् पुनः ॥
वाग्भवं ब्लैँ समुच्चार्य ब्लीमात्मकं वदेत् ततः ।

ब्लाँ ब्लीँ ब्लुँः समुच्चार्य मन्त्रेणानेन साधकः ॥
योनिमुद्रां प्रदर्श्याथ योनौ क्षोभं विचिन्तयेत् ।
वाग्भवं कामराजं च स्त्रीबीजं तदनन्तरम् ॥
क्षोभिणी नाम विद्येयं स्तनयोः क्षोभमाचरेत् ।
योनिमुद्रां प्रदर्श्याथ शनैरेव हि साधकः ॥
वाग्भवं स्फ्रुँ समुच्चार्य ब्लैँ ब्लौँ ब्लँ च ततो वदेत् ।
क्लीमात्मकं समुच्चार्य ह्लीमात्मकं समुच्चरेत् ॥
क्षमात्मकं ततो दत्वा तस्याः क्षोभं विचिन्तयेत् ।
द्राविणी नाम विद्येयं चिन्तयेद्योनिमध्यतः ॥
ततः परानन्दमयो भूत्वा निर्भरमानसः ।
चिन्तयेन्निजविद्याया बीजं मूर्ध्नि सरोजके ॥
ततस्तस्या योनिमध्ये मूलमन्त्रैश्च साधकः ।
पुष्पाञ्जलित्रयं दत्वा ततः क्षोभं विचिन्तयेत् ॥

(ज्ञानार्णवे)

दूतीदेहकृतान् न्यासान् स्वदेहेऽपि विचिन्तयेत् ।

(वीरचूडामणौ)

अथ न्यासं प्रवक्ष्यामि शिवात्मानं विभावयेत् ।

शिवात्मानमिति शिवमात्मानमित्यर्थः ।

तथा ।

पञ्चवक्त्रं महादेवं कलायुक्तं न्यसेत् क्रमात् ।
ईशानः सर्वविद्यानां शशिनी प्रथमा कला ॥
ईश्वरः सर्वभूतानामङ्गदा तदनन्तरम् ।
ब्रह्माधिपतिशब्दान्ते ब्रह्मणोऽधिपतिः पुनः ॥
ब्रह्मा सदाशिवो मेऽस्तु मरीचिसंपुटं न्यसेत् ।
41 सदाशिवोँ समुच्चार्य अंशुमालिन्यथापरा ॥

तत्पुरुषाय विद्महे कला शान्तेरितीरिता ।
महादेवाय धीमहि कलाविद्या तथैव च ॥
तन्नो रुद्रपदं पश्चात् प्रतिष्ठा कथिता कला ।
प्रचोदयात् समुच्चार्य निवृत्तिः स्यात् ततः परम् ॥
पूर्वपश्चिमयाम्येषु उत्तरेष्वप्यनुक्रमात् ।
हृदये विन्यसेद्देवि अघोरेभ्यस्तमःकलाम् ॥
अघोरेभ्यो मोहनां च ग्रीवायां विन्यसेत् ततः ।
घोरान्ते स्यात् क्रियां पश्चाद्दक्षिणांसे प्रविन्यसेत् ॥
निद्रां घोरतरेभ्यो वै वामांसे विन्यसेत् ततः ।
सर्वतः सर्वमुच्चार्य व्याधिं नाभौ प्रविन्यसेत् ॥
सर्वेभ्यस्तत्कलां मृत्युं कुक्षौ देशे प्रविन्यसेत् ।
नमस्तेऽस्तु क्षुधां पश्चात् कलां पृष्ठे न्यसेत् क्रमात् ॥
रुद्ररूपेभ्य इत्यन्ते तृषास्तारनमोऽन्तकाः ।
वामदेवाय नमोऽन्ते विरजा स्याद्गुह्यदेशके ॥
मुष्के सव्ये प्रविन्यस्य रक्षां ज्येष्ठाय वै नमः ।
रुद्राय नमो रतिं पश्चाद्वाममुष्के कलामिमाम् ॥
कालाय नम इत्यन्ते पालिनी ऊरुदक्षिणे ।
कलाकामां च देवेशि वामे विकरणाय च ॥
नमःपदं समुच्चार्य संयमनी दक्षजानुनि ।
वलक्रिया समादिष्टा वामे विकरणाय च ॥
नमोऽन्ते वृद्धिमुच्चार्य दक्षिणे स्फिचि विन्यसेत् ।
बलप्रमथनाय नमो रात्रिं वामे प्रविन्यसेत् ॥
सर्वभूतदमनाय नमोऽन्ते भ्रामणीं कलाम् ।

कटिदेशे प्रविन्यस्य नमोऽन्ते मोहिनीकलाम् ॥
दक्षिणे पार्श्वके न्यस्य उन्मनाय मनोज्वराम् ।
पादयोः स्तननासासु मूर्ध्नि बाहुयुगे न्यसेत् ॥
सद्योजातोद्भवाः सम्यगष्टौ मन्त्री कलाः क्रमात् ।
सद्योजातं प्रपद्यामि सिद्धिः स्यात् प्रथमा कला ॥
सद्योजाताय वै भूयो नमः स्याद्वृद्धिरीरिता ।
भवे द्युतिस्तृतीया स्यादभवे तदनन्तरम् ॥
लक्ष्मीश्चतुर्थी कथिता ततो नाभिभवेपदम् ।
मेधाख्या पञ्चमी प्रोक्ता कला भूयो भवस्व माम् ॥
प्रजा समीरिता षष्ठी भवान्ते स्यात् प्रभा कला ।
उद्भवाय नमः पश्चात् स्वधा स्यादष्टमी कला ॥
प्रणवाद्याश्चतुर्थ्यन्ता नमोऽन्ताश्च प्रविन्यसेत् ।
एवं न्यासविधिं कृत्वा स्वयं शैवं विभावयेत् ॥
पञ्चाक्षरं पुरस्कृत्य रुद्रध्यानपरायणः ।
सामरस्यमयं कृत्वा रक्षार्थं कवचं पठेत् ॥
बद्ध्वा तु क्षोभिणीं मुद्रां यन्त्रमध्ये विनिःक्षिपेत् ।
भगं कुण्डं स्रुवो लिङ्गमाज्यं चैव तु वीर्यकम् ॥
सर्वतत्त्वं समुत्सार्य सहस्रं जपमाचरेत् ।

(ज्ञानार्णवे)

धूपादिकं समर्प्याथ स्वलिङ्गे तदनन्तरम् ।
तारं च भुवनेशानि महात्रिपुरसुन्दरि ॥
नमः शिवाय विद्येयं दशार्णा परिकीर्त्तिता ।
अनया विद्यया देवि स्वलिङ्गे पूजयेच्छिवे ॥

महात्रिपुरसुन्दरी त्रिकूटात्मिका विद्या।

यजेत् तत्पुरुषाघोरसद्योवामेशसंज्ञकान् ॥
निवृत्तिं च प्रतिष्ठां च विद्यां शान्तिं तथैव च ।
शान्त्यतीतां च संपूज्य षडङ्गावरणं यजेत् ॥
समग्रविद्यामुच्चार्य नन्दिकेशं प्रपूजयेत् ।
मध्ये वृषणयोर्देवि गन्धपुष्पाक्षतादिभिः ॥
निवेद्य धूपपुष्पादि विजितेन्द्रियमानसः ।
सर्वसंक्षोभणा मुद्राः बद्ध्वा योनिं प्रचालयेत् ॥
क्षोभिण्या वाऽथ वा देवि गजतुण्डाख्ययाऽथ वा ।
उच्चरन् भगमालाख्यां द्राविणीबीजमुच्चरन् ॥
अक्षुब्धः सन् वरारोहे यावद्रेतः प्रवर्त्तते ।

भगमालामन्त्रस्तु तत्रैव ।

वाग्भगं भगशब्दान्ते भगे भगिनि चालयेत् ।
भगोदरि भगान्ते तु भगमाले भगावहे ॥
भगगुह्ये भगप्रान्ते योनिप्रान्ते भगान्तके ।
निपातिनि च सर्वान्ते ततो भगवशङ्करि ॥
भगरूपे ततो लेख्य नीरजायतलोचने ।
नित्यक्लिन्ने भगप्रान्ते स्वरूपे सर्वमालिखेत् ॥
भगानिमेह्यानयान्ते वरदेऽथ समालिखेत् ।
रेते सुरेते भग च क्लिन्ने क्लिन्नद्रवे ततः ॥
क्लेदय द्रावय चाथ सर्वसत्त्वान् भगेश्वरि ।
अमोघे भगविच्चे च क्षुभ क्षोभय सर्व च ॥
सत्त्वान् भगेश्वरि ब्रूयाद्वाग्भवं ब्लूँ जमादिकम् ।
मेँ ब्लूँ मैाँ ब्लूँ च हेँ ब्लूँ च हेँ क्लिन्ने च ततः परम् ॥

सर्वाणि च भगान्यन्ते मे वशं चानयेति च ।
स्त्रीबीजं च हरप्रान्ते ब्लैँ मायात्मकमक्षरम् ॥
भुवनेशीं समालिख्य विद्येयं भगमालिनी ।

(वीरतन्त्रे)

धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा ।
सुषुम्णा वर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहम् ॥
स्वाहान्तोऽयं महामन्त्र आरम्भे परिकीर्त्तितः ।
ततो जपेत् प्रियां गच्छन् स्त्रियं त्रिभुवनेश्वरीम् ॥

(भूतडामरयक्षडामरयोः)

क्षिप्त्वा शेफश्च प्रजपेद्ध्यात्वा देवीं यथोदिताम् ।
दिक्सहस्रं सहस्रं वा विना रेतोविमोक्षणम् ॥
जप्त्वा तु विधिवद्दद्याद्बलिमभ्यर्च्य तां स्त्रियम् ।
भोजयित्वा नमस्कृत्य विसृज्य प्रापयेद्गृहम् ॥
एवं कृत्वा च तत्सिद्धिस्त्रिषु लोकेषु दुर्लभा ।
जायते नात्र संदेहो ब्रह्मणा भाषितं पुरा ॥
नातः परतरोपायो मन्त्राणां साधने त्रिषु ।

(कुलामृते)

स्वाहान्तो होममन्त्रोऽयं प्रतिघाता हुतिः प्रिये ।
पूर्णाहुतिं रतान्ते च जुहुयान्मनुनाऽमुना ॥
प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ।
धर्माधर्मौ कलास्नेहं पूर्णावह्नौ जुहोम्यहम् ॥
स्वाहान्तोऽयं भवेन्मन्त्रो घोरपातकमुक्तिदः ।

(वीरतन्त्रे)

स्वाहान्तोऽयं महामन्त्रः शुक्रत्यागे प्रकीर्त्तितः ।

यदि च शक्तिरदीक्षिता भवति तदा प्रथमतस्तच्छोधनं कुर्यात् ।

तदुक्तं (कुलतन्त्रे)

अभिषेकाद् भवेच्छुद्धिर्मन्त्रस्योच्चारणाच्छ्रुतौ ।
रतिकाले महेशानि दीक्षाकाले च कन्यकाः ॥

शुद्ध्यन्तीति शेषः ।

सुरया रेतसा चापि जलेन मनुनाऽमुना ।

(यामले)

सुदीक्षिता तु या शक्तिः सैव शुद्धा भवेत् सदा ।
अदीक्षिता तु या शक्तिर्मायां तस्यै निवेदयेत् ॥

(मातङ्गीतन्त्रे-) ऽप्युक्तम् ।

दीक्षामात्रेण शुद्ध्यन्ति स्त्रियः सर्वत्र कर्मणि ।

(कुलामृतदीपिकायाम्)

अदीक्षितकुलासङ्गात् सिद्धिहानिः प्रजायते ।

तथा—

आदौ बालां समुच्चार्य त्रिपुरायै समुच्चरेत् ।
नमःशब्दं समुच्चार्य इमां शक्तिं ततो वदेत् ॥
नाद्र*क्षैर्देवि लोके भवति निन्दितः ।

तथा—

आलिङ्गने हरेद्रोगान् धनधान्यादि चुम्बने ।
नखदन्तक्षताद्यैश्च तदा मोक्षः प्रजायते ॥
सायुज्यं सङ्गमेन स्यात् सत्यमेव न संशयः ।

(रौद्रे)

तदङ्गस्पर्शनात् सौख्यं संयोगामृतलक्षणम् ।
महाकाभकलां ध्यायेत् संयोगामृतरूपिणीम् ॥
संयोगाज्जायते सौख्यं परमानन्दलक्षणम् ।
कुलद्रव्यामृतं यत्नाद्गृह्णीयाद्दुर्लभं नरः ॥
कुण्डगोलप्रहरणप्रकारस्तु कुलामृते ।

---

* सर्वपुस्तकेषु त्रुटिरत्रोपलभ्यते ।

भावयेत् कामभावेन आत्मतत्त्वं न चोत्सृजेत् ॥
शुद्धमन्त्रौषधेनैव योनेस्तु मथनं चरेत् ।
मथ्यमाने तु तस्याहिर्जायते तत्त्वमुत्तमम् ॥
गृह्णीयात् तत्प्रयत्नेन द्रव्यं कुण्डोद्भवं शुभम् ।

मन्त्रौषधं यथा (कुलोड्डीशे)

मायाऽऽगच्छपदं शुक्रस्तम्भनकारिणि ठद्वयम् ।
अनेनार्कोपरागे च जातीमूलं समानयेत् ॥
एतत् कृत्वा साधकेन्द्रः शुक्रस्तम्भनमाचरेत् ।

(ब्रह्मयामले)

तेनामृतेन दिव्येन त्रिपुरां तर्पयेत् सदा ।
सान्निध्यात् तत्क्षणाद्वाऽपि प्रीता सिद्धिं प्रयच्छति ॥
समस्तदेवतानां च तर्पणं च सदाऽमृतैः ।
गुरूणां साधकामां च सर्वेषां तर्पणं चरेत् ॥
तेनामृतेन द्रव्येण सर्वे तुष्टा भवन्ति च ।
यत्कामं कुरुते मन्त्री तत्त्तणादेव सिद्ध्यति ॥
कुलामृतं समादाय तत्रार्घे निःक्षिपेद्बुधः ।
ततः सोमकलाः पूज्याः साधकैर्निर्मलाशयैः ॥

(कौले)

मधुभाण्डसहस्रैस्तु मांसभारशतैरपि ।
नैव तुष्टा भवेद्देवी भगलिङ्गामृताद्दृते ॥

(देवीयामले)

दूतीयागविधिं वक्ष्ये कौलधर्मोत्तमोत्तमम् ।
तस्यानुष्ठानमात्रेण स्वयं ब्रह्मत्वमाप्नुयात् ॥

तथा—

दूतीयागे कृते मन्त्री सर्वज्ञो जायते ध्रुवम् ।

न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥
यैः कृतं यजनं दूत्यास्तैरिष्टाः क्रतवोऽखिलाः ।
सर्वतीर्थमयः प्रोक्तः सर्वदेवमयो भवेत् ॥
पुरश्चर्यादिसकलं कृतं तेन न संशयः ।
अश्वमेधसहस्राणि वाजपेयशतानि च ॥
आसमुद्रा च धराणी दत्ता तेन सदक्षिणा ।
मेरुमण्डलतुल्यादिसुवर्णान्यर्पितानि वै ॥
गोकोटिदानाद्यत् पुण्यं तत्पुण्यं जायते प्रिये ।
तस्मात् सर्वप्रयत्नेन दूतीयागं समाचरेत् ॥
पूजासम्पूर्णदं भद्रे सर्वारिष्टप्रशामकम् ।
योनिपूजां विना पूजा कृतमप्यकृतं भवेत् ॥
आयुरारोग्यविभवानमिताँल्लभते नरः ।
अनेनैव विधानेन विषार्त्तो निर्विषो भवेत् ॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ।
मातङ्गीशक्तिमभ्यर्च्य तया साकं समर्चयेत् ॥
मातङ्गी मन्मथोपेता सर्वकामार्थसिद्धये ।
शक्त्या साकं सदा पूज्या मातङ्गी मन्त्रदेवता ॥
सा देवी शक्तिहीना तु न ददाति मनोरथम् ।
(ब्रह्मयामले)

नारद उवाच ।

सर्वज्ञ जगतां नाथ शाक्तं चेच्छ्रुतिचोदितम् ।
मातङ्गीपूजनं तत्र कथं मुक्तिप्रदायकम् ॥
अर्चने प्रथिता वेश्या वेश्या सा तु रजःस्वला ।
रजःस्वला च मातङ्गी सा दूती सर्वमङ्गला ॥

इति प्रोक्तं त्वया पूर्वमिदानीं तद्विपर्ययः ।
तव वाक्यमनुब्रह्मन्नेतद्वद पितामह ॥

ब्रह्मोवाच ।

मा कुरुष्वात्र संदेहं वेदोक्तं शाक्तमुत्तमम् ।
अस्ति सर्वज्ञकल्पोऽसौ मतङ्गो मुनिसत्तमः ॥
वर्षाणामयुतं वत्स तप उग्रं चचार ह ।
तेन प्रीता महादेवी देवानां हितकारिणी ॥
वरं वृणुष्व भगवन् दास्यामि तव वाञ्छितम् ।
तच्छ्रुत्वा द्विजवर्यस्तां ययाचे धर्मसाधनम् ॥
हे देवि जगतां मातः प्रीता चेद्यदि सांप्रतम् ।
अपत्यतां समासाद्य मत्कुलालम्बनं कुरु ॥
इत्यभ्यर्च्य मुनिश्रेष्ठो जनयामास तां सुताम् ।
श्यामलां चारुवदनां चीनांशुकसमन्विताम् ॥
सारिकां ज्ञानसंपन्नां जपमालां कराम्बुजैः ।
धारयन्तीं विशालाक्षीं शङ्खताटङ्कशोभिनीम् ॥
सा बभूव महादेवी मातङ्गकुलनन्दिनी ।
मातङ्गीति तदा देवी विख्याता वरदायिनी ॥
तां विलोक्य तदा शम्भुर्दूतीं चक्रे सुलक्षणाम् ।
त्रिपुरं जेतुकामेन योनिपूजा तदा कृता ॥
प्रत्यालीढा स्थिता देवी पूजां स्वीकृत्य निश्चला ।
तदा दृष्टरजोभूतां तां बव्रे शङ्करः प्रियाम् ॥
तदा प्रभृति संजातो दूतीयागो मनोहरः ।
प्रणयेन तदा शम्भुस्तया सार्धं रतं भवेत् ॥

प्रणवान्तर्गतं मन्त्रं मातङ्ग्याख्यं विनिर्गतम् ।
सर्वसौभाग्यजननं मालामन्त्रमभूत् तदा ॥
रमा चापि पदं दिव्यमनिन्द्यं लोकरञ्जनम् ।
मातङ्गी मन्त्रमत्यर्थं मन्मथप्रतिपादकम् ॥
आद्यन्तशून्या सा देवी तस्मात् ख्याता तदन्त्यजा ।
मातङ्गी अन्त्यवर्णस्था तदा सा अन्त्यजाऽभवत् ॥
अन्त्यजानां द्विजानां च चक्रे ऐक्यं प्रशस्यते ।
सा देवी सर्ववर्णानां वरं दत्वा निरुत्तरम् ॥
कृत्वा सङ्केतसमयं चक्रे मातङ्गमुत्तमम् ।
न दोषः सर्ववर्णानामिति दत्वा वरं तदा ॥
न दोषं तत्र विज्ञेयं सर्वं ते श्रुतिनोदितम् ।
देवीमुद्दिश्य मोक्षार्थं कृतं यद्दोषवर्जितम् ॥
एतच्छास्त्रमिदं दिव्यं न वाच्यं श्रुतिचोदितम् ।
अन्तर्यागमिदं ज्ञेयं बहिर्यागं च वैदिकम् ॥
मन्त्रतन्त्रसमायुक्तं तद्द्वयं ब्रह्मबोधकम् ।
चक्रसंकेतसमयं सर्वं तुभ्यं प्रकाशितम् ॥
गोपनीयं प्रयत्नेन न वाच्यं पशुसन्निधौ ।
त्यज शङ्कां महाभाग सत्यमेतन्मयोदितम् ॥
मातङ्गीपूजनं श्रेष्ठं दूतीयागे मनोहरम् ।

दूतीयागे च विप्राणां नाधिकारः ।
तदुक्तं (बृहच्छ्रीक्रमसंहितायाम्)

वामागमोऽपि विप्रस्तु मद्यमांसं न भक्षयेत् ।
स्वकीयां परकीयां वा नाकृष्य ब्राह्मणो यजेत्—इति ॥

(महाकालसंहितायामपि)

स्वयोषां परयोषां वा नैवाकृष्य द्विजो जपेत् ।

लोभाद्यदि चरेद्देवमधो याति द्विजस्तदा ॥
इहामुत्र फलं नास्ति हीनायुरपि जायते ।

ब्राह्मणेतराणामपि योगिनामेवात्राधिकारः ।
तदुक्तं (सिद्धिनाथसंहितायाम्)

अद्वैतज्ञाननिष्ठो यो योऽसौ संसारपारगः ।
स एव जगदे दूत्या नाधिकारी भवेदिति ॥

इति दूतीयागविधिः ।

अथ शावरमन्त्रपुरश्चरणम् ।

(मेरुतन्त्रे)

अथ शावरमन्त्राणां पुरश्चरणमुच्यते ।
कामरूपाख्यदेशे तु कामाख्या यत्र देवता ॥
कामशैलोऽस्ति यत्रासौ कामपीठं तदुच्यते ।
तत्र संलेख्य मन्त्रं हि वंशोपरि यथाक्रमम् ॥
गुरूणां वाचनीयः स स्वयं पश्चात् पठेन्मनुम् ।
गुरोरभावे तस्यैव मूले शैलस्य पर्वणि ॥
लिखित्वा प्रपठेन्मन्त्रं कामपीठं गुरुर्मतः ।
अथ वा योगिनीशैले दक्षिणस्यां दिशि ध्रुवम् ॥
योगाम्बा यत्र देवी सा लिखित्वा प्रपठेन्मनुम् ।
ज्वालामुखी समीपे वा हिङ्गुलायाः समीपतः ॥
लिखित्वा प्रपठेन्मन्त्रं नान्यथैव प्रसिद्ध्यति ।
मुख्यतः स्त्री समीपे हि कामपीठे मनुग्रहः ॥
अथ वा सर्वदेशेषु मन्त्रग्रहणमुच्यते ।
तालपत्रे मनुं वक्ष्ये पूर्णकुम्भे निधापयेत् ॥
भास्करं च गुरुं ध्यात्वा वाचयेत् त्रिगुरू रविः ।

एतावता शावरमन्त्राणां विधिवद्ग्रहणमेव पुरश्चरणमित्युक्तम् ।

अथ वीरसाधनम् ।

तत्रादौ चितासाधनमुक्तं (योगिनीहृदये)

देव्युवाच ।
भगवन् सर्वमन्त्रज्ञ सर्वशास्त्र विशारद ।
श्मशाने च पुरश्चर्या त्वया संपूजिता पुरा ॥
कथयस्व तदेदानीं यदि स्नेहोऽस्ति मां प्रति ।

ईश्वर उवाच ।
यस्मिन् परिश्रमेणापि नृणां सिद्धिः समीहिता ।
न जाता तत्र कर्त्तव्या साधकैर्वीरसाधना ॥
पुरा सिद्ध्यै नृपाणां च कर्त्तव्ये समुपस्थिते ।
नान्यसिद्धिकरं शीघ्रं वीरसाधनवर्जितम् ॥
तस्मात् सर्वप्रयत्नेन विधेया वीरसाधना ।
भयमुक्तेन शुचिना सर्वसिद्धिमभीप्सिता ॥
नानया दुर्लभं किंचित् साधकस्य समीहितम् ।
गिरिजे तत् प्रयत्नेन याचेनयं प्रकाश्यते ॥
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ।
कृष्णपक्षे विशेषेण साधयेदनया हितम् ॥
(वीरतन्त्रे)
महावीरक्रमं देव सूचितं न प्रकाशितम् ।
कथयस्व महादेव सर्वसिद्धिप्रदं महत् ॥
भैरव उवाच ।
सर्वसिद्धिप्रदं साक्षात् सर्वदेवनमस्कृतम् ।
सर्वपापहरं देवि सर्वरोगविनाशनम् ॥
ब्रह्मविष्णुशिवादीनां दिक्पालानां च भाविनि ।

भैरवानां च सर्वेषां गन्धर्वाणां च योगिनाम् ॥
शश्वत् सिद्धिप्रदं देवि सर्वेषामालयं महत् ।
नान्यत् सिद्धिप्रदं देवि वीरसाधनवर्जितम् ॥
महाबलो महावीरो महासाहसिकः शुचिः ।
महास्वच्छो दयावाँश्च सर्वभूतहिते रतः ॥
तेषां कृते महादेवि कथितं वीरसाधनम् ।

तथा—

घटीबन्धनवस्त्रं वै मूलेन परिधाय च ।
तद्बाह्ये च पुनर्वस्त्रं मूलेनाङ्गविलेपनम् ॥
कृतोष्णीषश्च मूलेन सिन्दूरेणोर्ध्वपुण्ड्रकम् ।
इष्टदेवं गुरुं नत्वा यात्रा प्रहरमध्यतः ॥
कार्या च साधकैः सार्धं हृदि मन्त्रं परामृशन् ।
अक्षुब्धो भुक्तभोज्यश्च यदि स्याद्वीरसाधकः ॥
दिव्यो वा न पशुस्तत्र भुक्त्वा साधनमाचरेत् ।
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ॥
भौमवारे तमिस्रायां साधयेत् सिद्धिमुत्तमाम् ।
उपचारं समादाय कुलामृतरसं तथा ॥
सामिषान्नं गुडं छागं सुरा पिष्टकमेव च ।
नानाफलं च नैवेद्यं स्वस्वकल्पोक्तसाधनम् ॥
चितास्थाने समानीय सुहृद्भिः शस्त्रपाणिभिः ।
समानगुणसंपन्नैः साधको गतभीः स्वयम् ॥
न निरीक्षेच्चतुर्दिक्षु देवताध्यानतत्परः ।
भीतश्चेत् साधकस्तत्र चतुर्दिक्षु च साधकः ॥
स्वगुरुं भ्रातृवर्गं वा ब्राह्मणान् वाऽपि सुव्रतान् ।

सुहृदानपि रक्षार्थं कियद्दूरे निवेशयेत् ॥
नो चेत् केवलमेवासौ भैरवः परिकीर्त्तितः ।
अक्षालितां चिताभूमिं गत्वा साधकसत्तमः ॥
प्रत्यातिलां यदि प्रायः कारयेदस्थिसंचयम् ।

(यामले)

असंस्कृता चिता ग्राह्या न तु संस्कारसंस्कृता ।

तथा—

संकल्पं प्रथमं कुर्यात् स्वस्तिवाचनपूर्वकम् ।
सामान्यार्घं विधायैतत् ततः पूजां समारभेत् ॥
वस्त्रालङ्कारभूषाद्यैर्भूषितः पूर्वदिङ्मुखः ।

संकल्पस्तु—

ॐ अद्येत्यादि अमुकगोत्रः श्रीमदमुकशर्माऽमुकमन्त्रसिद्धिकामः श्मशानसाधमनहं करिष्ये—इत्येवंरूपः ।

(वीरतन्त्रे)

अस्त्रान्तमूलमन्त्रेण प्रोक्षणं यागभूमिषु ।
गुरुपादयुगं ध्यात्वा गणेशं वटुकं तथा ॥
योगिनीं मातृकां चैव वामपादपुरःसरम् ।
ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः ॥
पिशाचाः सिद्धयक्षाश्च गन्धर्वाप्सरसां गणाः ।
योगिन्यो मातरो भूताः सर्वाश्च खेचरस्त्रियः ॥
सिद्धिदास्ता भवन्त्वत्र तथा च मम रक्षकाः ।
प्रणम्य मनुनाऽनेन पुष्पाञ्जलित्रयं क्षिपेत् ॥
श्मशानाधिपतिं पश्चाद्भैरवं कालभैरवम् ।
महाकालं यजेद्यत्नात् पूर्वादिदिक्चतुष्टये ॥

पाद्याद्यादिभिश्च मन्त्रज्ञो बलिं पश्चान्निवेदयेत् ।
शब्दबीजं ततः पश्चात् श्मशानाधिपतत्परम् ॥
इममन्ते सामिषान्नं बलिं गृह्णपदं ततः ।
गृह्ण गृह्णापय युगं विघ्ननिवारणं ततः ॥
कुरु सिद्धिं मे समुक्त्वा* प्रयच्छ स्वाहयाऽन्वितम् ।
ताराद्यमनुना देवि प्रथमो बलिरीरितः ॥
मायान्ते भैरवात् पश्चाद्भयानकपदं ततः ।
पूर्वे बलिं समुद्धृत्य दक्षिणे बलिमाहरेत् ॥
हूमन्ते तु महाकालात् पश्चात् पूर्ववदुद्धरेत् ।
पश्चिमे कालदेवाय प्रणवाद्येन कल्पयेत् ॥
शब्दान्ते कालशब्दान्ते भैरवेति पदं ततः ।
श्मशानाधिप इत्येवं पूर्ववच्चान्तरे हरेत् ॥
चितामध्ये ततो दद्याद्बलित्रयमनुत्तमम् ।
कालरात्रिमहाकालि कालिके घोरनिःस्वने ॥
गृहाणेमं बलिं मातर्देहि मे सिद्धिमुत्तमाम् ।
हूँ कालिकायै स्वाहेति बलिं दत्वा भूतनाथाय दापयेत् ॥
शब्दान्ते भूतनाथान्ते श्मशानाधिप इत्यपि ।
प्रणवाद्येन मन्त्रेण दापयेद्बलिमुत्तमम् ॥
हूँ सर्वगणनाथान्ते अधिपतिपदं तथा ।
श्मशाने मस्तके दत्वा पूर्ववच्च समुद्धरेत् ॥
ताराद्येन बलिं दत्वा पञ्चगव्येन सुन्दरि ।
अस्थिसंप्रोक्षणं कृत्वा पीठमन्त्रं न्यसेत् पुनः ॥

---

* तान्त्रिकप्रयोगोऽयम् ।

भूर्जे वा वटपत्रे वा तत्र पीठमनुं न्यसेत् ।

तन्त्रान्तरे ।

ततश्चितापश्चिमत एकीकृत्यास्थिसंचयम् ।
ॐ ह्रीँ आधरशक्तये नम इत्यणुना पुनः ॥
पञ्चगव्येन संप्रोक्ष्य भूर्जे वा वटपत्रके ।
हसौरिति लिखेन्मन्त्रं स्थापयेत् तत्र तत् पुनः ॥
कम्बलाद्यासनं तत्र विन्यस्याधारशक्तये ।
नम इत्यणुना तत्र ह्रीमाद्यां च प्रपूजयेत् ॥

(वीरतन्त्रे)

पीठमास्तीर्य तस्मिन् वै बद्धवीरासनस्ततः ।
वीरार्दने देवेशि लोष्टान् दिक्षु विनिःक्षिपेत् ॥
कूर्चबीजद्वयं देवि मायायुग्मं ततः परम् ।
कालिके घोरदंष्ट्रे च प्रचण्डे चण्डनायिके ॥
दानवान् दारयेत्युक्त्वा हनेति द्वितयं ततः ।
पर वीरं महाविघ्नं छेदयेति द्वयं ततः ॥
सर्वास्त्रान्तो द्विठान्तोऽयं वीरादनुमनुः स्मृतः ।
अनेन मन्त्रितं लोष्टं दशदिक्षु विनिःक्षिपेत् ॥
तन्मध्ये भैरवो देवो विघ्नैर्न परिभूयते ।
यदि प्रमादाद्देवेशि साधको भयविह्वलः ॥
तैस्तैः सर्वैः सुहृद्भिश्च रक्षितो नाभिभूयते ।
अर्केन्दुसितवाद्यालतूलैर्निर्मितवर्त्तिकाम् ॥
प्रदीपं यत्र संस्थाप्य अस्त्रं तत्र प्रपूजयेत् ।
गते तस्मिन् महादीपे विघ्नैश्च परिभूयते ॥
तदधश्चास्त्रमन्त्रेण निखनेत् कुलदीपिकाम् ।

तत्तत्कल्पविधानेन भूतशुद्ध्यादिकं चरेत् ॥
षोढां वा तारकां वाऽपि विन्यस्य पूजयेत् ततः ।

देवतामिति शेषः ।
अत एव (यामलादौ)

ततः पञ्चोपचारेण पुरतो देवतां यजेत् ।
निमील्य चक्षुषी पश्चाद्देवं ध्यात्वा मनुं जपेत् ॥
एकाक्षरी यदि भवेद्दिक्सहस्रं ततो जपेत् ।
द्व्यक्षरे चाष्टसाहस्रं त्र्यक्षरे ह्ययुतार्धकम् ॥
ततः परं तु मन्त्रज्ञो गजान्तकसहस्रकम् ।
निशार्धात् तु समारभ्य उदयान्तं समाचरेत् ॥
यद्यसह्यं भयं कर्णनेत्रे वस्त्रेण बन्धयेत् ।
ततोऽर्धरात्रपर्यन्तं यदि किञ्चिन्न दृश्यते ॥
जयदुर्गामनुनाऽर्घं तेनैव सर्षपान् क्षिपेत् ।
ॐ तिलोऽसि सोमदेवत्यो गोसवस्तृप्तिकारकः ॥
पितॄणां स्वर्गदाता त्वं मर्त्यानां मम रक्षकः ।
भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारकः ॥
इति क्षिप्त्वा तिलाँस्तत्र चतुर्भागैः शिवादितः ।
ततः सप्तपदं गत्वा पुनस्तत्रैव संविशेत् ॥
एवं तत्रापि संपूज्य प्रजपेन्मनुमुत्तमम् ।
निर्भयः सन् जपेत् तावद्यावत् सिद्धिः प्रजायते ॥
भयं तु स्वप्नवज्ज्ञेयं परेऽह्नि शेषमाचरेत् ।

(वामकेश्वरतन्त्रे)

जपान्ते च वलिं दद्याद्देवतायै यथाविधि ।
महिषं छागलं चापि गृहीत्वा वरमेव च ॥

गृहं गच्छेत् सुहृद्वर्गैः सार्धं सुहृष्टमानसः ।

इति चितासाधनाविधिः ।

अथ शवसाधनविधिः ।

(भूतडामरे)

यदुक्तं भावसर्वस्वे सर्वतन्त्रेषु गोपितम् ।
वीरसिद्धिविधानं हि देवदेवेन शम्भुना ॥
यस्य विज्ञानमात्रेण मन्दभाग्योऽपि सिद्ध्यति ।

तथा—

पुरश्चरणसंपन्नो वीरसिद्धिं समाचरेत् ।
पुत्रदाराधनस्नेहलोभमोहविवर्जितः ॥
मन्त्रं वा साधयिष्यामि देहं वा पातयाम्यहम् ।
प्रतिज्ञामीदृशीं कृत्वा वलिद्रव्याणि चिन्तयेत् ॥

(वीरतन्त्रे)

पूर्वोक्तमुपहारादि समादाय तु साधकः ।
साधयेत् स्वहितां सिद्धिं साधनस्थानमाश्रयेत् ॥
गुरुध्यानादिकं सर्वं पूर्वोक्तमाश्रयेत् सुधीः ।
वीरार्दनान्तिके भूमौ मायामोहो न विद्यते ॥
ये चात्रेत्यादिमन्त्रेण भूमौ पुष्पाञ्जलित्रयम् ।
श्मशानाधिपतीनां तु पूर्ववद्बलिमाहरेत् ॥
अघोराख्येण मन्त्रेण* वलिसाधनमाचरेत् ।
सुदर्शनेन वा रक्षामुभाभ्यां वा प्रकल्पयेत् ॥
मायास्फुरद्वयं भूयः प्रस्फुरद्वितयं पुनः ।
घोरघोरतरेत्यन्ते तन्नो रूपपदं ततः ॥
चटयुग्मान्तरान्ते च प्रचट द्वितयं पुनः ।

शिखाबन्धनमाचारेदित्यन्यत्र पाठः ।

हेयुग्मं रमयुग्मं च ततो बन्धुयुगं ततः ॥
पातय द्वितयं वर्म फडन्तः समुदाहृतः ।
एकपञ्चाशदर्णोऽयमघोरास्त्रमयो मनुः ॥
हालाहलं समुद्धृत्य सहस्रारस्वरूपकम् ।
वर्मास्त्रान्तं महामन्त्रं सुदर्शनस्य कीर्त्तितम् ॥
भूतशुद्धिं ततः कृत्वा न्यासजालं प्रविन्यसेत् ।
जयदुर्गाख्यमन्त्रेण सर्षपान् दिक्षु निःक्षिपेत् ॥
ॐ दुर्गे दुर्गे रक्षणि स्वाहा—इति जयदुर्गाख्यमन्त्रः ।
तिलोऽसीति च मन्त्रेण तिलानपि विनिःक्षिपेत् ।
यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतम् ॥
रज्जुविद्धं सर्पदष्टं चाण्डालैर्वाऽभिभूतकम् ।
तरुणं सुन्दरं शूरं रणे नष्टं समुज्ज्वलम् ॥
पलायनविशून्यं च संमुखे रणवित्तमम् ।
स्वेच्छामृतं द्विवर्षं च वृद्धां स्त्रीं च द्विजं तथा ॥
अन्नाभावमृतं कुष्टं सप्तरात्रोर्ध्वगं तथा ।
एवं चाष्टविधं त्यक्त्वा पूर्वोक्तान्यतमं शवम् ॥
गृहीत्वा मूलमन्त्रेण पूजास्थाने समानयेत् ।
चाण्डालाद्यभिभूतं वा शीघ्रं सिद्धिफलप्रदम् ॥
प्रणवाद्यस्त्रमन्त्रेण शवस्य प्रोक्षणं चरेत् ।
प्रणवं कूर्चबीजं च मृतकाय नमोऽस्तु फट् ॥
पुष्पाञ्जलित्रयं दत्वा प्रणमेत् स्पर्शपूर्वकम् ।
रे वीरपरमानन्द शिवानन्द कुलेश्वर ॥
आनन्दभैरवाकार देवीपर्यङ्कशङ्कर ।

वीरोऽहं त्वां प्रयच्छामि उत्तिष्ठ चन्द्रिकार्चने ॥
प्रणम्यानेन मन्त्रेण स्वापयेत् तदनन्तरम् ।
तारं शब्दं मृतकाय नमोऽन्तं मन्त्रमुच्यते ॥
शवस्वापनमन्त्रोऽयं सर्वतन्त्रेषु देशितः ।
धूपेन धूपितं कृत्वा गन्धादि वा प्रलिप्य च ॥
रक्ताक्तो यदि देवेश भक्षयेत् कुलसाधकम् ।
गत्वा शवस्य सान्निध्यं धारयेत् कटिदेशतः ॥
यद्युपद्रावयेत् तस्य दद्यान्निष्ठीवनं मुखे ।
पुनः प्रक्षालितं कृत्वा जपस्थानं समानयेत् ॥
कुशशय्यां परिस्तीर्य तत्र संस्थायेच्छवम् ।
एलालवङ्गकर्पूरजातीखादिरसार्द्रकैः ॥
ताम्बूलं तन्मुखे दत्वा शवं कुर्यादधोमुखम् ।
स्थापयित्वा तस्य पृष्ठं चन्दनेन विलेपयेत् ॥
बाहुमूलादिकट्यन्तं चतुरस्रं विभावयेत् ।
मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितम् ॥
ततश्चैणेयमजिनं कम्बलान्तरितं न्यसेत् ।
द्वादशाङ्गुलमानेन यज्ञकाष्ठानि दिक्षु च ॥
इमं वलिं गृह्ण युगं गृह्णापय युगं ततः ।
विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छेति द्वयम् ॥
अनेन मनुना पूर्वं वलिं दद्याच्च सामिषम् ।
स्वस्वनामादिकं दत्वा पूर्वद्बलिमाहरेत् ॥
सर्वेषां लोकपालानां ततः साधकसत्तमः ।
शवाधिस्थानदेवेभ्यो वलिं दद्यात् सुरया सह ॥

चतुःषष्टियोगिनीभ्यो डाकिनीभ्यो बलिं दिशेत् ।
पूजाद्रव्यं सन्निधौ च दूरे चोत्तरसाधकम् ॥
संस्थाप्यासनमभ्यर्च्य स्वमन्त्रान्ते त्रपां ततः ।
फडित्यनेन मन्त्रेण तत्राश्वारोहणं विशेत् ॥
कुशान् पादतले दत्वा शवकेशान् प्रमार्ज्य च ।
दृढं निबन्ध्य जुटिकां कृतसंकल्पसाधकः ॥
शवोपरि समारूह्य प्राणायामं विधाय च ।
वीरार्दनेन मन्त्रेण दिक्षु लोष्टान् समाक्षिपेत् ॥
ततो देवं समभ्यर्च्य उपचारैस्तु विस्तरैः ।
शवास्ये विधिवद्देवि देवताप्यायनं चरेत् ॥
उत्थाय संमुखे स्थित्वा पठेद्भक्तिपरायणः ।
वशो मे भव देवेश ममामुकपदं ततः ॥
सिद्धिं देहि महाभाग भूताश्रयपदाम्बरः ।
मूलं समुच्चरन्मन्त्री शवपादद्वयं ततः ॥
पट्टसूत्रेण बन्धीयात् तदोत्थातुं न शक्यते ।
ॐ भीरुभीम भयाभाव भव्यलोचनभावुक ॥
त्राहि मां देवदेवेश शवानामधिपाधिप ।
इति पादतले तस्य त्रिकोणं चक्रमालिखेत् ॥
तदोत्थातुं न शक्नोति शवोऽपि निश्चलो भवेत् ।
उपविश्य पुनस्तस्य बाहू निःसार्य पार्श्वयोः ॥
हस्तयोः कुशमास्तीर्य पादौ तत्र निधापयेत् ।
ओष्ठौ तु संपुटौ कृत्वा स्थिरचित्तः स्थिरेन्द्रियः ॥
सदा देवीं हृदि ध्यात्वा मौनी तु जपमाचरेत् ।
श्मशाने प्रोक्तसङ्ख्याभिर्जपं कुर्यात् कुलेश्वरि ॥

अथ वाऽऽरम्भकालात् तु यावच्चोदयते रविः ।
यद्यर्धरात्रिपर्यन्तं जप्ते किंचिन्न लक्ष्यते ॥
तदा पूर्ववदर्घादिसमयादागतानि च ।
कृत्वोपविश्य तत्रैव जपं कुर्यादनन्यधीः ॥
चलासनाद्भयं नास्ति भये जाते वदेत् ततः ।
यत् प्रार्थयसि देवेशि दातव्यं कुञ्जरादिकम् ॥
दिनान्तरे प्रदास्यामि स्वनाम कथस्व मे ।
इत्युक्त्वा संस्कृतेनैव निर्भयस्तु पुनर्जपेत् ॥
ततश्चेन्मधुरं वक्ति वक्तव्यं मधुरं ततः ।
तदा सत्यं च संस्कार्यं नरं च प्रार्थयेत् ततः ॥
यदि सत्यं न कुर्याच्च वरं वा न प्रयच्छति ।
तदा पुनर्जपेद्धीमानेकाग्रं मानसं भजन् ॥

(यक्षडामरे)

न पश्येदद्भुते जाते न भाषेत च न स्पृशेत् ।
एकचित्तो जपं कुर्याद्यावत् प्रत्यक्षतां व्रजेत् ॥

(वीरतन्त्रे)

नररूपो नात्र देवो यो नरो वोपसर्पति ।
यत्नतस्तेन बोद्धव्यं नरो वा देवयोनयः ॥
माता वा तत्सुता वाऽपि मातुलानी तथाऽपि वा ।
आगत्य विघ्नं चरते माययाऽऽच्छाद्य विग्रहम् ॥
उत्तिष्ठ वत्स ते कार्यं सर्वं जातं न संशयः ।
प्रभातसमयो जातस्त्वत्पिता क्रोशते गृहे ॥
प्रायेण सकला लोका राजानो दण्डधारिणः ।
कदा चित् केनाप्यादिष्टस्तदा किं ते करिष्यति ॥

इत्यादिविविधैर्वाक्यैर्न जपं परिसंत्यजेत् ।
मृताः पितृगणास्तत्र दूरदेशनिवासिनः ॥
बान्धवास्तत्र आयान्ति देवरूपधरास्ततः ।
स्त्रीपुत्रसेवकादींश्च गृहीत्वा नीयते परैः ॥
रुदन्ति पुत्रकाः सर्वे भ्रातरोऽनुजशिष्यकाः ।
निजकान्ताङ्गसंस्पर्शं वस्त्राद्याभरणादिकम् ॥
गृहीत्वा नीयते पत्नी पालकैस्तद्भयं त्यजेत् ।
यदि न क्षुभ्यते तत्र तदा किं वा न लभ्यते ॥
स्त्रीरूपधारिणी देवी द्विजरूपधरः पुमान् ।
वरं गृह्णेति शब्दं वै त्रिवारान्ते वरं लभेत् ॥
साधुनाऽसाधुना वाऽपि योषिच्चेद्वरदायिनी ।
तदा वीरपतेस्तस्य किं न सिद्ध्यति भूतले ॥
निष्पापः पुरुषश्चैव कुले चैव सुसंस्कृतः ।
असंस्कृतवरा देवी पापयुक्ता न संशयः ॥
संमुखेऽसंमुखे वाऽपि संस्कृतं वक्ति चापरम् ।
सैव देवी न संदेहः स देवो भैरवः स्वयम् ॥
न चेदेवं भवेच्चैव मायापुटितविग्रहात् ।
वरयेन्न वरं तत्र न वरं प्रवदेत् क्व चित् ॥
स चेत् संस्कृतमाख्यातं वक्ति वक्तव्यमीदृशम् ।
न चेत् स्वयं कौलिकोक्त्या वरं ग्राह्यं निराकुलम् ॥
अथ वा उत्कटं किञ्चिल्लभेताप्यात्मनो हितम् ।
शब्दो वा जायते सम्यगमृतं वाऽपि लभ्यते ॥
सर्वं विचार्य गृहीतव्यमेवं दिक् परिकीर्त्तिता ।

देव्याकृतयो बहुधा नराद्याकृतयः क्व चित् ॥
अवश्यं तत्र भेतव्यं न तत्र प्रत्ययः क्व चित् ।
भैरवा वटुकाश्चैव कुलशास्त्रपरायणाः ॥
एतच्छास्त्रप्रसङ्गेन कृत्या कुटिलविग्रहाः ।
पुत्रो भूत्वा वरयेत् तं नारी भूत्वा विमोहयेत् ॥
तस्मात् तत्त्वपरो वीर आचारे यत्नमाचरेत् ।

(भूतडामरे)

वदत्यागत्य चेष्टं वा देहस्फूर्त्तिं करोति हि ।
एतेन जायते वीरसिद्धिर्दद्यात् ततो वलिम् ॥
देवतां च गुरुं नत्वा विसृज्य हृदयं पुनः ।
स्थापयेत् तोषयेद्विद्वान् शवं तोये विनिःक्षिपेत् ॥

(वीरतन्त्रे)

सत्ये कृते वरं लब्ध्वा संत्यजेच्च च जपादिकम् ।
जातं फलमिति ज्ञात्वा जूटिकां मोचयेत् ततः ॥
संप्रक्षाल्य च संस्थाप्य जूटिकां मोचयेत् पदे ।
पदचक्रं मार्जयित्वा पूजाद्रव्यं जले क्षिपेत् ॥
शवं जलेऽथ गर्त्ते वा निःक्षिप्य स्नानमाचरेत् ।
ततस्तु स्वगृहं गत्वा वलिं दत्वा दिनान्तरे ॥
अग्रिमरात्रौ तु येषां देवानां यजमानोऽहम् ।
ते गृह्णन्तु मया दत्तं वलिमिमं च सामिषम् ॥
अथ यैर्याचितश्चाश्वनरकुञ्जरशूकरान् ।
दत्वा पिष्टमयानेव कर्त्तव्यं समुपोषणम् ॥

तत्रान्तरे ।

यवक्षोदमयं वाऽपि शालिक्षोदमयं च वा ।

चन्द्रहासेन विधिवत् तत्तन्मन्त्रेण पातयेत् ॥
परेऽह्नि नित्यमाचर्य पञ्चगव्यं पिवेत् ततः ।
ब्राह्मणान् भोजयेत् तत्र पञ्चविंशतिसंख्यकान् ॥
पञ्च पञ्च गृहीतान् वा क्रमाच्चैव दशावधि ।
ततः स्नात्वा च भुक्त्वा च निवसेदुत्तमस्थले ॥
यदि न स्याद्विप्रभोज्यं तदा निर्धनतां व्रजेत् ।
तेन चेन्निर्धनत्वं स्यात् तदा देवः प्रकुप्यति ॥
त्रिरात्रं वाऽथ षड्रात्रं गोपयेत् कुलसाधनम् ।
शय्यायां यदि गच्छेद्वा तदा व्याधी प्रजायते ॥
गीतं श्रुत्वा च वधिरो निश्चक्षुर्नृत्यदर्शनात् ।
यदि वक्ति दिने वाक्यं तदा स मूकतां व्रजेत् ॥
पञ्चदशदिनान्ता हि देहे देवस्य संस्थितिः ।
गोब्राह्मणानां देवानां निन्दां कुर्यान्न कुत्र चित् ॥
देवगोब्राह्मणादींश्च प्रत्यहं तु स्पृशेच्छुचिः ।
प्रातर्नित्यक्रियान्ते तु विल्वपत्रोदकं पिवेत् ॥
ततः स्नायात् तु तीर्थादौ प्राप्ते षोडशवासरे ।
स्वाहान्तं मूलमुच्चार्य तर्पयामि नमःपदम् ॥
एवं पदत्रयादूर्ध्वं देवानां तर्पणं जलैः ।
मुनितर्पणशून्यस्य न स्याद्देवस्य तर्पणम् ॥
इत्यनेन विधानेन सिद्धिमाप्नोति निश्चितम् ।
इह भुक्त्वा वरान् दिव्यानन्ते याति हरेः पदम् ॥
अनङ्गं साङ्गमपि वा निष्फलं सफलं च वा ।
कृत्वा साधनमेवैतच्छक्तेः प्रियतमो भवेत् ॥

शवाभावे श्मशाने वा कर्त्तव्या वीरसाधना ।
ये भावा यस्य वै प्रोक्तास्तैर्भावैर्यदि नार्चयेत् ॥
ईदृशक्रमयोगेन भ्रष्टो भवति साधकः ।
नोपदिशेत् तत्र भावं न पूजां तत्र संदिशेत् ॥
श्मशानान्तं गृहीत्वा तु तावच्छुद्धिः प्रजायते ।
(वीरचूडामणौ)
अथ वाऽन्यप्रकारेण साधनं कथयामि ते ।
जपस्थानं तु संशोध्य खननादि प्रयत्नतः ॥
तन्मध्ये च वलिं दद्याल्लिखेद्यन्त्रं त्रिकोणकम् ।
तन्मध्ये च महाशङ्खं निवेश्य मुण्डपञ्चकम् ॥
तस्योपरि महाप्रेतमखण्डाङ्गं सुशोभनम् ।
उद्वर्त्तनादिकं कुर्यात् स्नापयेद्विधिपूर्वकम् ॥
परिधाप्यं रक्तवस्त्रं नेत्राञ्जनसमीरितम् ।
ताम्बूलादि मुखे दद्याल्ललाटे रक्तचन्दनम् ॥
हृदये च लिखेद्यन्त्रं पद्ममध्ये त्रिकोणकम् ।
पूजायन्त्रं ललाटे च शस्त्रेण विलिखेत् ततः ॥
मूर्ध्नि बाहौ तथा हस्ते पादे चैव तथा कटौ ।
खदिरादीनि काष्ठानि कीलान्यारोपयेत् सुधीः ॥
बन्धकं वर्द्धयेत् तत्र दृढबन्धेन बन्धयेत् ।
षट्पात्रेषु वलिं दद्यात् कीले कीले पृथक् पृथक् ॥
माषं मांसं तथा मत्स्यं पायसं त्रिविधाः सुराः ।
मोदकं च महापूपं दुग्धान्नोत्सर्गमाचरेत् ॥
क्रोधीशवह्निमारूढं तूर्यस्वरसमन्वितम् ।
वर्मबीजं समुच्चार्य श्मशानकालिकेति च ॥

पूर्वबीजं समालिख्य अस्त्रान्तो मन्त्र उच्यते ।
मायाबीजं समुच्चार्य श्मशानभैरवाय च ॥
महाकालाय देवाय सर्वविघ्नहरो भव ।
वलिं गृह्ण द्विधा कुर्यात् त्रयोदशं सविन्दुकम् ॥
श्मशानवासिनो रुद्रा अस्थिमांसवलिप्रियाः ।
विघ्नं निवारय सम्यग्वलिं गृह्ण द्विधा पुनः ॥
विघ्नं निवारय युगं वरं चैव प्रयच्छ मे ।
द्विठान्तो मन्त्र इत्युक्तो वलिरुक्तविधानतः ॥
माया लज्जा तथा लक्ष्मीर्नन्दिनीशत्रयं लिखेत् ।
नारायणस्तथा सूक्ष्मपरं तु मधुसूदनः ॥
योगिनीभ्यः परं पश्चात् श्मशानवासिनीति च ।
प्रचण्डा चण्डरूपायै कर्त्तृखर्परधारिणी ॥
वलिं गृह्णापय युगं सर्वविघ्नं निवारय ।
वरं देहि पदं ब्रूयाद्द्विठान्तो योगिनीवलिः ॥
रौद्रं वह्निसमारूढं चतुर्दशस्वरान्वितम् ।
विन्दुनादकलाक्रान्तं क्षेत्रपालं च ङेऽन्तम् ॥
श्मशानवासिने ब्रूयाच्छोणितास्थिप्रियाय च ।
द्विठान्तं मन्त्रमुच्चार्य क्षेत्रपालवलिं हरेत् ॥
वाराहीबीजमुद्धृत्य बीजं पश्चान्तकं पुनः ।
वक्रतुण्डायेति पदं वर्म चैव समुद्धरेत् ॥
वलिं गृह्णपदं ब्रूयाद्विघ्नं निवारयेति च ।
सिद्धिं प्रयच्छ मे चैव अस्त्रान्तो मनुरुत्तमः ॥
पादस्यापादनं कुर्यान्मदिरानन्दविग्रहः ।

हृदयोपरि महावीरः शक्तिं चैव शवोपरि ॥
विवस्त्रा मुक्तकेशी च कर्तृखर्परधारिणी ।
प्रक्षाल्य कुलद्रव्येण कुलचक्रं प्रपूजयेत् ॥
धूपदीपादिनैवेद्यैः पञ्चभूतवलिं हरेत् ।
यथाशक्ति जपं कुर्यात् मूलमन्त्रं समर्पयेत् ॥
विपरीतपरा नीत्री मैथुनं च शवोपरि ।
अयुतं च जपेत् तत्र सर्वसिद्धीश्वरो भवेत् ॥
यदा वै भयभीतोऽसौ भक्षयन्ति च तत्क्षणात् ।
देहि देहि यदा ब्रूयात् तदा छागवलिं हरेत् ॥
वलिदानं विना हिंसा न कर्त्तव्या कदा चन ।
पुरश्चरणतो मन्त्रसिद्धिर्भवति निश्चितम् ॥
(मुण्डमालायाम्)
अथ वाऽन्यप्रकारेण कुर्याद्वै वीरसाधनम् ।
संग्रामे पतितान् प्रेतानानीय विधिपूर्वकम् ॥
अष्टदिक्षु विधायाष्टौ नवमं मध्यसंस्थकम् ।
रज्ज्वा रज्ज्वा रज्जुनाथ रोपिते दृढकीलके ॥
चन्दनादिभिरभ्युक्ष्य सुगन्धिकुसुमादिभिः ।
अलङ्कृत्य प्रयत्नेन मध्यमस्याथ मस्तकम् ॥
ललाटे पूजयेद्देवीमुपचारैः समुज्ज्वलैः ।
वलिं दद्यादष्टदिक्षु माषमांसैः सुराशवैः ॥
पायसैर्मधुसंयुक्तैः कुसुमैरक्षतैस्तथा ।
ततो जपं प्रकुर्वीत शवस्य हृदि निर्भयः ॥
उपविश्यासने शोणे व्याघ्रचर्मविनिर्मिते ।
पञ्चायुतं च जप्त्वाऽथ पूर्ववत् कल्पयेद्बलिम् ॥

व्याघ्रवानरभल्लूकशृगालोल्कामुखानथ ।
दृष्ट्वाऽथ न भयं कुर्यान्मायामेव विचिन्तयेत् ॥
ततोऽनुभावं लब्ध्वाऽथ दद्याच्छागादिकं वलिम् ।
तथाऽक्लिष्टमना भूत्वा शवं निःक्षिप्य वारिणि ॥
द्विजेभ्यो दक्षिणां दद्यात् साधकेभ्यो विशेषतः ।
सुवेशाभ्यस्तथा स्त्रीभ्यः कुमारीभ्यः प्रयत्नतः ॥
वसनं भूषणं तद्वन्मधुरद्रव्यभोजनम् ।
स्वयं तथैव भुञ्जीत नराणां तु विवर्जयेत् ॥
एतेन तु महासिद्धिर्जायते भुवि दुर्लभा ।
राज्यं श्रियं परानन्दो वैरिराष्ट्रजयं तथा ॥
जगन्मोहनवश्याद्दि कविताकौशलं पुनः ।
संग्रामे च तमुद्दिश्य साधकं वैरिवाहिनी ॥
पलायते प्रगल्भाऽपि किं पुनः क्षुद्रवैरिणः ।
नानाविधाष्टसिद्धीनां साधको भाजनं भवेत् ॥
इदं मयोक्तं देवेशि न प्रकाश्यं कदा चन ।
एतत् ते परमं गोप्यं विशेषात् पशुसंसदि ॥
रहस्यमेतत् परममागमस्यैकजीवितम् ।

इति वीरसाधनविधिः।

बिभ्रत्यद्भुतभूतिभूतपवचो वैचित्र्यचित्रोल्लस-
स्रोतःशालिनि सन्निबन्धनसरित्संभेदमभ्यर्हितम् ।
नव्येऽस्मिन् नरदेवनिर्मितपुरश्चर्यार्णवे सप्तमः
सद्युक्तिस्फुटमौक्तिकोत्कररुचोत्तुङ्गस्तरङ्गो गतः ॥

इति श्रीमन्महाराजाधिराजप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे मन्त्रसि-
द्धिलक्षणोपायपुरश्चरणभेदनिरूपणं नाम सप्तमस्तरङ्गः ॥

अथ गणेशादिमन्त्रास्तत्पुरश्चरणविशेषाश्च प्रदर्श्यन्ते ।

तत्रादौ विघ्नराजमन्त्र उक्तो (मेरुतन्त्रे)

असिद्धगुरुणा दत्तो मन्त्रः स्याद्बहुविघ्नदः ।
तत्रादौ साधयेद्विघ्नराजमन्त्रं ततः पुनः ॥
निष्पापस्य पुरश्चर्याबलात् सिद्ध्येन्मनूत्तमः ।
तत्राम्नायविभेदेन सर्वतन्त्रेषु गोपितम् ॥
एकबीजात्मकं वक्ष्ये विघ्नमन्त्रं सुसिद्धिदम् ।
तत्रादौ वैदिकाना तु गकारः केवलो मतः ॥
दक्षिणानां विन्दुयुक्तो द्विविन्दुः पूर्वमार्गिणाम् ।
एतद्द्वययुतः प्रश्चादूर्ध्वाम्नाये च गौमिति ॥
ग्लौमुत्तरे गोमाति च पातालाम्नायमीरितम् ।
गणपोऽस्य मुनिश्छन्दो निवृद्विघ्नोऽस्य देवता ॥
गणं जपाय स्वाहा हृत्कमेकदंष्ट्राय हुँफट् ।
अचलकर्णिने नमः शिखा प्रोक्ताऽथ वर्म तु ॥
गजवक्त्राय च नमो नेत्रमस्त्रमुदीर्यते ।
महादशमचण्डाय हुँ फडेतच्च वैदिकैः ॥
षड्दीर्घयुक्तबीजेन तान्त्रिको न्यासमाचरेत् ।

अथ ध्यानम् ।

रक्ताम्बरं रक्तवर्णं रक्तगन्धानुलेपनम् ।
रक्तपुष्पैः पूज्यमानं तुन्दिलं चन्द्रमौलिनम् ॥
त्रिनेत्रं वामनं बिभ्रद्बीजपूरं च शुण्डया ।
वामदक्षोर्ध्वयोः पाशाङ्कुशौ चक्रं वरस्त्वधः ॥
पद्मासनं सर्पभूषं ध्यायेद्विघ्नविनायकम् ।

(शारदायाम्)

सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं
दन्तं पाशाङ्कुशेष्टान्युरुकरविलसद्बीजपूराभिरामम् ।
बालेन्दुद्योतिमौलिं करिपतिवदनं दानपूरार्धगण्डं
भोगीन्द्राबद्धमौलिं भजत गणपतिं रक्तवस्त्राङ्गरागम् ॥

अस्य मन्त्रस्य पुरश्चरणमुक्तं (मेरुतन्त्रे)

लक्षमेकं मनुं जप्त्वा जुहुयात् तद्दशांशतः ।

(शारदायां तु)

वेदलक्षं जपेन्मन्त्रं दशाशं जुहुयात् ततः—इत्युक्तम् ।

तथा—

मोदकैः पृथुकैर्लाजैः सक्तुभिश्चेक्षुपर्वभिः ।
नारिकेलैस्तिलैर्मोचैर्होमं कुर्यात् पृथक् पृथक् ॥
सहस्रमेकं द्विशतं पञ्चाशत्प्रमितं तथा ।
दलैस्त्रिमधुराक्तैः स्याद्धोमः काम्योऽथ कथ्यते ॥
दौग्धान्नेन घृताक्तेन होमोऽभीष्टफलप्रदः ।
लक्ष्मीकामो नारिकेलैश्चतुर्थ्यां जुहुयात् तथा ॥

मोचं कदलीफलम् ।

अथ लक्ष्मीगणेशमन्त्रस्तत्रैव ।

वक्ष्येऽथ दक्षिणाम्नाये लक्ष्मीगणपतिं सुराः ।
गजलक्ष्मीसमायुक्तमयं योगोऽतिदुर्लभः ॥
श्रीगँ सौम्याय वोच्चार्य महागणपतिं तथा ।
ङेऽन्तमुक्त्वा वरवरदोक्त्वा सर्वजनं वदेत् ॥
मे वशमानय स्वाहेत्येकोनत्रिंशदक्षरः ।
अन्तर्यामी मुनिश्छन्दो गायत्री निचृदन्विता ॥
देवो लक्ष्मीगणेशोऽथाद्यबीजद्वयेन तु ।

षड्दीर्घयुक्तेनाङ्गानि जातियुक्तानि कारयेत् ॥

अथ ध्यानम् ।

हेमाभं पीतवसनं चक्रशङ्खरदाभयान् ।
दक्षोर्ध्वकरमारभ्य दक्षिणाधःकरावधि ॥
दधतं शुण्डया स्वर्णघटं पद्मोपरि स्थितम् ।
वामाङ्काविष्टलक्ष्म्या चाश्लिष्टं दक्षभुजेन च ॥

अस्य पुरश्चरणं तत्रैवोक्तम् ।

लक्षं जपो हुनेद्बिल्वसमिधो मधुरप्लुताः ।
तर्पणादि ततः कृत्वा काम्यकर्मादि साधयेत् ॥
हुनेच्चतुस्सहस्राणि श्रीफलैर्मधुराप्लुतैः ।
महालक्ष्मीकरो होमः पुत्रमित्रकलत्रदः ॥

अथ शक्तिगणेशमन्त्रस्तन्त्रान्तरे ।

पङ्वान्तको वह्निसंस्थो वामनेत्रार्धचन्द्रवान् ।
मायासंपुटितस्त्र्यर्णो मन्त्रः शक्तिगणेशितुः ॥

(मेरुतन्त्रे)

अक्षरोऽयं विराट् छन्दो मुनिर्भार्गव ईरितः ।
देवता शक्तिगणपः षडङ्गानि समाचरेत् ॥
षड्दीर्घयुग्गकारेण ततो ध्यायेद्गजाननम् ।

ध्यानं यथा—

दक्षोर्ध्वे चाङ्कुशं वामे पाशं वामे त्वधःकरे ।
बीजपूरं स्वदन्तं तु दक्षिणे स्वर्णवर्णकम् ॥
पुष्करे मोदकं बिभ्रत् कर्णयोर्दीर्घचामरे ।

अस्य मन्त्रस्य पुरश्चरणं तत्रैवोक्तम् ।

लक्षमेकं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः ।
तद्दशांशं प्रजुहुयादपूपैर्घृतसंप्लुतैः ॥

एवं सिद्धमनुर्मन्त्री काम्यकर्माणि साधयेत् ।

अथ क्षिप्रप्रसादनगणेशमन्त्रो (निबन्धे)

संवर्त्तको नेत्रयुतः पार्श्वौ वह्न्यासने स्थितः ।
प्रसादनाय हृन्मन्त्रः स्वबीजाढ्यो दशाक्षरः ॥

(मेरुतन्त्रे)

ऋषिर्गणक आख्यातश्छन्दः प्रोक्तं विराडिति ।
देवता कथितः क्षिप्रप्रसादनविनायकः ॥
षड्दीर्घभाजा बीजेन कुर्यादङ्गक्रियां मनोः ।

अथ ध्यानं (शारदायाम्)

पाशाङ्कुशौ कल्पलतां विषाणं
    दधत् सुतुण्डाहितबीजपूरः ।
रक्तस्त्रिनेत्रस्तरुणेन्दुमौलि-
    र्हारोज्ज्वलो हस्तिमुखोऽवताद्वः ॥

अस्य पुरश्चरणं (मेरुतन्त्रे)

लक्षमेकं जपेन्मन्त्रं *त्रिस्वाद्वक्तैस्तिलैर्हुनेत् ।
पूर्वोदिताष्टद्रव्यैर्वा तर्पणादि ततश्चरेत् ॥

अथ वक्रतुण्डमन्त्रस्तत्रैव ।

वक्रतुण्डाय हुँ चेति प्रोक्तो मन्त्रः षडक्षरः ।
ह्रस्वं तु कवचं स्त्रीभिर्जप्तव्यं सर्वसिद्धिदम् ॥
भार्गवो मुनिराख्यातोऽनुष्टुप् छन्द उदाहृतम् ।
देवता वक्रतुण्डोऽस्य सुरासुरनमस्कृतः ॥
षड्भिर्मन्त्रगतैर्वर्णैः षडङ्गानि प्रकल्पयेत् ।

अथ ध्यानम् ।

उद्यद्दिनेश्वररुचिं पाशाङ्कुशवराभयान् ।
हस्तैर्दधानं स्मेरास्यमरुणां चिन्तयेद्धृदि ॥

---

* त्रिमध्वक्तैरिति ३ पु० पा. ।

पुरश्चरणमाह ।

वर्णलक्षं जपेन्मन्त्रं जुयात् तद्दशांशतः ।
अष्टद्रव्यैः पुरा प्रोक्तैर्मधुराक्तैर्यथाविधि ॥

अथ हेरम्बमन्त्रः (शारदायाम्)

पञ्चान्तको विन्दुयुतो वामकर्णविभूषितः ।
तारादिहृदयान्तोऽयं हेरम्बमनुरीरितः ॥
चतुर्वर्णात्मको नृणां चतुर्वर्गफलप्रदः ।

(मेरुतन्त्रे)

मुनिर्गणक आख्यातो गायत्री छन्द ईरितम् ।
पञ्चवक्त्रोऽस्य हेरम्बो देवता सिंहवाहनः ॥
षड्दीर्घबीजयुक्तेन षडङ्गविधिरीरितः ।

ध्यानं तु (शारदायाम्)

मुक्ताकाञ्चननीलकुन्दघुसृणच्छायैस्त्रिनेत्रान्वितै-
र्नागास्यैर्हरिवाहनं शशधरं हेरम्बमर्कप्रभम् ।
दृप्तं दानमभीतिमोदकरदान् टङ्कं शिरोऽक्षात्मिकां
मालां मुद्गरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं भजे ॥

अस्य पुरश्चरणमुक्तं (मेरुतन्त्रे)

लक्षत्रयं जपित्वा तं तिलैर्हुत्वा दशांशतः ।
मधुरत्रयसंयुक्तैस्तर्पणादि समाचरेत् ॥
एवं सिद्धमनुर्मन्त्री प्रयोगानाचरेत् ततः ।

अथ हरिद्रागणेशमन्त्रस्तन्त्रान्तरे ।

पञ्चान्तको धरासंस्थो विन्दुभूषितमस्तकः ।
एकाक्षरो महामन्त्रः सर्वकामफलप्रदः ॥

यद्वा मन्त्रान्तरम् ।

मन्त्रोद्धारं प्रवक्ष्यामि शृणुष्व कमलानने ।
इन्द्रबीजं समुद्धृत्य निजबीजं समुद्धरेत् ॥

चतुर्दशस्वरेणाढ्यं विन्दुभूषितमस्तकम् ।
एकाक्षरी महाविद्या कथिता पद्मयोनिना ॥
बीजेन दीर्घयुक्तेन कराङ्गन्यासकल्पना ।

मन्त्रान्तराणि विस्तरभयादुपेक्षितानि ।

अथ ध्यानम् ।

हरिद्राभं चतुर्बाहुं हारीतवसनं विभुम् ।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ॥

अस्य पुरश्चरणमुक्तं (मेरुतन्त्रे)

वेदलक्षं जपित्वाऽन्ते हरिद्राचूर्णमिश्रितैः ।
दशांशं तण्डुलैर्हुत्वा ब्राह्मणानपि भोजयेत् ॥

अथ महागणपतिमन्त्रो (मेरुतन्त्रे)।

ऊर्ध्वाम्नाये प्रवक्ष्यामि गणेशान् सिद्धिदायकान् ।
भुक्तिमुक्तिप्रदं तत्र महागणपतिं शृणु ॥
तारः श्रीबीजहृल्लेखा कामो भूबीजमेव च ।
गणेशबीजं गणपतये वरवरेति च ॥
दसर्वजनं मे वशमानयाग्निवधूरिति ।
अष्टाविंशतिवर्णोऽयं गणकोऽस्य मुनिर्मतः ॥
निवृद्गायत्रिका छन्दो महागणपतिः सुरः ।
गँ बीजं ह्रीं च शक्तिः स्याद्दीर्घषट्कयुतस्तु गः ॥
तारादिबीजषट्केन पृथग्युक्तेन कारयेत् ।
षडङ्गानि मनोरस्य जातियुक्तान्यथाचरेत् ॥
अथ वा तारपूर्वेण दीर्घषट्कयुतेन च ।
स्वबीजेनाङ्गुलिन्यासं षडङ्गानि समाचरेत् ॥

अथ ध्यानम् ।

ऐक्षवे जलधौ द्वीपे नवरत्नमये शुभे ।

तत्तरङ्गलसत्तोयैर्धौते शीतमहीतले ॥
तत्तोयगणसंपृक्तगन्धवाहनिषेविते ।
कल्पपादपसंशोभिभूभागे समलङ्कृते ॥
नानाकुसुमसङ्कीर्णे नानापक्षिविराजिते ।
अनेकफलसंकीर्णे सेविते चाऽप्सरोगणैः ॥
उद्यद्बालातपज्योतिश्चन्द्रज्योत्स्नासमाकुले ।
विलसत्पद्मरागौघकुट्टिमारुणभूतले ॥
कल्पपादपपुष्पस्थषट्पदस्वनमञ्जुले ।
पारिजातं कल्पतरुं तस्य मध्ये विचिन्तयेत् ॥
युगपदृतुषट्केन खचितं पुष्पशोभितम् ।
नवरत्नमयं तस्याधस्तात् सिहासनं स्मरेत् ॥
तन्मध्ये लिपिपद्मं च षडारं तस्य मध्यतः ।
कर्णिकायां गणेशं च तत्संस्थं च महागणम् ॥
(शारदायाम्)
षट्कोणान्तस्त्रिकोणस्थं महागणपतिं स्मरेत् ।
हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसा-
श्लिष्टं स्वप्रियया सुपद्मकरया स्वाङ्कस्थया सन्ततम् ।
बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशान् हस्तैर्वहन्तं भजे ॥
गण्डपालीगलद्दानपानलालसमानसान् ।
द्विरेफान् कर्णतालाभ्यां वारयन्तं मुहुर्मुहुः ॥
कराग्रधृतमाणिक्यकुम्भवक्त्रविनिःसृतैः ।
रत्नवर्षैः प्रीणयन्तं साधकान् मदविह्वलम् ॥
माणिक्यमुकुटोपेतं रत्नाभरणभूषितम् ।

अस्य मन्त्रस्य पुरश्चरणमुक्तं (मेरुतन्त्रे)

एकादशायुतं जप्त्वा सहस्रोत्तरमादरात् ।
दशांशं जुहुयादष्टद्रव्यैरेकाक्षरोदितैः ॥
तर्पयित्वा दशांशेन चाभिषिक्तोऽणुना ततः ।
ब्राह्मणान् भोजयेत् सम्यक् षड्रसैर्भूरिदक्षिणाम् ॥
दत्वा प्रणम्य विसृजेदेवं सिद्धो भवेन्मनुः ।

(शारदायां तु)

ध्यायेन्मन्त्रं जपेन्मन्त्री चतुर्लक्षं समाहितः ।
चतुस्सहस्रसंयुक्तं चत्वारिंशत्सहस्रकम्—इत्युक्तम् ॥

अथ विरिञ्चिगणनायकमन्त्रो (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि पूर्वाम्नायगणेश्वरान् ।

विरञ्चिविघ्नेशमुक्ता—

अथान्यत् संप्रवक्ष्यामि ब्रह्मणा समुपासितम् ।
काश्यां ब्रह्मेशसौम्यस्थं विरिञ्चिगणनायकम् ॥
ह्रीँ विरिञ्चिपदं प्रोक्त्वा ङेऽन्तं गणपतिं ततः ।
प्राग्वद्वरवरेत्यादि षड्विंशत्यक्षरो मनुः ॥
वेदपञ्चेषुपञ्चेषुद्व्यर्णैरुक्तं षडङ्गकम् ।

तथा—

अस्य ध्यानं प्रवक्ष्यामि ह्यूर्ध्वमूर्ध्वकरेषु च ।
बीजपूरं गदां चापं चक्रं मालां च दक्षिणे ॥
वामे पद्मं पाशबाणान् दन्तं रत्नाढ्यकुम्भकम् ।
पद्मद्वयकरां पुष्टिमङ्कस्थामरुणप्रभाम् ॥
आलिङ्गयन्तमरुणं स्रवन्मदकपोलकम् ।
त्रिनेत्रं पीतवसनं दृढमुत्थापितध्वजम् ॥
किरीटिनं कुण्डलिनं ध्यायेद्देवं गजाननम् ।

अस्य पुरश्चरणम् ।

वेदलक्षमिता प्रोक्ता सर्वेषां तु पुरस्क्रिया ।
मधुरत्रयसंयुक्तैः पूर्वोक्तैरष्टभिर्हुनेत् ॥

सर्वेषामिति । अत्र विस्तरभयादुपेक्षितानां विरिञ्चिविघ्नेशादिमन्त्राणाम् ।

अथ विघ्नगणेशमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि पश्चिमाम्नायसिद्धिदान् ।
नानाश्चर्यकरान् काशीसंस्थितान् गणनायकान् ॥
महागणपतेरंशाश्चतुःषष्टिविनायकाः ।
एकैकान्ते गृहीत्वा तु योगिनीं चेटिकामपि ॥
स्वर्णभूमिं समासाद्य यावदन्तर्गृहं मम ।
अष्टावरणकैरष्टौ संस्थिताः सिद्धिदायकाः ॥
तत्राष्टौ काशिकाबाह्ये स्वर्गभूमौ समास्थिताः ।
योजनैकं बहिः काश्यां कीर्त्तितः परिधिस्तु सः ॥
गँ विघ्नाय नमः प्रोक्तो मन्त्र एव षडक्षरः ।
क्षिप्रप्रसादनसममष्टानां साधनं स्मृतम् ॥

पुरश्चरणे विशेषमाह तत्रैव ।

वेदायुतं जपेन्मन्त्रं होमश्च घृतपायसैः ।
प्रयोगाः क्षिप्रमेवात्र क्षिप्रमेव च सिद्धयः ॥

अथोच्छिष्टगणेशमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि उत्तराम्नायसिद्धिदान् ।
वदेद्धस्तिपिशाचीति लिखेत् स्वाहा नवाक्षरः ॥
कङ्कालोऽस्य मुनिश्छन्दो विराडुच्छिष्टनामकः ।
गणेशो देवता प्रोक्तः सर्वसंपत्प्रदायकः ॥
द्वित्रिद्विद्विद्विभिश्चास्य पञ्चाङ्गविधिरीरितः ।

अस्य ध्यानं तन्त्रान्तरे ।

रक्तमूर्त्तिं गणेशानं सर्वाभरणभूषितम् ।
रक्तवस्त्रं त्रिनेत्रं च रक्तपद्मासनस्थितम् ॥
चतुर्भुजं महाकायं द्विदन्तं सस्मिताननम् ।
इष्टं च दक्षिणे वामे दधन्तमभयं करे ॥
पाशाङ्कुशौ च हस्ताभ्यां जटामण्डलमण्डितम् ।
ललाटं चन्द्ररेखाढ्यं सर्वालङ्कारभूषितम् ॥
सर्वाभीष्टप्रदं ध्यायेदुच्छिष्टगणनायकम् ।

अस्य पुरश्चरणं (मेरौ)

नवलक्षं जपः प्रोक्तः काम्यकर्माण्यथ ब्रुवे ॥

मन्त्रान्तरमाह तत्रैव ।

अथान्यमस्य वक्ष्यामि द्वादशार्णं महामनुम् ।
ॐ ह्रीँ गँ हस्तिपिशाचि लिखेत् स्वाहेति मन्त्रकः ॥
नवार्णमन्त्रवत् सर्वँ ध्यानपूजाजपादिकम् ।

पुरश्चरणमाह ।

पुरश्चर्याऽर्कलक्षं स्यात् प्रयोगादि च पूर्ववत् ॥

इति गणेशप्रकरणम् ।

अथ सूर्यमन्त्रः ।

(शारदायाम्)

तारो घृणिर्भृगुः पश्चाद्वामकर्णविभूषितः ।
वह्न्यासनो मरुच्छेषः सनेत्रोऽद्रिरस्य पश्चिमः ॥
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतप्रदः ।
देवभागो मुनिः प्रोक्तो गायत्री छन्द ईरितम् ॥
आदित्यो देवता प्रोक्तो दृष्टादृष्टफलप्रदः ।
सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरितम् ॥
विष्णवे स्याच्छिखा वर्म रुद्राय परिकीर्त्तितम् ।

अग्नये नेत्रमाख्यातं सर्वायास्त्रमुदाहृतम् ॥
तेजो ज्वाला मणिं हुँ फट् द्विठान्ताः पृथगीरिताः ।

न्यासान्तराणि तत्रैव द्रष्टव्यानि ।

अथ ध्यानं ।

रक्ताब्जयुग्माभयदानहस्तं
केयूरहाराङ्गदकुण्डलाढ्यम् ।
माणिक्यमौलिं दिननाथमीडे
बन्धूककान्तिं विलसत्त्रिनेत्रम् ॥

अस्य पुरश्चरणं तत्रैवोक्तम् ।

वसुलक्षं जपेन्मन्त्रं समिद्भिः क्षीरशाखिनाम् ।
तत्सहस्रं प्रजुहुयात् क्षीराक्ताभिर्जितेन्द्रियः ॥

अथ मन्त्रातरं तत्रैव ।

आकाशमग्निर्दीर्घेन्दुसंयुतं भुवनेश्वरी ।
सर्गान्वितो भृगुर्भानोस्त्र्यक्षरो मनुरीरितः ॥
आधारादिपदाग्रान्तं कण्ठादाधारकावधि ।
मूर्धादिकण्ठपर्यन्तं क्रमाद्बीजत्रयं न्यसेत् ॥
षड्दीर्घस्वरयुक्तेन मध्येनाङ्गानि कल्पयेत् ।

अथ ध्यानम् ।

रक्ताम्बुजासनमशेषगुणैकसिन्धुं
भानुं समस्तजगतामधिपं भजामि ।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम् ॥

अथास्य पुरश्चरणम् ।

भानुलक्षं जपेन्मन्त्रमन्नाज्येन दशांशतः ।
तिलैर्वा मधुरासिक्तैर्जुहुयाद्विजितेन्द्रियः ॥

(मेरुतन्त्रे)

अथ मन्त्रान्तरं वक्ष्ये दिनेशस्य षडक्षरम् ।
हँ खँ खखोल्काय वाऽथ खखोल्कायाग्निगेहिनी ॥
मुनिर्ब्रह्मा च गायत्री छन्दः सवितृदैवतम् ।
सूक्ष्मरूपायाग्निवधूमन्त्रेण हृदयं मतम् ॥
सूक्ष्माकारायाग्निवधूरिति मन्त्रेण शीर्षकम् ।
सूक्ष्मबालाय स्वाहेति कवचं च सनेत्रकम् ॥
सूक्ष्मकाय हुँ फडिति शस्तं पञ्चाङ्गमीरितम् ।
मन्त्रवर्णैः षडङ्गं स्याद्ध्यानमस्योच्यतेऽधुना ॥
रक्तपद्मद्वयं हस्तैर्बिभ्राणां वरदाभये ।
बन्धूकाभं त्रिनेत्रं च रविं ध्यायेत् सुभूषितम् ॥

अथास्य पुरश्चरणं तत्रैव ।

लक्षमेकं जपेन्मन्त्रं नियतात्मा जितेन्द्रियः ।
जुहुयात् तद्दशांशेन विल्वाश्वत्थपलाशजैः ॥
उदुम्बरसमुद्भूतैस्त्रिमध्वक्तैः समिद्वरैः ।
तर्पणादि ततः कुर्यात् प्राक्प्रोक्तविधिना सुधीः ॥

अथ मन्त्रान्तरं (शारदायाम्)

वियदर्धेन्दुलसितं तदादिः सर्गसंयुतः ।
अजपाख्यो मनुः प्रोक्तो द्व्यक्षरः सुरपादपः ॥
ऋषिर्ब्रह्मा स्मृतो देवी गायत्री छन्द इरितम् ।
देवता जगतामादिः संप्रोक्तो गिरिजापतिः ॥
हसा षड्दीर्घयुक्तेन कुर्यादङ्गक्रियां मनोः ।

ध्यानम् ।

उद्यद्भानुस्फुरिततडिदाकारमूर्धाम्बिकेशं
पाशाभीती वरदपरशू सन्दधानं कराब्जैः ।

दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं
सौम्याग्नेयं वपुरवतु वश्चन्द्रचूडं त्रिनेत्रम् ॥

अथ पुरश्चरणम ।

भानुलक्षं जपेन्मन्त्रं पायसेन ससर्पिषा ।
दशांशं जुहुयात् सम्यक् ततः सिद्धो भवेन्मनुः ॥

अथ मार्त्तण्डभैरवमन्त्रस्तत्रैव ।

आकाशमग्निपवनसाद्यान्तार्घीशविन्दुमत् ।
मार्त्तण्डभैरवं नाम बीजमेतदुदाहृतम् ॥
पुटितं विम्बबीजेन सर्वकामफलप्रदम् ।
ठान्तं दहननेत्रेन्दुसहितं तदुदाहृतम् ॥
पञ्चह्रस्वाद्यबीजेन पञ्चमूर्त्तीः प्रविन्यसेत् ।
मध्यमादिकनिष्ठान्तमङ्गुलीषु क्रमादिमाः ॥
सूर्याख्यो भास्करो भानुस्ततो रविर्दिवाकरौ ।
शिरोवदनहृद्गुह्यपाददेशेषु ताः पुनः ॥
दीर्घयुक्तेन बीजेन नेत्राङ्गानि प्रविन्यसेत् ।
व्यापकं मूलबीजेन कुर्वीत तदनन्तरम् ॥

ध्यानम ।

हेमाम्भोजप्रवालप्रतिमनिजरुचिं चारुखट्वाङ्गपद्मौ
चक्रं शक्तिं सपाशं सृणिमतिरुचिरामक्षमालां कपालम् ।
हस्ताम्भोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं
मार्त्तण्डं वल्लभार्धं मणिमयमुकुटं हारदीप्तं भजामः ।

अथ पुरश्चरणम ।

लक्षत्रयं जपेन्मन्त्री बीजं विम्बपुटीकृतम् ।
दशांशं कमलैः फुल्लैर्जुहुयान्मधुरोक्षितैः ॥

इति सूर्यप्रकरणम ।

अथ विष्णुमन्त्राः ।

(शारदायाम्)

अथ वक्ष्ये महामन्त्रान् विष्णोः सर्वार्थसाधकान् ।
येषां संस्मरणात् सन्तो भवाब्धेः पारमाश्रिताः ॥
तारं नमःपदं पश्चान्नरौ दीर्घसमन्वितौ ।
पवनो णायमन्त्रोऽयं प्रोक्तो वस्वक्षरात्मकः ॥
साध्यो नारायणः प्रोक्तो मुनिश्छन्द उदाहृतम् ।
मन्त्रस्य देवी गायत्री देवता विष्णुरव्ययः ॥
क्रुद्धोल्काय हृदाख्यातं महोल्काय शिरः स्मृतम् ।
वीरोल्काय शिखा प्रोक्ता व्युलकाय कवचं मतम् ॥
सहस्रोल्कायास्त्रमुक्तमङ्गक्लृप्तिरियं मता ।
भूयोवर्णैर्मनोः षड्भिः षडङ्गानि समाचरेत् ॥
अवशिष्टौ पुनर्वर्णौ विन्यसेत् कुक्षिपृष्ठयोः ।

अथ ध्यानम् ।

उद्यत्कोटिदिवाकराभमनिशं शङ्खं गदां पङ्कजं
चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभि पार्श्वद्वयम् ।
कोटीराङ्गदहारकुण्डलधरं पीताम्बरं कौस्तुभो-
द्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ॥

अथ पुरश्चरणम् ।

विकारलक्षं प्रजपेन्मनुमेनं समाहितः ।
तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः ॥

विकारलक्षं षोडशलक्षम ।

अथ मन्त्रान्तरं तत्रैव ।

प्रणवो हृद्भगवते वासुदेवाय कीर्त्तितः ।
प्रधानं वैष्णवे तन्त्रे मन्त्रोऽयं द्वादशाक्षरः ॥
ऋषिः प्रजापतिश्छन्दो गायत्री परिकीर्त्तिता ।

देवताऽस्य मनोः प्रोक्तो वासुदेवो मनीषिभिः ॥
तारेण हृदयं प्रोक्तं नमसा शिर ईरितम् ।
चतुर्वर्णैः शिखा प्रोक्ता पञ्चार्णैः कवचं मतम् ॥
समस्तेन भवेदस्त्रमङ्गकल्पनमीरितम् ।

अथ ध्यानम् ।

विष्णुं शारदचन्द्रकोटिसदृशं शङ्खं रथाङ्गं गदा-
मम्भोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम् ।
आबद्धाङ्गदहारकुण्डलमहामौलिं स्फुरत्कङ्कणं
श्रीवत्साङ्कमुदारकौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः ।
तत्सहस्रं प्रजुहुयात् तिलैराज्यपरिप्लुतैः ॥

अथ लक्ष्मीवासुदेवमन्त्रस्तत्रैव ।

हृल्लेखाबीजयुगलं रमाबीजयुगं ततः ।
लक्ष्म्यन्ते वासुदेवाय हृदन्तः प्रणवादिकः ॥
चतुर्दशाक्षरैः प्रोक्तो मन्त्रोऽयं सुरपादयः ।
हृदयं शक्तिबीजाभ्यां रमाभ्यां शिर ईरितम् ॥
लक्ष्म्या प्रोक्ता शिखा वर्म वासुदेवाय ईरितम् ।
नमः सास्त्रं समादिष्टं सर्वं तारादि कल्पयेत् ॥

ध्यानम् ।

विद्युच्चन्द्रनिभं वपुः कमलजावैकुण्ठयोरेकतां
प्राप्तं स्नेहवशेन रत्नविलसद्भूषाभरालङ्कृतम् ।
विद्यापङ्कजदर्पणान् मणिमयं कुम्भं सरोजं गदां
शङ्खं चक्रममूनि बिभ्रदमितां दिश्याच्छ्रियं वः सदा ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं तत्सहस्रं सरोरुहैः ।
होमं कुर्याद्विकासितैर्मधुरत्रयसंयुतैः ॥
पूजा स्याद्वैष्णवे पीठे द्वादशाक्षरवर्त्मना ।
पायसेन कृतो होमो लक्ष्मीवश्यप्रदायकः ॥
मधुराक्तैस्तिलैर्हुत्वा सर्वकार्याणि साधयेत् ।

(विष्वक्सेन्याम्)

अथ मन्त्रान्तरं वक्ष्ये विष्णोः सर्वार्थसाधकम् ।
ङेऽन्तं विष्णुं समुद्धृत्य हृदयं बाणवर्णकः ॥
भवाब्धेः सेतुभूतोऽयमव्यक्ताद्यः षडक्षरः ।

अव्यक्तः प्रणवः ।

नारदोऽस्य मुनिश्छन्दो गायत्री विष्णुरव्ययः ।
देवता मन्त्रवर्णैस्तु षडङ्गानि प्रकल्पयेत् ॥

ध्यानम् ।

शङ्खचक्रगदापद्मधरं लक्ष्मीसमावृतम् ।
पीताम्बरं घनश्यामं ध्यायेद्विष्णुं सनातनम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं त्रिमध्वक्तैस्तिलैर्हुनेत् ।
तर्पणादि ततः कुर्यादेवं सिद्धो भवेन्मनुः ॥

अथ मत्स्यमन्त्रो (मेरुतन्त्रे)

एक एवाभवन्मत्स्यावतारः कल्प आदिमे ।
तस्य मन्त्रं प्रवक्ष्यामि भुक्तिमुक्तिप्रदायकम् ॥
तारो नमो भगवते मँ मत्स्याय रमां वदेत् ।
द्वादशाक्षरमन्त्रोऽयं मुनिर्ब्रह्मा समीरितः ॥
गायत्री छन्द उद्दिष्टं देवता मीनविग्रहः ।

भगवान् स रमानाथो बीजं श्रीमँ च कीलकम् ॥

मन्त्रपदैः कराङ्गन्यासौ कार्यौ ।

अथ ध्यानम् ।

नाभ्याधो रोहितसम आकण्ठं च नराकृतिः ।
घनश्यामश्चतुर्बाहुः शङ्खचक्रगदाधरः ॥
शृङ्गीमत्स्यनिभो मूर्धा लक्ष्मीवक्षोविराजितः ।
पद्मचिह्नितसर्वाङ्गः सुन्दरश्चारुलोचनः ॥

पुरश्चरणमाह ।

जपेद्द्वादशसाहस्रं त्रिमध्वक्तैस्तिलैर्हुनेत् ।
प्रत्यहं तद्दशांशेन वैशाखे कार्त्तिके तथा ॥
माघे च मार्गशीर्षे च हविष्याशी जितेन्द्रियः ।
आरभ्य भाद्राबहुलमष्टमीषोडशाहकम् ॥
लक्ष्मीमनुं जपेन्नित्यमिदं चापि कलाशतम् ।
तथैव होमः कर्त्तव्यस्तथाऽन्यदिवसेषु तु ॥
तर्पयेद्द्वादशशतं तिलतण्डुलचन्दनैः ।
आद्यन्तयोः शतं चाष्टौ तर्पयेच्च तथा श्रियम् ॥
रक्तोत्पलैर्वा पद्मैर्वा मालत्याद्यैः सुगन्धिभिः ।
एवं कृते वर्षमेकं मन्त्रसिद्धिः प्रजायते ॥
नित्यं द्वादशविप्रांश्च श्रीरूपां च सुवासिनीम् ।
भोजयेत् पूजनं चास्य चरेत् तोयाशये सदा ॥

तथा—

एवं सिद्धमनुर्मन्त्री जायते सिद्धिभाजनम् ।
एतद्युक्तं शतं मन्त्रं जपेदष्टोत्तरं शतम् ॥
तद्दैवतादिने सिद्धः पुस्तकादेव जायते ।
अकुण्ठितप्रयोगेषु न पुनस्तस्य संस्कृतिः ॥

एतत्पल्लविता मन्त्रा मम सिध्यन्ति पार्वति ।
एतत्संपुटिताः सर्वे वैदिकाः सिद्धिदाः कलौ ॥
अनेन ग्रथिता जप्ताः कौले स्युर्द्रुतसिद्धिदाः ।
गाणेशा वैष्णवाः सौराः सिद्धिं दद्युर्विदर्भिताः ॥
यद्बलात् सर्वमन्त्राणां स्वयं सिद्धिः प्रजायते ।
तस्मान्नोक्तो नान्यतन्त्रे मेरुतन्त्रे प्रकाशितः ॥

अथ कूर्ममन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि कूर्ममन्त्रं महाद्भुतम् ।
एकः कूर्मावतारोऽभून्मथ्यमाने महोदधौ ॥
तारो नमो भगवते कुँ कूर्माय धराधर ।
धुरन्धराय णस्यान्ते सिद्धवर्णो मतो मनुः ॥
प्रकृतिश्छन्द उदितं कश्यपोऽस्य मुनिर्मतः ।
देवता भगवान् विष्णुर्मतः कच्छपरूपधृक् ॥
धराधरेत्यादिशक्तिः कुँ बीजं स्वेष्टसिद्धये ।
नियोगो देवता ध्यानं शङ्खचक्रगदाधरम् ॥
पीताम्बरं कूर्मपृष्ठं न्यस्तलाङ्गूलशोभितम् ।
दीर्घग्रीवं महाग्राहं गिलन्तं रक्तलोचनम् ॥
मन्त्रवर्णैः षडङ्गानि जपो लक्षचतुष्टयम् ।
आज्यहोमस्तर्पणं तु चन्दनोत्पलवारिभिः ॥

अथ वराहमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि वराहस्य मनून् शुभान् ।
कल्पे जाताश्चतुर्वर्णा अवतारा रमापतेः ॥
तारो नमो भगवते वराहेति च संवदेत् ।

रूपाय भूर्भुवः सुवः पतये भूपतीति च ॥
त्वं मे देहि दापयेति स्वाहान्तः सुरवर्णकः ।

(शारदायाम्)

भार्गवो मुनिराख्यातश्छन्दोऽनुष्टुबुदाहृतम् ।
देवताऽऽदिवराहोऽस्य मन्त्रस्य कथितो बुधैः ॥
एकदंष्ट्राय हृदयं व्योमोल्काय शिरः स्मृतम् ।
शिखा तेजोऽधिपतये विश्वरूपाय वर्म च ॥
महादंष्ट्राय अस्त्रं स्यात् पञ्चाङ्गमिति कल्पयेत् ।

अथ ध्यानम् ।

आपादं जानुदेशाद्वरकनकनिभं नाभिदेशादधस्तान्-
मुक्ताभं कण्ठदेशात् तरुणरविनिभं मस्तकान्नीलभासम् ।
ईडे हस्तैर्दधानं रथचरणदरौ खड्गखेटौ गदाख्यां
शक्तिं दानाभये च क्षितिधरणलसद्दंष्ट्रमाद्यं वराहम् ॥

अस्य पुरश्चरणं तत्रैव ।

लक्षमेकं जपेन्मन्त्रं मधुराक्तैः सरोरुहैः ।
जुहुयात् तद्दशांशेन पीठे विष्णोः प्रपूजयेत् ॥

अथ मन्त्रान्तराणि (मेरुतन्त्रे)

अथान्यं संप्रवक्ष्यामि वराहाष्टाक्षरं परम् ।
ॐ भूर्वराहाय नमो मुनिर्ब्रह्मा समीरितः ॥
जगती छन्द उद्दिष्टं वराहो देवता स्मृतः ।
पदैः समस्तमन्त्रेण पञ्चाङ्गानि प्रकल्पयेत् ॥

ध्यानम् ।

कृष्णाङ्गं नीलवक्त्रं च मलिनं पद्मसंस्थितम् ।
पृथ्वीशक्तियुतं ध्यायेच्छङ्खं चक्राम्बुजं गदाम् ॥
भूलक्ष्मीकान्तिरतिभिः समन्तात् परिवारितम् ।

वर्मासिवाह्निश्च कलौ द्रुतसिद्धिप्रदायकम् ॥
जपपूजादिकं सर्वमस्य पूर्ववदाचरेत् ।
एतं मनुं यः प्रभजेत् स भवेच्च धरापतिः ॥
इमित्येकाक्षरो मन्त्रो वराहस्य प्रकीर्त्तितः ।
हयग्रीवो मुनिः प्रोक्तश्छन्दोऽनुष्टुप् च देवता ॥
वराहो दीर्घयुक्तेन बीजेनैवाङ्गकल्पनम् ।
प्राग्वद्ध्यायेद्रक्तवर्णं पूजाद्यं पूर्ववद्भवेत् ॥
भूरित्येकाक्षरं बीजं सर्वं प्राग्वत् समीरितम् ।
पीतवर्णां सदा ध्यायेद्द्वापरे द्रुतसिद्धिदम् ॥

अथ धरणीमन्त्रः (शारदायाम्)

हृदयं भगवत्यै स्याद्धरण्यै तदनन्तरम् ।
धरण्यन्ते धरेद्वन्द्वं द्विठान्तोऽयं ध्रुवादिकः ॥
एकोनविंशत्यर्णाढ्यं धराहृदयमीरितम् ।
वराहोऽस्य मुनिः प्रोक्तश्छन्दो निवृदुदाहृतम् ॥
देवता सर्वभूतानां प्रकृतिर्वसुधा मता ।
हृदयं त्रिभिराख्यातं चतुर्भिः शिर ईरितम् ॥
त्रिभिः शिखा समुद्दिष्टा पञ्चभिः कवचं मतम् ।
द्वाभ्यां नेत्रं समाख्यातं द्वाभ्यामस्त्रं पुनर्भवेत् ॥
मन्त्रवर्णैः षडङ्गानि कुर्यादेवं विधानवित् ।

ध्यानम् ।

श्यामां विचित्रांशुकरत्नभूषणां
पद्मासनां तुङ्गपयोधराननाम् ।
इन्दीवरं द्वे नवशालिमञ्जरीं
शुकं धानां वसुधां भजामः ॥

पुरश्चरणमाह ।

लक्षमेनं जपेन्मन्त्री धराहृदयमादरात् ।
ससर्पिषा पायसेम जुहुयात् तद्दशांशतः ॥
तां विष्णोः पूजयेत् पीठे वक्ष्यमाणविधानतः ।
स जपति जगतां नाथः करुणावरुणालयो नृहरिः ।
शरणीकृतयच्चरणा भवजलधिं तुलयन्ति गोष्पदेन ॥
अथ दुस्तरसंसारसागरोत्तारसेतवः ।
चतुर्णां पुरुषार्थानामसाधारणहेतवः ॥
उच्यन्ते चन्द्रचूडेन तन्त्रेषु प्रकटीकृताः ।
मन्त्राः श्रीदिव्यसिंहस्य ब्रह्माद्यैः समुपासिताः ॥

(मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि नृसिंहस्य मनून् शुभाम् ।
प्रतिमन्वन्तरं चाऽयमवतारो हरेर्भवेत् ॥
द्वीपान्तरे नृसिंहस्तु चतुर्दशसु मूर्त्तिषु ।
आकल्पं वसते तत्र भक्तानुग्रहकारकः ॥
आदिमन्वन्तरे जातो नृसिंहो वक्ष्यतेऽधुना ।
द्वात्रिंशद्वर्णको गोप्यो भुक्तिमुक्तिप्रदो यतः ॥

(वैष्वक्सेन्यां) ब्रह्मनारदसंवादे ।

मन्त्रराजं प्रवक्ष्यामि शृणुष्वावहितो मुने ।
यत्प्रसादादविकलं सृजामि सकलं जगत् ॥
आदौ विष्णुं समुद्धृत्य शार्ङ्गिणं वलिसंस्थितम् ।
प्रद्युम्नसहितं पश्चादुद्धरेद्*भूमिबालकम् ॥
सगोविन्दं ततः प्रीतियुक्तं बलिनमुद्धरेत् ।

---

* भूधरं तत इति २-३-४-५ पु० पा० ।

वैकुण्ठान्ते वराहं च नारायणसमन्वितम् ॥
समाधववृषघ्नाख्यं वृषं नरकजिद्गतम् ।
शङ्कर्षणान्तमधुसूदनादिभ्यां समन्वितम् ॥
बालस्थं च मुशल्यन्तमुद्धरेच्च वलानुजम् ।
वीरभागनिरुद्धाद्यसंयुतं हरिमुद्धरेत् ॥
हंसान्ते वलिनाऽऽक्रान्तं भूधरं च ततो हरिम् ।
वासुदेवान्वितं विश्वमूर्त्यन्तं विष्णुसंयुतम् ॥
सानिरुद्धं च गदिनं शूलाढ्यं सत्रिविक्रमम् ।
विन्दुमाधवसंयुक्तं हंसहसान्तमिन्दुकम् ॥
गोविन्दयुग्विश्वमूर्त्तिं वृषहर्याद्यमिन्दुकम् ।
भूधरान्तं ततः सत्यं वलिं प्रद्युम्नसंयुतम् ॥
सग्रामेनाद्यं वैकुण्ठं हरिं सपुरुषोत्तमम् ।
सविष्णुमेतदुभयं द्विरुद्धृत्यान्तिमे शिरः ॥
दद्यात् ततः सात्त्वतान्तं पुरुषोत्तमपूर्वजम् ।
सकेशवान्त्यमुद्धृत्य वैकुण्ठपुरुषोत्तमौ ॥
योगिनौ विश्वमूर्त्तेश्च दशमं सेन्दुमुद्धरेत् ।
द्वात्रिंशदक्षरात्माऽयं मन्त्रराजः सुरद्रुमः ॥
धर्मार्थकाममोक्षाणां बीजभूतोऽयमद्भुतः ।
अद्यस्तूलौघदहनो भवतीति विनाशनः ॥
यन्महावैष्णवं धाम परब्रह्मेति गीयते ।
स्वप्रकाशं जगद्व्यापि सच्चिदानन्दलक्षणम् ॥
तदेव त्वं विजानीहि मन्त्ररूपमिदं मुने ।
न नृसिंहात् परो देवो नैतन्मन्त्रात् परो मनुः ॥

न तद्ध्यानात् परं ध्यानं संसारभयनाशनम् ।
भगवद्भक्तितत्त्वज्ञैरुपास्योऽयं महामनुः ॥
न प्रकाश्यस्त्वया वत्स देवानामपि दुर्लभः ।
अनेकमन्त्रकोटीनां चूडामणिरयं मनुः ॥
यथा नृसिंहो भगवान् देवतानां शिरोमणिः ।
यन्नामस्मरणादेव न पुनर्जायते भवः ॥
किं पुनः श्रद्धया भक्त्या भजतां तत्पदाम्बुजम् ।
सकृदुच्चरितं येन नृसिंहेत्यक्षरत्रयम् ॥
धर्मराजभटैस्तस्य किमर्थं दृश्यते मुखम् ।
चतुर्णामपि वेदानां सारांशस्त्वेक एव हि ॥
नृसिंहेति नृसिंहेति नृसिंहेति च कीर्त्तनम् ।

(मेरुतन्त्रे)

लोभाधिक्यात् कलियुगे न गुरुर्न च देवता ।
एकं श्रेयस्करं प्रोक्तं नृहरेर्नामगर्जनम् ॥

(संहितायाम्)

अथोक्तमन्त्रराजस्य ऋष्यादीन् शृणु नारद ।
ऋषिर्ब्रह्माऽहमुद्दिष्टश्छन्दोऽनुष्टुबुदाहृतम् ॥
देवता श्रीनृसिंहोऽस्य देवदेवो जगद्गुरुः ।
ध्रुवमाये बीजशक्ती नारसिंहस्तु कीलकम् ॥
उदात्तस्तु स्वरः प्रोक्तो वर्णः शुक्ल उदाहृतः ।
धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्त्तितः ॥

(मेरुतन्त्रे)

वेदवेदाष्टषट्षट्कं वेदार्णैः स्यात् षडङ्गकम् ।

अथ ध्यानम् (संहितायाम्)

क्षीरार्णवे सितद्वीपे कल्पवृक्षवनं स्मरेत् ।

नानापुष्पफलाकीर्णं मुक्तारत्नौघवर्षणम् ॥
विकसद्बालमन्दारपुष्पामोदमनोहरम् ।
कुसुमान्तर्मधुस्वादमत्तालिकुलसंकुलम् ॥
कोकिलालापमुखरं नानापक्षिगणान्वितम् ।
ऋतुषट्केन युगपत् सेव्यमानं सुखास्पदम् ॥
उत्फुल्लाम्बुजकह्लारकुमुदोत्पलशालिभिः ।
हंसकारण्डवाकीर्णैः सरोभिरुपशोभितम् ॥
तस्य मध्ये स्फुरद्दीप्ति चिन्तयेन्मणिमण्डपम् ।
तदन्तःपद्मरागौघकुट्टिमारक्तभूतले ॥
नानारत्नप्रभोद्भासिस्वर्णसिंहासनोपरि ।
भोगीन्द्रभोगतल्पे च पद्ममष्टदलं स्मरेत् ॥
तत्कर्णिकासमासीनं श्रीनृसिंहं विचिन्तयेत् ।
चन्द्रकोटिप्रतीकाशं भास्वत्पीताम्बरावृतम् ॥
ज्वलत्कालानलप्रख्यज्वालामालिदुरासदम् ।
चक्रं सुदर्शनं चापं सबाणं वरमुद्रिकाम् ॥
अभयाख्यां तथा मुद्रां निजभक्तेषु सार्थिकाम् ।
धारयन्तं महावाहुं चतुर्भिः करपल्लवैः ॥
सोमसूर्याग्निनयनमीषद्व्यानाननाम्बुजम् ।
स्फुरत्सौदामिनीजिह्वं दंष्ट्राद्भुतमुखाम्बुजम् ॥
तप्तचामीकरप्रख्यजटामण्डलमण्डितम् ।
हैमं किरीटं विभ्राणं भास्वन्मणिगणोज्ज्वलम् ॥
श्रीवत्सकौस्तुभोरस्कं स्फुरन्मकरकुण्डलम् ।
योगपट्टपिनद्धाङ्गं वनमालाविराजितम् ॥

हारकेयूरमञ्जीरस्फुरत्काञ्चीगुणादिभिः ।
भूषितं भूषणैर्दिव्यैर्नानारत्नोपकल्पितैः ॥
ज्वलन्मणिशिखादीप्तफणीन्द्रफणापङ्क्तिभिः ।
कृतच्छत्रं स्वतेजोभिर्भासयन्तं दिशो दश ॥
कल्पान्तकालदहनज्वालजालविडम्बिभिः ।
ललाटनयनज्वालैर्दुर्निरीक्ष्यं सुरैरपि ॥
स्ववामाङ्कगतां लक्ष्मीं तप्तजाम्बुनदप्रभाम् ।
शुद्धक्षौमपरीधानां नानालङ्कारभूषिताम् ॥
वराभयं पद्मयुग्मं बिभ्राणां करपङ्कजैः ।
शरत्पूर्णेन्दुवदनां मन्दस्मितमुखाम्बुजाम् ॥
आश्लिष्यन्तं कृताश्लेषामानन्दोत्फुल्ललोचनाम् ।
भारत्या दक्षिणे देशे स्तूयमानं हि सर्वदा ॥
शङ्खचक्रगदापद्मधारिभिर्वनमालिभिः ।
इन्द्रनीलनिभैर्वीरैः पार्षदैः परितो वृतम् ॥
ब्रह्मादिभिः सुरगणैः सनकाद्यैर्महर्षिभिः ।
योगिभिः सिद्धगन्धर्वैरप्सरोभिश्च सेवितम् ॥
अतिप्रसन्नवदनं भक्ताभीष्टवरप्रदम् ।
एवंविधमनिर्देश्यमवाङ्मनसगोचरम् ॥
दिव्यसिंहं हृदिं ध्यायेत् परमात्मानमच्युतम् ।
एवं ध्यात्वा महाविष्णुं दिव्यकेशरिणं विभुम् ॥
कर्मबन्धाद्विनिर्मुक्तः प्राप्नुयाद्वैष्णवीं तनुम् ।
सान्द्रानन्दमयं शान्तं नित्यविज्ञानविग्रहम् ॥
हृत्पद्मे नृहरिं ध्यात्वा साक्षान्नारायणो भवेत् ।

६५४तमपृष्ठानन्तरं ६५७तमं पृष्ठं क्रमशो ज्ञेयम् । अनवधानतया पृष्ठाङ्कभेदं जातम् ।

६५४तमपृष्ठानन्तरं ६५७तमं पृष्ठं क्रमशो ज्ञेयम् । अनवधानतया पृष्ठाङ्कभेदं जातम् ।

आदिषोडशचक्रस्थमथ वा विन्दुवर्जितम् ।
अनादिमपरिच्छिन्नं योगिगम्यमतीन्द्रियम् ॥
परात्परतरं नित्यं निरुपाधिमनाविलम् ।
स्वतःप्रकाशं जगतः साक्षीभूतं निरञ्जनम् ॥
ज्योतिर्मयं नरहरिं ध्यात्वा ब्रह्ममयो भवेत् ।
अथ वा विश्वमखिलं भावयेन्नृहरेस्तनुम् ॥
जीवन्मुक्तो भवेत् सद्यो निराधिरकुतोभयः ।

ध्यानान्तरमुक्तं (शारदायाम्)

माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं
जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणम् ।
बाहुभ्यां धृतशङ्खचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लस-
ज्ज्वालाजिह्वमुदग्रकेशनिचयं वन्दे नृसिंहं विभुम् ॥

(मेरुतन्त्रे)

वामे शङ्खमरिं दक्षे जानुविन्यस्तबाहुकम् ।
ग्रसन्तं दैत्यराजानं कृशानूपमतेजसा ॥
दंष्ट्राप्रदीप्तवदनं ललज्जिह्वं त्रिलोचननम् ।
सुरैश्च मुनिभिर्लक्ष्म्या कृताञ्जलिकया स्तुतम् ॥

कामनाभेदेन ध्यानभेदा उक्तास्तत्रैव ।

काम्यप्रयोगसिद्ध्यर्थं ध्यानभेदान् वदाम्यहम् ।
उद्यत्सहस्रार्कभासं त्रिनेत्रं भीषणाकृतिम् ॥
वज्रतुल्येक्षणं वह्निकान्तिं नानाभुजैर्वृतम् ।
नखैर्दारितदैत्येशं रक्तधाराक्तकायकम् ॥
क्रूरकर्मादिविषये स्मरेद्देवं भयानकम् ।
विश्वरूपमयं ध्यानं नृहरेः प्रोच्यतेऽधुना ॥

नृसिंहं तं महाभीमं कालानलसमप्रभम् ।
अक्षमालाधरं रौद्रं कण्ठं हारेण शोभितम् ॥
नागयज्ञोपवीतं च पञ्चाननसुशोभितम् ।
चन्द्रमौलिं नीलकण्ठं प्रतिवक्त्रं त्रिलोचनम् ॥
भुजैः परिघसंकाशैर्दशभिश्चोपशोभितम् ।
अक्षसूत्रं गदां पद्मं शङ्खं गोक्षीरसन्निभम् ॥
धनुश्च मुशलं चैव बिभ्राणं चक्रमुत्तमम् ।
खड्गं शूलं च बाणं च नृहरिं रुद्रगोपनम् ॥
इन्द्रनीलकनीलाभं चन्द्राभं स्वर्णसन्निभम् ।
पूर्वोदयोत्तरज्वालदूर्ध्वास्यं सर्ववर्णकम् ॥
एवमुग्रहरिं ध्यायेत् सर्वव्याधिनिवृत्तये ।
ध्येयो यदा महत् कर्म तदा षोडशहस्तवान् ॥
नृसिंहः सर्वलोकेशः सर्वाभरणभूषितः ।
द्वौ विदारणकर्मार्हौ द्वौ चात्रोद्धरणक्षमौ ॥
चक्रशङ्खधरावन्यावन्यौ बाणधनुर्धरौ ।
खड्गखेटधरावन्यौ द्वौ गदापद्मधारिणौ ॥
पाशाङ्कुशधरावन्यौ द्वौ रिपोर्मुकुटार्पितौ ।
इति षोडशदोर्दण्डमण्डितं नृहरिं विभुम् ॥
ध्यायेदम्बुजनीलाभमुग्रकर्मण्यनन्यधीः ।
ध्येयो महत्तमे कार्ये तदा षड्विंशहस्तवान् ॥
नृसिंहः सर्वभूषाढ्यः सर्वसिद्धिकरः प्रभुः ।
दक्षिणे खड्गचक्रे च परशुं पाशमेव च ॥
हलं च मुशलं सम्यगभयं चाङ्कुशं तथा ।

पट्टिशं भिन्दिपालं च खेटतोमरमुद्गरान् ॥
वामभागकरैः शङ्खं खड्गं पाशं च शूलकम् ।
हुताशनं वरं शक्तिं सम्यग्मृण्मयकुण्डिकाम् ॥
कार्मुकं तर्जनीमुद्रां गदां डमरुसर्पकान् ।
करद्वन्द्वैः क्रमाच्छत्रोर्जानुमस्तकपत्तलम् ॥
ऊर्ध्वीकृताभ्यां हस्ताभ्यां मन्त्रमालाधरं हरिम् ।
अधःस्थिताभ्यां हस्ताभ्यां हिरण्यकविदारणम् ॥
प्रियङ्करं च भक्तानां दैत्यानां च भयङ्करम् ।
नृसिंहं संस्मरेद्दिव्यं महामृत्युभयापहम् ॥
अथोच्यते ध्यानमन्यन्मुखरोगहरं परम् ।
विषरोगहरं मृत्युहरं शत्रुभयावहम् ॥
स्वर्णौघतुल्ये गरुडे स्थितं पूर्णेन्दुवर्णकम् ।
सुमुखं विद्युदाभासनेत्रत्रयविराजितम् ॥
सुभूषं पीतवसनं सङ्खचक्रवराभयान् ।
धारयन्तं चतुर्भिश्च करैः क्ष्वेडादिनाशकम् ॥
अपमृत्युमहाकृत्यानाशकं नृहरिं स्मरेत् ।

(शारदायाम्)

उद्यत्कोटिरविप्रभं नरहरिं कोटीरहारोज्ज्वलं
दंष्ट्राभीममुखं लसन्नखमुखैर्दीर्घैरनेकैर्भुजैः ।
निर्भिन्नासुरनाथमग्निशशभृत्सूर्यात्मनेत्रत्रयं
विद्युत्पुञ्जजटाकलापभयदं वह्निं वमन्तं भजे ॥
सौम्ये सौम्यं स्मरेत् कार्यक्रूरे क्रूरमिमं भजेत् ।

पुरश्चरणमाह (मेरौ)

अष्टलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः ।

तत्सहस्रं प्रजुहुयाद्घृताक्तहविषाऽनले ॥
तर्पणं मार्जनं कृत्वा ब्राह्मणाराधनं तथा ।
कुर्यात् संसिद्धमन्त्रस्तु प्रयोगानाचरेत् ततः ॥

(शारदायां तु)

वर्णलक्षं जपेन्मन्त्रं तत्सहस्रं घृतप्लुतैः ।
पायसान्नैः प्रजुहुयाद्विधिवत्पूजितेऽनले ॥
एवं कृते भवेन्मन्त्री सिद्धमन्त्रः प्रतापवान्—इत्युक्तम् ।

अथ मन्त्रभेदा (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि द्वितीयं नृहरिं विभुम् ।

(संहितायाम्)

अथ वक्ष्ये नृसिंहस्य बीजरूपं मनूत्तमम् ।
संवर्त्तो वह्निमारूढो मनुस्वरविभूषितः ॥
विन्दुनादकलाक्रान्तो भुक्तिमुक्तिप्रदो मनुः ।
अत्रिरस्य मुनिः प्रोक्तो गायत्री छन्द ईरितम् ॥
देवता नृहरिः प्रोक्तः सुरासुरनमस्कृतः ।
षड्दीर्घभाजा बीजेन षडङ्गानि प्रकल्पयेत् ॥
ध्यानपूजादिकं सर्वं मन्त्रराजोदितं चरेत् ।

अस्य पुरश्चरणमुक्तं (मेरुतन्त्रे)

एकलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः ।
तद्दशांशं हुनेत् सम्यग्घृताक्तैः पायसैः शुभैः ॥
तर्पयेच्छुद्धसलिलैः कृत्वा चात्माभिषेचनम् ।
ब्राह्मणान् सम्यगाराध्य सिद्धमन्त्रः समाचरेत् ॥
मन्त्रराजोदितान् सर्वान् प्रयोगानत्र साधकः ।

तत्रैव ।

अथातः संप्रवक्ष्यामि तृतीयं नृहरेर्मनुम् ।

(शारदायाम्)

पाशः शक्तिर्नरहरिरङ्कुशो वर्म फड्मनुः ।
षडक्षरो नरहरेः कथितः सर्वकामदः ॥
ऋषिर्ब्रह्मा समुद्दिष्टः पङ्क्तिश्छन्द उदाहृतम् ।
देवता नरसिंहोऽस्य षड्बीजैरङ्गकल्पना ॥

अथ ध्यानम् ।

कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रं
पादादानाभिरक्तप्रभमुपरिसितं भिन्नदैत्येन्द्रगात्रम् ।
शङ्खं चक्रं सपाशाङ्कुशकुलिशगदादारणान्युद्वहन्तं
भीमं तीक्ष्णाग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम् ॥

पुरश्चरणमाह ।

ऋतुलक्षं जपेदेनं घृतेन जुहुयात् ततः ।
तत्सहस्रं समिद्धेऽग्नौ तोषयेद्वित्तैर्गुरुम् ॥

(मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि तुर्यमन्वन्तरोद्भवम् ।
ज्वालामालिनृसिंहस्य मनुं भूतादिनाशकम् ॥

(शारदायाम्)

बीजं नमो भगवते नरसिंहाय तत्परम् ।
स्याज्ज्वालामालिने पश्चाद्दीप्तदंष्ट्राय तत्परम् ॥
अग्निनेत्राय सर्वादिरक्षोघ्नाय पदं वदेत् ।
सर्वभूतविनाशान्ते नकारो दीर्घवान्मरुत् ॥
एवं ज्वराविनाशान्ते नायार्णो दहयुग्मकम् ।
पचद्वयं रक्षयुग्मं हुँ फट्स्वाहा ध्रुवादिकः ॥
सप्तषष्ट्यक्षरैः प्रोक्तो ज्वालामालिमहामनुः ।
हृत् त्रयोदशभिः प्रोक्तं शिरो दशभिरीरितम् ॥

शिखैकादशभिः प्रोक्ता वर्माष्टादशभिर्मतम् ।
वर्णैर्द्वादशभिर्नेत्रमस्त्रं स्यात् करणाक्षरैः ॥
एवमङ्गानि विन्यस्य चिन्तयेन्मन्त्रदेवताम् ।

ध्यानम् ।

प्रज्वलन् प्रलयानलाभमयुग्मनेत्रमनारतम् ।
भासुरं शिखिनः शिखाभिरुपदंष्ट्रमुखाम्बुजम् ॥
रक्षसां भयदं विकीर्णसटाकलापविभीषणम् ।
शङ्खचक्रकृपाणखेटकधारिणं नृहरिं भजे ॥

अथ पुरश्चरणम् ।

लक्षमेकं जपेन्मन्त्रं तद्दशांशं समाहितः ।
कपिलाज्येन जुहुयात् समिद्धे हव्यवाहने ॥

(मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि यो जातः पञ्चमे विभुः ।
मन्वन्तरे स लक्ष्मीकः सेव्यते यो गृहस्थितैः ॥

(संहितायाम्)

अथ लक्ष्मीनृसिंहस्य मन्त्रं वक्ष्ये सुदुर्लभम् ।
तारेन्दिराशक्तिरमाः शूलिनं पुरुषोत्तमम् ॥
लक्ष्मीप्रियपदं ङेऽन्तं नित्यमामुदितोत्तरम् ।
चेतसं तादृशं प्रोक्त्वा लक्ष्मीश्रितपदोत्तरम् ॥
अर्धदेहपदं ङेऽन्तं रमा माया रमा च हृत् ।
सुरवर्णो मनुः प्रोक्तश्चतुर्वर्गफलप्रदः ॥
मुनिः प्रजापतिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतम् ।
लक्ष्मीनृसिंहो भगवान् देवताऽस्य प्रकीर्त्तितः ॥
स्वबीजेन षडङ्गानि कृत्वा न्यासान्तरं चरेत् ।

तदुक्तं (मेरुतन्त्रे)

पुरस्तात् केशवः पातु चक्री जाम्बूनदप्रभः ।
पश्चान्नारायणः शङ्खी नीलजीमूतसन्निभः ॥
इन्दीवरदलश्यामो माधवोर्ध्वगदाधरः ।
गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान् ॥
उत्तरे हलधृग्विष्णुः पद्मकिञ्जल्कसन्निभः ।
आग्नेय्यामरविन्दाक्षो मुशली मधुसूदनः ॥
त्रिविक्रमः खड्गपाणिर्नैर्ऋत्यां ज्वलनप्रभः ।
वायव्यां वामनो वज्री तरुणादित्यदीप्तिमान् ॥
ऐशान्यां पुण्डरीकाक्षः श्रीधरः पट्टिशायुधः ।
विद्युत्प्रभो हृषीकेशो वायव्यां दिशि मुद्गरी ॥
हृत्पद्मं पद्मनाभो मे सहस्रार्कसमप्रभः ।
सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतो मुखः ॥
इन्द्रगोपकसंकाशः पाशहस्तोऽपराजितः ।
सबाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः ॥
एवं सर्वत्र निश्छिद्रं नामद्वादशपञ्जरम् ।
प्रविष्टोऽहं न मे किञ्चिद्भयमस्ति कदा चन ॥
इति न्यासं विधायादौ लक्ष्मीनरहरिं स्मरेत् ।

ध्यानं यथा ।

सर्पेन्द्रभोगशयनः सर्पेन्द्रफणाच्छत्रवान् ।
आलिङ्गितश्च रमया दीप्तया चन्द्रसन्निभः ॥
पद्मचक्रवराभीतिधरस्त्र्यक्षेन्दुशेखरः ।

(संहितायां) तु मन्त्रराजोक्तमेव ध्यानमुक्तम् ।

पुरश्चरणमाह ।

षष्ट्युत्तरं त्रिलक्षं तु प्रजपेत् तत्सहस्रकम् ।
मध्वक्तमल्लिकापुष्पैर्जुहुयान्मन्त्रवित्तमः ॥
अभ्यर्च्य सलिले देवं तर्पयेन्मनुना ततः ।
अभिषिञ्चेत् स्वमूर्धानं ब्राह्मणान् भोजयेत् ततः ॥
ततः प्रयोगान् कुर्वीत साधको निजवाञ्छितान् ।

तत्रैव ।

अथातः संप्रवक्ष्यामि षष्ठमन्वन्तरेऽभवत् ।
लक्ष्म्या सह नृसिंहोऽ यस्तन्मन्त्रः सर्वकामदः ॥
ॐ श्रीँ लक्ष्मीनृसिंहाय मनुरष्टाक्षरो मतः ।
मुनिः प्रजापतिश्छन्दोऽनुष्टुब्लक्ष्मीहरिः सुरः ॥
षड्दीर्घयुक्तं क्ष्रौँ बीजैः षडङ्गविधिरीरितः ।
ध्यानपूजादिकं सर्वं षडक्षरवदीरितम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः ।
पायसैर्जुहुयान्मन्त्री तर्पणादि ततश्चरेत् ॥
अथातः संप्रवक्ष्यामि यो जातः सप्तमे हरिः ।
जय जय श्रीनृसिंह मनुरष्टाक्षरो मतः ॥
ऋष्याद्यष्टार्णवत् प्रोक्तं पूजा चास्य षडर्णवत् ।
एकार्णवत् प्रयोगांश्च गृहस्थः साधयेच्छुचिः ॥
अथातः संप्रवक्ष्यामि त्वष्टमे यस्तु जायते ।
दशावतारनृहरिर्दक्षसावर्णिकान्तरे ॥
ॐ क्ष्रौँ नमो भगवते नृसिंहाय संवदेत् ।
ॐ क्ष्रौँ च मत्स्यरूपाय कूर्मरूपाय तद्ब्रूयात् ॥

ॐ क्ष्रौँ वराहरूपाय ततो बीजद्वयं वदेत् ।
नृसिंहरूपाय ततो वेदादि ह्रौँ वदेत् ततः ॥
प्रोच्चा वामनरूपाय त्रिधा बीजद्वयं वदेत् ।
रामाय तच्च कृष्णाय तद्द्वयं कल्किने वदेत् ॥
जयशब्दद्वयान्ते तु शालग्रामनिवासिने ।
दिव्यसिंहायेति चोच्चा वदेत् पश्चात् स्वयम्भुवे ॥
पुरुषाय नमस्तारः ह्रौमेकोनशतार्णकः ।
अद्विजेन तु बुद्धाय वक्तव्यं बीजपूर्वकम् ॥
तदा मन्त्रः समाख्यातश्चतुरूर्ध्वशताक्षरः ।
छन्दोऽतिजगती प्रोक्तमृषिरत्रिः प्रकीर्त्तितः ॥
दशावतारनृहरिर्देवता सर्वकामदः ।
षड्दीर्घयुक्तबीजेन षडङ्गानि प्रकल्पयेत् ॥
मन्त्रराजवदेवास्य ध्यानपूजादिकं भवेत् ।
यजेत् षडङ्गपूजान्ते मत्स्यादीनवतारकान् ॥

अथ पुरश्चरणम् ।

अयुतं प्रजपेन्मन्त्रं साज्येन हविषा ततः ।
जुहुयात् तद्दशांशेन तर्पणादि ततश्चरेत् ॥
काम्यकर्माणि सर्वाणि मन्त्रराजवदेव हि ।
अस्य संसेवनाद्विप्रा ब्रह्मचर्यादिविच्युताः ॥
नृसिंहरूपतां प्राप्य जाताः स्थाननृसिंहकाः ।
आविशंति च ते देहे सम्यक् कुर्वन्ति पूजिताः ॥
अथातः संप्रवक्ष्यामि जायते नवमे तु यः ।
नरसिंहो बीरनामा शृणु तत्साधनं प्रिये ॥

बाले च तरुणे वृद्धे प्रयोगार्थं मनुत्रयम् ।
प्रोक्तं संसाधिके वक्रशुद्धे सिद्धास्त्रयोऽपि च ॥
तारो नमो भगवते बीजान्ते नरपदं वदेत् ।
सिंहायेति ततः प्रोक्त्वा ज्वालामालापदं वदेत् ॥
पिनद्धाङ्गाय इत्युक्त्वा अग्निनेत्राय संवदेत् ।
सर्वभूतविनाशेति नायेत्युक्त्वा द्विधा दह ॥
पच युग्मं रक्षयुग्मं ह्रीँ श्रीँ रक्षाग्निगेहिनी ।
चतुष्पञ्चाशदर्णोऽयं मन्त्रः प्रथम ईरितः ॥
वर्णाः षोडशपूर्वस्य लिने दीप्तपदं वदेत् ।
दंष्ट्राय चाग्निनेत्राय सर्वरक्षो-पदं ततः ॥
घ्नायोक्त्वा सर्वभूतेति ङेऽन्तं विनाशनं वदेत् ।
सर्वज्वरविनाशाय हनद्वन्द्वं दहद्वयम् ॥
पचयुग्मं बन्धयुग्मं हुँ फट् स्वाहा ङगार्णकः ।
तृतीयमथ वक्ष्यामि पूर्वार्णा गजबाहवः ॥
विनाशनाय चान्ते स्यात् पूर्वसर्वपदं त्रिधा ।
मध्ये भूतज्वरदोषपदानि त्रीणि योजयेत् ॥
हनादिचतुरन्ते तु रक्षयुग्मं च मां च माम् ।
हुँ फट्स्वाहा नवकृतिवर्णतुल्यो मतो मनुः ॥
मन्त्रराजोक्तवच्चास्य पूजाध्यानजपादिकम् ।
मालामन्त्रा इमे ख्याता द्रुतसिद्धिविधायकाः ॥
अथातः संप्रवक्ष्यामि दशमे जायते तु यः ।
ॐ क्ष्रौँ महानृसिंहाय नमोऽन्तो दशवर्णकः ॥
वामदेवो मुनिश्छन्दो विराड्देवो नृसिंहकः ।

षड्दीर्घयुक्स्वबीजेन षडङ्गन्यासमाचरेत् ॥
ध्यानपूजापुरश्चर्या होमो लक्ष्मीनृसिंहवत् ।
वर्णलक्षं जपेन्मन्त्रं प्रयोगोऽष्टाक्षरोदितः ॥
अथातः संप्रवक्ष्यामि मन्त्रमेकादशस्य तु ।
ॐ क्ष्रौँ नमो भगवते नरसिंहाय मन्त्रकः ॥
त्रयोदशार्ण उद्दिष्टो भुक्तिमुक्तिप्रदायकः ।
वामदेवो मुनिः प्रोक्तो जगती छन्द ईरितम् ॥
देवतानरसिंहोऽत्र स्वबीजेनाङ्गकल्पनम् ।
ध्यानपूजाप्रयोगादि षडक्षरवदीरितम् ॥
अथातः संप्रवक्ष्यामि द्वादशे जायते तु यः ।
काश्यां स वसते नित्यं दुष्टबुद्धिप्रचालकः ॥
तारं सहस्रारज्वालावर्त्तिने त्रौँ हनद्वयम् ।
हुँ फट्स्वाहा घोनविंशवर्णो मन्त्र उदाहृतः ॥
मुनिर्जयन्त आख्यतश्छन्दो गायत्रमुच्यते ।
सुदर्शननृसिंहोऽस्य देवता परिकीर्त्तितः ॥
चक्रराजाय हृत् प्रोक्तं ज्वालाचक्राय वै शिरः ।
गजचक्राय च शिखा कवचं त्वस्य संमतम् ॥
असुरान्तकचक्राय ह्यस्त्राय फडितीरितम् ।
सुदर्शनायेति मनुः पञ्चाङ्गमेतदीरितम् ॥

अथ ध्यानम् ।

चक्राणां तु सभामध्ये कालाग्निसदृशप्रभम् ।
चतुर्भुजं त्रिवृत्तास्यं चतुश्चक्रधरं हरिम् ॥
तप्तकाञ्चनसंकाशं त्रिनेत्रं चाद्यविग्रहम् ।

ध्यायेत् समस्तदुःखघ्नं तादृग्लक्ष्म्या समन्वितम् ॥

अथ पुरश्चरणम् ।

रविलक्षं जपेन्मन्त्रं तद्दशांशं तिलैः शुभैः ।
हुनेत् पुष्पैस्ततश्चापि चत्वारिंशत्सहस्रकम् ॥
पुनराज्येन जुहुयात् सहस्रं च नमस्क्रियाः ।
तर्पणादि ततः कृत्वा प्रयोगानाचरेत् ततः ॥
अथातः संप्रवक्ष्यामि भुक्तिमुक्तिप्रदायकम् ।
जातं त्रयोदशे देवं नृहरिं क्ष्रौँ तु संपुटः ॥
मायया भोगदाता स्यात् प्रणवेन च मोक्षदः ।
अस्य पजाप्रयोगाद्यमेकाक्षरसमं भवेत् ॥
अथातः संप्रवक्ष्यामि जातं मन्वन्तरे विभुम् ।
अभयाख्यो नृसिंहोऽयं समस्तभयनाशनः ॥
तारो नमो भगवते नरसिंहाय हृद्वदेत् ।
तेजस्तेजस इत्युक्त्वा आविराविर्भवेति च ॥
वज्रनख वज्रदंष्ट्र कर्माशयान् ह्री रन्धय ।
तमो ह्रींग्रस वह्निस्त्री वेददभयमात्मनि ॥
भूयिष्ठा ॐ क्ष्रौमिति च द्विषष्ट्यर्णो मनुर्मतः ।
मुनिः शुकोऽतिजगती छन्दः प्राग्वादेवाखिलम् ॥
चतुर्दशनृसिंहानां साधनं वेदबोधितम् ।
तदत्र कथितं देवि भुक्तिमुक्तिप्रदायकम् ॥

अथ वामनमन्त्राः (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि वामनस्य शुभान् मनून् ।
मन्वन्तरं तपत्येकं सरेशं बाधते परम् ॥

पुनर्द्ददाति हरये त्रैलोक्यं स बलिर्नृपः ।
एकं मन्वन्तरं शक्रः स्वयमेवाभवद्बलिः ॥
एवं षड्वामनाः कल्पे तेषां मन्त्रान् वदाम्यहम् ।

षड्वामनाश्च तन्त्रान्तरे ।

दधिवामनयज्ञेशवामनौ भोगवामनः ।
बालको वामनो विश्वरूपोऽन्यो बलिवामनः ॥

तत्र दधिवामनमन्त्रः (शारदायाम्)

तारो हृद्विष्णवे पश्चाद्ङेन्तः सुरपतिर्भवेत् ।
महाबलाय ठद्वन्द्वं मनुरष्टादशाक्षरः ॥
ऋषिरिन्दुर्विराट्छन्दो देवता दधिवामनः ।
हृदेकेन शिरो द्वाभ्यां शिखा त्रिभिरुदाहृतम् ॥
कवचं पञ्चभिः प्रोक्तं नेत्रं तावद्भिरक्षरैः ।
द्वाभ्यामस्त्रमिति प्रोक्तः प्रकारोऽङ्गस्य सूरिभिः ॥

अथ ध्यानम् ।

मुक्तागौरं नवमणिलसद्भूषणं चन्द्रसंस्थं
भृङ्गाकारैरलकनिकरैः शोभिवक्त्रारविन्दम् ।
हस्ताग्राभ्यां कनककलशं शुद्धतोयाभिपूर्णं
दध्यन्नाढ्यं कनकचषकं धारयन्तं भजामः ॥

अथ पुरश्चरणम् ।

गुणलक्षं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः ।
पायसान्नैः प्रजुहुयाद्दध्यन्नैर्वा यथाविधि ॥

वामनमन्त्रभेदास्तु (मेरौ) द्रष्टव्याः ।

अथ त्रिविक्रममन्त्रा (मेरौ)

अथातः संप्रवक्ष्यामि मन्त्रं त्रैविक्रमं परम् ।
तारो नमो भगवते व्याहृतित्रितयं वदेत् ॥

व्यापकाय परं पश्चादुङेऽन्तं चापि त्रिविक्रमम् ।
विंशत्यर्णो महामन्त्रो गतराज्यप्रदायकः ॥
पदपञ्चकसर्वेण षडङ्गविधिरीरितः ।
मुनयो बालिखिल्याः स्युश्छन्दो गायत्रमीरितम् ॥
देवता विश्वरूपोऽयं त्रिविक्रम उदाहृतः ।

ध्यानम् ।

दक्षाङ्घ्रिव्याप्तपातालं वामाङ्घ्रिव्याप्तभूतलम् ।
दक्षिणं पुनरुत्थाप्य स्वर्गव्याप्तिकरं हरिम् ॥
वलिदत्तैः कुशतिलतोयैः संप्रस्रवत्करम् ।
अभयं वामहस्तेन कुर्वन्तं च सुरेश्वरम् ॥
गङ्गौघधौतपादाब्जं ध्यायेद्ब्रह्मादिकस्तुतम् ।

अथ पुरश्चरणम् ।

विंशल्लक्षं जपेन्मन्त्रं तिलतण्डुलसर्षपैः ।
त्रिमध्वक्तैर्हुनेत् पश्चात् तर्पणाद्यं च कारयेत् ॥
एवं सिद्धमनुर्मन्त्री लभते वाञ्छितं फलम् ।

अथ परशुराममन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि राममन्त्रं महाद्भुतम् ।
आकल्पमेक एवायं जामदग्न्यो महाबलः ॥
ब्रह्मक्षेत्राय विद्महे क्षत्रियान्ताय धीमहि ।
तन्नो रामः प्रचोदयात् .... ॥

तथा ।

श्रीमत्परशुरामस्य गायत्र्येषा महाद्भुता ।
राज्यकृत् कलिभूपानां सर्वतन्त्रेषु गोपिता ॥
भरद्वाजो मुनिः प्रोक्तो गायत्री छन्द ईरितम् ।

श्रीमान् परशुरामोऽस्य देवता भक्तवत्सलः ॥
अष्टेषुत्रिद्विबाह्वब्धिवर्णैः प्रोक्तं षडङ्गकम् ।

अथ ध्यानम् ।

सात्त्विकं श्वेतवर्णं च भस्मोद्धूलितविग्रहम् ।
अग्निहोत्रस्थलासीनं नानामुनिगणावृतम् ॥
कम्बलासनमारूढं स्वर्णतारकुशाङ्गुलिम् ।
श्वेतवस्त्रद्वयोपेतं जुह्वन्तं शान्तमानसम् ॥
ध्यायेच्च राजसं रामं कुङ्कुमारुणविग्रहम् ।
किरीटिनं कुण्डलिनं परश्वब्जवराभयान् ॥
करैर्दधन्तं तरुणं विप्रक्षत्रौघसंवृतम् ।
पीताम्बरधरं कामरूपं बालनिरीक्षितम् ॥
ध्यायेच्च तामसं क्षत्ररुधिराक्तपरश्वधम् ।
आरक्तनेत्रं कर्णस्थब्रह्मसूत्रं यमप्रभम् ॥
धनुष्टङ्कारसंघोषसंत्रस्तभुवनत्रयम् ।
चतुर्बाहुं मुशलिनं संक्रुद्धभ्रातृसंयुतम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं सिताज्यघृतपायसैः ।
हुनेद्ब्राह्मणभोज्यान्तं कृत्वा सिद्धो भवेन्मनुः ॥
ब्रह्मकर्मरतो नित्यं गायत्रीजपतत्परः ।
स एव जायते सिद्धो नान्यो विप्रः कदा चन ॥

तथा—

फिरङ्गा यवनाश्चीनाः खुरासानाश्चलेन्धुजाः ।
रामभक्तं प्रदृष्ट्वैते त्रसन्ति प्रणमन्ति च ॥

अथ श्रीरघुनाथमन्त्रा (वशिष्ठसंहितायाम्)

कृष्णं द्वैपायनं व्यासं गुरुं सत्यवतीसुतम् ।

समाधिस्थं मुनिं शान्तं प्रसन्नादित्यतेजसम् ॥
गङ्गातीरे महापुण्ये समासीनं तपोनिधिम् ।
शौनकः परिपप्रच्छ साष्टाङ्गं प्रणिपत्य च ॥

श्रीशौनक उवाच ।

अयि प्रसादसुमुख कुरुष्व मयि मानसम् ।
तत्प्रासादान्महामन्त्रा विहिता बहवो मया ॥
करुणारसपूर्णाभ्यां नेत्राभ्यां मां विलोकय ।
सच्चिदानन्दमात्मानं ज्ञातवान् ब्रह्मशास्वतम् ॥
इदानीं श्रोतुमिच्छामि मन्त्रं साङ्गं सहाचर्नम् ।
रामात्मनाऽवतीर्णस्य विष्णोरमिततेजसः ॥
ब्रूहि मे भगवन् सर्वं श्रोतुं योग्योऽस्म्यहं यदि ।
असौ भाग्येन लोकोऽयं दारिद्र्येण च पीडितः ॥
येन सौभाग्यमतुलं महदैश्वर्यसम्भवम् ।
शास्त्रज्ञानं कवित्वं च सर्वज्ञत्वं लभेन्नरः ॥

श्रीव्यास उवाच ।

साधु पृष्टं त्वया ब्रह्मन् कथये सकलं तव ।
ब्रह्मणा कथितं पूर्वं वशिष्ठाय महात्मने ॥
वशिष्ठोऽपि स्वपुत्राय मत्पित्रे दत्तवान्मनुम् ।
प्रसन्नहृदयः शुद्धः पिता मे करुणानिधिः ॥
कुरुक्षेत्रे महापुण्ये सूर्यपर्वणि दत्तवान् ।
मया च साधितो मन्त्रो जपहोमार्चनादिभिः ॥
इतः पूर्वं मया नोक्तो मन्त्रराजस्तु कस्य चित् ।
एवं परम्पराप्रोक्तं भक्त्या मन्त्रं शृणुष्व मे ॥

अयोग्याय न दातव्यो मन्त्रराजस्त्वया मुने ।
यत्नेन गोपय त्वं च रहस्यं श्रीप्रासिद्धिदम् ॥

शिष्यलक्षणमुक्त्वा—

ईदृग्विधाय शिष्याय मन्त्रं दद्यात् तु नान्यथा ।
यदन्यथा वदेत् तस्मिन् देवता शापदा भवेत् ॥

मन्त्रोद्धारमाह ।

मान्तान्तं विन्दुसंयुक्तं नारायणविभूषितम् ।
बीजमेतत् समुद्धृत्य विन्दुहीनं पुनश्च तत् ॥
भान्तं चाकारसंयुक्तं मान्तान्तां नतिमुद्धरेत् ।
एतत् षडक्षरं मन्त्रं सर्वैश्वर्यप्रदायकम् ॥
सर्वसौभाग्यजननं सर्वलोकवशङ्करम् ।
विद्यासिद्धिकरं नृणां महदाज्ञाकरं मुने ॥
ऋषिर्ब्रह्माऽस्य मन्त्रस्य गायत्रं छन्द उच्यते ।
रामाख्यं वैष्णवं धाम देवता परिकीर्त्तिता ॥
जानीयात् प्रथमं वर्णं बीजं शक्तिं नतिं तथा ।

मन्त्रार्थमाह (रामार्चनचन्द्रिकायाम्)

श्रीराममन्त्रराजस्य सम्यगर्थोऽभिधीयते ।
रकारो वह्निवचनः प्रकाशे पर्यवस्यति ॥
सच्चिदानन्दरूपोऽस्य परमात्मार्थ उच्यते ।
व्यञ्जनं निष्कलं ब्रह्म प्राणो मायेति च स्वरः ॥
व्यञ्जनैः स्वरसंयोगो विद्धि तत्प्राणयोजनम् ।
रेफे ज्योतिर्मये तस्मात् कृतमाकारयोजनम् ॥
मकारोऽभ्युदयार्थत्वान्मायात्मेति च कथ्यते ।
तस्मादनेन बीजेन समायं ब्रह्म उच्यते ॥

(रामोपनिषदि)

स्वप्रकाशः स्वयं ज्योतिः स्वानुभूत्येकाचिन्मयः ।
तदेव मन्त्रराजस्य मनुराड्द्व्यक्षरः स्मृतः ॥
अखण्डैकरसानन्दस्तारको ब्रह्मवाचकः ।
रामायेति सुविज्ञेयः सत्यानन्दचिदात्मकः ॥
नमःपदं सुविज्ञेयं पूर्णानन्दैकविग्रहम् ।
सदा नमन्ति हृदये सर्वे देवा मुमुक्षवः ॥

आद्यबीजभेदात् षड्विधोऽयं मन्त्रस्तदुक्तं (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि भुक्तिमुक्तिप्रदायकान् ।
राममन्त्रान् स भगवान् प्रतिमन्वन्तरे ह्यभूत् ॥
युगानां परिवर्त्तेन कल्पे शक्रावतारकः ।
तत्राद्यस्य प्रवक्ष्यामि मन्त्रराजं षडक्षरम् ॥
रामाय नम इत्येष राँ क्लीँ ह्रौँ ऐँ तु पूर्वकः ।
श्रीताराद्यश्च षड्वर्णः षड्विधः परिकीर्त्तितः ॥
ब्रह्मा संमोहनः शक्तिर्दक्षिणामूर्त्तिरेव च ।
अगस्त्यः श्रीशिवः प्रोक्ता मुनयोऽनुक्रमादिमे ॥
छन्दो गागत्रसंज्ञं च श्रीरामो देवता मतः ।

षडक्षरस्यैव भूयांसः प्रभेदास्तत्रैवोक्ताः ।

पञ्चाशन्मातृकामन्त्रवर्णः प्रत्येकपूर्वकः ।
लक्ष्म्यादिर्वाग्भवादिश्च मन्मथादिर्ध्रुवादिकः ॥
रामचन्द्रस्तथा भेदाः शतद्वयमिता अमी ।
रामभद्रेति शब्देन चैवं भेदाः शतद्वयम् ॥
रमाबीजादिकानां तु विश्वामित्रो मुनिर्मतः ।
वाग्बीजपूर्वकाणां तु दक्षिणामूर्त्तिरुच्यते ॥

कामबीजादिपूर्वेषां मुनिः संमोहनो मतः ।
तारादिपूर्वकाणां तु श्रीशिवः प्रोच्यते मुनिः ॥
श्रीमायामन्मथैकैकबीजाद्यन्तगतो यदा ।
रामभद्रो रामचन्द्रः षोढा षड्वर्ण उच्यते ॥
षोढा नमोऽन्तः प्राक् प्रोक्तः फट्कारान्तः स एव हि ।
षोढा स्याद्वह्निजायान्तः स एवं षड्विधो मतः ॥
चतुःशतं चतुर्विंशभेदास्तेन निरूपिताः ।

तथा ।

तारादिर्मुक्तये ह्येष रमादिर्भुक्तये भवेत् ।
वाक्सिद्धये च वागादिः सर्ववश्याय मान्मथः ॥
ताराद्यैः पुटितान् मन्त्रान् सर्वार्थं विनियोजयेत् ।

तथा ।

ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृन्नाभ्यन्धुषु पादयोः ।
बीजैः षड्दीर्घसंयुक्तैः षडङ्गविधिरीरितः ॥

(वशिष्ठसंहितायाम्)

आधारे भावयेच्छक्तिं चिदानन्दस्वरूपिणीम् ।
उद्यदादित्यसंकाशमाधारं तत्प्रभामयम् ॥
आधारभावनामेवं संभाव्य मुनिसत्तम ।
ततः समुत्थितं तेजः शिखारूपं च चिन्तयेत् ॥
विद्युत्कोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
सुषुम्नामुखमुन्मील्य प्रापयेदुपदेशतः ॥
ब्रह्माध्वनाऽऽनयेदूर्ध्वं द्वादशान्तेन्दुमण्डलम् ।
प्रापय्य विधिना बुद्ध्या स्रावयेत् तत् सुधामृतम् ॥
ततः परिगलच्छुद्धसुधाधाराभिरावृतम् ।

निजदेहं जगत् सर्वमेकीभूतं विचिन्तयेत् ॥
निष्प्रपञ्चं निराकारं निरवद्यं निरञ्जनम् ।
अशून्यशून्योपरमं सदसद्भाववर्जितम् ॥
अखण्डानन्दमात्मानं भावयेन्मुनिसत्तम ।
देवतागुरुमन्त्राणां भावयेदैक्यमात्मनः ॥
एवं संचिन्तयेन्मन्त्री मन्त्रं प्रतिदिनं जपेत् ।
ऐहिकानखिलान् भोगान् भुक्त्वा चान्ते पदं व्रजेत् ॥
उपसंहृत्य तत् तेजो यद्वा हृदयपङ्कजे ।
रामं ज्योतिर्मयं ध्यायेत् सर्वलोकैकसाक्षिणम् ॥
जगदुद्भूतिसम्भूतिपरिभूतिकरं हरिम् ।
देवासुरमनुष्यैश्च योगिवृन्दैश्च सेवितम् ॥

अथ ध्यानम् ।

चतुर्भुजं शङ्खचक्रगदापङ्कजधारिणम् ।
किरीटहारकेयूररत्नकुण्डलमण्डितम् ॥
एवं ध्यात्वा जपेन्मन्त्रं षट्सहस्रं दिने दिने ।
वाचः श्रियः पतिर्भूत्वा कविर्भवति वत्सरात् ॥

ध्यानान्तरमाह ।

ध्यायेत् कल्पतरोर्मूले सौवर्णमण्डपं मुने ।
तन्मध्ये पुष्पकाख्यं च विमानं दिव्यमुत्तमम् ॥
मध्ये सिंहासनं तस्य नानारत्नविभूषितम् ।
तन्मध्येऽष्टदलंपद्ममुद्यदादित्यसन्निभम् ॥
श्रीराममेनं तन्मध्ये समासीनं महामुने ।
सम्यग्ज्ञानमयीं मुद्रां दधानं दक्षिणे करे ॥

तेजःप्रकाशनं वामं जानुमूर्धनि चापरम् ।
जानकीवल्लभं देवमिन्द्रनीलसमप्रभम् ॥
उद्याननिरतं देवं द्विभुजं रघुनन्दनम् ।
वशिष्ठवामदेवादिमुनिभिः परिवारितम् ॥
वामभागे समासीनां सीतां काञ्चनसन्निभाम् ।
भजतां कामदां नित्यं रक्तोत्पलकराम्बुजाम् ॥
लक्ष्मणं पश्चिमे भागे धृतच्छत्रसुचामरम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ ॥
एवं ध्यात्वा जपेन्मन्त्रं ज्ञानलक्ष्म्योश्च भाजनम् ।

(शारदायामपि)

कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं भजे ॥

(मेरुतन्त्रे)

वीरासनसमारूढं व्याख्यामुद्रोपशोभितम् ।
वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसंयुतम् ॥

तन्त्रान्तरे पूर्वोक्तध्यानमुक्त्वा—

एवं तद्ध्यानमात्रेण सर्वपापैः प्रमुच्यते ।
राममिन्दीवरश्यामं पद्मपत्रायतेक्षणम् ॥
ध्यात्वा तु हृदयाम्भोजे ये जपन्ति षडक्षरम् ।
करामलकवज्ज्ञेया मुक्तिस्तेषां महात्मनाम् ॥

(वशिष्ठसंहितायाम्)

शास्त्रज्ञानं कवित्वं च षण्मासाज्जायते मुने ।

जपतां मन्त्रिणामेवं जपयोगेन धीमताम् ॥
पुरश्चरणकृत्येन विनाऽपि फलदो मनुः ।

अस्य पुरश्चरणमुक्तं (मेरुतन्त्रे)

वर्णलक्षं जपेन्मन्त्रं दशांशं मधुरप्लुतैः ।
विल्वपत्रैः फलैः पुष्पैस्तिलैर्वा पङ्कजैर्हुनेत् ॥

अथ मालामन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि लक्ष्मणोपासितं मनुम् ।
तारो नमो भगवते ङेऽन्तः स्याद्रघुनन्दनः ॥
रक्षोघ्नविशदायेति मधुरेति पदं ततः ।
प्रसन्नवदनायेति ततश्चामिततेजसे ॥
बलायेति च रामाय विष्णवे नम इत्ययम् ।
सप्तचत्वारिंशदर्णो मालामन्त्र उदाहृतः ॥
मुनिः पितामहश्छन्दः स्यादनुष्टुप् च देवता ।
राज्याभिषिक्तो रामश्चोँ बीजं शक्तिर्नमोऽस्त्विति ॥
सप्तर्तुसप्तदशषड्रससङ्ख्यैः षडङ्गकम् ।

तथा ।

ध्यानं दशाक्षरं प्रोक्तं लक्षमेकं जपेन्मनुम् ।
विल्वैः प्रसूनैः पत्रैर्वा तिलैस्त्रिमधुना युतैः ॥
मधुरत्रययुक्तेन पायसेनाथ वाऽम्बुजैः ।
होमं दशांशतः कुर्यात् तथा सर्वत्र तर्पणम् ॥
मार्जनं भोजयेद्विप्रान् प्रयोगादि च पूर्ववत् ।

दशाक्षरमन्त्रो वक्ष्यते ।
मन्वन्तरभेदेन श्रीराममन्त्रभेद उक्तस्तत्रैव ।

अथातः संप्रवक्ष्यामि स्वारोचिषसमुद्भवम् ।

रामस्यैकाक्षरं मन्त्रं कीर्त्यते स तु रामिति ॥
ब्रह्मा मुनिः स्याद्गायत्रं छन्दो रामोऽस्य देवता ।
मूर्त्तिपञ्जरनामानं तत्त्वन्यासं च कारयेत् ॥
षड्दीर्घार्धेन्दुयुक्तेन बीजेनैव षडङ्गकम् ।
ध्यानपूजादिकं प्राग्वद्रानुलक्षं जपेन्मनुम् ॥
अथातः संप्रवक्ष्यामि तृतीयान्तर्मनोर्विधिम् ।
राम एत्येष कथितो द्व्यक्षरो भुक्तिमुक्तिदः ॥
एकाक्षरोक्तमृष्यादि स्यादाद्येन षडङ्गकम् ।
ध्यानपूजाप्रयोगादि सर्वं ज्ञेयं षडर्णवत् ॥
एवं पुरश्चरणमपि ज्ञेयम् ।
अथातः संप्रवक्ष्यामि चतुर्थान्तर्मनोर्विधिम् ।
तारमायारमानङ्गवाक्स्वबीजैश्च षड्विधः ॥
त्र्यक्षरो मन्त्रराजस्तु त्र्यक्षरः परिजायते ।
न्यासपूजाप्रयोगादि सर्वं पूर्ववदाचरेत् ॥
अथातः संप्रवक्ष्यामि पञ्चमान्तर्मनोर्विधिम् ।
त्र्यक्षरश्चन्द्रभद्रान्तो द्विविधश्चतुरक्षरः ॥
ऋषिन्यासार्चनाद्यं तु सर्वं पूर्ववदाचरेत् ।
विशेषतश्चतुर्वर्गफलदोऽयं मतो मनुः ॥
अथातः संप्रवक्ष्यामि षष्ठमन्वन्तरोद्भवम् ।
रामाय नम इत्येष मनुः पञ्चाक्षरो मतः ॥
विश्वामित्रो मुनिः प्रोक्तः पङ्क्तिश्छन्दोऽस्य देवता ।
रामभद्रो बीजशक्ती प्रथमार्णनती क्रमात् ॥
भ्रूमध्ये हृदि नाभ्यधो पादयोर्विन्यसेन्मनुम् ।
षडङ्गं पूर्ववद्यद्वा मन्त्रार्णैर्मनुनाऽस्त्रकम् ॥

ध्यानमाह ।

मध्ये वनं कल्पतरोर्मूले पुष्पलतासने ।
लक्ष्मणेन प्रगुणितमक्ष्णः कोणेन सायकम् ॥
अवेक्षमाणं जानक्या कृतव्यजनमीश्वरम् ।
जटाभारलसच्छीर्षं श्यामं मुनिगणावृतम् ॥
लक्ष्मणेन धृतच्छत्रमथ वा पुष्पकोपरि ।
दशास्यमथनं शान्तं ससुग्रीवविभीषणम् ॥
विजयार्थी विशेषेण वर्णलक्षं जपेन्मनुम् ।
प्राग्वद्धोमस्तर्पणादि प्रयोगाद्यं च साधयेत् ॥
अथातः संप्रवक्ष्यामि मन्त्रं सावर्णिकोद्भवम् ।
तारादिषड्भिः संयुक्तो द्वेधा सप्ताक्षरो मनुः ॥
अष्टाक्षरो द्वादशधा कीर्त्तितो राज्यदायकः ।
सर्वं षडर्णवज्ज्ञेयं ध्यानपूजाजपादिकम् ॥
अथातः संप्रवक्ष्यामि मन्त्रान् नवमसम्भवान् ।
तारो रामश्चतुर्थ्यन्तः क्रोधोऽस्त्रं वह्निवल्लभा ॥
अष्टार्णोऽयं परो मन्त्रो मुन्यादिः स्यात् षडर्णवत् ।
नाशकः सर्वदोषाणां सङ्ग्रामविजयप्रदः ॥
अथातः संप्रवक्ष्यामि मन्त्रान् दशमसम्भवान् ।
ॐ ह्रीँ नमश्च रामाय ह्रीमित्यष्टाक्षरः परः ॥
ऋषिः सदाशिवः प्रोक्तो गायत्रं छन्द उच्यते ।
शिवोमारामचन्द्रोऽस्य देवता परिकीर्त्तितः ॥
दीर्घया माययाऽङ्गानि तारपञ्चार्णयुक्तया ।
ॐनमो रामाय ह्रीँ हृदयाय नमः—इत्यादि ।

ध्यानपुरश्चरणे प्राह ।

रामं त्रिनेत्रं सोमार्धधारिणं शूलिनं वरम् ।
भस्मोद्धूलितसर्वाङ्गं कपर्दिनमुपास्महे ॥
रामाभिरामां सौन्दर्यसीमां सोमावतंसिनीम् ।
पाशाङ्कुशधनुर्बाणधरां ध्यायेत् त्रिलोचनाम् ॥
रामशक्तिं तु सीताख्यां वर्णलक्षं जपेन्मनुम् ।
होमपूजादिकं सर्वं षडक्षरवदीरितम् ॥
विशेषतो भोगदाता सङ्ग्रामविजयप्रदः ।
अथैकादशसम्भूतान् राममन्त्रान् वदाम्यहम् ॥
सप्तार्णैर्यौ मनू प्रोक्तौ षड्भिस्तारादिकैः पृथक् ।
संपुटौ ते द्वादशधा नवार्णा मनवः सुराः ॥
ध्यानपूजादिकं सर्वं तेषां सप्तार्णवद्भवेत् ।
अथातः संप्रवक्ष्यामि द्वादशान्तरसम्भवम् ॥
जानकीवल्लभो ङेऽन्तः स्वाहान्तश्च हुमादिकः ।
दशाक्षरोऽयं मन्त्रः स्याद्वशिष्ठोऽस्य मुनिश्च राट् ॥
छन्दश्च देवता रामः सीतापाणिपरिग्रहः ।
आद्यं बीजं द्विठः शक्तिरङ्गं षड्दीर्घको मतः ॥
शिरोललाटभ्रूमध्यतालुकण्ठेषु हृद्यपि ।
नाभ्यन्धुजानुपादेषु दशार्णान् विन्यसेन्मनोः ॥

ध्यानमाह ।

अयोध्यानगरे रत्नचिते सौवर्णमण्डपे ।
मन्दारपुष्पैराबद्धविताने तोरणान्विते ॥
सिंहासनसमारूढं पुष्पकोपरि राघवम् ।
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः ॥

संस्तूयमानं मुनिभिः प्रहृष्टैरुपसेवितम् ।
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपशोभितम् ॥
श्यामं प्रसन्नवदनं सर्वाभरणभूषितम् ।
ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षमनन्यधीः ॥
जपपूजाप्रयोगादि सर्वमस्य षडर्णवत् ।
अथ त्रयोदशे जातं राममन्त्रं वदाम्यहम् ॥
रामो ङेऽन्तो धनुष्पाणिस्तथा स्याद्वह्निसुन्दरी ।
दशाक्षरो मुनिर्ब्रह्मा विराट् छन्दोऽस्य देवता ॥
राक्षसान्तकरो रामो राँ बीजं परिकीर्त्तितम् ।
स्वाहा शक्तिश्च बीजेन षडङ्गानि समाचरेत् ॥
वर्णन्यासं तथा ध्यानं पौरश्चरणिकं विधिम् ।
दशाक्षरोक्तवत् कुर्याच्चापबाणधरं स्मरेत् ॥
विशेषाज्जयदश्चायं भ्रष्टराज्यप्रदायकः ।

एवं हनुमदाद्युपासिता मन्त्रा (मेरौ) द्रष्टव्याः ।
अथ रामगायत्री तत्रैव ।

अथातः संप्रवक्ष्यामि शत्रुघ्नोपासितां पराम् ।
जयदां रामगायत्रीमुपास्यां सूर्यवंशजैः ॥
दाशरथये विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात् ।
एषा स्याद्रामगायत्री भक्तानां भुक्तिमुक्तिदा ।
जन्मप्रभृति यत् पापं दशभिर्यातिमक्षयम् ॥
पुरा कृतं शतेनैव सहस्रेण जपेन वा ।
पुरश्चरणमस्याश्च चतुर्लक्षजपो विधिः ॥
यच्च यावच्च पूजादि सर्वं पूर्ववदाचरेत् ।
तारादिरेषा गायत्री मुक्तिमेव प्रयच्छति ॥

मायादिरपि वैश्वर्यं रमादिश्च श्रियं पराम् ।
मदनेनापि संयुक्तो संमोहयति मेदिनीम् ॥

अथ सीतामन्त्रो (वशिष्ठसंहितायाम्)

श्रीबीजं पूर्वमुच्चार्य सीतायै पदमुद्धरेत् ।
वह्निजायान्वितो मन्त्रो भजतां कल्पभूरुहः ॥
जनकोऽस्य ऋषिः प्रोक्तो गायत्री छन्द उच्यते ।
सीताख्या या जगद्धात्री देवता सा जगन्मयी ॥

(मेरुतन्त्रे)

सीता भगवती प्रोक्ता श्रीबीजं शक्तिरन्त्यकौ ।
दीर्घस्वरयुजाऽऽद्येन षडङ्गानि प्रकल्पयेत् ॥
पूजयेद्वैष्णवे पीठे ध्यायेद्राघवसंयुताम् ।
स्वर्णाभामम्बुजकरां रामालोकनतत्पराम् ॥

पुरश्चरणमाह ।

वर्णलक्षं जपेन्मन्त्रमिष्टार्थं साधयेत् ततः ।

अथ बलराममन्त्रस्तन्त्रान्तरे ।

तारान्ते बलभद्राय हृदयं वसुवर्णवान् ।
मुनिस्तु जैमिनिश्छन्दो गायत्रं देवताऽस्य च ॥
बलरामो मन्त्रवर्णैर्द्विरावृत्त्या षडङ्गकम् ।

अथ ध्यानम् ।

शुभ्राभ्रगौरं नीलाभं वसनं रेवतीप्रियम् ।
दधानं सीरमुशले बलरामं समाश्रये ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं जुहुयात् तद्दशांशतः-इति ।

अथ श्रीकृष्णमन्त्राः (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि कृष्णमन्त्रान् महाद्भुतान् ।
कृष्णः स एव भगवान् कलिद्वापरसन्धिगः ॥

वर्धयेत् कलिधर्माणां भक्तानां तारणाय सः ।
एकसप्ततिरूपोऽसौ प्रतिमन्वन्तरे भवेत् ॥
तदुक्ताचरणान्मोक्षस्तद्कृताचरणाच्च्युतिः ।
इति तत्त्वं समाख्यातं विभवस्य भवस्य च ॥
जातश्चाद्ये कलियुगे नानागोपीरते रतः ।
तत्कर्म कुर्वतां पातस्तत्सामर्थ्यं विभाविना ॥
स्वधर्मनिरतानां तु कलौ जन्म प्रजायते ।
तस्य मन्त्रं प्रवक्ष्यामि भुक्तिमुक्तिप्रसाधनम् ॥
गोपीजनवल्लभाय स्वाहामन्त्रो दशाक्षरः ।

(गौतमीये)

गोपीजनपदस्यान्ते वल्लभाय द्विठावधिः ।
अयं दशाक्षरो मन्त्रो दृष्टादृष्टफलप्रदः ॥
बीजपूर्वो जपश्चास्य रहस्यं कथितं मुने ।
लुप्तबीजस्वभावत्वाद्दशाक्षरमिहोच्यते ॥

(बृहद्गौतमीये)

भोगमोक्षैकनिलयो लुप्तबीजो दशाक्षरः ।
उद्धारे तु पृथक् तेन कामबीजं महामुने ॥
यद्योगात् फलदो मन्त्रो नान्यथा कल्पकोटिभिः ।

(मेरुतन्त्रे)

नारदोऽस्य मुनिः प्रोक्तो विराट् छन्द उदाहृतम् ।
देवता नन्दपुत्रः क्लीँ बीजं शक्तिः शिखिप्रिया ॥
आविशुः पूर्वपदकैस्त्रैलोक्यरक्षणादिकैः ।
असुरान्तादिकैश्चक्रशब्दैः स्वाहान्तकैश्चरेत् ॥
जातियुक्तैश्च पञ्चाङ्गं तथा पञ्चाङ्गुलीष्वपि ।

हृदये शीर्षके चैव शिखायां कवचे तथा ॥
अस्त्रे पार्श्वद्वये कट्यां पृष्ठे मूर्धनि च क्रमात् ।

न्यासान्तराण्युक्त्वा ध्यानमाह ।

एवं कृत्वा विधानेन मन्त्री मन्त्रकलेवरम् ।
त्रय्यन्तबोधितं नित्यं कृष्णं ध्यायेज्जगत्पतिम् ॥
पूर्वं वृन्दावनं रम्यं स्मरेत् पूर्वं विराजितम् ।
नवीनपल्लवोद्रेकफलसम्पत्तिसंयुतम् ॥
मधुपैः कृतझङ्कारैः कीराद्यैश्च निनादितम् ।
आदित्यतनयापार्श्वलहरीकणशीतलम् ॥
तस्मिन् वने कल्पतरुं नवपल्लवशोभितम् ।
स्वर्णशाखाग्रसंयुक्तं नवरत्नफलान्वितम् ॥
दिव्यामृतौघवर्षेण स्रवन्तं विश्वमुच्छ्रितम् ।
ज्वलद्रत्नसमाबद्धां पुष्परेणुविभूषिताम् ॥
षडूर्मिरहितां मन्त्री तस्याधस्ताद्भुवं स्मरेत् ।
माणिक्यकुट्टिमं तत्र योगपीठं विचिन्तयेत् ॥
पद्ममष्टदलं तत्र यथोक्तं रक्तवर्णकम् ।
तस्य मध्ये सुखासीनं कृष्णं ध्यायेदनन्यधीः ॥
उद्यदादित्यसंकाशं प्रसन्नवदनं विभुम् ।
इन्द्रनीलमणिप्रख्यं स्निग्धदीर्घशिरोरुहम् ॥
मायूरेण सुपिच्छेन राजमानोत्तमाङ्गकम् ।
भ्रमराक्रान्तकल्पद्रुपुष्पसंशोभिमस्तकम् ॥
कुटिलालकविभ्राजद्भालं कर्णाकृतोत्पलम् ।
गोरोचनाक्ततिलकं पूर्णचन्द्रनिभं स्मरेत् ॥
पद्मनेत्रं दीप्तमणिमकराकृतिकुण्डलम् ।

कपोलस्थललावण्यविजितस्वच्छदर्पणाम् ॥
अत्यद्भुतोन्नासिकं च पक्वविम्बफलाधरम् ।
दाडिमीबीजरदनं कम्बुसुन्दरकन्धरम् ॥
आरण्यपल्लवैः पुष्पैः कृतग्रैवेयसंपदम् ।
कौस्तुभप्रभया दीप्तविशालोन्नतवक्षसम् ॥
श्रीवत्सकाङ्कितोरस्कं वृषस्कन्धं च हारिणम् ।
आजानुलम्बिदोर्दण्डं वलित्रययुतोदरम् ॥
क्षुद्रघण्टिकया बद्धकटिं ग्रैवेयराजितम् ।
चक्रशङ्खलसत्पद्मपीतांशुकपटादिभिः ॥
कुलिशप्रमुखैश्चिह्नैरङ्कितस्वच्छपत्तलम् ।
मुखाम्बुजसमासक्तवंशच्छिद्रार्पिताङ्गुलिम् ॥
तदुत्थदिव्यसद्रागश्रवणाहृतमानसम् ।
अपाङ्गैः प्राणिजातं तु मोहयन्तमनारतम् ॥
परमानन्दसन्दोहसंपूर्णीकृतमानसम् ।
मुखपद्मसमासक्तस्वान्तनेत्राभिरावृतम् ॥
गोभिरूध्नभराक्रान्तमन्दयानाभिरेव च ।
कवलीकृतसंत्यक्तघासलेशाभिरप्यलम् ॥
प्रस्तुतस्तनपानेन संभृताननिर्गतैः ।
डिण्डीरपिण्डसंयुक्तैर्दुग्धैर्दृष्टिमनोहरैः ॥
वंशवादनसोद्गीतगीताकर्णनलालसैः ।
उत्तम्भिनीकृतश्रोत्रपुटयुग्मैश्च तर्णकैः ॥
किंविषाणान्तरोद्भूतिजातकण्डूतिमस्तकैः ।
परस्परविमर्दार्थं खुरस्पर्शमहीतलैः ॥

स्निग्धैर्गुरुभिरुत्पुच्छैः सुशोभिगलकम्बलैः ।
वत्सवत्सासमूहैश्च संवृतं तदनन्तरम् ॥
कृतहुंभाष*वज्जालैर्गुरुदीर्घककुद्वरैः ।
उच्चकर्णपुटापीतवेणुशब्दसुधारसैः ॥
सवयस्कैश्च गायद्भिर्नृत्यद्भिस्तुल्यभूषणैः ।
नानावेषधरैर्गोपैः संस्तुवद्भिः समावृतम् ॥
मधुराकृतिभिर्बालैरस्पष्टाद्भुतभाषणैः ।
शार्दूलनखसंक्लृप्तगलाकल्पैस्तथाऽऽवृतम् ॥
ततो गोपपुरन्ध्रीणां स्मरेद्वृन्दं समाहितः ।
तद्भावभावकल्लोलसंजीवितमनोभवम् ॥
वल्लवीवल्लवगवां देववृन्दं बहिः स्मरेत् ।
संमुखे देवदेवस्य काङ्क्षन्तं धनसंचयम् ॥
ऋषिसङ्घं तथा दक्षे वेदाध्ययनतत्परम् ।
धर्मार्थिभिः स्मरेत् पश्चात् सनकप्रमुखाँस्तथा ॥
वामे सस्त्रीकयोगीन्द्रान् यक्षगन्धर्वकिन्नरान् ।
सिद्धविद्याधराँश्चापि चारणानप्सरोगणान् ॥
अनेकश्रुतिसंपूर्णवीणावादनतत्परम् ।
आकाशे नारदं ध्यायेन्मुनिवर्यं गतस्मयम् ॥

अथ पुरश्चरणम् ।

ततः पूर्वोक्तविधिना दीक्षितः प्रजपेन्मनुम् ।
मन्त्रार्थं चिन्तयेन्मन्त्री नियमस्थो जितेन्द्रियः ॥
चत्वारिंशत् सहस्राणि श्वेतपद्माक्षमालया ।
पश्चान्मन्त्रस्य सिद्ध्यर्थं दशलक्षं जपेत् सुधीः ॥

---

* शब्दजालैरिति ४ पु० पा०

लक्षं हुनेद्रक्तपद्मैः सितासर्पिर्मधुप्लुतैः ।
शर्कराघृतयुक्तेन हविर्द्रव्येण वा हुनेत् ॥
तर्पयेत् सलिलैः शुद्धैश्चन्द्रचन्दनवासितैः ।
आत्माभिषेकं कृत्वाऽथ भूदेवान् पूजयेत् ततः ॥
नानाविधैर्भक्ष्यभोज्यैस्ताम्बूलैश्च सदक्षिणैः ।
ततो निजगुरुं सम्यक् प्रणिप्रत्य यथाविधि ॥
धनधान्याम्बराद्यैश्च वित्तशाठ्यविवर्जितः ।
तोषयेत् परया भक्त्या निजकार्यस्य सिद्धये ॥
ततः सिद्धमनुर्मन्त्री प्रयोगान् निजवाञ्छितान् ।
कुर्याद्भक्तियुतः सम्यङ्नित्यनैमित्तिके रतः ॥
तत्काले देवकीजातं शङ्खचक्रगदाम्बुजान् ।
दधतं पीतवसनं सुन्दरं गगनप्रभम् ॥
निशायामे चतुर्थ्यां तु ध्यात्वा लक्षं जपेन्मनुम् ।
त्रिमध्वक्तैस्तद्दशांशं किंशुकप्रसवैर्हुनेत् ॥
वीर्यं प्रज्ञां स्मृतिं प्राप्य कवीनामग्रणीर्भवेत् ।

अथ मन्त्रान्तरं (शारदायाम्)

कृष्णाय पदमाभाष्य गोविन्दाय ततः परम् ।
गोपीजनपदस्यान्ते वल्लभाय द्विठावधिः ॥
कामबीजादिराख्यातो मनुरष्टादशाक्षरः ।
नारदोऽस्य मुनिः प्रोक्तो गायत्रं छन्द उच्यते ॥
देवता कथितः कृष्णः सर्वकामफलप्रदः ।
चतुष्करणवेदाब्धिनेत्रसङ्ख्याक्षरक्रमात् ॥
पञ्चाङ्गानि मनोः कुर्यान्मन्त्रविज्ज्ञातिसंयुतैः ।

ध्यानम् ।

स्मरेद्वृन्दावने रम्ये मोहयन्तमनारतम् ।

गोविन्दं पुण्डरीकाक्षं गोपकन्याः सहस्रशः ॥
आत्मनो वदनाम्भोजप्रेषिताक्षिमधुव्रताः ।
पीडिताः कामबाणेन चिरमालिखनोत्सुकाः ॥
मुक्ताहारलसत्पीनतुङ्गस्तनभराननाः ।
स्रस्तधम्मिल्लवसना मन्दस्खलितभाषणाः ॥
दन्तपङ्क्तिप्रभोद्भासिस्यन्दमानाधराञ्चिताः ।
विलोभयन्तीर्विविधैर्विभ्रमैर्भावगर्वितैः ॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं वर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं करवेणुवादनपरं दिव्याङ्गभूषं भजे ॥

अथ पुरश्चरणम् ।

मन्त्रमेनं यथान्यायमयुतद्वितयं जपेत् ।
जुहुयादरुणाम्भोजैर्दशांशं सुसमाहितः ॥

अथ मन्त्रान्तराण्युक्तानि (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि क्रमाज्जाता युगत्रये ।
ये मन्त्रा दशवर्णस्य भेदाः सिद्धिविधायकाः ॥
काममायेन्दिरापूर्वो मायाश्रीकामपूर्वकः ।
लक्ष्मीमायास्मराद्यश्च मन्त्रराजो दशाक्षरः ॥
त्रयोदशाक्षरो मन्त्रस्त्रय एते युगत्रये ।
मुन्याद्यन्तविधिस्तेषां पङ्क्त्यामुक्तविधानतः ॥

पङ्क्त्यामिति दशाक्षर इत्यर्थः ।

ध्यानं तृतीयमन्त्रे तु दशार्णवदुदाहृतम् ।
विंशार्णोक्तं द्वितीये तु प्रथमेऽथ निगद्यते ॥

दरारिचापसद्बाणमुद्गराब्जकराम्बुजम् ।
वेणुमादाय हस्ताभ्यां वादयन्तं मुदाऽन्वितम् ॥
रविमण्डलगं कृष्णं ध्यायेदिष्टफलाप्तये ।

अथ पुरश्चरणम् ।

बाणलक्षं जपित्वाऽग्नौ दशांशं हविषा हुनेत् ।
तर्पणादि ततः कृत्वा सिद्धमन्त्रः समाचरेत् ॥

अथ मन्त्रान्तरं तत्रैव ।

अथातः संप्रवक्ष्यामि सप्तविंशतिके कलौ ।
तारो नमो भगवते वासुदेवाय वै वदेत् ॥
द्वादशार्णो मनुः प्रोक्तो नारदोऽस्य मुनिर्मतः ।
गायत्री छन्द इत्युक्तं श्रीकृष्णो देवता मतः ॥
चन्द्रनेत्राब्धिबाणार्णैः संपूर्णेनाङ्गकल्पना ।

ध्यानमाह ।

कल्पद्रुमतले रम्ये रत्नसिंहासने शुभे ।
सर्वलक्षणसंपूर्णं निविष्टं नन्दनन्दनम् ॥
प्रस्तुतस्तनभारेण गोवृन्देन युतं स्मरेत् ।
मेघश्यामं करे दण्डौ हस्ताभ्यां बिभ्रतं तथा ॥
पद्मायताक्षं शक्रस्य हस्तिकुम्भामृतस्य तु ।
धारया सिच्यमानं तु ध्यातव्यो विष्णुरव्ययः ॥

पुरश्चरणमाह ।

एवं संचिन्त्य देवेशं वर्णलक्षं जपेन्मनुम् ।
तत्सहस्राणि गोक्षीरैर्जुहुयात् तर्पयेत् ततः ॥

अथ मन्त्रान्तरं तन्त्रान्तरे ।

तारं हृद्भगवते रुक्मिणीवल्लभाय ठद्वयम् ।
नारदोऽस्य मुनिः प्रोक्तश्छन्दोऽनुष्टुप् प्रकीर्त्तितम् ॥

रुक्मिणीवल्लभो देवः पञ्चाङ्गं मान्त्रिकैः पदैः ।

ध्यानम् ।

तापिञ्छच्छविरङ्कगां प्रियतमां स्वर्णप्रभामम्बुज–
प्रोद्यद्वामभुजां स्वबाहुलतयाऽऽश्लिष्यत्सचित्तास्मयाम् ।
श्लिष्यन्तीं स्वयमन्यहस्तविलसत्सौवर्णवेत्रश्चिरं
पायाद्वोऽशनसूनपीतवसनो नानाविभूषो हरिः ॥

अथ पुरश्चरणम् ।

ध्यात्वैवं रुक्मिणीनाथं जपेल्लक्षममुं मनुम् ।
अयुतं जुहुयात् पद्मैररुणैर्मधुराप्लुतैः ॥

अथ मन्त्रान्तरं (मेरौ)

अथातो नगवेदाख्ये क्लीँ कृष्णायाग्निगेहिनी ।
षडक्षरो मन्त्रराजो जपध्यानादि पूर्ववत् ॥

दशार्णवदित्यर्थः । एवं भूयांसो मन्त्रभेदा विस्तरभयादुपेक्षिताः ।

अथ बुद्धमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि बौद्धमन्त्रं महाफलम् ।
सत्यत्वान्न द्विजादीनामधिकारो हि कर्हि चित् ॥
वाममार्गरता विप्राः कुण्डका जातिविच्युताः ।
हीना वैदिकसंस्कारैः प्रमादात् स्वेच्छतां गताः ॥
गोलकाश्च तथा जात्या कायस्थादय एव च ।
बौद्धं विष्णुं समाराध्य भुक्तिं मुक्तिं प्रयान्ति ते ॥
नमो भगवते बुद्ध संसारार्णवतारक ।
कलिकालादहं भीतः शरण्यं शरणं गतः ॥
आद्यैः पदैश्चतुर्भिश्च चरणद्वितयेन च ।
षडङ्गविधिराख्यातः पूर्णेन व्यापकं त्रिशः ॥

अथ ध्यानम् ।

पद्मे पद्मासनस्थं तमूर्वोर्न्यस्तकरद्वयम् ।

गौरं मुण्डितसर्वाङ्गं ध्यानस्तिमितलोचनम् ॥
पुस्तकासनहस्तैश्च नानाशिष्यैश्च शोभितम् ।
इन्द्रादिलोकपालैश्च नुतं श्वेताम्बरावृतम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं होमयेच्च घृतोदनम् ।
तुलसीमिश्रितोयैश्च भगवन्तं प्रतर्पयेत् ॥

अथ कल्किमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि कल्किमन्त्रं महाफलम् ।
ॐ कल्किने हृदन्तोऽयं प्रोक्तो मन्त्रः षडक्षरः ॥
मन्त्रार्णैश्च षडङ्गानि पूर्णेन व्यापकं चरेत् ।

अथ ध्यानम् ।

ध्यायेन्नीलसमारूढं श्वेतोष्णीषविराजितम् ।
महाप्रतोदहस्तं च कौस्तुभोद्दामकञ्चुकम् ॥
मर्दयन्तं म्लेच्छगणं क्रोधघूर्णितलोचनम् ।
अन्तर्हितैर्देवमुनिगन्धर्वैः संस्तुतं हरिम् ॥

अथ पुरश्चरणम् ।

षड्लक्षं तु जपेन्मन्त्रं ससितैः पायसैर्हुनेत् ।
तर्पयेत् सलिलैः शुद्धैः प्रीणयेद्भूसुरानपि ॥
एवमाराधितो मन्त्रः संग्रामे विजयप्रदः ।
एतत्साधनमालोक्य दूरतो दुःक्षितीश्वराः ॥
प्रणमन्ति तथा स्वेच्छाच्छत्रवो यान्ति संशयम् ।
दिने दिने वर्द्धते श्रीर्मृतो वैकुण्ठमाप्नुयात् ॥

अथ हयग्रीवमन्त्रो (मेरुतन्त्रे)

अथोच्यते हयग्रीवमन्त्रः सर्वसमृद्धिदः ।
हसावुकारसंयुक्तौ विन्दुना परिशोभितौ ॥

विप्रसेव्यो बीजमन्त्रो हयग्रीवस्य चादिमः ।
हसावौकारसंयुक्तौ सविन्दू क्षत्रियस्य तु ॥
हसावेकारसंयुक्तौ सविन्दुर्वैश्यजन्मनः ।
त्रिष्टुप् छन्दो मुनिर्ब्रह्मा हयग्रीवोऽस्य देवता ॥
षड्दीर्घयुक्तबीजेन षडङ्गविधिरीरितः ।

अथ ध्यानम् ।

कमलं जपमालां च भयं पुस्तकमेव च ।
श्वेतपद्मस्थितं गौरं श्वेतवस्त्रानुलेपनम् ॥
भक्तप्रियं हयग्रीवं वन्देऽहं दानवान्तकम् ।

अथ पुरश्चरणम् ।

वेदलक्षं जपेदन्ते दशांशं जुहुयाद्घृतैः ।
सुगन्धाद्यैस्तर्पणं स्यान्मार्जनाद्विप्रभोजनात् ॥
सिद्धो मन्त्रः प्रयोगार्हो जायते भुक्तिमुक्तिदः ।

अथ मन्त्रान्तरं (शारदायाम्)

उद्गिरत्पदमाभाष्य प्रणवोद्गीथशब्दतः ।
सर्ववागीश्वरेत्यन्तं प्रवदेदीश्वरेत्यथ ॥
सर्ववेदमयाचिन्त्यपदान्ते सर्वमुच्चरेत् ।
बोधय द्वितयान्तोऽयं मन्त्रस्तारादिरीरितः ।
ऋषिर्ब्रह्माऽस्य संदिष्टश्छन्दोऽनुष्टुबुदाहृतम् ॥
देवता स्याद्धयग्रीवो वागैश्वर्यप्रदो विभुः ।
तारेण पादैर्मन्त्रस्य पञ्चाङ्गानि प्रकल्पयेत् ॥

अथ ध्यानम् ।

शरच्छशाङ्कप्रभमश्ववक्त्रं
  मुक्तामयैराभरणैरुपेतम् ।
रथाङ्गशङ्खाचितबाहुयुग्मं
  जानुद्वयन्यस्तकरं भजामः ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं कुन्दपुष्पैर्मधुप्लुतैः ।
दशांशं वैष्णवे वह्नौ जुहुयान्मन्त्रसिद्धये ॥

अथ मन्त्रान्तरं (मेरुतन्त्रे)

अथ मन्त्रान्तरं वक्ष्ये तीक्ष्णबुद्धिकरं वरम् ।
विश्वोत्तीर्णस्वात्मरूपचिन्मयानन्दरूपिणे ॥
तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे ।
स्वाहा सोऽहं च हंसादिरष्टत्रिंशाक्षरो मनुः ॥
तारमन्त्रपदैश्चात्र पचाङ्गविधिरीरितः ।

ध्यानं पूर्ववत् ।

अथ पुरश्चरणम् ।

पुरश्चर्या तु षट्त्रिंशल्लक्षोऽन्यत् पूर्ववन्मतम् ।

अथ चक्रमन्त्रः (शारदायाम्)

तारो भृगुर्वियद्भूयस्तदाद्यं वह्निदीर्घयुक् ।
पावकः कवचास्त्रान्तो मनुः सप्ताक्षरः स्मृतः ॥
अहिर्बुध्न्यो मुनिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतम् ।
देवता मुनिभिः प्रोक्ता चक्ररूपी हरिः स्वयम् ॥
आचक्राय हृदाख्यातं विचक्राय शिरः स्मृतम् ।
सुचक्राय शिखा प्रोक्ता धीचक्राय तनुच्छदम् ॥
संचक्राय स्मृतं नेत्रं ज्वालाचक्राय तत्परम् ।
षडङ्गमन्त्राः प्रत्येकं द्विठान्ता यान्ति संयुताः ॥

अथ ध्यानम् ।

कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तं
रक्ताक्षं पिङ्गकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासम् ।
चक्रं शङ्खं गदाब्जे पृथुतरमुशलं चापपाशाङ्कुशान् वै
बिभ्राणं दोर्भिराद्यं मनसि मुररिपुं भावयेच्चक्रसंज्ञम् ॥

अथ पुरश्चरणम् ।

अर्कलक्षं जपेन्मन्त्रं जुहुयात् तत्सहस्रकम् ।
तिलैः ससर्षपैः पद्मैर्बिल्वैर्दुग्धोदनैः क्रमात् ॥

अथानन्तमन्त्रस्तत्रैव ।

अथान्यं संप्रवक्ष्यामि विष्णोः प्रीतिकरं मनुम् ।
अनन्ताय नमश्चेति षडर्णोऽयमुदाहृतः ॥
व्यासो मुनिश्च गायत्री छन्दोऽनन्तश्च देवता ।
नियोगो रोगनाशार्थमन्यद्गोविन्दवद्भवेत् ॥

अथ गोपालसुन्दरीमन्त्रस्तत्रैव ।

अथ मार्गद्वयोपास्यां वक्ष्ये गोपालसुन्दरीम् ।
मायाश्रीकामबीजानि कृष्णायेति ततो वदेत् ॥
एकोनत्रिंशकं वर्णं रुद्रदेवस्वरौ तथा ।
पञ्चमं च त्रपाबीजमेभिः सप्तमकूटम् ॥
गोविन्दाय पदं पश्चाच्चित्रैश्वर्याद्यकूटकम् ।
गोपीजनवल्लभाय ततश्च सकलत्रपाम् ॥
कूटरूपां समुच्चार्य वदेद्वह्नेश्च गेहिनी ।
त्रयोविंशाक्षरो मन्त्रो भुक्तिमुक्तिफलप्रदः ॥
मुनिर्विधाता दक्षे स्याद्वामे त्वानन्दभैरवः ।
छन्दस्तु देवी गायत्री देवो गोपालसुन्दरी ॥
त्रित्रिवेदाब्धिवेदाब्धिवर्णैः कूटविहीनितैः ।
षडङ्गविधिरुद्दिष्टो मन्त्रवर्णान् न्यसेत् तनौ ॥

न्यासान्तराण्युक्त्वा ध्यानमाह ।

कमलावसुधायुक्तं ध्यायेच्छ्रीचक्रगं हरिम् ।
क्षीराम्भोधौ सितद्वीपे वने कल्पद्रुमादिभिः ॥
व्याप्ते तस्मिन् स्वर्णमयं चिन्तयेद्रत्नमण्डपम् ।

तत्र श्रीपीठमध्ये तु स्थितं विधिमुखैः स्तुतम् ॥
पद्ममष्टदलं शङ्खं वर्णान् वंशीश्च दक्षिणैः ।
भुजैर्दधन्तं वामैस्तु चापं पाशं तथाऽङ्कुशम् ॥
विपञ्चीं चारक्तवर्णां नानाभरणभूषितम् ।
पीताम्बरधरं गोपीसमूहैः परितो वृतम् ॥

अथ पुरश्चरणम् ।

लक्षमेकं जपेन्मन्त्रं जुहुयात् पायसाऽन्धसा ।
तर्पणादि ततः कुर्यान्मन्त्रसिद्धिः प्रजायते ॥

अथ श्रीधरमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि श्रीधरस्य मनुं परम् ।
रमारुद्धं कामबीजं श्रीधराय ततो वदेत् ॥
त्रैलोक्यमोहनायेति नमोऽन्तः षोडशाक्षरः ।
ऋषिर्ब्रह्मा भवेच्छन्दो गायत्रं श्रीधरः सुरः ॥
श्रीबीजेन षडङ्गानि कुर्यात् षड्दीर्घसंयुजा ।

अथ ध्यानम् ।

उद्घाट्ये च सिते द्वीपे सर्वर्त्तुफलितद्रुमे ।
तत्र कल्पद्रुमाधस्तात् पक्षीन्द्ररचितासने ॥
शङ्खचक्रगदापद्मपाणिं चामीकरद्युतिम् ।
किरीटिनं कुण्डलिनं श्रीवत्साङ्कितवक्षसम् ॥
हृदि लक्ष्मीधरं ध्यायेच्छ्रीधरं पुरुषार्थदम् ।

अथ पुरश्चरणम् ।

लक्षमेकं जपेन्मत्रं तद्दशांशं घृतैर्हुनेत् ॥
तर्पणादि ततः कुर्यात् पूर्ववत् साधकोत्तमः ।

इति विष्णुप्रकरणम् ।

अथ शैवमन्त्राः ।

(शारदायाम्)

अथ वक्ष्ये महेशस्य मन्त्रान् सर्वार्थसिद्धिदान् ।
यैः पूर्वमृषयः प्रोक्ताः शिवसायुज्यमञ्जसा ॥
हृदयं वपरं साक्षि लान्तोऽनन्तान्वितो मरुत् ।
पञ्चाक्षरो मनुः प्रोक्तस्ताराद्योऽयं षडक्षरः ॥

एतन्मन्त्रार्थ उक्तो (वामदेवसंहितायाम्)

ॐकारः परिपूर्णस्य ब्रह्मणो वाचकः स्मृतः ।
नमःशब्दो नमस्कारवाचकः परिकीर्त्तितः ॥
प्रह्वत्वलक्षणः प्रोक्तो नमस्कारः पुरातनैः ।
प्रह्वता नाम जीवस्य शिवात् सत्यादिलक्षणात् ॥
भेदेन भासमानस्य मायया सर्वरूपतः ।
सम्बन्धं नम इत्याह शिवतादात्म्यलक्षणम् ॥
सत्यज्ञानपरानन्दस्वरूपा चित् कलाऽपरा ।
अतिव्यक्ततया ज्ञेया शिवशब्देन शाम्भवि ॥
वाचकोऽयं ततः शब्दो ब्रह्मणश्चित्कलात्मनः ।

ऋष्यादिन्यासमाह ।

वामदेवो मुनिश्छन्दः पङ्क्तिरीशोऽस्य देवता ।
षड्भिर्वर्णैः षडङ्गानि कुर्यान्मन्त्रस्य देशिकः ॥

अथ ध्यानम् ।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

अथ पुरश्चरणम् ।

तत्त्वलक्षं जपेन्मन्त्रं दीक्षितः शैववर्त्मना ।
तावत्सङ्ख्यासहस्राणि जुहुयात् पायसैः शुभैः ॥
ततः सिद्धो भवेन्मन्त्रः साधकाभीष्टसिद्धिदः ।

अथ मन्त्रान्तरं तत्रैव ।

षडक्षरः शक्तिरुद्धः कथितोऽष्टाक्षरो मनुः ।
ऋषिश्छन्दः पुरा प्रोक्तो देवता स्यादुमापतिः ॥
अङ्गानि पूर्वमुक्तानि सोममीशं विचिन्तयेत् ।

अथ ध्यानम् ।

बन्धूकाभं त्रिनेत्रं शशिशकलधरं स्मेरवक्त्रं वहन्तं
हस्तैः शूलं कपालं वरदमभयदं चारुहारं भजामि ।
वामोरुस्तम्भगायाः करतलविलसच्चारुरक्तोत्पलाया
हस्तेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः प्रियायाः ॥

अथ पुरश्चरणम् ।

मनुलक्षं जपेन्मन्त्रं तत्सहस्रं यथाविधि ।
जुहुयान्मधुरासिक्तैरारग्वधसमिद्वरैः ॥

मन्त्रान्तरमाह ।

सान्तः सद्यान्तसंयुक्तो विन्दुभूषितमस्तकः ।
प्रासादाख्यो मनुः प्रोक्तो भजतां सर्वसिद्धिदः ॥
षड्दीर्घयुक्तबीजेन षडङ्गविधिरीरितः ।
वामदेवो मुनिश्छन्दः पङ्क्तिर्देवः सदाशिवः ॥
ईशानादीन्न्यसेन्मूर्तीरङ्गुष्ठादिषु देशिकः ।
ईशानाख्यं तत्पुरुषमघोरं तदनन्तरम् ॥
वामदेवाह्वयं सद्यमाद्यं बीजं क्रमाद्विदुः ।

अथ ध्यानम् ।

ततः समाहितो भूत्वा ध्यायेद्देवं सदाशिवम् ।
मुक्तापीतपयोदमौक्तिकजपावर्णैर्मुखैः पञ्चभि-
स्त्र्यक्षैरञ्चितमीशमिन्दुमुकुटं पूर्णेन्दुकोटिप्रभम् ।
शूलं टङ्ककृपाणवज्रदहनान् नागेन्द्रघण्टाङ्कुशान्
पाशं भीतिहरं दधानममिताकल्पोज्ज्वलं चिन्तयेत् ॥

अथ पुरश्चरणम् ।

एवं ध्यात्वा जपेन्मन्त्रं पञ्चलक्षं मधुप्लुतैः ।
प्रसूनैः करवीरोत्थैर्जुहुयात् तद्दशांशकम् ॥

मन्त्रान्तरमाह ।

तारो माया वियद्बिन्दुमनुस्वरसमन्वितम् ।
पञ्चाक्षरसमायुक्तो वसुवर्णो मनुर्मतः ॥
पञ्चाक्षरोक्तवत् कुर्यादङ्गन्यासादिकं बुधः ।

ध्यानम् ।

वन्दे सिन्दूरवर्णं मणिमुकुटलसच्चारुचन्द्रावतंसं
भालोद्यन्नेत्रमीशं स्मितमुखकमलं दिव्यभूषाङ्गरागम् ।
वामोरुन्यस्तपाणेस्तरुणकुवलयं संदधत्या प्रियाया
वृत्तोत्तुङ्गस्तनाग्रे निहितकरतलं वेदटङ्केष्टहस्तम् ॥

अथ पुरश्चरणम् ।

अष्टलक्षं जपेदेवं मनुं वेदविदां वरः ।
तत्सहस्रं प्रजुहुयात् पायसान्नैर्घृतप्लुतैः ॥

अथ मृत्युञ्जयमन्त्रस्तत्रैव ।

तारं स्थिरा सकर्णेन्दुर्भृगुः सर्गविभूषितः ।
अक्षरात्मा निगदितो मनुर्मृत्युञ्जयात्मकः ॥
ऋषिः कहोलो देव्यादिर्गायत्री छन्द ईरितम् ।

मृत्युञ्जयो महादेवो देवताऽस्य समीरितः ॥
भृगुणा दीर्घयुक्तेन षडङ्गानि समाचरेत् ।

अथ ध्यानम् ।

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वमनोहरं पशुपतिं मृत्युञ्जयं भावयेत् ॥

अथ पुरश्चरणम् ।

गुणलक्षं जपेन्मन्त्रं तद्दशांशं विशालधीः ।
जुहुयादमृताखण्डैः शुद्धदुग्धाज्यलोलितैः ॥

अथ दक्षिणामूर्त्तिमन्त्रस्तत्रैव ।

अथ वक्ष्ये मन्त्ररत्नं समस्तपुरुषार्थदम् ।
अवापुर्येन जप्तेन दिव्यं ज्ञानं मुनीश्वराः ॥
दक्षिणामूर्त्तये पूर्वं तुभ्यं पदमनन्तरम् ।
वटमूलपदस्यान्ते पदं पश्चान्निवासिने ॥
ध्यानैकनिरताङ्गाय पश्चाद्ब्रूयान्नमःपदम् ।
रुद्राय शम्भवे तारशक्तिरुद्धोऽयमीरितः ॥
षट्त्रिंशदक्षरो मन्त्रः सर्वकामफलप्रदः ।
मुनिः शुकः समुद्दिष्टश्छन्दोऽनुष्टुप् समीरितम् ॥
दक्षिणामूर्त्तिनामाऽस्य देवता शम्भुरीरितः ।
षड्भिर्वर्णैर्हृदाख्यातं द्वाभ्यां शिर उदीरितम् ॥
शिखाऽष्टभिः समादिष्टा वस्वर्णैः कवचं मतम् ।
पञ्चभिर्नेत्रमाख्यातं त्रिभिरस्त्रमुदाहृतम् ॥

षडेते तारशक्त्याद्यास्ताराद्यन्ताः सजातयः ।
अङ्गमन्त्राः समुद्दिष्टा यथावद्देशिकोत्तमैः ॥

अथ ध्यानम् ।

हेमाचलतटे रम्ये सिद्धकिन्नरसेविते ।
विविधद्रुमशाखाभिः सर्वतो वारितातपे ॥
सुपुष्पितैर्लताजालैराश्लिष्टकुसुमद्रुमे ।
शिलाविवरनिर्गच्छन्निर्झरानिलशीतले ॥
गायद्भृङ्गाङ्गनासङ्घे नृत्यद्बर्हिकदम्बके ।
कूजत्कोकिलसङ्घेन मुखरीकृतदिङ्मुखे ॥
परस्परविनिर्मुक्तमात्सर्यमृगसेविते ।
आद्यैः शुकाद्यैर्मुनिभिरजस्रं समुपस्थिते ॥
पुरन्दरमुखैर्देवैः सेवायातैर्विलोकितम् ।
वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम् ॥
गारुत्मतमयैः पत्रैर्निविडैरुपशोभितम् ।
नवरत्नमयाकल्पैर्लम्बमानैरलङ्कृतम् ॥
जलजैः स्थलजैः पुष्पैरामोदिभिरलङ्कृतम् ।
शृण्वद्भिर्वेदशास्त्राणि शुकवृन्दैर्निषेवितम् ॥
संसारतापविच्छेदकुशलस्थलमद्भुतम् ।
विचिन्त्य तस्य मूलस्थे रत्नसिंहासने शुभे ॥
आसीनममिताकल्पं शरच्चन्द्रनिभाननम् ।
स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः ॥
संस्मरेज्जगतामाद्यं दक्षिणामूर्त्तिमव्ययम् ।
कैलाशाद्रिनिभं शशाङ्कशकलस्फूर्जज्जटामण्डितं

नासालोकनतत्परं त्रिनयनं वीरासनाध्यासिनम् ।
मुद्राटङ्ककुरङ्गजानुविलसत्पाणिप्रसन्नाननं
कक्षाबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम् ॥

अथ पुरश्चरणम् ।

अयुतद्वयसंयुक्तं गुणलक्षं जपेन्मनुम् ।
तद्दशांशं तिलैः शुद्धैर्जुहुयात् क्षीरसंयुतैः ॥

अथ मन्त्रान्तरं तत्रैव ।

प्रणवो हृदयं पश्चात् ततो भगवते पदम् ।
ङेयुतं दक्षिणामूर्त्तिं मह्यं मेधामुदीरयेत् ॥
प्रयच्छ ठद्वयान्तोऽयं द्वाविंशत्यक्षरो मनुः ।
मुनिश्चतुर्मुखश्छन्दो गायत्री देवता मनोः ॥
दक्षिणामूर्त्तिराख्यातो वेदव्याख्यानतत्परः ।
ताररुद्धैः स्वरैर्दीर्घैः षड्भिरङ्गानि कल्पयेत् ॥
अथ वा मनुसम्भूतैः पदैर्वा कल्पयेत् क्रमात् ।
पूर्वोक्तवटमूलस्थं चिन्तयेन्मन्त्रनायकम् ॥

अथ ध्यानम् ।

स्फटिकरजतवर्णं मौक्तिकीमक्षमाला-
ममृतकलशविद्याज्ञानमुद्राकराग्रैः ।
दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्त्तिमीडे ॥

अथ पुरश्चरणम् ।

लक्षमेकं जपेन्मन्त्रं ब्रह्मचारिव्रते स्थितः ।
जुहुयात् सघृतैः पद्मैर्दशांशं संस्कृतेऽनले ॥

अथ नीलकण्ठमन्त्रस्तत्रैव ।

लोहितोऽग्न्यासनः सद्यविन्दुमान् प्रथमं ततः ।
द्वितीयं वह्निबीजस्था दीर्घा शान्तीन्दुभूषिता ॥
तृतीयं लाङ्गली सर्गी मन्त्रो बीजत्रयान्वितः ।
नीलकठात्मकः प्रोक्तो विषद्वयहरः परः ॥
हरद्वयं वह्निजाया हृदयं परिकीर्त्तितम् ।
कपर्दिने ठयुगलं शिरोमन्त्र उदाहृतः ॥
नीलकण्ठाय ठद्वयं शिखामन्त्र उदाहृतः ।
कालकूटपदस्यान्ते विषभक्षणं ङेयुतम् ॥
हुँ फट् कवचमादिष्टं विद्वद्भिर्नीलकण्ठने ।
स्वाहान्तमस्त्रमेतानि पञ्चाङ्गानि मनोर्विदुः ॥

अथ ध्यानम् ।

बालार्कायुततेजसं धृतजटाजूटेन्दुखण्डोज्ज्वलं
नागेन्द्रैः कृतभूषणं जपवटीं शूलं कपालं करैः ।
खट्वाङ्गं दधतं त्रिनेत्रविलसत्पञ्चाननं सुन्दरं
व्याघ्रत्वक्परिधानमब्जनिलयं श्रीनीलकण्ठं भजे ॥

अथ पुरश्चरणम् ।

लक्षत्रयं जपेन्मन्त्रं तद्दशांशं ससर्पिषा ।
हविषा जुहुयात् सम्यक् संस्कृते हव्यवाहने ॥

अथार्धनारीश्वरमन्त्रस्तत्रैव ।

आग्निः संवर्त्तकादित्यरानिलाः षष्ठविन्दुमत् ।
चिन्तामणिरिति ख्यातं बीजं सर्वसमृद्धिदम् ॥
कश्यपो मुनिराख्यातश्छन्दोऽनुष्टुबुदाहृतम् ।
अर्धनारीश्वरः प्रोक्तो देवता जगतां पतिः ॥
रेफादिर्व्यञ्जनः षड्भिः कुर्यादङ्गानि षट् क्रमात् ।

अथ ध्यानम् ।

नीलप्रभातरुचिरं विलसत्त्रिनेत्रं
पाशारुणोत्पलकपालत्रिशूलहस्तम् ।
अर्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपम् ॥

अथ पुरश्चरणम् ।

एकलक्षं जपेद्बीजमित्थं मन्त्री विचिन्तयेत् ।
अयुतं मधुना सिक्तैर्जुहुयात् तिलतण्डुलैः ॥

अथ शरभमन्त्रो (मेरुतन्त्रे)

ॐ खँ खाँ खँ फडुच्चार्य द्विः प्राणान् ग्रसतीति च ।
हुँ फट् सर्वशस्त्रसंहरणाय शरभेति च ॥
शाल्वाय पक्षिराजाय हुँ फट् स्वाहान्तको मनुः ।
एकचत्वारिंशदर्णो वासुदेवो मुनिः स्मृतः ॥
कालाग्निरुद्रः शरभो देवता परिकीर्त्तितः ।
छन्दस्तु जगती स्वाहा शक्तिर्बीजं खमुच्यते ॥
वेदषट्सप्तनवषण्णवार्णैरङ्गकल्पनम् ।

अथ ध्यानम् ।

चन्द्रार्काग्नित्रिनयनं कालीदुर्गाद्विपक्षकम् ।
विद्युज्जिह्वं वज्रनखं वडवाग्न्युदरं तथा ॥
व्याधिमृत्युरिपुघ्नं च चण्डवातातिवेगिनम् ।
हृद्भैरवस्वरूपं च वैरिवृन्दनिषूदनम् ॥
मृगस्त्वर्धशरीरेण पक्षाभ्यां चञ्चुना द्विजः ।
अधोवक्त्रश्चतुष्पादस्तूर्ध्ववक्त्रश्चतुर्भुजः ॥
कालान्तदहनप्रख्यो नीलजीमूतनिःश्वनः ।

अरिर्यद्दर्शनादेव विनष्टबलविक्रमः ॥
सटाच्छटोग्ररूपाय पक्षविक्षिप्तभूभृते ।
अष्टपादाय रुद्राय नमः शरभमूर्त्तये ॥

पुरश्चरणमाह ।

एवं ध्यायन्न सहस्रं तु प्रजपेत् पायसं हुनेत् ।
प्रत्यहं मासषट्केण मन्त्रसिद्धिः प्रजायते ॥

अथ क्षेत्रपालमन्त्रः (शारदायाम्)

वर्णान्त्यमौविन्दुयुक्तं क्षेत्रपालाय हन्मनुः ।
ताराद्यो वसुवर्णोऽयं क्षेत्रपालस्य कीर्त्तितः ॥
षड्दीर्घभाजा बीजेन षडङ्गान्यस्य योजयेत् ।

अथ ध्यानम् ।

नीलाञ्जनाद्रिनिभमूर्ध्वपिशङ्गकेशं
वृत्तोग्रलोचनमुपात्तगदाकपालम् ।
आशाम्बरं भुजगभूषणमुग्रदंष्ट्रं
क्षेत्रेशमद्भुततनुं प्रणमामि देवम् ॥

अथ पुरश्चरणम् ।

लक्षमेकं जपेन्मन्त्रं जुहुयात् तद्दशांशतः ।
चरुणा घृतसिक्तेन ततः क्षेत्रेशमर्चयेत् ॥

अथापदुद्धारवटुकमन्त्रस्तत्रैव ।

उद्धरेद्वटुकं ङेऽन्तमापदुद्धारणं तथा ।
कुरुद्वयं पुनर्ङेऽन्तं वटुकं तं समुद्धरेत् ॥
एकविंशत्यक्षरात्मा शक्तिरुद्धो महामनुः ।
अभीष्टफलसंसिद्ध्यै कीर्त्तितः सुरपादपः ॥
बृहदारण्यक ऋषिश्छन्दोऽनुष्टुबुदाहृतम् ।
आपदुद्धारणो देवो भैरवो देवता बुधैः ॥

अङ्गुलीदेहवक्त्रेषु मूर्त्तीर्न्यस्येद्यथा पुरा ।
सद्यादिपञ्चह्रस्वाढ्यं शक्तिबीजपुरःसरम् ॥
वकारं पञ्चह्रस्वाढ्यमीशानादिषु योजयेत् ।
षड्दीर्घयुक्तया शक्त्या वकारेण च तद्वता ॥
अङ्गानि जातियुक्तानि प्रणवाद्यादि कल्पयेत् ।

अथ ध्यानम् ।

तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिविभेदतः ।
वन्दे बालं स्फटिकसदृशं कुण्डलोल्लासि वक्त्रं
दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराढ्यैः ।
दीप्ताकारं विसदवसनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम् ॥
उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ।
नीलग्रीवमुदारभूषणधरं शीतांशुचूडोज्ज्वलं
बन्धूकारुणवाससं भयहरं देवं सदा भावयेत् ॥
ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमालं महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृणिं खड्गपाशाभयानि ।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपुराढ्यम् ॥
सात्त्विकं ध्यानमाख्यातमपमृत्युनिवारणम् ।
आयुरारोग्यजननमपवर्गफलप्रदम् ॥
राजसं ध्यानमाख्यातं धर्मकामार्थसिद्धिदम् ।
तामसं शत्रुशमनं कृत्याभूतग्रहापहम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः ।
तद्दशांशं प्रजुहुयात् तिलैर्मधुरसंयुतैः ॥

अथ पाशुपतास्त्रमन्त्रः (शारदायाम्)

तारो वान्तो धरासंस्थो वामनेत्रेन्दुभूषितः ।
पार्श्वो वकः कर्णयुतो वर्मास्त्रान्तः षडक्षरः ॥
मनुः पाशुपतास्त्राख्यो ग्रहक्षुद्रनिवारणः ।
षड्भिर्वर्णैः षडङ्गानि हुँ फडन्तैः सजातिभिः ॥

अथ ध्यानम् ।

मध्याह्नार्कसमप्रभं शशिधरं भीमाट्टहासोज्ज्वलं
त्र्यक्षं पन्नगभूषणं शिखिशिखाश्मश्रुस्फुरन्मूर्धजम् ।
हस्ताब्जैस्त्रिशिखं समुद्गरमसिं शक्तिं दधानं विभुं
दंष्ट्राभीमचतुर्मुखं पशुपतिं दिव्यास्त्ररूपं स्मरेत् ॥

पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं जुहुयात् तद्दशांशतः ।
गव्येन सर्पिषा मन्त्री संस्कृते हव्यवाहने ॥

अथ हरिहरमन्त्रस्तन्त्रान्तरे ।

मायां पूर्वं समुद्धृत्य प्रासादं तत उद्धरेत् ।
ततः शङ्करनारायणाय हृत्प्रणवादिकः ॥
त्रयोदशाक्षरो मन्त्रश्चतुर्वर्गफलप्रदः ॥
नारदोऽस्य ऋषिः प्रोक्तश्छन्दोऽनुष्टुप् प्रकीर्त्तितम् ।
त्रैलोक्यवन्द्यपादाब्जो देवता हरिशङ्करः ॥
षडङ्गानि प्रकुर्वीत दीर्घषट्काढ्यमायया ।

अथ ध्यानम् ।

शूलं चक्रं पाञ्चजन्यमभीतिं दधतं करैः ।
स्वस्वभूषाङ्कनीलार्धदेहं हरिहरं भजे ॥

अथ पुरश्चरणम् ।

लक्षमेकं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः ।
पायसैर्हवनं कुर्यात् संस्कृते हव्यवाहने ॥

इति शिवप्रकरणम् ।

अथ गौरीमन्त्रः (सिद्धान्तसंग्रहे)

ह्रीँ गौरि रुद्रदयिते योगेश्वरि पदं वदेत् ।
हुँ फट् स्वाहा षोडशार्णो गौरीमन्त्रः प्रकीर्त्तितः ॥
अजो मुनिस्तथाऽनुष्टुप् छन्दो गौर्यस्य देवता ।
मायया तु षडङ्गानि कुर्यात् षड्दीर्घयुक्तया ॥

ध्यानम् ।

हेमाभां बिभ्रतीं दोर्भिर्दर्पणाञ्जनसाधने ।
पाशाङ्कुशौ दिव्यभूषां गौरीं देवीमुपास्महे ॥

अथ पुरश्चरणम् ।

लक्षमेकं जपेन्मन्त्रं दशांशं जुहुयाद्घृतैः ।
तर्पणाद्यं ततः कृत्वा काम्यकर्माणि साधयेत् ॥
अथ मन्त्रान्तरं वक्ष्ये मायाबीजं समुद्धरेत् ।
ङेऽन्तां भवानीमुच्चार्य नमः शेषे प्रकीर्त्तयेत् ॥
न्यासजालं पुरा प्रोक्तं देवीं ध्यायेत् समाहितः ।

ध्यानं यथा ।

बालार्काभां त्रिनयनां खड्गखेटवराभयान् ।
दोर्भिर्दधानां सिंहस्थां भवानीं भावयेत् सदा ॥

अस्य पुरश्चरणं पूर्ववदेकलक्षजपः ।

इति भवानीप्रकरणम् ।

अथ गरुडमन्त्रो (मेरुतन्त्रे)

वक्ष्येऽथ गारुडं मन्त्रं क्षिपतारोऽग्निगेहिनी ।
पञ्चाक्षरो मनुः पङ्क्तिश्छन्दोऽनन्तो मतो मुनिः ॥

देवता गरुडस्तारो बीजं शक्तिर्दहाङ्गना ।
स्वाहान्तो हृदये न्यस्यो ज्वलज्वल महामते ॥
रुद्रचूडानन स्वाहाऽङ्गस्यान्ते मस्तके न्यसेत् ।
गरुडान्ते शिखे स्वाहा शिखाया मनुरीरितः ॥
वर्ममन्त्रस्तु गरुड प्रभञ्जययुगं वदेत् ।
द्विः प्रभेदय वित्रासय दुष्टपङ्क्तिं विमर्दय ॥
स्वाहा सप्तत्रिंशदर्णो नेत्रमन्त्रोऽथ कथ्यते ।
उग्ररूपधरेत्युक्त्वा सर्वंविषहरेति च ॥
भीषय द्वितयं सर्वं दहयुग्मं ततो वदेत् ।
भस्मीकुरु कुरु स्वाहा दन्तवर्णो मतो मनुः ॥
अस्त्रमन्त्रोऽप्रतिहतबलाप्रतिहतेति च ।
शासनान्ते वदेद्धुँ फट् स्वाहान्तोऽष्टादशाक्षरः ॥

अथ ध्यानम् ।

चञ्च्वग्रप्रचलद्भोगी भोगं मुकुटमण्डितम् ।
पक्षोच्चारितसत्सामगानं विषहरं भजे ॥

अस्य पुरश्चरणं पञ्चलक्षजपः ।

पञ्चलक्षं जपेन्मनुम् … … … इति तत्रैवोक्तत्वात् ।

तथा ।

तिलैर्हुनेत् तर्पणादि कृत्वा सिद्धो मनुर्भवेत् ।
दर्शनादुरगास्तस्य नष्टा नश्येद्विषद्वयम् ॥
विष्णुभक्तिपरो भूयात् स्वयमेवारिनाशनः ।
इह लोके सुखी दीर्घजीवी भूपतिपूजितः ॥
परत्र याति वैकुण्ठम् … … … इत्यादि ।

अथ कार्त्तवीर्यमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि विंशन्मन्त्राँस्तु दक्षिणे ।

आम्नाये यत्साधकानामक्लेशादिष्टसिद्धयः ॥
द्वाविंशत्तुर्यौ ताराद्यौ दक्षे वामे सतुर्यकौ ।
चतुर्दशस्वरोपेतौ शेषाम्नायेषु तद्भवेत् ॥
विन्दुयुक्तं त्वाद्यबीजं चतुर्थस्वरसंयुतम् ।
षट्त्रिंशत्तुर्यौ विन्द्वाढ्यौ द्वितीयं बीजमुच्यते ॥
कामबीजं तृतीयं स्याद्द्वादशार्णं चतुर्थकौ ॥
षष्ठस्वरेन्दुसंयुक्तौ चतुर्थं बीजमुच्यते ।
पाशो लज्जाऽङ्कुशो लक्ष्मीकवचास्त्रमिदं भवेत् ॥
बीजानां दशकं ङेऽन्तः कार्त्तवीर्यार्जुनो नमः ।
एकोनविंशत्यर्णोऽयं दत्तात्रेयो मुनिः स्मृतः ॥
छन्दोऽनुष्टुप् कार्त्तवीर्यार्जुनो देवः प्रकीर्त्तितः ।
फ्रौँ ब्रामिति स्याद्धृदयं क्लौँ श्रीमिति शिरः स्मृतम् ॥
ऊँ हूँ शिखा समाख्याता क्रैँ श्रैँ कवचमीरितम् ।
हुँ फडस्त्रं समाख्यातं शेषेण व्यापकं चरेत् ॥

न्यासान्तराण्युक्त्वा ध्यानमाह ।

प्रभाकररुचिःस्वर्णकण्ठमालाविराजितः ।
ध्येयो रक्तांशुकोष्णीषी नानाकल्पविभूषितः ॥
सहस्रार्धभुजैर्बाणान् सहस्रार्धैर्धनूंषि च ।
दधट्टङ्कारशब्दैश्च त्रासिताखिलदुर्जनः ॥
सम्यग्बाणासनारूढः सप्तद्वीपधरापतिः ।
भूपालमुकुटाघृष्टपादपद्मोज्ज्वलोचनः ॥
स्थूलकायोऽतिभीमश्च रथस्थो भक्तवत्सलः ।

अथ पुरश्चरणम् ।

चतुर्लक्षं जपेन्मन्त्रं होमः कार्यः पयोन्धसा ।
तिलाज्यतण्डुलैर्वाऽपि पुरश्चर्या सरित्तटे ॥
तर्पणादि ततः कुर्यान्मन्त्रसिद्धिः प्रजायते ।

अथ मन्त्रभेदाः ।

अथातः संप्रवक्ष्यामि कार्त्तवीर्यमनोर्भिदः ।
एकानविंशत्यर्णोऽयं तारादिर्नखवर्णकः ॥
*छन्दर्षिन्यासपूजादि सर्वं पूर्ववदीरितम् ।
द्वितीयोऽयं भेद उक्तो भजतामिष्टदायकः ॥
कार्त्तवीर्यार्जुनायेति नमो मूलं नवाक्षरम् ।
फ्रोँ पूर्वको दशार्णोऽयं विराट् छन्द उदीरितम् ॥
सर्वार्थसिद्धये चास्य नियोगोऽन्यत् तु पूर्ववत् ।
न्यासपूजादिकं सर्वं भेदोऽयं तु तृतीयकः ॥
फ्रोँ श्रीँ पूर्वो नवार्णस्तु भवेदेकादशाक्षरः ।
प्राग्वन्मुन्यादिकं सर्वं छन्दस्त्रैष्टुभमुच्यते ॥
नियोगस्तम्भनायास्य चौराणां वसुहारिणाम् ।
प्राग्वत् पूजाप्रयोगादि तुर्यो भेदो निरूपितः ॥
फ्रोँ क्लीँ पूर्वो नवार्णस्तु भवेदेकादशाक्षरः ।
नरनारीनृपाणां च मोहनाय नियोजनम् ॥
मुनिश्छन्दोमुखं प्राग्वत् प्रयोगाँश्चापि साधयेत् ।
एवं तु पञ्चमो भेदो मन्त्रस्य परिकीर्त्तितः ॥
फ्रोँ भ्रूँ पूर्वो नवार्णस्तु षष्ठो भेदश्च पूर्ववत् ।
मुन्यादि भ्रमणोच्चाटद्वेषमारणकर्मकृत् ॥

---

* तान्त्रिकप्रयोगोऽयम् ।

क्रौँ ह्रीमन्ते नवार्णास्तु भेदः सप्तमको भवेत् ।
वश्यं पापक्षयं मोहं शुभं च तनुते सदा ॥
क्रौँ मौँ नवाक्षरश्चेति ह्यष्टमोऽर्चादि पूर्ववत् ।
आकर्षणाय चौराणां नियोगः परिकीर्त्तितः ॥
क्रौँ क्रौँ नवार्णो नवमो भेदः पूजादि पूर्ववत् ।
वाक्स्तम्भे वा गतिस्तम्भे नियोगः परिकीर्त्तितः ॥
क्रौँ श्रौँ नवाक्षरश्चेति दशमो भेद उच्यते ।
त्रिष्टुप् छन्दोऽन्यदखिलमूनविंशतिवद्भवेत् ॥
क्रौँ वाग्बीजं नवार्णाश्च भेद एकादशः स्मृतः ।
हुँ फड्नवार्णा इति च द्वादशार्चादि पूर्ववत् ॥
तृतीयभेदस्ताराद्यो मन्त्र एकादशाक्षरः ।
त्रयोदशस्तु भेदोऽयं सर्वं पूर्ववदीरितम् ॥
एवं भेदाश्चतुर्थाद्याः सप्त प्रणवपूर्वकाः ।
द्वादशाद्याः सप्त मन्त्रा जगतीच्छन्दसो मताः ॥
प्राग्वन्मुन्यादिकं सर्वं प्रयोगः पूर्ववन्मतः ।
दक्षिणाम्नायगाश्चैते विंशन्मन्त्राः प्रकीर्त्तिताः ॥

अथोर्ध्वाम्नाये ।

ॐ नमः कार्त्तवीर्यार्जुनाय वर्मास्त्रठद्वयम् ।
चतुर्दशार्णमन्त्रोऽयमष्टमः परिकीर्त्तितः ॥
भूनेत्रसप्तनेत्राक्षिवर्णैरस्याङ्गपञ्चकम् ।
एकोनविंशदर्णस्य मुन्याद्यमखिलं मतम् ॥

अथ मालामन्त्रः ।

तारो नमो भगवते ततः श्रीपदमुच्चरेत् ।
कार्त्तवीर्यार्जुनायेति हैहयेति पदं ततः ॥

नाथाय श्रीकार्त्तवीर्यार्जुनेति च सहस्रशः ।
करसदृशसर्वेति दुष्टान्तकपदात् पठेत् ॥
सर्वशिष्टेष्टदपदं सर्वत उदधेः पदम् ।
आगन्तुकामान् प्रवदेदस्मद्वसुविलुम्पकान् ॥
चौरसमूहान् स्वकरसहस्रैश्च निवारय ।
रुन्धस्व पाशसहस्रैर्बन्धयेति ततोऽङ्कुशः ॥
सहस्रैराकर्षय स्वचापोद्भूतपदात् ततः ।
वदेद्बाणसहस्रैश्च भिन्दि भिन्दीति संवदेत् ॥
स्वहस्तोद्धतखड्गेति सहस्रैश्छिन्धियुग्मकम् ।
स्वहस्तोद्भूतमुशलसहस्रैर्मर्दयद्वयम् ॥
स्वशङ्खोद्भूतनादेति सहस्रैर्भीषयद्वयम् ।
स्वहस्तोद्भूतचक्रेति सहस्रैर्द्विर्निकृन्तय ॥
परकृत्यां त्रासय द्विस्ततश्चाकर्षयद्वयम् ।
भ्रामय द्विर्मोहय द्विरुद्वासययुगं वदेत् ॥
उन्मादयद्वयं द्वेधा तापय द्विर्विनाशय ।
द्वेधा विदारय स्तम्भयद्वयं *जृम्भय द्वयम् ॥
मारयद्वितयं प्रोच्य वशं कुरु वशं कुरु ।
उच्चाटयोच्चाटयेति विनाशय विनाशय ॥
दत्तात्रेयश्रीपदान्ते पादप्रियतमेति च ।
श्रीकार्त्तवीर्यार्जुनेति सर्वगश्चोदधेर्वदेत् ॥
आगन्तुकामान् प्रवदेदस्मद्वसुविलुम्पकान् ।
चौरसमूहान् सम्यक् च वदेदुन्मूलयद्वयम् ॥

---

* भञ्जयद्वयमिति २ पु० पा० ।

हुँ फट् स्वाहेति मन्त्रोऽयं बाणाब्ध्यनलवर्णवान् ।
प्रोक्तः पञ्चदशश्छन्दो गायत्र्यन्यच्च पूर्ववत् ॥
दत्तात्रेयप्रियतमं ङेऽन्तं हृदि तु विन्यसेत् ।
माहिष्मतीति नाथाय शिरोमन्त्रो नगाक्षरः ॥
रेवती च जलक्रीडासक्तायेति शिखा मता ।
हैहयाधिपतिर्ङेऽन्तः कवचः परिकीर्त्तितः ॥
सहस्रबाहवेऽस्त्रं स्यादेवं पञ्चाङ्गमीरितम् ।

अथ ध्यानम् ।

उदग्रबाणाँश्चापानि दधतं सूर्यसन्निभम् ।
प्रपूरयन्तं ब्रह्माण्डं धनुर्ज्यानिःस्वनैस्तथा ॥
कार्त्तवीर्यं नृपं ध्यायेद्गण्डशोभितकुण्डलम् ।
एवं ध्यात्वा समभ्यर्च्य सर्वकर्माणि साधयेत् ॥

अथ पुरश्चरणम् ।

त्रिसहस्रं जपः प्रोक्तः शेषं पूर्ववदाचरेत् ।

अथ प्रयोगः ।

दक्षोत्तरैः प्रतिशतैरेतान्यस्त्राणि संदधत् ।
चक्रेषुखड्गमुशलकुठारान् पाशमेव च ॥
प्रासचर्मधनुःशङ्खान् मध्यभास्करसन्निभम् ।
बलाढ्यमरुणं घोरं तालमातङ्गसंस्थितम् ॥
रक्ताम्बरं रक्तनेत्रं ध्यात्वैवं प्रजपेन्मनुम् ।
निशीथेऽष्टोत्तरशतं नष्टद्रव्याप्तिसिद्धये ॥
जपेन्निश्येकपादेन षण्मासानष्टयुक् छतम् ।
संप्रार्थ्य मन्त्रिणं चौराः प्रयच्छन्त्याखिलं धनम् ॥

चौरैर्हृतपशून् मन्त्री यदा नेतुं समिच्छति ।
जपेदष्टोत्तरशतं ध्यायेद्देवं नृपाशितान् ॥
कण्ठे सम्यक् सर्वपशून् गृहाभिमुखमागतान् ।
ध्यात्वैवं द्वादशाहेन ते चायान्ति विमोचिताः ॥
चौरैर्हृतं च व्रीह्यादि तच्छेषं होमयेन्निशि ।
हृतं प्रकाश्यते भीतैश्चौरैर्झटिति नान्यथा ॥
बाणान् प्रवेशयेद्रातौ धनुषा ध्यानतत्परः ।
दशदिक्षु जपेन्मन्त्रं राष्ट्रादे रक्षणं भवेत् ॥
मन्त्रेण परिजप्तानि पार्थिवानि रजांसि च ।
क्षिप्तानि मन्त्रिणा यत्र तत्र रक्षा भवेन्निशि ॥

मन्त्रान्तरमाह ।

फ्रोमित्येकाक्षरो मन्त्रः कार्त्तवीर्यस्य षोडशः ।
मुनिपूजादिकं प्राग्वल्लक्षमेकं पुरस्क्रिया ॥
षड्दीर्घयुक्तेनानेन षडङ्गविधिरीरितः ।
प्राग्वत् प्रयोगा इत्येवमूर्ध्वाम्नायः प्रकीर्त्तितः ॥
पश्चिमाम्नायमन्त्रास्तु प्रोक्ताश्चारब्बभाषया ।
अष्टौ शतान्यशीतिश्च येषां संसाधनात् कलौ ॥
पञ्च खानाः सप्त मीराः नव शाहा महाबलाः ।
हिन्दुधर्मप्रलोप्तारो जायन्ते चक्रवर्त्तिनः ॥
पूर्वाम्नाये नवशतं षडशीतिः प्रकीर्त्तिताः ।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनाद्भुवि ॥
अधिपा मन्दराणां च संग्रामेष्वपराजिताः ।
इङ्क्रूजा नवषट्पञ्च लन्द्रजाश्चापि भाविताः ॥

विद्या बौद्धनिदर्शिन्यां पञ्च प्रोक्तास्तु या मया ।
तद्बीजपूर्वाः सर्वेऽपि मनवो वामसिद्धिदाः ॥
दक्षिणाचारफलदः कार्त्तवीर्यार्जुनो नृपः ।
वामचारेण शूद्राणामिह लोके फलप्रदः ॥
न वामिनां हितार्थं तु कार्त्तवीर्यं प्रयोजयेत् ।
सप्तजन्मसु दारिद्र्यं पैशाच्यं प्राप्नुयाद्द्विजः ॥

इति कार्त्तवीर्यप्रकरणम् ।

अथ हनुमन्मन्त्रस्तत्रैव ।

अथान्यं संप्रवक्ष्यामि मन्त्रमष्टादशाक्षरम् ।
नमो भगवते प्रोच्य आञ्जनेयाय संवदेत् ॥
महावलाय स्वाहेति मुनिरस्येश्वरः स्मृतः ।
छन्दोऽनुष्टुब्देवता तु हनुमान् हँ च बीजकम् ॥
स्वाहा शक्तिश्चाञ्जनेयो रुद्रमूर्त्तिर्मरुत्सुतः ।
अग्निगर्भो रामदूतो ब्रह्मास्त्रविनिवारकः ॥
एतैर्ङेऽन्तैः षडङ्गानि तथाऽङ्गुष्ठादिषु न्यसेत् ।

अथ ध्यानम् ।

तप्तकाञ्चनसंकाशं हृदये निहिताञ्जलिम् ।
किरीटिनं कुण्डलिनं ध्यायेद्वानरनायकम् ॥

अथ पुरश्चरणम् ।

अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयात् तिलैः ।
विप्रसन्तर्पणाद्यं तु प्राग्वत् सिद्धो भवेन्मनुः ॥

अथ काम्यानि ।

जितेन्द्रियो नक्तभोजी प्रत्येकं साष्टकं शतम् ।
जपित्वा क्षुद्ररोगेभ्यो मुच्यते दिवसत्रयात् ॥
भूतप्रेतपिशाचादिनाशायैवं समाचरेत् ।

महारोगनिवृत्त्यै तु सहस्रं त्रिदिनं जपेत् ।
यताशनोऽयुतं नित्यं जपेद्ध्यायन् कपीश्वरम् ॥
राक्षसौघं विनिघ्नन्तमचिराज्जयति द्विषः ।
सुग्रीवेण समं रामं संदधानं स्मरन् कपिम् ॥
प्रजप्यायुतमात्रं तु सन्धिं कुर्याद्विरुद्धयोः ।
लङ्कादहन्तं तं ध्यायन्नयुतं प्रजपेन्मनुम् ॥
शत्रूणां प्रदहेद्ग्रामानचिरादेव साधकः ।
प्रयाणसमये ध्यायन् हनुमन्तं मनुं जपेत् ॥
यो याति सोऽचिरात् स्वेष्टं साधयित्वा गृहं व्रजेत् ।
यः कपीशं सदा गेहे पूजयेज्जपतत्परः ॥
आयुर्लक्ष्म्यौ प्रवर्त्तेते तस्य नश्यन्त्युपद्रवाः ।
शार्दूलतस्करादिभ्यो रक्षेन्मनुरयं स्मृतः ॥
प्रस्थानकाले चौरेभ्यो दुष्टसर्पादपि ध्रुवम् ।
पुच्छाकारे सुवसने लेखन्या कोकिलोत्थया ॥
अष्टगन्धैर्लिखेद्रूपं कपिराजस्य सुन्दरम् ।
तन्मध्येऽष्टादशार्णं तु शत्रूणामयुतं लिखेत् ॥
तेन मन्त्राभिजप्तेन शिरोबन्धेन भूमिपः ।
जयत्यरिगणं सर्वं दर्शनादेव निश्चितम् ॥
यदा जिगीषुर्नृपतिः पूर्वोक्तं लेखयेद्ध्वजे ।
ध्वजमादायोपरागे संस्पर्शान्मोक्षणावधि ॥
मान्त्रिकाज्जपयेत् पश्चाद्दशांशेन हुतं चरेत् ।
सर्षपैस्तिलसंमिश्रैः संस्कृते हव्यवाहने ॥
गजस्थं तं ध्वजं दृष्ट्वा पलायन्तेऽरयोऽचिरात् ।

अथ मन्त्रान्तरं तत्रैवोक्तम् ।

अथान्यं संप्रवक्ष्यामि मन्त्रमष्टाक्षरं परम् ।
षड्दीर्घयुक्ता हृल्लेखा प्रणवेन च संपुटा ॥
अष्टार्णोऽयं हनुमतो मन्त्रराजः प्रकीर्त्तितः ।
षड्दीर्घयुक्तबीजेन षडङ्गविधिरीरितः ॥

अस्य ऋषिः श्रीरामः जगती छन्दो हनुमान् देवता ।

अथ ध्यानम् ।

बालार्काभं त्रिभुवनं क्षोभकान् सर्वराक्षसान् ।
नादेनैव त्रासयन्तं सुग्रीवादिकसेवितम् ॥
सुन्दरं रामचरणध्यानं ध्यायेत् समीरजम् ।

अस्य पुरश्चरणं द्वादशसहस्रजपः 'सर्वमस्य द्वादशार्णवदि'त्युक्तत्वात् ।

द्वादशार्णमन्त्रोऽपि तत्रैव ।

अथास्यान्यं प्रवक्ष्यामि द्वादशार्णं महामनुम् ।
हौँ बीजं सम्यगुच्चार्य पूर्वोक्तं कूटपञ्चकम् ॥
हनुमते नमो मन्त्रो रामचन्द्रो मुनिर्मतः ।
जगती छन्द उद्दिष्टं हनुमान् देवता मतः ॥
बीजं तु पञ्चमं कूटं शक्तिराद्यं तु कूटकम् ।
षड्बीजैः प्रथमैर्न्यासः षडङ्गोऽस्य प्रकीर्त्तितः ॥

कूटपञ्चकं तु ।

आद्यन्ताकृतिवेदार्णा विन्दुरुद्रस्वरान्विताः ।
हनूमतस्त्वाद्यकूटमेतत् साधक उच्चरेत् ॥
प्रकृत्याकृतिवेदार्णा विन्दुरुद्रस्वरान्विताः ।
द्वितीयकूटमेतत् स्यादाद्यन्ताकृतिवर्णकाः ॥
विसर्गेन्दुस्वरोपेतास्तृतीयं कूटमुच्यते ।
आद्यन्तसिद्धाकृत्यब्धिवर्णैरीशस्वरान्वितैः ॥

सानुस्वारैस्तुर्यकूटं साद्यः सौः पञ्चमं मतम् ।

अथ ध्यानपुरश्चरणे ।

ध्यानं पूर्वोक्तमेवास्य जपेदर्कसहस्रकम् ।
दशांशं जुहुयाद्व्रीहीन् पयोदध्याज्यसंयुतान् ॥

अथ मालामन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि मालामन्त्रं वदेद्ध्रुवम् ।
वज्रकाय वज्रतुराड वदेत् कपिलपिङ्गल ॥
ऊर्ध्वकेश महाबेति ल रक्तमुख कीर्त्तयेत् ।
ताडिज्जिह्व महारौद्र दंष्ट्रोत्कटक हृदयम् ॥
करालिने महा प्रोच्य दृढप्रति च हा वदेत् ।
हि लङ्केश्वर वेत्युक्त्वा धाथ महा वदेत् परम् ॥
शेतुबन्धमहाशैलप्रवाह गगनेचर ।
एह्येहि भगवन् प्रोच्य महाबलपराक्रम ॥
भैरवाज्ञापय प्रोच्य एह्येहीति पदं वदेत् ।
महारौद्रपदं प्रोच्य दीर्घपुच्छेन वेष्टय ॥
वैरिणां भञ्जय द्वन्द्वं हुँ फड्बाणार्कवर्णवान् ।
मुन्याद्यर्चाप्रयोगादि सर्वं सूर्यार्णवन्मतम् ॥

अथ मन्त्रान्तरम् । (साधनसमुच्चये)

नमः सविन्दुमुद्धृत्य हनुमन्तं च ङेऽन्तकम् ।
रुद्रात्मकाय कवचमस्त्रं चेत्येकवर्णकः ॥
मन्त्रोऽयं हरिणा पूर्वं दत्तो गाण्डीवधन्विने ।
एतस्य साधनं कृत्वा रणे विजयमाप्तवान् ॥

मन्त्रान्तरम् ।

स्वबीजं पूर्वमुच्चार्य ङेऽन्तं पवननन्दनम् ।

वह्निजायावधिः प्रोक्तो मन्त्रोऽयं सुरपादपः ॥
षड्दीर्घभाजा बीजेन मन्त्रार्णैरङ्गकल्पना ।
स्वरैः काद्यैश्च पाद्यैश्च प्राणायामत्रयं चरेत् ॥
ध्यायेद्रणे हनूमन्तं कपिकोटिसमन्वितम् ।
धावन्तं रावणं जेतुं दृष्ट्वा सत्वरमुत्थितम् ॥
लक्ष्मणं च महावीरं पतितं रणभूतले ॥
गुरुक्रोधं समुत्पाद्य गृहीत्वा गुरुपर्वतम् ।
हाहाकारैः सदर्पैश्च कम्पयन्तं जगत्त्रयम् ॥
आब्रह्म च समाव्याप्य कृत्वा भीमकलेवरम् ।
पूजा तु वैष्णवे पीठे लक्षमेकं जपं चरेत् ॥
ततः सिद्धमनुर्मन्त्री साधयेत् सिद्धिमुत्तमाम् ।

तथा ।

ब्राह्मे मुहूर्त्ते चोत्थाय कृतनित्यक्रियो द्विजः ।
गत्वा नदीं ततः स्नात्वा तीर्थमावाह्य चाष्टधा ॥
मूलमन्त्रं ततो जप्त्वा सिञ्चेदादित्यसङ्ख्यया ।
संपूज्य हनुमन्तं षट्सहस्रं जपमाचरेत् ॥
एवं सप्तदिनान्ते च समायाति कपीश्वरः ।
रात्रौ त्रिभागशेषायां ददाति वरमीप्सितम् ॥
विद्यां वाऽपि धनं चापि राज्यं वा शत्रुनिग्रहम् ।
ददाति साधकेन्द्राय सत्यं सत्यं सुनिश्चितम् ॥

इति हनुमत्प्रकरणम् ।

अथ काममन्त्रः (शारदायाम्)

ब्रह्मा भूम्या समासीनः शान्तिविन्दुविभूषितः ।
बीजं मनोभुवः प्रोक्तं जगत्त्रितयमोहनम् ॥

ऋषिः संमोहनः प्रोक्तो गायत्रं छन्द ईरितम् ।
सर्वसंमोहनः साक्षाद्देवता मकरध्वजः ॥
बीजेन दीर्घयुक्तेन षडङ्गविधिरीरितः ।

अथ ध्यानम् ।

जपारुणां रत्नविभूषणाढ्यं
मीनध्वजं चारुकृताङ्गरागम् ।
कराम्बुजैरङ्कुशमिक्षुचापं
पुष्पास्त्रपाशौ दधतं भजामि ॥

अथ पुरश्चरणम् ।

लक्षत्रयं जपेन्मन्त्रं मधुरत्रयसंयुतैः ।
पुष्पैः किंशुकजैः फुल्लैर्जुहुयात् तद्दशांशतः ॥

अथ मन्त्रान्तरं तन्त्रान्तरे ।

मान्मथं बीजमुद्धृत्य ङेऽन्तं कामं समुच्चरेत् ।
हृदयान्तः षडर्णोऽयं जगत्संमोहनक्षमः ॥

अस्य मन्त्रस्य ऋष्यादिध्यानपर्यन्तं पूर्ववत् कार्यम् ।
पुरश्चरणे विशेषो यथा ।

वर्णलक्षं जपेन्मन्त्रं दशांशं मधुराप्लुतैः ।
पलाशकुसुमैर्होमं कुर्याद्वा चूतपल्लवैः ॥

इति काममन्त्रपुरश्चरणम् ।

बिभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत-
स्रोतःशालिनि सन्निबन्धनसरित्संभेदमभ्यर्हितम् ।
नेपालेन्द्रनरेन्द्रनिर्मितपुरश्चर्यार्णवेऽस्मिन्नगात्
सद्युक्तिस्फुटमौक्तिकोत्कररुचोत्तुङ्गस्तरङ्गोऽष्टमः ॥

इति श्रीमन्महाराजाधिराजश्रीप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे
गणेशादिमन्त्रपुरश्चरणविवेचनं नामाष्टमस्तरङ्गः ।

दशमहाविद्यास्तत्पुरश्चरणविशेषाश्च प्रदर्श्यन्ते ।

तथा च (मुण्डमालायाम्)

काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धिविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धिविद्याः प्रकीर्त्तिताः ॥

तत्रादौ प्रथमविद्या प्रोक्ता (कुमारीतन्त्रे)

भैरव उवाच ।

अस्ति गुह्यतमं ह्येतज्ज्ञानमेकं सनातनम् ।
अतीव हि सुगोप्यं च कथितुं नैव शक्यते ॥
अतीव मत्प्रियाऽसीति कथयामि तव प्रिये ।
सर्वं ब्रह्ममयं ह्येतत् संसारं स्थूलसूक्ष्मकम् ॥
प्रकृतिं तु विना नैव संसारमुपपद्यते ।
तस्माच्च प्रकृतेर्मूलकारणं नैव दृश्यते ॥
रूपाणि बहुसङ्ख्यानि प्रकृतेरस्ति भामिनि ।
एषां मध्ये महेशानि कालीरूपं मनोहरम् ॥
विशेषतः कलियुगे नराणां भुक्तिमुक्तिदम् ।
तस्या उपासकाश्चैव ब्रह्मविष्णुशिवादयः ॥
इन्द्रः सूर्यश्च वरुणः कुवेरोऽग्निस्तथाऽपरः ।
दुर्वासाश्च वशिष्ठश्च दत्तात्रेयो बृहस्पतिः ॥
बहुना किमिहोक्तेन सर्वे देवा उपासकाः ।

कालिकायाः प्रसादेन भुक्तिमुक्त्यादिभागिनः ॥
तस्या मन्त्रं प्रवक्ष्यामि यतो रक्षेज्जगत्त्रयम् ।
ककारं वह्निसंयुक्तं रतिविन्दुसमन्वितम् ॥
त्रिगुणं च ततः कूर्चयुग्मं लज्जायुगं ततः ।
दक्षिणे कालिके चेति पूर्वबीजानि चोच्चरेत् ॥
वह्निजायावधिः प्रोक्तो कालिकाया मनुः शिवे ।
द्वाविंशत्यक्षरी विद्या सिद्धिविद्येयमीरिता ॥

मन्त्रार्थमाह (संकेततन्त्रे)

ककाराद्विश्वमुत्पन्नं तेन सृष्टिस्वरूपिणी ।
रेफः कालाग्निरुद्रात्मा तेन संहाररूपिणी ॥
ईकारश्च महालक्ष्मीर्लोकत्रयविभाविनी ।
तेनेयं पालिनी शक्तिः सामरस्यं च विन्दुना ॥

(कालीतन्त्रे)

ककाराच्छिवरूपत्वात् सर्वैश्वर्यप्रदायिनी ।
ज्वलनार्णसमायोगात् सर्वतेजोमयी शुभा ॥
विन्दुमाली केवलं तु सर्वतत्त्वप्रकाशिका ।
विन्दुना निष्कलत्वाच्च कैवल्यफलदायिनी ॥
कूर्चबीजं केवलं तु सर्वबोधप्रकाशकम् ।
चैतन्यरूपं संसारभीषणं मुक्तिदायकम् ॥
व्योम्ना प्रकाशमानत्वं ग्रसमानत्वमग्निना ।
तयोर्विसर्ग ईकारो विन्दुना* तान्त्रिकी मता ॥
दक्षिणा सिद्धसाध्यादिरहिता क्षिप्रसिद्धिदा ।

---

* विन्दुनादात्मिका इति ४ पु० पा० ।

कालसंकलनात् काली कालग्रासं करोत्यतः ॥
स्वाहेति विषयाः सर्वे देवतायां समर्पिताः ।
एवं समस्तरूपेण केवलं चित्कलाऽपरा ॥
सर्वदेवमयो साक्षाच्छब्दब्रह्मस्वरूपिणी ।
एवं ध्यायेद्विशुद्धात्मा जीवन्मुक्तः स्वय शिवः ॥

विद्यामाहात्म्यमाह (भैरवीतन्त्रे)

नात्र चित्ताविशुद्धिः स्यान्नारिमित्रादिदूषणम् ।
न वा प्रयासबाहुल्यं समयासमयादिकम् ॥
न वित्तव्ययबाहुल्यं कायक्लेशकरं न च ।
देवैर्देवत्वविधये सिद्धैः खेचरसिद्धये ॥
पन्नगै राक्षसैर्मर्त्यैर्मुनिभिश्च मुमुक्षुभिः ।
कामिभिर्धर्मिभिश्चार्थमीप्सुभिः सेव्यते सदा ॥
य एनां चिन्तयेन्मन्त्री सर्वकामसमृद्धिदाम् ।
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ॥
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः ।
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ॥
वह्नेः शैत्यं जलस्तम्भं गतिस्तम्भं विवस्वतः ।
दिवारात्रिव्यत्ययं च स कर्त्तुं भवति क्षमः ॥
अन्ते च लभते देव्या गणत्वं दुर्लभं नरः ।
चन्द्रसूर्यसमो भूत्वा वसेत् कल्पायुतं दिवि ॥
न तस्य दुर्लभं किंचिद्यः स्मरेद्घोरकालिकाम् ।

(कालीतन्त्रे)

अस्याः स्मरणमात्रेण सिद्धयोऽष्टौ भवन्ति हि ।

एवं समस्तविद्यानां राज्ञी स्तोतुं न शक्यते ॥
वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ।
सर्वसिद्धिप्रदा देवी अनिरुद्धसरस्वती ॥
तस्मादस्या ज्ञानमात्रात् सिद्धयः संभवन्ति हि ।

तथा ।

अपि चेत् त्वत्समा नारी मत्समः पुरुषोऽस्ति चेत् ।
अनिरुद्धसरस्वत्याः समो मन्त्रः सदा भवेत् ॥

तन्त्रान्तरे ।

कलौ काली कलौ काली कलौ काली तु केवला ।
साधिता कालनाथेन प्रत्यक्षा कालिका कलौ ॥
कलौ कालीं विहायाथ यः कश्चिन्मोक्षकामुकः ।
स भोजनं विना नूनं क्षुन्निवृत्तिमभीप्सति ॥
कलौ कालीं विहायाथ यः कश्चिच्छान्तिमिच्छति ।
स हि शीतनिवृत्त्यर्थं हिमशैलं निषेवते ॥
कलौ कालीं विहायाथ यः कश्चित् काव्यमिच्छति ।
स तु दुःखनिवृत्त्यर्थं पापानि कुरुते सदा ॥
श्रीमहाकालिका विद्या कलौ पूर्णफलप्रदा ।
कलिर्हि यस्या दासस्य पादपूजां करोति हि ॥
अज्ञानाज्ज्ञानतो वाऽपि सलीलं वा सहेलया ।
स्मृताऽपि सिद्धिदा काली सकृदेव महेश्वरि ॥
महाविद्या सिद्धिविद्या विद्याभेदैः प्रतिष्ठिता ।
उपविद्यादिभेदैश्च कालिका संस्थिता भुवि ॥
ताराद्याः सकला विद्याः कालिकायाः प्रजज्ञिरे ।
सर्वा विद्याः कालिकायां संस्थिता एव पार्वति ॥

अथ ऋष्यादिन्यासः (कालीतन्त्रे)

भैरवोऽस्य ऋषिः प्रोक्त उष्णिक्छन्द उदाहृतम् ।
देवता कालिका प्रोक्ता लज्जाबीजं तु बीजकम् ॥
शक्तिस्तु कूर्च्चबीजं स्यादनिरुद्धसरस्वती ।

(कालीक्रमे)

कीलकं चाद्यबीजं तु चतुर्वर्गार्थसिद्धिदम् ।

(कालीतन्त्रे)

कवित्वार्थे नियोगः स्यादेवमृष्यादिकल्पना ।
अङ्गन्यासकरन्यासौ यथावदभिधीयते ॥
षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् ।

(वीरतन्त्रेऽपि)

दीर्घषट्कयुताद्येन प्रणवाद्येन कल्पयेत् ।

न्यासान्तराणि तत्रैव द्रष्टव्यानि ।

अथ ध्यानं (मेरुतन्त्रे)

करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषणाम् ॥
खड्गाभयवराँश्छिन्नं मुण्डं च दधतीं करैः ।
महामेघप्रभां श्यामां तथा चैव दिगम्बराम् ॥
कण्ठावसक्तमुण्डालीं गलद्रुधिरचर्च्चिताम् ।
कर्णावतंसतानीतशवयुग्मविराजिताम् ॥
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ।
शवानां करसङ्घातैः कृतकाञ्चीं हसन्मुखीम् ॥
सृक्कद्वयगलद्रक्तधाराविच्छुरिताननाम् ।
घोररूपां महारौद्रीं श्मशानालयवासिनीम् ॥
दन्तुरां दक्षिणव्यापिमुक्तलम्बकचोच्चयाम् ।

शवरूपमहादेवहृदयोपरिसंस्थिताम् ॥
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ।
महाकालसमायुक्तां शवोपरिरतान्विताम् ॥
सुखप्रसन्नवरदां स्मेराननसरोरुहाम् ।
एवं संचिन्तयेत् कालीं श्मशानालयवासिनीम् ॥

तथा ।

कपिलारत्नसम्पूर्णपृथ्वीदानस्य यत् फलम् ।
कोटिहोमसहस्रस्य देव्या ध्यानेन तत् फलम् ॥
एतन्मन्त्रजपान्मन्त्री मुच्यते ब्रह्महत्यया ।
पितृमातृवधाद्यैश्च किमन्यैः *क्षुद्रघातकैः ॥

अथ शापोद्धारस्तन्त्रान्तरे ।

शापोद्धारं प्रवक्ष्यामि वशिष्ठमुनिना कृतम् ।
चतुर्विंशतिलक्षाणि जप्त्वा कोपेन शप्तवान् ॥
अद्य प्रभृति देवेशि कालिके कालरूपिणि ।
तव मन्त्रेषु संसिद्धिः कष्टेनैव भविष्यति ॥
इति श्रुत्वा महादेवी प्रादुर्भूता प्रसाद्य तम् ।
उवाच पुत्र किमिदं शापदानं वृथा कृतम् ॥
एवं फलं यथा न स्यात् तथा कुरु मुनीश्वर ।
ज्ञानं दत्तं दुराराध्यं दुर्लभं यत् सुरैरपि ॥
ततः प्रीत्या वरं लब्ध्वा ज्ञानविज्ञानसंयुतम् ।
उवाच प्रीतमनसा शापान्तं मन्त्रसङ्कटे ॥
मातः क्रोधेन कथितं तत्रोपायमहं ब्रुवे ।
प्रणवं पूर्वमुद्धृत्य घोररूपे च दक्षिणे ॥

---

* क्षुद्रपातकैरिति २, ३, ४, ५, पु० पा० ।

सिद्धिं कुरुद्वयं प्रोच्य कालिकेति पदं ततः ॥
ममाभीष्टफलं शीघ्रं देहि द्रविणसम्पदम् ।
जपादौ मन्त्रमुच्चार्य जपान्ते च पुनः पठेत् ॥
भविष्यति ततः सिद्धिरचिरात् परमेश्वरि ।

अथासनभेदा उक्ता मत्स्यसूक्ते ।

मृदं चूडकमासीनश्चान्येषु कोमलेषु च ।
विष्टरं वा समास्तृत्य साधयेत् सिद्धिमुत्तमाम् ॥

एषां लक्षणानि तत्रैव ।

अर्वाक् षण्मासतो गर्भच्युतमाहुर्मृदं बुधाः ।
चूडोपनयनैर्हीनमेतच्चाचूडकं विदुः ॥
निवृत्तचूडको बालो हीनोपनयनः पुमान् ।
यो मृतः पञ्चमे वर्षे तमेव कोमलं विदुः ॥

तथा ।

मृतासनं विना देवि यो जपेत् कालिकां नरः ।
तावत् स नारकी ज्ञेयो यावदाहूतसंप्लवम् ॥

यो वीर इत्यर्थः । पशोस्तु तादृशासननिषेधात् ।
मृद्वासनाद्यभावे ऽनुकल्प उक्तो (वीरतन्त्रे)

शवाभावे विष्टरं तु शवरूपं प्रकल्पयेत् ।
पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टरम् ॥

(कालीतन्त्रादौ)

मृताभावे कुशरूपं विष्टरं परिकल्पयेत् ।
विष्टरः साधकस्याथ कथ्यते शृणु साम्प्रतम् ॥
भूतपत्राणि यस्मिन् वै स कुशेत्यभिधीयते ।
हस्ते पादे दश दशमिता दिग्युगं हृत्सरोजे

विंशत्सङ्ख्याः सकलवरदे मस्तके कीर्त्तिताश्च ।
गुह्ये जिह्वावदनरदने घ्राणकर्णस्तनेषु
लिङ्गे चाण्डे युगपरिमिता योजनीयाः कुशाश्च ॥
इत्येष विष्टरः प्रोक्तः सर्वसिद्धिप्रदायकः ।
कुशैर्वा बन्धनं कार्यं नाड्या वा परमेश्वरि ॥
रक्तमिश्रितसूत्रेण पट्टसूत्रेण वा पुनः ।
विष्टरं परिकल्प्याथ तस्योपरि जपं चरेत् ॥
विधिविष्टरपद्मस्य विधिः प्रोक्तो मया तव ।
शवरूपं प्रकल्प्याथ कविर्वाग्मी भवेन्नरः ॥
स्वयम्भुवाक्तं सूत्रं च कर्त्तव्यं सर्वसिद्धये ।
शवाभावे विष्टरस्तु शवरूपः प्रकीर्त्तितः ॥
विष्टरः शिवरूपः स्यात् स्वस्य शक्तित्वकल्पना ।
शिवशक्तिसमायोगात् किं न सिद्ध्यति भूतले ॥

अथ विष्टरसंस्कारः (शक्तिसङ्गमे)

गायत्र्या त्रोटनं कार्यं मूलेन ग्रथनं चरेत् ।
कृतसङ्कल्पको मन्त्री कोमलं वामपाणिना ॥
कूर्चबीजेन सङ्गृह्य अस्त्रमन्त्रेण प्रोक्षणम् ।
प्रणवं भुवनेशीं च समुच्चार्य तु तं वदेत् ॥
शवरूप महाप्रेत चाष्टसिद्धिं प्रयच्छ मे ।
इति स्तुत्वा तु तं सम्यक् कुशमध्ये निधापयेत् ॥
तस्य देहे त्रिकोणं तु रक्तचन्दनकेन वै ।
मायां तन्मध्यगां लिख्य बहिर्मण्डलकं चरेत् ॥
प्रणवम्-आः सुरेखे च वज्ररेखे ततःपरम् ।

कूर्च्चं चास्त्रं वह्निवधूरयं च मण्डले मनुः॥
ओँकारं च ततो मायां क्रौँकारं हंस एव च।
वह्निजायां समुच्चार्य शवप्राणाः पदं वदेत्॥
इह प्राणाः पदं चोक्त्वा शवजीव इह स्थितः।
शवस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुरेव च॥
श्रोत्रघ्राणानीहागत्य सुखं च चिरमेव च।
तिष्ठन्तु स्वाहया युक्तः प्राणसंस्थापने मनुः॥
प्रणवं पूर्वमुच्चार्याधारशक्तिपदं ततः।
कोमलासनपदं ङेऽन्तं नमोऽन्तेन तमर्चयेत्॥
प्रणवं कामपीठाय नमः शब्दान्नमस्क्रिया।
स्वर्णैर्माषत्रयैः पट्टे कार्या मूर्त्तिः शवस्य तु॥
संस्थाप्य विस्तरस्यान्ते सर्वं पूर्ववदाचरेत्।

मृताभाव इति वचनात् पशोः शवानुकल्पकुशविष्टरमपि नास्ति मुख्येऽधिकारिण एवानुकल्पेऽधिकारादिति सुधार्णवकृतः।

आसनान्तरसंस्कारोऽप्युक्तो (भैरवतन्त्रे)

कुशं व्याघ्राजिनं वाऽपि कम्बलं लोहितं तथा।
कोमलाद्यासनं वाऽपि पीतवस्त्रेण वेष्टयेत्॥
आसनं सम्यगापाद्य ततः शोधनमाचरेत्।
कल्पोक्तेन विधानेन पूजां सम्यक् समाचरेत्॥
पूजार्थमासनमहं शोधयामि महेश्वरि।
देव्याज्ञामेवमादाय मूलहृन्मनुनाऽपि च॥
जलेनासनमभ्युक्ष्य कवचेनावगुण्ठ्य च।
अस्त्रमन्त्रेण संरक्ष्य सदाशिवनिभं स्मरेत्॥
तत्र पीठमनुं भक्त्या जपेदष्टोत्तरं शतम्।

यथा विभवसम्भारैः पूजयित्वा सदाशिवम् ॥
सिद्धीश्वर महादेव सर्वसिद्धिप्रदायक ।
देहि मेऽभीष्टसिद्धिं त्वमेतदासनरूपतः ॥
इदं मन्त्रं समुच्चार्य उपविश्यासने ततः ।
यथाविधि विधायाथ गुरवे दक्षिणां ददेत् ॥

इत्यासनसंस्कारः ।

अथ देशाः (फेत्कारिणीये)

एकलिङ्गे श्मशाने च शून्यागारे चतुष्पथे ।
तत्रस्थः साधयेद्योगी विद्यां त्रिभवमोचिनीम् ॥

एकलिङ्गलक्षणमुक्तं तत्रैव ।

पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्षते ।
तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा ॥

श्मशानादिलक्षणमुक्तं (त्रिशक्तिरत्नाकरे)

दह्यन्ते व्यसवो यत्र शवकीलकसंकुले ।
गृध्रगोमायुकाकाद्यैर्मांसलुब्धैर्यदावृतम् ॥
तत् श्मशानमिति ख्यातं पिशाचगणसेवितम् ।
काकादिनीडसंयुक्तं कृत्तिच्छत्रादिसंयुतम् ॥
नागरैर्दूरनिर्मुक्तं साध्यसोद्वेगकारकम् ।
सौधसंरूढघासाढ्यं शून्यागारं तदुच्यते ॥
चतुर्णां च यथा यत्र संयोगो युगपद्भवेत् ।
तच्चतुष्पथमित्युक्तं रजन्यामिष्टदायकम् ॥
पूर्वपूर्वमिदं शस्तं जघन्यश्चोत्तरोत्तरम् ।
उज्जटे पर्वते वाऽपि निर्जने वा चतुष्पथे ॥
देवागारे देवशून्ये बिल्वमूले नदीतटे ।

स्वगृहे निर्जनारामे तथा चाश्वत्थसन्निधौ ॥

(कुमारीतन्त्रे)

तदभावे दिव्यगेहे सिन्दूरादिभिरङ्किते ।
खड्गशूलगदाकर्त्रींचामरव्यजनादिभिः ॥
वितानधूपसङ्कीर्णे कृष्णागुरुसुवासिते ।
युवतीनां सुरापीनां वेश्यानां लास्यशोभिते ॥
शङ्खघण्टारवाकीर्णे दीपावलिविराजिते ।
एवम्भूते गृहे पूजा कालिकायाः सुशोभना ॥

अथ पुरश्चरणविधिः (वीरतन्त्रे)

आदौ मन्त्रस्य सिद्ध्यर्थं पुरश्चरणमाचरेत् ।
ततः सिद्धमनुर्मन्त्री काम्यकर्माणि साधयेत् ॥

(स्वतन्त्रतन्त्रे)

दिवा लक्षं शुचिर्भूत्वा हविष्याशी जपेन्नरः ।
ततस्तु तद्दशांशेन होमयेद्धविषा प्रिये ॥
तर्पयेत् तीर्थतोयेन पयसा सर्पिषाऽपि वा ।
मधुना वा सितामिश्रतोयेन परमेश्वरीम् ॥
देवीं चाभिषिञ्चेत् तोयैस्तर्पणस्य दशांशतः ।
तद्दशांशं हविष्यान्नैर्भोजयेद्भक्तितः प्रिये ॥
कालीमन्त्रविदो विप्रान् दक्षिणां गुरवे ददेत् ।
पाशवं कठिनं कल्पं शृणु वैरं ततः प्रिये ॥
रात्रौ मांसाशवैर्देवीं पूजयित्वा विधानतः ।
ततो नग्नां स्त्रियं नग्नो रमन् क्लेदयुतोऽपि वा ॥
जपेल्लक्षं ततो देवीं होमयेज्ज्वलितेऽनले ।
योनिकुण्डे स्थिते सर्पिर्मांसमध्वयुतं तथा ॥

दशांशं तर्पयेन्मद्यैर्मांसमिश्रैस्तु साधकः ।
तर्पणस्य दशांशेन अभिषिञ्च्य जगन्मयीम् ॥
दशांशं भोजयेत् साधु साधकं कालिकाप्रियम् ।
मद्यं मांसं च मत्स्यं च चर्वणं च प्रदापयेत् ॥
ततस्तु तोषयेद्भक्त्या गुरुं स्वर्णादिभिः प्रिये ।
एतत्कल्पद्वयाद्देवि मन्त्रः सिध्यति वै ध्रुवम् ॥

(कालीतन्त्रे)

आदौ पुरस्क्रियां कुर्यान्नियमेन यथाविधि ।
लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः ॥
रात्रौ ताम्बूलपूर्णास्यः शय्यायां लक्षमानतः ।
ततः सिद्धमनुर्मन्त्री प्रयोगार्हो न चान्यथा ॥

(साधनसमुच्चये)

नित्यकर्म दिवा कृत्वा रात्रौ पूजां समाचरेत् ।
पूजान्ते तु जपं कुर्यात् कारणास्वादमोदितः ॥
जपेन लक्षमात्रेण काली विद्या प्रसिध्यति ।

(भैरवतन्त्रे)

लक्षं जपेद्धविष्याशी दिनेनैव जितेन्द्रियः ।
ब्रह्मचर्यपरो भूत्वा पुरश्चरणकर्मणि ॥
तथा रात्रौ जपेल्लक्षं मन्त्री मैथुनतत्परः ।
कृत्वाऽऽचारक्रमेणैवं साधयेन्मन्त्रमात्मनः ॥
विधानेनाथ सिद्धिः स्यान्मनुरेव न संशयः ।

(भैरवयामले)

दीक्षाविधानमधिगम्य गुरोः सकाशा-
ल्लब्ध्वा मनुं जपति लक्षमितं दिवा यः ।

रात्रौ हविष्यभुगमत्सरकामकोप-
लोभाद्यचञ्चलमनाः स तु साधकेन्द्रः ॥
लक्षं निशि स्ववनितासु रतावसाने
नग्नो विमुक्तचिकुरस्त्वयि दत्तचित्तः ।

(महाकालस्तुतौ)

वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणयुगलध्याननिरतः ।
परं नक्तं नग्नो निधुवनविनोदेन च मनुं
जनो लक्षं स स्यात् स्मरहरसमानः क्षितितले ॥

(मेरुतन्त्रे)

लक्षमेकं जपेन्मन्त्रं हविष्याशी दिवा शुचिः ।
अशुचिश्च तथा रात्रौ लक्षमेकं जपेन्मनुम् ॥
दशांशं होमयेदाज्यैस्तर्पयेदभिषेचयेत् ।
होमं च तर्पणं पूजा कर्त्तव्या तु विशेषतः ॥
ततः प्रयोगान् कुर्वीत काम्यानिष्टफलाप्तये ।

(वीरचूडामणौ)

साधनस्य विधिं वक्ष्ये संकेतपरमाद्भुतम् ।
येन विज्ञातमात्रेण खेचरत्वं च जायते ॥
होमं कुर्यात् प्रयत्नेन पायसेन तिलेन वा ।
स्नातः शुक्लाम्बरधरो नित्यकर्मदिवाशुचिः ॥
रात्रौ पूजां प्रकुर्वीत पञ्चमुद्राविधानतः ।
अनेनैव विधानेन लक्षमेकं जपेद्बुधः ॥
स्वस्वकर्म पुरस्कृत्य सर्वसिद्धीश्वरो भवेत् ।
हावभावादिकं कुर्यान्महाचीनलतां हरेत् ॥

(श्रुतिसिद्धान्ततन्त्रे)

तेनैव तर्पणं कुर्यात् स्नानपानादिकं सदा ।
दक्षिणे पाशवः कल्पो वीरकल्पस्तु कामिनाम् ॥
कल्पद्वयं समाश्रित्य मन्त्रः सिध्यति सत्वरम् ।
गुरोराज्ञां समादाय स्नातः शुक्लाम्बरः शुचिः ॥
दिवा लक्षं जपेद्विद्यां ब्रह्मचर्यं समाश्रितः ।
रात्रौ च देवदेवेशीमिष्ट्वा वामोपचारकैः ॥
शक्तीः संपूज्य विधिवत् कृत्वा त्रिभुवनोत्सवम् ।
कोमलाद्यासनासीनो मुक्तकेशो दिगम्बरः ॥
ताम्बूलपरिपूर्णास्यः सिन्दूराङ्कितभालकः ।
रहस्यमालामादाय जपेल्लक्षमनन्यधीः ॥
कुलमार्गप्रपन्नानां विधिरेषः प्रकीर्त्तितः ।

अत्र ब्राह्मणस्य पशोर्वा दक्षिणोपचारेण दिवैकलक्षजपः । शूद्रस्य वीरस्य च रात्रौ वामोपचारेणैकलक्षजप इति राघवभट्टादयः ।

तेषामयमाशयः ।

भैक्ष्यादिनियमाहारः सकृद्रात्रौ विधीयते ।
दिवा चैव जपं कुर्यात् पौरश्चरणिको द्विजः ॥

इति (फेत्कारिणी-)तन्त्रवचनात् ।

स्नातः शुक्लाम्बरधरः शुचिः प्रयतमानसः ।
दिवा सर्वं प्रकर्त्तव्यं धर्मकामार्थसिद्धये ॥
द्विजानामत्र सर्वेषां विधिरेषः प्रकीर्त्तितः ।

इति (मेरुतन्त्र-)वचनाच्च विप्रादिकर्त्तृकपुरश्चरणे ।

त्रिसन्ध्यं देवपूजां च त्रिसन्ध्यं जपमाचरेत् ।
रात्रौ मन्त्रं च मालां च स्पृशेन्नैव कदा चन ॥

इति पशुभावप्रकरणीय-(भावचूडामणि-)वचनात् । पशुकर्त्तृकपुरश्चरणे च दिवस एव कालः ।

एवं च ।

द्विजानां चैव सर्वेषां दिवाविधिरिहोच्यते ।
शूद्राणां च तथा प्रोक्तं रात्राविष्टं महाफलम् ॥

इति (महाकालसंहिता-) वचनोत्तरार्धात् ।
शूद्रकर्त्तृकपुरश्चरणे ।

गते तु प्रथमे यामे तृतीयप्रहरावधि ।
निशायामेव जप्तव्यं रात्रिशेषे जपेन्न च ॥

वीरपुरश्चरणप्रकरणीय-(मुण्डमाला-)वचनाद्वीरकर्त्तृकपुरश्चरणे च रात्रिरेव काल इति व्यवस्थितौ ।

पशुर्गुरुमुखाल्लब्धां विद्यां कालघनप्रभाम् ।
पाशवेन तु कल्पेन लक्षं जपति साधकः ॥
दिव्यगुरुमुखाल्लब्ध्वा कालिकां दिव्यरूपिणीम् ।
लक्षं जप्यात् सदा मन्त्रं वीरकल्पेन साधकः ॥

इति (कालीकुलार्णव-)वचनात् ।

स्वाचारनिरतो नित्यं दिवा लक्षं जपेत् पशुः ।
दिव्यो वाऽप्यथ वा वीरो रात्रौ लक्षं जपं चरेत् ॥

इति (कालीक्रम-)वचनाच्च सर्वेषामेकलक्षजपात्मकमेव पुरश्चरणं सिध्यतीति ।

अस्मिन् मते ।

लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः ।
रात्रौ ताम्बूलपूर्णास्यः शय्यायां लक्षमानतः ॥
एवं लक्षद्वयं जप्त्वा तद्दशांशेन मन्त्रवित् ।
अयुतं होमयेद्देवि दिवारात्रिप्रभेदतः ॥

इति सर्वेषां भिन्नभिन्नेति कर्त्तव्यताकसमुचितलक्षद्वयजपात्मकपुरश्चरणविधायक-(कुमारीतन्त्र-)विरोधो दुर्वारः ।

(निरुत्तरतन्त्रेऽपि) लक्षद्वयपरिमित एव जप उक्तः ।

लक्षद्वयं जपेद्विद्यां दिवारात्रिप्रभेदतः—इति ।

सुधार्णवकृतस्तु—

'एवं लक्षद्वयं जप्त्वा' इत्यादि-(कुमारीतन्त्रा-)दिवचनाद् दिवारात्र्योर्भिन्नभिन्नाचारेणैकैकलक्षजपात्मकसमुचितलक्षद्वयजपः सर्वस्यैव प्राप्तः ।

स्वाचारनिरतो नित्यं दिवा लक्षं जपेत् पशुः ।
दिव्यो वाऽप्यथ वा वीरो रात्रौ लक्षं जपं चरेत् ॥

इति (कालीक्रम-)वचनेनापवाद्यते ।

एवं च वीरब्राह्मणस्यापि रात्रौ मैरेयाद्युपादानपुरःसरः ।

ब्राह्मणो मदिरां दत्वा ब्राह्मण्यादेव हीयते ।

इत्यादिवाक्यविरुद्धो वीरभावप्रकरणीयब्राह्मणकर्तृकक्षीरोपादानविधायक-(भावचूडामणि-)विरुद्धश्च जपः प्राप्तः ।

तत्र

द्विजानां चैव सर्वेषां दिवाविधिरिहेष्यते ।

इत्यपवादकं वाक्यम् । तेन वीरस्यापि ब्राह्मणस्य मैरेयाद्युपादानपूर्वकं दिवालक्षजपः पर्यवसन्नो भवति ।

एवं च राजन्यवैश्ययोरपि रात्रिमात्रजपापवादकम् ।

शूद्राणां च तथा प्रोक्तं रात्राविष्टं महाफलम् ।

इत्युत्तरार्धम् । तेन (कुमारीकल्प-)वचनं राजन्यवैश्यविषयं पर्यवस्यति ।

अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः पशूनां रात्रिजपश्च पशुभावप्रकरणीय-(भावचूडामणि-)वचनपरास्त एवेति सर्वमनवद्यम् ।

वस्तुतस्तु—

'पशुर्गुरुमुखाल्लब्ध्वा' इत्यादि (कालीकुलार्णव-)वचनात् पशोर्लब्धमन्त्रस्य पशुभावेन वीराल्लब्धमन्त्रस्य वीरभावेन च साधने एकलक्षजपो वैपरीत्ये च लक्षद्वयजप इत्याहुः । अत्र वैपरीत्ये (कुमारीतन्त्रो-)क्तरीत्या लक्षद्वयजपस्य कर्त्तव्यतया वीराल्लब्धमन्त्रस्य पशुभावेन साधनासम्भवात् पशोर्लब्धमन्त्रस्य वीरभावेन साधनमेव वैपरीत्यमिति ध्येयम् ।

अत्र कृष्णभट्टपादाः ।

'एवं लक्षद्वयं जप्त्वा' इत्यादि-(कुमारीतन्त्रा-)दिवचनात् सर्वेषामपि लक्षद्वयपरिमित एव जपः । पशुदिव्यवीराणामेकैकलक्षजपविधायक-(कालीकुलार्णवकालीक्रमा-)दिवचनं तु सिद्धमन्त्रविषयम् ।

अत एवोक्तं (यामलादौ)

गुरुणा साधितो मन्त्रो यदि भाग्येन लभ्यते ।
लक्षमात्रं तदा जप्त्वा सर्वकर्माणि साधयेत्—इति ॥

तत्र विशेषस्तु ।

रात्रौ मांसासवैर्देवीं पूजयित्वा विधानतः ।
ततो नग्नां स्त्रियं नग्नो रमन्–इत्यादि(स्वतन्त्रतन्त्रा–)दिवचनात् ।
ब्राह्मणो मदिरां दत्त्वा—इत्यादिमहाकालोक्तविरुद्धमैरेयदानादिकम् ।
अज्ञानात् स्वस्त्रियं गत्वा–इत्यादिसामान्यपुरश्चरणप्रकरणीय–(सिद्धान्तसम्प्रदाया)–दिवचनविरुद्धरात्रिजपप्राक्कालीनसुरतादिकं च ब्राह्मणस्यापि प्राप्तम् ।

तदुभयमपि ।

द्रव्येण सात्त्विकेनैव ब्राह्मणः पूजयेच्छिवाम् ।
स्वकीयां परकीयां वा सामान्यवनितां तथा ॥
जपेयुस्ताः समाकृष्य क्षत्रविट्शूद्रजातयः ।

इति (महाकालसंहिता)–वचनेनापवाद्यते ।

एवं च ।

स्वजातकुसुमं चैव हेतुद्रव्यं च भैरव ।
स्पृष्ट्वा तथा समाघ्राय पञ्चगव्येन शुद्ध्यति ॥
ऋतुकालं विना चापि न गच्छेत् स्त्रियमादरात् ।

इत्यादिभिः पशुभावप्रकरणीय–(भावचूडामणि–)वचनैर्विप्रेतरपशोरपि तदुभयं निरस्तमेव ।

पशुमात्रस्य रात्रिजपनिषेधक–(भावचूडामणि–)वचनं तु एतद्देवताद्यतिरिक्तदेवतोपासकपशुपरम् ।

रात्रावपि जपेत् तावत् प्रत्यवायोपशान्तये ।

इति पशुकर्त्तृककाम्यप्रकरणीय–(श्रुतिसिद्धान्ततन्त्र)–वचनेन एतद्देवतोपासकपशो रात्रिजपस्यापि विहितत्वात् ।

शूद्राणां च तथा प्रोक्तं रात्राविष्टं महाफलम् ।

इति वचनं तु शूद्राणां रात्रिजपे फलातिशयबोधकं न तु शूद्रकर्तृकदिवातनजपप्रतिषेधकम् ।

तथा च ।

वीरदिव्ययोः दिवापाशवकल्पेनैकलक्षजपो वीरकल्पेन रात्रावेकलक्षजपस्तत्रापि साक्षान्मैरेयाद्युपादानं शूद्रस्यैव न तु वीरस्यापि त्रैवर्णिकस्य तदुपादानम् ।

क्षीरेण ब्राह्मणैस्तारा घृतेन नृपवंशजैः ।
माक्षिकैर्वैश्यवर्णैस्तु आसवैः शूद्रजातिभिः ॥

इति (भैरवतन्त्र-) वचनात् ।

अत एवोक्तं (महाकालसंहितायाम्)

श्रूयते यत् फलाधिक्यं तत्रादौ मद्यदानतः ।
तद्धि शूद्रपरं ज्ञेयं न तु द्विजपरं प्रिये—इति ॥

पशोस्तु दक्षिणाचारेण दिवैकलक्षजपस्तेनैवाचारेण रात्रावेकलक्षजप इति सर्वेषामपि लक्षद्वयजपात्मकमेव पुरश्चरणं पर्यवसन्नमिति प्राहुः ।

मम त्वेवं प्रतिभाति ।

दक्षिणे पाशवः कल्पो वीरकल्पस्तु वामिनाम् ।

इत्यादि (श्रुतिसिद्धान्त-) तन्त्रवचनाद्दक्षिणमार्गिणः पाशवकल्प एव वाममार्गिणो वीरकल्प एवाधिकारित्वे सिद्धे पाशवकल्पेन वीरकल्पेन च पुरश्चरणमुक्त्वा—

कुलमार्गप्रपन्नानां विधिरेष प्रकीर्त्तितः ।

इति तत्रैवोक्तत्वात् ।

कुलाचारक्रमेणैवं साधयेन्मन्त्रमात्मनः ।

इति (भैरवतन्त्र-) वचनात् ।

दक्षवामक्रियायुक्तः कौलश्चोभयमिश्रितः ।

इत्याद्यप्रकरणीय-(वाडवानल)-वचनाच्च एतत्कल्पद्वयाश्रयणे कौलिकस्यैवाधिकारः प्रतीयते ।

तथा च ।

पाशवकल्पेन दिवैकलक्षजपरूपपुरश्चरणं दक्षिणमार्गिणः । वीरकल्पेन रात्रावेकलक्षजपरूपपुरश्चरणं वाममार्गिणः । एतदुभयात्मकपुरश्चरणं कौलिकस्येति मार्गभेदेन पुरश्चरणस्यापि भेदः ।

द्विजानां चैव सर्वेषाम्—इत्यादौ द्विजपदं पशुपरं न तु विप्रमात्रपरम् । तस्य त्रैवर्णिकवाचकत्वात् । अत एव क्षत्रियवैश्ययोः संग्रहाय सर्वेषामिति पदमुपात्तम् । उत्तरार्धे तु नोपात्तम् । अन्यथा राजन्यवैश्यविषयकाकाङ्क्षाया अनिवृत्तिप्रसङ्ग इति तु सुधार्णवकृतैवोक्तम् । पशुश्च दक्षिणमार्गी । एवमुत्तरार्धे शूद्रपदं वाममार्गिपरम् ।

अत एवोक्तं (मेरुतन्त्रे)

शूद्रादियवनान्तानां सिद्धिर्वामपथे स्थिता-इति ।

दिव्यो गुरुमुखात्-इत्यत्र दिव्यो वाऽप्यथ वा वीरः-इत्यत्र च दिव्यवीरौ वाममार्गिणौ न तु कौलिकौ । कौलिकवाममार्गिभेदेन तयोः प्रत्येकं द्वैविध्यस्य वक्ष्यमाणत्वात् तथा च दिवैकलक्षजपविधायकानि (कालीकुलार्णवा)-दिवचनानि दक्षिणमार्गपरतया रात्रावेकलक्षजपविधायकानि (साधनसमुच्चया-)दिवचनानि वाममार्गपरतया दिवारात्रिभेदेन समुचितलक्षद्वयजपविधायकानि (भैरवतन्त्रकुमारीतन्त्रा-)दिवचनानि च कुलमार्गपरतया संगमनीयानीति सकलमकलङ्कम् ।

किञ्च ।

लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः ।
अशुचिश्च तथा रात्रौ लक्षमेकं जपेन्मनुम् ॥

इत्यादावपि त्रिविधमार्गोपयुक्तं त्रिविधपुरश्चरणं सुधीभिराकलनीयम् ।

ननु पशूनामेतद्देवताराधने कथमधिकारः ।

दिव्यभावं वीरभावं विना कालीं न पूजयेत् ।
पूजयेन्नरकं याति दुःखं तस्य पदे पदे ॥
पशुभावाश्रितो देवि यदि कालीं प्रपूजयेत् ।
रौरवं नरकं याति यावदाहूतसंप्लवम् ॥

इति (निरुत्तरतन्त्र-)वचनेन निषेधादिति चेन्न । दिव्यभावमित्यादिवचनानां वामाचारप्रकरणीयतया वाममार्गिणां पशुभावाश्रयणनिषेधपरत्वात् ।

तथा च ।

वाममार्गी दिव्यभावं विना कालीं न पूजयेत् ।

पशुभावाश्रितः सन् यदि पूजयेत् तदा रौरवं नरकं यातीति तदर्थः ।

तदुक्तमन्यत्रापि ।

दिव्यभावं वीरभावं वाममार्गी समाश्रयेत् ।

पशोः संसर्गमात्रेण रौरवं नरकं व्रजेत्-इति ॥

तथा च ।

पशुभावो हि विप्राणां श्रेयस्करतरो मतः ।
तस्मात् पाशवकल्पेन विप्रः कालीं प्रपूजयेत् ॥

इति (श्रुतिसिद्धान्ततन्त्र-) वचनात् ।

विप्रो दक्षिणमार्गेण महामायां प्रपूजयेत् ॥

इत्यादि (सिद्धान्तसार-)वचनाच्च पशूनामेतद्दैवतोपासनाधिकारित्वमक्षतमेव ।

अन्यथा ।

पशुर्गुरुमुखाल्लब्ध्वा-इत्यादिपूर्वोक्त-(कालीकुलार्णव-)वचनस्य ।
स्वाचारनिरतो नित्यं दिवा लक्षं जयेत् पशुः ।

इत्यादि(कालीक्रम-)वचनस्य चासङ्गत्यापत्तेः ।

एवं च ।

साधके क्षोभमापन्ने देवीक्षोभः प्रजायते ।
तस्माद्भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम् ॥
विना पीत्वा सुरां भुक्त्वा मांसं गत्वा रजस्वलाम् ।
यो जपेद्दक्षिणां कालीं तस्य दुःखं पदे पदे ॥
कलावासवयोगेन तर्पयेत् कालिकां प्रिये ।

इत्यादि-(निरुत्तरतन्त्र-)वचनानामपि वीरपरत्वमवगन्तव्यम् । वीरस्यापि ब्राह्मणस्य मैरेयाद्युपादाननिषेधाद्ब्राह्मणेतरवीरपरत्वमुक्तवचनानामिति बहवः ।

वस्तुतो ब्राह्मणस्य वीरादिभाव एव निषिद्धः ।

पशुभावो हि विप्राणाम्-इत्युक्तत्वात् ।

ननु ।

मद्यं मत्स्यं तथा मांसं मुद्रां च मैथुनं ततः ।
ब्राह्मणो वीरभावेन कालिकायै निवेदयेत् ॥
ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्च कुलयोगतः ।
पञ्चमैः पूजयेत् कालीं मोक्षार्थी यः कलौ भवेत् ॥

इत्यादि-(निरुत्तरतन्त्र-)वचनाद्ब्राह्मणस्य वीरभावे कथं नाधिकार इति चेन्मैवम् ।

ब्राह्मं वीर्यं तथा क्षेत्रं संस्कारा ब्रह्मसंभवाः ।
ब्राह्मणाच्चरणाद्ब्रह्मविद्याभिर्ब्राह्मणो भवेत् ॥

इति (मेरुतन्त्रो-)क्तेषु पञ्चसु लक्षणेषु निर्देशक्रमप्रातिलोम्येन लक्षणचतुष्टयहीनस्य शूद्रतुल्यस्यैव ब्राह्मणस्य वामाचाराधिकारितया सर्वाचारपरिभ्रष्टस्य तादृशस्यैव ब्राह्मणस्य कुलाचाराधिकारितया च तदितरस्य विप्रस्य तदुभयानधिकारित्वेन वीरभावनिषेधात् ।

तदुक्तं (मेरुतन्त्रे)

उक्तेषु लक्षणेष्वेकं यस्मिन् विप्रे प्रदृश्यते ।
तस्यैव ब्राह्मणस्यात्र वामे स्यादधिकारिता ॥

तथा ।

चतुर्लक्षणहीनानां मार्गाः स्यु कौलिकादयः ।

तथा ।

सर्वाचारपरिभ्रष्टः कुलाचारं समाश्रयेत् ।
कुलाचारपरिभ्रष्टो रौरवं नरकं व्रजेत्-इति ॥

अत एवोक्तं (भावनिर्णये)

वृषलः पशुभावं तु न कदाऽपि समाश्रयेत् ।
ब्राह्मणो वीरभावं च मनसाऽपि न भावयेत् ॥

इति च शब्दाद्दिव्यभावमपि ।

एवं च ब्राह्मणकर्त्तृकमदिराद्युपादानविधायकं वाक्यं यत्र यत्रोपलभ्यते तत्र तत्र ब्राह्मणपदस्य पूर्वोक्तलक्षणचतुष्टयहीनवीरब्राह्मणपरत्वमवधेयम् । तान्त्रिकमते तादृशेऽपि ब्राह्मणपदप्रयोगात् । अत एव तस्यैव ब्राह्मणस्येत्युक्तं (मेरुतन्त्रे)

ब्राह्मणैस्तु सदा पेयं क्षत्रियैस्तु रणागमे ।
वैश्यैर्धनप्रयोगे च शूद्रैर्नैव कदा चन ॥

इति-(कुलार्णव-)वचनं तु सदा पेयमित्यत्र सदा अपेयमित्यकारप्रश्लेषादपि सङ्गच्छते । एवं च कलिधर्मप्रकरणे गृह्यपरिशिष्टे हरिनाथोपाध्यायैः सौत्रामण्यां सुराग्रहणनिषेधस्योक्तत्वात् ।

कुलाचाराधिकारिब्राह्मणस्यास्माभिरुपदर्शितत्वाच्च ।

सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिवेत् सुराम् ।

इति (समयाचार-)वचनं सङ्गच्छत एव ।

यत् तु ।

त्रेतायां पूजिता देवी घृतेन सर्वजातिभिः ।
मधुभिः सर्ववर्णैस्तु पूजिता द्वापरे युगे ॥
पूजनीया कलौ देवी केवलैरासवैः-इति (यामल-)वचनम् । तत्र

सर्ववर्णशब्दो ब्राह्मणेतरपरः ।

त्रय्यध्वरीणो भूदेवस्त्रिपदायज्ञसूत्रधृक् ।
न कदाऽपि स्पृशेद्वालां न च देव्यै निवेदयेत् ॥

इति (महाकालसंहिता-) वचनेन ब्राह्मणस्य सर्वदा मैरेयदाननिषेधात् ।

इत्थं च ।

यत्रावश्यं विनिर्दिष्टं मदिरादानमुत्तमम् ।
ब्राह्मणस्ताम्रपात्रे तु गव्यं मद्यं प्रकल्पयेत् ॥

इति (भैरवतन्त्रो-)क्तोऽनुकल्पविधिरपि पूर्वोक्तवीरब्राह्मणपर एव । तदितरस्य तु तत्रापि नाधिकारः ।

ब्राह्मणस्त्वनुकल्पं च कृत्वा चाण्डालतामियात् ।

इति तन्त्रान्तरवचनात् ।

(महाकालसंहितायाम्)

कदा चिदनुकल्पोक्तां दद्याद्देव्यै द्विजः सुराम् ।
उपमद्यानि ते वच्मि तानि देव्यवधारय ॥
आर्द्रकस्य गुडस्यापि समभागे भवेत् सुरा ।
ताम्रपात्रे तथा क्षौद्रं पयो गव्यं तथाऽत्र च ॥
नारिकेलोदकं कांस्ये रीतौ तालरसोऽपि च ।
रसालश्च रसो रङ्गे शङ्खे वा पानसो द्रवः ॥
मधूकपुटके द्राक्षा तत्पुष्पं तद्दलेऽपि च ।
चिञ्चारसं पद्मपत्रेऽश्वत्थे कारकपानकम् ॥
उपमद्यानि चैतानि द्वादश स्युर्वरानने ।

द्विजो दित्सति चेन्मद्यं दद्यादेतानि नो सुराम् ॥
एतान्यपि न देयानि सात्त्विकैर्धर्मभीरुभिः ।
मद्यं वाऽप्युपमद्यं वा मद्यनाम न गच्छति ॥
पातित्यं किन्तु नामीभिस्तथैव पतितो भवेत् ।

अत्र द्विजपदं ब्राह्मणेतरद्विजपरं न तु ब्राह्मणपरम् । अत एवोक्तं तत्रैव ।

नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु ।
राजन्यवैश्ययोर्दानं न विप्रस्य कदा चन ॥
एवं प्रदानमात्रेण हीनायुर्ब्राह्मणो भवेत्-इति ।

एवं च ।

नानोपचारसम्भारैर्भक्तितः पूजिताऽपि च ।
विना मकारयोगेन नैव तुष्यति कालिका ॥

इत्यादि (कुलरत्नावली-) वचनमपि शूद्रादिकर्तृकाराधनपरं बोद्धव्यम् । विप्रादिकर्तृकोपासनायां न सात्त्विकैरेवोचारैस्तस्यास्तुष्टिश्रवणात् । एतत् सर्वं (महाकालसंहितायां) स्पष्टम् ।

तथा हि ।

वस्तुष्वन्येषु तिष्ठत्सु देवीप्रीतिकरेषु च ।
किमेतया वै सुरया कदन्नमलरूपया ॥
भूतप्रेतपिशाचार्थं पूयमिश्रं* सुरामिषम् ।
तद्ब्राह्मणेन नो देयं देव्यै नात्तव्यमेव च ॥
न चैतया तुष्यति सा बहु वाऽपि घृणायते ।
उद्विग्ना च भवेत् तस्माद्दद्यान्नैव द्विजः सुराम् ॥
हतो वेदो हतो धर्मः परलोको हतः स्वकः ।
कुलं हतं हता जातिर्हतं ब्राह्मण्यमेव च ॥
प्राज्ञंमन्येन मूर्खेण पिबताऽज्ञानतः सुराम् ।

---

* पूयमन्नम् इति क-ख-घ पुस्तक पाठः ।

किं कृतं साधितं किं वा किं च वा समुपार्जितम् ॥
यदयं हतवान् स्वस्य सर्वं मद्योपसेवनात् ।
एवमेवाज्ञानमग्नो मामप्याशु हनिष्यति ॥
उद्विग्नैवं महामाया भवेत् तदवलोकनात् ।
कैवर्त्तपुक्कशम्लेच्छरजकान्त्यावसायिनाम् ॥
चर्मकारनटप्रोथमेदोवेणूपजीविनाम् ।
सिद्धदुर्गन्धिशुष्कान्नं द्रव्यं मद्यं निवेद्य हि ॥
सुधावत् पिवतां पुसां कथं विद्सु न हि स्पृहा ।
अन्ये न सन्ति वस्त्वाद्या नैवेद्यकरणाय किम् ॥
अस्पृश्यं यत् तदानीय मद्यं ददति कौलिकाः ।
ऋचो यजूंषि सामानि ह्यथर्वाङ्गिरसस्तथा ॥
वेदेभ्यः कोटिगुणिता महामन्त्रास्तथैव च ।
ये पावयन्ति देहस्थान् मद्यैराकण्ठपूरितैः ॥
मामपि प्लावयिष्यन्ति किमाश्चर्यं हि ते जनाः ।
सात्त्विकैरेव नैवेद्यैः कन्दैः पुष्पैः फलैर्दलैः ॥
अभावे भावभक्तिभ्यां सत्यं तुष्टा भवाम्यहम् ।
न मद्यमांसविस्तारैः प्रेतराक्षसभोजनैः ॥
ब्राह्मणो मानसाः पुत्रा मरीच्यत्र्यङ्गिरोमुखाः ।
एतेषामन्वयोद्भूताः पुनरन्ये सहस्रशः ॥
कश्यपश्चैव दुर्वासा दत्तात्रेयश्च चन्द्रमाः ।
बृहस्पतिर्विश्रवाश्च शक्तिर्दक्षो मृकण्डुजः ॥
नारदः कपिलो व्यासः कालाग्निर्जमदग्निजः ।
दाक्षः कविरथर्वा च शाण्डिल्यो गौतमो मनुः ॥
नाचिकेता भरद्वाजः श्वेताश्वतर एव च ।

और्वो दधीचिश्च्यवन ऋचीकश्च पराशरः ॥
शातातपो लोमशश्च जैगीषव्यश्च देवलः ।
पैठीनसिर्वीतिहव्यः संवर्त्तोऽगस्तिरासुरिः ॥
उपमन्युर्मतङ्गश्च तथा वाजस्रवाः कठः ।
उद्दालकश्चारुणेय आश्वलायन एव च ॥
उत्तङ्कश्च यवक्रीतः कात्यायन ऋतश्रवाः ।
एते चान्ये च मुनयो वेदवेदाङ्गपारगाः ॥
ईजानाः क्रतुभिः सर्वैः समाप्तवरदक्षिणैः ।
गृणन्तो निगमं सर्वं कुर्वन्तो दुश्चरं तपः ॥
ध्यायन्तो निष्कलं ब्रह्म जपन्तो मामकं मनुम् ।
सर्वदा सात्त्विकैरेवोपचारैः पूजयन्ति माम् ॥
सदा मय्यर्पितहृदः सदा मद्भावभाविताः ।
सदा मच्छरणं प्राप्ताः शान्ता दान्ता जितेन्द्रियाः ॥
वाय्वाहारा निराहारा ऊर्ध्वरेतस एव च ।
तपोबलाद्भ्रंसयितुं शक्रमप्यलमीदृशाः ॥
न निवेदितवन्तस्ते किमर्थं मदिरां मयि ।
विज्ञायास्यां महादोषं निन्द्यतां पापहेतुताम् ॥
गर्हाकरत्वं पातित्यकारित्वं पूतितामपि ।
परलोकविनाशित्वं तथा नरकहेतुताम् ॥
विप्रत्वजातिहन्तृत्वं म्लेच्छतुल्यत्वकारिताम् ।
अतस्तत्यजुरेवैनां संगृह्य श्रुतिपद्धतिम् ॥
यद्यस्यां दोषराहित्यं पुण्यकारित्वमेव च ।
स्यात् तदा ते कथं मह्यं ददुर्नैव सुरां द्विजाः ॥
धर्मव्यवस्थां ज्ञात्वेत्थमन्येऽपि द्विजातयः ।

निवेदयिष्यन्ति नैव मह्यं मद्यं कथं चन ॥
बोधिता अपि शास्त्रार्थैरनादृत्य वचो मम ।
मोहाद्व्यवहरिष्यन्ति लोभोपहतचेतसः ॥
ये केचित् तां धर्मराजः शासिष्यति न संशयः ।
तीव्रैर्दण्डैर्महाघोरनरकादिनिपातनैः ॥
इति सत्यं पुरा मह्यं प्रोवाच जगदम्बिका ।
तत्राहमवदं देवि देवीवक्त्रोत्थिताक्षरैः ॥
अतः परं श्रुत्युदितं धर्ममद्वाक्यमेव च ।
देव्याज्ञां च समुल्लङ्घ्य ये दास्यन्ति सुरां द्विजाः ॥
तेषां शास्त्री महामाया श्रोतव्यं शृणवतः परम् ।
द्विजेतरः संप्रदद्याद्देव्यै मद्यं सदा रहः ॥
स्वयं महाप्रसादं च युञ्जीत प्रत्यहं प्रिये ।
मांसानि दग्धमीनाँश्च सर्वदैव निवेदयेत् ॥
शुद्रादीनामथैतेषां सद्यस्तुष्यति कालिका ।
द्विजानां यावती निन्दा कथिता मद्यदानतः ॥
शूद्राणां तावती ज्ञेया प्रशस्तिर्वरवर्णिनि ।
अतः शूद्रः प्रयत्नेन देव्यै मद्यं निवेदयेत् ॥
दीर्घायुष्ट्वमरोगित्वं वाग्मित्वं राजमान्यताम् ।
पुत्रक्षेत्रकलत्रार्थपरिपूर्णत्वमेव च ॥
अन्ते स्वर्गादिगमनं शूद्रः प्राप्नोति मद्यतः ।
श्रूयते यत् फलाधिक्यं तन्त्रादौ मद्यदानतः ॥
तद्धि शूद्रपरं ज्ञेयं नैव द्विजपरं प्रिये ।
स्वयं यदन्नो भवति तदन्ना तस्य देवता ॥
पितरश्च तदन्नाः स्युरित्येव वैदिकी स्थितिः ।

प्राणिजातिषु सर्वासु मानुष्यमतिदुर्लभम् ॥
मानुष्येष्वपि देहेषु शूद्रः श्रेष्ठोऽन्त्यजातितः ।
शूद्राच्छतगुणो वैश्यो वैश्यात् साहस्रिको नृपः ॥
नृपात् कोटिगुणो विप्रो ज्ञेयः स्वाध्यायतत्परः ।
अत एव हि सर्गादौ जगत् सृष्ट्वा चराचरम् ॥
यद्यत् सारतरं वस्तु तद्ब्रह्माऽदाद्द्विजातये ।
वेदाः षडङ्गशास्त्राणि क्षमा सत्यं तपो धृतिः ॥
शौचं दानं दया धर्मो विवेकः कलभाषिता ।
त्यागः शान्तिश्च मर्यादा स्वाध्यायोऽध्यात्मचिन्तनम् ॥
यज्ञाः सर्वहविर्गव्यं पयो मेध्यान्नमेव च ।
एतेषां विपरीतानि ददौ शूद्रेभ्य एव च ॥
त्रयाणामपि वर्णानां दासभावमदात् ततः ।
सर्वशिल्पोपजीवित्वं मन्त्रराहित्यमेव च ॥
अनाशीस्त्वमशौचत्वमपाङ्क्त्यत्वमेव च ।
अस्पृश्यत्वमपाठित्वमसम्भाष्यत्वमेव च ॥
मद्यमांसोपयोगित्वं तद्विक्रेतृत्वमेव च ।
देवेभ्यस्तत्प्रदातृत्वं तदुत्पादित्वमेव च ॥
म्लेच्छादिदेशगमनं तत्संपर्कित्वमेव च ।
महासाहसकारित्वं वेदाश्रोतृत्वमेव च ॥
एतस्मात् कारणाद्देवि वेदमर्यादयाऽनया ।
ब्रवीमि मदिरादानेष्वेषामेवाधिकारिता ॥
दोषोऽणुरपि नैतेषां देवेभ्यो मद्यदानतः ।
फलातिरेकता वाऽपि श्रूयते निगमादिषु ॥
अतः प्रयत्नतः शूद्रो दद्याद्देव्यै परिश्रुतम् ।

तामेव वर्जयेद्विप्रः सदा प्राणात्ययेऽपि हि ॥
निशम्यापीदृशान् दोषानथ चेद्दातुमिच्छति ।
स च सा च विजानाति धर्मं वा पापमेव वा ॥

(अगस्त्यसंहितायामपि)

आवां तु पिशितै रक्तैः सुरयाऽपि सुरेश्वरि ।
वर्णाश्रमोचितं धर्ममविचार्य यजन्ति ये ॥
भूतप्रेतपिशाचास्ते भवन्ति ब्रह्मराक्षसाः ।

(मेरुतन्त्रे)

अमृतेन सहोत्पन्नं स्थाले मद्यं सुधायते ।
विषेणापि सहोत्पन्नं तेन मद्यं विषायते ॥

तथा ।

गौडी पैष्टी च माध्वी च सुरा इत्यभिधीयते ।
सा क्षत्रवैश्ययोर्नेष्टा ब्राह्मणस्य तु का कथा-इति ॥

अथ विद्याभेदाः (कालीतन्त्रे) ।

क्लीहृदयविद्या च सिद्धिविद्या महोदया ।
पुरा येन यथा जप्त्वा सिद्धिमायुर्दिवौकसः ॥
कामाक्षरं वह्निसंस्थमिन्दिरानादबिन्दुभिः ।
मन्त्रराजमिदं ख्यातं दुर्लभं पापचेतसाम् ॥
त्रिगुणा तु विशेषेण सर्वशास्त्रप्रबोधिका ।
अनया सदृशी विद्या न हि सारस्वतप्रदा ॥
आकर्षणवशीकारमारणोच्चाटनं तथा ।
शान्तिपुष्ट्यादिकर्माणि साधयेदनयाऽचिरात्-इत्यादि ॥

तथा ।

ध्यानपूजादिकं सर्वं साधनं च पुरस्क्रिया ।
अनिरुद्धसरस्वत्याः समानं सर्वमीरितम् ॥

(मेरौ)

जपपूजादिकं प्राग्वद्विशेषाद्भोगमोक्षदम् ।

(श्रुतिसिद्धान्ते)

स्वबीजं पूर्वमुद्धृत्य कालिके वह्निगेहिनी ।
एषा षडक्षरी विद्या भुक्तिमुक्तिफलप्रदा ॥

(मेरुतन्त्रे)

न्यासपूजादिकं प्राग्वद्विशेषाद्भोगदो मतः ।

तत्रैव ।

क्रीँ हूँ ह्रीँ त्र्यक्षरात्माऽयं मन्त्रः काल्याः प्रकीर्त्तितः ।
प्राग्वज्जपादिकं चास्य विशेषात् सन्ततिप्रदः ॥
कालीबीजं च हूँ मायां हुँ फट् पञ्चाक्षरो मनुः ।
न्यासध्यानादिकं प्राग्वद्विशेषाद्भूतनाशनम् ॥
क्रीँ हूँ ह्रीँ हुँ फडत्युक्त्वा स्वाहान्तः सप्तवर्णकः ।
मायाद्वन्द्वं कूर्चयुग्ममैन्द्रान्तं मदनत्रयम् ॥
मायाविन्द्वीश्वरयुतं दक्षिणे कालिके पदम् ।
संहारक्रमयोगेन बीजसप्तकमुद्धरेत् ॥
एकविंशत्यक्षरात्मा ताराद्यः कालिकामनुः ।

(मेरुतन्त्रेऽपि)

अथान्यं संप्रवक्ष्यामि एकविंशतिवर्णकम् ।
ॐ ह्रीँ ह्रीँ हूँ युगं त्रिः क्रीँ दक्षिणे कालिके वदेत् ॥
त्रिः क्रीँ हूँ हूँ शक्तियुग्ममस्य न्यासादि पूर्ववत् ।
विल्वमूले शवारूढो वटमूले तथैव च ॥
लक्षं मनुमिमं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
पञ्चमं प्रतिनिध्यायं दक्षिणाम्नायसिद्धिदम् ॥

तथा ।

दक्षिणे कालिके स्वाहा मनुरष्टाक्षरः परः ।

न्यासः प्राग्वद्ध्यानमत्रशवरूपशिवस्थिताम् ॥
महाकालरतासक्तां शिवाभिर्दिक्षु वेष्टिताम् ।

तथा ।

पुरश्चर्यादिकं प्राग्वत् प्रयोगानाचरेत् तथा ।
अथातः संप्रवक्ष्यामि शक्रवर्णमनूत्तमम् ॥
क्रीँ हू ह्रीँ दक्षिणे कालिके क्रीँ हुँ ह्रीँ दहनप्रिया ।
यजनं पूर्ववत् प्रोक्तं न्यासध्यानजपादिकम् ॥
विशेषान्नृसुरादीनामयमाकर्षणक्षमः ।
हूँ हूँ त्रिः क्रीँ द्विश्च लज्जां दक्षिणे कालिके पुनः ॥
हूँ हूँ त्रिः क्रीँ द्विश्च लज्जां स्वाहेत्याकृतिवर्णवान् ।
न्यासपूजादिकं प्राग्वद्विशेषेण वशीकृतिः ॥
जपादेतस्य भवति सर्वमन्यत् तु पूर्वतत् ।
क्रीँ क्रीँ क्रीँ हूँ समुच्चार्य हूँ लज्जाद्वयमुच्चरेत् ॥
दक्षिणे कालिके स्वाहा तिथिवर्णः प्रकीर्त्तितः ।
मन्त्रराजोऽयमाख्यातः पूर्ववत् स्यादुपासना ॥
विशेषाद्गतराज्यानामयं राज्यप्रदो भवेत् ।

अथैतद्गायत्र्याः पुरश्चरणमुक्तं (सिद्धान्तसंग्रहे)

एवं ध्यात्वा महाकलीं जपेल्लक्षचतुष्टयम् ।
रक्तार्कैर्विल्वपत्रैश्च तद्दशांशेन होमयेत्—इति ॥

अथ महाकालमन्त्रः (शक्तिसङ्गमे)

श्रीशिव उवाच ।

महाकालं समारभ्य नित्यानां निर्णयं शृणु ।
महाकालो महाभीमः प्रलयानलसन्निभः ॥
कालीमायासमुद्भूतः कालीमानसिकः शिवः ।
महाकालः परः शम्भुः परातीतगुणाकरः ॥

तस्य मन्त्रं प्रवक्ष्यामि येन रक्षेज्जगत्त्रयम् ।
कूर्च्चयुग्मं महाकाल प्रसीदेति पदद्वयम् ॥
लज्जायुग्मं वह्निजायासंयुक्तः षोडशार्णकः ।
षोडशार्णा यथा मुख्याः सर्वश्रीचक्रमण्डले ॥
तथाऽयं सर्वकालीषु महाकालः प्रकीर्त्तितः ।
कालिकाऽस्य ऋषिः प्रोक्तो विराट् छन्दः प्रकीर्त्तितम् ॥
देवता तु महाकालः सर्वरूपी निरञ्जनः ।
कूर्च्चबीजं तथा माया शक्तिरस्य प्रकीर्त्तिता ॥
स्वाहाकीलकमुद्दिष्टं काल्यर्थे विनियोगता ।
मायया तु षडङ्गानि ध्यानं शृणु वरानने ॥

अथ ध्यानम् ।

कोटिकालानलाभासं चतुर्बाहुं त्रिलोचनम् ।
श्मशानाष्टकमध्यस्थं मुण्डाष्टकविभूषितम् ॥
पञ्चप्रेतस्थितं देवं त्रिशूलं डमरुं तथा ।
खड्गं च खर्परं चैव वामदक्षिणयोगतः ॥
बिभ्रतं सुन्दरं देहं श्मशानभस्मभूषितम् ।
नानाशवैः क्रीडमानं कालिकाहृदयस्थितम् ॥
लालयन्तं रतासक्तं घोरचुम्बनतत्परम् ।
गृध्रगोमायुसंयुक्तं फेरवीगणसंयुतम् ॥
जटापटलशोभाढ्यं सर्वशून्यालये स्थितम् ।
सर्वशून्यं मुण्डभूषं प्रसन्नवदनं शिवम् ॥

भावयेदिति शेषः ।

अथ पुरश्चरणम् ।

एवं पूजां विधायाथ लक्षसङ्ख्यं जपेच्छिवे ।

तद्दशांशेन हवनं करवीरप्रसूनकैः ॥
स्वयम्भूवाऽऽक्तैर्बीजाक्तैः कारणाक्तैश्च वा हुनेत् ।
नित्यं नैमित्तिकं काम्यं कालीवत् सर्वमाचरेत् ॥

अथ महाकालीमन्त्रो (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि महाकालीमहामनुम् ।
ॐ क्षौँ क्षेँ क्रैँ ततः क्रैँ च पशुं गृहाण चोच्चरेत् ॥
हुँ फट् स्वाहा शक्रवर्णः सिद्धमन्त्र उदाहृतः ।
नास्य मुन्यादिकं न्यासः सिद्धमन्त्रस्य विद्यते ॥
कृष्णतोयेन संपूर्णे घटे चाहूय कालिकाम् ।
ब्राह्म्यादिभिश्च दूतीभिर्युक्तां संपूज्य भक्तितः ॥
अष्टमीं चण्डिकां त्वत्र देवीं ध्यायेद्गृहे पुनः ।

ध्यानं यथा ।

पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोचनाम् ।
शक्तिशूलधनुर्बाणखेटखड्गवराभयान् ॥
दक्षादक्षभुजैर्देवीं बिभ्राणां भोगिभूषणाम् ।

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं वामाचारेण साधकः ।
पिचुमर्दस्य समिधो घृताक्ता जुहुयात् ततः ॥
रज्ज्वा प्रज्वलिते वह्नौ तर्पणादि ततश्चरेत् ।
एवं सिद्धमनुर्मन्त्री मारयेदचिराद्रिपून् ॥

अथ भद्रकालीमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि भद्रकाल्याः परं मनुम् ।
हौँ कालीति महाकाली ह्रिः किणिः फड्वसुप्रिया ॥
चतुर्दशाक्षरो मन्त्रो भद्रकाल्या उदाहृतः ।
पदैः षड्भिः षडङ्गानि जातियुक्तानि कल्पयेत् ॥

अथ ध्यानम् ।

ध्यातव्येयं सदा देवी भद्रकाली भयावहा ।
क्षुत्क्षामा कोटराक्षी च नाहं तृप्तेति वादिनि ॥
मसीमुखी मुक्तकेशी जगद्ग्रसनलालसा ।
जम्बूफलाभदशना लोलजिह्वा भयङ्करी ॥
शूलं कपालं च शृणिं ज्वलत्पाशं च बिभ्रती ।
अशेषं कालिकातन्त्रे यत् प्रोक्तं तदिहापि च ॥
जपन्यासप्रयोगाद्यं यो विशेषः स उच्यते ।
आराध्य प्रजपेन्मन्त्रं नित्यमष्टोत्तरं शतम् ॥
रिष्टमाला विधातव्या जपार्थं सिद्धिमिच्छता ।
इयं देवी महादेवी शत्रुनिग्रहकारिणी ॥
यथेष्टचेष्टया चिन्त्या धर्मकामार्थसिद्धिदा ।
अथ मन्त्रान्तरं वक्ष्ये भद्रकाल्याः सुगोपितम् ॥
गृध्रकर्णि विरूपाक्षि लम्बस्तनि महोदरि ।
उत्पादयोत्पादयेति द्विधोपरि पदं भवेत् ॥
द्विधा वेत्ति पदं हुँ फट् स्वाहा सप्ताग्निवर्णकः ।
पिप्पलादो मुनिः प्रोक्तो निवृच्छन्द उदाहृतम् ॥
भद्रकाली देवता स्याद्द्विरुत्पादय हृत् स्मृतम् ।
उपरिभ्यां शिरः प्रोक्तं वेत्तिभ्यां तु शिखा स्मृता ॥
हुँ फड्भ्यां कवचं प्रोक्तं स्वाहयाऽस्त्रमुदीरितम् ।

अथ ध्यानम् ।

अतिरौद्रा महादंष्ट्रा भृशं दीर्घा कृशोदरी ।
सुवृत्तनयना शूरा दीर्घघोणा मदातुरा ॥
स्निग्धगम्भीरनिर्घोषा नीलजीमूतसन्निभा ।

भृगुद्यघटसंदीप्ता महारदनभीषणा ॥
दंष्ट्रोष्ठकोपताम्राक्षी रक्तदीर्घशिरोरुहा ।
त्रिशूलव्यग्रदोर्दण्डा नरकीटपलाशिनी ॥
अतिरक्ताम्बरा देवी रक्तमांसासवप्रिया ।
शिरोमाला भूषिताङ्गी पिबन्ती शोणितासवम् ॥
नृत्यन्ती च हसन्ती च पिशाचगणसेविता ।
पिशाचस्कन्धमारुह्य भ्रमन्ती वसुधातलम् ॥
शङ्करस्य मुखोत्पन्ना योगिनी योगवल्लभा ।
इत्थम्भूता भद्रकाली मातृभिः परिवारिता ॥

अथ पुरश्चरणम् ।

ध्यात्वा सम्यक् समाराध्य ततो मन्त्रं जपेद्बुधः ।
अयुतं मन्त्रसिद्ध्यर्थं मातृकान्यासतत्परः ॥
घृतहोमस्तथा कार्यस्तर्पणादि समाचरेत् ।
धूमावत्यां च यत् प्रोक्तमनयाऽपि तदाचरेत् ॥

अथ सिद्धिकालीमन्त्रः (कालीतन्त्रे)

अथ वक्ष्ये महादेवि सिद्धविद्यां महोदयाम् ।
ईश्वरेण पुरा प्रोक्तां देवीं हृदीशसंज्ञिताम् ॥
प्रणवं पूर्वमुच्चार्य हृल्लेखाबीजमुद्धरेत् ।
रतिबीजं समुद्धृत्य पपञ्चमभगान्वितम् ॥
ठद्वयेन समायुक्तं विद्या राज्ञी प्रकीर्त्तिता ।
भैरवोऽस्य ऋषिः प्रोक्तो विराट् छन्द उदाहृतम् ॥
सिद्धिकाली ब्रह्मरूपा देवता भुवनेश्वरी ।
रतिबीजं बीजमस्या हृल्लेखा शक्तिरुच्यते ॥
हृल्लेखया षड्दीर्घेण प्रणवाद्येन कल्पयेत् ।

अङ्गषट्कं ततो न्यस्य ध्यात्वा देवीं शिवो भवेत् ॥

ध्यानं यथा ।

खड्गोच्छिन्नेन्दुविम्बस्रवदमृतरसाप्लाविताङ्गी त्रिनेत्रा
सव्ये पाणौ कपालाद्गलदमृतमयं मुक्तकेशी पिवन्ती ।
दिग्वस्त्रा बद्धकाञ्ची मणिमयमुकुटाद्यैर्युता दीप्तजिह्वा
पायान्नीलोत्पलाभा रविशशिविलसत्कुण्डलालीढपादा ॥

अथ पुरश्चरणम् ।

जपेद्विंशतिसाहस्रं सहस्रैरेव संयुतैः ।
होमयेत् तद्दशांशेन मृदुपुष्पेण मन्त्रवित् ॥

अथ श्मशानकालीमन्त्रः (स्वतन्त्रतन्त्रे)

श्मशानकालिकामन्त्रं शृणुष्वावहिता शिवे ।
वाणीं मायां ततो लक्ष्मीं कामवीजं ततः परम् ॥
कालिके संपुटत्वेन चतुष्कं बीजमालिखेत् ।
एकादशार्णा देवेशि चतुर्वर्गफलप्रदा ॥
ऋषिर्भृगुर्निवृच्छन्दो देवता कालिका परा ।
श्मशानाद्या च वाग्माया बीजं शक्तिर्महेश्वरि ॥
कीलकं कामवीजं तम् ... ... इति ।
चतुश्चतुस्त्रिचतुस्तु विद्यामन्त्रैः षडङ्गकम् ॥
विन्यस्य ध्यानं कुर्वीत कालिकायां समाहितः ।
अञ्जनाद्रिनिभां देवीं श्मशानालयवासिनीम् ॥
त्रिनेत्रां मुक्तकेशीं च शुष्कमांसातिभीषणाम् ।
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णं कपालकम् ॥
सद्यः कृत्तशिरो दक्षहस्तेन दधतीं शिवाम् ।
स्मितवक्त्रां सदा वाममांसतर्पणतत्पराम् ॥
नानालङ्कारभूषाङ्गीं नग्नां मत्तां सदा शवैः ।

एवं ध्यायेदिति शेषः ।

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं तद्दशांशेन होमयेत्–इति ।

अथ सिद्धिलक्ष्मीमन्त्रः (कालानलतन्त्रे)

ॐ ह्रीँ हूँ हाँ फ्रेँ क्षोँ क्रोँ नमः ।
श्रुतिश्चटी च दोग्ध्री च शोषिणी शिरया सह ।
दोला तदनु माल्रूः सामरश्च निरत्ययः ॥
शेषे दण्डः परिज्ञेय इयमुक्ता नवाक्षरी ।
नैतस्य सदृशो मन्त्रस्त्रिषु लोकेषु विद्यते ॥

अथ मन्त्रान्तरं तत्रैव ।

अथोद्धरिष्ये देवेशीं षोडशार्णां मनूत्तमाम् ।
यामेकवारमुच्चार्य मुच्यते जन्मसंकटात् ॥
ह्रीँ हूँ फ्रेँ छ्रीँ ह्लाँः ह्रीँ क्रोँ फ्रेँ स्त्रीँ श्रीँ होँ जूँ ब्लौँ व्रीँ स्वाहा ।
चटी दोग्ध्री शिरोसिद्धिभूमर्द्धिः प्रोथ एव च ।
फली पुनः शिरो रेतः प्रातरान्ते ततः परम् ॥
पुरश्चरणहोमाः स्युर्मलिनाह्लदपर्यटाः ।
मन्त्रोऽयमपि सर्वेषां मनूनामुत्तमः स्मृतः ॥

अनयोर्ऋष्यादिन्यास उक्तस्तत्रैव ।

श्रीसिद्धिलक्ष्मीमन्त्रस्य ऋषिर्नारद ईरितः ।
गायत्री छन्द आख्यातं सिद्धिलक्ष्मीश्च देवता ॥
चटीबीजं तथाऽऽख्यातं समीहा शक्तिरिष्यते ।
प्रबन्धः कीलकं विद्यात् पुरुषार्थचतुष्टये ॥
विनियोगोऽस्य मन्त्रस्य कथितस्त्वयि नारद ।

अथ कराङ्गन्यासौ ।

षड्दीर्घभाजा बीजेन कराङ्गन्यासमीरितम् ।

इदानीं ते सुगमेन कथयामि द्विजर्षभ ॥
श्रुतिपूर्वं बीजमुक्त्वा अङ्गुष्ठाभ्यां पदं ततः ।
शेषे दण्डः समाख्यातः पुनर्बीजद्वयं वदेत् ॥
तर्जनीभ्यां यदा तत्र दण्ड इत्यभिधीयते ।
पुनर्बीजद्वयं यत्र भ्यामन्ता मध्यमा ततः ॥
दण्डः शेषे च विज्ञेयः पुनस्तद्बीजमेव च ।
अनामिका भ्यामन्ता च ततो दण्डः प्रकीर्त्तितः ॥
बीजद्वयात् कनिष्ठाभ्यां पदाद्दण्डबीजं स्मृतम् ।
बीजद्वयं करतलपृष्ठाभ्यां दण्ड इत्यपि ॥
इति करन्यासं कृत्वा अङ्गन्यासं चरेत् सुधीः ।
क्रमेणानेन वै ब्रह्मन् संभवन्यासमाचरेत् ॥
श्रुतिचन्द्रौ समाभाष्य हृदयाय पदं ततः ।
दण्डस्तदनु विप्रर्षे बीजद्वयं तथा परम् ॥
शिरसे पदतश्चैव दोग्ध्रीबीजं स्मृतं तदा ।
तद्बीजद्वयमुच्चार्य शिखायै पदमेव च ॥
इन्द्रबीजं समाख्यातं पुनर्बीजद्वयं वदेत् ।
कवचाय पदाच्चैव दोग्ध्रीबीजं हि नारद ॥
बीजे तथा समुच्चार्य नेत्रत्रयाय वौषडिति ।
षडङ्गन्यासमित्युक्तमर्च्चयां कायशोधनम् ॥

अथ ध्यानम् ।

ध्यानमस्याः प्रवक्ष्यामि तन्निबोध अजात्मज ।
श्वेतां श्वेतशवारूढां नृमुण्डकृतकुण्डलाम् ॥
पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोचनाम् ।
व्याघ्रचर्मावृतकटीं शुष्कावयवभूषिताम् ॥

आबद्धयोगपट्टां च नरास्थिकृतभूषणाम् ।
हस्तैः षोडशभिर्दीप्तां विस्रस्तघनकुन्तलाम् ॥
खड्गं बाणं तथा शूलं चक्रं शक्तिं गदामपि ।
जपमालां कर्त्तृकां च बिभ्रतीं दक्षिणैर्भुजैः ॥
फलकं कार्मुकं नागपाशं परशुमेव च ।
डमरुं फेरुपोतं च नरमुण्डकपालकम् ॥
उद्वहन्तीं करैर्वामैर्दीप्तसर्वाङ्गभूषणाम् ।

एतद्ध्यानं नवाक्षर्याः । षोडसार्णविद्यायास्तु ध्यानान्तरमुक्तं तत्रैव ।

महातेजोमयी लक्ष्मी रश्मिकोट्ययुतप्रभा ।
पञ्चवक्त्रा दशभुजा त्रिपञ्चनयनैर्युता ॥
श्वेतवर्णनिभा देवी महाप्रेतोपरिस्थिता ।
मातृकाष्टकमध्यस्था सिद्धियोगनिषेविता ॥
दारितास्या लेलिहाना ज्वालालुप्तजगत्त्रयी ।
उच्छ्वासोच्छ्वासवेगेन चालयन् कुलपर्वतान् ॥
क्व चिद्देशे क्व चित् कूटे क्व चित् संहरते क्षणात् ।
क्व चित् सृजेत् पालयेच्च स्वतन्त्राद्वा प्रवर्त्तते ॥
गोनासाभरणैर्युक्ता उरगेन्द्रविभूषिता ।
पाशाङ्कुशधरा देवी वराभयकराम्बुजा ॥
सव्यहस्ते धृतं खड्गं त्रैलोक्यक्षोभकारकम् ।
वामे खट्वाङ्गमत्युग्रं दक्षिणे शूलमुत्तमम् ॥
वामे तु कलशं दिव्यं महारत्नप्रपूरितम् ।
एषा प्रत्यङ्गिरा देवी उन्मत्ता व्योमदेहजा ॥
एकात्मा नैकभेदेन विश्वं व्याप्य व्यवस्थिता ।
प्रत्यङ्गिरा महादेवी सिद्धिलक्ष्मीर्जयप्रदा ॥

(पद्धतौ)

खट्वाङ्गाङ्कुशपाशशूलवरकृद्भीत्राणपात्रं शिरः
कुम्भासिज्वलितोद्भटैर्भुजवरैराभासमानां शिवाम् ।
रुद्रस्कन्धगतां शरच्छशिनिभां पञ्चाननां सुन्दरीं
पञ्चत्र्यक्षविराजितां भगवतीं श्रीसिद्धिलक्ष्मीं भजे ॥

उक्तयोः श्रीसिद्धिलक्ष्मीमन्त्रयोः पुरश्चरणं तु वक्ष्यमाण-(महाकालसंहितो-) क्तगुह्यापुरश्चरणवज्ज्ञेयम् ।

तदुक्तं (कालानलतन्त्रे)

यथा कामकला काली गुह्यकाली यथा द्विज ।
यथा छिन्ना यथा तारा वज्रकापालिनी यथा ॥
सिद्धिलक्ष्मीस्तथा देवी विशेषो नास्ति कश्चन ।
एकैव पूजा विज्ञेया प्रयोगाश्च तथा द्विज ॥
अत्रानुक्तं हि यत् किञ्चित् संहितायां च तद्विदुः ।
ग्रन्थगौरवभीत्या च नोक्तमन्यत् त्वयि द्विज ॥
संक्षेपेण सिद्धिलक्ष्म्यास्त्वयि सर्वं प्रकीर्त्तितम् ।
विस्तृतं च महाकालसंहितायां द्विजोत्तम ॥
जपः पुरश्चरणं च आचारश्चापि नारद ।
महाकालसंहितायां कामकलाभ्यासे प्रकीर्त्तितः ॥
तेनैव वर्त्मना विप्र सिद्धिलक्ष्म्याऽखिलं* विदुः ।
पौनरुक्त्यभयेनात्र निगदामि न नारद ॥

अथ गुह्यकालीमन्त्रः (महाकालसंहितायाम्)

गुह्यकाल्यास्तु मन्त्राणामष्टादश भिदाः प्रिये ।
सर्वागमेषु गोप्यास्ते न प्रकाश्याः कदा चन ॥
मन्त्राणां भेदतो ध्यानभेदाः स्युर्विविधास्तथा ।

---

* सिद्धिलक्ष्म्याः- अखिलमिति सन्धिस्तान्त्रिकः ।

यन्त्रभेदा अपि तथा वाहनानां भिदास्तथा ॥
यो मन्त्रो येन चाभ्यस्तस्तत्राम्नायः प्रकीर्त्तितः ।
ब्रह्मणा च वशिष्ठेन रामेण च तथा प्रिये ॥
हिरण्याक्षानुजेनापि कुवेरेण यमेन च ।
भरतेन दशास्येन वलिना वासवेन च ॥
विष्णुनाऽन्यैश्च देवैश्च दैत्येन्द्रैर्विविधैरपि ।
उपासिता सिद्धिहेतोर्लब्ध्वा सिद्धिश्च भूयसी ॥
शतवक्त्राऽशीतिवक्त्रा षष्टिवक्त्रा तथैव च ।
षट्त्रिंशदानना विंशदानना परिकीर्त्तिता ॥
तथा विंशतिवक्त्रा च दशवक्त्रा च कालिका ।
पञ्चवक्त्रा त्रिवक्त्रा च द्विवक्त्रा चैकवक्त्रिका ॥
या गुह्यकाली तन्मध्ये भरतोपासिता प्रिये ।
दशवक्त्रा षोडशार्णा चतुष्पञ्चाशदोर्युता ॥
सर्वासां गुह्यकालीनां सा वै मुख्यतमा स्मृता ।
तामेवादौ व्याहरामि व्याहरिष्ये ततः पराः ॥
षोडशाक्षरको मन्त्रः कीलितश्चाप्यकीलितः ।
तत्रादौ कीलितं वच्मि ततो वक्ष्याम्यकीलितम् ॥
कीलकाकीलकध्यानमेकमेव हि पार्वति ।

मन्त्रोद्धारमाह ।

आदौ वेदादिमुद्धृत्य ततः पस्य द्वितीयकम् ।
एकारयुक्तं तदधो रेफं विन्दुं च योजयेत् ॥
सिद्धिशब्दं ततः प्रोच्य करालिं च विनिर्दिशेत् ।
लज्जां क्रोधमनुस्मृत्य कफोणिं वाममुद्धरेत् ॥
वामदृग्विन्द्वधोवह्नियुक्तं कुर्यात् ततश्च तम् ।

वधूबीजं पुनर्मंत्राद्द्वितीयं बीजमुद्धरेत् ॥
हृन्मन्त्रो वह्निजाया च मन्त्रोऽयं षोडशाक्षरः ।

प्रकारान्तरमाह ।

अथ वा कामिनीबीजात् पूर्वं क्रोधमनुस्मरेत् ।
इयं हि भरतोपास्या कीलिताऽपि च शापतः ॥

भरतोपासिता षोडशाक्षरी द्विविधा । तत्राद्या कीलिता द्वितीया त्वकीलितेत्यर्थः ।

सप्तदशाक्षरीमाह ।

रामोपास्यामतो वक्ष्येऽक्षरसप्तदशान्विताम् ।
साऽऽपि हारीतमुनिना कीलिता तपसो बलात् ॥
आदौ तस्यैव मन्त्रस्य चतुरोऽर्णान् समुद्धरेत् ।
द्वितीयबीजोपरि च हसखं विनियोजयेत् ॥
एवं तु पञ्चमं बीजं षष्ठं खेन च वर्जितम् ।
सप्तमं हसहीनं च करालि तदनन्तरम् ॥
त्रयोदशैकादशके स्थाने सप्तममक्षरम् ।
पञ्चमं द्वादशस्थाने द्वितीयं च चतुर्दशे ॥
आद्यं पञ्चदशे कुर्याद्वह्निजयान्तगो मनुः ।
हारीतोपासिता ह्येषा च्यवनोपासितां शृणु ॥
षष्ठपञ्चमयोरस्य व्यत्ययः समुदीरितः ।
एतावतैव भवति च्यावनी सुमहाफला ॥

अत्रापि रामोपासिता सप्तदशाक्षरी द्विविधा हारीतोपासिता च्यवनोपासिता चेति । तयोर्मध्ये हारीतोपासितैव कीलिता च्यवनोपासिता तु न कीलितेति बोध्यम् ।

ऋष्यादिकमाह ।

षोडशाक्षरयोर्मन्त्रभेदयोरधुना ब्रुवे ।
ऋष्यादिकं ततः सप्तदश्याश्च कथयामि ते ॥
अथर्वा ऋषिरुद्दिष्टो जगती छन्द उच्यते ।

देवता गुह्यकाली च द्वितीयार्णं तु कीलकम् ॥
शक्तिस्तु दशमं बीजं द्वितीये नवमं भवेत् ।
पुरुषार्थचतुष्कस्य सिद्धये कामनास्थितिः ॥
सप्तदश्यास्तु मन्त्रस्य परमेष्ठी ऋषिर्मतः ।
छन्दश्च सप्रतिष्ठाख्यं देवता गुह्यकालिका ॥
पञ्चमार्णं कीलकं स्यात् सप्तमं शक्तिरुच्यते ।
तदेव विपरीतं हि च्यावनीसमुदीरितम् ॥
प्रयोगः सर्वसिद्ध्यर्थं जपे प्रोच्चारितो भवेत् ।
अन्येषां मन्त्रभेदानां यदुद्धारं वदामि ते ॥
तदा ऋष्यादिकं तेषां कथयिष्यामि पार्वति ।

अथ षडङ्गन्यासस्तत्रैव ।

द्वे पञ्च त्रीणि च द्वे च द्वे पुनर्द्वे पुनस्तथा ।
वर्णाक्षराणां भारत्यास्तत्तत्स्थाने प्रविन्यसेत् ॥
तावन्तोऽर्णाः सप्रणवास्तत्र तत्र स्थले न्यसेत् ।
यादृशी च्यावनी मन्त्रवर्णावल्यनुतिष्ठति ॥
तारयोर्मध्यवर्त्तीनि देवीवर्णानि तानि हि ।
न्यस्येत् स्थानेषु तेष्वेव हारीतोपसिते मनौ ।

ध्यानमाह ।

भरतोपासिता या च रामोपास्या च या स्मृता ।
ध्यानं तयोरेकमेव कथ्यमानं मया शृणु ॥
ध्यायेद्देवीप्रभावोत्थप्रोच्छलद्रक्तवारिधिम् ।
उत्तुङ्गोत्तुङ्गकल्लोलप्रपूरितदिगन्तरम् ॥
तत्र द्वीपं रक्तमांसपूरितं रक्तवालुकम् ।
नवकोटिकचामुण्डाकोटिभैरववेष्टितम् ॥

तन्मध्ये मण्डलं ध्यायेद्योजनायुतविस्तृतम् ।
भैरवीकोटिघटितं प्राकारं तत्र चिन्तयेत् ॥
एकं श्मशानं तन्मध्ये शतयोजनविस्तृतम् ।
चिन्तयेत् प्रोच्छलद्वह्निज्वालाव्याप्तर्क्षमण्डलम् ॥
योगिनीकोटिविहितकरतालिकचेष्टितम् ।
नाराचनद्धमुण्डस्रक्कृततोरणमालिकम् ॥
तदन्तःस्थापिनीं कालीं ध्यायेन्निश्चलमानसः ।
रत्नसिंहासनं दिव्यं हीरमुक्तादिनिर्मितम् ॥
धारयन्तं चतुष्कोणे युगं वेदं विचिन्तयेत् ।
सत्ययुगं च ऋग्वेदं शुक्लवर्णं च पूर्वगम् ॥
त्रेतायुगं यजुर्वेदं पीतवर्णं च दक्षगम् ।
द्वापरं सामवेदं च रक्तं पश्चिमदिग्गतम् ॥
अथर्ववेदं च कलिं श्याममुत्तरदिग्गतम् ।
उपवेदस्य शुभ्रस्य मूर्ध्नि सिंहासनं स्थितम् ॥
तस्य सिंहासनस्योर्ध्वमन्यत् सिंहासनं महत् ।
स्वस्वास्त्रवाहनयुतैर्दिगष्टपतिभिर्वृतम् ॥
देव्याः सिंहासनधराँस्ताँश्च ध्यायेदतन्द्रितः ।
स्वां स्वां दिशमवष्टभ्य स्थितान् परमशोभितान् ॥
इन्द्रं पीतं सवज्रं च स्थितमैरावतोपरि ।
पावकं रक्तवर्णं च छागस्थं शक्तिपाणिकम् ॥
यमं कृष्णं कासरस्थं दण्डहस्तं भयानकम् ।
निर्ऋतिं धूम्रवर्णं च खड्गहस्तं तुरङ्गगम् ॥
वरुणं पाशहस्तं च शुभ्रं मकरवाहनम् ।
श्यामं वायुं ध्वजधरं हरिणोपरि संस्थितम् ॥

गदाधरं कुबेरं च कुङ्कुमाभं नरे स्थितम् ।
ईशानं शुभ्रवर्णं च शूलहस्तं वृषे स्थितम् ॥
सिंहासनं तृतीयं च पञ्चप्रेतैर्धृतं प्रिये ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥
एते पञ्चमहाप्रेताः स्थिताः सिंहासनादधः ।
पीतः श्यामस्तथा रक्तो धूम्रः श्वेतः क्रमादिमे ॥
दण्डं चक्रं च शक्तिं च शूलं खट्वाङ्गमेव च ।
धारयन्तो मुखे न्यस्ततर्जनीकास्त्रिलोचनाः ॥
केशरिद्विपकोलाश्च फेत्काररवभीषणाः ।
ऊर्ध्वं पीठं ततो ध्यायेद्भैरवाख्यं भयानकम् ॥
खर्वं स्थूलतरं घोरं कृष्णवर्णं चतुर्भुजम् ।
पञ्चवक्त्रं त्रिनेत्रं च कीकशाभरणान्वितम् ॥
खट्वाङ्गं कर्त्तृकां दक्षे कपालं डमरुं तथा ।
धारयन्तं मुण्डमालायुतं दंष्ट्राग्रभीषणम् ॥
तदूर्ध्वं षोडशदलं पद्मं यज्ञोपकल्पितम् ।
ज्योतिष्टोमोऽग्निष्टोमो वाजपेयश्च षोडशी ॥
चयनं पुण्डरीकं च राजसूयोऽश्वमेधकः ।
बार्हस्पत्यं विश्वजिच्च गोमेधो नरमेधकः ॥
सौत्रामण्यर्धसावित्री सूर्यकान्तोऽचलम्भिदः ।
एतादृशैः षोडशभिर्दलैः पद्मं प्रकल्पितम् ॥
तस्योपरि ततो ध्यायेच्छिवासनमनुत्तमम् ।
विन्दुनादयुतं नीलं शशाङ्ककृतलाञ्छनम् ॥
महार्घरत्नाभरणं त्रिनेत्रं भीमदर्शनम् ।
वज्रदंष्ट्रानखस्पर्शं पद्मपृष्ठे शिवोत्तमम् ॥

पिङ्गोग्रैकजटाभारं द्विभुजं नागहारिणम् ।
वसानं चर्म वैयाघ्रं शूलखट्वाङ्गधारिणम् ॥
अष्टपत्राम्बुजं तस्योपरिष्टान्नवमासनम् ।
धर्मो ज्ञानं च वैराग्यमैश्वर्यं च चतुर्दिशि ॥
यशो विवेकः कामश्च मोक्षश्चेति विदिग्दिशि ।
एवमष्टदलाम्भोजोपविष्टां गुह्यकालिकाम् ॥
ध्यायेन्नीलोत्पलश्यामामिन्द्रनीलसमद्युतिम् ।
घनाघनतनुद्योतां स्निग्धदूर्वादलद्युतिम् ॥
ज्ञानरश्मिच्छटाटोपज्योतिर्मण्डलमध्यगाम् ।
दशवक्त्रां गुह्यकालीं सप्तविंशतिलोचनाम् ॥
द्विद्विनेत्रयुतां वक्त्रे वामदक्षिणसंमुखे ।
सप्तस्वन्येषु वक्त्रेषु त्रित्रिलोचनसयुताम् ॥
ऊर्ध्ववक्त्रं द्वीपकाख्यं चण्डयोगेश्वरीति हि ।
तस्याधः केशरिमुखं श्वेतवर्णं विभीषणम् ॥
तस्याधः फेरुवक्त्रं च कृष्णं त्रैलोक्यडामरम् ।
वानरास्यं ततो वामे रक्तवर्णं महोज्ज्वलम् ॥
नरास्यं तदधो जेयं किर्मीराभं महोत्कटम् ।
ऋक्षवक्त्रं भवेद्दक्षे धूम्रवर्णं भयानकम् ॥
गारुडास्यं ततो वामे पिङ्गवर्णं सुचञ्चुकम् ।
दक्षिणे मकरास्यं च हरिताभं प्रकीर्त्तितम् ॥
गजास्यं वामतः प्रोक्तं गौरवक्त्रं स्रवन्मदम् ।
हयास्यं दक्षिणे काल्याः श्यामवर्णं विचिन्तयेत् ॥
महादंष्ट्राकरालानि दारुणस्वनवन्ति च ।
अट्टाट्टहासयुक्तानि स्रवद्रक्तानि सर्वदा ॥

लेलिहानविनिष्क्रान्तललज्जिह्वान्वितानि च ।
अहर्निशं कम्पमानान्यास्यानि दधतीं शिवाम् ॥
भीमनिर्ह्रादिनीं भीमां भ्रूभङ्गकुटिलाननाम् ।
पिङ्गलोर्ध्वजटाजूटां चन्द्रार्धकृतशेखराम् ॥
नानारत्नविनिर्माणसमुण्डस्वर्णभूषणाम् ।
स्रवद्रक्तनृमुण्डास्रक्कृतनक्षत्रमालिकाम् ॥
आकण्ठगुल्फलम्बिन्याऽलङ्कृतां मुण्डमालया ।
श्वेतास्थिगुलिकाहारग्रैवेयकमहोज्ज्वलाम् ॥
शवदीर्घाङ्गुलीपङ्क्तिमण्डितोरःस्थलस्थिराम् ।
कठोरपिङ्गलोत्तुङ्गवक्षोजयुगलान्विताम् ॥
महामारकतग्राववेदिश्रोणिपरिष्कृताम् ।
विशालजघनाभोगामतिक्षीणकटिस्थलाम् ॥
अन्त्रनद्धार्भकशिरोवलत्किङ्किणिमण्डिताम् ।
चतुष्पञ्चाशता दोष्णां भूषितां जगदम्बिकाम् ॥
रत्नमालां कपालं च चर्म पाशं तथैव च ।
शक्तिं खट्वाङ्गमुण्डं च भुशुण्डीं धनुरेव च ॥
चक्रं घण्टां ततो बालप्रेतं शैलमतः परम् ।
नरकं कालनकुलौ सर्पमुन्मादवंशिकाम् ॥
मुद्गरं वह्निकुण्डं च डमरुं डिण्डिमं तथा ।
भिन्दिपालं च मुशलं पाशं पट्टिशमेव च ॥
शतघ्नीं च शिवापोतं वामहस्तेषु बिभ्रतीम् ।
अथ दक्षभुजे रत्नमालां कर्त्रीमसिं तथा ॥
तर्जनीमङ्कुशं दण्डं रत्नकुम्भं त्रिशूलकम् ।
पञ्चपाशुपतान् बाणान् शोषकोन्मादमूर्छकान् ॥

संहारकान् मृत्युकरानेवं नामप्रधारिणः ।
कुन्तं च पारिजातं च छुरिकां तोमरं तथा ॥
पुष्पमालां डिण्डिभं च गृध्रं चैव कमण्डलुम् ।
मांसखण्डं श्रुवं बीजपूरं श्रुचं तथैव च ॥
परशुं च गदां यष्टीं मुष्टिं कुणपलालनम् ।
धारयन्तीं महारौध्रीं जगत्संहारकारिणीम् ॥
जवापुष्पाभनागेन्द्रकृतनूपरयुग्मकाम् ।
पाटलोरगनिर्माणलसदङ्गदशोभिताम् ॥
धूसराहिकृतस्फीतकटिसूत्रावलम्बिनीम् ।
सुपाण्डुरभुजङ्गेन्द्रकृतताटङ्कशोभिताम् ॥
श्वेतदर्वीकरानद्धजटामुकुटमण्डिताम् ।
वैयाघ्रचर्मवसनां द्वीपिचर्मोत्तरीयकाम् ॥
किङ्किणीजालशोभाढ्यां वीरघण्टानिवादिनीम् ।
नूपुरारावललितां घर्घराशब्दभीषणाम् ॥
कटकाङ्गदकेयूरनरास्थिकृतशोभनाम् ।
रक्तपद्ममयीं मालां पादपद्मावलम्बिनीम् ॥
काञ्चीकट्टारकप्रेङ्खत्कटिमध्यविराजिताम् ।
ब्रह्मसूत्रोज्ज्वलत्कण्ठयोगपट्टोत्तरीयकाम् ॥
सौम्योग्रभूषणैर्युक्तां नागाष्टकविराजिताम् ।
रत्नकुण्डलकर्णश्रीपञ्चकालानलस्थिताम् ॥
पद्मोपरिस्थितां देवीं नृत्यमानां सदोदिताम् ।
पद्मासनसुखासीनां सर्वदेवाधिदेवताम् ॥
मुक्तहुँकारजिह्वाग्रं चालयन्तीं विचिन्तयेत् ।
त्रिकोटिशक्तिचामुण्डानवकोटिभिरन्विताम् ॥

महायोगिनीकोटीनामष्टादशभिरूर्जिताम् ।
चरन्तीं च हसन्तीं च डाकिनीषष्टिकोटिभिः ॥
भैरव्यशीतिकोटीभिः परिवारैश्च वेष्टिताम् ।
कोटिकालानलज्वालान्यक्कारोद्यत्कलेवराम् ॥
महाप्रलयकोट्यर्कविद्युदर्वुदसन्निभाम् ।
दुर्निरीक्षां महाभीमां सेन्द्रैरपि सुरासुरैः ॥
शत्रुपक्षक्षयकरीं दैत्यदानवसूदिनीम् ।
निर्विकारां निराभासां कूटस्थां चिद्विलासिनीम् ॥
अद्वैतां परमानन्दां नित्यां शुद्धां निरञ्जनाम् ।
सृष्टिः स्थितिश्च संहारोऽनाख्या भासा पदाभिदाम् ॥
वेदान्तवेद्यां कैवल्यरूपां निर्वाणकारिणीम् ।
गुणातीतामात्मरूपप्रबोधातीतगोचराम् ॥
एवं ध्येया महाकाली प्रोद्भिन्ननवयौवना ।
पञ्चवक्त्रस्य मध्यस्थां गुह्यकाली परेश्वरी ॥

अथ पुरश्चरणं तत्रैव ।

पर्वते वा नदीकूले शून्यागारे शिवालये ।
पीठे चतुष्पथे कुर्यात् पुरश्चरणमुत्तमम् ॥
नियमास्तत्र भूयांसः प्रकर्त्तव्याः प्रयत्नतः ।
अवैधकरणात् सिद्धिहानिः स्यान्नात्र संशयः ॥
त्रिकालमाचरेत् स्नानं हविष्यं भक्षयेन्निशि ।
स्वमन्त्रं चाक्षसूत्रं च गुरोरपि न दर्शयेत् ॥
त्यजेद्दुष्टप्रवादं च परीवादं च वर्जयेत् ।
तथा दुर्जनसंसर्गान् स्त्रीशूद्रालापनं तथा ॥
वस्त्रं कुशासनं व्याघ्रचर्म चापि नृमुण्डकम् ।

आसनं च महादेवि प्रशस्तश्चोत्तरामुखः ॥
शुद्धस्फटिकरुद्राक्षनृमुण्डास्थिविनिर्मिताम् ।
जपमालां शुभां विद्धि प्रशस्तामुत्तरोत्तराम् ॥
अनेनोक्तविधानेन लक्षसङ्ख्यं जपेन्मनुम् ।
होमं दशांशतः कुर्यात् तर्पणं चाभिषेचनम् ॥
ततः सिद्धमनुर्मन्त्री प्रयोगानाचरेत् प्रिये ।

(महाथर्वणसंहितायाम्)

षोडशार्णा महाविद्या देवानामपि दुर्लभा ।
कोटिजन्मार्जितैः पुण्यैर्महद्भिर्भक्तिनोदितैः ॥
येन लब्धा कुलेशानि सद्गुरोर्मुखपङ्कजात् ।
स धन्यः सर्वलोकेषु पूज्यस्त्रिभुवनौकसाम् ॥
नातः परतरा विद्या त्रिषु लोकेषु विद्यते ।
अतः सर्वप्रयत्नेन विद्येयं षोडशाक्षरी ॥
जप्तव्या साधकश्रेष्ठैर्ध्यातव्या गुह्यकालिका ।
येनेयं साधिता विद्या स एव स्यात् सदाशिवः ॥

(महाकालसंहितायाम्)

दशवक्त्रा तु या प्रोक्ता गुह्यकाली मया तव ।
प्रकृतिः सा परिज्ञेया कालीनां जगदम्बिका ॥
अन्या विकृतयः प्रोक्ताः कार्यकारणभेदतः ।

तथा ।

सैव ज्ञेया वरारोहे निर्गुणब्रह्मरूपिणी ।
जगत् सर्वं वशे तस्या वश्या कस्यापि सा न च ॥
विश्वं सर्वं सृजति सा कोऽपि सृजति तां न हि ।
सा पालयति संसारं तां पालयति कोऽपि न ॥

तां न संहरते कोऽपि सा सर्वं संहरत्यदः ।
तदाज्ञयाऽनिलो वाति सूर्यस्तपति तद्भयात् ॥
तद्भीत्याऽग्निः पचत्यन्नं मृत्युश्चरति तद्भयात् ।

(महाथर्वणसंहितायाम्)

ब्रह्मा विष्णुश्च रुद्रश्च सेन्द्राश्चैव दिवौकसः ।
ऋषयश्च मरीच्याद्यास्तामेव समुपासते ॥

अथ कामकलाकालीमन्त्रः (महाकालसंहितायाम्)

श्रीदेव्युवाच ।

परात् पर परेशान शशाङ्ककृतशेखर ।
योगादियोगिन् सर्वज्ञ सर्वभूतदयापर ॥
त्वत्तः श्रुता मया मन्त्राः सर्वतन्त्रेषु गोपिताः ।
विधिवत् पूजनं चापि न्यासावरणकक्रमैः ॥
तारा च च्छिन्नमस्ता च तथा त्रिपुरसुन्दरी ।
बाला च बगला चापि त्रिपुरा भैरवी तथा ॥
काली दक्षिणकाली च कुब्जिका विवरेश्वरी ।
अघोरा राजमातङ्गी सिद्धिलक्ष्मीस्त्वरुन्धती ॥
अश्वारूढा भोगवती नित्यक्लिन्ना च कुक्कुटी ।
कौमारी चापि वाराही चामुण्डा चण्डिकाऽपि च ॥
भुवनेशी तथोच्छिष्टचाण्डाली चण्डघण्टिका ।
कालसंकर्षिणी चापि गुह्यकाली तथाऽपरा ॥
एताश्चान्याश्च वै देव्यः समन्त्राः कथितास्त्वया ।
किन्तु कामकलाकालीं नोक्तवानसि मे प्रभो ॥
तत् किं मय्यपि गोप्यं ते प्रायशः परमेश्वर ।
न हीदृशं त्रिलोकेषु तव किं चन विद्यते ॥

यदकथ्यं मयि भवेदपि प्राणाधिकाधिकम् ।
तत् किं गोपयसि प्राज्ञ मयीदं दैवतं महत् ॥
यद्यस्मि ते दयापात्रं मान्याऽस्मि स्नेहभाजनम् ।
अनुग्राह्याऽस्मि कान्ताऽस्मि तदेमां वद साम्प्रतम् ॥
देवीं कामकलाकालीं समन्त्रध्यानपूर्विकाम् ।

श्रीमहाकाल उवाच ।

धन्याऽस्यनुगृहीताऽसि तया देव्यैव सर्वथा ।
यत् ते बुद्धिः समुत्पन्ना तां देवीं प्रति भामिनि ॥
विधाय शपथं देवि कथयामि तवाग्रतः ।
न हीदृशं भुक्तिमुक्तिसाधनं भुवि विद्यते ॥
यथार्थमात्थ देवि त्वं गोप्यत्वं चापि सर्वथा ।
किन्तु भक्तिविशेषात् ते कथयामि न संशयः ॥
राज्यं दद्याद्धनं दद्यात् स्त्रियं दद्याच्छिरस्तथा ।
न तु कामकलाकालीं दद्यात् कस्यापि न क्व चित् ॥
इन्द्रेणोपासिता पूर्वं देवराज्यमभीप्सिता ।
वरुणेन कुवेरेण ब्रह्मणा च मया तथा ॥
रामेण रावणेनापि यमेनापि विवस्वता ।
चन्द्रेण विष्णुना चापि तथाऽन्यैश्च महर्षिभिः ॥
सहेलं वा सलीलं वा यस्याः स्मरणमात्रतः ।
विद्यालक्ष्मीः राज्यलक्ष्मीः कीर्त्तिलक्ष्मीर्वशे स्थिता ॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
राज्यार्थी लभते राज्यं कान्तार्थी कामिनीं शुभाम् ॥
यशोऽर्थी कीर्त्तिमाप्नोति मुक्त्यर्थी मुक्तिमाप्नुयात् ।
अणिमाद्यष्टसिद्ध्यर्थी सिद्ध्यष्टकमवाप्नुयात् ॥

तथा ।

द्विसप्ततितमं यावत् पुरुषाः पूर्वजाः स्थिताः ।
तेषां भाग्योदयैः पूर्णैर्विद्येयं यदि लभ्यते ॥
तदा सर्वस्वदानेन गृह्णीयादविचारयन् ।
कृतकृत्यं मन्यमानो गुरोः पादावभिस्पृशन् ॥

तथा ।

एकतः प्राणदानं स्यादेकतश्चैतदर्पणम् ।
तुलया विधृतं चेत् स्यादेतद्दानं विशिष्यते ॥

तथा ।

कोटिजन्मार्जितैः पुण्यैर्लभ्यते वा न लभ्यते ।
शपथं कुरु देवेशि प्रकाश्येयं न कुत्र चित् ॥
सत्यं सत्यं त्रिसत्यं मे ततो वक्ष्यामि पार्वति ।
नो चेत् तेऽपि न वक्ष्यामि प्रमाणं तत्र सैव मे ॥

देव्युवाच ।

शपे त्वच्चरणाब्जाभ्यां हिमाद्रिं शिरसा शपे ।
शपे स्कन्दैकदन्ताभ्यां यद्येनामन्यतो ब्रुवे ॥
शपेऽथ वा तया देव्या यां मे त्वं कथयिष्यसि ।
प्रकाशयामि यद्येनां सैव मे विमुखी भवेत् ॥

महाकाल उवाच ।

साधु साधु महाभागे प्रतीतिर्मेऽधुना त्वयि ।
अकार्षीः शपथं यस्मात् तस्माद्वक्ष्याम्यसंशयम् ॥
समाहिता सावधाना भव देवि वरानने ।
विधेहि चित्तमेकाग्रं बद्ध्वाऽञ्जलिपुटं प्रिये ॥
कालीं कामकलापूर्वां शृणुष्वावहिता मम ।

तथा ।

या गुह्यकाली सैवेयं काली कामकलाऽभिधा ।
मन्त्रभेदाद्ध्यानभेदाद्भवेत् कामकलात्मिका ॥
यथा त्रिभेदा तारा स्यात् सुन्दरी सप्तसप्ततिः ।
दक्षिणा पञ्चभेदा स्यात् तथेयं गुह्यकालिका ॥
सप्तधा ध्यानमन्त्राभ्यां जायते भिन्नरूपिणी ।
यथा पञ्चाक्षरो मन्त्रो देवी चैकजटा स्मृता ॥
द्वाविंशत्यक्षरो मन्त्रो देवी दक्षिणकालिका ।
तथाऽन्येष्वपि देवेषु मुख्यासु बहुषु प्रिये ॥
देवी कामकलाकाली मनुरष्टादशाक्षरः ।
षोडशार्णा यथा मुख्या सर्वश्रीचक्रमध्यगा ॥
तथेयं नवकालीषु सदा मुख्यतमा स्मृता ।
त्रैलोक्याकर्षणो नाम मन्त्रोऽस्याः परिकीर्त्तितः ॥
तस्योद्धारं प्रवक्ष्यामि शृणु यत्नेन पार्वति ।
श्रुत्वाऽवधारयस्वेमां सर्वकल्याणहेतवे ॥

मन्त्रोद्धारमाह ।

आद्यवर्गाद्यवर्णोऽक्ष्णा वामेन परिशीलितः ।
मूर्ध्नि मूर्ध्ना यतृतीययुगधः परिकर्त्तितः ॥
विन्दुवामाक्षिसंयुक्तो वह्निः खपरमस्तकः ।
वामश्रुत्यर्धचन्द्रेण तृतीयः सपरो भवेत् ॥
दक्षस्कन्धोर्ध्वदन्ताभ्यां चाक्षरो विन्दुमस्तकः ।
ओष्ठवर्गद्वितीयो हपूर्वाधरोष्ठविन्दुयुक् ॥
षडक्षराणि सम्बोध्य यथानामस्थितिक्रमात् ।
प्रतिलोमेन चोद्धृत्य तानि बीजानि पञ्च वै ॥

भूतबीजाद्यमारभ्य मारबीजान्तमेव हि ।
वैश्वानरवधूयुक्तो मन्त्रो ह्यष्टादशाक्षरः ॥
अस्याः स्मरणमात्रेण यावन्त्यः सन्ति सिद्धयः ।
स्वयमायान्ति पुरतो जपादीनां च का कथा ॥
सप्त कामकलाकाल्या मनवः सन्ति गोपिताः ।
तेषु सर्वेषु मन्त्रेषु मुख्योऽयं परिकोर्त्तितः ॥
स्मरणादस्य मन्त्रस्य मूर्च्छिताः सर्वदेवताः ।
स्तम्भिता वेपमानाश्च उत्तिष्ठन्त्यतिविह्वलाः ॥
निदेशवर्त्तिनो भूत्वा वर्त्तन्ते चेटका इव ।
किं बहूक्तेन देवेशि सत्यपूर्वं ब्रवीम्यहम् ॥
सहस्रवदनेनापि लक्षकोट्याननेन वा ।
महिमा वर्णितुं शक्यो नास्य वर्षायुतैर्मया ॥
सामान्यतो विजानीहि यद्यदिच्छति साधकः ।
तत् तत् करोति सकलं प्रजापतिरिवापरः ॥
त्रैलोक्याकर्षको नाम मन्त्रः सर्वार्थसाधकः ।

ऋष्यादिन्यासमाह ।

अतः परं प्रवक्ष्यामि छन्दश्चर्षिं च बीजकम् ।
अस्य कामकलाकालीमन्त्रस्याहमृषिर्मतः ॥
छन्दश्च बृहतीख्यातं देवी चेयं प्रकीर्त्तिता ।
आद्यबीजं तु बीजं स्यात् क्रोधार्णं शक्तिरेव च ॥
विनियोगोऽस्य सर्वस्य सर्वदा सर्वसिद्धये ।
षडङ्गं पञ्चबीजैस्तैर्नाम्नाऽप्येकं च कारयेत् ॥
नामाक्षराणि प्रत्येकं तत्र देयानि पार्वति ।

अथ ध्यानम् ।

ध्यानमस्याः प्रवक्ष्यामि कुरु चित्तैकतानताम् ।
उद्यद्घनाघनाश्लिष्यज्जपाकुसुमसन्निभाम् ॥
मत्तकोकिलनेत्राभां पक्वजम्बूफलप्रभाम् ।
सुदीर्घप्रबलालम्बिविस्रस्तघनमूर्धजाम् ॥
ज्वलदङ्गारवच्छोणनेत्रत्रितयभूषिताम् ।
उद्यच्छारदसंपूर्णचन्द्रकोकनदाननाम् ॥
दीर्घदंष्ट्रायुगोदञ्चद्विकरालमुखाम्बुजाम् ।
वितस्तिमात्रनिष्क्रान्तललज्जिह्वाभयानकाम् ॥
व्यात्ताननतया दृश्यद्द्वात्रिंशद्दन्तमण्डलाम् ।
निरन्तरं वेपमानोत्तमाङ्गां घोररूपिणीम् ॥
अंसासक्तनृमुण्डासृक्पिवन्तीं वक्त्रकन्दरात् ।
सृक्कद्वन्द्वस्रवद्रक्तस्नापितोरोजयुग्मकाम् ॥
उरोजाम्भोजसंसक्तसम्पतद्रुधिरोच्चयाम् ।
सशीत्कृतिं धयन्तीं तल्लेलिहानरसज्ञया ॥
ललाटे घननारासृग्विहितारुणचित्रकाम् ।
सद्यश्छिन्नगलद्रक्तनृमुण्डकृतकुण्डलाम् ॥
श्रुतिनद्धकचालम्बिवतंसलसदंसकाम् ।
स्रवदस्रौघया शश्वन्मानव्या मुण्डमालया ॥
आकण्ठगुल्फलम्बिन्याऽलङ्कृतां केशबद्धया ।
श्वेतास्थिगुलिकाहारग्रैवेयकमहोज्ज्वलाम् ॥
शवदीर्घाङ्गुलिपङ्क्तिमण्डितोरःस्थलस्थिराम् ।
कठोरपीवरोत्तुङ्गवक्षोजयुगलान्विताम् ॥
महामारकतग्राववेदिश्रोणिपरिष्कृताम् ।

विशालजघनाभोगामतिक्षीणकटिस्थलाम् ॥
अन्त्रनद्धार्भकशिरोवलत्किङ्किणीमण्डिताम् ।
सुपीनषोडशभुजां महाशङ्खाश्वदङ्गदाम् ॥
शवानां धमनीपुञ्जैर्वेष्टितैः कृतकङ्कणाम् ।
ग्रथितैः शवकेशैः स्रग्दामभिः कटिसूत्रिणीम् ॥
शवपोतकरश्रेणीग्रथनैः कृतमेखलाम् ।
शोभमानाङ्गुलीमांसमेदोमज्जाङ्गुलीयकैः ॥
असिं त्रिशूलं चक्रं च शरमङ्कुशमेव च ।
ललानं च तथा कर्त्रीमक्षमालां च दक्षिणे ॥
पाशं च परशुं नागं चापं मुद्गरमेव च ।
शिवापोतं खर्परं च वसासृङ्मेदसाऽन्वितम् ॥
लम्बत्कच्चं नृमुण्डं च धारयन्तीं स्ववामतः ।
विलसन्नूपुरां देवीं ग्रथितैः शवपञ्जरैः ॥
श्मशानप्रज्वलद्घोरचिताग्निज्वालमध्यगाम् ।
अधोमुखमहादीर्घप्रसुप्तशवपृष्ठगाम् ॥
वमन्मुखानलज्वालाजालव्याप्तदिगन्तराम् ।
प्रोत्थायैव हि तिष्ठन्तीं प्रत्यालीढपदक्रमात् ॥
वामदक्षिणसंस्थाभ्यां नदन्तीभ्यां मुहुर्मुहुः ।
शिवाभ्यां घोररूपाभ्यां वमन्तीभ्यां महानलम् ॥
विद्युदङ्गारवर्णाभ्यां वेष्टितां परमेश्वरीम् ।
सर्वदेवानुलग्नाभ्यां पश्यन्तीभ्यां महेश्वरीम् ॥
अतीव भीषमाणाभ्यां शिवाभ्यां शोभितां मुहुः ।
कपालसंस्थं मस्तिष्कं ददतीं च तयोर्द्वयोः ॥
दिगम्बरां मुक्तकेशीमट्टहासभयानकाम् ।

सप्तधा बद्धनाराचयोगपट्टविभूषिताम् ॥
संहारभैरवेणैव सार्धं संभोगमिच्छतीम् ।
अतिकामातुरां कालीं हसन्तीं खर्वविग्रहाम् ॥
कोटिकालानलज्वालान्यक्कारोद्यत्कलेवराम् ।
महाप्रलयकोट्यर्कविद्युदर्वुदसन्निभाम् ॥
कल्पान्तकारिणीं कालीं महाभैरवरूपिणीम् ।
महाभीमां दुर्निरीक्षां सेन्द्रैरपि सुरासुरैः ॥
शत्रुपक्षक्षयकरीं दैत्यदानवसूदनीम् ।
चिन्तयेदीदृशीं देवीं कालीं कामकलाभिधाम् ॥

अथ पुरश्चरणं तत्रैव ।

अतः परं प्रवक्ष्यामि पौरश्चरणिकं विधिम् ।
एकस्मिन् पत्रविहिते सिद्धिस्तात्कालिकी भवेत् ॥
भूमिशुद्धिर्द्रव्यशुद्धिः पूर्वैव कथिता मया ।
यमाश्च नियमा ये स्युः पुरश्चरणकर्मणि ॥
सर्वानेव प्रयुञ्जीत सततं भक्तितत्परः ।
कृतनित्यक्रियः प्रातः कृतपूजाविधिः शुचिः ॥
नरास्थि निखनेद्भूमावस्त्रमन्त्रमुदीरयन् ।
तारं क्रोधोऽनु ह्रीँ पाशस्मरभूतान् समुद्धरेत् ॥
सिद्धिमुच्चार्य देहीति युग्मं वह्न्यङ्गनां वदेत् ।

भूतबीजं फ्रोमिति ।

तथा ।

तदुपर्येव चास्तीर्य स्वासनं सुष्ठु कल्पितम् ।
नृमुण्डमग्रतः कृत्वा नरास्थिजपमालया ॥
लक्षमेकं जपेन्मन्त्रं हविष्याशी दिवा शुचिः ।

अशुचिश्च तथा रात्रौ लक्षमेकं तथैव च ॥
दशांशं होमयेन्मन्त्री तर्पयेदभिषेचयेत् ।
होमे सन्तर्पणे चैव पूजावत् कथितो विधिः ॥
पूजायां वा प्रयोगे वा होमे वा तर्पणेऽथ वा ।
गुह्यकालीविधानेन सर्वं कार्यं शुचिस्मिते ॥
अत्रानुक्तं विधानं यत् तत्रत्यं तत् प्रकल्पयेत् ।
तत्राप्यनुक्तं यत् किञ्चित् तत्रोक्तो दक्षिणाविधिः ॥

इति प्रथममहाविद्याप्रकरणम् ।

अथ द्वितीयविद्यायाः (फेत्कारिणीतन्त्रे)

कैलाशशिखरासीनं चन्द्रखण्डविराजितम् ।
वक्षःस्थले समासीना पृच्छति स्म नगात्मजा ॥
कथमीशान सार्वज्ञ मलभँस्ते तपोधनाः ।
कां विद्यां प्राप्य कवयो भारतादि प्रचक्रिरे ॥
श्रुत्वा नगात्मजावाक्यं विहस्य परमेश्वरः ।
प्राह प्रियां परिष्वज्य साधु साध्विति पूजयन् ॥
शृणु साध्वि महाविद्यामज्ञानेन्धनदाहिनीम् ।
यामवाप्य महात्मानो धर्मकामार्थमुक्तिषु ॥
नासाध्यं मेनिरे किञ्चित् कवयः शुद्धबुद्धयः ।
वादे सदसि या वाचः स्तम्भिनी प्रतिवादिनाम् ॥
विद्याहानिकरी देवि विदुषां वलिदानतः ।
हास्याय या सदस्यानामशुद्धमपि जल्पयेत् ॥
वादिनं चापि राजानं मन्त्रिणं वशमानयेत् ।

जल्पयेद्वादिनमित्यन्वयः ।

मन्त्रस्य ज्ञानमात्रेण जपात् सर्वज्ञतां नयेत् ॥

मन्त्रोद्धारणमाह ।

सपरं प्रथमं दत्वा चतुर्थस्वरभूषितम् ।
रेफारूढं स्फुरद्दीप्तमिन्दुविन्दुसमन्वितम् ॥
त्रकारं च ततो दद्याच्चतुर्थेनैव भूषितम् ।
दीर्घौकारसमायुक्तं हकारं योजयेत् ततः ॥
फट्कारं च ततो दद्यात् संपूर्णः सिद्धमन्त्रतः ।

सपरो हकारः । शेषं स्पष्टम् ।

(मत्स्यसूक्ते)

अथ वक्ष्ये महादेव्या मन्त्रोद्धारमनुत्तमम् ।
यच्च ज्ञात्वा नरो भाति वाचस्पतिरिवापरः ॥
मायाबीजं समुद्धृत्य तवर्गप्रथमं तथा ।
रतिविन्दुवह्नियुतं द्वितीयं बीजमुत्तमम् ॥
कूर्चबीजं तृतीयं तु फट्कारस्तदनन्तरम् ।
सम्पूर्णसिद्धमन्त्रस्तु रश्मिपञ्चकसंयुतः ॥

पञ्चरश्मिः प्रणवः ।

तदुक्तं (तारार्णवे)

अनन्तरं समुद्धृत्य मायोत्तरमनुं ततः ।
पपञ्चमः समायुक्तं पञ्चरश्मिः प्रकीर्त्तितः ॥

अनुत्तरमकारः । मायोत्तरमुकारः । पपञ्चमो मकारः ।

(तन्त्रबोधे)

तारं लज्जां त्रकामेशीं हुँ फडित्युग्रतारिका ।
माया त्रीँ हूमथास्त्रान्तमित्येकजटयाऽर्च्चयेत् ॥
अस्त्रहीनमिदं नीलसरस्वत्या विनिर्दिशेत् ।

कामेशी ईकारः ।

त्र्यक्षरोऽसौ महामन्त्रः फट्कारान्तौ हृदि स्थितः ।
पञ्चरश्मिसमायुक्तोऽथाज्ञानेन्धनदाहकः ॥

(मात्स्यसूक्ते)

लज्जाबीजं वधूबीजं कूर्चबीजं तथा हि फट्।
एवं पञ्चाक्षरी विद्या पञ्चभूतप्रकाशिनी॥

तथा।

ताराङ्गरहिता त्र्यर्णा महानीलसरस्वती।
कुल्लुकेति समाख्याता त्रिषु लोकेषु गोपिता॥

(तारार्णवे)

वशिष्ठाराधिता चोग्रा न शीघ्रफलदा यतः।
अतस्तेनैव मुनिना शापो दत्तः सुदारुणः॥
ततः प्रभृति विद्येयं फलदात्री न कस्य चित्।
शक्तिबीजं त्रपान्तस्थबीजोपरि नियोजितम्॥
ततः प्रभृति विद्येयं वधूरिव यशस्विनी।
फलिनी सर्वविद्यानां जयिनी जयकाङ्क्षिणाम्॥
विषक्षयकरी विद्या अमृतत्वप्रदायिनी।
मन्त्रस्य ज्ञानमात्रेण विजयी भुवि जायते॥
मूको भवति वागीशो गीष्पतिर्जायते नरः।

शक्तिबीजमिति। शक्तिबीजं सकारः। त्रपान्तस्थबीजं त्रोङ्कारः। तेन स्त्रीमिति वधूबीजं भवति। शापस्तु कृष्णावतारपर्यन्तमेव।

जाते कृष्णावतारे तु पुनः शापात् प्रमुच्यते।

इति तन्त्रान्तरवचनात्।

मन्त्रार्थमाह (साधनसमुच्चये)

प्रणवाद्ब्रह्मरूपा सा सोऽहं तत्त्वस्वरूपिणी।
व्योम्ना प्रकाशमानत्वं ग्रसमानत्वमग्निना॥
तयोर्विसर्ग ईकारो बिन्दुना तान्त्रिकी मता।
तकारः सर्वपापघ्नो रेफस्तत्त्वप्रकाशकः॥

विन्दुमाली महाबीजं शब्दब्रह्मप्रकाशकम् ।
कूर्चं प्रबोधरूपं स्यादस्त्रं जाड्यविनाशकम् ॥
एवं यो वेत्ति शुद्धात्मा स तु साक्षान्महेश्वरः ।

(मत्स्यसूक्ते)

श्रीबीजाद्या यदा विद्या तदा श्रीः सर्वतो मुखी ।
एषैव हि महाविद्या मायाद्या सकलेष्टदा ॥
वाग्भवाद्या महावाक्यस्वरूपा सर्ववाङ्मयी ।

तथा ।

गुटिकासिद्धिवेतालपातालवटयक्षिणी ।
परपुरप्रवेशश्च आज्ञासिद्धिः प्रजायते ॥
जिह्वायां चिन्तनादेव त्रिकालज्ञो भवेद्ध्रुवम् ।
यस्तु विद्यामभेदेन चिन्तयेत् साधकोत्तमः ॥
जीवन्मुक्तो विमुक्तश्च अन्ते सोऽपि भवेद्ध्रुवम् ।

(ब्रह्मसंहितायां फेत्कारिण्यां) च ।

क्षिप्रप्रसादाज्जगतां सदा नीलसरस्वती ।
विशेषतः कलियुगे मत्प्रसादाद्भविष्यति ॥
सिद्धमन्त्रो यदा मन्त्री बालिशस्यापि मूर्धनि ।
करं दत्वा दिशत्याशु सोऽपि श्लोकान् पठेत् पुनः ॥

दिशति श्लोकं कुर्वित्याज्ञापयति ।

तथा ।

मन्त्रस्य ज्ञानमात्रेण अनुभावद्वयं भवेत् ।
तात्कालिकी च कविता परैरनविभाव्यता ॥

अथ ऋष्यादिन्यासः (मेरुतन्त्रे)

मुनिरक्षोभ्यसंज्ञोऽस्या बृहतीछन्द ईरितम् ।
तारादेवी ह्रीँ च बीजं हूँ शक्तिश्चास्य कीर्त्तिता ॥

(मन्त्रचूडामणौ)

अक्षोभ्य ऋषिरेतस्या बृहतीछन्द ईरितम् ।
नीलसरस्वती देवी त्रिषु लोकेषु गोपिता ॥
हूँ बीजमस्त्रं शक्तिः स्याच्चतुर्वर्गफलप्रदा ।

दामोदरमिश्रकृतसंग्रहे ।

अक्षोभ्य ऋषिरेतस्या बृहतीच्छन्द ईरितम् ।
नीलसरस्वती देवी त्रिषु लोकेषु गोपिता ॥
हूँ बीजमन्त्रः शक्तिः स्यान्माया स्त्रीँ कीलकं स्मृतम् ।
विनियोगो भवेद्देवि चतुर्वर्गफलाप्तये ।

उग्रतारा देवतेति (मन्त्रचूडामणौ)

अथ कराङ्गन्यासौ । तत्रादौ उग्रतारायाः (ताराकल्पे)

षड्दीर्घमायाबीजेन षडङ्गविधिरीरितः ॥

नीलसरस्वत्यास्तु (सिद्धसारस्वते)

अखिलवाग्रूपिणीं प्रोच्य हृदाय नमो वदेत् ।
अखण्डवाग्रूपिणीं च शिरसे वह्निवल्लभा ॥
ब्रह्मवाग्रूपिणीमुक्त्वा शिखायै वषडित्यपि ।
विष्णुवाग्रूपिणीमुक्त्वा कवचाय हुमुच्चरेत् ॥
रुद्रवाग्रूपिणीं नेत्रत्रयाय वौषडित्यपि ।
सर्ववाग्रूपिणीमुक्त्वा अस्त्राय फडिति स्मरेत् ॥
षड्दीर्घमायया बीजं बीजान्ते तानि योजयेत् ।

एकजटायाः (तन्त्रचूडामणौ)

बीजान्ते एकजटायै हृदयं परिकीर्त्तितम् ।
तारिण्यै शिरसे तद्वद्वज्रोदके शिखां तथा ॥
उग्रजटे च कवचं महापरिसरे तथा ।

पिङ्गोग्रैकजटे तद्वन्नेत्रास्त्रे परिकीर्त्तिते ॥

न्ये। सोऽयमुग्रतारैकजटयोर्विरुद्ध इति साम्प्रदायिकः ।

अथ ध्यानम् (गन्धर्वतन्त्रे)

श्मशानं तत्र संचिन्त्य तत्र कल्पद्रुमं स्मरेत् ।
तन्मूले मणिपीठं च नानामणिविभूषितम् ॥
शिवाभिर्बहुमांसास्थिमोदमानाभिरन्ततः ।
चतुर्दिक्षु शवामुण्डाश्रिताङ्गारास्थिभूषिताः ॥
तन्मध्ये भावयेद्देवीं यथोक्तध्यानयोगतः ।

(नीलतन्त्रे)

प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम् ।
खर्वां लम्बोदरीं भीमां व्याघ्रचर्मवृतां कटौ ॥
नवयौवनसंपन्नां पञ्चमुद्राविभूषिताम् ।
चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम् ॥
खड्गकर्त्रीधरां सव्ये वामे मुण्डोत्पलान्विताम् ।
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषिताम् ॥
बालार्कमण्डलाकारलोचनत्रयभूषिताम् ।
प्रज्वलत्पितृभूमध्यगतां दंष्ट्राकरालिनीम् ॥
सावेशस्मेरवदनामस्थ्यालङ्कारभूषिताम् ।
विश्वव्यापकतोयान्तः श्वेतपद्मोपरिस्थिताम् ॥

(श्यामारहस्यादौ)

खड्गकर्त्रीसमायुक्तसव्येतरभुजद्वयाम् ।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम्—इति पाठः ॥

(तन्त्रान्तरे)

खड्गकर्त्रीधरां देवीं कपालोत्पलधारिणीम्—इति पाठः ।

(मन्त्रचूडामणौ)

तस्योपरिगृहे देवीं खर्वां नीलमणिप्रभाम् ।
लम्बोदरीं व्याघ्रचर्मसमावृतनितम्बिनीम् ॥
पीनोन्नतपयोभारां रक्तवर्त्तुललोचनाम् ।
ललज्जिह्वां महाभीमां दंष्ट्राकोटिसमुज्ज्वलाम् ॥
नीलोत्पललसन्मालां बद्धजूटां भयङ्करीम् ।
श्वेतास्थिपट्टिकायुक्तकपालपञ्चशोभिताम् ॥
ललाटे रक्तनागेन कृतकर्णावतंसकाम् ।
अतिशुभ्रमहानागकृतहारमहोज्ज्वलाम् ॥
दूर्वादलश्यामनागकृतयज्ञोपवीतिनीम् ।
चतुर्भुजां रक्तमांसखण्डमण्डितमुष्टिना ॥
जटाजूटाक्षसूत्रेण शोभितां तीक्ष्णधारया ।
खड्गेन दक्षिणस्योर्ध्वे शोभितां वीरनादिनीम् ॥
तदधःस्थाद्बीजवृन्तकर्णिकालङ्कृतां पराम् ।
वामोर्ध्वे रक्तनालेन दिगम्बरमनोहराम् ॥
दधतीं नीलपद्मं च तदधःस्थात् कपालकम् ।
जगतां जाड्यसंयुक्तं दधतीं कुन्दसन्निभम् ॥
धूम्राभनागसंदोहकृतकेयूरसत्वराम् ।
सुवर्णवर्णनागेन कङ्कणोज्ज्वलपाणिकाम् ॥
शुभ्रवर्णमहादेवकृतसद्विमलासनम् ।
निर्यद्व्रणभिया तद्वत् संकुचत्प्रपदात्मिकाम् ॥
शवपादद्वयारूढवामपादां महोन्मुखीम् ।
कुन्दाभनागसंशोभिकटिसूत्रां त्रिलोचनाम् ॥
अस्थ्यक्तेन नागेन कृतनूपुरपल्लवाम् ।

सद्यश्छिन्नगलतद्रक्तमुण्डै रक्तविभूषणैः ॥
अन्योन्यकेशग्रथितैः पादपद्मविलम्बितैः ।
पञ्चाशद्भिर्महामालाशोभितां परमेश्वरीम् ॥
ज्वलच्चितामध्यसंस्थां द्वीपिचर्मोत्तरांशुकाम् ।
अक्षोभ्यनागसम्बद्धजटाजूटां वरप्रदाम् ॥
एवम्भूतां महादेवीमात्मानं यागवस्तु च ।
विज्ञापयेन्महादेवपण्डितोऽहं महाकविः ॥

(तारोपनिषदि)

विरुद्धवाक्यार्थशरीरमण्डले
नवाम्बुदाभां गुरुमुन्नतोदरीम् ।
अतीव खर्वां नवयौवनस्था-
मधःस्थशार्दूलकृत्तिमूर्धजाम् ॥
अनैक्यमाहत्य शवोपरिस्थितां
शवार्धमालीढपरीतमध्यमाम् ।
विशीर्णवर्णां नृशिरःस्रजोद्भवां
त्रयीविवर्त्तारुणलोचनत्रयाम् ॥
अभेदपिङ्गैकजटाविराजितां
विभूषणाच्छिन्नसितास्थिभीषणाम् ।
महाष्टसिद्धिप्रकराहिभूषणा-
मट्टाट्टहासैर्जगतामभीतिदाम् ॥
जटास्वनन्तः श्रवसोश्च तक्षको
महाहिपद्मो हृदि हारभूषणाम् ।
तथैव कर्कोटकृतोपवीतिकां
सुमेखलायामथ देववासुकिः ॥

सशङ्खपालः किलकङ्कणो मतः
पदेषु पद्मः किलनूपुरश्रियम् ।
भुजेषु नागः कुलिकोऽङ्गदो मतो
भुजोऽर्धमालामहता स्थितिः स्थिता ॥
सितश्च रक्तो धवलश्च मेचक-
स्तथैव नागोऽथ सितश्च पाण्डरः ।
भुजङ्गमानामिह वर्णजातयो
भवन्ति सर्वे मुनिभिर्ज्वलच्चिताम् ॥
कपालकर्त्रीग्रथितोग्रमूर्धजां
सनालमिन्दीवरकान्तिमालाम् ।
विकोषखड्गं सततं च दक्षिणे
स्वपौरुषोत्थैर्दधतीं भुजैः सदा ॥
पदार्थदंष्ट्राद्वयपञ्चमुद्रया
विराजमानामसितोत्पलस्रजम् ।
विचिन्तयेत् तां च कवित्वकारिणी-
मन्यागतार्थं प्रजपेच्च तारिणीम् ॥

(फेत्कारिणीतन्त्रेऽपि)

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासा वरा
खड्गेन्दीवरकर्तृखर्परभुजा हूँकारबीजोद्भवा ।
खर्वा नीलविशालपिङ्गलजटाजूटोग्रनागैर्वृता
जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा स्वयम् ॥

प्रत्यालीढलक्षणं तु (संगीतरत्नाकरे)

वामो यत्र निषण्णोरुरन्तरे पूर्वमानतः ।
दक्षिणं चरणं चाग्रे पञ्चतालप्रसारितम् ॥

अस्त्रौ द्वावपि तद्विन्द्यादालीढं तु सदैवतम् ।
आलाढाङ्गविपर्यासात् प्रत्यालीढमुदाहृतम् ॥

तालं वितस्तिः । अस्त्रौ चक्रौ । मौलावक्षोभ्यभूषितामिति । अत्राक्षोभ्यो नागरूपः । अक्षोभ्यो देवीमूर्धन्यस्त्विमूर्त्तिर्नागरूपधृगिति (भावचूडामणि-) वचनात् ।

अथ पुरश्चरणविधिः । तत्रादौ मन्त्रध्यानमुक्तं (साधनसमुच्चये)

मूलच्चक्रे च हृल्लेखां सूर्यकोटिसमप्रभाम् ।
स्वाधिष्ठाने पीतवर्णं द्वितीयं च विभावयेत् ॥
नाभौ जीमूतसंकाशं कूर्चबीजं महाप्रभम् ।
अस्त्रबीजं हृदि ध्यायेत् कालाग्निसदृशप्रभम् ॥
मूलादिब्रह्मरन्ध्रान्तं सर्वां विद्यां विभावयेत् ।
सूर्यकोटिप्रतीकाशां योगिनां दृष्टिगोचराम् ॥

तदुक्तं (तारातन्त्रे)

स्वेच्छाच्चारपरो मन्त्री पुरश्चरणसिद्धये ।
रहस्यमालामादाय लक्षमेकं जपेत् सदा ॥

(सुरेन्द्रसंहितायाम्)

लक्षमात्रं जपेन्मन्त्रं दशांशमसितोत्पलैः ।
आज्याक्तैर्जुहुयान्मन्त्री तद्दशांशेन तर्पयेत् ॥
कालागुरुद्रवोपेतैर्विमलैर्गन्धवारिभिः ।
तर्पयेच्च परां देवीं तत्प्रकारमिहोच्यते ॥
जले चावाह्य विधिवत् पाद्याद्यैरुपचारकैः ।
संतर्प्य विधिवद्देवीं परिवारान् सकृत् सकृत् ॥
देवीबुद्ध्या स्वमात्मानं संपूज्य साधकोत्तमः ।
तारिणीं सिञ्चयामीति जलं मूर्ध्नि विनिःक्षिपेत् ॥
कुम्भाख्यमुद्रया देवि नमोऽन्तेनाभिषेचनम् ।

(वीरचूडामणौ)

चतुर्लक्षं जपेन्मन्त्रं दशांशं जुहुयात् सुधीः ।
पद्मैस्त्रिमधुरोपेतैर्वाक्पतिर्जायते नरः ॥

(तारार्णवे)

एवं ध्यात्वा हविष्याशी जपेल्लक्षचतुष्टयम् ।
रहस्यमालामादाय जपेद्वा लक्षमेव च ॥

(मेरुतन्त्रे)

रतं कुर्वन्नदन् भक्ष्यमनेकं दधि मध्वपि ।
मधु मांसं च ताम्बूलं जपेल्लक्षचतुष्टयम् ॥
दशांशं जुहुयाद्रक्तपद्मैः क्षीराज्यलोलितैः ।
शवमुण्डं पूरयित्वा जपस्थाने जपं चरेत् ॥
नारीं पश्यन् स्पृशन् गच्छन् महानिशि बलिं हरेत् ।
न कार्यः सुभ्रुवां द्वेषो यत्नतः परिपूजयेत् ॥
जपे न कालनियमो न स्थितौ सर्वदा जपेत् ।
श्मशाने शून्यसदने देवागारेऽथ निर्जने ॥
पर्वते वनमध्ये वा शवमारुह्य मन्त्रवित् ।
समरे शत्रुनिहतं यद्वा षाण्मासिकं शिशुम् ॥
विद्यां संसाधयेच्छीघ्रं साधितैवं प्रसिध्यति ।
एवं सिद्धमनुर्मन्त्री प्रयोगान् कर्त्तुमर्हति ॥

अथैतद्विद्याभेदास्तत्रैव ।

अथातः संप्रवक्ष्यामि दैत्यानां वरसिद्धये ।
ब्रह्मणोपासितां तारां वल्यादिभिरूपासितम् ॥
ॐ त्रीँ ह्रीँ हूँ समुच्चार्य ह्रीँ हुँ फड्नगवर्णकः ।
मुनिर्ब्रह्मा च गायत्री छन्दस्तारा च देवता ॥
न्यासाँस्तु पूर्ववत् कुर्याद्ध्यानमस्या निरूप्यते ।

श्वेताम्बरां चन्द्रकान्तिं चन्द्रर्धकृतशेखराम् ॥
कर्त्तरीं च कपालं च कराभ्यां दधतीं भजेत् ।
नानालङ्कारशोभाढ्यां त्रीक्षणां पद्मसंस्थिताम् ॥
जपपूजादिकं सर्वमस्याः पूर्ववदाचरेत् ।
मधुयुक्परमान्नेन होमाद्विद्यानिधिर्भवेत् ॥
रक्तां वश्ये स्वर्णवर्णां स्तम्भने मारणेऽसिताम् ।
उच्चाटने धूम्रवर्णां शान्तौ श्वेतां स्मरेदिमाम् ॥
अथातः संप्रवक्ष्यामि तारकस्य वराय तु ।
ब्रह्मणोपासितां तारां द्वादशार्णां सुदुर्लभाम् ॥
वाचं लज्जां रमां कामं हसरा औसमन्विताः ।
विसर्गाढ्याः पञ्चमं तु कूटमेतदुदीरितम् ॥
हुँ उग्रतारे हुँ फट् मन्त्रः प्रोक्तो जपादिकम् ।
सर्वं पूर्ववदेवास्य कलौ प्रत्ययकारिणी ॥
अथातः संप्रवक्ष्यमि ब्रह्मणा समुपासिताम् ।
हिरण्यकसिपोर्दातुं वरं सप्तार्णसंमिताम् ॥
प्रणवं कवचं मायां क्लीँ प्राक् कूटं च पञ्चमम् ।
हुँ फडन्तः सर्वमस्या न्यासाद्यं पूर्ववद्भवेत् ॥
अथातः संप्रवक्ष्यामि हरिणा या ह्युपासिता ।
बौद्धमार्गप्रचारार्थं सिद्धिदा द्वादशाक्षरी ॥
उपासिता ब्रह्मणा या तस्याः कूटे तु पञ्चमे ।
सौस्त्यक्त्वा साधिता विद्या द्वादशार्णाऽतिबुद्धिदा ॥
यत्प्रभावाद्दिवो दासः काश्या उच्चाटितः पुरा ।
तस्यास्तु पूर्ववज्ज्ञेयं न्यासध्यानजपादिकम् ॥
अथातः संप्रवक्ष्यामि सप्तार्णां रामसेविताम् ।

लक्ष्मीप्रभृति नाशार्थं तेन मत्तः सदा हली ॥
ब्रह्मोपासितसप्तार्णा मध्ये कूटं तु पञ्चमम् ।
तत् त्यक्त्वा सौँ स्तत्र चोक्त्वा बलरामेण सेविता ॥
शत्रुक्षयकरी चेयं तथा वाक्सिद्धिकारिणी ।
ध्यानपूजादिकं प्राग्वत् प्रयोगादिकमेव च ॥
अथातः संप्रवक्ष्यामि नारायणसुसेविता ।
पञ्चार्णा यत्प्रभावेण दैत्यानां कदनं कृतम् ॥
स्त्रीँ हुँ फट् क्लीँ वाग्भवं च पञ्चार्णा सर्वसिद्धिदा ।
असां त्रयाणां तु मुनिर्विष्णुः प्राग्वज्जपादिकम् ॥
अथातः संप्रवक्ष्यामि मया या समुपासिता ।
दत्ता च रविणाऽदित्यै सा विद्या तु षडक्षरी ॥
ॐ ह्रीँ हूँ ह्रीँ हुँ फडिति मुनिः सोऽहं च पूर्ववत् ।
ज्ञेयं न्यासादिकं सर्वं प्रयोगादि च पूर्ववत् ॥
अथान्यं संप्रक्ष्यामि चास्याः पञ्चाक्षरं मनुम् ।
जलन्धरवधार्थं तु मया सिद्धं कृतं सुराः ॥
स्त्रीँ हुँ मायां हुँ फडिति मनुः पञ्चाक्षरो मतः ।

तन्त्रान्तरेऽपि ।

वधूबीजं च कवचं मायां कूर्चं तथाऽस्त्रकम् ।
सार्धपञ्चाक्षरो मन्त्रो द्वितीयः परिकीर्त्तितः ॥

(मेरुतन्त्रे)

मया पञ्चमुखैर्जप्तो दक्षमार्गेण भो सुराः ।
देवांशेषु च विप्रेषु तथा धर्मपरेषु च ॥
यमानां नियमानां च तन्त्रस्था नान्यदेवताः ।
वाममार्गाराधितास्तु कार्यं साधयितुं क्षमाः ॥

दक्षिणाराधिता देवा रणसाहाय्यकारकाः ।
तेजोनिधीन् रिपून् हत्वा नयन्ति ब्रह्मशाश्वतम् ॥
क्षत्रियाणां क्षयार्थं तु मया रामाय चार्पिता ।
पञ्चामृतं सुरास्थाने मांसस्थाने च सूरणम् ॥
मत्स्यस्थाने खण्डो बोध्यो धर्मपत्न्यां रतं रतम् ।
अन्यत् पूर्ववदेव स्याद्गुह्यमेतत् प्रकाशितम् ॥
लुब्धस्तारां न सेवेत लोकद्वयपरिक्षयात् ।
अस्याः पूजादिकं प्राग्वद्विशेषोऽत्र निरूपितः ॥
तारायाः सद्गुरोः सिद्धिः स्त्रीरते भ्रान्तता भवेत् ।
अथातः संप्रवक्ष्यामि महातारामनुं सुराः ॥
सिद्धिमार्गद्वयेनापि वर्णावर्णाधिकारतः ।
स्त्रीँ ह्रीँ ह्राँ हुँ नमस्तारायै महापदमुच्चरेत् ॥
तारायै सकलेत्युक्त्वा उस्वरान् तारय द्वयम् ।
तारद्वयं वह्निजाया द्वात्रिंशार्णो मनुर्मतः ॥
न्यासपूजाजपाद्यं तु प्राग्वत् सर्वं समाचरेत् ।

(तारिणीतन्त्रे)

ईश्वर उवाच ।

श्रूयतां शैलतनये जाड्यनाशकरी पुरा ।
चतुर्वर्गफला विद्या मन्त्रसिद्धिप्रदायिका ॥
वर्गाद्यं वह्निसंयुक्तं वामाक्षिपरिभूषितम् ।
नादविन्दुसमायुक्तं वसुसिद्धिप्रदायकम् ॥
पुनश्चतुर्मुखं देवि रकारेण विभूषितम् ।
स्वरेणैव चतुर्थेन चन्द्रखण्डेन च प्रिये ॥
लाञ्छितं वै महाबीजं चतुर्वर्गफलप्रदम् ।

ततः कृष्णे पदं चोक्त्वा ततो देवीपदं स्मृतम् ॥
ह्रीँकारं च ततो दद्यात् स्वपूर्वमुद्धरेत् ततः ।
इकारेण च रेफेण मकारेण च भूषितम् ॥
ततो वाग्भवमुच्चार्य मन्त्रमेनं समुद्धरेत् ।
नवाक्षरो मनुर्देवि तारिण्याः समुदीरितः ॥
इयमेव महाविद्या स्वर्गे मर्त्ये सुदुर्लभा ।
अष्टसिद्धिप्रदा देवि चतुर्वर्गफलप्रदा ॥

अथ ऋष्यादिन्यासः

शक्तिरस्य ऋषिः प्रोक्तो बृहतीछन्द ईरितम् ।
तारिणी देवता प्रोक्ता ह्रीँकारं बीजमुच्यते ॥
वाग्भवं शक्तिरित्युक्तमिति ऋष्यादिकं चरेत् ।

अथ ध्यानम् ।

कृष्णां लम्बोदरीं भीमां नागकुण्डलशोभिताम् ।
रक्तमुखीं ललज्जिह्वां रक्ताम्बरधरां कटौ ॥
पीनोन्नतस्तनीमुग्रां महानागेन वेष्टिताम् ।
शवस्योपरि देवेशि तस्योपरि कपालके ॥
नासाग्रध्याननिरतां महाघोरां वरप्रदाम् ।
चतुर्भुजां दीर्घकेशीं दक्षिणस्योर्ध्वबाहुना ॥
बिभ्रतीं नलिनीमेकां वामोर्ध्वे पानपात्रकम् ।
वराभयधरां देवीमधस्ताद्दक्षवामयोः ॥
पिवन्तीं रौधिरीं धारां पानपात्रे सदाशिवे ।
सर्वसिद्धिप्रदां देवीं नित्यां गिरिनिवासिनाम् ॥
लोचनत्रयसंयुक्तां नागयज्ञोपवीतिनीम् ।
दीर्घनासां दीर्घजङ्घां दीर्घाङ्गीं दीर्घजिह्विकाम् ॥

चन्द्रसूर्याग्निभेदेन त्रिलोचनसमन्विताम् ।
शत्रुनाशकरीं देवीं महाभीमां वरप्रदाम् ॥
व्याघ्रचर्मशिरोबद्धां जगत्त्रयविभाविताम् ।
साधकानां सुखं कर्त्रीं सर्वलोकभयङ्करीम् ॥
एवम्भूतां महादेवीं तारिणीं प्रणमाम्यहम् ।

अथ पुरश्चरणम् ।

एवं संपूजयित्वा च एभिर्द्रव्यैर्महेश्वरि ।
लक्षमेकं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः ॥

अथाक्षोभ्यमन्त्रः । (ब्रह्मसंहितायाम्)

अक्षोभ्यस्य मनुं त्यक्त्वा देवीं तारां जपेद्यदि ।
सिद्धिहानिर्भवेत् तस्य रौरवं नरकं व्रजेत् ॥
अक्षोभ्यस्य मनुं विप्र कवचं सारमुत्तमम् ।
अतिगुह्यं महाध्यानं सर्वध्यानेषु चोत्तमम् ॥
अग्रे मनुं प्रवक्ष्यामि ध्यानं चैव ततः परम् ।
कवचं च ततः पश्चात् कथयामि क्रमेण तु ॥
अनुत्तरं समुद्धृत्य पपञ्चमविभूषितम् ।
अक्षोभ्येति च स्वाहेति रमाद्यन्तं महामनुः ॥
स्वयम्-ऋषिश्च संप्रोक्तो विराट्छन्द उदीरितम् ।
अक्षोभ्यो देवता प्रोक्तस्त्रिमूर्त्तिर्नागरूपधृक् ॥
विनियोगस्तु नियतं पुरुषार्थचतुष्टये ।
अथ ध्यानं प्रवक्ष्यामि सर्वसौभाग्यदायकम् ॥
सहस्रादित्यसंकाशं नागरूपधरं शुभम् ।
विद्युत्कोटिसमं वक्त्रं वह्निभास्वरलोचनम् ॥
सार्धत्रिवलयोपेतं जटाकोट्यग्रसंस्थितम् ।

महालावण्यसंयुक्तं सुरासुरनमस्कृतम् ॥
सूर्यविद्युत्समाभासं महामणिशिखोपरि ।
एतद्रूपं महाकायं देवैरपि सुपूजितम् ॥

तन्त्रान्तरे ।

अक्षोभ्यं पूजयित्वाऽऽदौ तारां संपूजयेत् सुधीः ।

तथा ।

पुरश्चर्यादिकं चास्य तारिणीवत् समाचरेत् ।

इति ताराप्रकरणम् ।

अथ श्रीविद्या ।

तत्रादौ कामराजविद्या (चन्द्रपीठे)

स्मरो भगं विन्दुमती लपरा वाग्भवं मतम् ।
शिवो जीवः स्मरः शम्भुर्लपरा कामकूटकम् ॥
भृगुः कामः क्षमा माया कामराजाभिधा मता ।

कूटत्रयस्य वाग्भवादिसंज्ञा च तत्रैवोक्ता ।

प्रथमं वाग्भवं कूटं द्वितीयं कामकूटकम् ।
तृतीयं शक्तिकूटं स्यात् कूटत्रयतनुर्मनुः ॥

अथ लोपामुद्राख्या विद्या (ज्ञानार्णवे)

शृणु देवि प्रवक्ष्यामि लोपामुद्राभिधां पराम् ।
कामराजाख्यविद्यायाः शक्तिं तुर्यां च सुन्दरीम् ॥
हित्वा मुखे शिवेन्द्वाढ्या लोपामुद्रा प्रकाशिता ।

कामराजाख्यविद्याया वाग्भवे एकारमीकारं च विहायादौ हकारसकारौ दद्यादित्यर्थः । इयमगस्त्योपासिता ।

अथ षोडशी (योगिनीतन्त्रे)

श्रीबीजमाया स्मरयोनिशक्ति-
स्तारं च माया कमलाऽथ विद्या ।
शक्त्यादिबीजैश्च विलोमतोऽन्त्या
श्रीषोडशीयं च शिवोपदिष्टा ॥

तन्त्रान्तरे ।

श्रीबीजं शक्तिबीजं च कामबीजं च वाग्भवम् ।
बालान्तसंस्थितं बीजं प्रणवं च ततः परम् ॥
शक्तिबीजं रमां चैव विद्यां च परमेश्वरि ।
लोपां वा कामराजं वा त्रिकूटामथ वा पराम् ॥
विन्यस्य प्रणवाद्यानि बीजानि पञ्च सुन्दरि ।
विपरीतक्रमेणैव विन्यसेत् षोडशीं पराम् ॥

(मायातन्त्रेऽपि)

लक्ष्मीः परा मदनयोनियुता च शक्ति-
स्तारः परा च कमलाऽप्यथ मूलविद्या ।
शक्त्यादिभिश्च विपरीततया प्रदिष्टा
श्रीमन्त्रराज उदितः परदेवतायाः ॥

(महाकालसंहितायाम्)

अतः परतरा विद्या न भूता न भविष्यति ।
केनापि नैव शप्तेयं न च केनापि कीलिता ॥

(ज्ञानार्णवे)

वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ।
वर्णितुं नैव शक्येयं श्रीविद्या षोडशाक्षरी ॥
ब्रह्मविद्या स्वरूपा हि भुक्तिमुक्तिफलप्रदा ।
एकोच्चारेण देवेशि वाजपेयस्य कोटयः ॥
अश्वमेधसहस्राणि प्रादक्षिण्यं भुवस्तथा ।
काश्यादितीर्थयात्राः स्युः सार्धकोटित्रयान्विताः ॥
तुलां नायान्ति देवेशि नात्र कार्या विचारणा ।
एकोच्चारेण गिरिजे किं पुनर्ब्रह्मकेवलम् ॥
षोडशार्णा महाविद्या न प्रकाश्या कदा चन ।

गोपितव्या त्वया भद्रे स्वयोनिरिव पार्वति ॥
अपि प्रियतमे देयं सुतदारधनादिकम् ।
राज्यं देयं शिरो देयं न देया षोडशाक्षरी ॥
सप्तलक्षं महाविद्यास्तन्त्रादौ कथिताः प्रिये ।
सारात् सारतरा चेयं महाविद्या सुगोपिता ॥

अथ ऋष्यादिन्यासस्तत्रैव ।

ऋषिरस्य महेशानि दक्षिणामूर्त्तिरव्ययः ।
पङ्क्तिश्छन्दः समाख्यातं देवी त्रिपुरसुन्दरी ॥
वाग्भवं बीजमित्युक्तं शक्तिस्तु शक्तिकूटकम् ।
कामराजः कीलकं स्यादृष्यादिन्यास ईरितः ॥

वाग्भवादीनां बीजादिरूपत्वे हेतुरुक्तो (दक्षिणामूर्त्तिसंहितायाम्)

निःसरन्ति महामन्त्रा महाग्नेर्विस्फुलिङ्गवत् ।
तथैव मातृका वर्णा निःसृता वाग्भवाः प्रिये ॥
अत एवास्य देवस्य वाग्भवं बीजमुच्यते ।
योषित् पुरुषरूपेण स्फुरन्ती विश्वमातृका ॥
महामोहेन देवेशि कीलयन्ती जगत्त्रयम् ।
अतस्तत्कीलकं देवि तेन सौभाग्यगर्भिता ॥
पालयन्ती जगत् सर्वं तेनेयं शक्तिरुच्यते ।

अथ कराङ्गन्यासस्तन्त्रान्तरे ।

अँ आँ सौँरिति प्रोक्तं बीजं त्रिविधमुत्तमम् ।
एतद्बीजं द्विरावृत्य मध्यमाद्यङ्गुलीषु च ॥
शुद्धिं करस्य कुर्वीत तलयोः पृष्ठयोरपि ।
चतुर्थी नतिसंयुक्ता नाममन्त्रैः पृथक् पृथक् ॥
मध्यमाऽनामिका चैव कनिष्ठाऽङ्गुष्ठतर्जनी ।

क्रमेण नाम चाख्यातमङ्गुलीनां महेश्वरि ॥

(नवरत्नेश्वरे)

सर्वज्ञता नित्यसुतृप्तता च अनादिबोधश्च स्वतन्त्रता च ।
अलुप्तशक्तित्वमनन्तता च षडाहुरङ्गानि शिवे शिवायाः ॥

अत्र बहुविधन्यासजालं (ज्ञानार्णवादौ) द्रष्टव्यम् ।

अथ ध्यानम् ।

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणधारयन्तीं शिवां श्रये ॥

(सिद्धान्तसंग्रहे महाकालसंहितायां) च ।

उद्यच्चन्द्रोदयक्षुब्धरक्तपीयूषवारिधेः ।
मध्ये हेममयी भूमी रत्नमाणिक्यमण्डिता ॥
तन्मध्ये नन्दनोद्यानं मदनोन्मादनं महत् ।
नित्याभ्युदितपूर्णेन्दुज्योत्स्नाजालविराजितम् ॥
सदा सह वसन्तेन कामदेवेन रक्षितम् ।
कदम्बचूतपुन्नागनागकेशरचम्पकैः ॥
बकुलैः पारिजातैश्च सर्वर्त्तुकुसुमोज्ज्वलैः ।
झङ्कारमुखरैर्भृङ्गैः कूजद्भिः कोकिलैः शुकैः ॥
नानावर्णैरथान्यैश्च द्विजसङ्घैर्निषेवितम् ।
शिखिकारण्डहंसाद्यैर्नानापक्षिभिरावृतम् ॥
नानापुष्पलताकीर्णैः शोभितं वृक्षखण्डकैः ।
पर्यन्तदीर्घिकोत्फुल्लकमलोत्पलसम्भवैः ॥
रजोभिर्धूसरैः सम्यक् सेवितं मलयानिलैः ।
ध्यात्वैवं नन्दनोद्यानं तदन्तः प्राङ्गणं स्मरेत् ॥
शुद्धकाञ्चनसंकाशवसुधाभिरलङ्कृतम् ।
प्राङ्गणं चिन्तयित्वेत्थं सुरसिद्धनिषेवितम् ॥

तन्मध्ये मण्डपं ध्यायेद्व्याप्तब्रह्माण्डमण्डलम् ।
सहस्रादित्यसंकाशं चतुरस्रं सुशोभितम् ॥
रत्नतेजःप्रभापुञ्जपिञ्जरीकृतदिङ्मुखम् ।
मध्यस्तम्भविनिर्मुक्तं कोणस्तम्भसमन्वितम् ॥
महामाणिक्यवैदूर्यरत्नकाञ्चनभूषितम् ।
मुक्तादामवितानाढ्यं रत्नसोपानमण्डितम् ॥
मन्दवायुसमाक्रान्तं गन्धधूपतरङ्गितम् ।
रत्नचामरघण्टादिवितानैरुपशोभितम् ॥
जातीचम्पकपुन्नागकेतकीमल्लिकादिभिः ।
रक्तोत्पलसिताम्भोजमाधवीभिः सुपुष्पकैः ॥
बद्धाभिश्चित्रमालाभिः सर्वत्र समलङ्कृतम् ।
तिर्यगूर्ध्वलसद्रक्तपुत्तलीकोटिमण्डितम् ॥
नानारत्नादिभिर्दिव्यैर्निर्मितं विश्वकर्मणा ।
तन्मध्ये भावयेन्मन्त्री पारिजातं मनोहरम् ॥
स्वर्णादिरत्नभूमिं च वालुकां काञ्चनप्रभाम् ।
उद्यदादित्यसंकाशं व्याप्तब्रह्माण्डमण्डपम् ॥
शतयोजनविस्तीर्णं ज्योतिर्मन्दिरमुत्तमम् ।
चतुर्द्वारसमायुक्तं हेमप्राकारमण्डितम् ॥
रत्नोपक्लृप्तिसंशोभिकपाटाष्टकसंयुतम् ।
नवरत्नसमाक्लृप्ततुङ्गगोपुरतोरणम् ॥
हेमदण्डशिखालम्बिध्वजावलिपरिष्कृतम् ।
मध्यकोणस्थितस्तम्भनवरत्नसमन्वितम् ॥
महामाणिक्यवैदूर्यरत्नचामरशोभितम् ।
कल्पवृक्षे गिरेः पार्श्वे छत्रं तन्मण्डपोपरि ॥

सुवर्णसूत्रै रचितं तन्मध्ये रत्नमण्डपम् ।
तन्मध्ये स्फुरितं ध्यायेत् त्रिशृङ्गं ज्योतिरुत्तमम् ॥
तस्य मध्ये महाचक्रं पीयूषपरिपूरितम् ।
रत्नसिंहासनं तस्या वेद्या मध्ये स्मरेच्छुभम् ॥
विरिञ्चिविष्णुरुद्रेशरूपपादचतुष्टयम् ।
सदाशिवमयं साक्षात् तस्मिन् परशिवात्मकम् ॥
पुष्पपर्यङ्कतन्मध्ये श्रीमदुद्यानपीठके ।
पर्यङ्कबन्धविलसत्स्वस्तिकासनशालिनीम् ॥
ध्यायेत् परशिवाङ्कस्थां पद्ममध्योज्ज्वलाकृतिम् ।
त्रिपुरां सुन्दरीं देवीं बालार्ककिरणारुणाम् ॥
जपाकुसुमसंकाशां दाडिमीकुसुमोपमाम् ।
पद्मरागप्रतीकाशां कुङ्कुमारुणसन्निभाम् ॥
स्फुरन्मुकुटमाणिक्यकिङ्किणीजालमण्डिताम् ।
कालालिकुलसंकाशकुटिलालकपल्लवाम् ॥
प्रत्यगारुणसंकाशवदनाम्भोजमण्डिताम् ।
किञ्चिदर्धेन्दुकुटिलललाटमृदुपट्टिकाम् ॥
पिनाकधनुराकारभ्रूलतां परमेश्वरीम् ।
आनन्दमुदितोल्लासलीलां दोलितलोचनाम् ॥
स्फुरन्मयूखसङ्घातविलसद्धेमकुण्डलाम् ।
स्वगण्डमण्डलाभोगजितेन्द्वमृतमण्डलाम् ॥
विश्वकर्मविनिर्माणसूत्रविस्पष्टनासिकाम् ।
ताम्रविद्रुमविम्बाभरक्तोष्ठीममृतोपमाम् ॥
दाडिमीबीजपङ्क्त्याभदन्तपङ्क्तिविराजिताम् ।
स्मितमाधुर्यविजितमाधुर्यरससागराम् ॥

अनौपम्यगुणोपेतचिबुकोद्देशशोभिताम् ।
कम्बुग्रीवां महादेवीं मृणालसदृशैर्भुजैः ॥
रक्तोत्पलदलाकारसुकुमारकरां भुजाम् ।
कराम्बुजनखज्योतिर्विद्योतितनभस्तलाम् ॥
मुक्ताहारलतोपेतसमुन्नतपयोधराम् ।
त्रिवलीवलयामुक्तमध्यदेशसुशोभिताम् ॥
लावण्यसरिदावर्त्तनिम्ननाभिविभूषिताम् ।
अनर्घ्यरत्नघटितकाञ्चीयुतनितम्बिनीम् ॥
नितम्बबिम्बद्विरदरोमराजिवराङ्कुशाम् ।
कदलीललितस्तम्भसुकुमारोरुमीश्वरीम् ॥
लावण्यकुसुमाकारजानुमण्डलबन्धुराम् ।
लावण्यकदलीतुल्यजङ्घायुगलमण्डिताम् ॥
गूढगुल्फपदद्वन्द्वप्रपदाजितकच्छपाम् ।
तनुं दीर्घाङ्गुलोच्छन्ननखराजिविराजिताम् ॥
ब्रह्मविष्णुशिरोरत्ननिघृष्टचरणाम्बुजाम् ।
शीतांशुशतसंकाशकान्तिसंतानहासिनीम् ॥
लौहित्यजितसिन्दूरजपादाडिमरागिणीम् ।
रक्तवस्त्रपरीधानां पाशाङ्कुशकरोद्यताम् ॥
रक्तपद्मनिविष्टां तु रक्ताभरणभूषिताम् ।
जगदाह्लादजननीं जगद्रञ्जनकारिणीम् ॥
चतुर्भुजां त्रिनेत्रां तु पञ्चबाणधनुर्धराम् ।
कर्पूरशकलोन्मिश्रताम्बूलपूरिताननाम् ॥
महामृगमदोद्दामकुङ्कुमारुणविग्रहाम् ।
सर्वशृङ्गारवेशाढ्यां सर्वाभरणभूषिताम् ॥

जगदानन्दजननीं जगद्रञ्जनकारिणीम् ।
जगदाकर्षणकरीं जगत्कारणरूपिणीम् ॥
सर्वलक्ष्मीमयीं नित्यां सर्वशक्तिमयीं भजे ।

अथ दीपिनोविद्या तत्रैव ।

वाङ्मायाकमलाबीजं वाग्भवाद्ये नियोजयेत् ।
तारं लक्ष्मीं च वाग्बीजं मन्मथं भुवनेश्वरीम् ॥
तज्जप्त्वा च ततः पश्चाद्वाग्भवाख्यं समुच्चरेत् ।
प्रणवं भुवनेशानीं रमां कामं च वाग्भवम् ॥
कामराजं ततो जप्त्वा त्रैलोक्यक्षोभकारकम् ।
ॐकारं चापि वाग्बीजं रमां मन्मथमायया ॥
स्वप्नावतीं महादेवि जपेत् तत्र समाहितः ।
प्रणवं चाधरं कामं रमां च भुवनेश्वरीम् ॥
मधुमतीं ततो जप्त्वा मायाश्रीकूर्चबीजकम् ।
प्रणवाद्यं च देवेशि हंसबीजपुटीकृतम् ॥
एतद्बीजं समुच्चार्य शक्तिकूटं ततो जपेत् ।

जपनियमस्तु ।

जपेदादौ जपेत् पश्चात् सप्त वाराननुक्रमात् ।
कामराजादिबीजानां दीपनं चैव कारयेत् ॥

अथ पुरश्चरणविधिः (वामकेश्वरतन्त्रे)

तत्र स्थित्वा जपेल्लक्षं साक्षाद्देवीस्वरूपधृक् ।
किंशुकैर्हवनं कुर्याद्दशांशं च वरानने ॥
कुसुम्भकुसुमैर्वाऽपि मधुरत्रयमिश्रितैः ।

(सिद्धान्तसारेऽपि)

लक्षमात्रं जपेद्विद्यां हविष्याशी जितेन्द्रियः ।
होमं कुर्याद्दशांशेन किंशुकैर्मधुराप्लुतैः ॥

एवं सिद्धमनुर्मन्त्री प्रयोगान् कर्तुमर्हति–इति ।

अथ त्रिपुरभैरवमन्त्रः (वामकेश्वरे)

माया लक्ष्मीस्तथा हंसः प्रासादबीजमेव च ।
वह्निजायान्तको मन्त्रो भवेत् त्रैपुरभैरवः ॥
षडङ्गमूलमन्त्रेण बलिपूजादिकं तथा ।

अथ ध्यानम् ।

एकवक्त्रं त्रिनयनं चतुर्बाहुसमन्वितम् ।
दक्षिणे चाङ्कुशं खड्गं वामे खेटकपाशकौ ॥
धारयन्तं रक्तवर्णं वृषासनगतं विभुम् ।
ऊर्ध्वकेशं हारहारं कपालमालयाऽन्वितम् ॥
एवंविधं महादेवि ध्यायेत् त्रिपुरभैरवम् ।

अस्य पुरश्चरणं षोडशीपुरश्चरणसमानम् ।

अथ बालामन्त्रः (त्रिपुरासारसमुच्चये)

अथ त्रिलोकार्चितशासनाया
वक्ष्यामि बीजत्रयमम्बिकायाः ।
गोप्तव्यमेतत् कुलधर्मविद्भि-
रमुष्य हेतोर्निजसिद्धये च ॥
कान्तादिभूतपदगं कगतार्धचन्द्रं
दन्तान्तपूर्वजलधिस्थितवर्णयुक्तम् ।
एतज्जपं नरवरो भुवि वाग्भवाख्यं
वाचां सुधारसमुचां लभते स सिद्धिम् ॥
कान्तान्तं कुलपूर्वपञ्चमयुतं नेत्रान्तदण्डान्वितं
कामाख्यं गदितं जपान्मनुरयं साक्षाज्जगत्क्षोभकृत् ।
दन्तान्तेन युतं सदण्डिसकलं संमोहनाख्यं कुलं

सिध्यत्यस्य गुणाष्टकं खचरतासिद्धिश्च नित्यं जपात् ॥
ऋषिर्दक्षिणामूर्त्तिसंज्ञो महात्मा
भवेच्छन्द एतस्य मन्त्रस्य पङ्क्तिः ।
सरस्वत्यचिन्त्यप्रभावा प्रदिष्टा
बुधैर्दैवता देववृन्दार्च्चिताङ्घ्रिः ॥
अमुष्य मन्त्रस्य रदान्तयुक्तं बीजं सदण्डं नकुलीशपूर्वम् ।
शक्तिस्तु सा खण्डलकर्णपूर्वंसहार्धजैवातृकमाननान्तम् ॥

(मेरुतन्त्रे तु)

बालाबीजं वाग्भवं स्यात् तार्त्तीयं शक्तिरुच्यते ।
कीलकं कामराजः स्याद्द्विरावृत्या षडङ्गकम्—इत्युक्तम् ॥

(त्रिपुरासारसमुच्चये)

वर्णः शुक्लो मुनिभिस्त्रिभुवनमहितस्य मन्त्रराजस्य ।
आगमपारगमतिभिर्गान्धारोऽस्य स्वरो गदितः ॥
विद्यामूलोत्पत्तिरेषा मयोक्ता
ज्ञातव्येयं सर्वथा सिद्धिकामैः ।
देव्या शप्ता येन विद्येयमाद्या
पूर्वं तेन प्राणहीनाऽभवत् सा ॥

ज्ञातव्येत्यनेन तु जप्तव्येति सूचितम् ।

देव्या शप्तेत्यनेन च निषेधहेतुर्दर्शितः । शापनिर्मुक्तिप्रकारस्तु तत्रैवोक्तः ।

शिवशक्तिबीजमत एव शम्भुना
निहितं तयोरुपरि पूर्वबीजयोः ।
अकुलं कुलोपरि च मध्यसाधरे
दहनं ततः प्रभृति सोर्जिताऽभवत् ॥

संज्ञाभेदमाह ।

भैरवीयमुदिता कुलपूर्वा देशिकैर्यदि भवेत् कुलपूर्वा ।

सैव शीघ्रफलदा भुवि विद्येत्युच्यते पशुजनेष्वतिगोप्या ॥

अकुलं हकारस्तत्पूर्वा चेद्भैरवी । कुलं सकारस्तत्पूर्वा चेद्विद्येत्युच्यत इत्यर्थः । आद्यन्तबीजयोर्वह्निबीजाभावाद्वक्ष्यमाणत्रिपुरभैरवीविद्यावैलक्षण्यमस्या बोद्धव्यम् ।

अस्या ध्यानमुक्तं (मेरुतन्त्रे)

अभयं पुस्तकं बालां वरं च दधतीं करैः ।
अरुणामरुणाब्जस्थां रक्तवस्त्रां द्विजेशकाम् ॥

तन्त्रान्तरे तु ।

संस्मरेत् त्रिपुरां बालां शरच्चन्द्रसमप्रभाम्-इति ।

शुक्लवर्णेयमुक्ता ।

(त्रिपुरासारसमुच्चये)

पाशाङ्कुशाभयवरोद्यतपाणिपद्माम्···इत्यायुधविशेष उक्तः ।

अथ पुरश्चरणं (ज्ञानार्णवे)

वर्णलक्षं जपेन्मन्त्रं दशांशं हवनं चरेत् ।
तर्पणादि ततः कुर्यात् सर्वसौभाग्यभाग्भवेत्-इति ॥

इति श्रीविद्याप्रकरणम् ।

अथ भुवनेश्वरीविद्या (शारदायाम्)

अथ वक्ष्ये जगद्धात्रीमधुना भुवनेश्वरीम् ।
ब्रह्मादयोऽपि यां ज्ञात्वा लेभिरे श्रियमूर्जिताम् ॥
नकुलीशोऽग्निमारूढो वामनेत्रार्धचन्द्रवान् ।
बीजं तस्याः समाख्यातं सेवितं सिद्धिकाङ्क्षिभिः ॥
ऋषिः शक्तिर्भवेच्छन्दो गायत्री देवता मनोः ।
कथिता सुरसङ्घेन सेविता भुवनेश्वरी ॥
षड्दीर्घयुक्तबीजेन कुर्यादङ्गानि षट् क्रमात् ।

अथ ध्यानम् ।

उद्यद्दिनद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ।
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजेद्भुवनेशीम् ॥

अथ पुरश्चरणम् ।

प्रजपेन्मन्त्रविन्मन्त्रं द्वात्रिंशल्लक्षमानतः ।
त्रिस्वादुयुक्तैर्जुहुयादष्टद्रव्यैर्दशांशतः ॥

अथ मन्त्रान्तरं तत्रैव ।

वाग्भवं शम्भुवनिता रमा बीजत्रयात्मकम् ।
मन्त्रं समुद्धरेन्मन्त्री त्रिवर्गफलसाधनम् ॥
षड्दीर्घभाजा मध्येन वाग्भवाद्येन कल्पयेत् ।
षडङ्गानि मनोरस्य जातियुक्तानि मन्त्रवित् ॥

अथ ध्यानम् ।

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्-
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थसव्यचरणां ध्यायेत् परामम्बिकाम् ॥

अथ पुरश्चरणम् ।

रविलक्षं जपेन्मन्त्रं पायसैर्मधुराप्लुतैः ।
दशांशं जुहुयान्मन्त्री पीठे प्रागीरिते यजेत् ॥

अथ मन्त्रान्तरं तत्रैव ।

वाग्बीजपुटिता माया विद्येयं त्र्यक्षरी मता ।
मध्येन दीर्घयुक्तेन वाक्पुटेन प्रकल्पयेत् ॥
अङ्गानि जातियुक्तानि क्रमेण मनुवित्तमः ।

अथ ध्यानम् ।

श्यामाङ्गीं शशिशेखरां निजकरैर्दानं च रक्तोत्पलं
रत्नाढ्यं चषकं परं भयहरं संबिभ्रतीं शाश्वतीम् ।
मुक्ताहारलसत्पयोधरनतां नेत्रत्रयोल्लासिनीं
वन्देऽहं सुरपूजितां हरवधूं रक्तारविन्दस्थिताम् ॥

अथ पुरश्चरणम् ।

तत्त्वलक्षं जपेन्मन्त्रं जुहुयात् तद्दशांशतः ।
पालाशपुष्पैः स्वाद्वक्तैः पुष्पैर्वा राजवृक्षकैः ॥

अथ मन्त्रान्तरं तत्रैव ।

अनन्तो बिन्दुसंयुक्तो मायाब्रह्माग्नितारवान् ।
पाशादिस्त्र्यक्षरो मन्त्रः सर्ववश्यफलप्रदः ॥
ऋष्याद्याः पूर्वमुक्ताः स्युर्बीजेनाङ्गक्रिया मता ।

अथ ध्यानम् ।

वराङ्कुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।
बालार्ककोटिप्रतिमां त्रिनेत्रां भजेऽहमाद्यां भुवनेश्वरीं ताम् ॥

अथ पुरश्चरणम् ।

हविष्यभुग्जपेन्मन्त्रं तत्त्वलक्षं जितेन्द्रियः ।
षट्सहस्रं प्रजुहुयाज्जपान्ते मन्त्रवित्तमः ॥
दधिक्षौद्रघृताक्ताभिः समिद्भिः क्षीरभूरुहाम् ।
तत्सङ्ख्यया तिलैः शुद्धैः पयोऽक्तैर्जुहुयात् ततः ॥

अस्याः पुमान्महादेवः । तन्मन्त्रः पञ्चाक्षरस्तत्प्रकरण एवोक्तः ।

इति भुवनेश्वरीविद्याप्रकरणम् ।

अथ भैरवीविद्या ।

तत्रादौ त्रिपुरभैरवीविद्या प्रोक्ता (शारदायाम्)

अथ वक्ष्ये परां विद्यां त्रिपुरामतिगोपिताम् ।
यां ज्ञात्वा सिद्धसङ्घानामधिपो जायते नरः ॥
वियद्भृगुहुताशस्थो भौतिको बिन्दुशेखरः ।
वियत् तदादिकेन्द्राग्निस्थितं वामाक्षिबिन्दुमत् ॥
आकाशभृगुवह्निस्थो मनुः सर्गेन्दुखण्डवान् ।
वाग्भवं प्रथमं बीजं कामबीजं द्वितीयकम् ॥

तृतीयं शक्तिबीजाख्यं त्रिभिर्बीजैरितीरिता ।
पञ्चकूटात्मिका विद्या वेद्या त्रैपुरभैरवी ॥
ऋषिः स्याद्दक्षिणामूर्त्तिश्छन्दः पङ्क्तिः समीरितम् ।
देवता देशिकैरुक्ता देवी त्रिपुरभैरवी ॥

तथा ।

षड्दीर्घयुक्तेनाद्येन बीजेनाङ्गक्रिया मता ।

न्यासान्तराणि विस्तरभयादुपेक्षितानि पुरश्चरणस्यैवात्र निरूपणीयत्वात् ।

अथ ध्यानम् ।

उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वराम् ।
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीं बद्धहिमांशुरत्नमुकुटां वन्देऽरविन्दस्थिताम् ॥

अथ पुरश्चरणम् ।

दीक्षां प्राप्य जपेन्मन्त्रं तत्त्वलक्षं जितेन्द्रियः ।
पुष्पैर्भानुसहस्राणि जुहुयाद्ब्रह्मवृक्षजैः ॥
त्रिमध्वक्तैः प्रसूनैर्वा करवीरसमुद्भवैः ।

तत्त्वलक्षं लक्षत्रयम् ।

अथ चैतन्यभैरवीमन्त्रो (मेरुतन्त्रे)

चैतन्यभैरवीमन्त्रस्त्र्यक्षरः कथ्यतेऽधुना ।
सहावैकारसंयुक्तौ प्रथमं बीजमीरितम् ॥
सकला ह्रीँ समायुक्ता द्वितीयं बीजमुच्यते ।
सहारा औसमायुक्ता विसर्गान्तास्तृतीयकम् ॥

अत्र त्रिभिर्बीजैर्द्विरावृत्त्या षडङ्गन्यासः कार्यः ।

अथ ध्यानम् ।

उद्यद्भानुसहस्राभां नानालङ्कारभूषिताम् ।
मुकुटोर्ध्वलसच्चन्द्ररेखां रक्ताम्बराश्रिताम् ॥

पाशाङ्कुशधरां नित्यां वामहस्तकपालिनीम् ।
वरदाभयशोभाढ्यां पीनोन्नतघनस्तनीम् ॥
एवं ध्यात्वा यजेद्देवीं पूर्वसिंहासने स्थिताम् ।
पुरश्चर्यादिकं प्राग्वत् प्रयोगांश्चापि साधयेत् ॥

प्राग्वदिति त्रिपुरभैरवीवत् ।

अथ भुवनेश्वरभैरवीमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि भुवनेश्वरभैरवीम् ।
हसावैकारसंयुक्तौ प्रथमं बीजमीरितम् ॥
हसकला ह्रीँ समेता द्वितीयं बीजमुच्यते ।
हसावौकारसंयुक्तौ विसर्गान्तं तृतीयकम् ॥
षड्दीर्घान्वितमध्येन बीजेनोक्तं षडङ्गकम् ।

अथ ध्यानम् ।

जपाकुसुमसंकाशां दाडिमीकुसुमप्रभाम् ।
चन्द्ररेखाजटाजूटां त्रिनेत्रां रक्तवाससम् ॥
नानालङ्कारशुभगां पीनोन्नतघनस्तनीम् ।
पाशाङ्कुशवराभीतीर्दधानां च शिवां श्रये ॥
चैतन्यभैरवीवत् स्याद्यन्त्रोक्तमिहार्थवत् ।

अस्याः पुरश्चरणं तु त्रिपुरभैरवीपुरश्चरणवद्बोध्यम् ।

अथ कमलेश्वरीभैरवी तत्रैव ।

अथातः संप्रवक्ष्यामि भैरवीं कमलेश्वरीम् ।
हसस्थाने सहेत्युक्त्वा सर्वं मन्त्रादि पूर्ववत् ॥
राज्ञा ज्ञाता ततः शप्ता तुहिनागेऽभवन्नदी ।
त्यक्तस्तया वाममार्गो राजभीत्या तु मत्कृते ॥
यतो लब्धं तया दुःखं कलौ ख्यातिं गमिष्यति ।
प्रनष्टेषु च देवेषु प्रत्यक्षेयं भविष्यति ॥

अवर्णाश्चापि वर्णाश्च भविष्यन्ति वरप्रदाः ।
त्यक्त्वा मपञ्चकं पूजां कृत्वा ये जपतत्पराः ॥
अस्यास्तीरे पुरश्चर्यां नवकात् संप्रसीदति ।
भुवनेशी भैरवी तु कृत्वा रूपान्तरं मम ॥
कार्यार्थं बहवः शिष्याः कौलिका वामिनः कृताः ।
तस्या ध्यानाद्यर्च्चनादि प्राग्वद्दक्षिणमार्गतः ॥

अथ संपत्प्रदाभैरवी (ज्ञानार्णवे)

यथाऽसौ त्रिपुरा बाला तथा त्रिपुरभैरवी ।
संपत्प्रदा नाम तस्याः शृणु निर्मलमानसे ॥
शिवश्चन्द्रो वह्निसंस्थो वाग्भवं तदनन्तरम् ।
कामबीजं तथा देवि शिवच्चन्द्रान्वितं ततः ॥
पृथ्वीबीजं तु वह्न्याढ्यं तार्त्तीयं शृणु वल्लभे ।
शक्तिबीजे महेशानि शिववह्नी नियोजयेत् ॥
कुमार्याः परमेशानि हित्वा सर्गं तु वैन्दवम् ।
त्रिपुराभैरवी देवी महासंपत्प्रदा प्रिये ॥

त्रिपुरभैरवी विसर्गरहिता संपत्प्रदा भवति ।

न्यासपूजादिकं सर्वं त्रिपुराभैरवीसमम् ।

ध्यानं यथा ।

आताम्रार्कसहस्राभां स्फुरच्चन्द्रकलाजटाम् ।
किरीटरत्नविलसच्चित्रच्चित्रितमौक्तिकाम् ॥
गलद्रुधिरपङ्काढ्यमुण्डमालाविराजिताम् ।
नयनत्रयशोभाढ्यां पूर्णेन्दुवदनान्विताम् ॥
मुक्ताहारलताराजत्पीनोन्नतघनस्तनीम् ।
रक्ताम्बरपरीधानां यौवनोन्मत्तरूपिणीम् ॥

पुस्तकं चाभयं वामे दक्षिणे चाक्षमालिकाम् ।
वरदानरतां नित्यां महासंपत्प्रदां स्मरेत् ॥

अस्याः पुरश्चरणमपि पूर्ववद्बोध्यम् ।

अथ कौलेशभैरवी तत्रैव ।

संपत्प्रदाभैरवीवद्विद्धि कौलेशभैरवीम् ।
हसराद्यैव देवेशि त्रिषु बीजेषु पार्वति ॥
इयं तु सहराद्या स्याद्ध्यानपूजादिकं तथा ।

त्रिपुरभैरवीवदिति शेषः । आदिपदात् पुरश्चरणस्यापि संग्रहः ।

अथ कामेश्वरभैरवी तत्रैव ।

कामेश्वरी च रुद्राणां पूर्वसिंहासने स्थिता ।
एतस्या एव विद्याया बीजद्वयमुदाहृतम् ॥
तदन्ते परमेशानि नित्यक्लिन्ने मदद्रवे ।
एतस्या एव तार्त्तीयं रुद्राणां परमेश्वरि ॥
ध्यानपूजादिकं देवि चैतन्यावत् समीरितम् ।

एवं पुरश्चरणमपि ।

अथ षट्कूटाभैरवी (ज्ञानार्णवे)

डाकिनीराकिनीबीजे लाकिनीकाकिनीयुगम् ।
शाकिनीहाकिनीबीजे आहृत्य सुरसुन्दरि ॥
आद्यमैकारसंयुक्तमन्यदीकारमण्डितम् ।
शक्रस्वरान्वितं देवि तार्त्तीयं बीजमालिखेत् ॥
विन्दुनादकलाक्रान्तं तृतीयं शैलसम्भवे ।
द्विरावृत्त्या षडङ्गानि विधाय परमेश्वरि ॥

पुरश्चरणं तु पूर्ववत् ।

अथ नित्याभैरवी तत्रैव ।

एतस्या एव विद्यायाः षडर्णाः क्रमशः स्थिताः ।

विपरीतान् वद प्रौढे विद्येयं भोगमोक्षदा ॥
न्यासपूजादिकं सर्वमस्याः पूर्ववदाचरेत् ।

अथ रुद्रभैरवी तत्रैव ।

शिवचन्द्रौ मादनान्तं पान्तं वह्निसमन्वितम् ।
शक्तिभिन्नं विन्दुनादकलाढ्यं वाग्भवं प्रिये ॥
संपत्प्रदाया भैरव्याः कामबीजं तदेव हि ।
सदाशिवस्य बीजं तु महासिंहासनस्य च ॥

सदाशिवबीजं प्रेतबीजम्

एषा विद्या महेशानि वर्णितुं नैव शक्यते ।

ऋष्यादिन्यासस्त्रिपुरभैरवीवत् ।

अथ ध्यानम् ।

उद्यद्भानुसहस्राभां चन्द्रचूडां त्रिलोचनाम् ।
नानालङ्कारशुभगां सर्ववैरिनिकृन्तनीम् ॥
स्रवद्रुधिरमुण्डालीकलितां रक्तवाससम् ।
त्रिशूलं डमरुं खड्गं तथा खेटकमेव च ॥
पिनाकं च शरान् देवीं पाशाङ्कुशयुगं क्रमात् ।
पुस्तकं चाक्षमालां च शिवसिंहासनस्थिताम् ॥

तन्त्रान्तरे ।

न्यासपूजादिकं सर्वं त्रिपुराभैरवीसमम् ।

एवं पुरश्चरणमपि । अत्र भैरवो बटुकस्तन्मन्त्रपुरश्चरणं शिवप्रकरणे प्रोक्तम् ।

इति भैरवीप्रकरणम् ।

अथ छिन्नमस्ताविद्या ।

(विश्वसारे यामले च)

प्रचण्डचण्डिकां वक्ष्ये सर्वकामफलप्रदाम् ।
यस्याः प्रसादमात्रेण शिव एव भवेन्नरः ॥
अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ।

कवित्वं च सुपाण्डित्यं लभते नात्र संशयः ॥

मन्त्रोद्धारमाह ।

लक्ष्मीं लज्जां ततो मायां मात्राद्वादशिकामथ ।
वज्रवैरोचनीये च माये फट्स्वाहया युते ॥
लक्ष्मीबीजं यदाऽऽद्यं स्यात् तदा श्रीः सर्वतोमुखी ।
लज्जाबीजेन चाद्येन वश्यतां यान्ति योषितः ॥
मायाबीजेन चाद्येन महापातकनाशनम् ।
मात्राद्वादशिकाबीजमाद्यं स्यान्मुक्तिदायकम् ॥

अत्र लज्जापदं कामबीजपरम् ।

तथा चोक्तम् ।

अत्र लज्जापदं देवि कामबीजपरं भवेत् ।
महाकालमतं प्रोक्तं मन्त्रोद्धारं शुभावहम्-इति ॥

मन्त्रोद्धारश्लोकस्थलज्जापदस्य तु मायाबीजपरत्वेऽपि न क्षतिः ।

श्रीबीजानन्तरं क्व चित् कामबीजस्य क्व चिन्मायाद्वयस्य च दर्शनात् । मायापदस्य क्व चित् कूर्चपरत्वमपि दृश्यते ।

सबिन्दुवामश्रुतियुग्वियन्माया प्रकीर्त्तिता-इति ।

मात्राद्वादशिका वाग्भवम् ।

(विश्वसारे)

ताराद्या षोडशी चान्या भवेत् सप्तदशाक्षरी ।
एषा विद्या महाविद्या भुक्तिमुक्तिकरी सदा ॥

तदुक्तं (मेरुतन्त्रे)

प्रणवं च रमां लज्जां बीजद्वन्द्वं च वाग्भवम् ।
वज्रवैरोचनीये ह्रीँ ह्रीँ फट्स्वाहा घनाक्षरः ॥
भैरवोऽस्य मुनिः प्रोक्तः सम्राट्छन्द उदाहृतम् ।
छिन्नमस्ता भवेद्देवी वाममार्गेण सिद्धिदा ॥

(यामलाद्यै)

आसामृषिर्भैरवोऽहं नाम्ना तु क्रोधभूपतिः ।
सम्राट्छन्दो देवता च छिन्नमस्ता प्रकीर्त्तिता ॥
मायाबीजं स्वाहा शक्तिः कथिता ब्रह्मयोनिना ।
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ॥

(मेरौ)

आँ खड्गाय हृदाख्यातमीँ सुखड्गाय मस्तकम् ।
ऊँ वज्राय शिखा प्रोक्ता ऐँ पाशाय तनुच्छदम् ॥
औमङ्कुशाय नेत्रं स्यादश्वासुरक्षयाय च ।
हूँ हूँ नवार्णोऽस्त्रमन्त्रः सर्वे स्युः प्रणवादिकाः ॥
स्वाहान्ताः सर्व एवैते ततो ध्यानं समाचरेत् ।

ध्यानं यथा ।

भास्वन्मण्डमध्यस्थां विपरीतरतस्थितौ ।
रतिकामौ समारूढां विकीर्णसकलालकाम् ॥
वामे करे निजशिरश्छिन्नं संदधतीं पुनः ।
गलान्निर्गतमस्त्रं च पिबन्तीं तन्मुखेन च ॥
डाकिनीवर्णिनीभ्यां च सखीभ्यां परिवारिताम् ।

अथ मन्त्रान्तरम् (महाकालसंहितायाम्)

अथातश्छिन्नमस्ताया मन्त्रं ते व्याहराम्यहम् ।
जिघृक्षयाऽपि यस्य स्युः साधकस्याष्ट सिद्धयः ॥
नातः परतरा का चिदुग्रा देवी भविष्यति ।
तस्मादसक्तैर्मनुजैर्न ग्राह्येयं कथं चन ॥
सिद्धिर्वा मृत्युरपि वा द्वयोरेकतरं भवेत् ।
प्रणवं च रमाबीजं लज्जां वाग्भवमेव च ॥
वज्रवैरोचनीये च इत्येवं तत उद्धरेत् ।

क्रोधद्वयं ततश्चास्त्रं स्वाहान्तः षोडशाक्षरः ॥

अस्य न्यासादिकं पूर्ववत् कार्यम् ।

अथ ध्यानम्

ध्यानमस्याः प्रवक्ष्यामि तत्र चेतो निवेशय ।
स्वनाभौ नीरजं ध्यायेत् शुद्धं विकशितं सितम् ॥
तत्पद्मकोशमध्ये तु मण्डलं चण्डरोचिषः ।
जपाकुसुमसङ्काशं रक्तबन्धूकसन्निभम् ॥
रजःसत्त्वतमोरेखायोनिमण्डलसन्निभम् ।
मध्ये तस्या महादेवीं सूर्यकोटिसमप्रभाम् ॥
छिन्नमस्तां करे वामे धारयन्तीं स्वमस्तकम् ।
प्रसारितमुखीं भीमां लेलिहानोग्रजिह्विकाम् ॥
पिवन्तीं रक्तधारां च निजकण्ठसमुद्भवाम् ।
विकीर्णकेशपाशां तां नानापुष्पसमन्विताम् ॥
दक्षिणे च करे कर्त्रीं मुण्डमालाविभूषिताम् ।
दिगम्बरां महाघोरां प्रत्यालीढपदस्थिताम् ॥
अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम् ।
सदा षोडशवर्षीयां पीनोन्नतपयोधराम् ॥
नागाङ्गदां नागकाञ्चीं नागनूपुरसंयुताम् ।
नागकुण्डलसंयुक्तामष्टनागसमन्विताम् ॥
विपरीतरतासक्तरतिकामोपरिस्थिताम् ।
डाकिनीवर्णिनीयुक्तां वामदक्षिणयोगतः ॥
दक्षिणे वर्णिनीं ध्यायेद्वामपार्श्वे तु डाकिनीम् ।
वर्णिनीं लोहितश्यामां मुक्तकेशीं दिगम्बराम् ॥
कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः ।

देवीगलोच्छलद्रक्तधारापानं प्रकुर्वतीम् ॥
अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम् ।
डाकिनीं वामपार्श्वे तु कल्पान्तज्वलनोपमाम्* ॥
विद्युच्छटाभनयनां दन्तपङ्क्तिबलाकिनीम् ।
दंष्ट्राकरालवदनां पीनोत्तुङ्गपयोधराम् ॥
महाघोरां महादेवीं मुक्तकेशीं दिगम्बराम् ।
लम्बोदरीं कालरात्रीं नागयज्ञोपवीतिनीम् ॥
लेलिहानमहाजिह्वां मुण्डमालाविभूषिताम् ।
कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः ॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्वतीम् ।
करस्थितकपालेन भीषणेनातिभीषणाम् ॥
आभ्यां निषेव्यमाणां तु ध्यायेद्देवीं विचक्षणः ।
दुर्निरीक्ष्यां चेतसाऽपि सर्वकामफलप्रदाम् ॥

अथ मन्त्रान्तरं (यामले)

भुवनेशीं कामबीजं कूर्च्चबीजं च वाग्भवम् ।
भुवनेशीं कूर्च्चबीजं वाग्भवं तदनन्तरम् ॥
वज्रवैरोचनीये च हुँ फट् स्वाहा ततः परम् ।

मन्त्रान्तरम् ।

हृल्लेखावाग्भवं कूर्च्चं वाग्भवं कूर्च्चमेव च ।
अत्रान्ता छिन्नमस्ता या महाविद्या प्रकीर्त्तिता ॥
यस्याश्च सदृशी विद्या जगत्स्वपि न विद्यते ।
षड्वर्णोऽयं मनुः साक्षान्मोक्षदो नात्र संशयः ॥

एतदुभयस्य ऋष्यादिकरषडङ्गन्यासः पूर्ववत् कार्यः ।

---

* जलदोपमामिति पाठः ।

ध्याने विशेषो यथा ।

अस्या ध्यानमहं वक्ष्ये शृणुष्व कमलानने ।
प्रत्यालीढपदां सदैव दधतीं छिन्नं शिरः कर्त्रिकां
दिग्वस्त्रां स्वकबन्धशोणितसुधाधारां पिवन्तीं मुदा ।
नागाबद्धशिरोमणित्रिनयनां हृद्युत्पलालङ्कृतां
रत्यासक्तमनोभवोपरिदृढां ध्यायेज्जपासन्निभाम् ॥
दक्षे चातिसिता विमुक्तचिकुरा कर्त्रीं तथा खर्परं
हस्ताभ्यां दधती रजोगुणभवा नाम्नाऽपि सा वर्णिनी ।
देव्याश्छिन्नकबन्धतः पतदसृग्धारां पिवन्ती मुदा
नागाबद्धशिरोमणिर्मनुविदा ध्येया तथा सा सुरैः ॥
वामे कृष्णतनुस्तथैव दधती खड्गं तथा खर्परं
प्रत्यालीढपदा कबन्धविगलद्रक्तं पिवन्ती मुदा ।
सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी
शक्तिः साऽपि परात् परा भगवती नाम्ना परा डाकिनी ॥

अथ मन्त्रान्तरं तत्रैव ।

वज्रवैरोचनीये च कूर्चयुग्मं सफट् ठठः ।
तारायैषा महाविद्या सर्वतेजोऽपहारिणी ॥
न्यासध्यानादिकं सर्वं षोडशीवत् समाचरेत् ।

मन्त्रान्तरम् ।

वियच्छ्रोत्रयुतं विन्दुनादयुक्तं ततः प्रिये ।
एकाक्षरी महाविद्या त्रैलोक्यवशकारिणी ॥
द्विठान्तैषा महाविद्या त्रैलोक्यमोहकारिणी ।
ताराद्या च भवत्येषा चतुर्वर्गफलप्रदा ॥
न्यासध्यानादिकं सर्वं पूर्ववत् परिकीर्त्तितम् ।

अथ पुरश्चरणं (विश्वसारे)

लक्षमेकं जपं कुर्यात् पुरश्चरणकर्मणि ।
महाविद्याविषये च जपं लक्षप्रमाणकम् ॥
सर्वत्र सर्वतन्त्रेषु कथितं पद्मयोनिना ।

(रुद्रयामलेऽपि)

पुरश्चर्यां जपेल्लक्षं दशांशं जुहुयात् ततः ।
घृताक्तैर्विल्वकाष्ठैश्च होमकर्म समाचरेत् ॥
उदुम्बरसमिद्भिर्वा पालाशैर्वा समाचरेत् ।
अपामार्गसमिद्भिर्वा* होतव्यं मन्त्रसिद्धये ॥

(यामलान्तरेऽपि)

देवीं ध्यात्वा जपेन्मन्त्रं लक्षसङ्ख्यं हविष्यभुक् ।
जुहुयात् तद्दशांशेन विल्वकाष्ठैर्घृतप्लुतैः ॥

(वाराहीतन्त्रे तु)

शून्यागारे श्मशाने च वृषशून्ये शिवालये ।
त्रिलक्षं प्रजपेन्मन्त्रं ततः सिद्धिर्भवेद्ध्रुवम्—इत्युक्तम् ॥

(गन्धर्वतन्त्रेऽपि)

दिवसे ब्रह्मचर्येण रात्रौ तु स्त्रीसहायवान् ।
मपञ्चकं पुरस्कृत्य महाशङ्खाक्षमालया ॥
जपेल्लक्षत्रयं देवि युगानुरूपतः कलौ ।
शतसाहस्रकं चान्यज्जपेच्छ्रद्धापरो नरः ॥
समाप्ते च त्रिलक्षे तु होमकर्म समाचरेत् ।
कलौ पापसमाकीर्णे सत्यधर्मविवर्जिते ॥
चतुर्गुणा क्रिया जप्या तेन सिद्धिर्न संशयः ।

दिवसे दक्षिणाचारेण रात्रौ वामाचारेण च पुरश्चरणविधिः कौलिकविषयः ।

---

* अपामार्गैः शमीभिर्वा इति २ पु० पा० ।

(मेरुतन्त्रे)

एवं पूजा प्रकर्त्तव्या जपेल्लक्षचतुष्टयम् ।
पालाशैर्बिल्वजैर्वाऽपि जुहुयात् कुसुमैः फलैः ॥
तर्पणादि तत कुर्यादेवं सिद्धो भवेन्मनुः ।

अत्र (विश्वसारो-) क्तषोडशाक्षरमन्त्रस्य पुरश्चरणमेकलक्षजपस्तन्त्रान्तरोक्तमन्त्रान्तराणां लक्षत्रयजपः। (मेरुतन्त्रो-) क्तसप्तदशाक्षरमन्त्रस्य लक्षचतुष्टयपरिमितो जप इति वदन्ति ।

(भूतभैरवे)

आदौ जप्त्वा भैरवस्य क्रोधस्यास्य मनुं जपेत् ॥
अस्थिमालां समादाय वज्रवैरोचनीमनुम् ।

क्रोधभैरवमन्त्रस्तत्रैवोक्तः ।

अथ क्रोधमनुं वक्ष्ये असाध्यं येन सिध्यति ।
बीजं हालाहलं गृह्य क्रोधबीजमतः परम् ॥
भयङ्करार्णमाभाष्यासिताङ्गं क्षतजत्विषम् ।
प्रलयाग्निमहाज्वालामाभाष्य मनुमुद्धरेत् ॥
एवमुच्चारितः क्रोधः स्वयमेव प्रसिध्यति ।
ततस्तु क्रोधमन्त्रेण षडङ्गन्यासमाचरेत् ॥
विषं वज्रयुतं बोधि महाकालं न्यसेद्धृदि ।
विषं हरयुगं वज्रकूर्चाद्यं विन्यसेच्छिरः ॥
हालाहलं देहयुतं वज्रकालं न्यसेच्छिखाम् ।
विषमस्त्रयुतं वज्रमायुधं कवचं न्यसेत् ॥
ताराबीजयुतं वज्रं महाकालाय नेत्रयोः ।
विषं हनयुतं गृह्य दहगृह्य परान्वितम् ॥
क्रोधं वज्रयुतं तद्वत् सर्वदुष्टानथापरम् ।
ततो मारय वज्रास्त्रं दिग्बन्धान्तं षडङ्गकम् ॥

ध्यानमाह ।

तत्र मध्ये न्यसेद्भीमं तप्तज्वालासमाकुलम् ।
साट्टहासं महारौद्रं भिन्नाञ्जनचयोपमम् ॥
प्रत्यालीढं चतुर्बाहुं दक्षिणे *चक्रधारिणम् ।
तर्जनीं वामहस्तेन तीक्ष्णदंष्ट्राकरालिनम् ॥
कपालरत्नमुकुटं त्रैलोक्यस्य विनायकम् ।
आदित्यकोटिसंकाशमष्टनागविभूषितम् ॥
अपराजितपदाक्रान्तमुद्रावान् बलविष्टिभिः ।
अनामिकाद्वयं बद्ध्वा आकुञ्च्य तर्जनीद्वयम् ॥
कनिष्ठां मध्यमां चैव ज्येष्ठाङ्गुष्ठेन च क्रमात् ।
एवं मुद्राधरो भीमस्त्रैलोक्यासाध्यसाधकः ॥

अस्य मन्त्रस्य पुरश्चरणं तु प्रचण्डचण्डिकापुरश्चरणवत् ।

जपहोमविधानं च शिवशक्त्योः समं विदुः—इति वचनात् ।

इति छिन्नमस्ताप्रकरणम् ।

अथ धूमावतीविद्या ।

(महाथर्वणसंहितायाम्)

दान्तौ सवामकर्णेन्दुधूमावत्यग्निगेहिनी ।
अष्टाक्षरी महाविद्या भजतां सर्वसिद्धिदा ॥

(मेरुतन्त्रे)

पिप्पलादो मुनिश्छन्दो निवृज्ज्येष्ठाऽस्य देवता ।

---

* वज्रधारिणम् इति ४ पु० पा० ।

† रमा कामस्तथा लज्जा वाग्भवं वज्रवैपदम् ।
रोचनीये लज्जाद्वन्द्वं मन्त्रः स्वाहासमन्वितः ॥
इयं सा षोडशी प्रोक्ता सर्वकामफलप्रदा ।
कथिताः सकला विद्याः सारात् सारतराः शुभाः ॥
२ पु० इदं श्लोकद्वयमधिकं दृश्यते ।

षड्दीर्घबिन्दुयुक्तेन धकारेण षडङ्गकम् ॥
आद्यबीजद्वयान्तस्थैः षड्वर्णैर्न्यासमाचरेत् ।
अङ्गुष्ठादौ षडङ्गेषु पुनर्देवीं विचिन्तयेत् ॥

ध्यानं यथा ।

विवर्णा चञ्चला कृष्णा दीर्घा च मलिनाम्बरा ।
विमुक्तकुन्तला दीर्घा विधवा विरलद्विजा ॥
काकध्वजरथारूढा विलम्बितपयोधरा ।
शूर्पहस्ताऽतिरुक्षाक्षी धूतहस्ता त्वरान्विता ॥
प्रवृद्धरोमा तु भृशं जटिला कुटिलेक्षणा ।
क्षुत्पिपासार्दिता नित्यं सदा कलहतत्परा ॥
एवंविधां सदा ध्यायेत् ततः कर्म समाचरेत् ।

अथ पुरश्चरणम् ।

जपेत् कृष्णचतुर्दश्यां शून्यागारे दिवा निशि ।
उपवासपरश्चैवमेकाहात् सिद्धिमाप्नुयात् ॥
यद्वा श्मशाने विपिने जपेल्लक्षं तु वाग्यतः ।
सोष्णीष आर्द्रवासाश्च तेन मन्त्रः प्रसिध्यति ॥
होमश्चात्र घृतेनैव तर्पणादि ततश्चरेत् ।
अथ वा प्रजपेल्लक्षं श्मशाने विगताम्बरः ॥
निशाभोजी दशांशेन तिलैर्हवनमाचरेत् ।

अथ मन्त्रान्तरं तन्त्रान्तरे ।

धूँबीजत्रितयं प्रोच्य धुरयुग्मं समुच्चरेत् ।
धूमावतीपदं प्रोच्य क्रौँस्वाहा फट्समन्विता ॥
मन्त्रः प्राथमिकः प्रोक्तो द्वितीयं शृणु सादरम् ।
प्रणवं धूम्रबीजं च धूमावतिपदं वदेत् ॥

देवदत्तो धावतीति स्वाहान्तो मनुराडयम् ।
ऋषिः क्षपणकः ख्यातो गायत्री छन्द ईरितम् ॥
धूमावती देवता च धूँ बीजं बीजमीरितम् ।
स्वाहा शक्तिः समुच्चाटे विनियोगः प्रकीर्त्तितः ॥
धाँषट्कैस्तु षडङ्गानि ध्यानं श्रृणु वरानने ।
काकारूढाऽतिकृष्णाभा भिन्नदन्ता विरागिणी ॥
मुक्तकेशी सुधूम्राक्षी क्षुत्तृषार्त्ता रयातुरा ।
चञ्चला चातिकामार्त्ता क्लिष्टा पुष्टा पिशङ्गिका ॥
मलिना श्रमणी रक्ता व्यक्तगन्धा विरोधिनी ।
धूतशूर्पाग्रहस्ता च ध्येया धूमावती परा ॥

पुरश्चरणमाह ।

लक्षं जपेन्महेशानि जगदुच्चाटनं चरेत् ।

अथाघोरमन्त्रः (शारदायाम्)

अथाभिधास्ये विधिवदघोरास्त्रमनूत्तमम् ।
यस्य संस्मरणादेव सर्वे नश्यन्त्युपद्रवाः ॥
“हुमन्तः स्तम्भने मन्त्रः क्रोमाकृष्टौ समासने ।
वषडन्तः संवरणे नमोऽन्तो विषमासने ॥
ग्रहचौररिपुध्वंसे हुँ क्रोमन्तो विधीयते ।
शक्तान्तश्चाखिलेष्टास्यै क्षौमन्तो मारणे भवेत् ॥
फडन्तो भूतसंहारे मन्त्रोऽयं कल्पपादपः ।

(ईश्वरकल्पे) तु प्रस्फुरद्द्वयं बन्धद्वयं च । अयं मन्त्र एकचत्वारिंशदक्षर उद्धृतः (पदार्थादर्शटीकायाम्)”

मायास्फुरद्द्वयं भूयः प्रस्फुरद्द्वितयं ततः ।
घोरघोरतरेत्यन्ते तनुरूपपदं पुनः ॥

“ ” एतच्चिह्नान्तर्गतः पाठः केष्वप्यन्यपुस्तकेषु नोपलभ्यते ।

चटयुग्मं तदन्ते स्यात् प्रचट द्वितयं ततः ।
कहयुग्मं वमद्वन्द्वं* ततो बन्धयुगं पुनः ॥
घातयद्वितयं वर्म फडन्तः समुदाहृतः ।
एवं पञ्चाशदर्णोऽयमघोरास्त्रमहामनुः ॥
अघोरोऽस्य मुनिः प्रोक्तश्छन्दस्त्रिष्टुबुदाहृतम् ।
अघोररुद्रः संदिष्टो देवता मन्त्रवित्तमैः ॥
हृदयं पञ्चभिः प्रोक्तं शिरः षड्भिरुदाहृतम् ।
शिखा दशभिराख्याता तावद्भिः कवचं मतम् ॥
वसुवर्णैः स्मृतं नेत्रमाशार्णैरस्त्रमीरितम् ।

ध्यानम् ।

सजलघनसमाभं भीमदंष्ट्रं त्रिनेत्रं
भुजगधरमघोरं रक्तवस्त्राङ्गरागम् ।
परशुडमरुखड्गाखेटकं बाणचापौ
त्रिशिखनरकपाले बिभ्रतं भावयामि ॥

अथास्य पुरश्चरणं तत्रैव ।

लक्षमेकं जपेन्मन्त्रं घृतसिक्तैस्तिलैः शुभैः ।
तद्दशांशं प्रजुहुयान्मन्त्री मन्त्रस्य सिद्धये ॥

इति धूमावतीप्रकरणम् ।

अथ वगलामुखीविद्या ।

(मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि स्तम्भनीं वगलामुखीम् ।
तारं मायां समुच्चार्य वदेच्च वगलामुखि ॥
तदग्रे सर्वदुष्टानां ततो वाचं मुखं पदम् ।
स्तम्भयेति पदं जिह्वां कीलयेति ततः परम् ॥

---

* वहयुग्मं वदद्वन्द्वम् इति २ पु० पा० ।

बुद्धिं विनाशय हीँ ॐ स्वाहा षट्त्रिंशवर्णकः ।
नारायणो मुनिस्त्रिष्टुप्छन्दश्च वगलामुखी ॥
देवी बीजं तु हृल्लेखा स्वाहा शक्तिः समीरिता ।
विनियोगोऽस्य विख्यातः पुरुषार्थचतुष्टये ॥
हृल्लेखा हृदयं प्रोक्तं शिरश्च वगलामुखी ।
शिखा तु सर्वदुष्टानां ततो वाचं मुखं पदम् ॥
स्तम्भयेति च वर्मोक्तं जिह्वां कीलय नेत्रकम् ।
बुद्धिं विनाशयास्त्रं स्यात् षडङ्गन्यास ईरितः ॥

अथ ध्यानम् ।

गम्भीरां च मदोन्मत्तां तप्तकाञ्चनसन्निभाम् ।
चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ॥
मुद्गरं दक्षिणे पाशं वामे जिह्वां च वज्रकम् ।
पीताम्बरधरां सान्द्रवृत्तपीनपयोधराम् ॥
हेमकुण्डलभूषां च पीतचन्द्रार्धशेखराम् ।
पीतभूषणभूषां च स्वर्णसिंहासनस्थिताम् ॥

अथ पुरश्चरणम् ।

हरिद्राग्रथिता माला पीताम्बरधरः स्वयम् ।
पीतासनः स्मरेत् पीतमयुतं जपमाचरेत् ॥
दशांशेन कृतो होमः पीतद्रव्यैः प्रतर्पयेत् ।
सर्वं पीतोपचारेण मन्त्रः सिद्ध्यति मन्त्रिणः ॥

वज्रयोगिनीमिश्रकृतसंग्रहे तु ।

पीताम्बरधरो भूत्वा पूर्वाशाभिमुखस्थितः ।
लक्षमेकं जपेन्मन्त्रं हरिद्राग्रन्थिमालया ॥
ब्रह्मचर्ययुतो नित्यं प्रयतो ध्यानतत्परः ।

प्रियङ्गुपायसेनापि पीतपुष्पैश्च होमयेत्—इत्युक्तम् ॥

अथ मन्त्रान्तरं (यामले)

वह्निहीनेन्द्रयुग्माया वगलामुखि सर्वयुक् ।
दुष्टानां वाचमित्युक्त्वा मुखं स्तम्भय कीर्त्तयेत् ॥
जिह्वां कीलय बुद्धिं च विनाशय पदं वदेत् ।
पूर्वबीजं ततस्तारं वह्निजायावधिर्भवेत् ॥
ताराधिका चतुस्त्रिंशदक्षरा वगलामुखी ।
नारायणो* मुनिश्छन्दः पङ्क्तिः श्रीवगलामुखी ॥
देवता मन्त्रगं बीजं शक्तिः पावकसुन्दरी ।
सर्वशत्रुमुखस्तम्भे विनियोगः प्रकीर्त्तितः ॥
षड्दीर्घभाजा बीजेन षडङ्गन्यास ईरितः ।

अथ ध्यानम् ।

मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम् ।
†पीताम्बरां कनकभूषणमाल्यशोभां
देवीं भजामि धृतमुद्गरवैरिजिह्वाम् ॥
जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयन्तीम् ।
‡पदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि ॥

अथ पुरश्चरणं तत्रैव ।

जपमाला च देवेशि हरिद्राग्रन्थिसम्भवा ।
पीतासनसमारूढः पीतध्यानपरायणः ॥

---

* नारदोऽस्य मुनिरिति क्वचित् पाठः ।

† पीताम्बराभरणमाल्यविभूषिताङ्गीम् इत्यपि पाठो बहुत्र श्रूयते ।

‡ गदाभिघातेन इति २ पु० पा० ।

पीतपुष्पार्च्चनं नित्यमयुतं जपमाचरेत्।
तद्दशांशकृतो होमः पीतद्रव्यैः सुशोभनैः ॥

अस्याः पुमान् मृत्युञ्जयस्तन्मन्त्रपुरश्चरणं च शिवप्रकरण एवोक्तम्।

इति वगलामुखीप्रकरणम्।

अथ मातङ्गीविद्या।

(यामले)

अथ वक्ष्ये महादेवीं मातङ्गीं सर्वसिद्धिदाम्।
अस्याः सेवनमात्रेण वाक्सिद्धिं लभते ध्रुवम् ॥
प्रणवं च ततो मायां कामबीजं च कूर्चकम्।
मातङ्गी ङेयुता चास्त्रं वह्निजायावधिर्मनुः ॥
ऋषिः स्याद्दक्षिणामूर्त्तिर्विराट्छन्द उदीरितम्।
मातङ्गी देवता देवी सर्वसिद्धिप्रदायिनी ॥
अङ्गन्यासकरन्यासौ कुर्यान्मन्त्री समाहितः।
षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् ॥

अथ ध्यानम्।

श्यामाङ्गीं शशिशेखरां त्रिनयनां सद्रत्नसिंहासने
संस्थां रत्नविचित्रभूषणयुतां संक्षीणमध्यस्थलाम्।
आपीनस्तनमण्डलां स्मितमुखीं ध्यायेद्दधन्तीं क्रमाद्-
वेदैर्बाहुभिरङ्कुशासिलतिके पाशं तथा खेडकम् ॥

अथ पुरश्चरणम्।

पुरश्चरणकाले तु षट्सहस्रं जपेन्मनुम्।
तद्दशांशं हुनेदाज्यैः शर्करामधुभिः सह ॥
ब्रह्मतरूद्भवैः काष्ठैः साधकः शक्तिभिः सह।
एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत् ॥

अथ मन्त्रान्तरं (मेरुतन्त्रे)

अथोच्छिष्टां प्रवक्ष्यामि मातङ्गीं गोकुवर्णकाम् ।
नम उच्छिष्टचाण्डालि मातङ्गीति पदं वदेत् ॥
सर्ववशङ्करि स्वाहा मन्त्रोऽयं मोहयेज्जगत् ।
छन्दो निवृत् सगायत्रं मुनी नारदतुम्बुरौ ॥
देवता चात्र मातङ्गी द्वित्रित्रिरसाक्षिभिः ।
अङ्गानि स्युर्मन्त्रवर्णैस्ततो ध्यायेद्धृदम्बुजे ॥

ध्यानं यथा ।

कृष्णाम्बरां यावकार्द्रचरणामुन्नतस्तनीम् ।
मुक्ताप्रवालमालाढ्यां शङ्खकुण्डलधारिणीम् ॥

अथ मन्त्रान्तरं तत्रैव ।

अथान्यं संप्रवक्ष्यामि मातङ्गीमन्त्रमद्भुतम् ।
कामिनी रञ्जिनी स्वाहाऽष्टाक्षरोऽयमुदीरितः ॥
ऋषिः संमोहनश्छन्दो निवृत् प्रोक्ताऽस्य देवता ।
सर्वसंमोहिनी चाङ्गं द्विरावृत्तिपदैर्भवेत् ॥

अथ ध्यानम्

श्यामाङ्गीं वल्लकीं दोर्भ्यां वादयन्तीं सुभूषणाम् ।
चन्द्रावतंसां विविधैर्गायनैर्मोहतीं जगत् ॥

अनयोः पुरश्चरणम् ।

प्रजपेदयुतद्वन्द्वं दशांशं जुहुयात् ततः ।
मधूकजैस्त्रिमध्वक्तैः सर्वं संमोहयेज्जगत् ॥

अथ राजमातङ्गीमन्त्रस्तत्रैव ।

अथान्यं संप्रवक्ष्यामि चतुष्पञ्चाशदक्षरम् ।
ॐ ह्रीँ नमश्च ब्रह्मश्रीराजिते राजपूजिते ॥
जये च विजये गौर्यंषे गान्धारिपदं वदेत् ।

त्रिभुवनवशङ्करि सर्वस्त्रीपुरुषेति च ॥
वशङ्करि सुसु दुदु घेघे वावाऽग्निगेहिनी ।
अजो मुनिस्तथा छन्दो निवृद्गायत्रमीरितम् ॥
देवता राजमातङ्गी षडङ्गादि तु मायया ।

अथ ध्यानम् ।

"अमृतोदधिमध्यस्थे रत्नद्वीपे मनोहरे ।
स्वर्णप्राकारसंवीते मणिरत्नविनिर्मिते ॥
कदम्बविल्वकद्वारे कल्पवृक्षोपशोभिते ।
वेदिमध्ये सुखास्तीर्णे रत्नसिंहासने शुभे" ॥
अष्टपत्रं महापद्मं केशराढ्यं सकर्णिकम् ।
तन्मध्ये तु त्रिकोणं स्यादष्टपत्रं ततो बहिः ॥
पुनः षोडशपत्रं स्यात् तद्बाह्ये स्याच्चतुर्दलम् ।
वेदास्रं सचतुर्द्वारं मण्डलं प्रोक्तमुत्तमम् ॥
तस्य मध्ये सुखासीनां श्यामवर्णां शुचिस्मिताम् ।
कदम्बमालाभरणां पूजितां च सुरासुरैः ॥
प्रलम्बालकसंयुक्तां चन्द्ररेखावतंसिकाम् ।
ललाटे तिलकोपेतामीषत्प्रहसिताननाम् ॥
किञ्चित्स्वेदाम्बुमधुरललाटफलकोज्ज्वलाम् ।
वलीतरङ्गमध्याभां रोमराजीविराजिताम् ॥
सर्वाभरणसंयुक्तां मुक्ताहारविभूषिताम् ।
नानामणिगणोन्नद्धकटिसूत्रैरलङ्कृताम् ॥
वलयै रत्नखचितैः केयूरैर्मणिभूषितैः ।

" " एतच्चिह्नान्तर्गतः पाठः ५ पुस्तकेऽधिक उपलभ्यते ।

भूषितां द्विभुजां बालां मदाघूर्णितलोचनाम् ॥
आपीनमण्डलाभोगसमुन्नतपयोधराम् ।
प्रलम्बवर्णाभरणां कर्णोत्तंसविराजिताम् ॥
तमालनीलां तरुणीं मधुमत्तां मतङ्गिनीम् ।
चतुःषष्टिकलारूपां पार्श्वस्थशुकसारिकाम् ॥
कोटिबालार्कसंकाशां जपाकुसुमसन्निभाम् ।
एवं वा पीतवर्णां वा ध्यायेन्मातङ्गिनीं पराम् ॥

“अथ पुरश्चरणम् ।

अयुतं प्रजपेन्मन्त्रं होमयेत् तद्दशांशतः ।
बन्धूककुसुमैर्मन्त्री मधुरत्रयलोलितैः” ॥

अथ सुमुखीमन्त्रः (गुह्यातन्त्रे)

श्रृणु मन्त्रं महादेवि यथावत् कथयामि ते ।
दद्यादुच्छिष्टशब्दं तु तथा चाण्डालिनीति च ॥
सुमुखीति ततो देवीं कीर्त्तयेत् तदनन्तरम् ।
महापिशाचिनी तस्मान्मायाबीजमनन्तरम् ॥
विन्दुनादसमायुक्तं ठकारत्रितयं ततः ।
सविसर्गं महादेवि सर्वसिद्धिप्रदायकम् ॥
इयं विद्या महाविद्या सर्वपापप्रणाशिनी ।
स्वर्गदा मोक्षदा विद्या सर्वसौभाग्यदा* तथा ॥
सदोच्छिष्टमुखो भूत्वा स्मरेद्देवीं जयप्रदाम् ।
तदाऽऽचान्तो भवेद्देवि विनैवाचमने कृते ॥
दुर्भगा सुभगा नूनं दुःखिता सुखिनी भवेत् ।

“ ” एतच्चिह्नान्तर्गतः पाठः ५ पुस्तकेऽधिक उपलभ्यते ।

* राज्यसौभाग्यदा इति २-४ पु० पा० ।

वन्ध्याऽपि लभते पुत्रं शतहायनजीवनम् ॥
दुर्बलो बलमाप्नोति मूर्खो विद्यामवाप्नुयात् ।
यां यां प्रार्थयते सिद्धिं हठात् तां तामवाप्नुयात् ॥
विधानं चात्र वक्ष्यामि शृणु देवि वरानने ।
नारिदोषो न वा विघ्नो नाशौचं नियमो न च ॥
यस्य तिष्ठति मन्त्रोऽयं न च विघ्नैः स वाध्यते ।

तथा ।

अजो मुनिः समाख्यातश्छन्दो गायत्रमस्य तु ।
देवता सुमुखी प्रोक्ता मायया तु षडङ्गकम् ॥

अथ ध्यानम् ।

शवोपरिसमासीनां रक्ताम्बरपरिच्छदाम् ।
रक्तालङ्कारसंयुक्तां गुञ्जाहारविभूषिताम् ॥
षोडशाब्दां च युवतीं पीनोन्नतपयोधराम् ।
कपालकर्त्रिकाहस्तां परज्योतिःस्वरूपिणीम् ॥
वामदक्षिणयोगेन ध्यायेन्मन्त्रविदुत्तमः ।
उच्छिष्टेन वलिं दत्वा जपेत् तद्गतमानसः ॥
उच्छिष्टेनैव कर्त्तव्यो जपोऽस्याः सिद्धिमिच्छता ।
उच्छिष्टजपमानस्य जायन्ते सर्वसिद्धयः ॥

अस्य मन्त्रस्य पुरश्चरणमष्टसहस्रजपः ।

येषां जपे च होमे च……………… इत्यादिपूर्वोक्तवचनात् ।

अथ वश्यमातङ्गीमन्त्रः (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि वश्यमातङ्गिकामनुम् ।
ॐ राजमुखि राजाधिमुखि वश्यमुखीति च ॥
मायां श्रीँ क्लीँ देवदेवि महादेवि ततो वदेत् ।
देवाधिदेवि सर्वेति जनस्य मुखमुच्चरेत् ॥

मम वशं कुरु द्वन्द्वं स्वाहान्तोऽङ्ककृतार्णकः ।
दिक्सप्तकृतदेवेषुमन्त्रार्णैरङ्गकल्पनम् ॥
विज्ञेयं राजमातङ्गीतुल्यं पूजाजपादिकम् ।
प्रयोगाँश्चापि जानीयाद्विशेषाद्दशकृत् त्वियम् ॥

मन्त्रान्तरमाह ।

माया नमो हिलिद्वन्द्वं चण्डमातङ्गिनीति च ।
स्वाहेति तिथिवर्णोऽस्या न्यासपूजादिकं भवेत् ॥
राजमातङ्गिकातुल्यं जपश्चायुतसङ्ख्यकः ।
घृतपायसहोमश्च प्रयोगाद्यं च पूर्ववत् ॥

अथ कर्णमातङ्गीमन्त्रः ।

अथातः संप्रवक्ष्यामि कर्णमातङ्गिकामनुम् ।
वाग्भवं हृदयं चाथ श्रीमातङ्गिपदं वदेत् ॥
अमोघे सत्यवादिनि मम कर्णेपदं ततः ।
अवतरपदं द्वेधा सत्यं कथय युग्मकम् ॥
एह्येहि श्रीँ च मातङ्ग्यै नमस्त्र्यब्ध्यर्णको मनुः ।
अङ्गानि वाग्भवेनात्र पूजाद्यं च कृताकृतम् ॥

अथ पुरश्चरणम् ।

लक्षं जपः पायसाद्यैः होमः सिद्धो भवेन्मनुः ।
कर्णे तु कथयेद्देवी पृच्छकस्य शुभाशुभम् ॥

इति मातङ्गीप्रकरणम् ।

अथ लक्ष्मीविद्या ।

(शारदायाम्)

अथ वक्ष्ये श्रियो मन्त्रान् श्रीसौभाग्यफलप्रदान् ।
यस्याः कटाक्षमात्रेण त्रैलोक्यमपि वर्धते ॥
वान्तं वह्निसमारूढं वामनेत्रेन्दुसंयुतम् ।

बीजमेतच्छ्रियः प्रोक्तं चिन्तारत्नमिवापरम् ॥
ऋषिर्भृगुर्निवृच्छन्दो देवता श्रीः समीरिता ।
षड्दीर्घयुक्तबीजेन षडङ्गानि प्रकल्पयेत् ॥

अथ ध्यानम् ।

कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजै-
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैराषिच्यमानां श्रियम् ।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां
क्षौमावद्धनितम्बविम्बललितां बन्देऽरविन्दस्थिताम् ॥

अथ पुरश्चरणम् ।

भानुलक्षं जपेन्मन्त्री दीक्षितो विजितेन्द्रियः ।
श्रियमभ्यर्चयेन्नित्यं सुगन्धिकुसुमादिभिः ॥
तत्सहस्रं च जुहुयात् कमलैर्मधुरोक्षितैः ।
जपान्ते जुहुयान्मन्त्री तिलैर्वा मधुरान्वितैः ॥
वैल्वैः फलैर्वा जुहुयात् त्रिभिर्वा साधकोत्तमः ।

अथ मन्त्रान्तरं तत्रैव ।

वाग्भवं वनिता विष्णोर्माया मकरकेतनः ।
चतुर्बीजात्मको मन्त्रश्चतुर्वर्गफलप्रदः ॥
अङ्गानि कुर्याद्दीर्घाद्यै रमाबीजेन तत्त्ववित् ।

अथ ध्यानम् ।

माणिक्यप्रतिमप्रभां हिमनिभैस्तुङ्गैश्चतुर्भिर्गजै-
र्हस्ताग्राहितरत्नकुम्भसलिलैराषिच्यमानां सदा ।
हस्ताब्जैर्वरदानमब्जयुगलाभीतीर्दधानां हरेः
कान्तां काङ्क्षितपारिजातलतिकां वन्दे सरोजाननाम् ॥

अथ पुरश्चरणम् ।

भानुलक्षं हविष्याशी जपेदन्ते सरोरुहैः ।

जुहुयादरुणैः फुल्लैस्तत्सहस्रं जितेन्द्रियः ॥

अथ मन्त्रान्तरं तत्रैव ।

दीर्घायादिर्विसर्गान्तो ब्रह्मा भानुर्वसुन्धरा ।
वान्ते सिन्यै प्रिया वह्नेर्मनुः प्रोक्तो दशाक्षरः ॥
ऋषिर्दक्षो विराट् छन्दो देवता श्रीः समीरिता ।
देव्यै हृदयमाख्यातं पद्मिन्यै शिर ईरितम् ॥
विष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदम् ।
अस्त्रं कमलरूपिण्यै नमोऽन्ताः प्रणवादिकाः ॥
अङ्गमन्त्राः समुद्दिष्टा ध्यायेद्देवीमनन्यधीः ।

अथ ध्यानम् ।

आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजैर्बिभ्रती
दानं पद्मयुगाभयं च वपुषा सौदामिनीवल्लभा ।
मुक्तादामविराजमानपृथुलोत्तुङ्गस्तनोद्भासिनी
पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती हरिम् ॥

अथ पुरश्चरणम् ।

दशलक्षं जपेदेनं मन्त्रविद्विजितेन्द्रियः ।
दशांशं जुहुयान्मन्त्री मधुराक्तैः सरोरुहैः ॥

अथ माहलक्ष्मीमन्त्रस्तत्रैव ।

वाग्भवं शम्भुवनिता रमा मकरकेतनः ।
तार्त्तीयं च जगत्पार्श्वौ वह्निबीजसमुज्ज्वलः ॥
अर्घीशाढ्यो भृगुस्त्यै हृन्मन्त्रोऽयं द्वादशाक्षरः ।
महालक्ष्म्याः समुद्दिष्टस्ताराद्यः सर्वसिद्धिदः ॥
ऋषिर्विद्या समुद्दिष्टो गायत्री छन्द ईरितम् ।
देवता जगतामादिर्महालक्ष्मीः समीरिता ॥
हस्तौ संशोध्य मन्त्रेण तारादि हृदयान्तिकम् ।

बीजानां पञ्चकं न्यस्येदङ्गुलीषु यथाक्रमम् ॥
मन्त्रशेषं न्यसेन्मन्त्री तलयोरुभयोरपि ।
मूर्धादि चरणं यावन्मन्त्रेण व्यापकं चरेत् ॥
मूर्धाक्षिवक्षोगुह्याङ्घ्रिषु पञ्च बीजानि विन्यसेत् ।
शेषान् न्यसेत् सप्तवर्णान् हृदये सप्तधातुषु ॥
अङ्गानि पञ्चभिर्बीजैरस्त्रं शिष्टाक्षरैर्भवेत् ।
ज्ञानैश्वर्यादिभिर्युक्तैश्चतुर्थ्यन्तैः सजातिभिः ॥
ज्ञानमैश्वर्यंशक्तिं च बलवीर्यं स्वतेजसा ।
ज्ञानैश्वर्यादयः प्रोक्ताः षट् क्रमादङ्गयोजिताः ॥

ध्यानमाह ।

एवं न्यस्तशरीरोऽसौ स्मरेद्ध्यानमनुत्तमम् ।
चम्पकाशोकपुन्नागपाटलैरुपशोभितम् ॥
लवङ्गमाधवीविल्वदेवदारुनमेरुभिः ।
मन्दारपारिजाताद्यैः कल्पवृक्षैः सुपुष्पितैः ॥
चन्दनैः कर्णिकारैश्च मातुलुङ्गैः सवञ्जुलैः ।
दाडिमीलकुचाङ्कोलैः पूगैः कुरवकैरपि ॥
कदलीकुन्दमन्दारनारिकेलैरलङ्कृतम् ।
अन्यैः सुगन्धिपुष्पाद्यैर्वृक्षखण्डैश्च मण्डितम् ॥
मालतीमल्लिकाजातिकेतकीशतपत्रकैः ।
यावन्तीतुलसीनन्द्यावर्त्तैर्दमनकैरपि ॥
सर्वर्त्तुकुसुमोपेतैर्नमद्भिरुपशोभितम् ।
मन्दमारुतसम्भिन्नं कुसुमामोदिदिङ्मुखम् ॥
तस्य मध्ये सदा फुल्लैः कुसुमोत्पलपङ्कजैः ।
सौगन्धिकैश्च कह्लारैर्नवैः कुवलयैरपि ॥

हंससारसकारण्डभ्रमरैश्चक्रनामभिः ।
अन्यैः कलकलाराविविहङ्गैरुपशोभिते ॥
महासरसि तन्मध्ये पुलिनेऽतिमनोहरे ।
परितः पारिजाताद्यमण्डितं मणिकुट्टिमम् ॥
उद्यदादित्यसंकाशभास्वरं शशिशीतलम् ।
चतुर्द्वारसमायुक्तं हेमप्राकारशोभितम् ॥
रत्नोपक्लप्तसंशोभिकपाटाष्टकसंयुतम् ।
नवरत्नसमाक्लप्तं तुङ्गगोपुरतोरणम् ॥
हेमदण्डं शिखालम्बि ध्वजावलिपुरस्कृतम् ।
नवरत्नसमाबद्धस्तम्भराजिविराजितम् ॥
सहस्रदीपसंयुक्तदीपदण्डविराजितम् ।
तप्तहाटकसंक्लप्तवातायनमनोहरम् ॥
नानारत्नांशुकोद्बद्धसुवर्णशतकोटिभिः ।
किङ्किणीमालिकायुक्तपताकाभिरलङ्कृतम् ॥
जातरूपमयै रत्नविचित्रैरतिविस्तृतैः ।
माणिक्यवज्रवैदूर्यस्वर्णमालावलीयुतैः ॥
अन्तरान्तरसम्बद्धरत्नैर्दृष्टिमनोहरैः ।
विचित्रैश्चित्रबद्धैश्च वितानैरुपशोभितम् ॥
सर्वरत्नसमायुक्तं हेमकुट्टिममुज्ज्वलम् ।
केतकोमालतीजातीचम्पकोत्पलकेसरैः ॥
मल्लिकातुलसीवाशानन्द्यावर्त्तकदम्बकैः ।
एतै रम्यैश्च कुसुमैरलङ्कृतमहीतलम् ॥
अब्जकाश्मीरकस्तूरीमृगनाभितमालकैः ।

चन्दनागुरुकर्पूरैरामोदितदिगन्तरम् ॥
एवं सञ्चिन्त्य मनसा मण्डपं सुमनोहरम् ।
तन्मध्ये भावयेन्मन्त्री पारिजातं मनोहरम् ॥
तस्याधस्तात् स्मरेन्मन्त्री रत्नसिंहासनं महत् ।
तस्मिन् सञ्चिन्तयेद्देवीं महालक्ष्मीं मनोहराम् ॥
बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारोज्ज्वलां
रत्नाकल्पविभूषितां कुचनतां शालैः करैर्मञ्जरीम् ।
पद्मौ कौस्तुभरत्नमप्यविरतं सम्बिभ्रतीं सुस्मितां
फुल्लाम्भोजविलोचनत्रययुतां ध्यायेत् परां देवताम् ॥
शिञ्जन्मञ्जीरसंशोभिपादाम्भोजविराजिताम् ।
नवरत्नगणाकीर्णकाञ्चीदामविभूषिताम् ॥
मुक्तामाणिक्यवैदूर्यसम्बद्धोदरबन्धनाम् ।
विभ्राजमानां मध्येन वलित्रितयशोभिताम् ॥
जाह्नवीसलिलावर्त्तशोभिनाभिविभूषिताम् ।
पटीरपङ्ककर्पूरकुङ्कुमालङ्कृतस्तनीम् ॥
वारिवाहविनिर्मुक्तमुक्तादामगरीयसीम् ।
बिभ्रतीमुत्तरासङ्गं दुकूलपरिकल्पितम् ॥
तप्तकाञ्चनसम्बद्धवैदूर्याङ्गदभूषणाम् ।
पद्मरागस्फुरत्स्वर्णकङ्कणाढ्यकराम्बुजाम् ॥
माणिक्यशकलाबद्धमुद्रिकाभिरलङ्कृताम् ।
तप्तहाटकसंक्लृप्तमालाग्रैवेयशोभिताम् ॥
विचित्रविविधाकल्पां कम्बुसंकाशकन्धराम् ।
उद्यद्दिनकराकारमणिताटङ्कमण्डिताम् ॥

रत्नाङ्कितलसत्स्वर्णकर्णपूरोपशोभिताम् ।
जपाविद्रुमलावण्यललिताधरपल्लवाम् ॥
दाडिमीफलबीजाभदन्तपङ्क्तिविभूषिताम् ।
कलङ्ककार्श्यनिर्मुक्तशरच्चन्द्रनिभाननाम् ॥
पुण्डरीकदलाकारनयनत्रयशोभिताम् ।
भ्रूलताजितकन्दर्पवरकार्मुकविभ्रमाम् ॥
विकशत्तिलपुष्पश्रीविजयोद्यतनासिकाम् ।
ललाटकान्तिविभवविजितार्धसुधाकराम् ॥
सान्द्रसौरभसंपन्नकस्तूरीतिलकाङ्किताम् ।
मत्तालिमालाविलसदलकाढ्यमुखाम्बुजाम् ॥
पारिजातप्रसूनश्रीवाहिधमिल्लबन्धनाम् ।
अनर्घरत्नघटितमुक्काटङ्कितमस्तकाम् ॥
सर्वलावण्यवसतिं भवनं विभ्रमश्रियः ।
तेजसां जन्मभूमिं तां महालक्ष्मीं विचिन्तयेत् ॥

अथ पुरश्चरणम् ।

एवं ध्यात्वा ततो देवीं हविष्याशी जितेन्द्रियः ।
भानुलक्षं जपेन्मन्त्री दशांशं जुहुयात् तिलैः ॥
जुहुयात् श्रीफलैः पद्मैः प्रत्येकमयुतं ततः ।
तर्पयेत् सलिलैः शुद्धैः सुगन्धैरयुतद्वयम् ॥

(मेरुतन्त्रे)

जपेद्भास्करलक्षं च नियताशी यतव्रतः ।
तद्दशांशं प्रजुहुयाद्घृतैस्त्रिस्वादुसंयुतैः ॥
पद्मै रमाद्रुमफलैः प्रत्येकमयुतं हुनेत् ।
सुशीतैः शुचिभिस्तोयैस्तर्पयेदयुतद्वयम् ॥

अथ मन्त्रान्तरं तत्रैव ।

शम्भुपत्नी श्रिया रुद्धा कमौ भगवती मही ।
ब्रह्माऽऽदित्यो धरा दीर्घा लकारो भगवान् मरुत् ॥
प्रसीदयुगलं भूयः श्रीरुद्धा भुवनेश्वरी ।
महालक्ष्मी नमोऽन्तः स्यात् प्रणवादिरयं मनुः ॥
सप्तविंशत्यक्षराढ्यः प्रोक्तः सर्वसमृद्धिदः ।
कमले हृदयं प्रोक्तं शिरः स्यात् कमलालये ॥
शिखा प्रसीद तेनैव कवचं चतुरक्षरैः ।
अस्त्रमेतैः पदैः कुर्याच्छ्रीबीजपुटितैः पृथक् ॥

अथ ध्यानम् ।

सिन्दूरारुणकान्तिमब्जवसतीं सौन्दर्यवारां निधिं
कोटीराङ्गदहारकुण्डलकटीसूत्रादिभिर्भूषिताम् ।
हस्ताब्जैर्वसुपात्रमब्जयुगलादर्शौ वहन्तीं परा-
मावीतां परिचारिकाभिरनिशं ध्यायेत् प्रियां शार्ङ्गिणः ॥

अथ पुरश्चरणम् ।

लक्षं जपेत् फलैर्बिल्वैर्जुहुयान्मधुरोक्षितैः ।
दशांशं संस्कृते वह्नौ प्राक्प्रोक्तेनैव वर्त्मना ॥

तन्त्रान्तरे ।

मन्दाक्षमिन्दिरारुद्धं त्र्यक्षरोऽयं महामनुः ।
हृदन्तः पञ्चवर्णोऽस्य सर्वमेकार्णवद्भवेत् ॥

अथ साम्राज्यलक्ष्मीमन्त्रः (मेरुतन्त्रे)

अथ वक्ष्ये गणेशेन काशीराज्याप्तये मम ।
शाम्बादित्यस्य रक्षोदिग्भागे लक्ष्मीरुपासिता ॥
साम्राज्यलक्ष्मीर्विख्याता गतराज्यप्रदायिनी ।
लक्ष्मीविनायकस्तत्र प्रसिद्धोऽसौ गजाननः ॥

दक्षिणेनैव मार्गेण तस्याः सिद्धिर्न वामतः ।
सकारं च हकारं च कलरा वर्णपञ्चकम् ॥
ईकारस्वरसंयुक्तं प्रथमं कूटमुच्यते ।
हँ बीजं तु द्वितीयं स्यात् प्रोक्तोऽयं द्व्यक्षरो मनुः ॥
ऋषिर्हरिश्च गायत्री छन्दो लक्ष्मीश्च मोहिनी ।
साम्राज्यदा देवतोक्ता कूटं बीजं प्रकीर्त्तितम् ॥
शक्तिः श्रीँ च षडङ्गानि षड्भिर्दीर्घैः समाचरेत् ।

अथ ध्यानम् ।

अतशीपुष्पसकाशां रत्नभूषणभूषिताम् ।
शङ्खचक्रगदापद्मशार्ङ्गबाणधरां करैः ॥
षड्भिः कराभ्यां देवेशीं वरदाभयशोभिताम् ।
एवमष्टभुजां ध्यात्वा त्रिलक्षं प्रजपेत् सुधीः ॥
तद्दशांशेन पद्मैस्तु हुनेत् साम्राज्यसिद्धये ।
एवमाराधयेल्लक्ष्मीं साम्राज्यं स्यादसंशयम् ॥

नारायणमन्त्रस्तु तत्प्रकरण एवोक्तः ।

इति लक्ष्मीविद्याप्रकरणम् ।

अथ नीलक्रमादयः ।

(शक्तिसङ्गमवीरतन्त्रसारसंग्रहेषु)

देव्युवाच ।

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
दशानामपि विद्यानां दश वै ये क्रमाः प्रभो ॥
पुरैव कथिताः स्वामिँस्तान् क्रमान् वद संप्रति ।

शिव उवाच ।

रहस्यातिरहस्यं च कथ्यते तव भक्तितः ।
महानीलक्रमेणैव कालिका सिद्धिदायिनी ॥

महानीलक्रमो देवि द्विविधः परिकीर्त्तितः ।
सकलो निष्कलश्चेति तं क्रमं शृणु पार्वति ॥
खड्गहस्तः शिरोन्यस्तः सर्वदा मुक्तकुन्तलः ।
सदा मांसासवोल्लासी विजयाघूर्णलोचनः ॥
सिन्दूरतिलकं भाले पाणौ तु मदिरारसम् ।
रात्रौ पर्यटनं चैव रात्रौ शक्तेः प्रपूजनम् ॥
योनिचुम्बनकं कर्म शक्तेरालिङ्गनं तथा ।
न करोति नरो यस्तु स कथं तव पूजकः ॥
ताम्बूलयोनिचक्रं च मुण्डमालां शवासनम् ।
सिन्दूरं खड्गकं चैव संविदासवयो रसम् ॥
एतान् विहाय यः कश्चित् कालीं साधितुमुद्यतः ।
इह क्षोभमवाप्नोति परत्र नरकं व्रजेत् ॥
कोट्यर्बुदयुगैर्देवि न हि सिध्यति कालिका ।
सिन्दूरविन्दुर्भ्रूमध्ये स्वयम्भूसुनिपत्रकम् ॥
रक्तचन्दनकं वाऽपि त्रिपुण्ड्रं च ततोपरि ।
कुर्वन् दले कज्जलस्य विन्दुर्देयो महेश्वरि ॥
महानीलक्रमे देवि तिलकः परिकोर्त्तितः ।
श्मशानशायी मांसाशी संविदानन्दमानसः ॥
स्त्रियं पश्यन् स्पृशन् गच्छन् सर्वकालं जपं चरेत् ।
वेश्यारतः श्मशानस्थो मृदुचूडकसंयुतः ॥
दन्ताक्षमालया देवि गजदन्तेन मेरुणा ।
मालां कृत्वा जपेद्देवि सदा ताम्बूलचर्वकः ॥
कपालमालाभरणो रामाचुम्बनतत्परः ।

शक्त्यानन्दो नेत्रयुगे मुखे हाला गृहाङ्गणे ॥
वेश्या बालाकरे माला शक्तिलीला भगाम्बुजे ।
योनिसञ्चुम्बनं कृत्वा सर्वकाले जपं चरेत् ॥
शक्तेर्भगं नमस्कार्यं सर्वमेतच्चराचरम् ।
अधिकारी प्रहृष्टात्मा स्त्रीभक्तो विजितेन्द्रियः ॥
ईदृग्विधो नरो देवि महानीलक्रमो मतः ।
राजदन्तमयी माला द्विरदोष्ट्राश्वसम्भवा ॥
अशक्तानां निष्कलः स्यात् तं क्रमं शृणु पार्वति ।
पीताया दुग्धकं पित्वा सच्चिदानन्दमानसः ॥
स्फाटिकीं मालिकां कृत्वा विहारे जपमाचरेत् ।
दिक्कालनियमो नास्ति स्थित्यादिनियमो न च ॥
न जपे कालनियमो महामन्त्रस्य साधने ।
यस्मिन् मन्त्रे य आचारस्तत्र धर्मस्तु तादृशः ॥
भ्रान्तिस्तत्र न कर्त्तव्या स्वर्गो वा मोक्ष एव वा ।
मृदु कोमलकं देवि चूडकं वाऽप्यचूडकम् ॥
शवं वीरासनं कृत्वा योनित्वगासनं च वा ।
कामरूपासनं देवि सुरतासनमेव च ॥
सिन्दूरासनकं देवि पर्वतासनमेव च ।
प्रयोगासनकं देवि महाप्रयोगासनं तथा ॥
श्रीमुण्डसुरतं वाऽपि श्रीवीरसुरतं च वा ।
पञ्चवीरासनं देवि सुरेन्द्रादिदिशां क्रमात् ॥

इति नीलक्रमः ।

अथ महाचीनक्रमस्तत्रैव ।

देव्युवाच ।

देवेश श्रोतुमिच्छामि महाचीनक्रमं परम् ।

शिव उवाच ।

महाचीनक्रमो देवि कथ्यते सांप्रतं मया ।
महाचीनक्रमेणैव तारा शीघ्रफलप्रदा ॥
ब्रह्मचीनो वीरचीनो दिव्यचीनस्तृतीयकः ।
महाचीनो निष्कलश्च चीनः पञ्चविधो मतः ॥
महाचीनक्रमो देवि द्विविधः परिकीर्त्तितः ।
सकलो निष्कलश्चेति सकलो बौद्धगोचरः ॥
निष्कलो ब्राह्मणानां च द्वितीयः परिकीर्त्तितः ।

तथा ।

स्नानादि मानसं शौचं मानसः प्रवरो जपः ।
पूजनं मानसं दिव्यं मानसं तर्पणादिकम् ॥
मानसो नियमः प्रोक्तो मानसं दन्तधावनम् ।
सर्व एव शुभः कालो नाशुभो विद्यते क्वचित् ॥
न विशेषो दिवा रात्रौ न सन्ध्यायां महानिशि ।
शुद्धिं न कारयेदत्र निर्विकल्पं मनश्चरेत् ॥
नात्र शुद्धेरपेक्षाऽस्ति न चामेध्यादि दूषणम् ।
य एवं चिन्तयेन्मन्त्रं सर्वकामसमृद्धिदम् ॥
गद्यपद्यमयी वाणी सभायां तस्य जायते ।
तस्य दर्शनमात्रेण वादिनो निष्प्रभा मताः ॥
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ।
सर्वदा पूजयेद्देवीमस्नातः कृतभोजनः ॥

महानिश्यशुचौ देशे बलिं मन्त्रेण दापयेत् ।
स्त्रीद्वेषो नैव कर्त्तव्यो विशेषात् पूजनं स्त्रियः ॥
जपस्थाने महाशङ्खं निवेश्योर्ध्वे जपं चरेत् ।
स्त्रियं गच्छन् स्पृशन् पश्यन् यत्र कुत्राप्यचूडके ॥
भुक्त्वा ताम्बूलमन्यांश्च भक्ष्यद्रव्यान् यथारुचि ।
मांसं मत्स्यं दधि क्षौद्रं संविदासवयो रसम् ॥
भोज्यान्यशेषभक्ष्याणि दत्वा भुक्त्वाऽऽचरेज्जपम् ।
दिक्कालनियमो नास्ति स्थित्यादिनियमो न च ॥
न जपे कालनियमो नार्चादिषु बलिष्वपि ।
स्वेच्छानियम उक्तोऽत्र महामन्त्रस्य साधने ॥
वस्त्रासनं गेहदेहस्पर्शास्पर्शादिवारिणा ।
तैलं संलाप्य देवेशि ताम्बूलं भक्षयन् सदा ॥
नानाम्बराणि सन्धार्य देहं वस्त्रेण मार्जयेत् ।
एवं स्नानं चरेद्देवि सर्वदा तद्गताशयः ॥
केशान् संवर्धयेद्देवि सर्वदा तैलभूषितः ।
नाधर्मो विद्यते सुभ्रु किं तु धर्मो महान् भवेत् ॥
स्वेच्छाचारोऽत्र कथितः प्रचरेद्धृष्टमानसः ।
कृतार्थमन्यमानस्तु सन्तोष्य निजमानसम् ॥
हरेर्नाम न गृह्णीयान्न स्पृशेत् तुलसीदलम् ।
वर्जयेद्बिल्वपत्रं च मरुं यत्नेन वर्जयेत् ॥
नान्यचिन्ता प्रकर्त्तव्या नान्यनिन्दा कदा चन ।
नान्यमन्त्रं जपेद्देवि निर्विकल्पः सदा भवेत् ॥
सद्यो मद्यं पिबेद्देवि मातङ्गीभिर्विहारवान् ।
योनिं चुम्बँल्लिहन् पश्यन् जपं कुर्यादनन्यधीः ॥

योनौ विचिन्त्य जप्तव्यं सिद्धिर्वत्सरमात्रतः ।
अन्यथा नैव सिद्धिः स्यात् प्रजप्तैरपि कोटिभिः ॥
पुरश्चरणलक्षैश्च होमादीनां च कोटिभिः ।
भ्रूयुग्मे कुन्तले देवि सिन्दूरं तदनन्तरम् ॥
कुचन्दनं त्रिपुण्ड्रं च पङ्कजं वा सकेशरम् ।
मुण्डमाला गले धार्या कपालं पाणिसङ्गतम् ॥
इत्याचारपरो नित्यं महाचीनक्रमी भवेत् ।
कर्णनेत्रान्तरस्थो यो महाशङ्खः प्रकीर्त्तितः ॥
पञ्चाशन्मणिभिर्माला गोनरेभास्थिसम्भवा ।
मालां कुर्यान्महेशानि चाष्टसिद्धीश्वरो भवेत् ॥
सैव तारा महेशानि नात्र कार्या विचारणा ।
यस्मिन् मन्त्रे य आचारस्तत्र धर्मस्तु तादृशः ॥
कृतार्थस्तेन जायेत स्वर्गो वा मोक्ष एव वा ।

(स्वच्छन्दभैरवतन्त्रे)

न शौचादिक्रियाः कार्याः स्मृतिशास्त्रप्रचोदिताः ।
एका लिङ्गे गुदे पञ्च इत्याद्या याः प्रकीर्त्तिताः ॥
न ताः कार्याः साधकेन्द्रैः यदीच्छेच्चिरजीवितम् ।

(सिद्धान्तसंग्रहेऽपि)

न देशकालनियमो भक्ष्यादिनियमो न हि ।
शौचादिनियमो नास्ति महामन्त्रस्य साधने ॥
दिवसे वा तथा रात्रौ रात्रिशेषे निशामुखे ।
मांसं भुक्त्वाऽऽसवं पीत्वा स्त्रियं गत्वा चरेज्जपम् ॥

(शाक्तसङ्गमे)

सकलस्तु मया प्रोक्तो निष्कलं शृणु पार्वति ।

मणिबन्धादधः पाणिं पादौ गुल्फादधः शिवे ॥
मुखं प्रक्षालयेद्देवि चीनस्नानमिदं भवेत् ।
जानुभ्यामवनीं गत्वा भूमौ मस्तकमानयेत् ॥
चीनमार्गे नमस्कारः कीर्त्तितस्तु मया तव ।
पूर्वक्रमस्य देवेशि क्रमः प्रतिनिधिर्मया ॥
स्नानदानादिकं कृत्वा तथा पूजादिकं प्रिये ।
तथा म्लानो न मे देहो न च पापं ममास्ति वै ॥
किं स्नानं कस्य चित् स्नानमेस्नातः कृतभोजनः ।
सर्वमेव हृदम्भोजे मयि सर्वं प्रतिष्ठितम् ॥
मयि जाता मन्त्रसिद्धिर्मम देवा वरप्रदाः ।
तेजोरूपं जगत्सर्वं तारिणी तत्स्वरूपधृक् ॥
तत्तेजसा स्वस्थदेहं संभाव्य जपमाचरेत् ।
भावनावशमापन्नो भवेद्योगी महाकविः ॥
गुडार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च ।
तदभावे जलं देवि संभाव्य पूजनं चरेत् ॥
तद्भावहृदयासन्नः सदा तद्गतमानसः ।
द्वन्द्वभावं परित्यज्य सर्वसिद्धीश्वरो भवेत् ॥
ब्रह्मा चैव वशिष्ठश्च तथाऽन्ये च ऋषीश्वराः ।
निष्कलङ्कममार्गेण भजन्ति सततं शिवे ॥
ताराभक्ता महेशानि ब्राह्मणाः परिकीर्त्तिताः ।
ब्रह्मविद्या महाविद्या सर्वत्र दुर्लभा कलौ ॥
रहस्यातिरहस्यं च गोप्तव्यं पशुसंकटे ।

इति महाचीनक्रमः ।

अथ दिव्यचीनक्रमस्तत्रैव ।

देव्युवाच ।

छिन्नमस्ताविधौ देवि क्रमं मे ब्रूहि सत्वरम् ।
शिव उवाच ।
दिव्यचीनक्रमेणैव छिन्नमस्ता वरप्रदा ।
क्रमद्वयं महेशानि पूर्वमेव प्रकाशितम् ॥
एतस्यास्तिलको देवि भ्रूमध्ये च कुचन्दनम् ।
तदन्ते रोचनापत्रैस्त्रिपुण्ड्रं दिव्यवर्णकैः ॥
श्मशानभस्मविन्दुं तु तन्मध्ये दापयेत् प्रिये ।
मुखे मुखं प्रदत्वा तु सर्वकालं जपेच्छिवे ॥
योनिचक्रं समालोक्य यत् किंचित् कुरुते नरः ।
तत् तदक्षयमाप्नोति छिन्नाविद्याप्रसादतः ॥
दिक्कालनियमो नास्ति स्थित्यादिनियमो न हि ।
पाताले कुहरे दुर्गे पर्वते तटिनीतटे ॥
अन्तरिक्षे तथा भूमौ सर्वत्र जपमाचरेत् ।
विशेषः कथितो देवि शक्तितत्त्वस्य पालकः ॥

इति दिव्यचीनक्रमः ।

अथ गन्धर्वक्रमः ।

देव्युवाच ।

गन्धर्वाख्यं क्रमं देव कथयस्व मयि प्रभो ।

शिव उवाच ।

गन्धर्वाख्यक्रमेणैव सुन्दरी सिद्धिदायिनी ।
गन्धर्वाख्यक्रमो देवि कथ्यते शृणु साम्प्रतम् ॥
भ्रूमध्ये कुङ्कुमं देवि तन्मध्ये मालयागुरु ।

अष्टगन्धत्रिपुण्ड्रस्य मध्ये कस्तूरिकान्वितम् ॥
सुगन्धिश्वेतलौहित्यपुष्पैः संभूषितो नरः ।
अष्टगन्धस्य धूपेन नानासौगन्ध्यभूषितः ॥
रक्तमाल्याम्बरधरो मुक्ताहारोपशोभितः ।
पूर्णाभिषिक्ते शिरसि तेन तत्र न मुण्डनम् ॥
सदा चोष्णोदकैः स्नायात् तदभावे यथोदकैः ।
गृहं चित्रैस्तु संचित्रं दर्पणोदरसन्निभम् ॥
वितानध्वजभूषाढ्यं घण्टानादोपशोभितम् ।
पञ्चवादित्रसंयुक्तं नानाघोषसमन्वितम् ॥
अन्तःसूक्ष्माम्बरैर्युक्तं स्वर्णपात्रादिरञ्जितम् ।
ग्रैवेयवलयाङ्गुल्यभूषणैर्भूषितः सदा ॥
नानामधुरभोज्यैश्च दुग्धपानैरनेककैः ।
नानाभोगेन युक्तोऽयं गन्धर्वाख्यक्रमो भवेत् ॥

इति गन्धर्वक्रमः ।

अथ भैरवक्रमः ।

इति संक्षेपतः प्रोक्तं भैरवाख्यं शृणु क्रमम् ।
स्वपुष्पक्रमयोगेन भैरवी भुवि दुर्लभा ॥
स्वपुष्पाख्यक्रमो देवि कथ्यते शृणु साम्प्रतम् ।
तरुणीं सुन्दरीं रम्यां तारुण्यामृतविग्रहाम् ॥
सदा रते साभिलाषां मैथुनोद्यतमानसाम् ।
मन्त्रयन्त्रसमायुक्तां समानीय महेश्वरि ॥
नग्नां तां च विधायादौ स्वयं नग्नो जपं चरेत् ।
परस्परालोकनं च कर्त्तव्यं च परस्परम् ॥

अविकारी यदा देवि साधनार्हो न चान्यथा ।
विकारे भावमाने च साधको नश्यति क्षणात् ॥
साऽपि चेद्देवदेवेशि सविकारा यदा भवेत् ।
पुष्पिणीमनुना देवि बलात् पुष्पं समानयेत् ॥
द्राविणीमनुना देवि बलाद्दृष्ट्या द्रवं नयेत् ।
केलिदोषवशाद्देवि नायं योगो भविष्यति ॥
तस्मात् पाशवकल्पेन बाला शस्ताऽधुना शिवे ।
बालायामुभयाचारो दक्षिणो मुख्य एव हि ॥

तथा ।

शीघ्रं च सिद्धिकामश्चेद्गवाक्षं योगमभ्यसेत् ।
यत्र स्त्रीणां समूहोऽस्ति नदीनदसमुद्रके ॥
यत्र स्नानं प्रकुर्वन्ति गवाक्षं तत्र कारयेत् ।
तमालोक्य प्रयत्नेन जपं कुर्यान्निरन्तरम् ॥
इति संक्षेपतः प्रोक्तं तिलकं शृणु पार्वति ।
वामहस्ततले यन्त्रं विलिख्य यत्नतः शिवे ॥
अवशिष्टेन तिलकं कारयेत् परमेश्वरि ।
भाले कस्तूरिकाविन्दुं मुनिपत्रं कुचन्दनम् ॥
तन्मध्ये श्वेतविन्दुं च केशादिपूर्ववद्भवेत् ।
दशबिद्याविधौ देवि केशवर्धनमीरितम् ॥

इति भैरवक्रमः ।

अथ कमलाक्रमः ।

देव्युवाच ।

देवेश श्रोतुमिच्छामि कमलाक्रमनिर्णयम् ।

शिव उवाच ।

भ्रूमध्ये घुसृणं देवि सिन्दूरं तदनन्तरम् ।

श्वेतं त्रिपुण्ड्रं देवेशि तन्मध्ये केशरं शिवे ॥
स्नातः शुक्लाम्बरधरस्त्रिसन्ध्यं स्नानमाचरेत् ।
हविष्याशी भूमिशायी मधुरान्नप्रियो नरः ॥
भृगुवासरपर्यन्तं द्वितीयं भृगुवासरम् ।
प्रत्यहं पूजयेद्द देवि नानावादित्रनिस्वनैः ॥
दिनषोडशपर्यन्तं प्रत्यहं तु समाचरेत् ।
पुनस्तद्दिनमारभ्य तद्दिनान्तं महेश्वरि ॥
पूजयेत् प्रयतो नित्यं देवताभावतत्परः ।
प्रदक्षिणा प्रकर्त्तव्या कलाभावक्रमेण च ॥
दीपास्तत्र प्रदातव्याः कलावृद्धिक्रमेण च ।
ब्राह्मणान् भोजयेन्नित्यं कलाभावक्रमेण च ॥
इत्याचारपरः श्रीमान् विष्णुरूपो नरो भवेत् ।
राजचिह्नानि सर्वाणि प्रयतः पूजयेत् सदा ॥
सर्वसाम्राज्यलक्ष्म्यास्तु नाथो भूयान्न संशयः ।
धनदा तस्य गेहस्था राजा च किङ्करो भवेत् ॥

इति कमलाक्रमः ।

अथ ब्रह्ममार्गक्रमः ।

देव्युवाच ।

देवेश श्रोतुमिच्छामि ब्रह्ममार्गक्रमं शिव ।

शिव उवाच ।

वेश्यायाः कज्जलं देयं सिन्दूरेण त्रिपुण्ड्रकम् ।
हरिद्रा भ्रूयुगे देया श्वेतपत्रं समाचरेत् ॥
रक्तविन्दुं च तन्मध्ये सर्वदा तद्गतो भवेत् ।
भोजने शयने रात्रौ मैथुनं सर्वदा भवेत् ॥

उच्छिष्टहस्तो देवेशि उच्छिष्टेन बलिं हरेत् ।
शक्त्युच्छिष्टं परोच्छिष्टं भोजनं सार्वकालिकम् ॥
जपं कुर्यान्महेशानि रात्रावेव जपं चरेत् ।
ताम्बूलभक्षी मांसाशी भुक्त्वा चार्चां च कारयेत् ॥
उच्छिष्टहस्तः प्रजपेद्ब्रह्ममार्गः प्रकीर्त्तितः ।

इति ब्रह्ममार्गक्रमः ।

अथ महाराजक्रमः ।

देव्युवाच ।

महाराजक्रमं देव कथयस्व मम प्रभो ।

शिव उवाच ।

महाराजक्रमो देवि कथ्यते शृणु साम्प्रतम् ।
नानाविचित्रसोपानमण्डिते चित्रमण्डपे ॥
सौधाट्टालकसंशोभिवितानध्वजशोभिते ।
नानोपवनसंयुक्ते हंसमायूरशोभिते ॥
नानाविचित्रशब्देन गजवाजिविराजिते ।
सर्वतो भद्रसंयुक्ते नानाभरणभूषिते ॥
धूपामोदसमायुक्ते चित्रदीपैरलङ्कृते ।
रत्नसिंहासने रम्ये रत्नाभरणभूषिते ॥
जातीचम्पकपुन्नागकेतकीगन्धशोभिते ।
कर्पूरागुरुकस्तूरीरोचनाकुङ्कुमैर्युते ॥
जटामांस्यादिसौगन्धलेपनैः परिभूषितः ।
घण्टादिनादसंयुक्तः सर्वदा शुद्धमानसः ॥
आनन्दमग्नहृदयो दिव्यवस्त्रैरलङ्कृतः ।
दिव्यमालाम्बरधरो दिव्यभूषाविभूषितः ॥

ताम्बूलपूर्णवदनो देवेन्द्र इव राजितः ।
वेदपाठैर्नृत्यपात्रैर्भोगपात्रैर्निनादितः ॥
नृत्यगीतैश्च वादित्रैश्चतुर्विंशतिवादकैः ।
सङ्गीतरागतालैश्च ध्वनिभिश्च निनादितः ॥
नानादेशीयभाषाभिर्गद्यपद्यैरलङ्कृतः ।
नानाविचित्रभूषाभिर्भूषितः साधकोत्तमः ॥
समस्तराजचर्याभिर्मोहयन्राजनायिकाः ।
श्रीमहाराजमातङ्गी सर्वदेवप्रमोहिनी ॥
तस्यास्तु तिलकं देवि कथ्यते शृणु पार्वति ।
कुचन्दनं च भ्रूमध्ये गुरुसारस्तदन्तरे ॥
कस्तूरिकात्रिपुण्ड्रं च तन्मध्ये केशरं शिवे ।
महाराजक्रमो देवि कथितस्तु मया तव ॥
अथ वा देवदेवेशि स्वयं गानपरो भवेत् ।

इति महाराजक्रमः ।

अथ दिव्यभावक्रमः ।

देव्युवाच ।

वद श्रीभुवनेशान्याः क्रमं परमदुर्लभम् ।

शिव उवाच ।

दिव्यभावक्रमेणैव भुवना शीघ्रसिद्धिदा ।
हकारः शिवरूपः स्याद्रकारः पापनाशकः ॥
ईकारः कामरूपः स्यान्माया तेन प्रकीर्त्तिता ।
ब्रह्माण्डमेतद्देवेशि मायया वेष्टितं भवेत् ॥
यस्या मायां विना देवि न किञ्चित् प्रतिभासते ।
यद्भासरहितं किञ्चिन्न च तद्भासते क्वचित् ॥

यद्भासासहितं देवि जगदेतत् प्रभासते ।
यां विना तु महेशानि जगज्जडसमं भवेत् ॥
एवं क्रमेण देवेशि सदा तद्गतमानसः ।
त्रैलोक्यविजयी भूयान्नात्र कार्या विचारणा ॥
एतस्यास्तिलकं देवि कथ्यते यत्नतः शृणु ।
श्वेतचन्दनविन्दुं तु भ्रूमध्ये तु प्रलापयेत् ॥
गन्धसारं तदन्ते स्यात् त्रिपुण्ड्रं दिव्यवर्णकैः ।
रक्ताक्षतांँश्च तन्मध्ये तेन सिद्धीश्वरो भवेत् ॥

इति दिव्यभावक्रमः ।

अथ धूम्रक्रमः ।

देव्युवाच ।

देवेश श्रोतुमिच्छामि धूमावत्याः क्रमं शिव ।

शिव उवाच ।

धूमावत्याः क्रमो देवि कथ्यते शृणु पार्वति ।
भ्रूमध्ये कज्जलं देवि भस्मविन्दुस्तदन्तरे ॥
त्रिपुण्ड्रं च ललाटे स्याच्छवभस्म तदन्तरे ।
कृष्णवस्त्राम्बरधरः कृष्णगन्धविभूषितः ॥
गन्धपुष्पेण संयुक्तः श्मशानासनसङ्गतः ।
धूम्रवर्णं जगत् सर्वं मन्त्री धूम्रमयो भवेत् ॥
काकपिच्छं चासनं स्यात् कृष्णद्रव्यं प्रधारयेत् ।
ब्रह्मचारी मिताहारो निर्विकल्पो जितेन्द्रियः ॥
सत्यवादी दृढाचारो भूशायी कुशविष्टरः ।
स्नानं त्रिषवणं कुर्यादुच्चाटनपरायणः ॥
स्वचित्तं काकवत् कृत्वा जगदुच्चाटयेद्ध्रुवम् ।

इत्याचारपरो भूयाद्धूम्रक्रमगतो भवेत् ॥

इति धूम्रक्रमः ।

अथ सौभाग्यक्रमस्तत्रैव ।

सौभाग्याचार्क्रमेणैव बगला शीघ्रसिद्धिदा ।
पीताम्बरधरो मन्त्री पीतभूषणभूषितः ॥
पीतमाल्याम्बरधरः पीतगेहे समास्थितः ।
पीतद्रव्योपभोगी च पीतासनसमन्वितः ॥
पीतहोमो पीतपुष्पी पीतशक्तिसमन्वितः ।
रोचनां भ्रुवि संदद्यात् कुङ्कुमं मुनिपत्रकम् ॥
हरिद्रया त्रिपुण्ड्रं च तन्मध्ये खादिरं शिवे ।
हरिचन्दनधूपेन धूपितः परमेश्वरि ॥
सर्वाङ्गसुन्दरीं रम्यां सर्वावयवशोभिताम् ।
नवोढां पुष्पिणीं चैव प्रार्थयेद्विप्रकन्यकाम् ॥
अष्टम्यां च चतुर्दश्यां पौर्णमास्यां कुमारिकाम् ।
अथ वा भौमवारे वा निशायां भृगुवासरे ॥
सुवासितेन तैलेन कुर्यादभ्यञ्जनं तथा ।
तूलिकातल्पमानीय आस्तीर्येदंशुकस्तदा ॥
तस्योपरि समास्तीर्य समन्त्रैर्जातिचम्पकैः ।
कर्पूरं चैव कस्तूरीमिश्रितं चन्दनं तथा ॥
सर्वाङ्गे लेपनं कुर्याल्लक्ष्मीसूक्तेन बुद्धिमान् ।
पर्यङ्कोपरि तां कन्यां चन्दनेन विलेपिताम् ॥
ध्रुवाद्यैरिति मन्त्रेण कन्यां दक्षिणतो मुखी ।
उन्मुखीं शयने कुर्याच्छ्रीसूक्तेन कुमारिकाम् ॥

तस्याः पादौ प्रसार्याथ गुप्तेनार्चनमाचरेत् ।
न्यस्त्वा षोढाद्वयं चैव बगलापञ्चकं न्यसेत् ॥
कन्यां चैव न्यसेद्देवं तत्तदङ्गानि संस्मरेत् ।
अनन्यजपुरं चैव मार्जयेन्मूलविद्यया ॥
गन्धद्वारेति मन्त्रेण कुर्यात् कस्तूरिलेपनम् ।
मूलमन्त्रेण चैतन्यपुष्पमालां समर्पयेत् ॥
निवेदयेद्द्रव्यशुद्धिं ततश्च जपमाचरेत् ।
प्रयोगः सिद्धिदः पुंसां मन्त्रसिद्धिकरः परः ॥
एतत्क्रमं विना देवि प्रयोगो न भवेत् क्वचित् ।
तस्मात् सर्वप्रयत्नेन सिद्ध्यर्थी देवि भूतले ॥
अभिमानाष्टकं त्यक्त्वा त्यक्त्वा वै दूषणत्रयम् ।
त्यक्त्वा पञ्चेन्द्रियासक्तिं सौभाग्यक्रममाचरेत् ॥

इति सौभाग्यक्रमः ।

अथ दिव्यवीरपशुभावाः ।

(भावचूडामणौ)

देव्युवाच ।

भावस्तु त्रिविधो देव दिव्यवीरपशुक्रमात् ।
गुरवस्त्रिविधाश्चात्र तथैव मन्त्रदेवताः ॥
शक्तिमन्त्रो महादेव विशेषान्मन्त्रसिद्धिदः ।
आद्यभावो महादेव श्रेयान् सर्वसमृद्धिदः ॥
द्वितीयो मध्यमश्चैव तृतीयः सर्वनिन्दितः ।

सर्वनिन्दित इति ब्राह्मणेतरविषयः । ब्राह्मणस्य तु पशुभावान्यभावश्रयणे निन्दाश्रवणात् ।

तथा ।

[illegible] वृथा [illegible] ।

न भावेन विना देव तन्त्रमन्त्राः फलप्रदाः ॥
किं वीरसाधनेनैव विश्वदृष्टिकुलाकुलैः ।
किं पीठपूजनेनैव किं कन्याभोजनादिभिः ॥
स्वयोषित्प्रीतिदानेन किं परेषां तथैव च ।
किं जितेन्द्रियभावेन किं कुलाचारकर्मणा ॥
यदि भावविशुद्धात्मा न स्यात् कुलपरायणः ।
भावेन लभते मुक्तिं भावेन कुलवर्धनम् ॥
भावेन कुलवृद्धिः स्याद्भावेन कुलशोभनम् ।
किं न्यासविस्तरेणैव किं तत्तच्छुद्धिविस्तरैः ॥
किं तथा पूजनेनैव यदि भावो न जायते ।
केन वा पूज्यते विद्या न चेत् केन न जप्यते ॥
फलाभावश्च देवेश भावाभावात् प्रजायते ।

तथा ।

प्रथमो दिव्यभावस्तु कथ्यते शृणु सादरम् ।
यद्वर्णदेवता यत्र तत्तेजःपुञ्जपूरितम् ॥
तेजोमयं जगत् सर्वं विभाव्य मूर्त्तिकल्पनम् ।
तत्तन्मूर्त्तिमये मन्त्रे स्वेन स्वेनैव वा पुनः ॥
आत्मानं तन्मयं दृष्ट्वा सर्वभावं तथैव च ।
तत्सर्वं योषिति ध्यात्वा चिन्तयेद्यतमानसः ॥
अशेषकुलसंपन्ना नानाजातिसमुद्भवा ।
नानादेशोद्भवा वाऽपि गुणलावण्यसंयुता ॥
द्वितीयवत्सरादूर्ध्वं यावत् स्यादष्टमाब्दकम् ।
तावत् कुमारी विज्ञेया मन्त्रयन्त्रफलप्रदा ॥
कुमारीपजनाच्चैव कुमारीभोजनादपि ।

एकद्वित्र्यादिवीजानां फलदा नात्र संशयः ॥
ताभ्यः पुष्पं फलं वाऽपि अनुलेपादिकं तथा ।
वलिप्रियं च नैवेद्यं दत्वा तद्भावपूरितः ॥
दत्वा तदङ्ग आत्मानं वलिभावे विचेष्टितम् ।
ताभिः प्रायः कथालापं क्रीडाकौतूहलादिकम् ॥
यथातथं तत्प्रियकृत् कृत्वा सिद्धीश्वरो भवेत् ।
तस्मात् षोडशपर्यन्तं युवतीति प्रवक्ष्यते ॥
तत्र भावप्रकाशश्चेत् सद्भावः परमो मतः ।
रक्षितव्याः प्रयत्नेन अक्षतास्ता न कारयेत् ॥
एष ते कथितो देव दिव्यभावः सुखावहः ।
न देयो यस्य कस्यापि पशोर्गोप्यः प्रयत्नतः ॥

इति दिव्यभावः ।

अथ वीरभावस्तत्रैव ।

देव्युवाच ।

वीरभावो महादेव कथ्यते शृणु भैरव ।
निर्द्वन्द्वमानसो भूत्वा हृदा कामकला तनुः ॥
निशासु पूजा प्रवरा हेतुयुक्ता तथैव हि ।
निजं कुलं समाधाय स्वयं भैरवरूपधृक् ॥
कुलं च भैरवीरूपं तद्गात्रे न्यासविस्तरम् ।
विन्यसेत् केवलं न्यासं नवयोन्यात्मकं तथा ॥

नवयोन्यात्मकमिति श्रीविद्यापरम् ।

प्रसूनतूलिकामध्ये पुष्पप्रकरसंयुते ।
नानागन्धसमाकीर्णे कुलद्रव्येण यन्त्रकम् ॥
लिखित्वा पूजयेच्छक्तौ घटस्थापनपूर्वकम् ।

स्ववामभागे षट्कोणं तन्मध्ये ब्रह्मरन्ध्रकम् ॥
लिखित्वा तत्र कुम्भं वै सौवर्णं राजतं तथा ।
ताम्रं भूमिमयं वाऽपि महालोहविवर्जितम् ॥
स्थापयेत् कलशाधारं कुम्भं सुगन्धिवासितम् ।
हेतुद्रव्यं ब्राह्मणादिभेदतः संप्रपूरयेत् ॥

ब्राह्मणादिभेदत इति क्षीराज्यमध्वासवरूपं ब्राह्मणादिभिः पूरणीयमित्यर्थः । एवं च वीरब्राह्मणस्य हेतुस्थाने क्षीरमेव च । पशोस्तु तदपि नेति बोध्यम् ।

तत्र यन्त्रं विलिख्यादौ यद्यत् कुलसमुद्भवम् ।
ध्यात्वेष्टदेवतां तत्र जपेदष्टोत्तरं शतम् ॥
धेनुयोनी प्रदर्श्याथ प्रसृतं तद्विचेष्टितम् ।
दृष्ट्वाऽमृतं स्वपात्रं वै नृत्यन्ति योगिनीगणाः ॥
नृत्यन्ति भैरवाः सर्वे नृत्यन्ति मातरोऽपि च ।
इन्द्रादयः सुराः सर्वे नृत्यन्ति मधुलोलुपाः ॥
ब्रह्मविष्णुमहेशाद्या नृत्यन्ति हर्षतत्पराः ।
अर्घभाण्डं त्रिधा कृत्वा गुरवे चैकभागकम् ॥
एवं कुलाय वै दत्त्वा एकेन देवतर्पणम् ।
पीत्वा कुलरसं नानावस्त्रालङ्कारभूषणम् ॥
साक्षाद्यदि गुरुर्न स्यात् तदा तोये विसर्जयेत् ।
आनन्दरूपवान् भूत्वा पूजयेत् परमेश्वरीम् ॥
तत्तत्कल्पविधानेन तत्तद्यत्नेन पूजयेत् ।
विसर्जनं विधायान्ते स्वकुले योजयेत् ततः ॥
तद्बिम्बरसपानेन अमृतं भक्ष्यते मया ।
तच्चकोररसास्वादे सम्मदो मम जायते ॥
तत्फलग्रहणादेव मेरुशृङ्गावरोहणम् ।

लतालिङ्गनमात्रेण सुधाधौतकलेवरः ॥
मूलयोगे कृते तत्र जपेदष्टसहस्रकम् ।
नित्यजाप्ये च होमे च यत्र सङ्ख्या न चोदिता ॥
तत्रेयं गणना प्रोक्ता अष्टोत्तरसहस्रकम् ।
जलपूतं हविर्द्रव्यं गृहीत्वा तर्पयेत् ततः ॥
विधाय तर्पणं देव प्रदक्षिणमनुव्रजेत् ।
स्तुत्वा प्रणम्य कल्पोक्तस्तवेन स्तावयेत् ततः ॥
इति वीरकुलं देव देववन्द्यं मनोहरम् ।

(कालीकल्पे)

रात्रौ पर्यटनं चैव रात्रौ शक्तिं प्रपूजयेत् ।
अकृत्वा कथमीशान मद्भक्तः कौलिको भवेत् ॥

(मेरुतन्त्रे)

कुलं तु गोपयेद्देवि नारिकेलरसाम्बुवत् ।
गुरुं प्रकाशयेद्धीमान् मन्त्रं यत्नेन गोपयेत् ॥

(कुलार्णवे)

वेदशास्त्रपुराणानि स्पष्टा वेश्याङ्गना इव ।
इयं तु शाम्भवी विद्या गुप्ता कुलवधूरिव ॥
सुगुप्तं कौलिकाचारमनुगृह्णन्ति देवताः ।
वाञ्छासिद्धिं प्रयच्छन्ति नाशयन्ति प्रकाशनात् ॥

(मेरौ)

न दिवा सेवयेन्नारीं तद्योनिं न निरीक्षयेत् ।
स्त्रियं शतापराधां वा पुष्पेणापि न ताडयेत् ॥
दोषान् न गणयेत् स्त्रीणां गुणानेव प्रकाशयेत् ।

तथा ।

कन्याः कुमारिका नग्ना उन्मत्ता अपि योषितः ।

न निन्देत जुगुप्सेत न हसेन्नावमानयेत् ॥
एकवृक्षं श्मशानं च समूहं योषितामपि ।
नारीं च रक्तवसनां दृष्ट्वा वन्देत भक्तितः ॥

तथा ।

तिष्ठन्ति कुलयोगिन्यः कुलवृक्षेषु सर्वदा ।
तत्पत्रेषु न भोक्तव्यमर्कपत्रे विशेषतः ॥
न स्वपेत् कुलवृक्षाधो न चोपद्रवमाचरेत् ।
दृष्ट्वा भक्त्या नमस्कुर्याच्छेदयेन्न कदा च न ॥
श्लेष्मान्तककरञ्जार्कनिम्बाश्वत्थकदम्बकाः ।
विल्वो वटोऽदुम्बरश्च चिञ्चा चेति दश स्मृताः
प्रायश्चित्तं भृगोः पातं सन्यासं व्रतधारणम् ।
तीर्थयात्राभिगमनं कौलः पञ्च विवर्जयेत् ॥

प्रायश्चित्तादिकं तन्त्रोक्तभिन्नम् ।

(रौद्रे)

वीरभावं महेशानि सर्वथा न प्रकाशयेत् ।

(वीरचूडामणौ)

पूजाकाले महेशानि यदि कोऽप्यत्र गच्छति ।
दर्शयेद्वैष्णावीं मुद्रां विष्णुन्यासं तथा स्तवम् ॥
अन्तः शाक्ता बहिः शैवाः सभायां वैष्णवा मताः ।
नानारूपधरा वीरा विचरन्ति महीतले ॥

(भावचूडामणौ)

यद्देशे विद्यते वीरस्तत्कुलं वाऽपि भैरव ।
न च मारीभयं तत्र न च राजभयादिकम् ॥
सुमङ्गलं सदा तत्र धनपुत्रविवर्धनम् ।
लक्ष्मीस्तत्र महादेव सुस्थिरा भवति ध्रुवम् ॥

मन्त्रः स्वप्नप्रबोधिन्या अवश्यं वृक्षमूलके ।
योजनीयः प्रयत्नेन न च विघ्नः प्रजायते ॥
नान्यवीरस्य तद्योग्यं ग्रहणैर्दैवतैरपि ।
योगिनीभिर्न लुप्तं च तन्न पापेन लिप्यते ॥
यत्र तत्र कुजे वारे श्मशानगमने कृते ।
पूजाफलं भवेत् तत्र सप्तवासरसम्मितम् ॥
चतुर्दश्यां गते तत्र पक्षपूजाफलं भवेत् ।
न गच्छेन्नार्यतः स्थाने पशुरेव न संशयः ॥
नास्त्यस्मादधिकं देव इति चिन्तापरायणः ।
मदेन द्रव्यभोक्ता च भवेत् कुलपरायणः ॥
साधके क्षोभमापन्ने मम क्षोभः प्रजायते ।
तस्माद्यत्नाद्वीरवरो भवेद्भोगयुतः सुखी ॥
भोगेन मोक्षमाप्नोति भोगेन कुलसाधनम् ।
विना हेतुमनास्वाद्य क्षोभयुक्तो महेश्वर ॥
न पूजा मम संपर्कं न ध्यानमनुचिन्तनम् ।
तस्माद्भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम् ॥
नात्र प्रच्युतिदोषोऽस्ति नापरं दोषभूषणम् ।
यद्यद्दति निद्राति यत् करोति यदर्चति ॥
तत्सर्वं कुलरूपं च ध्यात्वा च विहरेत् सुखी ।
एकाकी निर्जने देशे श्मशाने पर्वते वने ॥
शून्यगेहे नदीतीरे निःसङ्गो विहरेन्मुदा ।
वीराणां जपकालस्तु सर्वकालः प्रशस्यते ॥
सर्वदेशे सर्वपीठे कर्त्तव्यं च न संशयः ।

यदि विप्रो भवेद्भ्रष्टः कुलधर्मपरायणः ॥
तदा तेन विधानेन कर्त्तव्यं कुलतोषणम् ।
अपरापुष्पगर्भे तु कुलस्थानं मनोहरम् ॥
सर्वदेवमुखं तत्र महाकामकलात्मकम् ।
हयारिकुसुमे देवः स्वयमस्ति सदाशिवः ॥
तन्मध्ये लघुमादाय पुष्पमध्ये तु चन्दनम् ।
रक्तं वा कुसुमं दत्वा ध्यात्वाऽऽत्मानं शिवात्मकम् ॥
योजयेच्छिवशक्त्योस्तु ऐक्यं संभावयेद्धिया ।
क्षणं विचिन्त्य तत्रैव संपूज्य परमेश्वरीम् ॥
जप्त्वा तदेव कुण्डाख्यं द्रव्यं परमदुर्लभम् ।
यत्रापराजितापुष्पं जपापुष्पं च भैरव ॥
करवीरे रक्तशुक्ले द्रोणपुष्पं च तिष्ठति ।
तत्र देवी वसेन्नित्यं तद्यन्त्रे पूजयेन्मम ॥
दत्ते चैव जपापुष्पे पट्टवस्त्रफलं लभेत् ।
ब्रह्महत्यादिकं पापं क्षणान्नश्यति निश्चितम् ॥
अपरायास्तु माहात्म्यं वक्तुं न हि महेश्वर ।
वीरसाधनकार्यं च कर्त्तव्यं वीरपूरुषैः ॥
दिव्यैरपि च कर्त्तव्यं पशुभिर्न च पामरैः ।
वरं पामरकार्यं च न पशोरिति निश्चितम् ॥
यद्यन्न मत् पुरा प्रोक्तं संकेतं मन्त्रसाधने ।
अञ्जनं गुटिकादिं च कुर्याद्वीरो महाबलः ॥
दिव्ये वीरे न भेदोऽस्ति यन्नेदं तत् तु कथ्यते ।
शान्तो विनीतो मधुरः कलालावण्यसंयुतः ॥

दिव्यस्तु देववत् प्रायो वीरश्चोद्धतमानसः ।

(कुलरत्नावल्याम्)

दिव्यवीरौ सुरेशानि शक्तिसेवापरायणौ ।
वामिकौलिकभेदाभ्यां प्रत्येकं द्विविधौ स्मृतौ ॥

(भावचूडामणौ)

विभूतिभूषणैर्वाऽपि चन्दनैर्वा विलेपितः ।
आकारगोपनो वाऽपि त्यक्तो वा कुलभैरव ॥
रक्तचन्दनदिग्धो वा वैष्णवो वाऽप्यवैष्णवः ।
अपमाने तु पूजायां हृष्टः पुष्टः सदा भवेत् ॥
देवनिन्दापरो वाऽपि तत्र पूजापरोऽपि वा ।
पूजा च तत्तद्रहितः कुलाकुलमते स्थितः ॥
निजभावसमायुक्तो देववद्विरहेत् क्षितौ ।
स्वकुलान्ते पुरश्चर्या कार्या रात्रौ न चान्यथा ॥
वेदहीने द्विजे देव यथा न श्रुतिसंकथा ।
विष्णुभक्तिं विना देवीभक्तिर्न प्रभवेद्यथा ॥
शाक्तज्ञानं विना मुक्तौ यथा हास्याय कल्पते ।
गुरुं विना यथा तन्त्रे नाधिकारः कथं चन ॥
पतिहीना यथा नारी सर्वकर्मविवर्जिता ।
कुलं विना देवविधौ कदाऽपि मम साधने ॥
नाधिकारीति कौलेय तस्माद्भावपरो भवेत् ।
अविनीतं कुलं यस्य स क कथं मम पूजकः ॥
तस्माद्यत्नात् तथा कार्यं यथा स्याद्विनयान्वितम् ।
भावाभावे कुले शास्त्रे नाधिकारः कथं चन ॥
तेन भावविशुद्धश्च साधकः कौलिको भवेत् ।

इति वीरभावक्रमः ।

अथ पशुभावस्तत्रैव ।

देव्युवाच ।

पशुभावं प्रवक्ष्यामि शृणु वत्स समाहितः ।
यथाविधि पशोर्विद्यां गृहीत्वा भावतत्परः ॥
प्रथमं पूर्वसेवार्थं यत्नतः शुद्धिमाचरेत् ।
नमस्य भोजनं कुर्यान् न स्त्रियं मनसा स्मरेत् ॥
न परद्रव्यलोभी स्यान्न भोगे मानसं भजेत् ।
सिन्धुतीरे पर्वते वा कानने च सुरालये ॥
विल्वमूले विविक्ते च पुण्यक्षेत्रे च शोभने ।
न शूद्रदर्शनं कुर्यात् कौटिल्यं यत्नतस्त्यजेत् ॥
देवता शुभवर्णा तु ध्यातव्या सुसमाहितैः ।
त्रिसन्ध्यं देवपूजा तु त्रिसन्ध्यं जपमाचरेत् ॥
रात्रौ मन्त्रं च मालाश्च स्पृशेन्नैव कदा चन ।
न मन्त्रमुच्चरेद्भुक्त्वा मौनी स्यात् सर्वकर्मसु ॥
पर्वकाले स्त्रियं नैव गच्छेत् साधकसत्तमः ।
पुष्पं गन्धं जलं चैव स्वयमानीय पूजयेत् ॥
मैथुनं तत्कथालापं तद्गोष्ठीं परिवर्जयेत् ।
ऋतुकालं विना चापि न गच्छेत् स्त्रियमादरात् ॥
पुराणश्रवणे श्रद्धा वेदवेदार्थतत्परः ।
न रात्रौ भोजयेद्विद्वान् ताम्बूलं परमेश्वर ॥
गुरुणा यद्यदादिष्टं तत्सर्वं यत्नतश्चरेत् ।
स्वजातकुसुमं चैव हेतुद्रव्यं च भैरव ॥
स्पृष्ट्वा तथा समाघ्राय पञ्चगव्येन शुध्यति ।
रक्तवस्त्रं न गृह्णीयाद्देवीभक्तिपरायणः ॥

विष्णुतन्त्रेषु कल्याणि तदनुष्ठानमेव च ।
कार्यं वीरकथालापं न कुर्याद्वीरवन्दिते ॥
नित्यश्राद्धं गयाश्राद्धं सन्ध्यावन्दनमेव च ।
तीर्थस्नानं पीठदेशगमनं धर्मतत्परः ॥

(मेरुतन्त्रे)

देवस्थाने गुरुस्थाने श्मशाने च चतुष्पथे ।
पादुकासनविण्मूत्रमैथुनानि विवर्जयेत् ॥
प्रमत्तामन्त्यजां कन्यां पुष्पितां पतितस्तनीम् ।
विरूपां वा मुक्तकेशीं कामार्त्तां च न निन्दयेत् ॥
कन्यायोनौ पशुक्रीडां दिग्वस्त्रां प्रकटस्तनीम् ।
नालोकयेत् परद्रव्यं परदारांश्च वर्जयेत् ॥
धान्यगोगुरुदेवाग्निकुशपुस्तकसंमुखम् ।
नैव प्रसारयेत् पादौ न चैतानि विलङ्घयेत् ॥
आलस्यमदसंमोहशापपैशून्यविग्रहान् ।
असूयामात्मसन्मानं परनिन्दाश्च वर्जयेत् ॥

(भावचूडामणौ)

भावस्तु मानसो धर्मः शाब्दः स हि कथं भवेत् ।
तस्माद्भावो न वक्तव्यो दिङ्मात्रं समुदाहृतम् ॥
यथेक्षुगुडमाधुर्यमशनैर्ज्ञायते प्रभो ।
तथा भावविभावस्तु मनसा परिभाव्यते ॥

तन्त्रान्तरे ।

उत्तमो दिव्यभावः स्याद्वीरभावस्तु मध्यमः ।
पशुभावोऽवरः प्रोक्तो भावमेकं समाश्रयेत् ॥

इति पशुभावक्रमः ।

अथ संप्रदायः ।

(सिद्धान्तसंग्रहे)

संप्रदायानथो वच्मि गौडकाश्मीरकेरलान् ।
सर्वार्थसिद्धिसंकल्पपूजापुष्पार्पणादनु ॥
नैवेद्यान्ते च हवनं ताम्बूलान्ते बलिर्मतः ।
पूजनं वामहस्तेन दक्षहस्तेन तर्पणम् ॥
साक्षाद्दानं मकारणे हृदि देव्या विसर्जनम् ।
गौडाक्षसप्रदायोऽयं सेवितो वामिभिः सदा ॥
विनियोगादर्च्चनार्थं बलिः पीठार्च्चनादनु ।
होमः पञ्चोपचारान्ते दक्षिणार्च्चनतर्पणे ॥
गव्यं तु ताम्रपात्रस्थं वारुणी स्याद्घृतं विना ।
लवणार्द्रकपिण्याकपलाण्डुमाषपञ्चकम् ॥
लशुनं च महादेवि मांसप्रतिनिधिः स्मृतः ।
मत्स्याभावे तु क्रमुकं ताम्बूलं यद्यदामिषम् ॥
गुडाभावे तण्डुलं वा भर्जितं चणकादिकम् ।
विलिखेत् पञ्चमाभावे शक्तिबीजं त्रिकोणकम् ॥
वामोरौ साधको रक्तं चन्दनेन विधानवित् ।
शक्तिं संपूज्य तत्रैव तद्गायत्रीं शतं जपेत् ॥
स्वयम्भूकुसुमाभावे रक्तचन्दनकं क्षिपेत् ।
हयारिकुसुमं शम्भुः शक्तिः प्रोक्ताऽपराजिता ॥
तयोः समेलनोत्पन्नं गृह्णीयाच्च कुलामृतम् ।

तथा ।

ताम्रे गव्यादिपिण्याकं गृञ्जनं पायसं पयः ।
एते तत्त्वानुकल्पाश्च सहस्रारे विसर्जनम् ॥

काश्मीरसंप्रदायोऽसौ विज्ञेयः कौलिकप्रियः ।

पिण्याकं तिलकल्कः । गृञ्जनं लशुनम् ।

तथा ।

सङ्कल्पो देवताप्रीत्यै तत्त्वानां भावनैव हि ।
आत्मा विद्या शिवः सर्वः पूर्णश्चेति क्रमेण च ॥
पूजा पञ्चोपचारान्ते पूजान्ते च बलिर्भवेत् ।
पूजनं दक्षहस्तेन वामहस्तेन तर्पणम् ॥
होमः समस्तकर्मान्ते हृद्येवोद्वासनं स्मृतम् ।
केरलाख्यः संप्रदायो मुनिभिः समुपासितः ॥

इति संप्रदायक्रमः ।

बिभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत-
स्रोतःशालिनि संनिबन्धनसरित्संभेदमभ्यर्हितम् ।
सन्मुक्तोपमयुक्तिभाजि नवमो रम्यस्तरङ्गोऽगमत्
सर्वोर्वीपतिनाथनिर्मितपुरश्चर्यार्णवेऽस्मिन् नवे ॥

इति श्रीमन्महाराजधिराजश्रीप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे दशमहाविद्यापुरश्चरणनिरूपणं नाम नवमस्तरङ्गः ।

अथ सरस्वत्यादिमन्त्रास्तत्पुरश्चरणविशेषाश्च प्रदर्श्यन्ते ।

तथा च (शारदायाम्)

अद्रिर्वरुणसंरुद्धो दवाग्वादिनि ठद्वयम् ।
वागीश्वर्या दशार्णोऽयं मन्त्रो वाग्विभवप्रदः ॥
ऋषिः कण्वो विराट्छन्दो देवता वाक् समीरिता ।
शिरःश्रवणदृङ्नासावदनान्धुगुदेष्विमान् ॥
न्यासार्णान् प्राग्वदङ्गानि मातृकोक्तानि कल्पयेत् ।

अथ ध्यानम् ।

तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी संनिषण्णा सिताब्जे ।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः ॥

अथ पुरश्चरणम् ।

दशलक्षं जपेन्मन्त्रं दशांशं जुहुयात् ततः ।
पुण्डरीकैः पयोऽभ्यक्तैस्तिलैर्वा मधुराप्लुतैः ॥

अथ मन्त्रान्तरं तत्रैव ।

हृदयान्ते भगवति वदशब्दयुगं ततः ।
वाग्देवि वह्निजायान्तं वाग्भवाद्यं समुद्धरेत् ॥
मनुं षोडशवर्णाढ्यं वागैश्वर्यफलप्रदम् ।
मनोः षड्भिः पदैः कुर्यात् षडङ्गं जातिसंयुतैः ॥

अथ ध्यानम् ।

शुभ्रां शुभ्रविलेपमाल्यवसनां शीतांशुखण्डोज्ज्वलां

व्याख्यामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजैः ।
बिभ्राणां कमलासनां कुचनतां वाग्देवतां सुस्मितां
वन्दे वाग्विभवप्रदां त्रिनयनां सौभाग्यसम्पत्करीम् ॥

अथ पुरश्चरणम् ।

हविष्याशी जपेत् सम्यग्वसुलक्षमनन्यधीः ।
दशांशं जुहुयादन्ते तिलैराज्यपरिप्लुतैः ॥

अथ मन्त्रान्तरं तत्रैव ।

तारो माया धरो विन्दुः शक्तिस्तारं सरस्वती ।
ङेन्ता नत्यन्तिको मन्त्रः प्रोक्त एकादशाक्षरः ॥
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये नवरन्ध्रेषु च क्रमात् ।
मन्त्रवर्णान् न्यसेन्मन्त्री वाग्भवेनाङ्गकल्पना ॥

अथ ध्यानम् ।

वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां
चन्द्रार्धाङ्कितमस्तकां निजकरैः सम्बिभ्रतीमादरात् ।
वीणामक्षगुणं सुधाढ्यकलशं विद्यां च तुङ्गस्तनीं
दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे ॥

अथ पुरश्चरणम् ।

जपेद्द्वादशलक्षाणि तत्सहस्रं सिताम्बुजैः ।
नागचम्पकपुष्पैर्वा जुहुयात् साधकोत्तमः ॥

अथ मन्त्रान्तरं तत्रैव ।

वाचस्पतेऽमृते भूयः प्लुवः प्लुवेति कीर्त्तयेत् ।
वागाढ्यो मुनिभिः प्रोक्तो रुद्रसङ्ख्याक्षरो मनुः ॥
कुर्यादङ्गानि विधिवद्वागाद्यैः पञ्चभिः पदैः ।

अथ ध्यानम् ।

आसीना कमले करैर्जपवटीं पद्मद्वयं पुस्तकं

बिभ्राणा तरुणेन्दुबद्धमुकुटा मुक्तेन्दुकुन्दप्रभा ।
भालोन्मीलितलोचना कुचभराक्रान्ता भवद्भूतये
भूयाद्वागधिदेवता मुनिगणैरासेव्यमानाऽनिशम् ॥

अथ पुरश्चरणम् ।

रुद्रलक्षं जपेन्मन्त्रं दशांशं जुहुयाद्घृतैः ।
मातृकाकल्पिते पीठे पूजयेत् तां यथा पुरा ॥

अथ मन्त्रान्तरं तत्रैव ।

तोयस्थं शयनं विष्णोः सकेवलश्चतुर्मुखम् ।
विन्द्वर्धीशयुतो वह्निविन्दुसद्योऽम्बुमान् भृगुः ॥
उक्तानि त्रीणि बीजानि सद्भिः सारस्वतार्थिनाम् ।
अङ्गानि कल्पयेद्बीजैर्द्विरुक्तैर्जातिसंयुतैः ॥

अथ ध्यानम् ।

मुक्ताहारावदातां शिरसि शशिकलालङ्कृतां बाहुभिः स्वै-
र्व्याख्यां वर्णाक्षमालां मणिमयकलशं पुस्तकं चोद्वहन्तीम् ।
आपीनोत्तुङ्गवक्षोरुहभरविनमन्मध्यदेशामधीशां
वाचामीडे चिराय त्रिभुवननमितां पुण्डरीके निषण्णाम् ॥

अथ पुरश्चरणम् ।

त्रिलक्षं प्रजपेन्मन्त्रं जुहुयात् तद्दशांशतः ।
पायसेनाज्यसिक्तेन संस्कृते हव्यवाहने ॥

अथ चिन्तामणिसरस्वतीमन्त्रो (मेरुतन्त्रे)

अथादौ संप्रवक्ष्यामि चिन्तामणिसरस्वतीम् ।
तारं माया च हसरानैकाराढ्यान् सविन्दुकान् ॥
पुनर्मायां च तारं च वदेत् ङेन्तां सरस्वतीम् ।
हृदयान्तो भवार्णोऽयं मन्त्रस्तु परिकीर्त्तितः ॥
त्रिष्टुप्छन्दो मुनिः कण्वश्चिन्तामणिसरस्वती ।

देवता ह्सैँ च बीजं स्यात् ह्रीँ शक्तिस्त्वङ्गकल्पने ॥
स्वरसंपुटितैः कादिवर्गैः स्यादङ्गकल्पनम् ।

अथ ध्यानम् ।

हंसारूढां मौक्तिकाभां मन्दहास्येन्दुशेखराम् ।
वीणामृतघटाक्षस्रग्दीप्तहस्तां कजस्थिजाम् ॥

अथ पुरश्चरणम् । ‘जपेद्द्वादशलक्षक’मित्युक्त्वा–

सिताब्जै रविसाहस्रं हुनेद्वाऽथ च चम्पकैः ।

अथ पारिजातसरस्वतीमन्त्रः (दक्षिणामूर्त्तिसंहितायाम्)

संपत्प्रदाया भैरव्या वाग्भवं बीजमालिखेत् ।
तारेण परया देवी संपुटीकृत्य मन्त्रवित् ॥
सरस्वत्यै हृदन्तोऽयं रुद्राणों मनुरीरितः ।
ऋषिस्तद्दक्षिणामूर्त्तिर्गायत्री छन्द ईरितम् ॥
पारिजातेश्वरी वाणी देवता परिकीर्त्तिता ।
तृतीयं च द्वितीयं च बीजं शक्तिश्च तारकम् ॥
कीलकं परमेशानि महासारस्वतप्रदम् ।
षड्दीर्घस्वरसंभिन्नबीजेनाङ्गानि विन्यसेत् ॥

अथ ध्यानम् ।

हंसारूढा वरहसितहारेन्दुकुन्दावदाता
वाणी मन्दस्मिततरमुखी मौलिबद्धेन्दुरेखा ।
विद्यावीणामृतमयघटाक्षस्रजादीप्तहस्ता
शुभ्राब्जस्था भवदभिमतप्राप्तये भारती स्यात् ॥

अथ पुरश्चरणं तन्त्रान्तरे ।

वर्णलक्षं जपेन्मन्त्रं तद्दशांशं ततो हुनेत् ।
किंशुकैश्चम्पकैर्वाऽपि तिलाज्यमधुलोलितैः ॥
नवाक्षरोऽपि यो मन्त्रस्तत्रादौ प्रणवस्ततः ।

संपत्प्रदावाग्भवस्ततो लज्जाबीजमिति ।

(शारदायाम्)

एवमुक्तेषु मन्त्रेषु दीक्षितो यतमानसः ।
एकं यो भजते भक्त्या स भवेद्भुक्तिमुक्तिभाक् ॥
सुसितैर्गन्धकुसुमैः पूजा सारस्वते विधौ ।
दूर्वाबीजाङ्कुरं पुष्पं राजवृक्षसमुद्भवम् ॥
उत्पलानि प्रशस्तानि सिन्धुवाराङ्कुराणि च ।
भजन् सरस्वतीं नित्यमेतानि परिवर्जयेत् ॥
आम्रातं गृञ्जनं विम्बं करञ्जं लशुनं तथा ।
तैलं पलाण्डुं पिण्याकं साङ्गाष्टमपि भोजने ॥
सर्वं पर्युषितं त्याज्यं सदा सारस्वतार्थिना ।
नाचरेन्निशि ताम्बूलं स्त्रियं गच्छेद्दिवा न च ॥
न सन्ध्ययोः स्वपेज्जातु नाशुचिः किञ्चिदुच्चरेत् ।
प्रदोषे तु भवेन्मौनी दिग्वस्त्रां न विलोकयेत् ॥
न पुष्पितां स्त्रियं गच्छेन्न निन्देद्वामलोचनाम् ।
न मृषा वचनं ब्रूयान्नाक्रमेत् पुस्तकं सुधीः ॥
अक्षराढ्यानि पत्राणि नोपेक्षेत न लङ्घयेत् ।
चतुर्दश्यष्टमीपर्वप्रतिपद्ग्रहणेषु च ॥
संक्रमेषु च सर्वेषु विद्यां नैव पठेन्नरः ।
व्याख्याने संत्यजेन्निद्रामालस्यं जृम्भणां बुधः ॥
क्रोधं निष्ठीवनं तद्वन्नीचाङ्गस्पर्शनं तथा ।
मनुष्यसर्पमार्जारमण्डूकनकुलादयः ॥
अन्तरा यदि गच्छेयुस्तदा व्याख्यां परित्यजेत् ।
निशासु दीपभ्रंशे च पाठं सद्यः परित्यजेत् ॥

ज्ञात्वा दोषानिमान् सम्यग्भक्त्या यो भारतीं भजेत् ।
वाचां सिद्धिमवाप्नोति वाचस्पतिरिवापरः ॥

इति सरस्वतीप्रकरणम् ।

अथ त्वरितामन्त्रः ।

तत्रैव ।

ततोऽभिधास्ये त्वरितां त्वरितं फलदायिनीम् ।
तारो माया वर्मबीजमृद्धिरीशस्वरन्विता ॥
कूर्मस्तदन्तो भगवान् क्ष्स्त्रौँ दीर्घतनुच्छदम् ।
संवर्त्तो भगवान् माया फडन्तो द्वादशाक्षरः ॥
मुनिरर्जुन आख्यातो विराट् छन्दः समीरितम् ।
त्वरिता देवता प्रोक्ता पुरुषार्थफलप्रदा ॥

तथा ।

कूर्माद्यैः पञ्चभिर्वर्णैः पूर्वपूर्वविवर्जितैः ।
द्वाभ्यां द्वाभ्यां षडङ्गानि कल्पयेत् साधकोत्तमः ॥

अथ ध्यानम् ।

श्यामां वर्हिकलापशेखरयुतामाबद्धपर्णांशुकां
गुञ्जाहारलसत्पयोधरभरामष्टाहिपान् बिभ्रतीम् ।
ताटङ्काङ्गदमेखलां गुणरणन्मञ्जीरतां प्रापितां
कैरीतीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे ॥

अथ पुरश्चरणम् ।

लक्षं संजप्य मन्त्रज्ञो मन्त्रमेनं जितेन्द्रियः ।
दशांशं जुहुयाद्बिल्वैर्मधुराक्तैः समिद्वरैः ॥

तथा ।

एवं सिद्धमनुर्मन्त्री नारीनरनरेश्वरैः ।
मान्यते वत्सरादर्वाग्लक्ष्म्या जितधनेश्वरः ॥

इति त्वरितामन्त्रः ।

अथ नित्यक्लिन्नामन्त्रस्तत्रैव ।

तारो माया वाग्भवान्ते नित्यक्लिन्ने मदद्रवे ।
वाङ्माया वह्निजायान्तो मन्त्रः पञ्चदशाक्षरः ॥
द्वाभ्यां द्वाभ्यां पुनर्द्वाभ्यां द्वाभ्यां पञ्चभिरक्षरैः ।
वाद्यं विना समस्तेनाप्यङ्गषट्कमथाचरेत् ॥

अथ ध्यानम् ।

द्वीपं त्रिकोणविपुलं सुरद्रुममनोहरम् ।
कूजत्कोकिलनादाढ्यं मन्दमारुतसेवितम् ॥
भृङ्गपुष्पलताकीर्णसुद्यच्चन्द्रदिवाकरम् ।
स्मृत्वा सुधाब्धिमध्यस्थं तस्मिन् माणिक्यमण्डपे ॥
रत्नसिंहासने न्यस्तत्रिकोणोज्ज्वलकर्णिके ।
पद्मे संचिन्तयेद्देवीं साक्षात् त्रैलोक्यमोहिनीम् ॥

नित्यां भजे बालशशाङ्कचूडां
पाशाङ्कुशौ कल्पलतां कपालम् ।
हस्तैर्वहन्तीमरुणां त्रिनेत्रा-
मास्फालयन्तीं कलवल्लकीं ताम् ॥

अथ पुरश्चरणम् ।

त्रिलक्षं प्रजपेन्मन्त्रमाज्येन जुहुयात् ततः ।

दशांशमिति शेषः ।

इति नित्यक्लिन्नामन्त्रः ।

अथान्नपूर्णामन्त्रः ।

(मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि अन्नपूर्णामहामनुम् ।
ॐ ह्रीँ श्रीँ क्लीँ नमः प्रोक्त्वा भगवति पदं वदेत् ॥
माहेश्वरि चान्नपूर्णे स्वाहा विंशतिवर्णकः ।

छन्दोऽनुष्टुब्मुनिर्ब्रह्मा ह्यन्नपूर्णा च देवता ॥
ह्रौँ बीजं चापि शक्तिः श्रीँ कीलकं क्लीँ प्रकीर्त्तितम् ।
षड्दीर्घयुक्तहृल्लेखा षडङ्गेषु प्रकीर्त्तिता ॥

अथ ध्यानम् ।

तप्तकाञ्चनसंकाशां बालेन्दुकृतशेखराम् ।
नवरत्नप्रभादीप्तमुकुटां कुङ्कुमारुणाम् ॥
चित्रवस्त्रपरीधानां मीनाक्षीं कलशस्तनीम् ।
नृत्यन्तमीशमनिशं दृष्ट्वाऽऽनन्दमयीं पराम् ॥
सानन्दमुखलोलाक्षीं मेखलाढ्यनितम्बिनीम् ।
अन्नदाननिरतां नित्यां भूमिश्रीभ्यां नमस्कृताम् ॥
दुग्धान्नभरितं पात्रं सरत्नं वामहस्तके ।
दक्षिणे तु करे देव्या दर्वीं ध्यायेत् सुवर्णजाम् ॥

पुरश्चरणम् ।

लक्षं जपेत् सनियमस्तद्दशांशेन होमयेत् ।
रम्यपायससर्पिर्भ्यामेवं भवति सिद्धिदा ॥

अथ मन्त्रान्तरं (शारदायाम्)

माया हृद्भगवत्यन्ते माहेश्वरि पदं ततः ।
अन्नपूर्णे ठयुगलं मनुः सप्तदशाक्षरः ॥
अङ्गानि मायया कुर्यात् ततो देवीं विचिन्तयेत् ।

अथ ध्यानम् ।

रक्तां विचित्रवसनां नवचन्द्रचूडा-
मन्नप्रदाननिरतां स्तनभारनम्राम् ।
नृत्यन्तमिन्दुशकलाभरणं विलोक्य
हृष्टां भजे भगवतीं भवदुःखहर्त्रीम् ॥

अथ पुरश्चरणम् ।

यथाविधि जपेन्मन्त्रं वसुयुग्मसहस्रकम् ।
साज्येनान्नेन जुहुयात् तद्दशांशमनन्तरैः ॥

इत्यन्नपूर्णामन्त्रः ।

अथ प्रत्यङ्गिरामन्त्रः ।

(मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि परकृत्यानिवारिणीम् ।
देवीं प्रत्यङ्गिरां नाम सर्वापद्विनिवारिणीम् ॥
ॐ अँ कँ चँ तथा टँ तँ पँ ह्मँ भौँ ह्रीँ समुच्चरेत् ।
हुँस उक्त्वा हुँ तथाऽस्त्रं स्वाहान्तं षोडशाक्षरः ॥
मुनिर्विधाता छन्दोष्णिग्देवताः षट् प्रकीर्त्तिताः ।
महावायुर्महापृथ्वी महाकाशस्तथैव च ॥
महासमुद्रनामा च महापर्वत एव च ।
महाग्निश्चेति हुँ बीजं ह्रीँ शक्तिः परिकीर्त्तिता ॥
लज्जया तु षडङ्गानि षड्दीर्घान्वितयाऽऽचरेत् ।
मन्त्रदेवीँ स्ततो मन्त्री ध्यायेत् सुस्थिरमानसः ॥

अथ ध्यानम् ।

नानारत्नार्चिराक्रान्तं वृक्षाम्भःस्रवणैर्युतम् ।
व्याघ्रादिपशुभिर्व्याप्तं सानुयुक्तं गिरिं स्मरेत् ॥
मत्स्यकूर्मादिबीजाढ्यं नवरत्नसमन्वितम् ।
घनच्छायं सकल्लोलमकूपारं विचिन्तयेत् ॥
ज्वालावलीसमाक्रान्तं जगत्त्रितयमद्भुतम् ।
पीतवर्णं महावह्निं संस्मरेच्छत्रुशान्तये ॥
त्वरा समुत्थरावौघमलिनं रुद्धभूदिवम् ।

पवनं संस्मरेद्विश्वजीवनं प्राणरूपतः ॥
नदीपर्वतवृक्षादिकलिताग्रासससंकुला ।
आधारभूता जगतो ध्येया पृथ्वीह मन्त्रिणा ॥
सूर्यादिग्रहनक्षत्रकालचक्रसमन्वितम् ।
निर्मलं गगनं ध्यायेत् प्राणिनामाश्रयः पदम् ॥

पुरश्चरणमाह ।

एवं षड्देवता ध्यात्वा सहस्राणि तु षोडश ।
जपेन्मन्त्रं दशांशेन षड्द्रव्यैर्होममाचरेत् ॥
व्रीहयस्तण्डुला आज्यं सर्षपाश्च यवास्तिलाः ।
एतैर्हुत्वा यथाभागं पीठे पूर्वोदिते यजेत् ॥

अथ मालामन्त्रस्तत्रैव ।

अथ प्रत्यङ्गिरामालामन्त्रः सिद्धः प्रकीर्त्यते ।
ॐ ह्रीँ नमः कृष्णवाससेशतेविश्वसहस्रहिम् ॥
सिनि सहस्रवदने महाबले पराजिते ।
प्रत्यङ्गिरे परसैन्यपरकर्मपदं वदेत् ॥
विध्वंसिनि परमन्त्रोत्सादिनीति ततो वदेत् ।
सर्वभूतेति दमनि सर्वदेवान् वदेत् ततः ॥
बन्धयुग्मं सर्वविद्या द्विश्छिन्धि क्षोभयद्वयम् ।
परयन्त्राणीति वदेत् स्फोटयद्वितयं ततः ॥
सर्वशृङ्खलाँस्त्रोटय त्रोटय ज्वल चोच्चरेत् ।
ज्वालाजिह्वे करालेति वदने प्रत्यमुच्चरेत् ॥
गिरे ह्रीँ नम इत्येष सपादशतवर्णवान् ।
ब्रह्माऽनुष्टुब्मुनिश्छन्दो देवी प्रत्यङ्गिरा मता ॥
बीजशक्ती तारमाये कृत्यानाशेति योजनम् ।

षडङ्गानां विधिश्चात्र षड्दीर्घान्वितमायया ॥

अथ ध्यानम् ।

सिंहारूढातिकृष्णाङ्गीं ज्वालावक्त्रां भयङ्कराम् ।
शूलखड्गकरां वस्त्रे दधतीं नूतने भजे ॥

अथ पुरश्चरणम् ।

अयुतं प्रजपेन्मन्त्रं सहस्रं तिलराजिकाः ।
हुत्वा सिद्धमनुर्मन्त्री प्रयोगेषु शतं जपेत् ॥
ग्रहभूतादिकारिष्टं सिञ्चेन्मन्त्रं जपन् जलैः ।
विनाशयेत् परकृतं यन्त्रमन्त्रादिसाधनम् ॥

“अथ मन्त्रान्तरं (सिद्धान्तसंग्रहे)

ॐ यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणाऽपनिर्नुद्मप्रत्यक् कर्त्तारमिच्छतु ॥
ह्रौं मुन्याद्या विनियोगान्ता मलामन्त्रवदस्य तु ।
षडङ्गानि च पादेन पादाद्यैश्चरणेन च ॥
कुर्याद्वेदादिषड्दीर्घहृल्लेखापुटितेन च ।
शिरोभ्रूमध्यवदनगलबाहुद्वयेष्वथ ॥
हृन्नाभिपार्श्वकट्यन्ध्रुपादेषु पदशो न्यसेत् ।
व्यापकन्तं समस्तेन कृत्वा ध्यायेन्महेश्वरीम् ॥
खड्गचर्मधरां कृष्णां मुक्तकेशीं विवाससम् ।
दंष्ट्राकरालवदनां भोषाभां सर्वभूषणाम् ॥
ग्रसन्तीं वैरिणं ध्यायेत् प्रेरितां शिवतेजसा ।”

पुरश्चरणमाह ।

अयुतं प्रजपेदेनं मन्त्री प्रयतमानसः ।

“ ” एतच्चिह्नान्तर्गतः पाठः ४ पु० अधिको दृश्यते ।

दशांशं जुहुयात् पश्चादपामार्गेध्मराजिकाम् ॥
सर्पिषा च समायुक्तां ततः सिद्धो भवेन्मनुः ।
प्रयोगेषु जपेन्मन्त्रमष्टोत्तरशतं बुधः ॥
तावतैव तु होमेन परकृत्या विनश्यति ।

इति प्रत्यङ्गिरामन्त्रः ।

अथ कुब्जिकामन्त्रः ।

(कुलालिकाम्नायतन्त्रे)

श्रीकुब्जिकोवाच ।

कथं तु लघ्विकानाथ वद मन्त्रपदान्विताम् ।
सर्वज्ञां सर्वदा देव लक्षणेन समन्विताम् ॥
उवाच भैरवो ह्येवं लघ्विकां शृणु लघ्विके ।
किन्तु त्वया न वक्तव्या यावन्नादेशितः शिशुः ॥
चन्द्रेवोति प्रथमं पदं णिकिणिकि द्वितीयकम् ।
छीँ छाँ पदं तृतीयं च खिमरघोअचतुर्थकम् ॥
मेनणञडेति पञ्चमं ह्रौँ ह्राँ ह्रीँ षष्ठकं पदम् ।
यैं कुब्जिकुश्रो सप्तमं त्यैवगभ मोनाष्टमम् ॥
एषा सा समया देवी द्वात्रिंशाक्षरमालिनो ।
पञ्चप्रणवमाद्यन्तनियुक्ता लक्षणान्विता ॥
आदि कूटावसाने च द्विचत्वारिंशमालिनी ।
विलोमेनोच्चरेद्देवि गुरुवक्त्रोपदेशतः ॥
रेफसहमिदं कूटं विद्यायाः सप्तमं स्मृतम् ।
श्रीलोऐ सन्नियोक्तव्यं जीवितं कुब्जिके मम ॥
स्वमनीषिकातोऽन्यथा सविद्भिष्टोमरोचिभिः ।
गुप्तं गुप्ततरं कार्यं योगिनीहृदयनन्दनम् ॥

यस्माद्रत्नसारमित्येवं सर्वस्वं योगिनीकुले ।
अथ चेत् सर्वपीठेषु मातेयं समयात्मिका ॥
अस्याः स्मरणमात्रेण विह्वलं तु जगत्त्रयम् ।
जायते नात्र संदेह इति माता सुरक्षिता ॥
हृदयाद्यस्त्रपर्यन्तमेकोच्चारेण सुव्रते ।
सिद्धिमार्गे यथा ब्रूमि विलोमेन विलोमतः ॥

यज्ञाअ यैर्वाणाकक्को च्चेवि णिकिणिकि ययात्रत्रने केरिताह्नंमजलकु छाँ छीँ यच्चावकयैपाहृहुबखीमुरघोअ मे नणाअङ यैखाशि खेशिरर्वंव ह्रीँ ह्राँ ह्रौँ सेरशि यैपादीलकु यैकाड्जिकुश्री यथादह्व यैलामत्कह्वत्यैवगभ मोन ।

पञ्चादशाक्षरं हृदयं शिरश्चैव त्रयोदश ।
शिखारुद्राक्षरा ज्ञेया कवचैकोनविंशतिः ॥
तिथिसङ्ख्या भवेन्नेत्रमस्त्रं चैव चतुर्दश ।
पञ्चप्रणव आद्यन्तो यथा विद्या तथाऽन्तिमा ॥
एतत्कौलिकभाषायां कथितं ते सप्रत्ययम् ।
सस्फुटं गुरुवक्त्रस्थं विलोमस्थं न सिध्यति ॥
कौलिकेऽदः समाख्यातं सिद्धमार्गे सुदुर्लभम् ।

अथ ध्यानं (परातन्त्रे)

वृषभे संस्थितं देवं स्ववर्णरूपशोभितम् ।
एकवक्त्रं त्रिनेत्रं च भुजाष्टादशधारिणम् ॥
परशुं डमरुं बाणं खड्गमङ्कुशवज्रकम् ।
शङ्खं च वेणुवाद्यं च वरदं दक्षिणे करे ॥
वामे खट्वाङ्गशूलं च धनुः फलकपाशकम् ।

घण्टां कपालं वेणुं च अभयं भयनाशनम् ॥
पट्टेन बन्धितं जानुवामोरुस्था च कुब्जिका ।
एकवक्त्रा त्रिनेत्रा च करुणावरवर्णिता ॥
द्विभुजा वरदा देवी सिंहस्थाऽभयसव्यसु ।
नानाभरणभूषाङ्गी खण्डेन्दुकृतशेखरा ॥
बर्बरा केशपाशेन चारुपीनघनस्तनी ।
एवं ध्येया कुजा माता पश्चिमाम्नायनायिका ॥

अथ पुरश्चरणम् । (कुलालिकाम्नायतन्त्रे)

अक्षराक्षरसन्तानं योजयेल्लक्षसङ्ख्यया ।
लघ्वीशगुणतुल्योऽसौ हर्त्ता कर्त्ता स्वयं प्रभुः ॥
खेचरीणां पदं सो हि पश्यति ह्यविचारतः ।
निराचारेण योगेन चिन्तयन्तो महेश्वरीम् ॥

इति कुब्जिकामन्त्रः ।

अथ गङ्गामन्त्रः ।

(मेरुतन्त्रे)

अथ वक्ष्ये रुद्रशीर्षनिवासिन्याः परान् मनून् ।
तारो नमः शिवायै च नारायण्यै पदं वदेत् ॥
दशहरायै गङ्गायै स्वाहान्तो विंशदर्णकः ।
व्यासो मुनिः कृतिश्छन्दो गङ्गा देवी प्रकीर्त्तिता ॥
त्रिवह्निवेदबाणाग्निनेत्रवर्णैः षडङ्गकम् ।

अथ ध्यानम् ।

चतुर्भुजां त्रिनेत्रां च सर्वाभरणभूषिताम् ।
रत्नकुम्भसिताम्भोजवरदाभयसत्कराम् ॥
चामरैर्वीजमानां च श्वेतच्छत्रोपशोभिताम् ।

अथ पुरश्चरणम् ।

लक्षं जपेद्दशांशेन जुहुयात् सघृतैस्तिलैः ।

अथ मन्त्रान्तरं तत्रैव ।

अथान्यं संप्रवक्ष्यामि वामाचाराघनाशनम् ।
बहिर्यजनकर्त्तारः शिद्धाः स्युर्यत्प्रभावतः ॥
तारो नमो भगवति वाग्भवं च हिलिद्वयम् ।
मिलिद्वयं च गङ्गे मां पावयद्वितयं वदेत् ॥
स्वाहान्तस्तारको वर्णो मनुः पापप्रणाशनः ।
ईश्वरोऽस्य मुनिश्छन्दोऽमितं गङ्गा च देवता ॥
रामवेदाङ्गवह्न्यङ्गनेत्रार्णैरङ्गकल्पनम् ।

अथ ध्यानम् ।

रक्ताम्बरां रक्तवर्णां शूलकुम्भवराभयान् ।
करैः संदधतीं स्मेरां कच्छपस्थां सुरादिभिः ॥
तद्रूपाभिः स्वपापस्य नाशाय सुनिषेविताम् ।

अथ पुरश्चरणम् ।

वर्णलक्षं जपेद्धोमः प्रोक्तः पद्मैर्दशांशतः ।
एवं सिद्धमनुर्मन्त्री मरुदादिकनिर्जले ॥
देशे गत्वा जलार्थं तु पुरश्चर्यां समाचरेत् ।
होमादिसर्वं निर्वृत्य गङ्गामावाहयेत् ततः ॥
तत्र कूपादिकं कृत्वा भवेत् तदमृतोपमम् ।
कल्पस्थायितयाऽगाधं समस्तगदनाशनम् ॥

तथा ।

इयमादिमसप्तार्णं त्यक्त्वोक्ता तु नखाक्षरी ।
प्राग्वन्मुन्यादिकं बाणवेदत्रित्रित्रिबाहुभिः ॥
मन्त्रार्णैः स्युः षडङ्गानि पुरश्चर्यार्णलक्षकम् ।

होमद्रव्यादिकं प्राग्वत् सिद्धमन्त्रः समाचरेत् ॥
प्रयोगं जलमध्ये तु स्थित्वा जप्त्वाऽयुतं मनुम् ।
त्र्यहादवर्षाकालेऽपि वृष्टिर्भवति भूयसी ॥

अथ मन्त्रान्तरं तत्रैव ।

तारो हिलिमिलिद्वन्द्वे गङ्गे देवि नमो मनुः ।
तिथिवर्णोऽस्य मुन्यादिः पूजा पूर्ववदीरिता ॥
त्रिद्वित्र्यक्षिकृताब्ध्यर्णैः षडङ्गविधिरीरितः ।
एतस्य भजनाज्जन्तोर्नातीर्थे मरणं भवेत् ॥

पुनर्मन्त्रान्तरमाह ।

तारो लज्जा रमा हार्दं ततो भगवती पदम् ।
सम्बुध्यन्तं गङ्गदयिते नमो हुँ तथाऽस्त्रकम् ॥
अष्टादशार्णमन्त्रोऽयं मुन्याद्यं पूर्ववन्मतम् ।

इति गङ्गामन्त्रः ।

अथ मणिकर्णिकामन्त्रः ।

तत्रैव ।

अथातः संप्रवक्ष्यामि मणिकर्णीमनुद्वयम् ।
तरो वाक् ह्रीँ रमा कामस्तारोऽयं मणिकर्णिके ॥
नम ॐ तिथिवर्णोऽयं मन्त्रः परमदुर्लभः ।
मुनिर्व्यासोऽतिशक्करी छन्दः स्यान्मणिकर्णिका ॥
देवता चन्द्रनेत्राक्षिद्वीषुत्र्यर्णैः षडङ्गकम् ।

अथ ध्यानम् ।

बीजपूरं दक्षहस्ते वामेन्दीवरमालिका ।
बद्धाञ्जलिः श्वेतवस्त्रा त्र्यक्षा चन्द्रनिभानना ॥
पश्चिमाभिमुखी स्मेरा पद्मस्था पद्ममालिका ।
नानालङ्कारभूषाढ्या ध्येया श्रीमणिकर्णिका ॥

अथ पुरश्चरणम् ।

लक्षत्रयं जपेन्मन्त्वं जुहुयात् तद्दशांशतः ।
पुण्डरीकैस्त्रिमध्वक्तैर्यजेत् तां गङ्गया समम् ॥

इति मणिकर्णिकामन्त्रः ।

अथ वाग्मतीमन्त्रः ।

तत्रैव ।

अथातः संप्रवक्ष्यामि वाग्मत्याश्च मनुद्वयम् ।
वाग्बीजं प्रथमो मन्त्रो नारदोऽस्य मतो मुनिः ॥
छन्दोऽनुष्टुब्देवता तु वाग्मती परिकीर्त्तिता ।
बीजपूर्वैश्च षड्दीर्घैः षडङ्गविधिरीरितः ॥

अथ ध्यानम् ।

श्वेतम्बरां श्वेतवर्णां श्वेतगन्धानुलेपनाम् ।
सुधाकुम्भं च पद्मं च वीणां पुस्तकमेव च ॥
करैर्दधन्तीं मीनस्थां मुक्ताभरणभूषिताम् ।
एवं ध्यात्वा कर्णिकायां यजेद्देवीं षडस्त्रके ॥
रुद्रधारां मणिमतीं फल्गुं विष्णुमतीं तथा ।
प्रभावतीं भानुमतीं भूपुरे तु दिगीश्वरान् ॥

अथ पुरश्चरणन् ।

लक्षत्रयंजपेन्मन्त्वं पञ्चखाद्यैस्तथा हूनेत् ।
तर्पणादि ततः कृत्वा सिद्धो मन्त्रः प्रजायते ॥
सद्योजातस्य बालस्य जिह्वायां बीजमालिखेत् ।
मधुना स्वर्णलेखन्या सोऽष्टवर्षः कविर्भवेत् ॥
वाग्मत्यां वाऽथ गङ्गायां पुरश्चर्यां करोति यः ।
द्वितीयामप्रतिग्राहो भिक्षाशी चाथ मौनवान् ॥

ब्रह्मचारी भूमिशायी श्वेताम्बधरः शुचिः ।
वाक्सिद्धिं लभतेऽवश्यं दाता भोक्ता त्वयाचकः ॥

अथ मन्त्रान्तरं तत्रैव ।

रमात्रपावाग्बीजानि वदेद्ङेऽन्ता च वाग्मती ।
नमो ममेति च पदे धारणां च ततो धियम् ॥
वाचमद्भुतां प्रदेहि स्वाहान्तस्तत्त्ववर्णकः ।
मुन्यादिकं तथा पूजा पुरश्चर्या च पूर्ववत् ॥

इति वाग्मतीमन्त्रः ।

अथ चन्द्रमन्त्रः ।

(शारदायाम्)

अथोच्यते चन्द्रमसो मनुः सर्वसमृद्धिदः ।
खड्गीशस्थो भृगुर्विन्दुमनुः स्वरसमन्वितः ॥
सोमाय हृदयान्तोऽयं मन्त्रः प्रोक्तः षडक्षरः ।
ऋषिरुक्तो भृगुश्छन्दः पङ्क्तिः सोमोऽस्य देवता ॥
दीर्घभाजा स्वबीजेन मनोरङ्गक्रिया मता ।

अथ ध्यानम् ।

कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुविम्बाननं
मुक्तादामविभूषितेन वपुषा निर्मूलयन्तं तमः ।
हस्ताभ्यां कुमुदं वरं च दधतं नीलालकोद्भासितं
स्वस्याङ्कस्थमृगोदिताश्रयगुणं सोमं सुधाब्धिं भजे ॥

अथ पुरश्चरणम् ।

रसलक्षं जपेन्मन्त्रं साधको विजितेन्द्रियः ।
तत्सहस्रं प्रजुहुयात् पायसेन ससर्पिषा ॥

अथ मन्त्रान्तरं (मेरुतन्त्रे)

ॐ आँ श्रीँ श्रुँ सविन्दुः स सोमायेत्यग्निगेहिनी ।

दशाक्षरश्चन्द्रमन्त्रो जप्यश्चायं नृपायुतम् ॥
होमादिकप्रयोगाँश्च सर्वं पूर्ववदाचरेत् ।

इति चन्द्रमन्त्रः ।

अथ भौममन्त्रः ।

तत्रैव ।

अथ भौममनुं वक्ष्ये सर्वरोगनिवारणम् ।
अँ च अङ्गारको ङेऽन्तो हृदन्तश्चाष्टवर्णकः ॥
ऋष्याद्या ब्रह्मगायत्री भूमिपुत्राः प्रकर्त्तिताः ।
अङ्गषट्कं त्वस्य मनोर्निजबीजेन संमतम् ॥

अथ ध्यानम् ।

नमाम्यङ्गारकं रक्तं रक्ताम्बरविभूषणम् ।
जानुस्थवामहस्ताढ्यं साभयेतरपाणिकम् ॥

अथ पुरश्चरणम् ।

लक्षाष्टकं जपः प्रोक्तः खदिरोद्भवकैर्हुनेत् ।
साज्यैः संतर्पणं रक्तचन्दनाद्यैः समाचरेत् ॥

अथ मन्त्रान्तरं तत्रैव ।

अथ मन्त्रान्तरं वक्ष्ये भूमिमन्त्रस्य सिद्धिदम् ।
ॐ हाँ हँसः खँ ख इति मन्त्रः प्रोक्तः षडक्षरः ॥
मुनिर्विरूपो गायत्री छन्दो देवो धरात्मजः ।
षड्भिर्वर्णैः षडङ्गानि मनोः कुर्वीत साधकः ॥

अथ ध्यानम् ।

जवाकुसुमसंकाशं शक्तिं शूलं गदां वरम् ।
मेषसंस्थं रक्तवस्त्रं तं वन्देऽहं धरात्मजम् ॥

अस्य पुरश्चरणं षड्लक्षजपः ।

रसलक्षं जपेद्धोमं समिद्भिः खदिरस्य च ।

इति तत्रैवोक्तत्वात् ।

अथ मन्त्रान्तरं तत्रैव ।

ॐ क्राँ क्रीँ क्रौँ सबिन्दुः सकुजायेत्यग्निगेहिनी ।
दशाक्षरो भौममन्त्रो जप्यश्चायं नवायुतः ॥

पुनर्मन्त्रान्तरमाह ।

ॐ श्रीँ क्लीँ ह्रीँ समुच्चार्य ङेऽन्तो भौमो हृदन्तकः ।
दशाक्षरो मनुः प्रोक्तो विरूपाक्षो मुनिर्मतः ॥
गायत्री छन्द उदितं देवता मङ्गलो भवेत् ।
ह्रीँ बीजँ श्रीँ च शक्तिः स्यात् कीलकं क्लीँ प्रकर्त्तितम् ॥
कालादिकं समुच्चार्य नियोग ऋणनाशने ।
षड्दीर्घयुक्तबीजेन अङ्गुल्यादिषडङ्गकम् ॥

अथ ध्यानम् ।

ततो ध्यायेद्रक्तवर्णं रक्तमाल्यांशुकावृतम् ।
कण्ठे कमलमालाढ्यं करयोः शक्तिशूलकम् ॥
मङ्गलानां मङ्गलं च सर्वकामफलप्रदम् ।

अथ पुरश्चरणम् ।

एवं ध्यात्वा जपेल्लक्षं जुहुयात् करवीरजैः ।
जवाप्रसूनैः पुरुभिर्मधुरत्रितयान्वितैः ॥
रक्तचन्दनगन्धाढ्यैर्यजेदरुणभूषणम् ।
विधिना भूमितनयं सर्वाभीष्टफलप्रदम् ॥

इति कुजमन्त्रः ।

अथ भौममन्त्रः ।

तत्रैव ।

अथातः संप्रवक्ष्यामि बुधमन्त्रं महाद्भुतम् ।
बुं ङेऽन्तं बुधशब्दं च हृदयान्तः षडर्णकः ॥
बुधमन्त्रोऽस्य मुन्याद्या ब्रह्मपङ्क्तिबुधा मताः ।

षडङ्गानि स्वबीजेन विन्यस्यैवं विचिन्तयेत् ॥

अथ ध्यानम् ।

वन्दे बुधं सदा देवं पीताम्बरसुभूषणम् ।
जानुस्थवामहस्ताब्जं साभयेतरपाणिकम् ॥

अथ पुरश्चरणम् ।

प्रजपेद्वर्णसाहस्रं दशांशं जुहुयाद्घृतैः ।

अथ मन्त्रान्तरं तत्रैव ।

ॐ ब्राँ ब्रीँ ब्रूँ सबिन्दुः सबुधायेत्यग्निगेहिनी ।
दशाक्षरः सौम्यमन्त्रो जपो लक्षैकसङ्ख्यया ॥

इति बुधमन्त्रः ।

अथ बृहस्पतिमन्त्रः ।

तत्रैव ।

अथातः संप्रवक्ष्यामि गुरुमन्त्रं गुरुत्वकृत् ।
बृँ बृहस्पतये हृच्च मन्त्रश्चाष्टाक्षरो मतः ॥
छन्दोऽनुष्टुब्मुनिर्ब्रह्मा देवः प्रोक्तो बृहस्पतिः ।
बृँ बीजं पतये शक्तिर्बीजेनैवाङ्गकल्पनम् ॥

अथ ध्यानम् ।

सुवर्णाभं पीतवस्त्रं रक्तस्वर्णाम्बरादिकम् ।
किरन्तं दक्षहस्तेन तद्राशिं वामपाणिना ॥
स्पृशन्तं सम्यगपरं विपणौ कनकादिकम् ।
नानालङ्कारशोभाढ्यं विद्यासागरपारगम् ॥

अथ पुरश्चरणम् ।

जपित्वाऽशीतिसाहस्रं हुत्वा धेनुघृतेन वा ।
धर्माधर्मादिपीठे तं पूजयेदङ्गदिश्यकैः ॥

अथ मन्त्रान्तरं तत्रैव ।

ॐ ज्राँ ज्रौँ ज्रूँ सबिन्दुः सच्चतुर्थ्यन्तो बृहस्पतिः ।

वह्निस्त्रीविश्ववर्णोऽयं जप्यः पञ्चदशायुतम् ॥

इति बृहस्पतिमन्त्रः ।

अथ शुक्रमन्त्रः ।

तत्रैव ।

वस्त्रं मे देहि शुक्राय हृदयान्तः शुमादिकः ।
एकादशाक्षरो मन्त्रो विराट् छन्द उदाहृतम् ॥
ब्रह्मा मुनिर्देवता तु शुक्रो दैत्यादिपूजितः ।
षड्भिः पदैः षडङ्गानि ततो देवं विचिन्तयेत् ॥

अथ ध्यानम् ।

शुक्रं नमाम्यापणरथं मुक्ताभरणभूषिणम् ।
स्वर्णवासोरत्नधाराविमुग्धान्तःकरद्वयम् ॥

अथ पुरश्चरणम् ।

अयुतं प्रजपेन्मन्त्रं सहस्रं जुहुयाद्घृतैः ।

अथ मन्त्रान्तरं तत्रैव ।

ॐ ह्राँ ह्रीँ ह्रौँ सविन्दुः सशुक्रायेत्यग्निगेहिनी ।
दशाक्षरः शुक्रमन्त्रो जप्योऽयं द्वादशायुतम् ॥
उदुम्बरसमिद्भिश्च होमयेत् सकलापदः ।
भूपैः कृता विनश्यन्ति स्त्रीसौख्यमुपजायते ॥

इति शुक्रमन्त्रः ।

अथ शनैश्चरमन्त्रः ।

तत्रैव ।

शनैश्चराय हृदयं शमाद्यश्चाष्टवर्णकः ।
मुन्याद्या ब्रह्मगायत्रशनैश्चरसमाह्वयाः ॥
षड्दीर्घयुक्तबीजेन षडङ्गानि समाचरेत् ।

अथ ध्यानम् ।

वन्दे शनैश्चरं वक्रदंष्ट्रं नीलविभूषणम् ।

वामजानुस्थितं वामकरं दक्षे वरं दधत् ॥

'.(मार्त्तण्डभैरवतन्त्रे)

नीलाद्रिशोभाञ्चितदिव्यमूर्त्तिः खड्गी त्रिदण्डी शरचापहस्तः ।
शम्भुर्महाकालशनिः पुरारिर्जयत्यशेषासुरनाशकारी ॥

इति ध्यानान्तरमुक्तम् । '

अथ पुरश्चरणं (मेरौ)

जपेदक्षरसाहस्रं तद्दशांशं हुनेद्घृतैः ।
षडङ्गग्रहदिक्पालसायुधैः परिपूजनम् ॥
न शनैश्चरभक्तानामापदो न दरिद्रता ।

अथ मन्त्रान्तरं तत्रैव ।

ॐ प्राँ प्रीँ प्रौँ स इत्युक्त्वा शनैश्चरपदं वदेत् ।
ङेऽन्तं स्वाहा द्वादशार्णो जपः प्रयुतसंमतः ॥
हुनेच्छमीसमिद्भिश्च क्षीवाः सर्वेऽस्य वश्यगाः ।

इति शनैश्चरमन्त्रः ।

अथ राहुमन्त्रः ।

तत्रैव ।

अपरं तु मनुं वक्ष्ये राहवे नम उच्चरेत् ।
राँ पूर्वकः षडर्णोऽयं वर्णैरेवाङ्गकल्पनम् ॥
मुन्याद्या ब्रह्मगायत्रराहवः परिकीर्त्तिताः ।

अथ ध्यानम् ।

वन्दे राहुं धूम्रवर्णं सर्वकायं कृताञ्जलिम् ।
विकृतास्यं रक्तनेत्रं धूम्रालङ्कार*मन्वहम् ॥

अथ पुरश्चरणम् ।

जपेद्वर्णसहस्रं तु होमयेद्गोघृतेन च ।

' ' एतच्चिह्नान्तर्गतः पाठः ५ पुस्तक एवोपलभ्यते ।

* मण्डितम्-इति २-३-४ पु० पा० ।

ग्रहाशाधिपशस्तैश्च पूजावृत्तिरुदीरिता ॥
राहोरुपासको भूपः संग्रामे विजयी भवेत् ।

अथ मन्त्रान्तरं तत्रैव ।

ॐ साँ सोँ सौँ सबिन्दुः सराहवे त्वग्निगेहिनी ।
दशाक्षरो राहुमन्त्रो जप्यश्चायं दशायुतः ॥
दूर्वाभिर्होमयित्वा च द्विजान् संतर्प्य सिध्यते ।

इति राहुमन्त्रः ।

अथ केतुमन्त्रः ।

तत्रैव ।

कँ केतवे हृदित्येवं केतुमन्त्रः षडर्णकः ।
ब्रह्मा मुनिर्मतश्छन्दः पङ्क्तिः केतुश्च देवता ॥
कँ बीजं वँ तु शक्तिः स्याद्बीजेनैव षडङ्गकम् ।

अथ ध्यानम् ।

वन्दे केतुं कृष्णवर्णं कृष्णवस्त्रविभूषितम् ।
वामोरुन्यस्ततद्धस्तं साभयेतरपाणिकम् ॥

अथ पुरश्चरणम् ।

जपेदक्षरसाहस्रं तद्दशांशं हुनेद्घृतैः ।

अथ मन्त्रान्तरं तत्रैव ।

ॐ प्राँ प्रीँ प्रौँ सबिन्दुः सकेतवे वह्निगेहिनी ।
दशाक्षरः केतुमन्त्रो जप्योऽयं द्वादशायुतम् ॥
होमः कुशैः प्रकर्त्तव्यो घृताक्तैस्तर्पणादि च ।
उपासकानामेतस्य केतवोऽग्रे चलन्ति हि ॥

इति केतुमन्त्रः ।

अथ ग्रहमातृकामन्त्राः ।

तत्रैव ।

अथातः संप्रवक्ष्यामि ग्रहमातृसुसाधनम् ।

ग्रहमातरि तुष्टायां किं ग्रहैर्दुरितैरपि ॥
ग्रहमातरि तुष्टायां सुग्रहैः किं प्रयोजनम् ।
मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा ॥
उल्का सिद्धा संकटा च विकटा गर्भपालिका ।
रुद्रनक्षत्रतश्चाष्टौ जन्मधिष्ण्यक्रमाद्दशाः ॥
फलं नामानुरूपं स्यादेकोपच्चयतो द्वयोः ।
पिङ्गला सूर्यजननी महाधिव्याधिकारिणी ॥
तुष्टा चेच्छत्रुवर्गस्य रुष्टा कुर्याच्च साधके ।
ब्जेँ बीजं तु समुच्चार्य पिङ्गले वैरिवारिणि ॥
प्रसीद फडिति प्रोक्तस्त्रयोऽग्निशक्तिवर्णकः ।
दीर्घषट्कयुजा पूर्वबीजेन च षडङ्गकम् ॥

अथ ध्यानम् ।

पिङ्गवर्णां पिङ्गकेशीं पिङ्गनेत्रां धनुःशरान् ।
हस्ताभ्यां दधतीं पद्मयुगलं तां भजाम्यहम् ॥
अथ पूजाविधिं वक्ष्ये सर्वासामेव तन्त्रतः ।
जवापुष्पाणि शस्तानि धूपो गुग्गुलुसम्भवः ॥
घृतप्रदीपो मधुरा नैवेद्याः पायसादयः ।
अलङ्कारास्तथा रक्तास्तथा वस्त्राणि चन्दनम् ॥
स्वर्णालङ्करणैश्चापि सद्द्रव्यैर्बहुपञ्चकैः ।
तर्पयेत् परमेशानि तत्तन्मन्त्रैः सहस्रधा ॥
सुवर्णपत्रे निच्छिद्रे हस्तायामे मनोरमे ।
कृत्वा यन्त्रं तथोक्तं तु योगिनीं तत्र पूजयेत् ॥
तत्तन्मन्त्रवरं जप्त्वा विघ्नशान्त्यै सहस्रशः ।

सप्ताहेन प्रजायेत त्रिविधोत्पातवारणम् ॥
ततश्च कुण्डं विधिवत् कृत्वा च चतुरस्रकम् ।
अथ वा स्थण्डिले शुद्धे सुलिप्ते गोमयाम्बुभिः ॥
चतुर्हस्तप्रमाणेन योजयेत् स्थिरमानसः ।
योगिन्यग्निं तु संस्थाप्य कृत्वा पूर्वोदिताः क्रियाः ॥
अन्यासां दशवारं तु विरुद्धायाः सहस्रधा ।
विल्वपत्रैस्तत्फलैश्च कमलैर्नागकेशरैः ॥
जुहुयात् पायसान्नेन तथैव कुलवस्तुना ।
सहस्रमयुतं वाऽपि लक्षं वा कामनाक्रमात् ॥
अथ पूजां प्रवक्ष्यामि मध्ये देवीं प्रपूजयेत् ।
इच्छां ज्ञानं क्रियां शक्तिं त्रिषु कोणेषु पूजयेत् ॥
मन्मथान् पञ्च तदधः पञ्चकोणेषु पूजयेत् ।
षडङ्गं पूजयेत् पश्चादष्टपत्रेऽन्ययोगिनीः ॥
तद्बाह्यभूपुरे लोकपालानस्त्राणि पूजयेत् ।
पूजाप्रकारो होमश्च सर्वासामयमेव हि ॥
विशेषः पुनरत्रास्ति शत्रूच्छेदाभिचारके ।
खड्गचर्मधरामुग्रां ध्यायेत् षड्भुजधारिणीम् ॥
गरुडासनमासीनां वैरिनिग्रहकारिकाम् ।
लक्षमेकं प्रजप्यादौ जपेल्लक्षं हि तर्पयेत् ॥
सर्वशत्रुविनाशः स्याद्दुःखं नाप्नोति कुत्र चित् ।
अथातः संप्रवक्ष्यामि चन्द्रमातुश्च साधनम् ॥
मायाद्यो वह्निजायान्तो मङ्गले मङ्गलालये ।
एकादशाक्षरो मन्त्रो मङ्गलायाः प्रकीर्त्तितः ॥

कृत्वाऽऽद्येन षडङ्गानि दीर्घषट्कयुजा तथा ।
ध्यायेदेनां त्रिनयनामुद्यदादित्यसन्निभाम् ॥
दरस्मेरमुखाम्भोजां सिन्दूरसुन्दुराधराम् ।
पद्मद्वयं धनुर्बाणान् दधतीं भुजपल्लवैः ॥
सगुञ्जन्मञ्जुमञ्जीरकाञ्चीगुणविराजिताम् ।
एवं ध्यात्वा महेशानि पूर्ववत् परिपूजयेत् ॥
ततो लब्धमनुं जप्त्वा तारमायापुरःसरम् ।
योगिनीक्षेत्रवटुकगणाधिपबलिं हरेत् ॥
सर्वासामेव पूजान्ते मङ्गलैव प्रसीदति ।

अथ पुरश्चरणमाह ।

योगिन्यास्तु प्रसादार्थं वर्णलक्षं जपेन्मनुम् ।
दुर्योगिन्यनुकूलार्थं जपेत् तत्सङ्ख्यकायुतम् ॥
अदृष्टप्रतिबद्धस्य शुभायास्तु फलस्य च ।
प्राप्तये प्रजपेत् तावत्सहस्रं प्रत्यहं जपम् ॥
प्रकर्त्तव्यो वर्णशतं यावद्दुष्टा तु योगिनी ।
तुष्टाया वर्णदशकं रोगिणं चाभिमन्त्रयेत् ॥
वर्णतुल्येन मन्त्रेण यस्याः सेवापरो भवेत् ।
तस्याः पोडानिवृत्तिः स्याद्वर्णाभ्यन्तर्गतैर्दिनैः ॥
एवं विधिर्नवानां तु विज्ञेयः सुरसत्तमाः ।
योगिनी तुल्यफलदा वाममार्गे च दक्षिणे ॥
अथातः संप्रवक्ष्यामि भ्रामरीं भौममातरम् ।
क्षीँ भ्रामरि पदं चोक्त्वा जय तान्मे अधीश्वरि ॥
भ्रामय क्षौँ षोडशार्णो मन्त्रोऽस्याः परिकीर्त्तितः ।

पिङ्गलावत् सर्वमस्याः सिद्धये शर्करान् दश ॥
मन्त्रयित्वाऽनया मार्गे दशदिक्षु च संत्यजेत् ।
प्रातस्ततो व्रजेन्मार्गं मार्गस्थाः सर्वं एव हि ॥
सर्वे मोहं समायान्ति व्याघ्राः सर्पाश्च तस्कराः ।
शुल्किनो दुष्टभूपाश्च नित्यमेवं समाचरेत् ॥
उपानत्कतले यस्य लिखित्वा नाम च व्रजेत् ।
योजनैकं जपेन्मन्त्रं स भ्रमेच्च वसुन्धराम् ॥
अथातः संप्रवक्ष्यामि भद्रिकां बुधमातरम् ।
ग्लूँ बीजं तोयभूयोगाज्जातमादौ समुच्चरेत् ॥
भद्रिके मे मम भद्रं देहीति च पदं पुनः ।
वदेच्च परभद्राणि नाशय द्वितयं ततः ॥
स्वाहान्तो जिनवर्णोऽयं भद्रिकाया मनुर्मतः ।
षड्दीर्घयुक्तबीजेन षडङ्गविधिरीरितः ॥
मङ्गलावच्छुभानां स्याद्ध्यानं दुष्फलदायिनी ।
पिङ्गलावत् समुद्दिष्टं जपाद्यं प्रोक्तवर्त्मना ॥
अथातः संप्रवक्ष्यामि धन्याख्यां गुरुमातरम् ।
श्रीधनदे समुच्चार्य धन्ये स्वाहाऽष्टवर्णकः ॥
षड्दीर्घाढ्याद्यबीजेन षडङ्गविधिरीरितः ।
नास्ति धन्यासमा काचिदिह लोके फलप्रदा ॥
पुरश्चर्यात्रयं कृत्वा प्राग्जन्मार्जितपातकम् ।
संस्तम्भ्य धन्या ददते धन्यत्वं साधकाय तु ॥
बृहस्पतीश्वरात् पश्चात् काश्यां धन्यां विलोकयेत् ।
पुरश्चर्यां तत्र कृत्वा वैश्यो धन्यः प्रजायते ॥

अथातः संप्रवक्ष्यामि सिद्धां शुक्रस्य मातरम् ।
ह्रीँ सिद्धे मे सर्वमानं समुक्त्वा साधयद्वयम् ॥
हृदयान्तो मित्रवर्णः सिद्धाया मनुरीरितः ।
बीजेनैव षडङ्गानि जपाद्यं प्रोक्तवच्चरेत् ॥
नास्ति सिद्धोपासकानां कर्मासिद्धिस्तु कुत्र चित् ।
उपासका ये सिद्धायाः येनाम्नायेन जायते ॥
तदाम्नायकदेवानां पाकेऽस्याः सर्वमेव हि ।
षट्कर्म सिद्ध्यते तस्य मनोराराधनं विना ॥
अथातः संप्रवक्ष्यामि चोक्त्वा मन्दस्य मातरम् ।
ॐ मम रोगं नाशय भञ्जयैकादशाक्षरः ॥
सर्वरोगापहो मन्त्रो मार्जनात् सप्तघस्रतः ।
उल्कामन्त्रो यस्य सिद्धो न गदास्तस्य मन्दिरे ॥
शीतलायां महामार्यां महिषं लक्षणान्वितम् ।
उल्काप्रीत्यै तमुत्सृज्य नगरे भ्रामयेत् पुनः ॥
नानावाद्यैः परिवृतं वस्त्रादिभिरलङ्कृतम् ।
उत्सृजेत् तं यमाशायामुपद्रवशमो भवेत् ॥
अथातः संप्रवक्ष्यामि संकटां राहुमातरम् ।
ह्रीँ संकटे च रोगं मे परमं नाशयद्वयम् ॥
षोडशार्णस्तु मन्त्रोऽयं सर्वदुःखापनोदनः ।
कारागृहे जपेल्लक्षं बन्धमोक्षः प्रजायते ॥
वीरेश्वरादुदक् काश्यां संकटा यत्र संस्थिता ।
तत्र षोडशलक्षाणि जप्त्वा होमस्तु दूर्वया ॥
तस्य सिद्धो भवेन्मन्त्रस्तन्मुखाद्यदि निःसरेत् ।

अमुकस्यामुकं कष्टं गतं तद्गतमेव हि ॥
अथातः संप्रवक्ष्यामि विकटां केतुमातरम् ।
तारो नमो भगवति विकटे वीरपालिके ॥
प्रसीदयुगलं मन्त्रः प्रकृत्यर्णः प्रकीर्त्तितः ।
काश्यां वीरेश्वरासन्ना पश्चिमे विकटा स्थिता ॥
तत्र मन्त्रमिमं जप्त्वा ग्रहतप्ताश्च बालकाः ।
उदरं चापि बन्ध्यायाः प्रसवत्यास्तथा शिरः ॥
पित्रादिभिस्त्यक्तबालास्तथा मातृविवर्जिताः ।
साधकस्य करस्पृष्टा नीरोगाश्चिरजीविनः ॥

इति ग्रहमातृकामन्त्राः ।

अथ दिक्पालमन्त्राः ।

तत्रादौ शक्रमन्त्र उक्तस्तत्रैव ।

इमिन्द्राय नमश्चेति शक्रमन्त्रः षडक्षरः ।
पङ्क्तिश्छन्दो मुनिर्ब्रह्मा देव इन्द्रः प्रकीर्त्तितः ॥
मायेति शक्तिँ रिँ बीजं बीजेनैव षडङ्गकम् ।

अथ ध्यानम् ।

पीतवर्णं सहस्राक्षं वज्रपद्मकरं विभुम् ।
सर्वालङ्कारसंयुक्तं नौमीन्द्रं दिक्पतीश्वरम् ॥

अस्य पुरश्चरणं तत्रैव ।

प्रजपेल्लक्षमेकं तु तिलाज्याभ्यां हुनेत् ततः ।
एवं सिद्धमनुर्मन्त्री प्रयोगं कर्त्तुमर्हति ॥

अथाग्निमन्त्रः (शारदायाम्)

व्याहृतित्रयमग्नेः स्याज्जातवेद इहावह ।
सर्वकर्माणि संभाष्य साधयाग्निप्रिया ततः ॥
ताराद्योऽयं मनुः प्रोक्तः पञ्चविंशतिवर्णवान् ।

ऋषिर्भृगुर्भवेच्छन्दो गायत्रं देवताऽनलः ॥
विभक्तः पञ्चभिः षड्भिश्चतुर्भिः पञ्चभिस्त्रिभिः ।
द्वाभ्यामङ्गक्रिया प्रोक्ता वर्णैर्मूलमनोः क्रमात् ॥

अथ ध्यानम् ।

अंसासक्तसुवर्णमाल्यमरुणस्रक्चन्दनालङ्कृतं
ज्वालापुञ्जजटाकलापविलसन्मौलिं सुमुक्ताम्बरम् ।
शक्तिस्वस्तिकदर्भमुष्टिकजपस्रक्स्रुक्स्रुवाभीवरान्
तदोर्भिर्बिभ्रतमञ्चितत्रिनयनं रक्ताभमग्निं भजे ॥

अथ पुरश्चरणम् ।

गुरोर्लब्धमनुर्मन्त्री चतुर्दश्यामुपोषितः ।
जपेद्भानुसहस्राणि शुद्धाचारो जितेन्द्रियः ॥
अमावास्यादिने विप्रान् भोजयेन्मधुरोत्तरैः ।
भक्ष्यैर्भोज्यैर्यथाशक्ति दद्यात् तेभ्योऽत्र दक्षिणाम् ॥
भुक्त्वा भोगं समानीय होमद्रव्याणि शोधयेत् ।
अपरं दिनमारभ्य होमं कुर्यादतन्द्रितः ॥
क्रमाद्वटसमिद्व्रीहितिलराजीहविर्घृतैः ।
प्रत्येकमष्टोत्तरशतं जुहुयादनिशं सुधीः ॥
दशाहमेवं निर्वर्त्य विधानेन विधानवित् ।
दत्वा पूर्णाहुतिं सम्यगेकादश्यां द्विजोतमान् ॥
संपूज्य तर्पयेद्वित्तैर्यथाविभवमादरात् ।
गुरवे दक्षिणां दद्यादरुणां गां पयस्विनीम् ॥
वासांसि धनधान्यादि दत्वा संप्रीणयेद्गुरुम् ।

अथ यमन्त्रो(मेरुतन्त्रे)

ॐ क्रौँ ह्रौँ आँ च तद्बीजं ङेऽन्तं वैवस्वतं वदेत् ।

धर्मराजाय भक्तानुग्रहकृते नमो वदेत् ॥
चतुर्विंशतिवर्णोऽयं यममन्त्रोऽखिलेष्टदः ।
सिद्धीष्विष्वङ्गयुग्मार्णैः षडङ्गानि स्मरेद्यमम् ॥
मेघश्यामं प्रसन्नास्यं नानालङ्कारसंयुतम् ।
महिषस्थं दण्डधरं संस्तुतं पितृभिर्वृतम् ॥
नानारूपधरैर्दूतैः श्वेतवस्त्रं भजेद्यमम् ।

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं हुनेदाज्यान्वितैस्तिलैः ।

अथ नैर्ऋतमन्त्रस्तत्रैव ।

ॐ क्षँ निर्ऋतये रक्षाधिपतये पदं वदेत् ।
धूम्रवर्णाय खड्गेति हस्ताय प्रेतवाहनः ॥
ङेऽन्तस्ततश्च हृदयं त्रिशदर्णो मनुर्मतः ।
ॐ क्षमाद्यैर्हृदन्तैश्च पञ्चाङ्गं पञ्चभिः पदैः ॥

ध्यानम् ।

किरीटिनं च पिङ्गाक्षं धूम्राभं प्रेतवाहनम् ।
नानारक्षोगणैः सेव्यं खड्गचर्मधरं भजे ॥

पुरश्चरणं तत्रैव ।

जपेत् त्रिंशत्सहस्राणि गुञ्जाज्याभ्यां हुनेत् पुनः ।

अथ वरुणमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि मन्त्रं वरुणदैवतम् ।
तारं वँ वरुणायेति जलाधिपतये वदेत् ॥
वदेच्च शुक्लवर्णाय पाशहस्ताय संवदेत् ।
मकरेति वाहनाय नम एकत्रिवर्णकः ॥
त्रिष्टुप्छन्दो वशिष्ठर्षिर्देवता वरुणो मतः ।
ॐ वमाद्यैर्नमोऽन्तैश्च पञ्चाङ्गं पञ्चभिः पदैः ॥

ध्यानम् ।

श्वेतांशुकं दधद्धस्तैः पाशाङ्कुशवराभयान् ।
स्वच्छारविन्दवसतिर्मुक्ताभरणभूषितः ॥
तुन्दिलश्च प्रसन्नास्यो वरुणो निधिदोऽस्तु मे ।

पुरश्चरणम् ।

जपेद्वर्णसहस्रं तु होमः पद्माक्षकैर्मतः ।

अथ वायुमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि वायुमन्त्रं महाद्भुतम् ।
तारं यँ वायवे प्राणाधिपतये पदं वदेत् ॥
कृष्णवर्णायाङ्कुशेति हस्ताय मृगवाहना ।
य नमो गोद्विवर्णोऽयं वायोर्मन्त्र उदोरितः ॥
गणकोऽस्य मुनिश्छन्दो निवृद्वायुश्च देवता ।
पञ्चाङ्गानि मनोरस्य ॐ यँ बीजादिकैः पदैः ॥

ध्यानम् ।

कृष्णवर्णं धावमानं मृगस्थं वेगवत्तरम् ।
पाशाङ्कुशकरं प्रेतकृत्यापरिमलान्वितम् ॥

अथ पुरश्चरणम् ।

जपेद्वर्णसहस्राणि लाजाज्याभ्यां च होमयेत् ।
सिद्धमन्त्रस्तु तत्कालं भवेद्भूमौ बलाधिकः ॥

अथ कुवेरमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि राजराजमनून् शुभान् ।
यक्षाय च कुवेराय वदेद्वैश्रवणाय च ॥
धनधान्याधिपतये धनधान्यपदं वदेत् ।
समृद्धिं मे देहि वदेद्दापयाग्निप्रियान्तकः ॥
पञ्चत्रिंशद्वर्णमितो विश्रवा मुनिरीरितः ।

छन्दस्तु बृहती त्र्यब्धीष्वष्टाष्टाङ्गैः षडङ्गकम् ॥

ध्यानम् ।

गारुत्मतनिभं शान्तं मुकुटादिविभूषितम् ।
वरं गदां च दधतं तुन्दिलं यक्षसेवितम् ॥

पुरश्चरणम् ।

लक्षमेकं जपेन्मन्त्रं दशांशं जुहुयात् तिलैः ।
धर्मादिपीठे प्रयजेदङ्गलोकेशहेतिभिः ॥
शिवालये जपेन्मन्त्रमयुतं धनवृद्धये ।
विल्वमूलोपविष्टेन जप्तो लक्षं धनर्द्धिदः ॥
अथ मन्त्रान्तरं वक्ष्ये ॐ श्रीँ ॐ ह्रीँ समुच्चरेत् ।
श्रीँ ह्रीँ क्लीँ श्रीँ क्लीँ च वित्तेश्वराय नम इत्यपि ॥
षोडशार्णोऽस्य मुन्यादि प्राग्वत् त्रिद्विद्विनेत्रकैः ।
पञ्चाक्षिभ्यां षडङ्गं स्याद्ध्यानपूजादि पूर्ववत् ॥

अथ मन्त्रान्तरं तत्रैव ।

अथ मन्त्रान्तरं वक्ष्ये कुवेरस्य गजाक्षरम् ।
तारो वैश्रवणायेति स्वाहा पञ्चाङ्गमत्र तु ॥
स्वाहान्तैः प्रणवाद्यैस्तु पञ्चभिर्मन्त्रवर्णकैः ।

ध्यानमाह ।

धनपूर्णं स्वर्णकुम्भं तथा रत्नकरण्डकम् ।
हस्ताभ्यां बिभ्रतं खर्वकरपादं च तुन्दिलम् ॥
धराधस्ताद्दलपीठोपविष्टं सस्मिताननम् ।

पुरश्चरणम् ।

वर्णलक्षं जपेद्धोमः पूजा प्राग्वन्महाधनी ।
सेवनादस्य भवति यक्षिण्याद्यास्तथा वशाः ॥

अथेशानमन्त्रस्तत्रैव ।

प्रणवं हंसमुच्चार्य ईशानाय वदेत् ततः ।

विद्याधिपतये चेति स्फटिकेति वदेत् ततः ॥
वर्णाय शूलहस्ताय ङेऽन्तश्च वृषवाहनः ।
नमोऽन्त एकत्रिंशद्भिर्वर्णैर्मन्त्र उदाहृतः ॥
ॐ ह्रमाद्यैर्नमोऽन्तैश्च पञ्चाङ्गं पञ्चभिः पदैः ।
शक्तीनां मनवो ये च ता विद्याः परिकीर्त्तिताः ॥
पुरुषाणां च ते मन्त्रा विद्यास्तु पुरुषं विना ।
भवन्ति नैव फलदा यथा नारो नरं विना ॥
पुसां योगो यत्र नोक्तस्तत्रेशानं प्रयोजयेत् ।

अस्य पुरश्चरणमष्टसहस्रजपस्तन्त्रान्तरे प्रोक्तः ।

अथ ब्रह्ममन्त्रो (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि ब्रह्मणो मन्त्रमुत्तमम् ।
तारं पाशं ब्रह्मणे च लोकाधिपतये वदेत् ॥
रक्तवर्णायोर्ध्वलोकपालकाय वदेत् ततः ।
पद्महस्ताय च पदं ङेऽन्तं स्याद्धंसवाहनः ॥
नमोऽन्तो बाणरामार्णो मन्त्रोऽयं परिकीर्त्तितः ।
तारपाशादिकैः षड्भिः पदैरङ्गहृदन्तकैः ॥
नास्य पूजा तु मच्छापाज्जपोऽस्य परिकीर्त्तितः ।
वर्णलक्षजपादेव निग्रहानुग्रहक्षमः ॥
दशपत्रे यजेदेनं प्रागीशान्तर्दले सुराः ।
न तत्र मम शापोऽस्ति शापः केवलपूजने ॥

अथानन्तमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि शेषस्य मनुमद्भुतम् ।
तारं मायामनन्ताय नागाधिपतये वदेत् ॥
गौरवर्णायातलादिसप्तलोकेश्वराय च ।

चक्रहस्ताय गरुडवाहनाय नमोऽन्तकः ॥
एवं चत्वारिंशदर्णो मन्त्रोऽनन्तस्य कीर्त्तितः ।
मन्त्रं प्रतिचतुर्दश्यां चतुर्दशशतं जपेत् ॥
दुग्धं हुनेदिन्द्रविप्रान् भोजयेच्च चतुर्दश ।
कुर्याच्चतुर्दशीं भक्त्या धनधान्ययुतो भवेत् ॥
राज्यभ्रष्टो लभेद्राज्यं विद्याकामस्तु पण्डितः ।
भाद्रशुक्लचतुर्दश्यां विशेषात् पूजनं मतम् ॥

इति दिक्पालप्रकरणम् ।

अथ गायत्रीपुरश्चरणादि ।

(मेरुतन्त्रे)

अथ वक्ष्यामि मन्त्रेशीं गायत्रीं वेदमातरम् ।
यया तु सगुणं ब्रह्म गीयते प्रतिपाद्यते ॥
निर्गुणं यां विना मुक्तिर्न कस्यापि प्रजायते ।
महामायास्वरूपायां महाकालः स्वयं यजेत् ॥
यत्प्रभावादहं त्वं च जातकाल इवापरः ।

सगुणब्रह्मेति । सूर्यमण्डलमध्यस्थगुणत्रयात्मकतेजोरूपमित्यर्थः ।
तदुक्तं (बृहत्सिद्धान्तसारे)

अदित्यमण्डलगतं यत् तेजस्त्रिगुणात्मकम् ।
तदेतत् सगुणं ब्रह्म ब्रह्मविष्णुशिवात्मकम्—इति ॥

निर्गुणमिति । गुणत्रयोपाधिरहितमित्यर्थः ।

यां विनेति । गुणब्रह्माभिधानद्वारा निर्गुणब्रह्मप्रतिपादिकाया अस्या एव मुक्तिहेतुत्वादिति भावः ।

(शारदायाम्)

प्रणवाद्या व्याहृतयः सप्त स्युस्तत्पदादिकाः ।
चतुर्विंशत्यक्षरात्मा गायत्री शिरसाऽन्विता ॥
सर्ववेदोद्धृतः सारो मन्त्रोऽयं समुदाहृतः ।

ब्रह्मा देव्यादिगायत्री परमात्मा समीरिताः ॥
ऋष्याद्याः प्रणवस्यैते मुनिभिः परिकीर्त्तिताः ।
यमदग्निभरद्वाजभृगुगौतमकाश्यपान् ॥
विश्वामित्रवशिष्ठाख्यौ व्याहृतीनामृषीन् विदुः ।
गायत्र्युष्णिगथानुष्टुब्बृहतीपङ्क्तयः पुनः ॥
त्रिष्टुब्जगत्यौ छन्दांसि कथितानि मनीषिभिः ।
सप्तार्चिरनिलं सूर्यो वाक्पतिर्वरुणो वृषः ॥
विश्वे देवाः क्रमादासां देवताः परिकीर्त्तिताः ।

(मेरुतन्त्रे)

गायत्र्या मुनिराख्यातो विश्वामित्रोऽतितापसः ।
गायत्री छन्द इत्युक्तं देवता सविता स्मृता ॥

तन्त्रान्तरे ।

अग्निर्मुखं शिरो ब्रह्मा हृद्विष्णुरलिकं शिवः ।
साङ्ख्यायनश्च गोत्रं स्यात् त्रैलोक्यं चरणत्रयम् ॥

(शारदायाम्)

शिरसोऽस्या मुनिर्ब्रह्मा छन्दो देव्यादिका स्मृता ।
गायत्री परमात्मा तु देवता कथिता बुधैः ॥

(मेरुतन्त्रे)

व्याहृतिः सप्तभूराद्या हृन्मुखांसोरुयुग्मके ।
जठरे च क्रमात् न्यसेन्न्यासोऽयं प्रथमः स्मृतः ॥
पादाङ्गुल्याद्यसन्धौ च सन्धौ स्याद्गुल्फपादयोः ।
गुल्फजान्वोस्तथा सन्धौ तथा जानूरुसन्धिषु ॥
लिङ्गे नाभौ च हृदये कण्ठे वर्णान्न्यसेत् क्रमात् ।
कराङ्गुलीमूलसन्धौ मणिबन्धे च कूर्परे ॥
भुजमूले मुखे नासिकायां चापि कपोलयोः ।

नेत्रकर्णभ्रूशिरसि चूडाधोवामकर्णके ॥
दक्षकर्णे मुखे मस्तके च वर्णान् क्रमान् न्यसेत् ।
गायत्र्या अक्षरन्यासो द्वितीयः संप्रकीर्त्तितः ॥
पदानि दश गायत्र्याः शिरोभ्रूमध्यदृङ्मुखे ।
कण्ठहृन्नाभिगुह्येषु जान्वोरङ्घ्र्योरथ न्यसेत् ॥
शिरोदेशे तु गायत्र्याः शिरोन्यासस्तृतीयकः ।
हृदयं ब्रह्मणे प्रोक्तं विष्णवे शिर ईरितम् ॥
शिखा रुद्राय कवचमीश्वराय समीरितम् ।
नेत्रं सदाशिवायोक्तमस्त्रं सर्वात्मने स्मृतम् ॥
अयं षडङ्गन्यासस्तु चतुर्थः परिकीर्त्तितः ।
पज्जानुकटिनाभौ च हृदये कण्ठभालयोः ॥
क्रमाद्व्याहृतयो न्यस्याः परब्रह्मेति शीर्षकम् ।
पुनर्व्याहृतिन्यासोऽयं पञ्चमः परिकीर्त्तितः ॥
तत्सवितुर्हृदयाय वरेण्यं शिरसे तथा ।
भर्गो देवस्य च शिखा धीमहि कवचं स्मृतम् ॥
धियो यो नो नेत्रमुक्तमस्त्रं शेषेण कीर्त्तितम् ।
अयं न्यासस्तु षष्ठः स्यात् षडेते पापहारकाः ॥
प्राणायामत्रयं कृत्वा ततो ध्यानं समाचरेत् ।

ध्यानं यथा ।

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिन्दुनिवद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकुशाञ्छुभ्रं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

ध्यानान्तरमुक्तं तन्त्रान्तरे ।

ब्रह्माणी चतुराननाऽक्षवलयं कुम्भं करैः स्रुक्स्रुवौ
बिभ्राणारुणकान्तिरिन्दुवदना ऋग्रूपिणी बालिका ।
हंसारोहणकेलिरम्बरमणेर्बिम्बाञ्चिता भूषिता
गायत्री हृदि भाविता भवतु नः सम्पत्समृद्ध्यै सदा ॥
मध्याह्ने चान्यसन्ध्यायां ध्यानभेदमथ ब्रुवे ।

तथा ।

रुद्राणी नवयौवना त्रिनयना वैयाघ्रचर्माम्बरा
खट्वाङ्गत्रिशिखाक्षसूत्रवलयाभीतीर्दधानाऽम्बिका ।
विद्युत्पुञ्जजटाकलापविलसद्बालेन्दुमौलिः सदा
सावित्री वृषवाहनासिततनुर्ध्येया यजूरूपिणी ॥
वृद्धा नीलघनप्रभापरिलसत्पीताम्बराभूषिता
दिव्यैराभरणैरथाङ्गकमले शङ्खं गदां बिभ्रती ।
तार्क्ष्यस्कन्धगतासमस्तजगदाराध्या परा वैष्णवी
ध्येया चैव सरस्वती भगवती सामस्वरूपा सदा ॥

अस्याः पूजायन्त्रमुक्तं (मेरुतन्त्रे)

पद्ममष्टदलं लेख्यं ह्रीँकारं कर्णिकास्थितम् ।
द्वौ द्वौ स्वरौ दिग्विदिशं प्रतिपत्रे समालिखेत् ॥
किञ्जल्केषु तदग्रेषु गायत्र्यर्णाँस्त्रिशस्त्रिशः ।
तद्बहिर्वृत्तयुगलान्तराले तु समालिखेत् ॥
ककाराद्याँस्तथोमापोज्योतीरसोऽमृतं ब्रह्म ।
भूर्भुवः सुवरोमिति यन्त्रे सर्वार्थसिद्धिदम् ॥

(शारदायाम्)

प्राणायामं पुरा कृत्वा गायत्रीं सन्ध्ययोर्जपेत् ।

सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसाऽन्विताम् ॥
त्रिरुच्चरन् धिया प्राणान् धारयेद्यमानसः ।
प्राणायामोऽयमाख्यातः समस्तदुरितापहः ॥
व्याहृतित्रयसंयुक्तां गायत्रीं दीक्षितो जपेत् ।

अथास्याः पूजाविधिः (मेरुतन्त्रे)

ततस्तु पूजयेद्देवीं दशावरणसंयुताम् ।
आदौ संपूज्य देवेशीं कोणाग्रे पूजयेत् ततः ॥
त्रिकोणस्याग्निकोणात् तु प्रादक्षिण्येन देवताः ।
ब्राह्मीं माहेश्वरीं वैष्णवीमिति प्रथमावृतिः ॥
तस्याग्रतस्त्वष्टदिक्षु क्रमादष्टौ प्रपूजयेत् ।
आदित्यमुखाँश्च रविं प्रज्ञां भानुं प्रभां तथा ॥
भास्करं चापि सन्ध्यां च द्वितीयावरणं त्विदम् ।
ततोऽर्चयेदष्टदलकेशरेष्वङ्गषट्ककम् ॥
गायत्र्याश्च तृतीयोक्तं दलमध्ये यजेदिमाः ।
प्रल्हादिनीं प्रभां नित्यां विश्वम्भरां विलासिनीम् ॥
प्रभावतीं जयां शान्तां चतुर्थावरणं त्विदम् ।
ततो यजेद्दलाग्रेषु कान्तिं दुर्गां सरस्वतीम् ॥
विश्वरूपां विशालां च ईशानीं व्यापिनीं क्रमात् ।
विमलां च प्रोक्तमिदं पञ्चमावृत्तिपूजनम् ॥
तदग्रिमे त्वष्टदले एताः पूज्याश्च शक्तयः ।
तमोऽपहारिणीं सूक्ष्मां विश्वयोनिं जयावहाम् ॥
पद्मालयां परां शोभां पद्मरूपां तु षष्ठकम् ।
भवेदावरणं चाग्रे ब्राह्मयाद्याः सप्त मातरः ॥
अष्टमा त्वरुणा प्रोक्ता सप्तमावरणं त्विदम् ।

रविः सितः कुजो राहुः शनिश्चन्द्रो बुधो गुरुः ॥
अष्टमावरणं चैतच्चतुरस्रे दिगष्टके ।
दिक्पाला नवमे प्रोक्तास्तदस्त्राणि च दिङ्मिते ॥
एवं सपूजयेद्देवीं तस्या मुद्राः प्रदर्शयेत् ।

मुद्रास्तु तत्रैवोक्ताः ।

गायत्र्या अथ वक्ष्यन्ते चतुर्विंशतिमुद्रिकाः ।
जपादौ दर्शयेत् तासां देवताश्च तथा फलम् ॥
सुमुखं संहतौ हस्तावुत्तनाकुञ्चिताङ्गुली ।
प्रल्हादिनी तत्र शक्तिः साधकानन्ददायिनी ॥
संपुटौ पद्मकोशाभौ करावन्योन्यसंहतौ ।
तस्य शक्तिर्नित्यविश्वा विश्वस्यापि प्रियङ्करी ॥
विततं संहतौ हस्तावुत्तानावायताङ्गुली ।
हृदया नाम तच्छक्तिः सर्वेषां हृदयङ्गमा ॥
विस्तीर्णं संहतौ पाणी मिथो मुक्ताङ्गुलिद्वयम् ।
शक्तिस्तु विमला तस्याः प्रभावादनघो भवेत् ॥
द्विमुखाख्या हस्तयोस्तु सम्मुखं सक्तयोर्द्वयोः ।
कनिष्ठयोरेव योगः शक्तिस्तस्याः सदा विधा ॥
त्रिमुखाख्या हस्तयुग्मं संसक्तानामिकाद्वयम् ।
संयुक्तं शेषमङ्गुल्यो भिन्नाः शक्तिः प्रभाती ॥
चतुर्मुखा हस्तयुग्मं संसक्तं मध्यमायुतिः ।
शेषाङ्गुल्यस्तु संभिन्ना लोला शक्तिः प्रकीर्त्तिता ॥
मुद्रा पञ्चमुखी तद्वत् तर्जन्योर्यत्र संयुतिः ।
अपराङ्गुलयो भिन्नाः शक्तिः शान्तिश्च शान्तिकृत् ॥
भवेत् षण्मुखमुद्रा सा संपूर्णाङ्गुलियोजनम् ।

कनिष्ठाद्वितयं हित्वा शक्तिर्दुर्गा प्रकीर्त्तिता ॥
अधोमुखं नाम मुद्रा न्युब्जौ हस्तावधोमुखौ ।
आकुञ्चिताग्रौ संयुक्तौ शक्तिरस्याः सरस्वती ॥
व्यापिकाञ्जलिकं नाम मुद्रा हस्तौ तु तादृशौ ।
विशेषोऽत्र तु चोत्तानौ विश्वरूपाऽत्र देवता ॥
शकटं नाम मुद्रा सा बद्धाग्राङ्गुलिकौ करौ ।
अधोमुखौ बद्धमुष्टी विशाखा शक्तिरत्र तु ॥
यमपाशं बद्धमुष्ट्योः करयोर्ग्रन्थिते यदा ।
तर्जन्यौ तत्र तलगे वामा ज्ञेयाऽत्र देवता ॥
ग्रन्थिताख्याऽन्योन्यसन्धिलग्नाश्चाङ्गुलयो यदि ।
उत्तानौ चोच्छ्रूताङ्गुष्ठा वामा शक्तिः समीरिता ॥
सम्मुखोन्मुखमुद्रा तु सम्बद्धोर्ध्वाङ्गुली करौ ।
दक्षिणाधोमुखो वाम ऊर्ध्वमाप्यायनी भवेत् ॥
विलम्बा नाम सा मुद्रा चोत्तानोन्नतकोटिकौ ।
यस्यां करौ तु विमला तस्याः शक्तिः प्रकीर्त्तिता ॥
मुष्टिकं तु यदा मुष्टी भवतोऽन्योन्यसंयुते ।
उत्तानौ तु करौ तत्र शक्तिः प्रोक्ता तमोमयी ॥
मत्स्यस्तु सम्मुखीभूतौ युक्तानामकनिष्ठिकौ ।
ऊर्ध्वसंयुक्तवक्राङ्ग्यः शेषाः शक्तिर्हिरणमयी ॥
कूर्मस्त्वधोमुखो वामस्तादृग्दक्षेण पृष्ठके ।
समाक्रान्तस्तस्य शक्तिः सूक्ष्मा सूक्ष्मार्थसाधिनी ॥
वाराही दक्षिणस्योर्ध्वे वाममुत्तानकं करम् ।
स्थापयित्वाऽधोमुखं तन्नामयेद्विश्वयोनिका ॥

सिंहाक्रान्तं नाम मुद्रा हस्तौ चेदायताङ्गुली ।
दत्तौ श्रवणयोरूर्ध्वं शक्तिरस्या जयावहा ॥
महाक्रान्तं नाम मुद्रा प्राग्वदाकुञ्चिताग्रकौ ।
करौ कर्णस्थितौ शक्तिः प्रोक्ता पद्मालयाभिधा ॥
मुद्गरं किं चिदूर्ध्वं तु गतयोर्वामतर्जनी ।
धृता दक्षिणहस्तेन परा शोभाऽत्र देवता ॥
पल्लवाख्या भवेन्मुद्रा त्वङ्गुल्यः पल्लवीकृताः ।
देव्यग्रे दर्शयेच्छक्तिर्गदारूपीति कीर्त्यते ॥

अथ पुरश्चरणं तत्रैव ।

चतुर्विंशतिलक्षाणि पुरश्चरणमुच्यते ।
क्षीरौदनतिलान् दूर्वाः सिद्धौदनसमिद्वराः ॥
पृथक् सहस्रत्रितयं जुहुयान्मन्त्रसिद्धये ।
तर्पणादि ततः कृत्वा गुरून् संतोष्य यत्नतः ॥
प्रयोगानाचरेद्विद्वाँस्तदनुज्ञापुरःसरम् ।

इति गायत्रीपुरश्चरणविधिः ।

अथ व्याहृतीनां व्याख्या ।

(प्रपञ्चसारे)

भूःपदाद्या व्याहृतयो भूशब्दस्तदि वर्त्तते ।
तत्पदं सदिति प्रोक्तं षण्मात्रत्वात् तु भूरतः ॥
भूतत्त्वात् कारणत्वाच्च भुवःशब्दस्य सङ्गतिः ।
सर्वश्रीकरणात् स्वार्थतया च स्वरितीरितम् ॥
महस्त्वाच्च महःशब्दो महस्तेन समीरितः ।
तदेव सर्वजननात् तस्मात् तु व्याहृतिर्जनः ॥
तपो ज्ञानतया चैव तथा तापतया स्मृतम् ।

सत्यं परत्वादात्मत्वादनन्तज्ञानतः स्वयम् ॥

व्याहृतीनां प्रणवैक्यमुक्तं तत्रैव ।

प्रणवस्य व्याहृतीनामन्तःसम्बन्ध उच्यते ।
अकारो भूरुकारस्तु भुवो मार्णः स्वरीरितः ॥
बिन्दुर्महस्तथा नादो जनः शक्तिस्तपः स्मृतम् ।
शान्तिः सत्यमिति प्रोक्तं सत् तत् परतरं पदम् ॥

अथ गायत्रीव्याख्या पूर्वकं प्रणवव्याहृतीनां गायत्र्यैक्यमुक्तं तत्रैव ।

प्रणवस्य व्याहृतीनां गायत्र्यैक्यमथोच्यते ।
अत्रापि तत्पदं पूर्वं प्रोक्तं तदनुवर्ण्यते ॥
तद्द्वितीयैकवचनमनेनाखिलवस्तुनः ।
सृष्ट्यादिकारणं तेजोरूपमादित्यमण्डले ॥
अभिधेयं सदानन्दं परं ब्रह्माभिधीयते ।
यत् तत् सवितुरित्युक्तं षष्ठ्येकवचनात्मकम् ॥
धातोरिति समुत्पन्नं प्राणिप्रसववाचकात् ।
सर्वासां प्राणिजातानामिति प्रसवितुः सदा ॥
वरेण्यं वरणीयत्वात् सेवनीयतया तथा ।
भजनीयतया सर्वैः प्रार्थनीयतया स्मृतम् ॥
पूर्वस्याष्टाक्षरस्यैवं व्याहृतिर्भूरिति स्मृता ।
पापस्य भर्जनाद्भर्गो भक्तस्निग्धतया तथा ॥
देवस्य वृष्टिदानादिगुणयुक्तस्य नित्यशः ।
प्रभुत्वेन प्रकाशेन दीप्यमानस्य वा तथा ॥
ध्यै-चिन्तायामतो धातोर्निष्पन्नं धीमहीत्यदः ।
निगमाद्येन *दिव्येन विद्यारूपेण चक्षुषा ॥

---

* देवेशि इति ४ पु० पा० ।

दृश्यो हिरण्मयो देव आदित्ये नित्यसंस्थितः ।
हीनतारहितं तेजो यस्य स्यात् स हिरण्मयः ॥
यः सूक्ष्मः सोऽहमित्येवं चिन्तयामः सदैव हि ।
द्वितीयाष्टाक्षरस्यैव व्याहृतिर्भुव ईरिता ॥
धियो बुद्धिर्मनोरस्य च्छान्दसत्वात् समीरितम् ।
कृतश्च लिङ्गव्यत्यासः सूत्रात् सुप्तिङुपग्रहात् ॥
यत् तु तेजोनिरुपमं सर्वदेवमयात्मकम् ।
भजतां पापनाशस्य हेतुभूततयोच्यते ॥
न इति प्रोक्त आदेशः षष्ठ्यसौ युष्मदस्मदोः ।
तस्मादस्माकमित्यर्थः प्रार्थनायां प्रचोदयात् ॥
तृतीयाष्टाक्षरस्यापि व्याहृतिः स्वरितीरिता ।
एवं दश पदान्यस्यास्त्रयश्चाष्टाक्षराः स्मृताः ॥
षडक्षराश्च चत्वारः स्युश्चतुर्विंशदक्षराः ।
इत्थम्भूतं यदेतस्य देवस्य सवितुर्विभोः ॥
वरेण्यं भजतां पापविनाशनकरं परम् ।
भर्गोऽस्माभिरभिध्यातं धियस्तन्नः प्रचोदयात् ॥
उक्तैवमत्र गायत्री पुनस्तच्छिर उच्यते ।
आपो ज्योती रस इति सोमाग्न्योस्तेज उच्यते ॥
तदात्मकं जगत् सर्वं रसस्तेजोद्वयं स्मृतम् ।
अमृतं तदनाशित्वाद्बृहत्वाद्ब्रह्म गद्यते ॥
यदानन्दात्मकं ब्रह्म सत्यज्ञानादिलक्षणम् ।
तद्भूर्भुवः स्वरित्युक्तं सोऽहमित्योमुदाहृतम् ॥
एतत् तु वेदवत् स्यात् तु वेदस्य शिर उच्यते ।

लक्षणैरिति निर्दिष्टो वेदसारेषु निष्ठितः ॥
फलार्थी फलमाप्नोति मोक्षार्थी मोक्षमृच्छति ।

इति व्याहृतीनां व्याख्या ।

अथ प्रणवमन्त्रः ।

(प्रपञ्चसारे)

अथ प्रणवसंज्ञकं प्रतिवदामि मन्त्रं वरं
सजापमपि सार्चनं सहुतकॢप्ति सोपासनम् ।
अशेषदुरितापहं विविधकामकल्पद्रुमं
विमुक्तिफलसिद्धिदं विमलमानसैः सेवितम् ॥
आद्यः स्वरः समेतोऽमरेण सधसप्तमश्च विन्दुयुतः ।
प्रोक्तः स्यात् प्रणवोऽत्र त्रिमात्रिकः सर्वमन्त्रसमवायी ॥
मन्त्रस्यास्य मुनिः प्रजापतिरथ च्छन्दश्च देव्यादिका
गायत्री गदिता जगत्सु परमात्माख्यस्तथा देवता ।
अङ्कीवैर्युगमध्यगध्रुवयुतैरङ्गानि कुर्यात् स्वरै-
र्मन्त्री जातियुतैश्च सत्यरहितैर्वा व्याहृतीभिः क्रमात् ॥

अथ ध्यानम् ।

विष्णुं भास्वत्किरीटा*ङ्गदवलयगलाकल्पहारोदराङ्घ्रि-
श्रोणीभूषं सुराजन्मणिमकरमहाकुण्डलामण्डिताङ्गम् ।
हस्तोद्यच्चक्रशङ्खाम्बुजगदममलं पीतकौशेयवासो-
विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥

अस्य पुरश्चरणं कोटिजपः ।

तदुक्तं तत्रैव ।

दीक्षितो मनुमिमं शतलक्षं संजपेत् प्रतिहुनेच्च दशांशम् ।
पायसैर्घृतयुतैश्च तदन्ते विप्रभूरुहभवाः समिधो वा ॥

---

* भास्वत्कलापा—इति० ४ पु० पा० ।

सर्पिःपायसशालोतिलसमिधाज्यै हि योऽनले जुहुयात् ।
ऐहिकपारत्रिकमपि स तु लभते वाञ्छितं फलं न चिरात् ॥

पूजाविधिमुक्त्वा-

इत्थं मन्त्री तारमनुर्जाप्यहुतार्च्चा-
भेदैरङ्गीकृत्य च युञ्ज्यादपि योगान् ।
यैः संलब्ध्वा चेह समग्रां श्रियमन्ते
विष्णोर्धाम प्राप्य स योगी लभते सत् ॥

इति प्रणवपुरश्चरणम् ।

अथ वैदिकमृत्युञ्जयमन्त्रः ।

(मेरुतन्त्रे)

मृत्योर्भयं तु सर्वेषां सर्वदा सर्वकर्मसु ।
तस्मिन् जिते तु देवादिमोक्षान्तं साधयेज्जनः ।
तदर्थं संप्रवक्ष्यामि मन्त्रं मृत्युञ्जयाभिधम् ॥
उपासना तस्य न स्याद्वंशेऽल्पायुश्च रोगभाक् ।
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ॥
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।
वशिष्ठोऽस्य मुनिश्छन्दोऽनुष्टुब्देवस्त्रियम्बकः ॥
त्रिचतुर्वसुगोपश्चत्रिभिर्वर्णैः षडङ्गकम् ।

ध्यानमाह ।

हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो
द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम् ।
अङ्कन्यस्तकरद्वयामृतघटं कैलाशसंस्थं शिवं
स्वच्छाम्भोजगतं नवेन्दुमकुटं देवं त्रिनेत्रं भजे ॥

पुरश्चरणम् ।

जपेल्लक्षमिमं मन्त्रमेवं ध्यायेज्जितेन्द्रियः ।

जुहुयाद्दशभिर्द्रव्यैरयुतं घृतसंप्लुतैः ॥

यथाद्रव्याणि तत्रैवोक्तानि ।

विल्वं पलाशं खदिरं वटं च तिलसर्षपौ ।
पायसं दधि दूर्वां च तथैकेन सहस्रकम् ॥
तर्पयित्वाऽभिषिच्याथ ब्राह्मणाँस्तोषयेद्गुरुम् ।
एवं कृते प्रयोगार्हो जायतेऽयं महामनुः ॥

इति वैदिकमृत्युञ्जयपुरश्चरणम् ।

अथ रुद्राध्यायपुरश्चरणविधिः ।

तत्रैव ।

श्रीविष्णुरुवाच ।

देवदेव महादेव भक्तानुग्रहकारक ।
कालस्त्वमसि लोकानां महामाया त्वियं परा ॥
आवयोः के तुष्टिकरा मन्त्राः सूक्तानि तद्वद ।
येन भुक्तिश्च मुक्तिश्च क्लेशो नैव च नैव च ॥

श्रीशिव उवाच ।

विष्णो गोप्यं त्वया पृष्टं न वाच्यं तान्त्रिके द्विजे ।
तन्त्रे मे तामसं रूपं त्वया पृष्टं तु सात्त्विके ॥
भोगमोक्षैकनिलयं चतुर्वेदोत्तमोत्तमम् ।
मन्त्रं स्तोत्रेश्वरं तन्मे जानीहि शतरुद्रियम् ॥
छन्दांस्यनुष्टुबादीनि अघोरोऽस्य मुनिर्मतः ।
देवताऽस्य भवेद्रुद्र आदित्यः परपूरुषः ॥

(पद्धतौ)

श्रीरुद्रप्रीतये शतरुद्रियजपे विनियोगः ।

अथ कराङ्गन्यासौ तत्रैव ।

ॐ अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः ।

ॐ दर्शपौर्णमासात्मने तर्जनीभ्यां नमः ।
ॐ चातुर्मास्यात्मने मध्यमाभ्यां नमः ।
ॐ निरूढपशुबन्धात्मने अनामिकाभ्यां नमः ।
ॐ ज्योतिष्टोमात्मने कनिष्ठाभ्यां नमः ।
ॐ चत्वारिंशच्छतसहस्रात्मने करतलपृष्ठाभ्यां नमः ।

एवं हृदयादिन्यासः ।

महान्यासस्तु विस्तरभयादुपेक्षितः ।

अथ ध्यानम् ।

आपातालनभःस्थलान्तभुवनब्रह्माण्डमाविस्फुर-
ज्ज्योतिस्फाटिकलिङ्गमौलिविलसत्पूर्णेन्दुवान्तामृतैः ।
आस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकान् जपन्
ध्यायेदीप्सितसिद्धयेऽद्भुतपदं विप्रोऽभिषिञ्चेच्छिवम् ॥

(मेरुतन्त्रे)

पार्थिवोक्तप्रकारेण लिङ्गपूजां ततश्चरेत् ।
आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः ॥
आराधयामि भक्त्या त्वां मां गृहाण महेश्वर ।
आत्वावहन्तु हरयः सचेतसश्चेतैरश्वैः सह केतुमद्भिः ।
वाताजलैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वो नमः ।

एत् ते रुद्रभावसं तेन परो मूजवतोऽतीहि अवततधन्वा पिनाकवसः कृत्तिवासा अहिंसन्नः शिवोऽतीहि ।

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याँ आविवेश ।

प्रसन्नो भव देवेश सुमुखो भव शङ्कर ।
शान्तो भवस्व चात्र त्वं मम चाभिमुखो भव ॥

स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम् ।
तावत् त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधो भव ॥
अभिषेकं ततः कुर्यादमृतैः पञ्चभिः क्रमात् ।
पश्चाच्छुद्धोदकेनाथ ततः पूजनमाचरेत् ॥
रौद्रीं धारां ततः कुर्यात् प्रोच्यते तद्विधानकम् ।
नमस्ते रुद्राग्नाविष्णु इत्यध्यायद्वयेन च ॥
आवर्त्तनमिति प्रोक्तं गङ्गास्नानफलप्रदम् ।
आवर्त्तनाभिषेकं तु यः कुर्यात् प्रत्यहं नरः ॥
तस्य दैनन्दिनं पापं दैवजं नाशमाप्नुयात् ।
सन्ध्यावन्दनतः क्षीणं तच्चेत् प्राग्जन्मजं हरेत् ॥
एकः पाठो नमस्तस्य अनुवाकः परस्य च ।
एवं भवा नमस्ते स्युरग्नाविष्णुस्तथैककम् ॥
इयं रुद्री समाख्याता रौद्रपापनिकृन्तनी ।
अनया प्रत्यहं यस्तु कुर्याल्लिङ्गेऽभिषेचनम् ॥
जन्मजन्मकृतं पापं वर्षे वर्षे प्रणश्यति ।
सप्तजन्मकृते पापे नष्टे लक्ष्मीर्विवर्धते ॥
वंशश्च स्थिरतामेति यशो याति दिगन्तरम् ।
सूते चास्य यथा रूपं तथा तोये प्रणश्यति ॥
रुद्रीभिरेकादशभिर्लघुरुद्रः प्रकीर्त्तितः ।
अनेन सिक्तं यैर्लिङ्गं ते न पश्यन्ति भास्करिम् ॥
एकादशभिरेतैस्तु महारुद्रः प्रकीर्त्तितः ।
निर्धनानां द्विजानां च महापातकनाशनः ॥
अनेन विहितो होमः सोमयागफलं स्मृतम् ।

अनधिकारादीक्षायां कलौ पक्षस्त्वयं मतः ॥
एकादशमहारुद्रैरतिरुद्रः प्रकीर्त्तितः ।

तथा ।

शाखायां यस्य तु यथा स्वाध्यायौ पठितावुभौ ।
पठनीयौ तथा तेन शाखाभेदं न कारयेत् ॥
न रुद्रो यस्य शाखायां तैत्तिरीयं पठेत् स तु ।
शाखा तु यजमानस्य ब्राह्मणद्वारतः कृते ॥
अथ वा तैत्तिरीया स्यान्नान्या शाखा प्रयुज्यते ।
शाखामिश्रं कृतं कर्म यजमानं विनाशयेत् ॥
धनलोभात् परार्थं यो विप्रो मामभिषिञ्चति ।
स तु चाण्डालवज्ज्ञेयो निर्धनः सप्तजन्मसु ॥
कुटुम्बिना तु यत्नेन धनार्थं यच्च पूजनम् ।
कृते चेज्जपदानाभ्यां तद्दशांशोऽस्य निष्कृतिः ॥

तथा ।

रुद्रो न यस्य शाखायां परिशिष्टान्वितं स तु ।
पठेद्रुद्रं तैत्तिरीयं लुप्तशाखस्तमेव हि ॥
मन्त्रः प्रयोगसहितो रुद्राध्यायोऽथ वक्ष्यते ।
असंस्कृताय नो वाच्यं ताम्भिकाय कदा च न ॥

तत्रादौ ।

ॐ नमस्ते रुद्रमन्यव-इत्यारभ्य मा हिंसीः पुरुषं जगत्-इत्यन्तानां पुरश्चरणप्रयोगः ।

दशलक्षं जपेद्विद्वानृच एता जितेन्द्रियः ।
लक्षमेकं प्रजुहुयात् प्रत्यृचं योऽञ्जलिप्रभम् ॥
यवगोधूमकं क्षौद्रतिलाज्यदधिसंयुतम् ।
यत्किञ्चित् कार्यमुद्दिश्य तस्य सिद्धिः प्रजायते ॥

एवमेव सहस्रं चेदेकादशदिनं हुनेत् ।
ग्रामगं बालमरकं नश्यते नात्र संशयः ॥
कुमारमरकं ग्रामे द्वादशाहेन नश्यति ।
होमः पञ्चदशाहं तु राष्ट्रोपद्रवनाशनः ॥
होमाद्विंशतिरात्रेण देशोपद्रवनाशनम् ।
पृथिव्युपद्रवो नश्येन्मासमात्रेण होमतः ॥
गवामुपद्रवे जाते गोष्ठमध्ये तदा हुनेत् ।
वैकङ्कतसमिद्भिर्वाऽयुतं शान्तिः प्रजायते ॥
अयुतद्वयहोमेन महाशान्तिर्भवेद्ध्रुवम् ।

शिवेन वचसा-इत्यादि ।

जपेदयुतसङ्ख्याकं शापमोक्षः प्रजायते ।
शिशिरे तु जले प्रातर्लक्षं जप्त्वा सुखी भवेत् ॥

अध्यवोचत्-इति ।

लक्षमेकं पुरश्चर्या होमः स्याच्छ्वेतसर्षपैः ।
व्याधिसंक्रामणी चेयं प्रयोगान्तरमुच्यते ॥
सप्ताभिमन्त्रितान् कृत्वा सर्षपानातुरस्य तु ।
चतुर्दिक्षु क्षिपेद्रक्षा दशदिग्भ्यः प्रजायते ॥
सप्ताभिमन्त्रितान् कृत्वा पथि गच्छँस्तु सर्षपान् ।
दशदिक्षु क्षिपेन्नित्यं पथि क्षेमः प्रजायते ॥
ब्रह्मराक्षसयक्षाद्यैः पिशाचप्रेतभूतकैः ।
आविष्टसर्षपैस्ताडयः सप्तवाराभिमन्त्रितैः ॥
पुनः पुनर्मन्त्रपाठपूर्वकं ते धनार्थिनः ।
धनं गृहीत्वा गच्छन्ति करे तं द्रुतमेव च ॥

शिखामाक्रम्य च यजेत् ताडयेद्गौरसर्षपैः ।
रात्रिं समस्तां स्कन्दादिग्रहपीडा विनश्यति ॥
अनेन मन्त्रयित्वा तु दद्याच्छास्त्रोक्तमौषधम् ।
तत्कालं तद्गुणाय स्यादन्यथाऽसौ यथाविधि ॥
अभिमन्त्र्य जलं दद्यात् सर्वसत्त्वभवां रुजम् ।
हरेत् सर्वग्रहाणां च सर्षपैस्ताडनात् तथा ॥
सर्वभूतोद्भवां पीडां भस्मधारणतो जयेत् ।
दिवसे च तथा रात्रौ त्रिशूलमभिमन्त्रयेत् ॥
सहस्रैकं सहस्रकं क्षिपेन्नागह्रदे तु तत् ।
त्रिशूलं बान्धवोपेता नाशं गच्छन्ति पन्नगाः ॥
भस्माभिमन्त्रितं कृत्वा पन्नगाक्रान्तमन्दिरे ।
क्षिपेत् तत्तालशब्देन पन्नगोत्सादनं भवेत् ॥

असौ यस्ताम्र-इत्यादि ।

उदयास्तमये सूर्यमेताभ्यामुपतिष्ठते ।
अष्टोत्तरशतं त्र्यब्दमक्षयान्नोद्भवो भवेत् ॥
सहस्रमभिजप्तेन क्षीरेण स्नापयेच्छिवम् ।
अब्दैकेन प्रसन्नः स्याद्घृतस्नानाच्च वर्षणम् ॥
अतसीनां तु पुष्पाणि हुनेदयुतसङ्ख्यया ।
अवशो वश्यतां याति सविता वरदो भवेत् ॥
अर्कवृक्षोद्भवैर्दुग्धैराप्लुतानां तु होमयेत् ।
अयुतं चार्कसमिधां सक्तुं च सजलं ददेत् ॥
होमान्ते भगवान् सूर्यो वृष्टिं मुञ्चति नान्यथा ।
मन्त्रद्वयं तु भजतामिष्टां सिद्धिं प्रयच्छति ॥

नमोऽस्तु नीलग्रीवाय–इत्यादि ।

स्थण्डिलस्योपयुक्तं तु *कृत्वा सघृतपायसम् ।
कृष्णाष्टमीं समारभ्य यावत् कृष्णचतुर्दशी ॥
प्रत्यहं स्नापयेत् तावत् सहस्रेणाभिमन्त्रितम् ।
निवेदयेत् तद्देवाय कार्षापणसहस्रकम् ॥
सोद्यमाज्जायते लाभः सिद्धे मन्त्रे न संशयः ।
असिद्धे तु तदर्धं स्यात् सूर्यकान्तदृषद्यपि ॥
निवेदनात् पुनर्लाभो लक्षमेकं पुरस्कृतिः ।
होमस्तु पायसघृतैरनाख्येयः प्रयोगवान् ॥

प्रमुञ्च धन्वस्त्वम्–इत्यादि ।

आभिः षड्भिस्त्वायुधानि मन्त्रयेच्च सहस्रकम् ।
बन्धयित्वा तानि रणे गच्छेत् गच्छन्ति शत्रवः ॥
जुहुयादयुतं गर्भकण्टक्या द्वेषकामुकः ।
गुडं मुखेन चोत्थाप्यं शत्रोर्नाम स्मरन् जपेत् ॥
जपाख्यस्यासनेनैव शत्रुमुत्सादयेद्धटात् ।
संपूर्णाहं जपन्नेव नगरं ग्राममेव च ॥
उत्सादयेच्च राजानमहोरात्रं जपन्निति ।
राजपुत्रं दिनार्धेन क्षत्रियं त्रिलवेन च ॥
चतुर्भागेन वैश्यं च षड्भागेनैकजातिकम् ।
पलाशाश्वत्थविल्वानामपामार्गस्य च क्रमात् ॥
विप्रादिवश्यकामस्तु दधिक्षौद्रघृतान्विताः ।
हुनेदयुतसङ्ख्याकाः समिधः कार्यसिद्धये ॥

---

* कृशरम्–इति २–३ पु० पा० ।

हीनवर्णान् वशीकर्त्तुं वरुणार्ककवेतसाम् ।
साखोटकाँश्च जुहुयाद्दृष्ट्वा विप्रादिवृत्तिकान् ॥
सौगन्धिकान्युत्पलानि कुमुदानि प्रयच्छति ।
स्वयम्भुलिङ्गे लक्षं तु चन्दनाक्तानि भक्तितः ॥
राज्यभ्रष्टो भवेद्राजा षड्भिर्मन्त्रैः पृथक् पृथक् ।
धनार्थी प्राप्नुयाद्वित्तं शङ्कुवन्निति पूजयेत् ॥
लक्षमेकं तिलानां यः पृथङ्मन्त्रैः शिवोपरि ।
आरोपयेत् स शत्रूणां सदा मूर्धनि तिष्ठति ॥
अयुतं राजवृक्षस्य समिधो होमयेत् तु यः ।
रणे राजकुले द्यूते स शत्रुं त्वरितं जयेत् ॥
गुग्गुलं षट्सहस्रं यो दक्षिणामूर्त्तिसन्निधौ ।
यत्कार्यार्थं हुनेत् तस्य सिद्धिः शीघ्रं प्रजायते ॥
असाध्यस्यापि सिद्धिः स्याद्धुत्वा चाष्टसहस्रकम् ।
यथा महानसे सिद्धमन्नं च जुहुयात् तथा ॥
सहस्राष्टकमेतस्य द्रव्यं भवति चाक्षयम् ।
एका ऋक् परिशिष्टस्य एतस्याग्रे प्रचक्षते ॥

नमस्ते अस्तु भगवन्—इति ।

अयुतं यो जपेदेतां घृताक्तैर्विल्वपत्रकैः ।
प्रतिनामसहस्रं तु हुत्वा स्याल्लोकवन्दितः ॥

नमो हिरण्यवाहवे—इत्यादि ।

पुरश्चरणमेतस्य सहस्राष्टकमीरितम् ।
यः संग्रामगतस्तस्य कौशल्यार्थमिदं जपेत् ॥
जपप्रभावाच्छस्त्राद्यैः सोऽरिभिर्नैव बाध्यते ।

सुतायार्हन्न्यासपूर्वं पशिरिष्टं निगद्यते ॥
नमो रोहिताय स्थपतये-इति ।
सहस्रपञ्चकं चास्य पुरश्चरणमुच्यते ।
एतज्जप्तुर्भयं नास्ति व्याघ्रचौरादिजं वने ॥
नमः सहमानाय निव्याधिन-इत्यादि ।
सहस्राष्टकमेतस्य पुरश्चरणमुच्यते ।
व्रणादेस्तीव्रपीडाया नाशकोऽस्य जपः स्मृतः ॥
नम इषुमद्भ्यो-इत्यादि ।
सहस्रनवकं तावत् पुरश्चरणमस्य तु ।
सेनायाश्चतुरङ्गानां शान्तये प्रजपेदिदम् ॥
नम आव्याधिनीभ्यो-इत्यादि ।
पुरश्चरणमेतस्य सहस्राणां तु षोडश ।
दुष्टग्रहबलिं दत्वा जप्त्वा च तं निरामयः ॥
नमो भवाय च-इत्यादि ।
पुरश्चर्यायुतं चास्य विभवार्थं प्रयोजयेत् ।
त्रिसन्ध्यासु पठेदेतद्भवेद्वर्षेण भाग्यवान् ॥
नमो ग्र्याय-इत्यादि ।
सहस्रपञ्चकं तावत् पुरश्चरणमुच्यत्ते ।
गणस्याग्र्यत्वमाप्नोति मन्यते च परैरपि ॥
नमो ज्येष्ठाय च-इत्यादि ।
सहस्रदशकं तावत् पुरश्चरणमुच्यते ।
ज्ञातृश्रेष्ठत्वमाप्नोति जप्ते तस्य न संशयः ॥
नम आशुषेणाय-इत्यादि ।

पुरश्चर्या तु निर्दिष्टा सहस्राणां तु पञ्चकम् ।
जप्त्वा नश्यति खञ्जत्वं पादुकासिद्धिमाप्नुयात् ॥

नमो दुन्दुभ्याय—इत्यादि ।

अयुतद्वितयं चास्य पुरश्चरणमुच्यते ।
संग्रामजयकृच्चायमनुवाकः प्रकीर्त्तितः ॥

नमः कूप्याय च—इत्यादि ।

षट्सहस्रं पुरश्चर्या ग्रहेणाधिष्ठितो निधिः ।
अभिमन्त्रितमेतेन तोयं तन्निधिमोचकम् ॥

नमः सोमाय च —इत्यादि ।

पुरश्चर्याऽयुतमिता जपेदष्टोत्तरं शतम् ।
त्रिकालं भस्मतोयं च भक्षयेल्लेपयेत् तथा ॥
मासत्रयाद्राजयक्ष्मा किलासश्वित्रमब्दतः ।
नश्येद्देहो भवेद्दिव्यः क्षुद्ररोगा दिनत्रयात् ॥

नमस्तीर्थ्याय च—इत्यादि ।

षट्सहस्रं पुरश्चर्या षण्मासं तीर्थगो जपेत् ।
यथोक्तं तत् तीर्थफलं भुञ्जते चेह जन्मनि ॥

मम इरिण्याय च—इत्यादि ।

सहस्रनवकं तावत् पुरश्चरणमुच्यते ।
धातुवादो राजतस्तु सिध्यते तत्प्रभावतः ॥
अत्रास्ति परिशिष्टस्यानुवाक एक एव हि ।
रजस्याय च चैतस्य नमोऽन्तस्याग्रतः पठेत् ॥

नमो नन्दिकाय च—इत्यादि ।

सहस्राष्टकमेतस्य पुरश्चरणमुच्यते ।

बालग्रहा विनश्यन्ति बर्हिपिच्छौघमार्जनात् ॥
नम ऊर्व्याय च–इत्यादि ।
पुरश्चर्यासहस्राणां चतुष्टयमुदाहृतम् ।
अभिमन्त्र्य जलं देयं शोकशान्त्यै तु शोकिने ॥
नमो वः किरिकेभ्य–इत्यादि ।
तिलहोमेनायुतेन कार्षापणसहस्रकम् ।
उद्यमाद्वाऽथ भूपालात् प्राप्नुयाद्वर्षमध्यतः ॥
अपामार्गस्य समिधाऽयुतं हुत्वा रसापतिः ।
सहस्रस्वर्णतुल्यस्य स्वस्य सिद्धिः सकृद्भवेत् ॥
गुग्गुलुप्रतिमां कृत्वा क्षुरेणोत्कर्त्तयेच्च ताम् ।
जुहुयादष्टसाहस्रं लभेत् कन्यामलङ्कृताम् ॥
एवं कृत्वाऽथ वा होमं धनार्थी जपपूर्वकम् ।
सुवर्णानां तु शतकं प्राप्नुयाद्वर्षमध्यतः ॥
हुनेद्गोसफखण्डानि चैकादशसहस्रकम् ।
घृत्ताक्तानि लभेन्मासाद्गाव एकादशैव हि ॥
पुरश्चरणपूर्वं तु लक्षैकं तिलतण्डुलान् ।
यो हुनेत् तस्य गेहे तु राज्यलक्ष्मीः स्वयं वसेत् ॥
एवं च तिलधान्याभ्यां होमाल्लक्ष्मीः स्थिरा भवेत् ।
शतपुष्यमयीं कृत्वा प्रतिमां राजरूपकाम् ॥
सहस्रं जुहुयाद्राजा वशोऽवश्यं प्रजायते ।
पद्मोत्पलानां लक्षं तु हुत्वा भूयः श्रियं लभेत् ॥
चणकप्रतिमालक्षं होमयेद्गुग्गुलैर्वटीम् ।
स्मृतसामन्तराज्यं स प्राप्नोत्येव न चान्यथा ॥

हुनेद्बिल्वसमिद्भिस्तु दक्षिणामूर्त्तिसन्निधौ ।
लक्षमेकं तदा राष्ट्रं सामन्तस्य लभेद्ध्रुवम् ॥
महाच्चतुष्पथे स्थाप्यं लिङ्गं वल्मीकमृद्भवम् ।
स्नापयेत् पञ्चगव्येन रुद्राध्यायेन मन्त्रयेत् ॥
मानस्तोकेन मन्त्रेण चाभिषिञ्चेन्निवेद्यकम् ।
सघृतं पायसं दद्याद्भूतेभ्यश्च तथा वलिम् ॥
एवं मासत्रयं कृत्वा महदैश्वर्यमाप्नुयात् ।
पलं वाऽर्धपलं वाऽपि दक्षिणमूर्त्तिसन्निधौ ॥
श्वेताम्बरां चूर्णयित्वा स्थापयेत् ताम्रपात्रके ।
आलोड्य कपिलाज्येन प्रदेशिन्याऽभिमन्त्रितम् ॥
सहस्राष्टकमेतेन मन्त्रेण प्रपिबेदथ ।
भवेत् तस्याप्रतिहतं वाक्यं सर्वत्र निश्चितम् ॥
उदुम्बरस्य समिधो दध्यक्ताश्चायुतं हुनेत् ।
स्वामी बहुगवां स स्यात् क्षीयन्ते नास्य धेनवः ॥
विल्वानां तु घृतक्तानां हुनेदष्टसहस्रकम् ।
सुवर्णाष्टकमाप्नोति ह्यसिद्धो रजताष्टकम् ॥
विल्वाभावे त्वामलकं तदभावे उदुम्बरम् ।
तस्याभावे हैमवती तदभावे विभीतकम् ॥
श्रीखण्डगोघृताक्तानां पद्मानां लक्षमेककम् ।
हुनेद्यस्तस्य लक्ष्मीस्तु स्वयमेवोपतिष्ठते ॥

द्रापे अन्धसस्पते-इत्यादि ।

अनेन जुहुयादाज्यमयुतान्नियुतावधि ।
अक्षयाण्यस्य वासांसि भवन्ति च तथा तथा ॥

याते रुद्र-इत्यादि ।

उर्णा ग्राह्या जीवदवेस्तन्तूस्तन्तूर्विहाय च ।
एकादशशरं कुर्यात् सूत्रमेकैकसूत्रकम् ॥
सहस्रमभिमन्त्र्याथैकादश ग्रन्थयः स्मृताः ।
एवं संपूज्य तां रज्जुं धूपं दत्वा च बन्धयेत् ॥
वामहस्ते तु गर्भिण्या बद्धं सा सुखतः सुवेत् ।
दक्षे बालकहस्ते तु सुखं तिष्ठति बालकः ॥
धनिको बाहुमूले वा कण्ठे वा धारयेदिदम् ।
कदा चिदुत्तमर्णस्य भयं तस्य न जायते ॥

इमाꣳरुद्राय-इत्यादि ।

अष्टोत्तरसहस्रं तु प्रत्यहं जुहुयात् तिलान् ।
अयाचितं धनं तेन लोकेभ्य उपलभ्यते ॥
यश्च दूर्वाप्रवालानां घृताक्तमयुतं हुनेत् ।
महाज्वरोप्रघातेऽपि मृतकल्पः स जीवति ॥
माक्षिकपायसाज्याशी अयुतं जुहुयाच्छुचिः ।
महाग्रहज्वरादिभ्योऽभिचाराच्च प्रमुच्यते ॥
वैकङ्कतानामयुतं समिधानां घृतैर्हुनेत् ।
ज्वरादिकभवा पीडा सद्य एव विनश्यति ॥
द्रव्याद्यर्थं यदा केचिन्मृदुभिरभिभूयते ।
तदा तुषान् प्रजुहुयादयुतं सुखमेधते ॥
वैकङ्कतीश्च समिध औदुम्बरीस्तिलाँस्तथा ।
अनेन जुहुयाल्लक्षं सर्वशान्तिकरं स्मृतम् ॥
गवां वाऽन्यपशूनां वा ह्युपघाते तु तत्स्थले ।

अग्निं संस्थाप्य जुहुयाद्वैकङ्कतीर्दधिप्लुताः ॥
अयुतं तस्य शान्तिः स्यात् पालाशानां तथाऽयुतम् ।
घृताक्तानां प्रजुहुयान्महाज्वरमुखा ग्रहाः ॥
राक्षसा भूतवेतालाः प्रेताश्चापि पिशाचकाः ।
जनं चापि गजं चाश्वं मुक्त्वा गच्छन्ति दूरतः ॥
जनानां जननं यस्मिन् गेहे भवति भूरिशः ।
मरणं वाऽथ हानिर्वा तत्र शान्तिरुदीर्यते ॥
घृताक्तानां तिलानां तु जुहुयादयुतं द्विजः ।
यस्मिन् देशे महामारी व्याघ्रादीनां भयं च वा ॥
देवरक्षोभयं यत्र तत्र शान्तिं वदाम्यहम् ।
पुरस्य मध्यभागे तु वह्निस्थापनमाचरेत् ॥
चतुर्दिक्षु च सन्नद्धा गुप्ताश्चत्वार एव हि ।
नराः स्थाप्यास्ततः कर्म सावधानः समाचरेत् ॥
अष्टोत्तरसहस्रं तु घृताक्तान् जुहुयात् तिलान् ।
ततोऽर्धरात्रसमये चौदनं सघृतं तिलान् ॥
पिष्टं माषौदनं चापि कृशरं परमान्नकम् ।
सुप्ते जनपदे दद्यात् स्थाने स्थाने ततो बलिम् ॥
पलाशपत्रे रुद्रेभ्यो रक्षोभ्यस्तदनन्तरम् ।
कुर्यादेवं पक्षमेकं सर्वोपद्रवनाशनम् ॥

मृडानो रुद्र—इत्यादि ।

सहस्रं प्रजपेत् तोये तीरे संपूजयेच्छिवम् ।
यावद्दूरे भवेदिष्टस्त्रिधाहावाञ्जिलिष्यति ॥

मानो महान्तम्—इत्यादि ।

परिजनस्य बालानामारोग्यार्थं तिलान् हुनेत् ।
अयुतं शीतलादिभ्य आरोग्यं जायते द्रुतम् ॥

मानस्तोके–इत्यादि ।

मानस्तोकं महाकल्पं सर्वतन्त्रेषु गोपितम् ।
कथयिष्यामि मुनये देवानां कार्यसिद्धये ॥
अतिकृच्छ्रेण कृच्छ्रेण तथा चान्द्रायणेन च ।
आदौ संशोध्य चात्मानं पूतकायो जपं चरेत् ॥
जपन्नेतत् तु भुञ्जीत शाकं वा यावकं पयः ।
भिक्षां वा जपतस्तस्य भवेदयुतसङ्ख्यकम् ॥
सहस्रमात्रं होमः स्यात् प्रयोगार्हो भवेन्मनुः ।
प्रयोगान्ते त्वहोरात्रं जपः कार्यो निरन्तरम् ॥
तद्दशांशेन जुहुयादौदुम्बरीर्घृतान्विताः ।
महाव्याहृतिभिः पश्चात् तावदेवं घृतं हुनेत् ॥
संस्रावभागं संप्राश्य प्रयोगैर्न क्षयं व्रजेत् ।
पुनः कर्म प्रकुर्वीत प्रायश्चित्तं पुनः पुनः ॥
स्नायाच्च तीक्ष्णतैलेन सप्तधा मन्त्रितेन च ।
मारणादिप्रयोगानां भवेत् पातकमोचनम् ॥
ब्रह्मवर्चसकामस्तु हुनेदष्टसहस्रकम् ।
घृताक्तानां च समिधामसाध्यः सर्वकर्मसु ॥
पद्मानां तु घृताक्तानां दशरात्रमुपोषितः ।
अयुतं जुहुयाल्लक्ष्मीकामो वा शिवदर्शने ॥
अपामार्गोद्भवानां च तण्डुलानां तथाऽयुतम् ।
हुनेद्दधिघृताक्तानां सर्वार्थस्य समृद्धये ॥

गोसहस्रस्य लाभाय जुहुयाद्गोसफेन च ।
आज्याहुतीनां च तथा सहस्राष्टकमादरात् ॥
उपोषितो दशाहानि हुनेद्बिल्वफलानि च ।
अयुतं च घृताक्तानि लभेदष्टसहस्रकम् ॥
सिद्धे मन्त्रे सुवर्णानि न सिद्धे रजतानि तु ।
भार्याऽमुको मे भवतु एतदर्थं हुनेच्छुचिः ॥
जातीपुष्पाणि चाज्येन मधुना संयुतानि च ।
कपिला तु यदाऽसूतवृषभा वा सिताऽपि गौः ॥
आद्यं दुग्धं गृहीत्वाऽस्याः श्रपयेत् तेन वै चरुम् ।
अष्टोत्तरशतं हुत्वा तथा वाऽष्टसहस्रकम् ॥
मन्त्रयित्वा चरुं तच्च सपत्नीकः प्रभक्षयेत् ।
आयुष्मतो दृढान् पुत्रान् जनयेन्नात्र संशयः ॥
दूर्वाप्रवालान् जुहुयाद्दधिक्षौद्रघृतान्वितान् ।
आयुःकामोऽष्टसाहस्रं चिरमायुः स विन्दति ॥
दधिक्षौद्रघृताक्तानां पुष्पाणां कुशकाशयोः ।
सहस्राण्यष्ट जुहुयादिच्छेत् क्षुद्रान् यदा पशून् ॥
त्रिरात्रोपोषितो भूत्वा गच्छेन्महाचतुष्पथे ।
लिप्त्वा भूमिं गोमयेन तद्वदेव घृतं मुखे ॥
पूजयित्वा हुनेद्भूमावष्टोत्तरसहस्रकम् ।
कर्मणाऽनेन नृपतिर्भवेद्वश्यो न संशयः ॥
सप्ताभिमन्त्रितं तीक्ष्णतैलं तेन करद्वयम् ।
सम्यक् प्लुतस्तेन स्पृष्टो यो ह्यसौ वशगो भवेत् ॥
ब्रह्मवर्चसकामस्तु दधिक्षौद्रघृतान्विताः ।

बिल्वस्य समिधो हुत्वा लक्षं तेजोनिधिर्भवेत् ॥
औदुम्बरीश्च जुहुयाद्दधिक्षौद्रघृतान्विताः ।
अयुतं चान्नकामस्तु लभेदन्नं तथा बहु ॥
अर्थकामः पलाशस्य समिधो घृतसंयुताः ।
लक्षं हुनेत् तस्य धनमक्षयं जायते सदा ॥
अपामार्गस्य समिधः कटुतैलसमन्विताः ।
हुनेदष्टौ सहस्राणि शत्रोरुच्चाटनं भवेत् ॥

उच्चाटनं तु देशादिभ्यः प्रवासनम् ।

सर्वोपद्रवनाशार्थं गृहीत्वा सप्तशर्कराः ।
मन्त्रयित्वा सहस्रं तु चतुर्दिक्षु क्षिपेत् ततः ॥
ऊर्ध्वाधस्तस्य निकटे सर्वोपद्रवनाशनम् ।
एवं कृत्वा व्रजेन्मार्गे चौरव्याघ्रभयं हरेत् ॥

आरात् ते गोघ्न-इत्यादि ।

महाभये समुत्पन्ने व्याघ्रचौरभयादिषु ।
चतस्रर्चः स्मरेच्चित्ते तत्तद्भयविनाशकाः ॥

विकिरि-इत्यादि ।

जपेदयुतसङ्ख्याकं विरोधे तु महाजनैः ।
राज्ञा वोपशमं याति प्रीतिश्चापि प्रजायते ॥

सहस्राणि-इत्यादि ।

यदा तु महतां मृत्युर्नृपतेर्वा उपद्रवः ।
तदा होमं प्रकुर्वीत वैकङ्कतसमिद्वरैः ॥
औदुम्बरीभिः शाल्मल्या तिलैर्वाऽपि यवैरपि ।
प्रत्येकमेकादशधा चाभिमन्त्र्य ततो बलिम् ॥
कृशरं वा पायसं वा ततो भूतानि चार्चयेत् ।

दद्याद्विडालमांसस्य बलिं नश्यन्त्युपद्रवाः ॥

सहस्राणि सहस्रशो ये रुद्रा-इत्यादि ।

जपेदेता नव ऋचः परिशिष्टसमन्विताः ।
भवन्ति भोगदास्तेन हीना ज्ञानप्रदा मताः ॥

नमो रुद्रेभ्य -इत्यादि ।

मध्याह्ने चायुतं साज्यान् जुहुयात् तु सकण्टकान् ।
प्रत्यङ्गिराया मन्त्रस्य कर्म कुर्यादयं मनुः ॥
मृत्युञ्जयेन मन्त्रेण नमस्तेऽस्य समापनम् ।
तैत्तिरीयेऽन्यशाखायां परिशिष्टानि सप्त च ॥
सद्योजातादयः पञ्च त्र्यम्बकं च यजामहे ।
तथा च त्वरितो रुद्र एतन्नमकमुच्यते ॥

अग्नाविष्णू-इत्यादि ।

नित्यं सन्ध्यावन्दनान्ते तिष्ठन् कालत्रये जपेत् ।
अष्टोत्तरसहस्रं तु षण्मासं सत्यवाग्भवेत् ॥

वाजश्च मे प्रसवश्च मे-इत्यादि ।

एतैः सप्तानुवाकैस्तु एवमानादिपञ्चभिः ।
आज्याहुतिसहस्रं तु हुत्वा तोये प्रविश्य च ॥
शत जपेदक्षिरोगः कदाचिन्नैव जायते ।
जातस्य च प्रशान्तिः स्यान्नेत्रतेजोऽभिवर्धते ॥

इध्मश्च मे बर्हिश्च म-इत्यादि ।

एतावान्रुद्र आख्यातः सर्वकामफलप्रदः ।
विस्वरोऽनक्षरः पाठः कृतस्तद्दोषशान्तये ॥

इडादेवहूः-इत्यादि ।

परिशिष्टं जपेदेतदेष रुद्रविधिः स्मृतः ।

अभिषिञ्चेत् पौष्टिकार्थं शान्तिकामस्तु होमयेत् ॥
सिद्धिकामो जपेदेवमक्षराणां तु सङ्ख्यया ।
इहैव वज्रदेहोऽसौ शिव एव न चापरः ॥
पद तुल्यावृत्तिजपाद्वाक्सिद्धिरुपजायते ।
वाक्यतुल्यावृत्तिजपात् पापं सर्वं विनश्यति ॥
ऋचां सङ्ख्याजपात् सर्वं क्षुद्रपापं विनश्यति ।
अनुवाकसमं जप्त्वा दुष्टग्रहरुजं जयेत् ॥

इति रुद्राध्यायपुरश्चरणप्रयोगः ।

अथ गणेशसूक्तपुरश्चरणम् ।

तत्रैव ।

अथ विष्णो प्रवक्ष्यामि सूक्तं गणपतेः परम् ।
यत् साधनं विना सर्वमन्त्रा विघ्नैस्तु विघ्निताः ॥
तस्मादादौ गणेशानं प्रसाद्य पुनराचरेत् ।
निद्राऽऽलस्यं क्षुधा क्रोधो लोभो मोहो मनोभवः ॥
गणनाथानर्च्चकानामेते विघ्नकराः स्मृताः ।
विधानपूर्वकं तस्मात् तत्सूक्तमुपदिश्यते ॥
तज्जापकानां कार्याणि स्युरप्रतिहतानि च ।
द्वादशार्चस्य सूक्तस्य गणेशस्य महात्मनः ॥
ऋषिर्गृत्समदाख्यो हि गणकः परिकीर्त्तितः ।
आद्यानां त्रि-ऋचानां तु छन्दस्त्रिष्टुप् प्रकीर्त्तितम् ॥
उत्तराणां नवानां च गायत्रं छन्द उच्यते ।
महागणपतिश्चास्य दैवतं परिकीर्त्तितम् ॥
विनियोगः कीर्त्तनीयो यथाकार्यानुसारतः ।

गणानां त्वा गणपतिꣳ-इत्यादि ।

गणानां त्वा निषुसीद त्वेषं गणं तथैव च ।
अनून इन्द्र विघ्नहि न हित्वा शूलमेव च ॥
अङ्गुष्ठाग्रात् समारभ्य करपृष्ठादिषु न्यसेत् ।
गणानां त्वेति षड्भिश्च हृदयादिषडङ्गकम् ॥
एवं न्यासद्वयं कृत्वा षड्भिर्व्यापकं चरेत् ।

न्यासान्तराणि पूजाविधानं चोक्त्वा पुरश्चरणमाह ।

एकविंत्सहस्रं तु सूक्तस्यैषा पुरस्क्रिया ।
जपाद्दशांशहोमस्तु पायसेन घृतेन तु ॥
शर्करापञ्चखाद्यैश्च कुसुमैः करवीजैः ।
विल्वपत्रैरिक्षुदण्डैर्दाडिमीकदलीफलैः ॥
मोदकैर्लड्डुकैश्चैव घृतपक्वैर्मनोहरैः ।
अलाभे सर्वद्रव्याणां जुहुयात् तिलसर्पिषा ॥
होमस्य दशमांशेन गोपयोभिश्च तर्पयेत् ।
अथ वेक्षुरसेनैव तदभावे गुडोदकम् ॥
तर्पणस्य दशांशेन मार्जयेच्छुद्धवारिभिः ।
मार्जनस्य दशांशेन ब्राह्मणान् भोजयेद्बहून् ॥
पायसैः पञ्चखाद्यैश्च मोदकैः सिद्धलड्डुकैः ।
अपूपमण्डकाद्यैश्च सघृतैः शर्करान्वितैः ॥
सहकाररसैः सार्धं तथा च कदलीफलैः ।
एवं सिद्धे तु सूक्ते तु यत् फलं तन्निगद्यते ॥
महदैश्वर्यमतुलं प्रज्ञां विद्यां यशो बलम् ।
वाक्सिद्धिं समवाप्नोति चान्ते ब्रह्मपदं व्रजेत् ।

इति गणेशसूक्तपुरश्चरणविधिः ।

अथ पुरुषसूक्तविधिः ।

(मेरुतन्त्रे)

वक्ष्ये पुरुषसूक्तस्य विधिं तत्रैव गोपितम् ।
आनुष्टुबस्य सूक्तस्य त्रिष्टुबं तस्य दैवतम् ॥
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ।
स्नात्वा यथोक्तविधिना प्राङ्मुखः शुद्धमानसः ॥
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ।
तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत् ॥
वामजानौ पञ्चमीं च षष्ठीं जानुनि दक्षिणे ।
सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे कटौ ॥
नवमीं नाभिदेशे तु दशमीं हृदये न्यसेत् ।
एकादशीं कण्ठदेशे द्वादशीं वामबाहुके ॥
त्रयोदशीं दक्षभुजे मुखदेशे चतुर्दशीम् ।
अक्ष्णोः पञ्चदशीं चैव षोडशीं मूर्ध्नि विन्यसेत् ॥
एवं न्यासविधिं कृत्वा पश्चात् पूजां समाचरेत् ।
अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ॥
षट्स्वेतेषु हरेः सम्यगर्च्चने योग्यतोच्यते ।
आपो ह्यायतनं तस्य तस्मात् तासु सदा हरिः ॥
अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः ।
पण्डितानां हरिः सूर्यः स्थण्डिले भावितात्मनाम् ॥
प्रतिमास्वल्पबुद्धीनां षट्प्रकाराश्च ताः स्मृताः ।
अकृत्रिमाः कृत्रिमाश्च अचलाश्च चलाचलाः ॥
निर्जीवाश्च सजीवाश्च तासां वक्ष्यामि लक्षणम् ।
अकृत्रिमा च द्विविधा शालग्रामोऽलिपावनः ॥

तदभावे द्वारकायाश्चक्रं तद्वच्च पावनम् ।
कृत्रिमा दशधा प्रोक्ता श्रेष्ठास्ताः पूर्वपूर्वतः ॥
स्याद्रत्नखचिता त्वाद्या स्वर्णजा रूप्यजाऽपि च ।
ताम्रजा पीत्तलोजाता स्फाटिका रक्तशोतजा ॥
कोष्ठजा मृत्तिकाजाता चित्ररूपेति च क्रमात् ।
अचलाः क्षेत्ररूपास्तु हरिद्वारं यथा गया ॥
देवताभिः कृता यास्तु मूर्त्तयस्ताश्चलाचलाः ।
जगन्नाथो वेङ्कटेशः पाण्डुरङ्गादयस्तु ते ॥
सजीवाः ब्राह्मणा गावो निर्जीवः पिप्पलः स्मृतः ।
मन्त्रन्यासं पुरा कुर्यात् स्वदेहे देवतासु च ॥
गायत्र्योङ्कारन्यस्ताङ्गः पूजयेद्विष्णुमव्ययम् ।
आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम् ॥
द्वितीययाऽऽसनं दाद्यात् पाद्यं दद्यात् तृतीयया ।
अर्घ्यं चतुर्थ्या दातव्यं पञ्चम्याऽऽचमनीयकम् ॥
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ।
यज्ञोपवीतमष्टम्या नवम्या चानुलेपनम् ॥
पुष्पं दशम्या दातव्यमेकादश्या तु धूपकम् ।
द्वादश्या दीपिकं दद्यात् त्रयोदश्या निवेदनम् ॥
चतुर्दश्या नमस्कारं पञ्चदश्या प्रदक्षिणम् ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥
दक्षिणां च यथाशक्त्या षोडश्या तु प्रदापयेत् ।
ततः प्रदक्षिणं कृत्वा जपं कुर्वन् समाहितः ॥
यथाशक्ति जपित्वा तु सूक्तं तस्मै निवेदयेत् ।

देवस्य दक्षिणे पार्श्वे कुण्डं स्थण्डिलमेव च ॥
कारयेत् प्रथमेनैव द्वितीयेन तु प्रोक्षणम् ।
तृतीयेनाग्निमादध्याच्चतुर्थेन समिन्धनम् ॥
पञ्चमेनाज्यश्रयणं चरोश्च श्रयणं तथा ।
षष्ठेनैवाग्निमध्ये तु कल्पयेत् पद्ममासनम् ॥
चिन्तयेद्देवदेवेशं कालानलसमप्रभम् ।
ततो गन्धं च पुष्पं च धूपदीपनिवेदनम् ॥
अनुज्ञाप्य ततः कुर्यात् समस्यादि यथाक्रमम् ।
समिधस्तावतीः पूर्वं जुहुयादभिघारिताः ॥
ततो घृतेन जुहुयाच्चरुणा च ततः पुनः ।
एवं हुत्वा ततश्चैनमनुज्ञाप्य यथाक्रमम् ॥
अग्नेर्भगवतस्तस्य समीपे स्तोत्रमुच्चरेत् ।
नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ॥
नमोऽस्तु ते हृषीकेश महापुरुषपूर्वज ।
देवानां दानवानां च सामन्यमधिदैवतम् ॥
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ।
एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ॥
अव्यक्तश्चानुमन्ता च गुणमायासमावृतः ।
संसारसागरं घोरमनन्तक्लेशभाजनम् ॥
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ।
न ते रूपं न चाकारो नायुधानि च नास्पदम् ॥
तथाऽपि पुरुषाकारो भक्तानां च प्रकाशने ।
नैव किञ्चित् परोक्षं ते न प्रत्यक्षोऽसि कस्य चित् ॥

न च किञ्चिदसाध्यं ते न च साध्योऽसि कस्य चित् ।
कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ॥
योगिनां परमा सिद्धिः परमं ते पदं विदुः ।
अहं भूतोऽस्मि देवेश संसारेऽस्मिन् महाभये ॥
त्राहि मां पुण्डरीकाक्ष न जाने परमं पदम् ।
कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ॥
शरीरे च गतश्चासि वर्त्तते मे महद्भयम् ।
त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ॥
विज्ञानं यदिदं प्राप्य यदिदं स्थानमर्जितम् ।
जन्मान्तरेऽपि मे देव माभूदस्य परिक्षयः ॥
दुर्गतावपि जातस्य त्वं गतो मे मनोरथः ।
यदि नाशं न विन्देत तावताऽस्मि कृती सदा ॥
कामये विष्णुपादौ तु सर्वजन्मसु केवलम् ।
पुरुषस्य हरेः सूक्तं स्वर्ग्यं धन्यं यशस्करम् ॥
आत्मज्ञानमिदं पुण्यं योगज्ञानमिदं परम् ।
एवं स्तुत्वा हव्यवाहं ततः पश्चाद्विसर्जयेत् ॥
अनेनैव न निष्पापो जायते मनुजो यदा ।
प्राग्वद्धुत्वा पावयेत प्रयोगानारभेत् ततः ॥
शुक्लपक्षे शुभे वारे सुनक्षत्रे सुगोचरे ।
दम्पत्योरुपवासः स्यादेकादश्यां सुरालये ॥
द्वादश्यां पुत्रकामाय चरुं कुर्वीत वैष्णवम् ।
ऋग्भिः षोडशभिः सम्यगर्च्चयित्वा जनार्दनम् ॥
चरुं पुरुषसूक्तेन प्राशयेत् पुत्रकाम्यया ।

प्राप्नुयाद्वैष्णवं पुत्रमचिरात् सन्ततिक्षमम् ॥
द्वादशीं द्वादशीं सम्यक् पयसा निर्वपेच्चरुम् ।
यो जुहोति सहस्रं स याति विष्णोः परं पदम् ॥
मार्गशीर्षादिमासेषु क्रमात् पूज्यश्च केशवः ।
नारायणो माधवश्च गोविन्दो विष्णुरेव च ॥
मधुसूदन उक्तस्त्रिविक्रमो दामनस्तथा ।
श्रीधरश्च हृषीकेशः पद्मनाभो जनार्दनः ॥
पूजयित्वा जपेत् सूक्तं शतमष्टाधिकं ततः ।
होमं च पूर्ववत् कुर्यात् सर्वान् कामानवाप्नुयात् ॥
अपुत्रा मृतपुत्रा या या च कन्याप्रसूर्भवेत् ।
तस्या यथा सुपत्रः स्यात् तमुपायं ब्रवीम्यहम् ॥
समिधोऽश्वत्थवृक्षस्य प्रत्यहं जुहुयाच्छतम् ।
अष्टाधिकं च सघृतमुपतिष्ठेद्धुताशनम् ॥
पुनर्विष्णुं पूजयित्वा घृतहोमं समाचरेत् ।
अष्टोत्तरशतं कुर्यात् प्रत्यहं वाग्यतः शुचिः ॥
संपाताज्यं स्थापयित्वा तन्नार्यै प्राशनाय च ।
दद्यात् सा च पतिं विष्णुं नमस्कृत्य प्रभक्षयेत् ॥
तर्पयेच्च द्विजान् सम्यग्लघ्वाशी संविशेत् क्षपाम् ।
परं सप्तप्रवर्त्तेनावश्यं गर्भवती भवेत् ॥

अथ पुरश्चरणम् ।

अरण्ये निवसेन्नित्यं त्रिकालं स्नानमाचरेत् ।
जपेदष्टोत्तरशतं सूक्तमेतत् त्रिकालकम् ॥
मासमेकं फलाहारो मासमद्भिश्च तर्पयेत् ।

आदित्यमुपतिष्ठेत मूलेनानेन नित्यशः ॥
आज्यं हुत्वा दशशतं त्रिभिर्वर्षैर्जपेद्दिने ।
तद्भक्तस्तन्मना युक्तो दशवर्षाण्यनन्यभाक् ॥
साक्षात् पश्यति देवं तं नारायणमनामयम् ।

इति पुरुषसूक्तपुरश्चरणम् ।

अथ श्रीसूक्तविधिः ।

तत्रैव ।

अथ सर्वोत्तमं वक्ष्ये श्रीसूक्तं सविधानकम् ।
कलौ दारिद्र्यनाशाय नान्यत् किञ्चिन्नृणां तथा ॥

हिरण्यवर्णाम्—इत्यादि ।

हिरण्यवर्णामित्यस्य ऋचो लक्ष्मीमुनिर्मतः ।
चतुर्दशानां शेषाणामानन्दः कर्दमस्तथा ॥
चिक्लीतलक्ष्मीतनयाश्चत्वारो मुनयो मताः ।
हृदयादितिसृणां च छन्दोऽनुष्टुबुदाहृतम् ।
कांसोऽस्मितर्चो बृहती चन्द्रावादित्यवर्णयोः ।
त्रिष्टुप्छन्द उपैतु मां देवाद्यष्ट-ऋचामपि ॥
छन्दोऽनुष्टुप् समाख्यातं ताम्म आहव इत्यृचः ।
प्रस्तारः पङ्क्तिरुद्दिष्टो देवते श्रीविभावसू ॥
व्यञ्जनानि तु बीजानि स्वराः शक्तय ईरिताः ।
बिन्दवः कीलकं प्रोक्तमङ्गुष्ठादिषडङ्गकम् ॥
हिरण्या च तथा तन्द्रा तृतीया रजतप्रभा ।
हिरण्यस्रक् हिरण्याक्षा तथा हिरण्यवर्णिका ॥
एताभिर्ङेनमोऽन्ताभिः प्रकुर्यादङ्गकल्पनम् ।

अथ ध्यानम् ।

अरुणनलिनसंस्था तद्रजःपुञ्जवर्णा
करकमलधृतेष्टाभीतियुग्माम्बुजा च ।
मणिमुकुटविचित्रालङ्कृताकल्पजालै-
र्भवतु भुवनमाता सन्ततं श्रीः श्रिये नः ॥

अथ पुरश्चरणम् ।

परिषिञ्चेत् त्रिशो नित्यं सूक्तैस्तैः स्नानकर्मणि ।
आदित्याभिमुखो जप्याद्यावत् तावच्च तर्पयेत् ॥
शुक्लाद्यां तिथिमारभ्य यावदेकादशी भवेत् ।
तावद्द्वादशसाहस्रं जपेन्निश्चलमानसः ॥
ब्रह्मचर्यरतः शुद्धवस्त्रदन्तादिकः सुधीः ।
पद्मैस्त्रिमधुरोपेतैर्घृताक्तेन पयोऽन्धसा ॥
श्रीसमिद्भिः सर्पिषा च प्रत्येकं त्रिशतं हुनेत् ।
द्वादश्यां द्वादशैवाऽथ सद्विप्राँश्चापि भोजयेत् ॥
तेन सिद्धो भवेन्मन्त्रो नात्र कार्या विचारणा ।
कुन्दमन्दारकुमुदमालतीपद्मकेतकम् ॥
नन्द्यावर्त्ताह्वयं जाती कल्हारं चम्पकं तथा ।
रक्तोत्पलादिपुष्पाणि लक्ष्म्याश्चातिप्रियाणि हि ॥
त्रिवारमन्वहं मन्त्री जुहुयाच्च यथाविधि ।
षण्मासं यः करोत्येवं स स्याल्लक्ष्मीपतिः स्वयम् ॥

इति श्रीसूक्तपुरश्चरणम् ।

अथ नवग्रहाणां वैदिकमन्त्राः ।

तत्रैव ।

तत्र भास्करमन्त्रस्य हिरण्यस्तूपको मुनिः ।

त्रिष्टुप् छन्दो देवता च सविता परिकीर्त्तितः ॥
आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन
सविता रथेनादेवो याति भुवनानि पश्यन् ।
अङ्गुष्ठादिषडङ्गानि षड्दीर्घान्वितयोच्चरेत् ।
भुवनेश्याऽथ मन्त्रस्य पदन्यासं समाचरेत् ॥
श्रीसूक्तोक्त-ऋचास्थाने ततो ध्यायेद्दिवाकरम् ।

ध्यानं यथा ।

पद्मासन पद्मकरं पद्मगर्भसमद्युतिम् ।
किरीटिनं सकेयूरं मण्डितं रक्तच्छत्रिणम् ॥
रथारूढं तस्य सव्ये त्वधिदेवाग्न्यधिष्ठितम् ।
प्रत्यधिदेवेश्वरेण सव्ये युक्तं च प्राङ्मुखम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं जुहुयात् तद्दशांशतः ।
होमतुल्यो जपः कार्यस्त्वधिप्रत्यधिदैवतः ॥
करवीरादिकुसुमै रक्तचन्दनमिश्रितैः ।
दूर्वाङ्कुरैरक्षतैश्च तर्पणं स्याद्दिनेशितुः ॥

अथ चन्द्रमन्त्रः ।

अथ वक्ष्ये चन्द्रमन्त्रं गौतमोऽस्य मुनिर्मतः ।
गायत्रीछन्द इत्युक्तं सोमो देवः प्रकीर्त्तितः ॥
अथायस्व समेतु विश्वतः सोमवृष्णियं भवावाजस्य सङ्गथे ।
षड्दीर्घं विन्दुयुक्तेन सकारेण षडङ्गकम् ।

अथ ध्यानम् ।

किरीटिनं श्वेतवस्त्रं दशाश्वं श्वेतभूषणम् ।
पाशपाणिं द्विबाहुं तमत्रिगोत्रसमुद्भवम् ॥

जातं यवनदेशे च श्वेतगन्धानुलेपनम् ।
अनुष्टुप् छन्दसं चात्रेयर्षं श्वेतातपत्रकम् ॥
श्वेतध्वजपताकाढ्यं केयूरमणिशोभितम् ।
स्थिरीकृतं रथारूढमधिदैवततोययुक् ॥
उमाप्रत्यधिदेवेन वायव्याभिमुखस्थितम् ।

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं सर्वश्वेतेष्वयं विधिः ।

अथ भौममन्त्रः ।

भौममन्त्रं प्रवक्ष्यामि विरूपोऽस्य मुनिर्मतः ।
अङ्गारको देवताऽत्र गायत्री छन्द ईरितम् ॥

अग्निर्मूर्धादिवः ककुत्पतिः पृथिव्या अयं । अपाꣳ रेताꣳ सिजिन्वति ॥

अँ बीजेन षडङ्गानि चाङ्गुलीन्यास एव च ।
रुद्रस्थानेषु कर्त्तव्यः पदन्यासो द्वितीयकः ॥

अथ ध्यानम् ।

रक्ताम्बरं रक्तवर्णं रक्तगन्धानुलेपनम् ।
रक्तपुष्पैः पूज्यमानं चतुर्बाहुं किरीटिनम् ॥
वराभयगदाशूलहस्तं मेषोपरिस्थितम् ।
वशिष्ठगोत्रसम्भूतं यमदग्न्यार्षकं कुजम् ॥
जगतीछन्दसं रक्तं रक्तध्वजपताकिनम् ।
अवन्तोदेशसम्भूतं ध्यात्वा देवं प्रपूजयेत् ॥
रक्तचन्दनसंमिश्रतण्डुलैस्त्र्यस्रके कृते ।
अङ्गुले क्ष्माधिदेवेन युक्ते षाण्मातुरेण च ॥
युते प्रत्यधिदेवेन तत्रावाह्य प्रपूजयेत् ।

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्वं मधुरत्रयसंयुताः ।
स्वादिर्यः समिधो होमे तर्पणाद्यं च सूर्यवत् ॥

अथ बुधमन्त्रः ।

बुधमन्त्वं प्रवक्ष्यामि बौद्धस्तस्य मुनिर्मतः ।
त्रिष्टुप् छन्दो देवताऽस्य बुधो बुद्धिप्रदो मतः ॥

उद्बुध्यस्वाग्ने प्रतिजागृह्येन मिष्टापूर्त्ते स सृजेत्वामयं च ।
पुनः कृण्वꣳस्त्वा पितरं युवानमन्वा ताꣳसीत्वयितन्तुमेतम् ॥

बुँबीजेन षडङ्गानि ध्यानमस्य निरूप्यते ।
पीताम्बरं पीतवर्णं पीतगन्धानुलेपनम् ॥
पीतपुष्पैः पुज्यमानं खड्गचर्मगदावरान् ।
हस्तैर्दधन्तं सिंहस्थं चात्रिगोत्रसमुद्भवम् ॥
भारद्वाजार्षकं जातं मगधे च किरीटिनम् ।
बृहतीछन्दसं पीतच्छत्रध्वजपताकिनम् ॥
केयूरमणिशोभाढ्यमधिदेवेन विष्णुना ।
तेन प्रत्यधिदेवेन युक्तं जं चिन्तयाम्यहम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्वं हुनेत् तस्य दशांशतः ।
अपामार्गसमिद्भिश्च तर्पणादि ततश्चरेत् ॥

अथ बृहस्पतिमन्त्रः ।

मन्त्वं बृहस्पतेर्वक्ष्ये मुनिर्बृत्समदो मतः ।
त्रिष्टुप् छन्दो देवपतिवन्दितस्तस्य देवता ॥

बृहस्पते अतियदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।

बृँ बीजेन षडङ्गानि न्यासमन्त्रं समाचरेत् ।
ध्यानमस्य प्रवक्ष्यामि वरदण्डाक्षसूत्रकम् ॥
कमण्डलुं दधद्धस्तैः पीतवर्णं किरीटिनम् ।
वशिष्ठार्षं सिन्धुदेशभवं पीताम्बरावृतम् ॥
अनुष्टुप्छन्दसं चाङ्गिरसगोत्रं किरीटिनम् ।
पीतध्वजपताकाढ्यं पीतच्छत्रानुलेपनम् ॥
केयूराङ्गदशोभाढ्यमधिदेवेन्द्रसंयुतम् ।
ब्रह्मप्रत्यधिदेवेन युतं संचिन्त्य चाह्वयेत् ॥

पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं होमस्त्रिमधुरान्वितैः ।
पिप्पलस्य समिद्भिः स्यात् तर्पणं पीतपञ्चभिः ॥

अथ शुक्रमन्त्रः ।

शुक्रमन्त्रं प्रवक्ष्यामि भारद्वाजो मुनिर्मतः ।
त्रिष्टुप् छन्दो निगदितं दैत्याचार्यस्तु देवता ॥
शुक्रं ते अन्यद्यजतं ते अन्यद्युपुरूषे अहनी द्यौरिवासि ।
विश्वाहि माया अवसि स्वधावो भद्रा ते पूषन्निहरातिरस्तु ॥
शुँ बीजेन षडङ्गानि कृत्वा ध्यानं समाचरेत् ।

ध्यानमाह ।

शुक्लाम्बरं शुक्लवर्णं शुक्लगन्धानुलेपनम् ।
शुक्लपुष्पैः पूज्यमानं शौनकार्षं किरीटिनम् ॥
चतुर्भुजं दण्डधरं च साक्षसूत्रकमण्डलुम् ।
पङ्क्तिश्छन्दश्च वरदं तथा कीकरदेशजम् ॥
श्वेतच्छत्रध्वजपताकिनं भार्गवगोत्रजम् ।
सकेयूरं रथारूढं श्वेताभरणभूषितम् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं हुनेत् त्रिमधुरान्वितैः ।
उदुम्बरसमिद्भिश्च तर्पणादि तु चन्द्रवत् ॥

अथ शनिमन्त्रः ।

शनिमन्त्रं प्रवक्ष्यामि सिन्धुद्वीपो मुनिर्मतः ।
गायत्रीछन्द इत्युक्तं देवता तु शनैश्चरः ॥
शन्नो देवीरभीष्टये आपो भवन्तु पीतये शन्नोरभिस्रवन्तु नः ।
शँ बीजेन षडङ्गानि कुर्याद्ध्यानं ततश्चरेत् ।
बाणाशनं शूलधरमिन्द्रनीलसमद्युतिम् ॥
सौराष्ट्रदेशजं प्रोक्तं वरदं गृध्रवाहनम् ।
भृग्वर्षं काश्यपे गोत्रे जातं चापि किरीटिनम् ॥
कृष्णाम्बरं कृष्णवर्णं कृष्णगन्धानुलेपनम् ।
गायत्रीछन्दसं कृष्णवर्णाभरणभूषितम् ॥
केयूरिणं मुकुटिनं कृष्णध्वजपताकिनम् ।
प्रजापत्यधिदेवेन सहितं रथमास्थितम् ॥
पद्मप्रत्यधिदेवेन युक्तं ध्यात्वा समर्चयेत् ।

अथ पुरश्चरणम् ।

सकस्तूर्यथ तैश्चायःकालद्व्यङ्गुलमण्डले ।
होमः समीसमिद्भिः स्यादायसार्घेन तर्पणम् ॥
कृष्णपुष्पैश्चन्दनं तु कालीयं चागुरुर्भवेत् ।

अथ राहुमन्त्रः ।

राहोर्मन्त्रं प्रवक्ष्यामि वामदेवो मुनिर्मतः ।
गायत्री छन्द इत्युक्तं सैंहिकेयश्च देवता ॥
कयानश्चित्र आभुवदुती सदा वृधः सखाकया सचिष्ठया वृता ।

राँ बीजेन षडङ्गानि ध्यानमस्य निरूप्यते ।
करालवदनं खड्गचर्मशूलधरं वहन् ॥
कृष्णाम्बरं कृष्णवर्णं कृष्णगन्धानुलेपनम् ।
कृष्णपुष्पैः पूज्यमानं केयूरमुकुटान्वितम् ॥
पूर्वदेशे समुत्पन्नं क्रूरमाङ्गिरसार्षकम् ।
पाटलागोत्रसम्भूतमनुष्टुप्छन्दसं ग्रहम् ॥
कृष्णच्छत्रं रथारूढं कृष्णध्वजपताकिनम् ।
सर्पाधिदैवतं पैत्रकालप्रत्यधिदैवतम् ॥

अथ पुरश्चरणम् ।

इत्थं संचिन्त्य नैर्ऋत्ये सूर्पाकारे तु मण्डले ।
द्वादशाङ्गुलविस्तीर्णे चाह्वयेच्छ्यामलाक्षतैः ॥
दूर्वाभिर्मधुराक्ताभिस्तस्य होमो विधीयते ।
तर्पणीयादिभिर्द्रव्यैः कौलिकाँस्तर्पयेद्द्विजान् ॥

अथ केतुमन्त्रः ।

तत्रैव ।

केतुमन्त्रं प्रवक्ष्यामि मधुच्छन्दो मुनिर्मतः ।
देवताः केतवः प्रोक्ता गायत्रं छन्द ईरितम् ॥

केतुं कृण्वन्नकेतवे पेशोमर्या अपेशसे समुषद्भिरजायथाः ।

कँ बीजेन षडङ्गानि ध्यानमस्य निरूप्यते ।
धूम्राक्षिबाहवः पाशधराश्च विकृताननाः ॥
किरीटिनो गृध्रवाहा मध्यदेशोद्भवा दृढाः ।
चित्राम्बराश्चित्रवर्णाश्चित्रगन्धानुलेपनाः ॥
नानाछन्दस्कका गौतमार्षा जैमिनिगोत्रजाः ।
कृष्णपिङ्गध्वजपताकिनो मुकुटिनस्तथा ॥

केयूरिणो रथारूढाः शूरा ब्रह्मादिदेवताः ।
चित्रगुप्तप्रत्यधिदेवताश्चात्र विचिन्तयेत् ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं कुशा होमे प्रकीर्त्तिताः ।
मधुरत्रयसंयुक्ताश्चित्रद्रव्यैः प्रतर्पयेत् ॥

इति नवग्रहाणां वैदिकमन्त्राः ।

अथाग्निदुर्गामन्त्रः ।

तत्रैव ।

सर्वार्थसाधकं वक्ष्ये संग्रामविजयप्रदम् ।
जलन्धरवधायाहं यत् स्मरामि शृणुष्व तत् ॥

जातवेदसे सूनवामसोमम रातीयतो निदहाति वेदः स नः परिषदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः ।

त्रिष्टुप् छन्दो मुनिश्चास्य मरीचिः काश्यपो मतः ।
देवता जातवेदोऽग्निः षडङ्गानि समाचरेत् ॥
नवागषट्सप्तनागसप्तभिर्मन्त्रवर्णकैः ।

अथ ध्यानम् ।

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटकलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रदरासिखेटविशिखान् पाशाङ्कुशौ तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां स्मरेत् ॥

अथ पुरश्चरणम् ।

मन्त्रवर्णसहस्राणि जपेद्धोमं पृथक् पृथक् ।
वेदवेदाब्धिसङ्ख्याकं तिलसिद्धार्थचित्रजैः ॥
मूलैश्च समिधाभिश्च वटोदुम्बरपिप्पलैः ।
अर्कप्लक्षोद्भवैश्चापि घृतेन हविषाऽन्नकैः ॥

सर्वैर्घृताक्तैर्जुहुयात् तिलैश्चान्ते घृताहुतिः ।
ततः संतर्प्य सतिलैः कृत्वा चात्माभिषेचनम् ॥
समाराध्य वरान् देवाँस्तोषयेद्गुरुमात्मनः ।

इत्यग्निदुर्गामन्त्रपुरश्चरणम् ।

वैदिकमन्त्रपुरश्चरणोपयुक्तवैदिकहोमविधिस्तु विस्तरभयान्नेह लिख्यते ।

अथ होमद्रव्यप्रमाणानि ।

(शारदायाम्)

अथात्र होमद्रव्याणां प्रमाणमभिधीयते ।
कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ॥
उक्तानि पञ्च द्रव्याणि तत्समानि मनीषिभिः ।
तत्समं मधुदुग्धान्नमक्षमात्रमुदाहृतम् ॥
दधि प्रसृतिमात्रं स्याल्लाजाः स्युर्मुष्टिसम्मिताः ।
पृथुकास्तत्प्रमाणाः स्युः सक्तवोऽपि तथा मताः ॥
गुडं पलार्धमानं स्याच्छर्कराऽपि तथा मता ।
ग्रासार्धं चरुमानं स्यादिक्षुः पर्वावधिर्मतः ॥
एकैकं पत्रपुष्पाणि तथाऽपूपानि कल्पयेत् ।
कदलीफलनारङ्गफलान्येकैकशो विदुः ॥
मातुलुङ्गं चतुःखण्डं पनसं दशधा कृतम् ।
अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः ॥
त्रिधा कृत्तं फलं बैल्वं कपित्थं खण्डितं त्रिधा ।
फलान्यन्यान्यखण्डानि समिधः स्युर्दशाङ्गुलाः ॥
दूर्वात्रयं समुद्दिष्टं गुडुची चतुरङ्गुला ।
व्रीहयो मुष्टिमानाः स्युर्मुद्गमाषयवा अपि ॥
तण्डुलाः स्युश्चतुर्थांशाः कोद्रवा मुष्टिसम्मिताः ।

गोधूमरक्तकलमा विहिता मुष्टिमानतः ॥
तिलाश्चुलुकमानाः स्युः सर्षपास्तत्प्रमाणतः ।
शुक्तिप्रमाणं लवणं मरीचान्यपि विंशतिः ॥
पुरं वदरमानं स्याद्रामठं तत्समं स्मृतम् ।
चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमानि च ॥
तिन्तिडी बीजमानानि समुद्दिष्टानि देशिकैः ।

कर्षादिलक्षणान्युक्तानि (स्कान्दे)

गुञ्जाभिर्दशभिर्माषः शाणो माषचतुष्टयम् ।
द्वौ शाणौ वटकः कोलो वदरं क्षुद्रवस्तथा ॥
तौ द्वौ पाणितलं कर्षः सुवर्णः केवलं ग्रहः ।
पिचुर्विडालपदकं तिन्दोऽक्षश्च तद्द्वयम् ॥
शुक्तिरष्टमिका ते द्वे पलं निष्कचतुर्थिका ।
मुष्टिमात्रं प्रकुञ्चोऽथ द्वे पले प्रसृतिस्तथा—इति ॥

अगस्त्येन तु ।

गुञ्जाभिः पञ्चभिश्चैको माषकः परिकीर्त्तितः ।
भवेत् षोदशभिर्माषैः सुवर्णः कर्ष एव च ॥
पलं सुवर्णाश्चत्वारः पञ्च वाऽपि प्रकीर्त्तितम्—इत्युक्तम् ।

एतन्मतेऽशीतिगुञ्जाभिरेकः कर्षः स एव सुवर्णोऽपि । पृथुकाश्चिपीटकाः । गुडूची लताविशेषः । पुरं गुग्गुलुः । रामठं हिङ्गु । सोमः शम्भुः ।

अनुक्ते तु हविर्द्रव्ये तिलाज्यं हविरुच्यते ।
अनुक्ते चाञ्जनद्रव्ये घृतमेवाञ्जनं विदुः ॥
सङ्ख्यानुक्तौ सहस्रं स्याद्द्रव्यानुक्तौ घृतं तथा ।
समिधानुक्तविषये पालाश्यः परिकीर्त्तिताः ॥

तथा ।

लाजादिहोमो हस्तेन साङ्गुलेन विधीयते ।

समित्पुष्पफलादीनां होमः स्यान्मृगमुद्रया ॥
द्रवद्रव्यैः श्रुवः प्रोक्तो मन्त्रतन्त्रविशारदैः ।

इति होमद्रव्यप्रमाणानि ।

बिभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत-
स्रोतःशालिनि संनिबन्धनसरित्संभेदमभ्यर्हितम् ।
सन्मुक्तोपमयुक्तिभाजि दशमो रम्यस्तरङ्गोऽगमत्
सर्वोर्वीपतिनेतृनिर्मितपुरश्चर्यार्णवेऽस्मिन् नवे ॥

इति श्रीमन्महाराजाधिराजश्रीप्रतापसिंहसाहविरचिते पुरश्चर्यार्णवे सरस्वत्यादिमन्त्रपुरश्चरणपूर्वकगायत्र्यादिवैदिकमन्त्रपुरश्चरणनिरूपणं नाम दशमस्तरङ्गः ।

अथ दुर्गामन्त्रभेदास्तत्पुरश्चरणविशेषाश्च निरूप्यन्ते ।

तथा च (शारदातिलके)

ततो दुर्गामनुं वक्ष्ये दृष्टादृष्टफलप्रदम् ।
माया त्रिः कर्णबीजाढ्यो भूयोऽसौ सर्गवान् भवेत् ॥
पश्चान्तकः प्रतिष्ठावान् मारुतो भौतिकासनः ।
तारादिहृदयान्तोऽयं मन्त्रो वस्वक्षरात्मकः ॥
ऋषिश्च नारदश्छन्दो गायत्रं देवता मनोः ।
दुर्गा समीरिता सद्भिर्दुरितापन्निवारिणी ॥
नमस्कारवियुक्तेन मूलमन्त्रेण साधकः ।
द्रामाद्यैः सह कुर्वीत षडङ्गानि यथाविधि ॥

अथ ध्यानम् ।

सिंहस्था शशिशेखरामरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता ।
आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीरणन्नूपुरा
दुर्गादुर्गतिहारिणी भवतु वो रत्नोल्लसत्कुण्डला ॥

अथ पुरश्चरणम् ।

वसुलक्षं जपेन्मन्त्रं तिलैर्मधुरलोलितैः ।
पयोऽन्धसा वा जुहुयात् तत्सहस्रं जितेन्द्रियः ॥

इति दुर्गामन्त्रः ।

अथ महिषमर्दिनीमन्त्रः ।

तत्रैव ।

भान्तं वियत्सनयनं श्वेतो मर्दिनि ठद्वयम् ।

अष्टाक्षरी समाख्याता विद्या महिषमर्दिनी ॥

अयं मन्त्रो मायाप्रणवाद्यन्यतमबीजाढ्यो नवाक्षरो भवति ।

तदुक्तं (कुलचूडामणिविश्वसारादौ)

त्रैलोक्यबीजभूतान्ते सम्बोधनपदं ततः ।
सृष्टिसंहारकौ वर्णौ विद्यामहिषमर्दिनी ॥
प्रणवाद्यां जपेद्विद्यां मायाढ्यां वा जपेत् सुधीः ।
वधूबीजादिकां वाऽपि कवचाढ्यां जपेत् तथा ॥

(शारदायाम्)

महिषहिंसिके हुँ फट् हृदयं परिकीर्त्तितम् ।
महिषशत्रो सार्षि हुँ फट् शिरोऽङ्गं समुदाहृतम् ॥
महिषं द्वेषय द्वन्द्वं हुँ फडन्तः शिखामनुः ।
महिषं हनयुग्मान्ते देवि हुँ फट् तनुच्छदम् ॥
महिषान्ते सूदिनि हुँ फडन्तं शस्त्रमीरितम् ।
मन्त्रैरेतैर्जातियुक्तैः पञ्चाङ्गानि प्रकल्पयेत् ॥

अथ ध्यानम् ।

गारुडोपलसन्निभां मणिमौलिकुण्डलमण्डितां
नौमि भालविलोचनां महिषोत्तमाङ्गनिषेदुषीम् ।
चक्रशङ्खकृपाणखेटकबाणकार्मुकशूलकाँ-
स्तर्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेखराम् ॥

पुरश्चरणम् ।

अष्टलक्षं जपेन्मन्त्रं तत्सहस्रैस्तिलैः शुभैः ।

जुहुयादिति शेषः ।

इति महिषमर्दिनीमन्त्रः ।

अथ शूलिनीमन्त्रः ।

तत्रैव ।

ज्वलज्ज्वलपदस्यान्ते शूलिनीति पदं वदेत् ।

दुष्टग्रहं हुमस्त्रान्ते वह्निजायावधिर्मनुः ॥
पञ्चभिर्दशभिः प्रोक्तो ग्रहशत्रुविनाशनः ।
ऋषिर्दीर्घतया प्रोक्तः ककुच्छन्द उदाहृतम् ॥
शूलिनी देवता प्रोक्ता समस्तसुरवन्दिता ।
दुर्गे हृद्वरदे शीर्षं विन्ध्यवासिनि तच्छिखा ॥
असुरान्ते मर्दिनी स्याद्युद्धपूर्वं प्रिये पुनः ।
त्राशयद्वितयं वर्म देवसिद्धसुपूजिते ॥
नन्दिनी स्याद्रक्षयुगं महायोगेश्वरी क्रमात् ।
शूलिन्याद्या हुँ फडन्ताः पञ्चाङ्गमनवः स्मृताः ॥

अथ ध्यानम् ।

अध्यारूढां मृगेन्द्रं सजलजलधरश्यामलां हस्तपद्मैः
शूलं बाणं कृपाणीमरिजलजगदाचापपाशान् वहन्तीम् ।
चन्द्रोत्तंसां त्रिनेत्रां चतसृभिरसिना खेटकान् बिभ्रतीभिः
कन्याभिः सेव्यमानां प्रतिभटभयदां शूलिनीं भावयामि ॥

अथ पुरश्चरणम् ।

मनुमेनं जपेन्मन्त्री वर्णलक्षं विचक्षणः ।
सर्पिषाऽऽज्येन होमस्तु तद्दशांशमितो भवेत् ॥

इति शूलिनीमन्त्रः ।

अथ *वनदुर्गामन्त्रः ।

उत्तिष्ठपदमाभाष्य पुरुषि स्यात् पदं ततः ।
पितामहः सनेत्रे नः स्वपिषि स्याद्भयं च मे ॥
समुपस्थितमुच्चार्य यदि शक्यमनन्तरम् ।
अशक्यं वा पुनस्तन्मे वदेद्भगवतिं ततः ॥

---

* प्रायः सर्वेषु पुस्तकेषु वनदुर्गेत्यत्र नवदुर्गेत्युपलभ्यते ।

शम्भयाग्निवधूः सप्तत्रिंशद्वर्णात्मको मनुः ।
ऋषिरारण्यकश्छन्दोऽप्यत्यनुष्टुबुदाहृतम् ॥
देवता वनदुर्गा स्यात् सर्वदुर्गविमोचनी ।
षड्भिश्चतुर्भिरष्टाभिरष्टाभिः षड्भिरिन्द्रियैः ॥
मन्त्रार्णैरङ्गक्लृप्तिः स्याज्जातियुक्तैर्यथाक्रमम् ।

अथ ध्यानम् ।

सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसन्निभां
शङ्खं चक्रवराभयानि दधतीमिन्दोः कलां बिभ्रतीम् ।
ग्रैवेयाङ्गदहारकुण्डलधरामाखण्डलाद्यैः स्तुतां
ध्यायेद्विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम् ॥

अथ पुरश्चरणम् ।

एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः ।
जुहुयाद्धविषा मन्त्री शालिभिः सर्पिषा तिलैः ॥

इति वनदुर्गामन्त्रः ।

अथ नवदुर्गात्मकचामुण्डामन्त्रः ।

(मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि चामुण्डाया महामनुम् ।
नवदुर्गात्मकं यस्य सेवनाद्भुक्तिमुक्तयः ॥
सुरथो यत्प्रसादेन राज्यं प्राप्याभवन्मनुः ।
संसारबन्धनिर्णाशि ज्ञानमाप समाधिना ॥
मार्कण्डेयपुराणोक्तं चरितत्रितयं स्तवः ।
जपाद्यस्य फलं दद्यात् तं मनुं वच्मि साम्प्रतम् ॥
वाग्लज्जाकामबीजानि चामुण्डायै पदं वदेत् ।
विच्चे नवार्णमन्त्रोऽयं शक्तिमन्त्रोत्तमोत्तमः ॥
ब्रह्मविष्णुमहेशास्तु मुनयोऽस्य प्रकीर्त्तिताः ।

गायत्र्युष्णिगनुष्टुप् च छन्दस्त्रयमुदीरितम् ॥
देवताऽस्य महाकाली महालक्ष्मीः सरस्वती ।
नन्दा शाकम्भरी भीमा शक्तित्रयमुदाहृतम् ॥
तिस्रोऽस्य शक्तयो दुर्गा भ्रामरी रक्तदन्तिका ।
अग्निवायुभगास्तत्त्वं प्राग्वदृष्यादिकं न्यसेत् ॥

तथा ।

ततः षडङ्गं कुर्वीत विभक्तैर्मूलवर्णकैः ।
एकेनैकेन चैकेन चतुर्भिर्युग्मकेन च ॥
नमस्तेनैव मन्त्रेण कुर्यादङ्गानि षट् क्रमात् ।

अथ ध्यानम् ।

ततो देवीत्रयं ध्यायेत् कालिकाध्यानमुच्यते ।
दशास्यां दशपादां च दशहस्तां विधिस्तुताम् ॥
इन्द्रनीलद्युतिं खड्गं चक्रं शङ्खं शिरः शरान् ।
दक्षहस्तेषु दधतीं गदां शूलं भुशुण्डिकाम् ॥
परिघं च धनुर्वामे दधतीं ब्रह्मसंस्तुताम् ।
मधुकैटभनाशार्थं सालङ्कारां त्रिवीक्षणाम् ॥

तन्त्रान्तरेऽपि ।

खड्गं चक्रगदेषुचापपरिघान् शूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौच्छयिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥

इति चामुण्डामन्त्रः ।

अथ महालक्ष्मीध्यानम् ।

(मेरुतन्त्रे)

ततो ध्यायेन्महालक्ष्मीं महिषासुरमर्दिनीम् ।

समस्तदेवतातेजोजातां पद्मासनस्थिताम् ॥
अष्टादशभुजामक्षमालां पद्मं च शायकान् ।
खड्गं वज्रं गदां चक्रं दक्षहस्ते कमण्डलुम् ॥
शङ्खं च दधतीं वामे शक्तिं च परशुं धनुः ।
चर्मदण्डौ सुरापात्रं घण्टां पाशं त्रिशूलकम् ॥

अन्यत्रापि ।

अक्षस्त्रक्परशू गदेषुकुलिशान् पद्मं धनुः कुण्डिकां
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥

अथ सरस्वतीध्यानम् ।

(मेरुतन्त्रे)

सरस्वतीं ततो ध्यायेच्छरच्चन्द्रसमप्रभाम् ।
शङ्खं च मुशलं चक्रं बाणान् दक्षेषु बिभ्रतीम् ॥
घण्टां शूलं हलं चापं वामहस्तेषु बिभ्रतीम् ।
गौरीदेहसमुद्भूतां नृणामानन्ददायिनीम् ॥
आधारभूतां जगतः शुम्भादिकविमर्दिनीम् ।
अधिष्ठात्रीं तृतीयस्य चरित्रस्य स्मरेत् सदा ॥

तन्त्रान्तरेऽपि ।

घण्टाशूलहलानि शङ्खमुशले चक्रं धनुः शायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुशुक्लप्रभाम् ।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥

अथ पुरश्चरणम् ।

सितपक्षतिमारभ्य चाष्टम्यन्तमिषस्य यः ।

जपेल्लक्षं मनुं होमं स्वाद्यैस्त्रिमधुराप्लुतैः ॥
प्रत्यहं पूजयेद्देवीं चण्डीमाद्यन्तयोः पठेत् ।
विप्रान् गुरून् समाराध्य वाञ्छितं लभते द्रुतम् ॥

अथ जयदुर्गामन्त्रः ।

(शारदायाम्)

तारो दुर्गेयुगं रक्तमन्त्यढान्तौ सलोचनौ ।
द्विठान्ता जयदुर्गेयं विद्या वेद्या दशाक्षरी ॥
तारादिदुर्गे हृदयं दुर्गे शिर इतीरितम् ।
दुर्गायै स्याच्छिखा वर्म भूतरक्षिणि कीर्त्तितम् ॥
तारादिदुर्गेयुगलं रक्षिण्यस्त्रमुदीरितम् ।

अथ ध्यानम् ।

कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद्दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः ॥

अथ पुरश्चरणम् ।

*बाणलक्षं जपेन्मन्त्रं घृतेन जुहुयात् ततः ।
दशांशं संस्कृते वह्नौ ब्राह्मणानपि भोजयेत् ॥

इति दुर्गाप्रकरणम् ।

अथ दुर्गोत्सवविधिः प्रदर्श्यते ।

(बृहत्सिद्धान्तसारे)

आश्विनस्य सिते पक्षे नानाविधमहोत्सवैः ।
प्रसादयेयुः श्रीदुर्गां चतुर्वर्गफलार्थिनः ॥

(कालिकापुराणे)

दुर्गातन्त्रेण मन्त्रेण कुर्युर्दुर्गामहोत्सवम् ।

---

* वर्णलक्षमिति क्वचित् पाठः ।

महानवम्यां शरदि बलिदानं नृपादयः ॥
आश्विनस्य तु या शुक्ला भवेद्दुर्गाष्टमी तिथिः ।
मूर्त्तिभेदैर्महादेवी पूजां गृह्णाति भूतये ॥
कन्यासंस्थे रवौ वत्स शुक्लामारभ्य नन्दकाम् ।
अयाची त्वथ नक्ताशी एकाशी त्वथ* वाय्वदः ॥
प्रातःस्नायी जितद्वन्द्वस्त्रिकालं शिवपूजकः ।

महानवम्यामिति ।

तदुक्तं (देवीपुराणे)

आश्विने शुक्लपक्षे तु सप्तम्यादितिथित्रये ।
महाशब्दः प्रयोक्तव्यो नान्यत्रेति विनिश्चयः ॥

आरभ्येति । शुक्लां प्रतिपदमारभ्येत्यर्थः । अन्नद इति । ब्राह्मणान् भोजयित्वेत्यर्थः । वाय्वद इति पाठे तु वायुभक्ष इत्यर्थः । जितद्वन्द्व इति । शीतोष्णादिसहिष्णुरित्यर्थः । शिवपूजक इत्यत्र एकशेषो बोद्धव्यः ।

(रुद्रयामले)

एकोत्तराभिवृद्ध्या तु नवमी यावदेव हि ।
चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥

तथा ।

एवं चतुर्वेदविदो विप्रान् सर्वान् प्रसादयेत् ।
तेषां च वरणं कार्यं वेदपारायणाय वै ॥

तन्त्रान्तरे ।

वीररात्र्यादिषु श्रेष्ठा महारात्रिर्महेश्वरि ।
उपोष्य पूजयेत् तेषां दुर्गां दुर्गार्त्तिनाशिनीम् ॥

वीररात्र्यादयः प्रोक्ताः (शक्तिसङ्गमे)

वीररात्रिर्महारात्रिः कालरात्रिस्तथैव च ।
महारात्रिर्घोररात्रिः क्रोधरात्रिस्तथैव च ॥

---

* त्वथ वाऽब्भद इति वा० पा० ।

तथैव चाचला रात्रिस्तारारात्रिस्तथैव च।
शिवरात्रिर्दिव्यरात्रिर्दारुणा च यथाक्रमात् ॥
कथ्यते परमेशानि शृणु सावहिता भव।
चतुर्दश्यां संक्रमे च कुलर्क्षे कुलवासरैः ॥
अर्धरात्रे यथायोगो वीररात्रिः प्रकीर्त्तिता।
शुक्लाष्टमी चाश्विनस्य नवरात्रं तु तस्य वै ॥
महारात्रिर्महेशानि कालरात्रिं शृणु प्रिये।
दीपोत्सवचतुर्दश्यां त्वमाया योग एव तु ॥
कालरात्रिर्महेशानि ताराकालीप्रियङ्करी।
जन्माष्टमी महेशानि मोहरात्रिः प्रकीर्त्तिता ॥

तथा।

चैत्रे मासि नवम्यां च शुक्लपक्षे तु भूसुते।
क्रोधरात्रिर्महेशानि तारारूपा भविष्यति ॥
मासि मार्गशिरे प्राप्ते कृष्णाष्टम्यां महेश्वरि।
महाकालस्वरूपा च घोररात्रिः प्रकीर्त्तिता ॥
प्राप्ते फाल्गुनके मासे कृष्णैकादशिका तु या।
भृगुभौमयुता चेत् स्यादचलारात्रिरीरिता ॥
ज्यैष्ठी या दशमी शुद्धा भृगुवासरसंयुता।
दशयोगसमायुक्ता तारा चैकादशी यदि ॥
सा तिथिर्दिव्यरात्रिश्च कीर्त्तिता परमेश्वरि।
ज्यैष्ठो या दशमी शुद्धा दशयोगसमन्विता ॥
वटुकस्य तिथिः प्रोक्ता वटुकोत्पत्तिकारिणी।
अमा भौमसमायुक्ता संक्रमेण समन्विता ॥
कुल-ऋक्षसमायुक्ता ग्रहणं यदि चेद्भवेत्।

तारारात्रिस्तु संप्रोक्ता भाग्यादेव तु लभ्यते ॥
फाल्गुने कृष्णपक्षे तु ह्यर्धरात्रे भृगोः शिवे ।
शिवरात्रिस्तु संजाता सर्वसिद्धिप्रदायिनी ॥
अमा भृगुसमायुक्ता सूर्यग्रहणयुग्यदि ।
अपराह्णे यदा योगो मृतसंजीविनी तिथिः ॥
स्नानदानादिहोमान्तमनन्तफलदं भवेत् ।
अष्टमी चैत्रमासीया संक्रमेण समन्विता ॥
सिद्धिरात्रिरिति ख्याता ताराकालीसमा कलौ ।
तृतीया माधवे शुद्धा कुलवारर्क्षसंयुता ॥
दारुणा कीर्त्तिता देवी सर्वसिद्धीश्वरी परा ।

कुलवारादयश्च ।

रविश्चन्द्रो गुरुः सौरिश्चत्वारस्तेऽकुला मताः ।
भौमशुक्रौ कुलाख्यौ तु बुधवारः कुलाकुलः ॥
द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम् ।
विषमश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः ॥
वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम् ।
कुलानि समधिष्ण्यानि शेषभान्यकुलानि च ॥

इति (रुद्रायामले) प्रोक्ताः

तथा ।

अष्टमी प्रतिमासं तु कृष्णपक्षस्य पार्वति ।
भौमयुक्ता तथा ऋक्षयुक्ता वा केवला च वा ॥
देवीरात्रिरिति ख्याता सर्वसिद्धिप्रदायिनी ।

ऋक्षयुक्ता कुलर्क्षयुक्ता ।

तथा ।

बुधाष्टमी महेशानि प्रतिमासं तु या भवेत् ।

विष्णुरात्रिरिति ख्याता भाद्रे मासि विशेषतः ॥

तत्रैव (नवरात्रनिर्णये)

नवशक्तिसमायुक्तं नवरात्रं तदुच्यते ।
एकैव देवदेवेशि नवधा परिनिष्ठिता ॥
शयनं बोधनाख्यं च नवरात्रं द्विधा भवेत् ।
शयनं चैत्रमासीयमाश्विनस्थं च बोधनम् ॥
द्वयोस्तु समुपोष्यैव सर्वसिद्धिं लभेन्नरः ।
निराहारी फलाहारी त्वेकभक्तो जलव्रतः ॥
नक्तभोजी हविष्याशो यथाशक्ति समाचरेत् ।

अथ देवीपूजोपयुक्तमण्डपलक्षणं (देवीपुराणे)

ऐशाने पूर्वभागे वा सिद्ध्यर्थं मनसः प्रियम् ।
देवीगृहं प्रकर्त्तव्यं सर्वलक्षणलक्षितम् ॥
दश द्वादश वाऽऽरभ्य यावद्धस्तशतं भवेत् ।

(भविष्योत्तरे)

दुर्गागृहं प्रकर्त्तव्यं चतुरस्रं सुशोभनम् ।
रहस्यं स्वस्तिकाद्यैश्च चर्चितं वस्त्रमण्डितम् ॥
दीपमालापरिक्षिप्तं द्वारदामोपशोभितम् ।
गौरमृद्गोमयाभ्यां च लिप्तं शस्तं समीरितम् ॥
तन्मध्ये वेदिका कार्या चतुर्हस्ता समा शुभा ।
तस्यां सिंहासनं सौम्यं कम्बलाजिनसंयुतम् ॥
तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुताम् ।
सर्वदेवमयीं प्रौढयौवनोन्मादशालिनीम् ॥
भुजैश्चतुर्भी रुचिरैर्दशभिर्वा विभूषिताम् ।
तप्तहाटकवर्णाङ्गीं त्रिनेत्रां शशिशेखराम् ॥

पीताम्बरपरीधानां नीलकौशेयसंयुताम् ।
ग्रैवेयहारकेयूरनूपुराभरणान्विताम् ॥
नानारत्नविचित्रेण मुकुटेन विराजिताम् ।
अनेककुसुमाकीर्णकपर्देन विराजिताम् ॥
नितम्बबिम्बसन्नद्धकिङ्किणीक्वणनादिनीम् ।
शूलचक्रदण्डशक्तिवज्रचापासिधारिणीम् ॥
घण्टाक्षमालाकरकपानपात्रलसत्कराम् ।
तदग्रे छिन्नशिरसं महिषं रुधिराप्लुतम् ॥
निःसृतार्धतनुं कण्ठनालाच्चर्मासिधारिणम् ।
देवीकरधृतग्रीवं शूलेनोरसि ताडितम् ॥
दैत्यं करालदंष्ट्रास्यं विद्युत्कपिशमूर्धजम् ।
नागपाशेन विक्षिप्तं हर्यक्षेणाभिविद्रुतम् ॥
वमद्रुधिरवक्त्रेण धुन्वतोऽर्धं शटारुषा ।
ऊर्ध्वलाङ्गूलदण्डेन देव्यधिष्ठानशोभिना ॥
सर्वतो मातृचक्रेण सेव्यमानां सुरैस्तथा ।
पूजयेत् प्रयतो देवीं नरो नियममास्थितः ॥

स्थापने विशेष उक्तो (देवीपुराणे)

याम्यास्या शुभदा दुर्गा पूर्वास्या जयवर्धिनी ।
पश्चिमाभिमुखी नित्यं न स्थाप्या सौम्यदिङ्मुखी-इति ॥

(मत्स्यपुराणो-)क्तदशभुजाध्यानं यथा ।

कात्यायन्याः प्रवक्ष्यामि मूर्त्तिं दशभुजां तथा ।
त्रयाणामपि देवानां धर्मकामार्थकारिणीम् ॥
जटाजूटसमायुक्तामर्धेन्दुकृतलक्षणाम् ।
नेत्रत्रयसमायुक्तां पद्मेन्दुसदृशाननाम् ॥

अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत्पीनोन्नतपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं क्रमादधः ।
तीक्ष्णं बाणं तथा शक्तिं वामतोऽपि निबोधत ॥
खेटकं पूर्णचापं च पाशमङ्कुशमूर्ध्वतः ।
घण्टां वा परशुं चापि वामतः सन्निवेशयेत् ॥
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम्* ॥
सपाशं वामहस्तेन धृतकेशं च दुर्गया ।
वमद्रुधिरवक्त्रं च देव्याः सिंहं प्रदर्शयेत् ॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ।
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ॥
स्तूयमानं च तद्रूपममरैः सन्निवेशयेत् ।

अथ षोडशभुजाध्यानम् (कालिकापुराणे)

योगनिद्रा महामाया जगद्धात्री जगन्मयी ।
भुजैः षोडशभिर्युक्ता भद्रकालीति विश्रुता ॥
क्षीरोदस्योत्तरे तीरे बिभ्रती विपुलां तनुम् ।
अतसीपुष्पवर्णाभा ज्वलत्काञ्चनकुण्डला ॥
जटाजूटमखण्डेन्दुमुकुटत्रयभूषिता ।
नागहारेण सहिता स्वर्णहारविभूषिता ॥

---

* खड्गपाणिकमित्यत्र खड्गपाणिनमिति सर्वपुस्तकेषूपलभ्यते ।

शूलं खड्गं च शङ्खं च चक्रं बाणं तथैव च ।
शक्तिं वज्रं च दण्डं च नित्यं दक्षिणबाहुभिः ॥
बिभ्रती सततं देवी विकाशिनयनोज्ज्वला ।
खेटकं चर्म चापं च पाशं चाङ्कुशमेव च ॥
घण्टां परशुं मुशलं बिभ्रती वामपाणिभिः ।
सिंहस्था नयनै रक्तवर्णैस्त्रिभिरभिज्ज्वला ॥
शूलेन महिषं भित्वा तिष्ठन्ती परमेश्वरी ।
वामपादेन चाक्रम्य तत्र देवी जगन्मयी ॥

अष्टादशभुजाध्यानं प्रागेवोक्तम् ।
अथ चण्डिकाध्यानं तत्रैव ।

धम्मिल्लसंयतकचा त्रिधोश्वाधोमुखीं कलाम् ।
केशान्ते तिलकस्योर्ध्वे दधती सुमनोहरा ॥
मणिकुण्डलसंघृष्टगण्डा मुकुटमण्डिता ।
सज्ज्योतिःकर्णपूराभ्यां कर्णावापूर्य सङ्गता ॥
सुवर्णमणिमाणिक्यनागहारविराजिता ।
सदा सुगन्धिभिः पद्मैरम्लानैरतिसुन्दरी ॥
मालां बिभर्त्ति ग्रीवायां रत्नकेयूरधारिणी ।
मृणालायतवृत्तैस्तु बाहुभिः कोमलैः शुभैः ॥
राजन्ती कञ्चुकोपेता पीनोन्नतपयोधरा ।
क्षीणमध्या पीतवस्त्रा त्रिवलीमध्यभूषिता ॥
शूलं वज्रं च बाणं च खड्गं शक्तिं तथैव च ।
ऊर्ध्वादिक्रमतो देवी दधती वामपाणिभिः ॥
सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्मणि कौशिकी ।
बिभ्रती रूपमतुलं ससुरासुरमोहनम् ॥

अथ सर्वमङ्गलाध्यानं (देवीपुराणे)

ब्रह्मोवाच ।

अवतारे समासेन कथिता सर्वमङ्गला ।
प्रतिमालक्षणं सम्यक् कथयामि यथा भवेत् ॥
सिंहपद्मासना सौम्या जटामुकुटमण्डिता ।
शूलाक्षसूत्रवरदा कमण्डलुकरा शुभा ॥
चतुर्भुजा समाख्याता तथा चाष्टभुजां शृणु ।
वरदं चाभयं खड्गमक्षसूत्रं च दक्षिणे ॥
दर्पणं शूलचापं च चतुर्थे खेटकं भवेत् ।
एवं चाष्टभुजा देवी मङ्गला सर्वमङ्गला ॥

अथ देवीबोधनकालनिर्णयः । तत्रैकस्या एव महिषमर्दिन्या अष्टादशभुजादिध्यानभेदेन बोधनकाल उक्तो (महाथर्वणसंहितायाम्)

अष्टादशभुजा दुर्गा उग्रचण्डेति या स्मृता ।
सैवेयं षोडशभुजा भद्रकालीति गीयते ॥
दशभिर्बाहुभिर्युक्ता सैव कात्यायनी स्मृता ।
भिन्नध्याना कल्पभेदान्महिषासुरमर्दिनी ॥
कालभेदे बोधनीया सा दुर्गोत्सवकर्मणि ।
आश्विनासितपक्षे तु दिवा सम्पूज्य भक्तितः ॥
खड्गे नवम्यामार्द्रायामुग्रचण्डां प्रबोधयेत् ।

'आश्विनासितपक्ष' इति पौर्णमास्यन्ताश्विनकृष्णपक्ष इत्यर्थः ।

तथा च ।

आर्द्रानक्षत्रयुक्तायां पूर्णमास्यन्ताश्विनकृष्णनवम्यामुग्रचण्डां दिवा खड्गे संपूज्य प्रबोधयेदिति वाक्यार्थः ।

(लिङ्गपुराणे देवीपुराणेऽपि)

यदा त्वष्टादशभुजां महामायां प्रपूजयेत् ।
कन्यायां कृष्णपक्षे तु पूजयित्वाऽऽर्द्रभे दिवा ॥

नवम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः ।
शुक्लपक्षे चतुर्थ्यां तु देवीकेशविमोचनम् ॥
प्रातरेव तु पञ्चम्यां स्नापयेयुः शुभैर्जलैः ।
सप्तम्यां पत्रिकापूजा अष्टम्यां चाभ्युपोषणम् ॥
पूजा च जागरश्चैव नवम्यां विधिवद्बलिः ।
संप्रेषणं दशम्यां तु क्रीडाकौतुकमङ्गलैः ॥

(महाकालसंहितायामपि)

येऽष्टादशभुजां देवीमुग्रचण्डाभिधां प्रिये ।
पिपूजयिषवो मर्त्यास्तदुपासकतामिताः ॥
तथाऽश्विननवम्यां वै कृष्णायां सुसमाहिताः ।
करवाले बोधयेयुर्मध्याह्ने शङ्खनिः स्वनैः-इति ॥

मध्याह्नस्तु पञ्चधा विभक्तदिनतृतीयांशः ।

अह्नस्तु प्रथमो भागः प्रातःकाल इति स्मृतः ।
द्वितीयः सङ्गवः प्रोक्तो मध्याह्नस्तु तृतीयकः ॥
अपराह्णश्चतुर्थः स्यात् सायाह्नः पञ्चमः स्मृतः-इति वचनात् ।

शङ्खनिःस्वनैरित्युपलक्षणम् । शङ्खादिनानाविधवाद्यनिःस्वनैरित्यर्थः ।

अत्र यस्मिन् दिने नवम्यां दिवार्द्रालाभस्तत्रैव बोधनं कार्यम् । दिनद्वये नवम्यां दिवार्द्रालाभे तु युग्मविधिवाक्यबलादष्टमीविद्धायामेव नवम्यां बोधनं कार्यम् । एवमार्द्राया अलाभेऽपि युग्मादरेणैव व्यवस्थेति वर्षक्रियाकौमुदीकृतः ।

वस्तुतस्तु-

मध्याह्ने शङ्खनिःस्वनैः-इति महाकालवचनान्मध्याह्नस्य बोधनकालत्वप्रतीतेस्तद्व्याप्त्यैव निर्णयः ।

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः-इति बृहद्याज्ञवल्क्योक्तेः । दिनद्वये मध्याह्नव्याप्तौ तदव्याप्तौ नक्षत्रेण निर्णयः । नक्षत्रस्य दिनद्वये प्राप्तावप्राप्तौ च युग्मादरः ।

युग्मवाक्यान्युक्तानि (निगमे)

युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः ।

रुद्रेण द्वादशीयुक्ता चतुर्दश्या च पूर्णिमा ॥
प्रतिपदा त्वमावास्या तिथ्योर्युग्मं महाफलम् ।
व्यस्तमेतन्महादोषं प्रवदन्ति मनीषिणः–इति ।

अत्र युग्मादिरन्ध्रान्ताः शब्दा द्वितीयादिनवम्यन्ततिथिवाचकाः । रुद्र एकादशी । शेषं स्पष्टम् ।

यद्यपि युग्माग्नीत्यादिवाक्यानि शुक्लपक्षपरतयोक्तानि (निर्णयामृतादौ) पूर्णिमाया अमाप्रतिपद्युग्मस्य च कृष्णपक्षेऽसम्भवादिति । तथाऽपि पूर्वविद्धैव नवमी पक्षयोरुभयोरपीति माधवोक्तेः ।

कृष्णपक्षेऽपि नवम्यष्टमीयुतैव ग्राह्या ।

निबन्धव्याख्याकृतस्तु । चतुर्दश्या च पूर्णिमा–इत्यत्र त्रयोदश्या चतुर्दशी–इति पाठस्य स्मृत्यन्तरे श्रवणादेतानि युग्मवाक्यानि पक्षद्वयपराणीत्याहुः ।

निर्णयसिन्धुकृतोऽपि अमा प्रतिपद्युग्मात् कृष्णपक्षलिङ्गात् पक्षद्वयपरमिदं तत्तद्विशेषवाक्यैः कृष्णे तिथिविशेषोऽपीष्यत इति व्याजह्रुः ।

पूजयित्वाऽऽर्द्रभे दिवा–इत्यार्द्रानक्षत्रयोगाभिधानं तु नक्षत्रयोगस्य प्रशस्ततया सम्भवाभिप्रायम् ।

तथा च मध्याह्नव्यापिन्यां नवम्यां सति सम्भवे आर्द्रानक्षत्रयुक्तायां बोधनं कुर्यादिति निष्कर्षः ।

तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम् ।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि–इति निर्णयसिन्धुधृतदेवलोक्तेः ।

तत्तन्नक्षत्रयोगस्तु फलाधिक्याय कल्पते ।
भानामलाभे तु पुनः प्रशस्ता केवला तिथिः–इति महाकालवचनाच्च ।

निर्णयामृतकृतस्तु–

पूजयित्वेति पूजनक्रियायाः समानकर्तृकयोः पूर्वकाल इति क्त्वाप्रत्ययस्य नवम्यां बोधयेदिति बोधनक्रियाकालान्नवमीरूपात् पूर्वकालेऽष्टमीरूपे विधानात् क्त्वाप्रत्ययसामर्थ्यादेवाष्टम्यां पूजनं नवम्यां बोधनमित्याहुः ।

पूजयित्वाऽष्टमीदिने–इति * निर्णयसिन्धौ स्थितम् ।

---

* क्वाचित्कः पाठः–इति ४ पु० पा० ।

यत् तु आर्द्रानक्षत्रयुक्तायामष्टम्यां पूजनं नवम्यां प्रबोध इति मतं तत् तुच्छम् ।

आश्विनासितपक्षस्य नवमी या शिवर्क्षयुक् ।
बोधयित्वेश्वरीं तस्यां शरदर्च्चनमारभेत्—इति नवम्यामेवार्द्रानक्षत्रयोगस्य महाकालेनाभिहितत्वात् ।

एवमाश्विनकृष्णनवमीमारभ्याश्विनशुक्लनवमीपर्यन्तमुत्सवोऽष्टादशभुजापक्षः ।

अथ षोडशभुजापक्षः । (महाथर्वणसंहितायाम्)

इषे शुक्लप्रतिपदि भुजैः षोडशभिर्युताम् ।
बोधयित्वा भद्रकालीं नवम्यन्तं प्रपूजयेत् ॥

(महाकालसंहितायामपि)

प्रतिपद्येव शुक्लायां बोधयित्वा सुरेश्वरीम् ।
अभ्यर्च्चयेन्नवाहानि तन्त्रपौराणिकक्रमैः ॥

केवलपौराणिकक्रमेणोत्सवे कर्त्तव्ये तु आश्विनकृष्णचतुर्दश्यामेव षोडशभुजाया बोधनं कार्यम् ।

तदुक्तं (कौमुद्यां लिङ्गपुराणे च) ।

यदा तु षोडशभुजां महामायां प्रपूजयेत् ।
दुर्गातन्त्रेण मन्त्रेण विशेषं तत्र वै शृणु ॥
कन्यायां कृष्णपक्षे तु एकादश्यामुपोषितः ।
द्वादश्यामेकभक्तं च नक्तं कुर्यात् परेऽहनि ॥
चतुर्दश्यां महामायां बोधयित्वा विधानतः ।
गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः ॥
अयाचितं बुधः कुर्यादुपवासं परेऽहनि ।
एवमेव व्रतं कुर्याद्यावद्दै नवमी भवेत्—इति ॥

कलशस्थापनं तु प्रतिपद्येवोक्तं (यामले)

प्रतिपद्येव कर्त्तव्यं कलशस्थापनं तथा—इति ।

तृतीयपक्षे तु सप्तम्यां कलशस्थापनं वक्ष्यते ।

अथाश्विनशुक्लप्रतिपन्निर्णीयते । सा च दुर्गोत्सवोपवासादिषु परविद्धा ग्राह्या ।

या चाश्वयुजि मासे स्यात् प्रतिपद्भद्रयाऽन्विता ।
शुक्ला ममार्चनं तस्यां शतयज्ञफलप्रदम् ॥

इति (देवीपुराणे) परविद्धायाः प्राशस्त्यविधानात् ।

पूर्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी ।
नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता ॥
देशभङ्गो भवेत् तत्र दुर्भिक्षं चोपजायते ।
नन्दायां दर्शयुक्तायां यत्र स्यान्मम पूजनम् ॥

इति (मार्कण्डेयदेवीपुराणयोः) पूर्वविद्धानिषेधाच्च ।

(रुद्रयामले)

अमायुक्ता सदा चैव प्रतिपन्निन्दिता मता ।
तत्र न स्थापयेत् कुम्भं दुर्भिक्षं जायते ध्रुवम् ॥
प्रतिपत् सद्द्वितीया तु कुम्भारोपनकर्मणि ।

(कल्पतरुः)

कुहूकाष्ठोपसंयुक्तां वर्जयेत् प्रतिपत्तिथिम् ।
राज्यनाशाय सा प्रोक्ता निन्दितं तत्र पूजनम् ॥

(देवीपुराणे)

शृणु राजन् प्रवक्ष्यामि चण्डिकापूजनक्रमम् ।
आश्विनस्य सिते पक्षे प्रतिपत् सुशुभे दिने—इत्युपक्रम्य ॥
शुद्धे तिथौ प्रकर्त्तव्यं प्रतिपच्चोर्ध्वगामिनी ।
आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा ॥
अपराह्णे च कर्त्तव्यं शुद्धसन्ततिकाङ्क्षिभिः ।

अपराह्णे योगिन्याः प्राशस्त्यं तु द्वितीयदिने प्रतिपदोऽभावे बोध्यम् । तत्रैव (उड्डामरतन्त्रे) च देवीवचनम् ।

अमायुक्ता न कर्त्तव्या प्रतिपत् पूजने मम ।
मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता ॥

आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः ।
कलशस्थापनं तत्र अरिष्टं जायते ध्रुवम् ॥

(शक्तिसङ्गमे)

घटिकाः षोडश त्याज्या आद्याः प्रतिपदस्तु याः ।
कलशस्थापनं कुर्यात् कल्याणं जायते तदा ॥

तथा ।

अमायुक्ता न कर्त्तव्या प्रतिपत् कालिकार्च्चने ।

(स्कान्दे)

वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव ।
द्वितीयादिगुणैर्युक्ता प्रतिपत् सर्वकामदा ॥

(देवीपुराणे) देवीवचः ।

यो मां पूजयते भक्त्या द्वितीयादिगुणान्विताम् ।
शरत्प्रतिपदं ज्ञात्वा सोऽश्नुते सुखमव्ययम् ॥
यदि कुर्यादमायुक्तप्रतिपत्स्थापनं मम ।
तस्य शापायुतं दत्वा वंशनाशं करोम्यहम् ॥
आग्रहात् कुरुते यस्तु प्रथमे स्थापनं मम ।
तस्य सम्पद्विनाशः स्याज्ज्येष्ठपुत्रश्च नश्यति ॥
अमायुक्ता न कर्त्तव्या प्रतिपच्चण्डिकार्च्चने ।
धनार्थिभिर्विशेषेण वंशहानिश्च जायते ॥
न दर्शकलया युक्ता प्रतिपच्चण्डिकार्च्चने ।
उदये द्विमुहूर्त्ताऽपि ग्राह्या सोदयगामिनी ॥

अन्यत्रापि ।

परविद्धा च या शुद्धा भवेत् प्रतिपदाश्विनी ।
तत्र दुर्गोत्सवं कुर्यादमायुक्तां विवर्जयेत्--इति ॥

नन्वेतानि वाक्यानि-

प्रतिपदा त्वमावास्या तिथ्योर्युग्मं महाफलम्-इति ।

एतद्युग्मवाक्यविरुद्धानीति चेन्न। युग्मवाक्यस्यैतत्प्रतिपदभिन्नप्रतिपद्विषयत्वात् ।

अत एवोक्तं (देवीपुराणे)

शरत्काले महापूजा क्रियते या च वार्षिकी ।
सा कार्योदयगामिन्यां न तत्र तिथियुग्मता-इति ॥

न च-

संपूज्य नवदुर्गां च नक्तं कुर्यात् समाहितः ।
नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतम् ॥

इति (स्कान्दात्) अस्य नवरात्रव्रतस्य नक्तव्रतत्वे सिद्धे-

नक्तव्रतेषु सर्वेषु रात्रियोगः प्रशस्यते ।

इति वचनात् पूर्वविद्धैव ग्राह्येति वाच्यम् ।

अमायुक्ता न कर्त्तव्या इत्यादिविशेषवचनैर्निषेधात् ।

किञ्च न केवलं नक्तव्रतमेतत् ।

एवं च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन [†]तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।

(हेमाद्रौ भविष्ये) व्रतचतुष्टयस्योक्तत्वात्[‡] ।

अत एवोक्तं कमलाकरभट्टैः पाक्षिकनक्तानुवादोऽयमिति[§] ।

अत्र केचिद् (रुद्रयामलदेवीपुराणादि-)वचनेषु कलशस्थापनश्रुतेस्तदेव प्रथमदिने निषिद्धं न तूपवासादि तस्य प्रतिपदा त्वमावास्या-इति युग्मवाक्यात् ।

शुक्लपक्षे दर्शविद्धा इति माधवोक्तेश्च पूर्वदिने प्राप्तेऽस्य बाधे प्रमाणाभावादित्याहुः ।

वस्तुतस्तु-

---

[*] तदुक्तं नन्दिकेश्वरपुराणे इति ४ पु० पा० ।

[†] स्वशक्त्यायाचितं नरः इति ४ पु० पा० ।

[‡] नानाव्रताभिधानात् इति ४ पु० पा० ।

[§] अत्रोपवासादिबहुकर्माभिधानेऽपि देवीपूजनमेव प्रधानमिति रहस्यविदः इति ४ पु० पा० ।

अत्र देवीपूजायाः प्राधान्येन पूर्वदिने तस्या निषेधात् तदङ्गोपवासादावपि परैव ग्राह्येति युक्तम् ।

अत एवोक्तं देवलेन ।

व्रतोपसनियमे घटिकैकाऽपि या भवेत् ।
सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके—इति ॥

अत्र घटिकाशब्दो मुहूर्तपर इति गौडाः ।

कमलाकरभट्टास्तु—

घटिकैकेति मुहूर्तमात्रा कर्तव्येति च द्विमुहूर्तस्तुतिः । तेनौदयिकी प्रतिपद्द्विमुहूर्ता ग्राह्या । अन्यथा द्विमुहूर्तविधेर्वैयर्थ्यापत्तेः ।

यदा तु पूर्वदिने संपूर्णा शुद्धा भूत्वा परदिने वर्धते तदा संपूर्णत्वादमायोगाभावाच्च पूर्वैव ग्राह्या ।

यानि च द्वितीयायोगनिषेधकानि वचनानि केचित् पठन्ति तान्यपि शुद्धाधिकनिषेधपराणीत्याहुः ।

द्विमुहूर्तवचसोऽपि त्रिमुहूर्तस्तावकत्वात् परदिने यदि प्रतिपन्मुहूर्तत्रयान्न्यूना तदा दर्शयुक्ताऽपि पूर्वैव ग्राह्येति समयप्रकाशकृतः ।

वस्तुतस्तु—

त्रिमुहूर्तविधिर्मुख्यः । द्विमुहूर्तविधिस्त्वनुकल्पः ।

द्विमुहूर्ताऽपि कर्तव्येति दक्षेणापि-शब्दस्योक्तत्वात्[*] ।

परदिने प्रतिपदोऽभावे त्वमायुक्ताऽपि सा ग्राह्या ।

अमायुक्ताऽपि कर्तव्या यदि न स्यात् परेऽहनि ।

इति निबन्धव्याख्यालिखितवचनात्[†] ।

अत्र केचित् ।

वृद्धौ समाप्तिरष्टम्यां ह्रासेऽमाप्रतिपन्निशि ।
प्रारम्भो [‡]नवचण्ड्यास्तु नवरात्रमतोऽर्थवत् ॥

---

[*] एवं प्रकृतेऽपि उदये द्विमुहूर्ताऽपीत्यपि-शब्दोक्तेर्द्विमुहूर्तविधिरनुकल्पो बोध्यः इति ४ पु० पा० ।

[†] ग्रन्थान्तरोदाहृतानि दर्शयुक्तप्रतिपद्विधायकानि वचनान्येतद्विषयाण्येव इति ४ पु० पा० ।

[‡] नवरात्रस्य ४ पु० पा० ।

इति (निर्णयसिन्धु-) धृत (देवीपुराणोक्त-) वचनान्नवरात्रशब्दो नवाहोरात्रपरः* ।

अमायुक्तप्रतिपन्निषेधकानि वाक्यानि तु तिथिह्रासाभावविषयाणीत्याहुः ।

अयं च नेपालदेशसम्प्रदायः ।

वस्तुतस्तु-

न रात्रौ स्थापनं कार्यं न च कुम्भाभिषेचनम् ।

इति (मत्स्य-)पुराणीयवचनेन रात्रौ कलशस्थापनादिनिषेधात् प्रारम्भो नवचण्ड्यास्त्विति पूजनादेरपूर्वकत्वाभिधानाच्च नवभिर्दिनैर्नवावृत्तिचण्डीपाठविषयमेतद्वचनम् ।

नवरात्रशब्दस्तु नवतिथिपर एव ।

प्रारम्भो नवरात्रस्य इत्यादौ तु कर्मणि लाक्षणिकः । तस्य नवाहोरात्रपरत्वे तु तिथिह्रासवृद्ध्योर्न्यूनाधिकत्वापत्तेः ।

अत एवोक्तं (निर्णयामृते देवीपुराणे च)

तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ।
अष्टरात्रेण दोषोऽयं नवरात्रतिथिक्षये ॥
अष्टरात्रेण दोषो हि पूर्णां मुक्त्वा तु पूजनम् ।
तिथिह्रासेऽपि कर्त्तव्यं प्रतिपद्याश्विने सिते-इति ॥

प्रतिपदि चित्रावैधृतियोगनिषेध उक्तस्तत्रैव ।

त्वाष्ट्रवैधृतियुक्ता चेत् प्रतिपच्चण्डिकार्चने ।
तयोरन्तर्विधातव्यं कलशारोपणं गृहे-इति ॥

तथा ।

आश्विने प्रतिपत् पूर्णा शुद्धा या तु भवेन्नृप ।
आरभ्यं नवरात्रं स्याद्धित्वा चित्रां च वैधृतिम् ॥

यदा तु चित्रावैधृत्योः परिहारेण प्रतिपन्न लभ्यते तदा कात्यायनः ।

प्रतिपद्याश्विने मासि नरो वैधृतिचित्रयोः ।

---

* इति (निर्णयसिन्धु-) धृत-(देवीपुराणो-) क्तवचनात् ।
तिथेः क्षये तथा वृद्धौ पूर्ववेधो न दूष्यति ।
इति तान्त्रिकवचनाच्च इति ४ पु० पा० ।

आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकम् ॥

(रुद्रयामलेऽपि)

वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनम् ।
तस्मान्न स्थापयेत् कुम्भं चित्रायां वैधृतौ तथा ॥
सम्पूर्णा प्रतिपद्देवि चित्रायुक्ता यदा भवेत् ।
वैधृत्या वाऽपि युक्ता स्यात् तदा मध्यन्दिने रवौ ॥
अभिजित् तु मुहूर्त्तं यत् तत्र स्थापनमिष्यते ।

(भविष्ये)

चित्रावैधृतिसम्पूर्णा प्रतिपच्चेद्भवेन्नृप ।
त्याज्या ह्यंशास्त्रयस्त्वाद्यास्तुरीयांशे तु पूजनम् ॥

चित्रादियुक्ताऽपि द्वितीयायुता चेन्न दुष्टेत्युक्तं (दुर्गोत्सवे)

भद्रान्विता चेत् प्रतिपत् तु लभ्यते विरुद्धयोगैरपि सङ्गता सती ।
सा वै पराह्णे विबुधैर्विधेया श्रीपुत्रराज्यादिविवृद्धिहेतुः-इति ॥

अथ यववपनविधिः (रुद्रयामले)

स्नानं माङ्गलिकं कृत्वा ततो देवीं प्रपूजयेत् ।
शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम् ॥
यवान् वै वापयेत् तत्र गोधूमैश्चापि संयुतान् ।

तन्त्रान्तरे ।

वालुका गृह्य यत्नेन नदीनदसमुद्भवाः ।
वेदीं कुर्यात् प्रयत्नेन चतुरस्रां शुभावहाम् ॥
द्विहस्ता चोत्तमा वेदी मध्यमा सार्धहस्तका ।
अधमा हस्तमात्रा च न्यूनाधिक्यं न कारयेत् ॥
भूरसीति पठेन्मन्त्रं देवीं संस्पृश्य मानवः ।
अपामग्निं समुच्चार्य प्रोक्षयेच्चन्दाम्भसा ॥
तन्मध्ये विलिखेन्मन्त्रं जयदुर्गाख्यमुत्तमम् ।

तत्रावाह्य यजेद्देवीमष्टादशभुजां पराम् ॥
पञ्चोपचारैः संपूज्य दिक्पालाँश्चापि पूजयेत् ।
पश्चान्नवार्णमनुना पूजयेदष्टमातृकाम् ॥
संशोध्य यवराशिं च यवोऽसीति मनुं पठन् ।
प्रक्षिपेद्वेदिकामध्ये वक्ष्यमाणमनुं जपन् ॥
ॐ यव त्वं यवरूपोऽसि यज्ञार्थे निर्मितो विधेः ।
देवानां तृप्तिकृद्यस्मात् तस्मात् त्वं वरदो भव ॥
जयन्ती मङ्गलाकाली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

तथा ।

भेरीमृदङ्गडमरूघण्टापटहनिःस्वनैः ।
महोत्सवं प्रकुर्वीत यवारोपणकर्मणि ॥
प्रसूते च दशम्यां वै भद्राभद्रं विचारयेत् ।

विचारस्त्वन्यत्र ।

सम्यक् समुद्गता दीर्घा ऋजवश्चाङ्कुराः शुभाः ।
अनुद्गताः कुण्ठिताग्रा ह्रस्वाः शुष्काश्च भङ्गुराः ।
कीटाखुभुक्ताः शटिताः विषमाश्चाशुभाः स्मृताः ॥

संग्रहान्तरलिखितविचारान्तरं तु प्रमाणाभासमूलकत्वादुपेक्षितम् ।

(रुद्रयामले)

तत्र संस्थापयेत् कुम्भं विधिना मन्त्रपूर्वकम् ।
सौवर्णं राजतं वाऽपि ताम्रं मृण्मयमेव वा ॥

(मात्स्ये)

न रात्रौ स्थापयेत् कुम्भं न च कुम्भाभिषेचनम् ।

विष्णुः ।

भास्करोदयमारभ्य यावत् तु दश नाडिकाः ।

प्रातःकाल इति प्रोक्तः स्थापनारोपणादिषु ॥

कलशस्थापनविधिस्तु दशभुजापक्षे वक्ष्यते (वैष्णवीकल्पे)

नैमित्तिकोक्तविधिना नवाहानि प्रपूजयेत् ।
उपोषणं तथाऽष्टम्यां प्रभूतवलिदानकम् ॥
नवम्यामाचरेद्धीमान् दशम्यां तु विसर्जयेत् ।

पुत्रिणा तु महाष्टम्यामुपवासो न कार्यः ।

उपवासं महाष्टम्यां पुत्रवान् न समाचरेत् ॥
यथा तथा संयतात्मा व्रती देवीं प्रपूजयेत् ।

इति (कालिकापुराणात्) नवम्यां प्रभूतवलिदानमित्यनेनाष्टम्यादौ पूजाङ्गवलिदानमायाति ।

अष्टम्यां वलिदानेन पुत्रनाशो भवेद्ध्रुवम् ।

इति नामशून्यं वचनं केचित् पठन्ति । तत्र मूलं मृग्यम् । समूलत्वाभिधाने तु प्रभूतवलिदाननिषेधकमिति मन्तव्यम् । पूजावलिदानविसर्जनादिविधिस्तदग्रे व्यक्तीभविष्यति ।

अथ दशभुजापक्षः (कालिकापुराणे)

बोधयेद्बिल्वशाखासु षष्ठ्यां देवीं फलेषु च ।
सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत् ॥
पुनः पूजां तथाऽष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥
प्रभूतवलिदानं च नवम्यां विधिवच्चरेत् ।
जपहोमसमायुक्तो भोजयेद्वै कुमारिकाः ॥
ध्यायेद्दशभुजां देवीं दुर्गातन्त्रेण पूजयेत् ।
विसर्जनं दशम्यां तु कुर्याद्वै शावरोत्सवैः ॥

फलेषु इति । फलयुक्तासु शाखास्वित्यर्थः । दुर्गातन्त्रेणेति दुर्गातन्त्रसंज्ञकेन पूर्वोक्तजयदुर्गामन्त्रेणेत्यर्थः । शावरोत्सवैरिति । शवरोचितवेशभाषाधूलिकर्दमविक्षेपादिभिरित्यग्रे स्फुटीभविष्यति । षष्ठ्यां च सायाह्ने सन्ध्यायां वा बोधनं कार्यम् ।

सायाह्ने बिल्वशाखायां षष्ठ्यां देवीं प्रबोधयेत् ।

इति महाकालोक्तेः ।

षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ।

इति (भविष्यपुराणात्)
पञ्चधा विभक्तिदिनपञ्चमांशः सायाह्नः । सन्ध्या तु दिनरात्र्योः सन्धौ मुहूर्त्तः ।
(देवीपुराणे)

ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां विल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ॥

इति नक्षत्रयोगे फलातिशयः ।

मूलाभावेऽपि सप्तम्यां केवलायां प्रवेशयेत् ।

इति (नन्दिकेश्वरपुराणात्)
एवं च ।

ज्यैष्ठायामेव सम्बोध्य मूलेनैव प्रवेशयेत् ।
पूर्वोत्तराभ्यां सम्पूज्य श्रवणान्ते विसर्जयेत् ॥

इत्यादौ सर्वत्रापि तिथिनक्षत्रयोगे फलभूयस्त्वं वेदितव्यम् । पूर्वोत्तराभ्यामिति । पूर्वाषाढान्वितायामष्टम्यामुत्तराषाढान्वितायां नवम्यामित्यर्थः । नक्षत्रानुरोधेन पत्रिकाप्रवेशनं विसर्जनं च रात्रौ न कर्त्तव्यम् ।

ऋक्षयोगानुरोधेन रात्रौ पत्रीप्रवेशनम् ।
विसर्जनं चरेद्यस्तु सराष्ट्रः स विनश्यति ॥

इति (दुर्गाभक्तितरङ्गिणी-) लिखितवचनात् ।
तथा च ।

अन्त्यपादो निशाभागे श्रवणस्य यदा भवेत् ।
तदा देव्याः समुत्थानं दशम्यां दिनभागतः ॥

इति वचनात् श्रवणान्ते विसर्जयेत् इत्यादिवचनानुरोधेन रात्रौ विसर्जनं न कार्यमिति तत्रैवोक्तम् । अत्र दिनत्रये तिथित्रयविहितपूजात्रयं प्रायिकं कदा चित् तिथिह्रासवशाद्द्वाभ्यां पूजात्रयं कदा चित् तिथिवृद्धिवशाद्दिनचतुष्टयेन पूजात्रयं तिथित्रयलाभे तु निर्विवादैव व्यवस्था ।

व्रती प्रपूजयेद्देवीं सप्तम्यादिदिनत्रये ।
द्वाभ्यां चतुरहोभिर्वा ह्रासवृद्धिवशात् तिथेः ॥

इति (भविष्य-) वचनात्

अस्मिन् पक्षेऽपि प्रतिपदादिदिनकृत्यान्युक्तानि (भविष्ये)

केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपत्तिथौ ।
पट्टडोरं द्वितीयायां केशसंयमहेतवे ॥
दर्पणं च तृतीयायां सिन्दूरालक्तकं तथा ।
मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमण्डनम् ॥
पञ्चम्यामङ्गरागं च शक्त्याऽलङ्करणानि च ।
षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत्–इति ॥

अत्र च पत्रिकाप्रवेशात् पूर्वेद्युः सायंकाले षष्ठ्यभावे तत्पूर्वदिनेऽधिवासनं कार्यम् । षष्ठ्याः सायंकालेऽत्यन्तासत्त्वे त्वधिवासनलोपः ।

षष्ठ्यां सायं प्रकुर्वीत विल्ववृक्षेऽधिवासनम् ।

इति (कल्पतरु-) वचनादिति । एवं देवीबोधनेऽपि व्यवस्था ।

वस्तुतस्तु–

अनेकतन्त्रबोधितकर्त्तव्यताकस्य देवीबोधनस्यावश्यकतया यस्मिन् दिने सायंसन्ध्ये षष्ठीलाभस्तत्रैव बोधनम् । उभयदिने सन्ध्यायां षष्ठीलाभे तु युग्मादरेण व्यवस्था । दिनद्वये सन्ध्यायां षष्ठ्यभावे तु प्रदोषादिसमये षष्ठ्यामिति कौमुदीकृन्मतमेवादरणीयम् । गौणकालव्याप्तेः सत्त्वात् ।

तदुक्तम् ।

स्वकालादुत्तरः कालो गौणः स्यात् पूर्वकर्मणः–इति ।

अत एव सायं श्रुतिः फलातिशयार्था न तु कर्मलोपः कार्य इत्याचार्यचूडामणिः ।

प्रदोषस्तु–

त्रिमुहूर्त्तः प्रदोषः स्याद्भानावस्तं गते सति ।

इति (मदनरत्ने) व्यासेनोक्तः ।

वत्सेन तु–

प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते–इत्युक्तम् ।

एवं च पत्रिकाप्रवेशादौ सप्तम्युदयव्यापिन्येव ग्राह्या न तु षण्मुन्योरिति युग्मवाक्यात् पूर्वविद्धा ।

युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमिच्छन्ती न तत्र तिथियुग्मता ॥

इति (कृत्यतत्त्वार्णव-) लिखितवचनात् ।

भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः ।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः ॥

इति (तिथितत्त्व-) लिखित-(नन्दिकेश्वरपुराणाच्च) अधिवासनं तु पत्रिकाप्रवेशाव्यवहितपूर्वदिन एव सायंकाले षष्ठ्यभावेऽपि कार्यम् ।

ज्येष्ठा वा यदि वा षष्ठी सायंकाले न चेद्भवेत् ।
सायमेव तथाऽपि स्याद्बिल्ववृक्षेऽधिवासनम् ॥
पूर्वां षष्ठीं सनक्षत्रां सायं प्राप्तामपि त्यजेत्–इति ।

तथा च ज्योतिःशास्त्रम् ।

पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा
आरोग्यं धनदा करोति विजयं चण्डीप्रवेशे शुभा ।
मध्याह्ने न च पीडनं क्षयकरी नृणामघोरावहा
सायाह्ने वधबन्धमादिकलहं सर्वक्षतिं दास्यति ॥
सप्तम्यामस्तगायां यदि विशति गृहं पत्रिका श्रीफलाद्या
राज्ञः सप्ताङ्गराज्यं जनसुखसहितं हन्ति मूलानुरोधात् ।
तस्मात् सूर्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीं
भूपालो वेशयेत् तां सकलजनहितां राक्षसर्क्षं विहाय ॥

मत्स्यसूक्तवचनात् ।

पत्रीप्रवेशात् पूर्वेद्युः सायाह्ने बिल्ववासिनीम् ।
चण्डीमामन्त्रयेद्विद्वान्नात्र षष्ठीपुरस्क्रिया ॥

इति (ब्रह्माण्डपुराणाच्च)

बिल्वनिमन्त्रणपत्रिकाप्रवेशादिविधिरग्रे वक्ष्यते ।

एकाहपक्षोऽपि (कालिकापुराणे)

यस्त्वेकस्यामथाष्टम्यां नवम्यामथ साधकः ।
पूजयेद्वरदां देवीं महाविभवविस्तरैः–इति ॥

(रुद्रयामले)

मूलनक्षत्रमारभ्य पूजनीया सरस्वती ।
पूजयेत् प्रत्यहं देवीं यावद्वैष्णवमृक्षकम् ॥
नाध्यापयेन्न च लिखेन्नाधीयीत कदा चन ।
पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तमः ॥

(संग्रहे)

आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम् ।
मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ॥

अथ महाष्टमी निर्णीयते । सा च पूजोपवासादिषु परयुता ग्राह्या । वसुरन्ध्रयोरिति युग्मवाक्यात् ।

शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता ॥

इति (ब्रह्मवैवर्त्ताच्च)

तथा च (स्मृतिसंग्रहे)

शरन्महाष्टमी पूज्या नवमीसंयुता सदा ।
सप्तमीसंयुता नित्यं शोकसन्तापकारिणी ॥
जम्भेन सप्तमीयुक्ता पूजिता तु महाष्टमी ।
इन्द्रेण निहतो जम्भस्तस्माद्दानवपुङ्गवः ॥
तस्मात् सर्वप्रयत्नेन सप्तमीमिश्रिताऽष्टमी ।
वर्जनीया प्रतिज्ञाय मनुजैः शुभकाङ्क्षिभिः ॥
सप्तमीं शल्यसंयुक्तां मोहादज्ञानतोऽपि वा ।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ॥
सप्तमी कलया यत्र परतश्चाष्टमी भवेत् ।
तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम् ॥

तथा ।

पुत्रान् हन्ति पशून् हन्ति हन्ति राष्ट्रं सराजकम् ।
हन्ति जातानजाताँश्च सप्तमीसहिताऽष्टमी ॥

(निर्णयामृते) स्मृत्यन्तरवचनम् ।

नाष्टमी सप्तमीयुक्ता सप्तमी नाष्टमीयुता ।
नवम्या सह कार्या स्यादष्टमी सर्वथा बुधैः ॥

तत्रैव ।

अष्टमी नवमीयुक्ता महोत्साहो महोत्सवः ।

इति (देवीपुराणे)

सप्तमी वेधसंयुक्ता यैः कृता तु महाष्टमी ।
पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवत् ॥

(भोजराजीये)

उमाया नवमी प्रोक्ता हरस्य तिथिरष्टमी ।
द्वयोरैक्ये महापुण्या उमामाहेश्वरी तिथिः ॥

(मदनरत्ने स्मृतिसमुच्चये)

सप्तमी शल्यसंविद्धा वर्जनीया महाष्टमी ।
स्तोकाऽपि सा महापुण्या यस्यां सूर्योदयो भवेत् ॥

स्तोकाऽपीति घटिकामात्राऽपीत्यर्थः । अत एव घटिकामात्राऽप्यष्टम्यौदयिकी ग्राह्या ।

व्रतोपवासनियमे घटिकैकाऽपि या भवेत् ।

इति देवलोक्तेरिति निर्णयसिन्धुकृतः । गौडा अप्येवमेवाहुः ।

एवं च सप्तमीवेधः कलारूपोऽप्यष्टमीवर्जनप्रयोजको न तु त्रिमुहूर्त इति द्रष्टव्यम् ।

समयप्रकाशादिग्रन्थकारास्तु त्रिमुहूर्त्ताऽष्टम्येव सप्तमी वर्जनप्रयोजिका न तु ततो न्यूना । स्तोकाऽपीत्यादीनि वचनान्यन्वयद्वारा त्रिमुहूर्त्तं स्तुवन्ति तेनाष्टमी परदिने यदि मुहूर्त्तत्रयान्न्यूना तदा सप्तमीयुता पूर्वैव ग्राह्येत्याहुः ।

कलाकाष्ठा घटिकामुहूर्त्तद्विमुहूर्त्तवचांसि त्रिमुहूर्त्तप्रशंसापराणीति निबन्धव्याख्याकारोऽपि बभाण ।

यत् तु–

महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी ।
सप्तम्याऽपि युता कार्या मूलेन तु विशेषतः ॥

इति वचनं तत् परदिनेऽष्टम्यभावविषयम् ।

यदुक्तं (निर्णयामृते देवीपुराणे)

उत्तरास्तिथयो यत्र क्षयं यान्ति नराधिप ।
तदा पूर्वाष्टमीं कुर्यादन्यथा त्वशुभं भवेत्-इति ॥

यच्च--

यदाऽष्टमीं तु सम्प्राप्य ह्यस्तं याति दिवाकरः ।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ॥
दुर्भिक्षं तत्र जानीयान्नवम्यां यत्र पूज्यते ।

इति परदिनेऽष्टमीसत्त्वेऽपि पूर्वविद्धाविधायकं वचनं तत् परदिने नवम्यभावविषयम् ।

यदा सूर्योदये न स्यान्नवमी चापरेऽहनि ।
तदाऽष्टमीं प्रकुर्वीत सप्तम्या सहितां नृप ॥

इति (स्मृतिसंग्रहात्)

यत् तु-

सप्तम्यामुदिते सूर्ये परतो याऽष्टमी भवेत् ।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ॥

इति परविद्धाष्टमीनिषेधकविश्वरूपनिबन्धवचनं तदाश्विनकृष्णपक्षनवम्यां विहिते देवीबोधने तदङ्गत्वेन कृष्णाष्टम्यां क्रियमाणदेवीपूजाविषयम् ।

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्त्तव्या परविद्धा न कुत्र चित् ॥
उपवसादिकार्येषु एष धर्मः सनातनः ।

इति कृष्णाष्टम्याः परविद्धाया एव प्राशस्त्यविधानादिति* निबन्धव्याख्याकृतः । निर्णयामृतोऽप्येवमाह ।

यानि च-

---

* इत्यापस्तम्बवचनेन कृष्णाष्टम्याः पूर्वविद्धाया एव विधानादिति । इति ४ पु० पा० ।

अहं भद्रा च भद्राऽहं नावयोरन्तरं क्व चित् ।
सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिताऽप्यहम् ॥

तथा ।

महाष्टम्यां भगवती भद्रायामपि पूजिता ।
ददाति चायुरारोग्यं यतो भद्रास्वरूपिणी ॥

इत्यादीनि (देवीपुराण-) वचनानि तानि तु विष्टिकरणमध्ये पूजाविधानार्थानि ।

विष्टिं त्यक्त्वा महाष्टम्यां मम पूजां करोति यः ।
तस्य पूजाफलं न स्यात् तेनाहमवमानिता ॥

इति देवीवाक्यात् ।

भद्रायां भद्रकाल्याश्च मध्ये स्यादर्चनक्रिया ।
तस्माद्वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैः ॥

इति वचनं तु पूर्वदिनेऽष्टम्यभावविषयमिति सर्वसम्मतम् ।

महाष्टमी भौमवारान्विता चेदतिप्रशस्ता ।

तदुक्तं (मदनरत्ने)

अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
कुजवारो भवेत् तत्र पूजनीया प्रयत्नतः-इति ॥

मूलयुक्तेयमतिप्रशस्तेत्युक्तं (स्कान्दे)

महाष्टमी मूलयुक्ता त्रैलोक्येऽपि सुदुर्लभा-इति ।

मूलयुक्ताऽपि सप्तमीविद्धा चेत् त्याज्यैवेत्युक्तं (दुर्गोत्सवे)

मूलेनापि हि संयुक्ता सदा त्याज्याऽष्टमी बुधैः ।
लेशमात्रेण सप्तम्या अपि स्याद्यदि दूषिता-इति ॥

यदा तु पूर्वदिने सम्पूर्णा सती परदिने वर्धते तदा संपूर्णत्वात् सप्तमी योगाभावाच्च पूर्वैव ग्राह्या न तूत्तरा ।

षष्टिदण्डात्मिकायाश्च तिथेर्निष्क्रमणे परे ।
अकर्मण्यं तिथिमलं भवेदेकादशीं विना-इति स्मार्त्तवचनात् ॥

एवं च-

सप्तमी कलया युक्ता वर्जनीया महाष्टमी ।

इत्यादिवाक्यैः पूर्वविद्धाया निषेधात् परविद्धैव महाष्टमीति सिद्धम् ।
शुद्धायां तु न कश्चित् संदेहः ।
के चित् तु-

तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥
अतोऽर्थं पूजनीया सा तस्मिन्नहनि मानवैः ।
त्रिसन्ध्यं पूजयेद्देवीं जपस्तोत्रपरायणः ॥

इत्यादिवाक्यविहितायां दिवातनपूजायां परविद्धाऽष्टमी ग्राह्या ।

आश्विनस्य सिते पक्षे या तु स्यात् तिथिरष्टमी ।
तस्यां रात्रौ पूजनीया महाविभवविस्तरैः ॥

इत्यादिवचनप्राप्तायां रात्रिपूजायां त्वष्टम्यां रात्रियोग एवादरणीयः ।

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्माणि कुर्वीत ह्रासवृद्धो न कारणम् ॥

इति वचनादित्याहुः । महाष्टमीकृत्यमग्रे वक्ष्यते ।
अथ महानवमी निर्णीयते । सा च पूर्वयुता ग्राह्या वसुरन्ध्रयोरिति युग्मवाक्यात् ।

अष्टम्या सहिता कार्या सा महानवमी तिथिः ।

इति (बृहत्सिद्धान्तसाराच्च)

अष्टम्या सहिता रिक्ता न कदा चित् परायुता ।

इति * (लघुतिथिनिर्णये मत्स्यपुराणाच्च)
पैठीनसिरपि ।

प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिः ।

संमुखी सायाह्नव्यापिनी ।
(ब्रह्मवैवर्त्ते)

अष्टम्या नवमी विद्धा कर्त्तव्या फलकाङ्क्षिभिः ।

(पाद्मे)

अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।

---

* लघुतिथिनिर्णये यमपुराणे इति ४ पु० पा० ।

(मात्स्ये)

अष्टम्या सहिता रिक्ता प्रकर्त्तव्या सदा बुधैः ।
पूर्णायुक्तां तदा कुर्यात् का चिन्नास्त्यष्टमीयुता ॥

(*हेमाद्रौ पाद्मे)

श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा च कर्त्तव्या शिवरात्री बलेर्दिनम् ॥

(भविष्ये)

अश्वयुक् शुक्लपक्षे तु याऽष्टमी मूलसंयुता ।
सा महानवमी नाम त्रिषु लोकेषु दुर्लभा ॥

अष्टमीमूलाभ्यां युक्तेत्यर्थः । मूलेत्युपलक्षणम् ।

तथा च (मदनरत्ने लैङ्गे)

दुर्गापूजासु नवमी मूलाद्यृक्षत्रयान्विता ।
महती कीर्त्तिता तस्यां दुर्गां महिषमर्दिनीम् ॥

पूजयेदिति शेषः ।

अष्टम्या नवमी विद्धा नवम्या चाष्टमी तथा ।
मूलादिभत्रयेणाढ्या त्रैलोक्येऽपि प्रपूजिता—इति ॥

अत्र मुहूर्त्तत्रयात्मको वेधो वेदितव्यः ।

तदाह पैठीनसिः ।

पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम् ।
त्रिभिर्मुहूर्त्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः—इति ॥

यद्यपि—

उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।
द्वित्रिर्मुहूर्त्तमह्नो यः सा तिथिर्हव्यकव्ययोः ॥

इति (हेमाद्रौ विष्णुधर्मे) मुहूर्त्तद्वयात्माऽपि वेध उक्तस्तथाऽपि प्रातरेव सः । सायं तु त्रिमुहूर्त्त एव वेधः ।

---

* यद्यपि यमपुराणादिवचनानि नवमीसामान्यपराणि तथाऽपि प्रकृताविरुद्धतया निबन्धव्याख्यायामुदाहृतानि ।

तथा च इत्यन्यथा पा० ४ पु० ।

तदुक्तं (स्कान्दे)

यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः ।
सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्तैव या भवेत्–इति ॥

सूर्योदयेऽपि द्विमुहूर्त्तत्वमनुकल्प एव ।

द्विमुहूर्त्ताऽपि कर्त्तव्या या तिथिर्वृद्धिगामिनी ।

इति दक्षेणापि–शब्दग्रहणात् ।

निर्णयसिन्धुकृताऽपि त्रिमुहूर्त्तयोगे पूर्वा नवमी पूर्वोक्तवचनात् ।

न कुर्यान्नवमीं तात दशम्या तु कदा चन ।

इति (स्कान्दे) परानिषेधाच्च । त्रिमुहूर्त्तयोगाभावे तु निषिद्धाऽपि परैव ग्राह्या ।

व्रतोपवासनियमे घटिकैकाऽपि या भवेत् ।
सा कार्योदयगामिन्याम् ... ... ॥

इत्यादिवचनानि नवमीभिन्नतिथिपराणि नवम्यां विशेषोक्तेरित्याहुः ।
यद्यप्येव निर्णयः प्रामाणिकैः कृतस्तथाऽपि ।

तत्राश्वयुक्तनवमी मुहूर्त्तं वा कला यदि ।
सा तिथिः सकला ज्ञेया लक्ष्मीविद्याजयार्थिभिः ॥

इति (सौरपुराणात्)

अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
प्रभाते वलिदाने तु कियन्मात्राऽपि लभ्यते ॥
नवम्यां तत्र सम्पूज्य दुर्गां दुर्गार्त्तिनाशिनीम् ।

इति (सिद्धान्तसंग्रहो–)दाहृतवचनात् ।

सूर्योदये परं रिक्ता पूर्णा स्यात् परतो यदि ।
वलिदानं प्रकर्त्तव्यं तस्मिन् देशे शुभावहम् ॥
वलिदाने कृतेऽष्टम्यां *पुत्रभङ्गो भवेन्नृप ।

इति (देवीपुराणाच्च) वलिदाने परविद्धायाः प्राशस्त्यमेवावगन्तव्यम् । उपवासे तु पूर्वैव पूर्वोक्तवचननिचयात् ।

---

* राष्ट्रभङ्गो–इति ४ पु० पा० ।

एकादशी च नवमी दिशा विद्धा भवेद्यदि ।
तदा वर्ज्या प्रयत्नेन गङ्गाम्भः सुरया यथा ॥
नवमी दशमी चैव नोपोष्या परसंयुता ।

इति (पाद्मब्रह्मवैवर्त्तयोः) उपवासे परानिषेधाच्च । पूजाङ्गबलिदानमष्टम्यामपि कर्त्तव्यम् ।

अष्टम्यामधिकं देयं सप्तमीबलिदानतः ।

इति महाकालोक्तेः ।

किन्तु प्रभूतबलिदानं तत्र निषिद्धम् ।

प्रभूतबलिदानं तु न कुर्यान्नवमीं विना ।

इति भैरवोक्तेः ।

नवम्यामुदयव्यापिन्यां प्रभूतबलिदानमुक्तं (भविष्ये)

एवं हृष्टैर्निशां नीत्वा प्रभाते अरुणोदये ।
घातयेन्महिषान् मेषान् रटतो नतकन्धरान् ॥
शतमर्धशतं वाऽपि तदर्धं वा यथेच्छया–इति ।

निशामष्टमीरात्रिम् । अरुणोदयः सूर्योदय इत्यर्थः ।

सूर्योदये नवम्यां तु दद्याद्बलिमतन्द्रितः ।

इति तन्त्रान्तरसंवादात् ।

अरुणो भास्करेऽपि स्यात् … … … ।

इति (अमरकोषाच्च)

यानि तु–

नन्दायां ज्वलते वह्निः पूर्णायां पशुघातनम् ।
भद्रायां गोकुलक्रीडा राज्यनाशाय जायते ॥
नवम्यामपराह्णे तु बलिदानं प्रशस्यते ।
दशमीं वर्जयेत् तत्र नात्र कार्या विचारणा ॥

इत्यादीनि (ब्रह्मवैवर्त्तादि–) वचनानि तानि शुद्धाधिकनिषेधपराणीति दिक् । नवमीकृत्यमग्रे वक्ष्यते ।

अथ विजयादशमी निर्णीयते । सा च देवीविसर्जनव्यतिरिक्तकर्मसु तारकोदयव्यापिनी ग्राह्या ।

ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः ।
विजयो नाम कालोऽयं सर्वकार्यार्थसिद्धिदः ॥

इति (ज्योतिर्निबन्धे) नारदवचनात् ।

दिनद्वये नक्षत्रोदयव्यापिन्या दशम्याः सत्त्वे पूर्वा ।

या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता ।
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः ॥
नवमीशेषयुक्तायां दशम्यामपराजिता ।
ददाति विजयं देवी पूजिता जयवर्धिनी ॥

इति (हेमाद्रौ स्कन्दात्) निर्णयसिन्धुमते तूत्तरा ।

दशम्यां तु नरैः सम्यक् पूजनीयाऽपराजिता ।
ऐशानीं दिशमाश्रित्य चापराह्णे प्रयत्नतः ॥

इति (स्कान्दात्) अपराह्णव्याप्तेराधिक्यात् । असत्त्वे तु एकादशमुहूर्तव्यापिनी ग्राह्या ।

आश्विने शुक्लपक्षे तु या भवेद्दशमी तिथिः ।
एकादशमुहूर्त्ता सा ग्राह्या श्रवणसंयुता—इति धौम्योक्तेः ॥
आश्विनस्य सिते पक्षे दशम्यां सर्वरात्रिषु ।
सायंकाले शुभा यात्रा दिवा वा विजयक्षणे ॥
एकादशो मुहूर्त्तोऽपि विजयः परिकीर्तितः ।
तत्र सर्वैर्विधातव्या यात्रा विजयकाङ्क्षिभिः ॥

इति भृगुवचनाच्च ।

दिनद्वये तद्व्याप्तौ पूर्वतारकोदयव्याप्तेराधिक्यात् ।

यदा तु परदिने स्वल्पाऽपि श्रवणयुक्ता तदा यात्रायां परैवोपादेया ।

उदये दशमी किंचित् संपूर्णैकादशी यदि ।
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा ॥
श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ।

उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः ॥

इति (हेमाद्रौ) काश्यपोक्तेः ।
एवमुक्तलक्षणतया दशम्याः परदिने सत्त्वे देवीविसर्जनेऽपि परैव ग्राह्या ।

* प्रातरेव दशम्यां च श्रवणर्क्षे विसर्जनं ।
विसर्जनं तु तद्दृष्टं लक्ष्मीविद्या बलक्षयम् ॥

(तिथिनिर्णये देवीपुराणे) पूर्वनिषेधात् ।
अत एव नारदः ।

सूर्योदये यदा राजन् दृश्यते दशमी तिथिः ।
आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः ॥

इति श्रवणान्वितायां दशम्यां केवलायामेव दशम्यां वा विसर्जनं कार्यम् ।

तत्तन्नक्षत्रयोगे तु फलभूमा प्रजायते ।
नक्षत्राणामलाभे तु केवलायां तिथौ चरेत् ॥

इति महाकालोक्तेः ।

तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनम् ।

इति लल्लवचनाच्च ।
परदिने दशम्यसत्त्वे तु पूर्वदिन एव दशमीभागे विसर्जनं कार्यम् ।

सम्प्रेषणं दशम्यां तु क्रीडाकौतुकमङ्गलैः ।

इति (नन्दिकेश्वरपुराणात्)
स्थापनविसर्जनयोर्लग्नमाह ।

क्रूरे च स्थापयेद्देवीं चरलग्ने तु चालयेत् ।

(महाकालसंहितायाम्)

शरदर्चाविधौ देव्याः स्थापनं च विसर्जनम् ।
चरलग्ने चरांशे वा कुर्यात् सर्वसमृद्धये ॥
अन्यलग्नेऽन्यांशके वा विपरीतफलप्रदम् ।

इत्युक्तं तन्त्रान्तरे ।

ततो विसर्जयेद्देवीं स्तुत्वा नत्वा पुनः पुनः ।

---

* नवम्या दशमी मिश्रा नापि देवीविसर्जनम् इति २-३-५ पु० पा० ।

श्रवणस्यान्तिमे पादे दशम्यां शाबरोत्सवैः ॥

श्रवणानुरोधेन रात्रौ विसर्जनं न कर्त्तव्यमिति प्रागेवोक्तम् ।

(तिथितत्त्वे देवीपुराणे)

प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् ।
प्रातरेव च सम्पूज्य प्रातरेव विसर्जयेत् ॥

एतद्विसर्जनं परविद्धायामिति ज्ञेयम् ।

तथा ।

वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनम् ।

तन्त्रान्तरे ।

ततोऽपराह्णे सम्पूज्य श्रवणे चापराजिताम् ।
प्रस्थानं नृपतिः कुर्यात् सामात्यबलवाहनः ॥

एतयोर्विधिरग्रे वक्ष्यते ।

प्रस्थानं च दशमीमुल्लङ्घ्य एकादशीभागे न कार्यम् ।

दशमीं यः समुलङ्घ्य प्रस्थानं कुरुते नृपः ।
तस्य तं वत्सरं राज्ये न क्वापि विजयो भवेत् ॥

इति (निर्णयामृते स्कान्दात्)

उदये दशमी किञ्चित्–इत्यादिकाश्यपोक्तेस्तु दशम्याः कर्मकालव्याप्तिरपि नापेक्षितेति प्रतिभाति तेनेदं स्कान्दवचनं श्रवणशून्यदशमीविषयम् ।

इति दशमीनिर्णयः ।

अथाशौचे विशेषो (विश्वरूपनिबन्धे)

आश्विनस्य सिते पक्षे प्रारब्धे नवरात्रके ।
शावे शौचे समुत्पन्ने क्रियाः कार्याः कथं बुधैः ॥
सूतके वर्त्तमाने च तत्रोत्पन्नं यदा भवेत् ।
देवीपूजा प्रकर्त्तव्या पशुयज्ञविधानतः ॥
सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ।
देवीमुद्दिश्य कर्त्तव्यं तत्र दोषो न विद्यते ॥

विष्णुः ।

व्रते यज्ञे विवाहे च श्राद्धे होमेऽर्चने जपे ।

प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

तन्त्रेऽपि ।

सूतकेऽत्र समुत्पन्ने प्रारब्धं न त्यजेद्बुधः—इति ।

प्रारब्ध इति आरम्भश्चात्र सङ्कल्परूपः ।

सङ्कल्पो व्रतसत्रयोः … … … … ।

इति विष्णूक्तः ।

आरब्धे स्वयमेव देवीपूजादि कुर्यात् । अनारब्धे त्वग्निहोत्रादिवत् कारयितव्यमिति सर्वमतम् । रजस्वलाऽन्येन कारयेदिति विशेषवचनाभावात् ।

तदुक्तं (मात्स्ये)

अन्तरा तु रजोयोगे पूजामन्येन कारयेत्—इति ।

तत्र पूजादिकं प्रवृत्तिरूपं कर्म पुत्रादिद्वारा निर्वाह्यम् । उपवासादिकं स्वयमेव कर्त्तव्यं निवृत्तावशौचस्याकिञ्चित्करत्वात् ।

तत्राहाङ्गिराः ।

नियमस्था यदा नारी प्रपश्येदन्तरा रजः ।

उपोष्यैव तु ता रात्रीः स्नात्वा शेषं चरेद्व्रतम्—इति ॥

अत्र पारणाहे सूतकादिप्राप्तौ तदतिक्रम्य पारणं कुर्यादिति केचित् तदसत् ।

सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ।

तदन्ते भोजयेद्विप्रान् दानं दद्याच्च शक्तितः ॥

इति (रुद्रयामलो-)क्तवचनेन सूतकेऽपि पारणविधानात् । गौडाख्यसम्प्रदायमभिप्रेत्य नवम्यामित्युक्तेः ।

तदुक्तं (प्रकटयोगिनीमते)

गौडाख्यसम्प्रदाये तु नवम्यां पारणं भवेत् ।

वर्जयेत् तां दिशा विद्धां काश्मीरे सैव शोभना ॥

केरलाख्ये सम्प्रदाये दशम्यामेव पारणमिति (शक्तिसङ्गमे-)ऽप्येवम् । सैव शोभनेति काश्मीरसम्प्रदाये दशमीविद्धैव नवमी प्रशस्तेत्यर्थः । गौडसम्प्रदायिभिस्तु नवम्यां दशमीयुक्तायां पारणं न कार्यम् ।

यो मोहाद्दशमीवेधे नवम्यां चण्डिकां यजेत् ।

पारणं च प्रकुर्याद्वै तस्य पुण्यं निरर्थकम्—इति तत्रैवोक्तम् ॥

यजनानिषेधस्तु पूर्वदिने कर्मार्हनवमीलाभे वेदितव्यः । दशम्यां पारणं कुर्यात्-इति मुण्डमालावचनं तु पुरश्चरणविषयम् । सम्प्रदायप्रभेदप्रयुक्तेतिकर्त्तव्यताभेदास्तु नवमतरङ्गे स्फुटीकृताः* ।

निर्णयसिन्धुकृतस्तु नवम्यां पारणं विधायकान्येतदादिवचनानि निर्मूलान्येव समूलत्वाभिमाने तु लोहाभिसारिकपराणि तस्याष्टमीपर्यन्तमेवोक्तेः ।

नवरात्रव्रतस्य नवमीपर्यन्तकर्त्तव्यताकतया दशम्यामेव नियमपारणा कार्येत्याहुः ।

अथेयं शारदी पूजा नित्या । अकरणे प्रत्यवायश्रवणादिति केचित् ।

शरदागमनिमित्तकत्वान्नैमित्तिकीत्यन्ये ।

नानाविधफलश्रुतेः काम्येत्यपरे ।

वस्तुतस्तु-

नित्यकाम्यरूपेयं न तु नैमित्तिकी ।

अन्यथा कार्यमात्रं प्रति कालस्य हेतुतया नित्यस्यापि कर्मणो नैमित्तिकत्वापत्तेरित्युक्तं (महाकालसंहितायाम्)

यथा ।

अधुना कथयिष्यामि सरहस्यं विशेषतः ।
शारदीयां च वासन्तीमर्चां नानाफलप्रदाम् ॥
मनीषिणो विदधति विचारानत्र भूयशः ।
स्मृत्यध्वचारिणः सर्वे कौलिकाः सर्व एव च ॥
त्रैविध्यमध्ये किंरूपा भवतीयं समर्हणा ।
यस्याकरणतः पापं जायते नित्यमेव तत् ॥
विधानाद्यस्य च फलं जायते काम्यमेव तत् ।
अननुष्ठानतो यस्य पापमुत्पद्यते परम् ॥
विधानाच्च फलं वाऽपि तन्नैमित्तिकमुच्यते ।
इयं या शारदी पूजा कथ्यते सा किमात्मिका ॥
केचित् काम्यां वदन्त्येनां केचिन्नैमित्तिकीमपि ।
पूर्वं फलश्रवणतः शरदागमनात् परे ॥

---

* द्रष्टव्यमस्यैव ग्रन्थस्य पृ० ८६६ ।

नित्यमेनामेव के चिद्वदन्ति कुलमार्गगाः ।

तथा ।

त्रिपुरघ्नाय यद्वाक्यं पुरोवाच सुरेश्वरो ।
शारदीयामिमां पूजां न करिष्यन्ति ये नराः ॥
ते पतिष्यन्ति निरये पापाः पूजापहारकाः ।
इत्यादिवाक्यान्नित्यत्वमभिधानादथ श्रुतेः ॥
घटते काम्यता चास्यास्तत्र हेतुं वदामि ते ।
अत्रापि चण्डिकावक्त्राम्बुजोद्भूतसुधासमम् ॥
वचः कलय कल्याणि काम्यताप्रतिपादकम् ।
शरत्कालीनपूजां ये कर्त्तारो भक्तिभाविताः ॥
तेषां दारान् सुतान् भोगं वित्तमारोग्यमुन्नतिम् ।
तुष्टा दास्याम्यहं शम्भो स्वर्लोके वसतिं सदा ॥
इत्थं नानाफलोल्लेखश्रवणात् काम्यताऽपि च ।
शरदागमनं हेतुमुपन्यस्यास्य ये बुधाः ॥
नैमित्तिकत्वं ब्रुवते न ते पण्डितबुद्धयः ।
कालो न स्यादुपादानकारणं कस्य वस्तुनः ॥
तदागमनहेतुत्वे नित्यस्यापि न नित्यता ।
अकृते जायते नैनः कृते च न भवेत् फलम् ॥
नैमित्तिकस्येदृशं हि ब्रुवाणैर्लक्षणं प्रिये ।
फलाद्याधायके किं नो दृश्येते वचने उभे ॥
तस्मादत्र हि विज्ञेयं नित्यकाम्यत्वमीश्वरि ।
यथा च शारदीयार्चा वासन्त्यर्चा तथैव च ॥
नानयोर्विद्यते भेदः स्वल्पोऽपि निगमादिषु ।

शारदोत्सवनिदानमाह ।

आसीत् पूर्वं महापूजा वासन्त्येव जगत्त्रये ।
रामरावणयोर्युद्धे जाते त्रेतायुगान्तरे ॥
कालिकाङ्गीतकृत्वेन हन्तुं रामोऽशकन्न तम् ।
ततो वै चिन्तितो भूत्वा ब्रह्मा सुरगणैर्वृतः ॥
कालिकां बोधयामास हिमालयकृतालयाम् ।
त्वदुपासकयोर्देवि युध्यतोर्घोरमाहवे ॥
अस्त्रशिक्षां लाघवं च समागत्यावलोकय ।
एवमभ्यर्थिता देवी अकाले बोधिता तथा ॥
जगाम ब्रह्मणा सार्धं लङ्कां द्रष्टुं रणं तयोः ।
शुक्लप्रतिपदीषस्य प्राप्ता तं देशमीश्वरी ॥
सप्तरात्रं निराहारं महद्युद्धमहर्निशम् ।
तयोर्दिव्यास्त्रप्रयोगसंहारपरयोरभूत् ॥
रामः शशाक नो हन्तुं राक्षसं काल्युपासकम् ।
स चापि नाशकद्रामं स्वयं विष्णुमुपागतम् ॥
समीक्ष्य राक्षसो बाहुबलं देवीं तुतोष ह ।
स्वभक्त इति कृत्वाऽस्मिन् पक्षपातं चकार च ॥
रक्षस्यनुग्रहं दृष्ट्वा ब्रह्मा सर्वैः सुरैः सह ।
संतुष्टाव स्तवैर्दिव्यैर्भक्त्या प्रणतकन्धरः ॥
काकूक्त्या प्रणिपातैश्च नमस्कारैः स्तवैरपि ।
तुष्टा ब्रह्माणमूचे सा हृत्स्थं वत्स वरं वृणु ॥
वरं वव्रे ततः सार्धं त्रिदशैश्च चतुर्मुखः ।
त्वत्पादयोर्भक्तमपि त्यजैनं दुष्टराक्षसम् ॥
मय्यनुग्रहलेशेन विष्णोर्मान्यतयाऽपि च ।

कृपादृष्ट्या च देवेषु धर्मसंस्थापनाय च ॥
त्रिलोकी जायतां सुस्था देवाः सन्तु मखाशिनः ।
तपस्तपन्तु मुनयश्चातुर्वर्ण्यं प्रवर्त्ततामू ॥
एष वीरजिताँल्लोकाञ्छत्रपूतश्च गच्छतु ।
पूजां प्रवर्त्तयिष्यामि तव देव्यमरैः सह ॥
तिथिमाद्यां समारभ्य यावद्रक्षोवधो भवेत् ।
दिनानि नव ते पूजा भविष्यति जगत्त्रये ॥
नवम्यां निहते वीरे रावणे विश्वकण्टके ।
प्रीतिमुत्पादयिष्यामः प्रभूतवलिभिस्तव ॥
अपरेऽह्नि दशम्यां ते नीराजनमहोत्सवम् ।
गीतैर्नृत्यैस्तथा वाद्यैर्जलकर्दमकेलिभिः ॥
अश्लीलवेशवचनैः शस्त्रास्त्ररचनैरपि ।
रथद्विरदवाहानां सज्जनाविधिभिस्तथा ॥
सुराः प्रवर्त्तयिष्यन्ति मनुष्याश्च महीतले ।
भक्तोऽयं रावणो यद्वत् पादयोस्तव कालिके ॥
रामो भविष्यति तथा सदैव तव पूजकः ।
मन्त्रः कोऽपि च ते देवि रामोपासितसंज्ञया ॥
सद्यस्तव प्रीतिकरः ख्यातिं जगति यास्यति ।
इत्युक्त्वा ब्रह्मणा काली बभूवास्य पराङ्मुखी ॥
ततो जघान दिव्यास्त्रै राघवो रावणं रणे ।
तत आरभ्य देवेशि शारदार्च्चा प्रवर्त्तिता ॥
अत एव द्वयो कार्या वासन्ती शारदी तथा ।
केषांचिदपि वासन्त्यां मतभेदो न विद्यते ॥

शारद्यां तु त्रयो भेदाः कथ्यन्ते ते मयाऽधुना ।
आश्विनाशितपक्षस्य नवमी या शिवर्क्षयुक् ॥
बोधयित्वेश्वरीं तस्यां शरदर्च्चनमाचरेत् ।
यावत् स्यान्नवमी शुक्ला तावत् पूजा प्रवर्त्तते ॥
इत्येकः पक्ष उदितो द्वितीयमवधारय ।
प्रतिपद्येव शुक्लायां बोधयित्वा सुरेश्वरीम् ॥
अभ्यर्च्चयेन्नवाहानि तन्त्रपौराणिकक्रमैः ।
उदीरितो द्वितीयोऽयं तृतीयं कथयाम्यथ ॥
सायाह्ने विल्वशाखायां षष्ठ्यां देवीं प्रबोधयेत् ।
प्रातः प्रवर्त्तते पूजा सप्तम्यादिदिनत्रये ॥
त्रैविध्य ईदृश्यर्च्चाया विवदन्ते मिथो बुधाः ।
ब्रवीमि तत्र सिद्धान्तं छिन्नं येन तमो भवेत् ॥
रम्भकल्पे पुरा देवी रम्भासुरतनूद्भवम् ।
अष्टादशभुजा भूत्वा महाघोरतराकृतिः ॥
उग्रचण्डा स्वरूपेण जघान महिषासुरम् ।
सितेन करवालेन मृतमेनं जहौ तथा ॥
पतितं च क्षितावस्य व्यशीर्यत कलेवरम् ।
नीललोहितकल्पे तु पुनरेव व्यजायत ॥
उद्वेगकृद्देवतानां तथा यज्ञविनाशकृत् ।
इति कृत्वा महामाया भद्रकाली वपुर्धरा ॥
सम्भूय षोडशभुजा विशिषेण शितेन हि ।
अवधीत् तं पुनश्चापि तत्याज गलितं भुवि ॥
श्वेतवाराहकल्पादावजायत पुनः स हि ।

जैगीषव्यप्रसादेन पूर्वजातिस्मरोऽभवत् ॥
वारद्वयं हतं ज्ञात्वा देव्यात्मानं पुराऽसुरः ।
स्त्रीवध्यतां च विज्ञाय स्वस्यामुष्यां जनावपि ॥
कात्यायनमुनेः शापात् स्वप्नदर्शनतोऽपि च ।
एकान्ते भक्तिमास्थाय त्रिविधां महिषासुरः ॥
आराधयामास कालीं स्वोदर्कपरिशुद्धये ।
दिव्यद्वादशसाहस्रवर्षानन्तरमीश्वरी ॥
प्रत्यक्षमागता तस्य वरं वृण्विति चाब्रवीत् ।
ततोऽसुरः स ऊचे तां निरीक्ष्य पुरतः स्थिताम् ॥
वरं पश्चाद्ग्रहीष्यामि देवि त्वत्तो मनोगतम् ।
आदौ मे संशयं छिन्धि जागरूकं हृदि स्थितम् ॥
वारद्वयं मामवधीः सुरारिरणमूर्धनि ।
धृत्वा कां कामाकृतिं त्वमघोरामथ भीषणाम् ॥
जन्मन्यस्मिन्नपि पुनः केनाकारेण कालिके ।
मां हनिष्यसि दुर्वृत्तं निखिलामरकण्टकम् ॥
निशम्येदृग्वचस्तस्य विहस्य जगदम्बिका ।
चालयन्ती शिरः किञ्चिदुवाच मधुराक्षरम् ॥
मदीयतादृशाकारदर्शनेन फलं तव ।
किं भविष्यति दैत्येन्द्र किन्तु त्रासमवाप्स्यसि ॥
दिदृक्षसे चेदथ तां करालामाकृतिं मम ।
पश्येत्युक्त्वा जगद्धात्री विहाय ललितं वपुः ॥
उग्रचण्डा तनूरूपं दर्शयामास दानवम् ।
ज्वालाकरालवदनमष्टादशभुजान्वितम् ॥

दिव्यशस्त्रास्त्रकलितं मुण्डमालाभयङ्करम् ।
विदीर्णसृक्कयुगलं घोरदंष्ट्रातिभीषणम् ॥
चलत्सौदामिनीतुल्यरसनं नाददारुणम् ।
तद्रूपं दितिजो वीक्ष्य न्यमीलयत लोचने ॥
कृताञ्जलिपुटो भूत्वा प्रत्युवाच च कालिकाम् ।
घोरमीदृशमाकारं न शक्नोमि तवेक्षितुम् ॥
त्रैलोक्यत्रासनं रूपं देवि संहर संहर ।
इत्युक्त्वाऽसुरराजेन पुनः सा प्राकृतं वपुः ॥
कृत्वा तं दर्शयामास ततः सुस्थो बभूव सः ।
भद्रकाली वपुर्भूत्वा पुनः सा परमेश्वरी ॥
निरीक्षयामास रूपं द्वितीयं जीवनापहम् ।
तद्रूपदर्शनेऽप्येष पुनस्त्रासमुपेयिवान् ॥
तस्यापि परिवृत्तौ स प्राकृतः सम्बभूव ह ।
गतभीरथ तां देवीमुवाच दितिजाधिपः ॥
ईदृशाकारधारिण्या कथं देवि त्वया सह ।
समरे योद्धुमशकमहं वरमदोद्धतः ॥
गरुत्मता सह यथा डुण्डुभस्य रणस्पृहा ।
दावाग्निना पतङ्गानां तिमिरस्य च भास्वता ॥
मृगाणां हरिणा चैव द्रुमाणां वायुना तथा ।
भेकानामहिना चापि प्राणिनां शमनेन च ॥
तद्वद्भवत्या समं मे कथमासीन्महाव्रणः ।
यदतीतमतीतं तदिदानीं ते वरत्रयम् ॥
वृणेऽहं मम तद्देहि मनोरथपदातिगम् ।

एकं सौम्याकारधरा भूत्वाऽस्मिन् जन्मनीश्वरि ॥
त्वं मां वधिष्यसि त्राण हेतोरध्वरभोजिनाम् ।
द्वितीयं ते मच्छिरसि वामपादाम्बुजं सदा ॥
स्थास्यति प्राणयुक्तस्य पश्यतस्त्वन्मुखच्छविम् ।
तृतीयं देवि यज्ञस्य भागं प्राप्नोमि कं चन ॥
इत्येवमुक्ते महिषे वचनेन सुरारिणा ।
उवाच सस्मितं देवी भक्तिप्रणतकन्धरम् ॥
दैत्येन्द्र श्रृणु मद्वाक्यं यथार्थं मधुराक्षरम् ।
रम्भासुरस्ते जनकस्तपस्तप्त्वा सुदारुणम् ॥
शङ्करं तोषयामास रम्भकल्पे हिमालये ।
वच ऊचे हरस्तुष्टो महाभाग वरं वृणु ॥
हित्वा सोऽन्यवरं वव्रे भवान् पुत्रो भवत्विति ।
भक्त्या नियन्त्रितः कार्यगतित्वात् स महेश्वरः ॥
वरं ददौ स आत्मानं पुत्राकृतमनुष्ठ्य हि ।
तस्माज्जातो हि महिषीगर्भे त्वं काममोहितात् ॥
साक्षात् त्वं रुद्र एवासि न सामान्या हराकृतिः ।

तथा ।

शिवस्त्वं वरदानेन रम्भस्य सुततां गतः ।
मन्वन्तरत्रयं साग्रं भुक्तवाँश्च जगत्त्रयम् ॥
अतः परं न वस्तव्यं त्वया दितिजदेहिना ।
स्वपुरं प्रति गन्तव्यं मम लोकादधः स्थितम् ॥
कात्यायनस्य शापाच्च शिरश्छेदनहेतुकात् ।
युक्तकाले स्थास्यति नो भक्तिरेतादृशी तव ॥
कपोतशापादीदृक्षादित्युक्ताः पञ्च हेतवः ।

महिषायेदृशं दत्वा वरमुक्त्वा पुरा कथाम् ॥
सपत्न्यन्तर्दधे काली वर्षासु चपला यथा ।
देव्यामन्तर्हितायां स सर्वं विस्मृतवान् क्षणात् ॥
बभूव पूर्ववद्दुष्टो यज्ञदेवद्विजन्मनाम् ।
प्रणष्टा भक्तिरस्यापि देव्यामव्यभिचारिणी ॥
पूर्वदत्तमतिर्भ्रष्टा ज्ञानमन्तर्हितं चरेत् ।
इति ते कथितो देवि वृतान्तः पूर्वसम्भवः ॥
सिद्धान्तमनयोर्बोद्धुं रीत्या शक्त्या विचक्षणात् ।
सिद्धान्तनिर्णयकृते कथिताऽऽख्यायिकाऽप्यसौ ॥
इयं हि शारदी पूजा मूर्त्तिभेदात् त्रिधा मता ।
तत्तद्द्रव्यमधिष्ठाय नृणां गृह्णाति सार्च्चनम् ॥
येऽष्टादशभुजां देवीमुग्रचण्डाभिधां प्रिये ।
पिपूजयिषवो मर्त्त्यास्तदुपासकतामिताः ॥
तथाऽऽश्विननवम्यां वै कृष्णायां सुसमाहिताः ।
करवाले बोधयेयुर्मध्याह्ने शङ्खनिःस्वनैः ॥
खगानजान् वा महिषानेणान् वाऽन्यवलीनपि ।
रीतिं संकलितां कृत्वा दद्युः षोडशवासरान् ॥
एषाऽऽद्या महिषालम्भकर्त्तृपूजाविधिर्मतः ।
अथ माध्यमिकः पक्ष इषस्याद्यतिथौ सिते ॥
प्रातः पटहनिःस्वानैः सढक्कानकगोमुखैः ।
ईश्वरीं षोडशभुजां भद्रकालीति नामिकाम् ॥
सम्बोध्य ये पूजयेयुर्दिनानि नव वै प्रिये ।
अपूपमोदकप्रायवलिसंकलितक्रमैः ॥

तृतीयः पक्ष ईदृक्ष उदितस्त्रिपुरारिणा ।
अश्वयुक्सितषष्ठ्यां वै शाखायां विल्वशाखिनः ॥
सायंकाले बोधयित्वा वाद्यैरुच्चावचोद्धतैः ।
दुर्गादेवीमर्च्चयीत सप्तम्यादिदिनत्रये ॥
दशबाहुधरां देवीं महासौन्दर्यशालिनीम् ।
रीतिसंकलिते पात्रे विल्वपत्रस्य कीर्त्तिता ॥
अथ वा करवीरस्य शक्त्या च महिषाजयोः ।
स्वस्वशक्त्यनुसारेण सर्वमन्यत् प्रकीर्त्तितम् ॥
होमो जपः कुमार्यर्चा साधकानां च भोजनम् ।
उपोषणमथो मौनं प्रभूतफलहेतवे ॥
हननात् खड्गबाणाभ्यां तत्र तत्र तु बोधनम् ।
आविर्भावो विल्वतरोरत्र बोधनमाचरेत् ॥
तत्तन्नक्षत्रलाभे तु फलभूमा प्रजायते ।
नक्षत्राणामलाभे तु केवलायां तिथौ चरेत् ॥
सत्यां शक्तौ चतुर्थ्यां वै देव्याः केशं विमोचयेत् ।
तत्र पूजा विधातव्या महाविभवविस्तरैः ॥
उद्वर्त्तनं कण्टकिकां केशबन्धनडोरकम् ।
नखरञ्जं शलाकां च सिन्दूरालक्तकज्जलम् ॥
सुगन्धितैलोष्णजलपिष्टातामलकादिकम् ।
दद्याद्देव्यै विशेषेण भक्तिभावेन पार्वति ॥
पूजायाः कथितं चात्र द्वैविध्यं मुनिपुङ्गवैः ।
पौराणिकं तान्त्रिकं च कालिकाप्रीतिसिद्धये ॥
श्रुतध्वजाय प्राङ्नन्दिकेश्वरेण यदीरितम् ।

तद्धै बहुलविस्तारं शारदीयार्च्चनं मतम् ॥
यद्देव्या स्वयमाख्यातं कपिलाय महर्षये ।
तन्नातिबहुलं नातिस्वल्पं मध्यममुच्यते ॥
यदौर्वेण समाख्यातं सगराय महीभृते ।
तद्विज्ञेयं सुरेशानि कनीयः शरदर्च्चनम् ॥
तान्त्रिकं बहुतन्त्रोक्तं सर्वैः स्वस्वमतागतम् ।
यो येनैव क्रमेणैतां शरदर्च्चां वरानने ॥
विधत्ते स समाप्नोति फलं तत्तत्क्रमेण हि ।
इयं हि पूजा द्विविधा पौराणी तान्त्रिकी तथा ॥
तान्त्रिके कौलिकी रीतिः पुराणे वैदिकी मता ।
यद्येभ्यो रोचते देवि प्रतिनन्दति ते हि तत् ॥
अथ पूजा प्रकर्त्तव्या केषु केषु स्थलेषु हि ।
तत्रोत्तरं ते वदामि शृणुष्वावहिता सती ॥
तैजसे प्रतिमा यन्त्रेऽथ वा माहेयदारवे ।
शैलेय अथ वा देवि धातवे गिरिसम्भवे ॥
विल्ववृक्षःपत्रिका च घटः पूर्ववदीरितः ।
गोमयेनोपलिप्तं वा स्थण्डिलं जगदीश्वरि ॥
सिन्दूराङ्के मण्डलं वा शूलखड्गशरास्तथा ।
पुस्तकं वा चित्रपटं सर्वतोभद्र एव वा ॥
अनादिपीठं च तथा शिवलिङ्गं तथैव च ।
जलमग्निस्तथा खातनृकरोटिस्थलं शुभम् ॥
एवमादीनि चान्यानि स्थानान्यर्च्चनहेतवे ।
पत्रिकाश्च परिज्ञेयाः कदलीविल्वदाडिमाः ॥

हरिद्राशोककच्चौ च जयन्ती धान्यमालिनी ।

(भविष्येऽपि)

रम्भा कच्ची हरिद्रा च जयन्ती बिल्वदाडिमौ ।
अशोको मानकश्चैव धान्यानि नव पत्रिकाः ॥

(महाकालसंहितायाम्)

एकाशीतिपदं चक्रं सर्वतोभद्रमण्डलम् ।
भित्तौ चित्रीकृता देवी पूजिता फलदायिनी ॥
अष्टम्यां तु विशेषेण पूजा कार्याऽत्र पार्वति ।
प्रभूतवलिदानं तु नवम्यां होम एव च ॥
अष्टमीनवमीसन्धौ विशेषात् पूजनं चरेत् ।
नवम्यां वलिदानानु कुमारीपूजनं तथा ॥
दिनत्रयेऽपि च महादेव्याः स्नानं प्रकल्पयेत् ।

तथा ।

उपवासं तथा कुर्यादष्टम्यां कालिकामुदे ।
सिद्ध्यर्थं स्वाभिलाषाणां तथाऽन्येषां च शर्मणाम् ॥
किन्तु पुत्री न कुर्वीत कृते पुत्रो विनश्यति ।
स्त्र्युपयोगीनि वस्तूनि रत्नादीनि यानि हि ॥
तानि देव्यै प्रदेयानि विभवाद्यनुरूपतः ।
तिथौ शुक्लप्रतिपदि कृत्वोपक्रममीश्वरि ॥
षष्ठेऽह्नि सायंसमये कृतनित्यक्रियो दिवा ।
बोधयेद्बिल्वशाखायां देशिकः परमेश्वरीम् ॥
सङ्कल्पं पुरतः कृत्वा स्वस्तिवाचनपूर्वकम् ।
सराशिमासपक्षस्य तिथेरुल्लिखनक्रमात् ॥
सगोत्रनामोच्चरणं यजमानो विधाय हि ।

दुर्गाबोधनकर्माहं करिष्ये इति कीर्त्तयेत् ॥
भूतशुद्धिं ततः कृत्वा षडङ्गं सर्षि तत्परम् ।
आवाह्य विल्वशाखायामथ वा मूर्त्तिपीठयोः ॥
उपचारैः षोडशभिर्मूलमन्त्रेण देशिकः ।
पूजयित्वा जगद्धात्रीमर्धमस्तमिते रवौ ॥
विल्ववृक्षं च सम्पूज्य गन्धपुष्पाक्षतादिभिः ।
शङ्खतूर्यनिनादैश्च मुरजध्वनिगीतिभिः ॥
बोधयेत् स्तुतिसंलापैर्वन्दीव वसुधाधिपम् ।
प्रोच्यमानं समुच्चार्य मन्त्रं संचालयेच्छिवाम् ॥
तारमैधे शाकिनी च कूटं स्वप्नावतं तथा ।
त्रिसन्धिभगवत्युक्त्वोत्तिष्ठ द्वयमुदीरयेत् ॥
निद्रां जहि युगं चापि प्रतिबुद्धयस्व च द्वयम् ।
मम शत्रून् हन द्वन्द्वं पातय द्वितयं तथा ॥
लज्जा रमा डाकिनी च फट्स्वाहा तदनन्तरम् ।

तारः प्रणवः । मैधं वाग्भवम् । शाकिनी फ्रेँ । स्वप्नावतीकूटम् ख्स्ह्क्ष्म्ल्रीँ । डाकिनी ख्फ्रेँ ।

तन्त्रान्तरे तु श्लोकरूपा मन्त्रा उक्ताः ।

यथा ।

रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयामि वै ।
शक्रेणापि च सम्बोध्य राज्यं प्राप्तं सुरालये ॥
तस्मादहं त्वां प्रति बोधयामि विभूतिराज्यप्रतिपत्तिहेतोः ।
यथैव रामेण हतो दशास्यस्तथैव शत्रुं विनिपातयामि-इति ॥

तथा ।

षष्ठ्यां सायं प्रकुर्वीत विल्ववृक्षेऽधिवासनम् ।

(महाकालसंहितायाम्)

रजन्याद्ये मुहूर्त्ते तु चण्डिकामधिवासयेत् ।
सुगन्धितैलपाताभ्यां पञ्चभिर्गन्धजातिभिः ॥
पुष्पजातिविशेषैश्च तावद्भिरधिवासयेत् ।
सर्वमाङ्गल्यवस्तूनि विधायैकत्र भाजने ॥
प्रशस्तवदनं देव्याः कारयेत् तदनन्तरम् ।
समांसमीनसिद्धान्नबलिं भूतेभ्य उत्सृजेत् ॥
गीतवाद्यैश्च नाद्यैश्च नमस्कारैश्च जागरैः ।
देवीं सन्तोष्य वचनैर्व्याजस्तुत्याद्यनिन्दनैः ॥
सिद्धार्थकैर्मन्त्रपाठपूर्वं रक्षां विधाय च ।
पूर्ववत् सर्वमाभाष्य मासपक्षतिथिक्रमैः ॥
शरत्कालीनपूजाङ्गं ततश्च कृत्यपत्रिकाः ।
अथ वा प्रतिमापीठयन्त्रस्थापनकर्मणि ॥
दुर्गादेव्या गन्धपुष्पपट्टवासस्त्रगादिभिः ।
अधिवासनकर्माहं कुर्वीयेत्यभिजल्प्य वै ॥
पूर्ववद्भूतशुद्धिं च सर्षिं करषडङ्गकम् ।
प्राणायामत्रयं चापि कृत्वाऽर्घस्थापनं चरेत् ॥
गणेशमथ दिक्पालान् मातृग्राहाँस्तथैव च ।
वटुकान् क्षेत्रपालाँश्च द्वाराध्यक्षाँश्च योगिनीः ॥
शक्त्योपचारैः सम्पूज्य पत्रिकापीठमूर्त्तिषु ।
आवाह्य देवीमिष्टां च मूलमन्त्रोपचारकैः ॥
शताहरिद्रातैलानि एकीकृत्य समानि हि ।
चैतन्यकमलालज्जागन्धचारैरुडस्त्रकम् ॥

उच्चार्य दद्यादलिके शिरस्यपि च पादयोः ।
ततः कुङ्कुमकर्पूरकस्तूरीमलयोद्भवैः ॥
एकीकृतैर्डाकिनीहृन्मन्त्रैस्तान्येव भूषयेत् ।
विल्वपत्रजवापद्मकरवीरापराजिताः ॥
एकीकृत्यार्पयेन्मूर्ध्नि वदन्मदनमस्तके ।
माल्यैरापूरयेद्यन्त्रं प्रतिमां पत्रिकामपि ॥
शङ्खोनोसवदौ क्रौडौ मृत्तिकामलयोद्भवः ।
गोरोचनाधान्यदूर्वादृषत्सिन्दूरकज्जलम् ॥
हरिद्रास्वस्तिकालक्तदध्यक्षतफलाम्बुजम् ।
धूपदीपौ मधुघृतं कुमारीकरतन्तवः ॥
घनसारो मृगमदं कक्कोलं कुङ्कुमं तथा ।
महौषधिगणाः सिद्धार्थफलं स्वर्णमणी तथा ॥
रौप्यं व्याघ्रनखोऽम्भोजं विष्णुक्रान्ताऽपराजिता ।
एवमादीनि माङ्गल्यद्रव्याण्युक्तानि यानि वै ॥
एकस्मिन् भाजने तानि एकीकृत्य पृथक् पृथक् ।
देव्याः शिरो वक्षसि च तारमैधत्रपाशिरः ॥
प्रोच्चरन् समनुत्तोल्य त्रिवारं स्पर्शयेच्छनैः ।
भूतादिभ्यो वलिं दद्यात् तत्तद्वीजं पुरः स्मरन् ॥
तत्तन्नामाभ्यसन्तं च सन्धिनैष वलिर्नमः ।
दशदिक्षु क्षिपेच्चापि राजिकाश्वेतसर्षपौ ॥
ताराद्रक्षयुगं चास्त्रं शिरः कूर्चोऽन्तिमे तथा ।
* वर्णैश्चतुर्भिः संवेष्ट्य ताँश्च कल्माषतन्तुभिः ॥

---

* बाणैरिति ४-५ पु० पा० ।

अन्नाण्यस्याः पुरः कृत्वा जागृयात् सकलां निशाम् ।

इति षष्ठीकृत्यम् ।

अथ सप्तमीकृत्यं तत्रैव ।

अथो उषसि सप्तम्यां कृतनित्यक्रियो बुधः ।
पूर्ववद्बिल्वशाखायां देवीमभ्यर्च्य मानवः ॥
शितां गृहीत्वा छुरिकां मन्त्रमेनं समुच्चरेत् ।
फलद्वययुतां शाखां छिन्द्याद्बिल्वस्य साधकः ॥
चैतन्यं प्रणवं माया रोषरावौ च डाकिनी ।
इमां शाखां छिन्धि युगं छेदय द्वितयं तथा ॥
अस्त्रयुग्मं शिरश्चापि गृहीत्वा तां करद्वये ।
बद्धाञ्जलिश्चतुर्मन्त्रान् पठेत् पौराणिकान् प्रिये ॥
मेरुमण्डलकैलाशहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्षस्त्वमम्बिकायाः सदा प्रियः ॥
श्रीशैले शिखरे जातः श्रीफलः श्रीनिकेतनः ।
नेतव्योऽसि मया गच्छ पूज्यो दुर्गास्वरूपतः ॥
विल्ववृक्ष महाभाग सदा त्वं शङ्करप्रिय ।
गृहीत्वा तव शाखां हि देवीपूजां करोम्यहम् ॥
शाखाछेदोद्भवं दुःखं न च कार्यं त्वया तरो ।
देवैर्गृहीत्वा शाखां ते पूजिताऽम्बेति विश्रुतिः ॥
पुनरन्यत् पद्यरूपं मन्त्रं ब्रूयाच्च साधकः ।
पुत्रायुर्धनवृद्ध्यर्थं नेष्यामि त्वामुमाप्रियाम् ॥
विल्वशाखां समाश्रित्य राज्यं देवि प्रयच्छ मे ।
आगच्छ चण्डिके देवि सर्वकल्याणहेतवे ॥
कात्यायनि गृहाणार्चां नमस्ते शङ्करप्रिये ।

ततः पूर्वोदिताश्चान्या आहरेदष्ट पत्रिकाः ॥

तन्त्रान्तरे ।

पत्रिकास्ताः समानीय गीतवाद्यपुरःसरम् ।
ब्रह्मघोषादिभिः सार्धं नीत्वाऽन्यस्येद्गृहाङ्गणे ॥

(महाकालसंहितायाम्)

ता एकीकृत्य लतयाऽपराजितसमाह्वया ।
संवेष्ट्य वसनेनापि पूजासङ्कल्पमाचरेत् ॥
पूर्ववत् सर्वमुच्चार्य पत्रिकापीठमूर्त्तितः ।
ततश्च स्थापनमहं करिष्ये इति कीर्त्तयेत् ॥
पत्रिकायां तथा मूर्त्तौ खड्गे वा *यन्त्रमूर्त्तयोः ।
देवीमावाह्य सम्पूज्य विल्वपत्राञ्जलित्रयम् ॥
दत्वा शक्तौ प्रकुर्वीत देव्याः स्नानं महोत्तरम् ।
तद्वै पौराणवैदिक्यमपि संकीर्त्तयामि ते ॥
शक्तौ दिनत्रयं कुर्यादशक्तौ तु दिनद्वयम् ।
सर्वाभावे नवम्यां तु स्नानमावश्यकं मतम् ॥
कुर्यादत्रापि सङ्कल्पं काम्यमेतद्यतः प्रिये ।
शतजन्मकृतात् पापान्मोचने प्रथमं स्मृतम् ॥
तथा चाष्टसहस्राब्दावच्छिन्नपदतः खलु ।
दुर्गालोकस्थितिरिति शतयज्ञफलाप्तियुक् ॥
नवाऽपि पत्रिका शुद्धतोयेन स्नापयेत् ततः ।
प्रत्येकं तत्तदाख्याभिर्मूर्त्तौ नाम्ना धियाऽपि च ॥
मन्त्राणां पद्यरूपाणामादौ तारस्त्रपा स्मरः ।
रमा मैधं रावरौषौ डाकिन्यष्ट च वै नव ॥

---

* यन्त्रकुम्भयोः-इति २-१, पु० पा० ।

प्रत्येकं देवि देयानि तान्त्विकस्नापनक्रमे ।
कदलीतरुसंस्थाऽसि शम्भुवक्षःस्थलस्थिते ॥
स्नापयाम्यद्य पत्रि त्वां नमस्ते हरवल्लभे ।
कच्चित् त्वं स्थावरीभूता सद्यः सिद्धिविधायिनी ॥
दुर्गारूपेण सर्वत्र स्नानेन विजयं कुरु ।
हरिद्रे हर दुःखानि शङ्करस्य सदा प्रिये ॥
रुद्ररूपाऽसि देवि त्वं सर्वशान्तिं प्रयच्छ मे ।
जयन्ती जयरूपाऽसि जगतां जयकारिणी ॥
स्थापयामीह देवि त्वां जयं देहि गृहे मम ।
श्रीफल श्रीनिकेतोऽसि सदा विजयवर्धन ॥
देहि मे धर्मकामार्थान् प्रसन्नो भव सर्वदा ।
दाडिम्यघप्रणाशाय क्षुन्नाशाय तथा नृणाम् ॥
निर्मिताऽसि पुरा धात्रा प्रसीद त्वमुमाप्रिये ।
स्थिरा भव सदा लोके दुर्गेशोकविनाशिनि ॥
मया त्वं पूजिता नित्यं स्थिरा भव हरप्रिये ।
ब्राह्मेषु मानो मानेषु माननीयः सुरासुरैः ॥
स्नापयामि महादेवीं मानं देहि नमोऽस्तु ते ।
लक्ष्मीस्त्वं धान्यरूपाऽसि प्राणिनां प्राणदायिनी ॥
स्थिराऽत्यन्तं हि नो भूत्वा गृहे कामप्रदा भव ।
ततो द्वित्रिनदीतोयं कृत्वा कलशगर्भगम् ॥
चन्दनालोडितं चापि स्नापयेत् तेन चण्डिकाम् ।
शीता चालकनन्दा च चक्षुर्भद्रादृषद्वती ॥
तुङ्गभद्रा कृष्णवर्णा पयोष्णी नर्मदा तथा ।

तापी भीमरथी सिप्रा *वितस्तैरावती तथा ॥
गोदावरी विपासा च शतद्रुः सिन्धुरेव ।
चर्मण्वती च कावेरो ताम्रपर्णी महानदी ॥
करतोया बाहुदा च शोणा वेत्रवती तथा ।
देविका भैरवः कोका गोमती चोत्पलावती ॥
आत्रेयी भारती गङ्गा यमुना च सरस्वती ।
सरयूर्गण्डकी चापि [†]श्वेतगन्धा च कौशिकी ॥
भोगवती च पाताले स्वर्गे मन्दाकिनी तथा ।
एताश्चान्याश्च या नद्यो भाषिता याश्च नेरिताः ॥
देवखातानि तीर्थानि कूपा निर्झरसंज्ञकाः ।
सरांसि सिन्धवश्चापि सम्भेदा ये च भूतले ॥
सर्वे त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा संकर्षणः प्रभुः ॥
प्रद्युम्नश्चानिरुद्धश्च भवतीं स्नापयन्त्विमे ।
ख्याता ये द्वादशादित्या रुद्रा एकादशापि च ॥
मरुतश्चोनपञ्चाशद्वसवोऽष्टर्त्तवश्च षट् ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः स्नापयन्त्वमी ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा रतिः ।
बुद्धिर्लज्जा क्रिया शान्तिस्तुष्टिः कान्तिश्च मातरः ॥

---

* वित्तरैरावतो इति ४ पु० पा० ।

† श्वेतगङ्गा-इति २-३-५ पु० पा० ।

एतास्त्वामभिषिञ्चन्तु शक्तिरूपधरास्तव ।
आदित्यश्चन्द्रमा भौमबुधजीवसितार्कजाः ॥
राहुः केतुश्च भवतीं स्नापयन्तु ग्रहा नव ।
ऋषयो मनवो गावो देवमातर एव च ॥
देवपत्न्योऽध्वरा नागा दैत्याश्चाप्सरसां गणाः ।
त्रिशूलचक्रचापर्ष्टिभुशुण्डी परिघो गदा ॥
कुन्तमुद्गरखट्वाङ्गशक्तितोमरपर्शवः ।
पट्टिशो मुद्गलः प्रासभिन्दिपालकटङ्ककाः ॥
हूता शतघ्नी कुलिशपाशकर्त्तृहलानि च ।
चत्वार ऋग्यजुःसामार्थर्वणो निगमा हि ये ॥
अङ्गानि शिक्षा कल्पश्च छन्दो व्याकरणं तथा ।
निरुक्तं ज्यौतिषं चापि पुराणान्यखिलानि च ॥
मीमांसान्यायवेदान्ताक्षपात्साङ्ख्यपतञ्जलाः ।
स्मृतिशास्त्राणि सर्वाणि दण्डनीतिर्विधाऽपि च ॥
गन्धर्वायुर्धनुर्वेदाश्चतुःषष्टिश्च याः कलाः ।
अस्त्राणि सर्वशस्त्राणि वाहनानि नृपास्तथा ॥
औषधानि च सर्वाणि शिल्पविद्यादिकानि वा ।
मुक्तामाणिक्यवैदूर्यवज्रेन्द्रमणयस्तथा ॥
गोमेदपद्मरागौ च प्रवालः श्याम एव च ।
रत्नानि यानि चान्यानि कालस्यावयवाश्च ये ॥
मन्वन्तराणि सर्वाणि चत्वार्यपि युगानि हि ।
अब्दमासर्त्तुपक्षाहोरात्रायनकलालवाः ॥
राशिनक्षत्रयोगाश्च कलांशाश्चापि सूक्ष्मकाः

सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥
*सिन्धुरैवतशोणाद्या ये ह्रदा भुवि विश्रुताः ।
सर्वे सुमनसो भूत्वा भृङ्गारैः स्नापयन्तु ते ॥
तक्षकाद्याश्च ये नागाः पातालतलवासिनः ।
स्नापयन्तु जगद्धात्रि भृङ्गारैस्त्वां सुवासितैः ॥
अथ द्रव्यविशिषेण मन्त्रभेदान् ब्रवीमि ते ।
पौराणानपि तान्वीयान्महास्नापनकर्मणि ॥
सर्वेषामधिपो देव ईशानो नाम नामतः ।
शूलपाणिर्महादेवः स त्वां संस्नापयेत् प्रभुः ॥
स्नापयेच्छङ्खतोयेन मन्त्रमेनमुदीरयेत् ।
मन्दाकिन्यास्तु यद्वारि सर्वपापहरं परम् ॥
स्वर्गस्रोतःसमुद्भूतं स्नानं भवतु तेन ते ।
गाङ्गेन वारिणा देवीं स्नापयेन्मनुनाऽमुना ॥
उष्णं सुखस्पर्शकरं ज्योतिर्वह्निसमन्वितम् ।
मलापहारकं कल्यं तेन स्नानं समाचर ॥
स्नापयेत् पाथसोष्णेन पठन्मन्त्रमसुं प्रिये ।
गन्धाढ्यं शोभनं चैव शीतलं सुमनोहरम् ॥
सर्वपापहरं तोयं तत् ते स्नानाय कल्पताम् ।
अमुनाऽऽमोदिसलिलकुम्भेन स्नापयेच्छिवाम् ॥
पुण्यं पवित्रं स्वच्छं च शीतलं स्वादु यज्जलम् ।

---

* सिन्धुभरैव-इति २-३-५ पु० पा० ।

स्नानाय कल्पतां तत् ते तथैव श्रमशान्तये ॥
मेध्याच्छशीतलाम्भोभिः स्नापयेदमुनेश्वरीम् ।
गावः पवित्रा ह्यनघा गावो विश्वस्य मातरः ॥
गावोऽध्वराणां धात्र्यश्च गोषु सर्वं प्रतिष्ठितम् ।
तदङ्गप्रसृतैः पञ्चगव्यैस्त्वां स्नापयाम्यहम् ॥
इति सामान्यतो मन्त्रं पठित्वा तदनु प्रिये ।
प्रत्येकं पञ्चगव्येन स्नापयेज्जगदम्बिकाम् ॥
गवां मूत्रेण पुण्येन सर्वाघपरिमोषिणा ।
स्नापयामि जगद्धात्रीं पुत्रायुर्धनवृद्धये ॥
एतेन स्नापयेद्देवीं गोमूत्रेण शनैः शनैः ।
पवित्रताकरं भूमेर्विभूतेः कारणं परम् ॥
गोमयं सर्वपापघ्नं तेन त्वां स्नापयाम्यहम् ।
मन्त्रमेनं पठेद्देवीं स्नपायेद्गोमयाम्भसा ॥
यद्गवामङ्गसम्भूतं हविषः कारणं हि यत् ।
दधि तत् तेऽङ्गलावण्यकरणाय भवत्विदम् ॥
दध्नाऽधुना भगवतीं स्नापयेद्देशिकोत्तमः ।
यज्ञक्रियाकलापोऽयं सर्वो यस्मिन् प्रतिष्ठितः ॥
पयसा तादृशेन त्वां स्नापयामि हरप्रियाम् ।
गृणन्मनुं गव्यदुग्धैः स्नापयेज्जगदम्बिकाम् ॥
यद्धोमसाधनत्वेन प्रथितं निगमादिषु ।
यच्चाप्यग्निमुखेनैव भुञ्जते निखिलाः सुराः ॥
यस्मात् पवित्रं नैवास्ति बलवीर्यकरं च यत् ।
तेन त्वां स्नापयाम्यद्य गव्येन हविषेश्वरीम् ॥

कालीममूभ्यां मन्त्राभ्यां घृतेन स्नापयेद्बुधः ।
एकीकृत्य ततः पञ्चगव्यानि सकलानि हि ॥
तथाऽनामिकयाऽऽलोड्य कुशमूलेन वा प्रिये ।
यस्मात् परं नापरमस्ति मेध्यं देहे गतं यद्वृजिनं निहन्ति ।
नास्ते परं हव्यमतस्तदेतत् स्नानाय भूयात् तव पञ्चगव्यम् ॥
स्नापयेत् पञ्चगव्येन मन्त्रेणानेन कालिकाम् ।
गव्यं पयो दधि घृतं माध्वीकं सितशर्कराः ॥
पञ्चामृतमिदं प्रोक्तममुना स्नापयेदुमाम् ।
सारं गृहीत्वा जगतां त्रयाणां यन्निर्मितं यज्ञकृते विधात्रा ।
पञ्चामृतं तन्मधुरं मनोज्ञं संस्नापकं ते जगदम्ब भूयात् ॥
मनुनैवामुना पञ्चामृतेन स्नापयेच्छिवाम् ।

तथा ।

ॐ कात्यायन्यै विद्महे भगवत्यै धीमहि तन्नो दुर्गा प्रचोदयात् ।
एतेनेक्षुरसेनैव स्नापयीत सुरेश्वरीम् ।

तन्त्रान्तरे ।

महौषधीभिः सर्वाभिः सर्वकामार्थसिद्धये ।
या औषधीति मन्त्रेण स्नापयेज्जगदम्बिकाम् ॥

(महौषध्य उक्ता मात्स्ये)

सहदेवी तथा व्याघ्री वला चातिवला तथा ।
शङ्खपुष्पी च सिंही च वचा चैव सुवर्च्चसा ॥
महौषध्यष्टकं प्रोक्तं महास्नाने नियोजयेत् ।

व्याघ्री कण्टकारिका । वला वाट्यलकः ।

सर्वौषधयस्तु प्रागेवोक्ताः ।

तथा ।

सहस्रधारकुम्भेन स्नापयेज्जगदम्बिकाम् ।

(महाकालसंहितायाम्)

सागराः सरितः सर्वाः स्वर्गस्रोतो नदास्तथा ।
तिस्रः कोट्योऽर्धकोटिश्च तीर्थानि पृथिवीतले ॥
कूपाः सरः प्रस्रवणा देवखाताः सगर्तकाः ।
कुल्याश्च निर्झरी वाप्यो यावन्तश्च जलाशयाः ॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलात्मिकाः ।
समुद्राः सप्त तद्द्वीपा ये च सप्त प्रकीर्त्तिताः ॥
जम्बूप्लक्षकुशक्रौञ्चशाकशाल्मलिपुष्कलाः ।
अभिषिञ्चन्तु सर्वे त्वां मन्त्रपाठवशीकृताः ॥
अग्निमीळेति मन्त्रेण ऋग्वेदस्याद्यया ऋचा ।
त्वां स्नापयतु गव्येन पयः कुम्भेन चण्डिकाम् ॥
इषे त्वाख्येन मन्त्रेण स्नापयत्विक्षुजद्रवैः ।
षडशीतिभिदा युक्तो यजुर्वेदः सुरेश्वरीम् ॥
सहस्रशाखासंयुक्तः सामवेदो मधुद्रवैः ।
अग्न आयाहि मन्त्रेण त्वां स्नापयतु चण्डिकाम् ॥
अथर्ववेदो हविषा बहुशाखासमन्वितः ।
शन्नो देवीति मन्त्रेण देवि त्वामभिषिञ्चतु ॥
अष्टादश पुराणानि व्यासेनोक्तानि यानि हि ।
यानि चोपपुराणानि दध्ना त्वां स्नापयन्तु हि ॥
महर्षिभिः प्रणीतानि धर्मशास्त्राणि यानि च ।
शतं चाशीतिरूपाणि स्नापयन्तु महेश्वरीम् ॥
सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
स्वर्गनद्यम्बुपूर्णेन आद्येन कलशेन तु ॥

अमुना गाङ्गतोयेन स्नापयेत् परमेश्वरीम् ।
मरुतश्चाभिषिञ्चन्तु भक्तिमन्तः सुरेश्वरीम् ॥
मेघतोयाम्बुपूर्णेन द्वितीयकलशेन च ।
एतेन वृष्टिनीराढ्यकुम्भेन स्नापयेच्छिवाम् ॥
सारस्वतेन तोयेन स्वच्छमेध्येन चण्डिके ।
विद्याधराः स्नापयन्तु तृतीयकलशेन तु ॥
सरस्वत्यम्बुसम्पूर्णघटेनाप्लावयेच्छिवाम् ।
त्वां स्नपयन्तु शक्राद्या लोकपालाः समागताः ॥
सागरोदकपूर्णेन तुर्येण कलशेन हि ।
*अभावेनाम्बुना देवीं स्नापयेन्मनुनाऽमुना ॥
वारिणा परिपूर्णेन पद्मरेणुसुगन्धिना ।
पञ्चमेनाभिषिञ्चन्तु नागास्त्वां कलशेन हि ॥
पद्मपुष्पसमायुक्तजलकुम्भमनुस्त्वसौ ।
हिमवन्मेरुकैलाशा अभिषिञ्चन्तु पर्वताः ॥
निर्झरोदकपूर्णेन षष्ठेन कलशेन हि ।
अमुना निर्झराम्भोभिः स्नापयेत् परमेश्वरीम् ॥
सर्वतीर्थाम्बुपूर्णेन कलशेन सुरेश्वरीम् ।
सप्तमेनाभिषिञ्चन्तु ऋषयः सप्त खेचराः ॥
मन्त्रेणैतेन तीर्थाम्बुकुम्भेन स्नापनं चरेत् ।
वसवस्त्वाऽभिषिञ्चन्तु कलशेनाष्टमेन तु ॥
सारसेनैव तोयेन दुर्गे देवि नमोऽस्तु ते ।
देवीमनेन मन्त्रेण सिञ्चेत् कासारवारिणा ॥

---

* आर्णवेना-इति २-३-५ पु० पा० ।

धर्मो ज्ञानं च वैराग्यं तपः सत्यं क्षमा धृतिः ।
यशो विवेको नियमो ब्रह्मचर्यं दया दमः ॥
शान्तिर्मौनं तथा शौचं सन्तोषो मितभाषिता ।
यावत्यश्चोपनिषदः कैवल्यप्रतिपादकाः ॥
स्थावरं जङ्गमं चापि त्रैलोक्ये यत् प्रतिष्ठितम् ।
यद्ब्रह्मसृष्टावुत्पन्नं मूर्त्तं चामूर्त्तमेव च ॥
अचरं यच्चरं चापि यद्वाङ्मयमवाङ्मयम् ।
ते सर्वे स्नापयन्तु त्वां नवमेन घटेन हि ॥
स्नापयेच्छुद्धतोयेन चण्डिकां मनुनाऽमुना ।
इत्युक्तं ते महास्नानं शरदर्चाविधौ प्रिये ॥
दिनान्तरेऽपि कुर्वीत भक्तश्चेद्भक्तिभावितः ।
अनेन विधिना यस्तु स्नापयेज्जगदम्बिकाम् ॥
सप्तजन्मकृतात् पापान्मुक्तः स्यान्नात्र संशयः ।
दिव्याष्टाब्दसहस्राणि देवीलोके वसेत् तथा ॥
नवम्यां तु महास्नानं धनपुत्रविवर्धनम् ।
सहस्रयज्ञस्य फलं लभते नात्र सशयः ॥
राजा राज्यमवाप्नोति शत्रुनाशं तथैव च ।
स्वाभीष्टमाप्नुवन्त्यन्ये महास्नानेन पार्वति ॥
महास्नानादनु ततो भूतेभ्यो वलिमुत्सृजेत् ।
स कौलानां मांसमद्ये माषान्नं स्मृतिवर्त्तिनाम् ॥
गृहीत्वा तममूभ्यां वै मनुभ्यामुत्सृजेद्बलिम् ।
भूताः प्रेताः पिशाचाश्च ये वसन्त्यत्र भूतले ॥
ते गृह्णन्तु मया दत्तं वलिमेनं प्रसाधितम् ।
पूजिता गन्धपुष्पाद्यैर्वलिभिस्तर्पितास्तथा ॥

देशादस्माद्विनिःसृत्य पूजां पश्यन्तु मत्कृताम् ।
तारराबौ कूर्चभूतौ भ्यसन्तो भूत एव च ॥
ससन्ध्येष बलिर्हुंच्च मन्त्रावेतावुदाहृतौ ।

तारः ॐ । भूतः स्फों ।

तथा ।

अकृते बलिदाने तु महास्नानादनन्तरम् ।
अफलं तद्भवेद्देवि पूजाङ्गं हीयते तथा ॥
विलुम्पन्ति सदा लुब्धा न च रक्षन्ति देवताः ।
तस्माद्यत्नेन कर्त्तव्यं भूतानामपसारणम् ॥
लाजचन्दनसिद्धार्थभस्मदूर्वाक्षतादिकम् ।
गृहीत्वा तारोपानुनिःश्रेण्यत्वमुदीरयेत् ॥
अपसर्पन्तु भूतास्ते ये भूताः शारदार्च्चिकाः ।
भूतानामविरोधेन देवीपूजां करोम्यहम् ॥
वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः ।
अपसर्पन्तु सर्वत्र मन्त्ररूपास्त्रताडिताः ॥
अन्ते मनूनामेतेषां हूँ अः फडिति कीर्त्तयेत् ।
भूतादीनपसार्य्याथ द्वारपालेभ्य एव च ॥
त्रपाद्द्विल्वशाखान्ते वासिन्यै तदनन्तरम् ।
दुर्गायै कूर्चमस्त्रं च मन्त्रेणानेन पार्वति ॥
पाद्यादिभिः समभ्यर्च्य कुर्यान्नीराजनाविधिम् ।

नीराजनं * निर्मञ्छनम् ।

---

* पञ्च नीराजनं कुर्यात् प्रथमं दीपमालया ।
द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा ॥
चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तयेत् ।
पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि–इति (शब्दस्तोममहानिधौ) ॥

द्वारदेशं समानीय कुर्यान्निर्मञ्छनं ततः ।

इति तन्त्रान्तरवचनात् ।

तथा ।

धृत्वाऽऽसनं ततो देवीं पत्रिकां मृन्मयीमपि ।
संचाल्य गीतवाद्यादीनिमं मन्त्रं समुच्चरेत् ॥
स्थापयेत् सुस्थिराकारां ततः कल्पित आसने ।
तारत्रपारावलक्ष्मीयोगिनीकामयोषितः ॥
डाकिनीं चापि फेत्कारीं चण्डिके भगवत्यपि ।
चलद्वयं चालय द्विर्वज्रकापालिनीत्यपि ॥
पूजालयं द्विः प्रविश हूँ फट् स्वाहा ततः परम् ।
आगच्छ मद्गृहे देवि सह शक्तिभिरष्टभिः ॥
पूजां गृहाण विधिवत् सर्वकल्याणहेतवे ।
अनेन स्थापयेद्देवीं सर्वकल्याणदायिनीम् ॥
दिनत्रयस्य पूजार्थं वेदिकाद्यासनादिषु ।

त्रपा ह्रीँ । रावः फ्रेँ । योगिनी छ्रीँ । कामः क्लीँ । योषित् स्त्रीँ । डाकिनी ख्फ्रेँ ।
फेत्कारी ह्स्ख्फ्रेँ ।

तथा ।

तारचिद्द्रावडाकिन्यः स्थाँ स्थीँ त्वमम्बिके तथा ।
स्थिरीभव शिरश्चेति स्थिरीकुर्यात् ततः परम् ॥

चिद्वाग्भवम् ।

कलशस्थापनमाह ।

ततः पुनर्विरचिते सर्वतोभद्रमण्डले ।
चित्रितं पञ्चवर्णेन दध्यक्षतफलान्वितम् ॥
पञ्चरत्नेन हेम्ना च गर्भगेन विभूषितम् ।
पट्टाच्छादनसंवीतग्रीवं पल्लवशोभितम् ॥
व्रीहीनां वा यवानां वा स्थापयित्वोपरि प्रिये ।

वैदिकेन विधानेन कलशस्थापनं चरेत् ॥
भूमिं स्पृष्ट्वा जपेन्मन्त्रं भूरसीति वरानने ।
अथ धान्यमसीत्युक्त्वा व्रीहिने वाऽभिमन्त्रयेत् ॥
आजिघ्रेत्युच्चरन्मन्त्रं कलशं तत्र विन्यसेत् ।
वरुणस्येति मन्त्रेण पाथोभिः परिपूरयेत् ॥
काण्डात् काण्डादिति प्रोच्य पल्लवं विन्यसेत् ततः ।
फलं वा फलिनीत्युक्त्वा श्रीश्चेत्युक्त्वा प्रसूनकम् ॥
गन्धद्वारेत्यथो गन्धं सहस्रेत्यक्षतं न्यसेत् ।
स्थिरीभवेति मन्त्रेण स्थिरीकरणमाचरेत् ॥
वल्मीककुञ्जररदनदीसङ्गमपर्वतात् ।
गोकुलाद्देवनृपतिद्वारादपि च मृत्तिकाः ॥
आहृत्य हार्दमन्त्रेण प्रत्येकं निःक्षिपेद्घटे ।

हार्दमन्त्रेण नम इति मन्त्रेण ।

पूर्ववत् सर्ववस्त्वादिशोधनं विदधीत वै ।
प्रागुदीरितमन्त्रेण तथैवालोकनेन च ॥
यदात्मनाऽनवज्ञातं पूजाद्रव्यादिदूषणम् ।
अस्पृश्यस्पर्शनं वाऽपि यदन्यायार्जितं च वा ॥
तथा निर्माल्यसंस्पृष्टं कीटारोहणदूषितम् ।
नश्यन्ति तानि सर्वाणि दूषणान्यवलोकनात् ॥
भूतापसारणं कृत्वा भूतशुद्धिं विधाय च ।
सम्पूज्यासनमात्मीयं गणेशगुरुदेवताः ॥
नत्वा विदध्यात् तदनु प्राणायामत्रयं बुधः ।
पत्रिकायास्ततः कुर्याद्दृष्यादि यतमानसः ॥

शरत्कालीनदुर्गार्चाविधेरस्य हि नारद ।
ऋषिश्छन्दश्च गायत्री श्रीदुर्गा देवता मता ॥
बीजं ह्रीमिति निर्दिष्टं शक्तिः श्रीमपि पार्वति ।
कीलकं क्लीमिति प्रोक्तं पूजायां विनियोगता ॥
अस्मिन्नेव ह्यवसरे सङ्कल्पं केऽपि कुर्वते ।
काम्यत्वान्नेतरे त्वस्य निम्यत्वान्नित्यकृत्यवत् ॥
क्रियते यदि सङ्कल्पस्त्र्यहस्याप्येक एव हि ।
एकप्रयोगसंहारात् फलैक्याच्च विसर्जनात् ॥
पीठे मूर्त्तौ च नित्यं तमृषिं तत्तन्मनोश्चरेत् ।
मृन्मूर्त्तिपत्रिकापक्षे मन्त्रं सर्षिं निशामय ॥
आदौ वेदादिमालेख्य द्विवारं दुर्गे ईरयेत् ।
सम्बुद्धिरथ रक्षिण्याः शिरसा सह कीर्त्तयेत् ॥
पत्रिकार्चोपचारादिप्रदानार्थं मनुस्त्वमौ ।
एकं द्वे द्वे त्रीणि च द्वे सकलो मन्त्र एव च ॥
कराङ्गुलीहृदादिष्वमी न्यस्या मन्त्रवर्णकाः ।

तथा ।

नित्यपीठे पुरोदीर्णं स्वं स्वं ध्यानं समाचरेत् ।
माहेयपीठिकापक्षे ध्यानमाकलय प्रिये ॥
निस्तप्तस्वर्णवर्णाभां नवतारुण्यशालिनीम् ।
पूर्णचन्द्राभवदनां जटामुकुटमण्डिताम् ॥
लोलदीर्घासितत्र्यक्षां खण्डेन्द्वाबद्धशेखराम् ।
दाडिमीकुसुमाकारदन्तपङ्क्तिविराजिताम् ॥
उत्तुङ्गपीनवक्षोजां वलित्रयविराजिताम् ।
अतिक्षामोदरीं देवीं नितम्बाभोगभासुराम् ॥

त्रिभङ्गस्थानकतया भज्यन्मध्यामिव स्थिताम् ।
बाहुभिर्दशभिर्युक्तां सर्वालङ्करणान्विताम् ॥
शूलं कृपाणं चक्रं च बाणं शक्तिं च दक्षिणे ।
धारयन्तीमथो वामे पाशचर्माङ्कुशं धनुः ॥
कण्ठीरवोपरिन्यस्तदक्षिणाङ्घ्रिसरोरुहाम् ।
संमुखस्थितसंछिन्नमहिषासुरमस्तकाम् ॥
कण्ठनालोत्थदितिजसकिरीटकचोच्चयाम् ।
पाशं वामकरेणैव बिभ्रतीं परमेश्वरीम् ॥
शूलेन हृदि निर्भिन्नं पश्यन्तीं दानवं रुषा ।
पाशाकारमहानागवेष्टितोदरबाहुकम् ॥
भ्रूकुटीभीषणाकारं शोणितार्द्रकलेवरम् ।
आकृष्टासिनिगलितकफोणिं हरिणा हठात् ॥
स्रवद्रुधिरसंदोहवदनेन महात्मना ।
स्तूयमानां सुरैः सर्वैर्ब्रह्माजेशमुखादिभिः ॥
लीलया दानवं हत्वा किञ्चित् किञ्चिद्धसन्मुखीम् ।
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ॥
चण्डा चण्डवती चैव चण्डरूपा च चण्डिका ।
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ॥
चिन्तयेदीदृशीं दुर्गां धर्मकामार्थमोक्षदाम् ।
ध्यात्वेत्थं मानसैरेवोपचारैः परिपूज्य च ॥
पूर्वोक्तेनैव विधिना विदध्यादर्घसंस्थितिम् ।
नैमित्तिकविधानेन विस्तारो यत्र कीर्त्तितः ॥
तस्यां शक्तौ तु पाद्यादीन् पृथक्त्वेन प्रविन्यसेत् ।

अर्घस्योत्तरतः कार्यं पाद्यमाचमनीयकम् ॥
स्नानीयं मधुपर्कं च उपचारास्तथा मया ।
अस्मिन्नेव क्षणे देवीपञ्चायतनपूजकः ॥
गणेशार्कहरीशानां सम्भारैः कल्पितैर्यजेत् ।
पीठार्चनं ततः कुर्यात् सामान्यं प्रथमं बुधः ॥
सर्वशेषं योगरत्नं शेषमन्त्रोपबृंहितम् ।
विधाय च पुनर्ध्यानमावाहनमथाचरेत् ॥
मुद्राविभक्तिकलितं साधको मीलितेक्षणः ।
मूलमन्त्रेणाथ सावयवीकृत्य विभावनैः ॥
मन्त्रक्षरैः षडङ्गानि विन्यसेत् तदुपस्पृशन् ।
मूलपीठप्रतिष्ठायां यो मनुः प्रागुदीरितः ॥
यन्त्रमूर्त्योस्तु तेनैव प्रतिष्ठां स्थिरयोश्चरेत् ।
मृन्मूर्त्तिपत्रिकाकुम्भशूलास्यादिष्वपि प्रिये ॥
के चनेच्छन्ति तन्मन्त्रं नैव कापालिकादयः ।
अन्यान् पौरिणिकान् मन्त्रान् वैदिकानपि काँश्चन ॥
ईरयेत् पीठिकाकुम्भमाहेयप्रतिमादिषु ।
ताँस्ते वदामि सुतनु नन्दिकेश्वरभाषितात् ॥
हस्तं दत्वा पत्रिकायां तारादि तत्सदित्यपि ।
त्रिरुदीर्य पठेन्मन्त्रानेवैतान् स्थिरपीठयोः ॥
आगच्छ मद्गृहे देवि अष्टाभिः शक्तिभिः सह ।
पूजां गृहाण विधिवत् सर्वकल्याणकारिणि ॥
एह्येहि भगवत्यम्ब शत्रुक्षयजयप्रदे ।
भक्तितः पूजयामि त्वां नवदुर्गे सुरार्च्चिते ॥

दुर्गे देवि समागच्छ सान्निध्यं चापि कल्पय ।
यज्ञभागं गृहाण त्वमष्टाभिः शक्तिभिः सह ॥
शारदीयामिमां पूजां करोमि त्रिदशार्च्चिते ।
आज्ञापय महादेवि दैत्यदर्पनिषूदनि ॥
दुष्पारे घोरसंसारे सागरे पतितं सदा ।
त्रायस्व वरदे देवि नमस्ते शङ्करप्रिये ॥
ये देवा याश्च देव्यश्च चलितायां चलन्ति हि ।
आवाहयामि तान् सर्वाँश्चण्डिके परमेश्वरि ॥
प्राणान् रक्ष यशो रक्ष रक्ष दारान् सुतं धनम् ।
सर्वरक्षाकरी यस्मात् त्वं हि देवि जगत्प्रिये ॥
प्रविश्य तिष्ठ यज्ञेऽस्मिन् यावत् पूजां करोम्यहम् ।
मेनानन्दकरे देवि सर्वसिद्धिं च देहि मे ॥
आगच्छ चण्डिके देवि सर्वकल्याणहेतवे ।
पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये ॥
आवाहयामि देवि त्वां मृन्मये श्रीफले तथा ।
त्रिशूले कलशे खड्गे मण्डले चित्र एव च ॥
कैलाशशिखराद्देवि विन्ध्याद्रेर्हिमपर्वतात् ।
आगत्य विल्वशाखायां चण्डिके कुरु सन्निधिम् ॥
स्थापिताऽसि मया देवि पूजये त्वां प्रसीद मे ।
चण्डे चण्डात्मिके चण्डि चण्डविग्रहधारिणि ॥
विल्वशाखां समाश्रित्य तिष्ठ देवि गणैः सह ।
अथ वा मृन्मये कुम्भे त्रिशूले खड्ग एव च ॥
तथा चित्रपटे वाऽरिनृमुण्डे वह्निमण्डले ।

सर्वगा त्वं समागत्य सान्निध्यमिह कल्पय ॥
देवि त्वं जगतां मातः सृष्टिसंहारकारिणि ।
मण्डलेषु समस्तेषु सान्निध्यमनुकल्पय ॥
चतुर्विंशतिसङ्ख्येषु अधिष्ठेयेषु चण्डिके ।
आगत्य शारदीं पूजां गृह्ण देवि प्रसीद मे ॥
आवाहिताऽसि देवि त्वं निखिले मण्डले मम ।
भूत्वाऽत्रैव स्थिरात्म त्वं मद्गेहे कामदा भव ॥
चण्डि त्वं चण्डरूपाऽसि सुरतेजःसमुद्भवे ।
परिवारैः समागत्य स्थितिमत्र कुरु द्रुतम् ॥
अष्टादशैतान् प्रजपेन्मन्त्रान् पौराणिकान् प्रिये ।
ततो हंसः शुचीत्येवं प्रतद्विष्णुस्तवेत्यपि ॥
तथा विष्णुर्योनिमिति तार्त्तीयकतयोदितम् ।
तारव्याहृतिपूर्वा च गायत्री तारपश्चिमा ॥
त्र्यम्बकं चेति पञ्चैतान् वैदिकान् प्रजपेन्मनून् ।
नेमानपि स्थिरे पीठे मूर्त्तौ वा परिकल्पयेत् ॥
अतः प्राणप्रतिष्ठां वै कुर्वीत मनुविस्तरैः ।
आद्येन नित्यख्यातेन निमित्तोक्तेन तत्परम् ॥
आख्यास्यमानतार्त्तीयमनुना तदनन्तरम् ।
तच्च शारदपूजायां नेतरस्यां कदा चन ॥
पीठमूर्त्त्योरपि तथा मण्डले नेतरत्र च ।
तारसैधत्रपारावयोगिन्यो डाकिती तथा ॥
फेत्कारीकूर्चवनिता बीजानीमानि वै नव ।
एह्येहि भगवत्येवं ततो ब्रूयात् पदत्रयम् ॥

त्रयस्त्रिंशत्कोटिपदात् तथा त्रिदशशब्दतः ।
तेजःकल्पितशब्दाच्च शरीरे परिकल्पयेत् ॥
पदात् तथा च महिषासुरतो मर्दिनीत्यपि ।
ततो जगत्त्रयेत्युक्त्वा पालिनि प्रतिकीर्त्तयेत् ॥
कामप्रसादपाशाश्च नृसिंहकमले ततः ।
आगच्छद्वितयं चापि सान्निध्यं कल्पयद्वयम् ॥
पूजालयं प्रविश्योक्त्वा तिष्ठयुग्ममतः परम् ।
ततो विसन्धग्रष्टशक्तिपदात् परिवृते वदेत् ॥
ज्वलयुग्मं प्रज्वलयुगं स्फुर प्रस्फुर चेदृशम् ।
अङ्कुशप्रेतभैरव्योऽमाहारप्रलयास्ततः ॥
विद्युन्महाक्रोधताराः शिरः शेषे ततः परम् ।
शतमष्टादशोपेतं वर्णानामत्र वै मनौ ॥
मन्त्रत्रयेणामुनैव कुर्यात् प्राणप्रतिष्ठितम् ।
मृन्मूर्त्तिपत्रिकाकुम्भादिषु सर्वान्तिमं मनुम् ॥
श्रौतं पठेन्मनोजूतिरिति कौलेतरो नरः ।
नैमित्तिकोक्तेन तथा कुर्यादावाहनं ततः ॥
मन्त्रेण त्रिरुदीर्णेन न पत्र्यां पीठ एव हि ।
अथ कौलादयः कुर्युरस्मिन्नवसरे प्रिये ॥
नैमित्तिकेन विधिना पात्रस्थापनमुत्तमम् ।
न्यासौघान् पुरतः कृत्वा नैमित्तिकविधीरितान् ॥
शक्तौ तु पञ्चकान् सर्वान् षोढात्रितयमेव हि ।
माहेयपत्र्योर्नैतां वै प्रकुर्वीत कदा चन ॥
पात्राणां स्थापनं चापि कुर्यात् स्वेन मतेन हि ।

विचाररीती एषां वै नैमित्तिक उदीरिते ॥
सा कल्पना च ते मन्त्राः स क्रमः संस्थितिश्च सा ।
ते न्यासाः शोधनं तच्च वस्तु वा तर्पणं च तत् ॥
शरदर्चापीठमूर्त्योर्नैमित्तिकसमर्पणात् ।
कस्यापि मत ईशानि नैवाणुरपि भिद्यते ॥
विशिष्यातो मया तन्त्रपौराणिकविधिद्वयम् ।
उच्यते स मनुः प्रायो बुद्धिमद्बुद्धिगोचरः ॥
पत्रिकादिषु पौराणं तान्त्रिकं पीठ एव हि ।
वस्त्वर्पणस्य प्रत्येकं ये मन्त्राः पूर्वमीरिताः ॥
नैमित्तिकार्चनविधौ ग्राह्यास्तेऽत्रापि पार्वति ।
प्रत्येकं मनवो ये वै पत्रिकादिषु संस्थिताः ॥
तानिदानीं प्रवक्ष्यामि तत्तद्वस्त्वर्पणाविधौ ।
यथा तत्तन्ममूच्चारादनुमूलमनूदितान् ॥
कथ्यते वस्तुदानाय तथाऽत्रापि सुरेश्वरि ।
पौराणिकमनुं प्रोच्य तदन्ते परिकीर्त्तयेत् ॥
द्वात्रिंशद्वर्णकं मन्त्रमथ वा भैरवोदितम् ।
कात्यायनोपासितं यज्जयदुर्गादशाक्षरम् ॥
ताभ्यां पौराणिकाचार्यां वस्तुदानसमुद्धृतेः ।
द्वयोरशक्तावेकं वा आवश्यकतयेरयेत् ॥
वक्ष्ये तयोरुद्धृतिं तदाद्यं नन्दीश्वरार्चितम् ।
तारत्रपाभ्यां ङेन्ता स्याद्दक्षयज्ञविनाशिनी ॥
महाघोराऽपि च तथा योगिनीकोटिशब्दतः ।
तद्वत् परिवृता कार्या मायाबीजं ततः परम् ॥
पूर्ववद्भद्रकाली च हृन्मन्त्रः सर्वशेषगः ।

अथ वा तारतो दुर्गा इति वारद्वयं वदेत् ॥
सम्मुच्छ्यन्तां रक्षणीं च तर्जनीमनुरन्त्यगः ।
यद्यपोमौ मनू देवि तान्त्रिकौ समुदीरितौ ॥
तथाऽपि पौराणिकान्ते नियोज्यौ तत्तदर्हणे ।
अथ सर्वोपचारीयान् वक्ष्ये पौराणिकान्मनून् ॥
पूर्वमेवोदिताः सन्ति निमित्तार्चासु तान्त्रिकाः ।
त एवात्र नियोक्तव्याः प्रत्येकं तत्तदर्पणे ॥
पत्रिकादिषु पौराणाः पीठमूर्त्योस्तु तान्त्रिकाः ।
आसनं पाद्यमर्घ्यं च ततोऽन्वाचमनीयकम् ॥
मधुपर्कं स्नानजलं वस्त्रं भूषणचन्दने ।
पुष्पं धूपं च दीपं च नेत्राञ्जनमतः परम् ॥
अलक्तं चापि नैवेद्यं प्रदक्षिणनमस्कृती ।
उपचारा इमे प्रोक्ता देवीतुष्टिविधायकाः ॥
यद्यद्वै दीयते द्रव्यमलङ्कारादिकाञ्चनम् ।
तेषां दैवतमुच्चार्य कृत्वा च प्रोक्षणार्चने ॥
उत्सृज्य तत्तन्मन्त्रेण तत्तन्नाम्ना निवेदयेत् ।
सर्वशुद्धिं तु पौराणक्रमेण धरयाऽऽचरेत् ॥
इदं त आसनं दत्तं मया सुरवरार्च्चिते ।
भवैतस्मिन्निषण्णा त्वं यावत् पूजां करोम्यहम् ॥
दूर्वापराजितापद्मश्यामाकसहितं जलम् ।
पाद्याय कल्पते देवि विशेषार्चासु नान्यथा ॥
पाद्यं गृह्ण *मया दत्तं सर्वदुःखापहारकम् ।

---

* महादेवि इति ४·५ पु० पा० ।

त्रायस्व वरदे देवि घोरादस्माद्भवार्णवात् ॥
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ।
तच्च स्वधापदैर्दद्यान्मधुपर्कं तथा प्रिये ॥
अर्घं स्वाहापदेनैव सर्वमन्यन्नमःपदैः ।
गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपान् ॥
विल्वपत्रक्षीरदूर्वासहितं सलिलं शुचि ।
शङ्खपात्रगतं कृत्वा कालिकायै निवेदयेत् ॥
दूर्वाक्षतसमायुक्तं विल्वपत्रसमन्वितम् ।
शोभनं शङ्खपात्रस्थं गृहाणार्घं हरप्रिये ॥
नानातीर्थोद्भवं वारि सर्ववस्तूपकल्पितम् ।
गृहाणार्घमिमं देवि जगद्धात्रि नमोऽस्तु ते ॥
चन्द्रजातीलवङ्गैलाकक्कोलसहितं जलम् ।
विशेषाचमनीयं वै दद्याद्देव्यै फलेच्छया ॥
आमोदवस्तुसुरभीकृतमेतदनूत्तमम् ।
गृहाणाचमनीयं त्वं मया भक्त्या निवेदितम् ॥
इमा आपो मया भक्त्या तव पादतलेऽर्पिताः ।
आचामय महादेवि प्रीता शान्तिं प्रयच्छ मे ॥
सुराभावे घृतदधि मधु कांस्ये निवेदयेत् ।
मधुपर्कं तदुद्दिष्टं प्रार्थनीयं दिवौकसाम् ॥
मधुपर्कं महेशानि ब्रह्मणा परिकल्पितम् ।
मया निवेदितं तुभ्यं गृहाण जगदीश्वरि ॥
मधुपर्कप्रदानान्ते पुनराचमनीयकम् ।
दातव्यं प्राशनान्तेऽस्य यत उच्छिष्टता भवेत् ॥

वारीदं हि ममामोदि प्रसन्नं मेध्यमेव च ।
मया निवेदितं भक्त्या स्नाह्यनेन सुरेश्वरि ॥
नानावर्णसमायुक्तपट्टसूत्रादिनिर्मितम् ।
वासः शुक्लं तथा रक्तं गृहाण त्रिदशेश्वरि ॥
देहशोभाकरं पूतं रञ्जितं नागवस्तुभिः ।
परिधत्स्व जगद्धात्रि वासो भक्त्या निवेदितम् ॥
वाससः परिधानान्ते पुनराचमनीयकम् ।
दातव्यं भक्तिभावेन स्मृत्युक्तत्वान्मनुष्यवत् ॥
दिव्यरत्नसमायुक्ता वह्निभानुसमप्रभाः ।
अलङ्कारास्तवाङ्गानि शोभयन्तु सुरेश्वरि ॥
अनुलेपनमेतत् ते महासुरभि शीतलम् ।
मया निवेदितं देवि गृहीत्वा लेपयाङ्गकम् ॥
इदं कुसुममामोदि ग्रामारण्यसमुद्भवम् ।
प्राणसन्तर्पणं हृद्यं मयां दत्तं प्रगृह्यताम् ॥
कर्पूरागुरुसंमिश्रो वनस्पतिरसोद्भवः ।
मया निवेदितो धूपो देवदेवि प्रगृह्यताम् ॥
अग्निज्योतो रविज्योतिश्चन्द्रज्योतिस्तथैव च ।
ज्योतिषामुत्तमं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥
त्वं चन्द्रसूर्यज्योतींषि विद्युदग्न्योस्तथैव च ।
त्वमेव जगतां ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥
स्निग्धमुष्णं हृद्यतमं दृशां शोभाकरं तव ।
गृहीत्वा कज्जलं सद्यो नेत्राण्यञ्जय पार्वति ॥
त्वत्पादाम्भोजनखरद्युतिकारि मनोरमम् ।

अलक्तकमिदं देवि मया दत्तं प्रगृह्यताम् ॥
नानाविधानि रम्याणि स्वादूनि रसवन्ति च ।
मया दत्तानि गृह्यन्तां नैवेद्यानि सुरार्च्चिते ॥
फलफूलानि सर्वाणि ग्रामकाननजानि च ।
नानाकारसुगन्धीनि गृहाण *परमेश्वरि ॥
चतुर्विधमिदं भोज्यं देवि षड्भी रसैर्युतम् ।
सदा तृप्तिकरं रम्यमिदमन्नं प्रगृह्यताम् ॥
गव्यसर्पिःपयोयुक्तं नानामधुरमिश्रितम् ।
निवेदितं देवि मया परमान्नं प्रगृह्यताम् ॥
अमृतै रचितं दिव्यं घृतखण्डविनिर्मितम् ।
पिष्टकं विविधं स्वादु गृहाण हरवल्लभे ॥
मोदकं स्वादु रुचिरं कर्पूरादिभिरन्वितम् ।
मिश्रं नानाविधैर्द्रव्यैः प्रतिगृह्याशु भुज्यताम् ॥
ताम्रपात्रे स्थितं सीधुं पयो गव्यमथात्र वा ।
नारिकेलोदकं कांस्ये गृहाण शङ्करप्रिये ॥
पानीयं शीतलं स्वच्छं प्रसन्नं घनसारयुक् ।
भोजने तृप्तिकृद्देवि कृपया प्रतिगृह्यताम् ॥
भोजनान्ते प्रदातव्यं पुनराचमनीयकम् ।
पूर्वोक्तेनैव मन्त्रेण सर्वत्रैव शुचिस्मिते ॥
फलपत्रकसंयुक्तं कर्पूरादिसुवासितम् ।
मुखकान्तिकरं हृद्यं ताम्बूलं प्रतिगृह्यताम् ॥
दूर्वाङ्कुरं ततो देव्यै दद्यात् साधकसत्तमः ।

---

* हरप्रिये इति ५ पु० पा० ।

नमस्ते सर्वगे देवि नमस्ते भुक्तिमुक्तिदे ॥
दूर्वां गृहाण देवि त्वं मां निस्तारय सङ्कटात् ।
विल्वपत्रं ततो देव्यै पृथक्त्वेन [*] निवेदयेत् ॥
अमृतोद्भवं श्रीयुक्तं महादेवप्रियं सदा ।
पवित्रं ते प्रयच्छामि पत्रं मालूरशाखिनः ॥
नानापुष्पेण रचितां स्तनबद्धां सुगन्धिनीम् ।
प्रभ्रष्टां लम्बनां चापि तव देवि निवेदये ॥
सर्वशेषे प्रदातव्यं सिन्दूरं पत्रिकार्च्चने ।
अनुलेपनकाले तु पीठमूर्त्त्योर्भिदेयती ॥
अलिकादिकशोभायाः कारकं रागसम्भवम् ।
अतिरागि समुत्पिञ्जसिन्दूरं प्रतिगृह्यताम् ॥
चमरीपुच्छजं श्वेतं हेमदण्डि सुलोम च ।
मयाऽर्पितं राजचिह्नं चामरं प्रतिगृह्यताम् ॥
वर्हिवर्हकृताकारं मध्यदण्डसमन्वितम् ।
गृह्यतां व्यजनं देवि देहस्वेदापनत्तये ॥
येन भीषयसे दैत्यान् येन पूरयसेऽम्बरम् ।
तां घण्टां ते प्रयच्छामि महिषघ्नि[†] प्रगृह्यताम् ॥
दीपैरनेकैर्विहितमारात्रिकमिदं शुभम् ।
निवेदयामि ते देवि संहराज्ञानजं तमः ॥
सर्वशेषे प्रदातव्यं पुष्पाणामञ्जलित्रयम् ।
तन्मनुस्तु वरारोहे दुर्गागायत्र्युदीरिता ॥

---

[*] प्रदीयते इति ३, ४, ५ पु० पा० ।

[†] प्रसीद मे इति ३, ४, ५ पु० पा० ।

ॐ चण्डिकायै विद्महे भगवत्यै धीमहि तन्नो गौरी प्रचोदयात् ।

अनेन विधिना यस्तु मन्त्रैरेभिश्च पार्वति ।
महिषघ्नीं महामायां पत्रिकासु प्रपूजयेत् ॥
अश्वमेधफलं प्राप्य स गच्छेच्चण्डिकालयम् ।
इहापि च भवेत् सद्यः कल्याणानां स भाजनम् ॥
पूजारीतिर्वरारोहे पीठमूर्त्योरपीदृशी ।
मन्त्रभेदः परो ज्ञेयः पात्राणां स्थापनं तथा ॥
प्रत्येकं तु ततः कुर्यात् पत्रिकाणां तु पूजनम् ।
यावच्छक्त्योपचारेण मन्त्रेणापि पृथक् पृथक् ॥
एका तत्तदधिष्ठात्री देवता परिकीर्त्तिता ।
तत्तन्नाम्ना चतुर्थ्यन्तां समवाह्यार्च्चयेत् प्रिये ॥
आदौ तु रम्भाधिष्ठात्री ब्रह्माणी परिकीर्त्तिता ।
कालिका कच्च्यधिष्ठात्री त्रिपुरघ्नेन भाषिता ॥
दुर्गा हरिद्राधिष्ठात्री जयन्त्यां कार्त्तिकी तथा ।
शिवा च विल्वाधिष्ठात्री दाडिमाधिष्ठिता तथा ॥
शत्रुसङ्घक्षयकरी विजेया रक्तदन्तिका ।
मुनिभिः शोकरहिताऽशोकाधिष्ठात्र्युदीरिता ॥
तथैव मानाधिष्ठात्री चामुण्डा परिकीर्त्तिता ।
लक्ष्मीश्च धान्याधिष्ठात्री नन्दीशेनोपपादिता ॥
नवपत्रिकाधिष्ठात्री कात्यायन्यप्युदीरिता ।
याथाऽऽसां क्रमतो देवि नामान्युक्तानि ते मया ॥
तथैव मन्त्रमेकैकं क्रमेण प्रब्रुवेऽधुना ।

ब्रह्माणि त्वं ससागच्छ सान्निध्यमिह कल्पय ॥
रम्भारूपेण सर्वत्र शान्तिं कुरु नमोऽस्तु ते ।
महिषासुरयुद्धेषु कच्वीभूताऽसि कालिके ॥
मनुष्यानुग्रहार्थाय लोकमेनमुपागता ।
हरिद्रे वरदे देवि दुर्गारूपाऽसि शोभने ॥
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे ।
निशुम्भशुम्भमथने सेन्द्रैर्देवगणैः पुरा ॥
जयन्ती पूजिताऽसि त्वमस्माकं वरदा भव ।
महादेवप्रियकरो वासुदेवप्रियः सदा ॥
सदा कालीप्रीतिकरो विल्ववृक्ष नमोऽस्तु ते ।
दाडिमि त्वं पुरा युद्धे रक्तबीजस्य संमुखे ॥
चामुण्डाप्रीतिमकरोत् तस्मात् त्वां पूजयाम्यहम् ।
हरप्रीतिकरो वृक्षो ह्यशोकः शोकनाशनः ॥
दुर्गाप्रीतिकरत्वेन मामशोकं सदा कुरु ।
यस्य पत्रे वसेद्देवी मानवृक्ष शचीप्रिय ॥
ममैवानुग्रहार्थाय पूजां गृह्ण सुरेश्वरि ।
जगतः प्राणरक्षार्थं ब्रह्मणा निर्मितं पुरा ॥
उमाप्रीतिकरं धान्यं तस्मात् त्वं रक्ष मां सदा ।
पत्रिके नवदुर्गे त्वं महादेवमनोहरे ॥
पूजां समास्तां संगृह्य रक्ष मां त्रिदशेश्वरि ।
प्रत्येकमित्थं संपूज्य मन्त्रैरेतैरुदीरितैः ॥
नामाभ्यामपि ङेन्ताभ्यामुक्ताभ्यां पूर्वमेव ते ।
सामान्यपीठन्यासोक्तनामभिर्ङेन्तबृंहितैः ॥

दिक्पालानपि नित्योक्तवाहनायुधसंयुतान् ।
वस्तुभिः पीठमूर्त्योस्तु नित्यनैमित्तिकोदितैः ॥
प्रावृत्यार्च्चनविस्तारैर्यजेत परमेश्वरीम् ।
यावती कथिता नित्य इतिकर्त्तव्यता मया ॥
यथा नैमित्तिके चापि द्वयीमपि नियोजयेत् ।
संप्रयोगममन्त्राणामवदन्नैत्यके विधौ ॥
तं केवलं विधायेशि सर्वमन्यमुपाचरेत् ।
नैमित्तिकीयः संग्राह्योऽन्यः सर्व उभयात्मकः ॥
प्रयोगो यादृशीयस्तु तादृशोयं हि तर्पणम् ।
शक्तौ तु पत्रिकार्च्चायां दशास्त्राणि प्रपूजयेत् ॥
ङेन्तैस्तारहृदो मध्येऽधिष्ठितैस्तत्तदक्षरैः ।
ततोऽनु सर्वपूजान्ते पूजयेन्महिषासुरम् ॥
वलिं दद्यात् स्वशक्त्या च पशूनपि खगानपि ।
नैमित्तिके तद्विधानं प्रागेव तव कीर्त्तितम् ॥

इति सप्तमीकृत्यम् ।

अथाष्टमीकृत्यम् ।

तत्रैव ।

एतावत् सप्तमीकृत्यमथाष्टम्यर्च्चनं शृणु ।
सप्तम्युक्तविधानं हि पूर्वमेवानुवर्त्तते ॥
अधिकं यत् तदाख्यास्ये सर्वमन्यत् पुरोक्तवत् ।
शोधनं द्रव्यजातानामासनादेस्तथैव च ॥
प्राणायामो भूतशुद्धिर्मातृकान्यास एव च ।
तथा पीठषडङ्गाख्यन्यासौ न्यासान्तराण्यपि ॥
विधाय पूर्वोक्तरीत्या च महास्नानं तथैव च ।

दर्पणे प्रतिविम्बं च कारयित्वा पुरोक्तवत् ॥
दन्तकाष्ठं निवेद्याथ संकल्पं विरचय्य च ।
अर्घसंस्थापनादीनि विधाय च पुरोक्तवत् ॥
समाप्यात्मार्चनं चापि घटे गणपतिं यजेत् ।
सूर्यादीनपि पञ्चायतनान् संपूज्य यत्नतः ॥
ध्यात्वाऽथ मानसैरेवोपचारैः परिपूज्य च ।
उपचारैः षोडशभिर्महामायां समर्चयेत् ॥
तैस्तैर्मन्त्रैस्तदनुक्रमतश्चापि पार्वति ।
मुद्राप्रदर्शनैस्तैस्तैरुपचारनिवेदनैः ॥
पीठमूर्त्योस्तान्त्रिकोक्तरीत्या पूजनमाचरेत् ।
पत्रिकासु च पौराणक्रमतो जगदीश्वरि ॥
कृत्वाऽवरणपूजां हि पीठे द्वाभ्यां समाचरेत् ।
नित्यनैमित्तिकोक्ताभ्यां महाष्टम्यर्चनक्रमे ॥
विशेषं कं चिदाख्यास्ये पत्रिकायाः प्रपूजने ।
पूर्वादिवसुकोणेषु दशोपचरणैर्यजेत् ॥
देव्याः शक्तीः क्रमेणैवोग्रचण्डाद्या विशेषतः ।
मन्त्रमालामयोसंस्थैर्मन्त्रैरासां तु कौलिकः ॥
नन्दिकेशपुराणोक्तैर्मनुभिः पद्यरूपिभिः ।
श्रुत्यध्वन्याः पूजयेयुरुग्रचण्डादिकाः प्रिये ॥
मनूँस्तदीयानधुना ब्रवीमि तव सुन्दरि ।
तारह्रीकमला आदौ मध्ये ङेन्ताभिधा तथा ॥
अन्ते हृन्मनुरेवं हि परिपाटी प्रकीर्त्तिता ।
उग्रचण्डा तु भयदा मध्याह्नार्कसमप्रभा ॥

सा मे सदाऽस्तु वरदा तस्यै नित्यं नमो नमः ।
प्रचण्डे पुत्रदे नित्यं प्रचण्डगणसंवृते ॥
जगदानन्ददे देवि प्रसन्ना भव सर्वदा ।
चण्डोग्रे *भूतरूपाऽसि सर्वभूतभयप्रदा ॥
सौम्या भूता मयि सदा वरदा भव शोभने ।
या सिद्धिरिति नाम्ना तु देवेशेन प्रकाशिता ॥
शासि त्वं साऽसि देवेशि नमस्ते चण्डनायिके ।
देवि चण्डात्मिके चण्डे चण्डारिविजयप्रदे ॥
धर्ममोक्षप्रदाऽसि त्वं नित्यं मे वरदा भव ।
या सृष्टिस्थितिसंहारगुणत्रयसमन्विता ॥
यस्याः परा न चान्याऽस्ति चण्डवत्यै नमो नमः ।
चण्डरूपा महाचण्डा चण्डनायकचण्डिका ॥
सर्वसिद्धिप्रदा देवि तस्यै नित्यं नमो नमः ।
बालार्कारुणनेत्रा या सर्वदा भक्तवत्सला ॥
चण्डासुरस्य मथनी वरदा साऽस्तु चण्डिका ।
ततोऽष्टदलपद्मस्य अष्टावृत्या दलेषु च ॥
यजेच्चतुःषष्टिमिता योगिनीगणरूपिणीः ।
तारत्रयं पुरो दत्वा शेषे नम इदं पदम् ॥
ङेन्तं ततो नाम तासां मध्ये कृत्वा नियोजयेत् ।
उपचारैः पञ्चभिर्वा पुष्पैर्वा केवलाक्षतैः ॥
ब्रह्माणी चण्डिका रौद्री गौरीन्द्राणी तथैव च ।
कौमारी भैरवी दुर्गा नारसिंही च कालिका ॥

---

* घोररूपाऽसि इति १, ४, ५, पु० पा० ।

चामुण्डा शिवदूतो च वाराही कौशिकी तथा ।
माहेश्वरी शङ्करी च जयन्ती सर्वमङ्गला ॥
करालिनी मुक्तकेशी शिवा शाकम्भरी तथा ।
भीमा शान्ता भ्रामरी च रुद्राणी चण्डरूपिणी ॥
क्षमा धात्री स्वधा स्वाहा अपर्णा च महोदरी ।
घोररूपा महाकाली विद्युज्जिह्वा कपालिनी ॥
क्षेमङ्करी महामाया मेघमाला बलाकिनी ।
शुष्कोदरी चण्डघण्टा महाप्रेता प्रियङ्करी ॥
*खरतुण्डी ऋक्षकर्णी बलप्रमथनी तथा ।
†मनोमथन्यपि तथा सर्वभूतदमन्यपि ॥
उमा तारा महानिद्रा विजया च जया तथा ।
शैलपुत्री महोल्का च त्रिशूलिन्यञ्जनप्रभा ॥
कूष्माण्डी विश्वसंत्रासा तथा कात्यायनी परा ।
कालरात्रिर्महागौरी चतुःषष्टिरिमा मताः ॥
पूजयेन्मण्डलस्यान्ते सर्वकामार्थसिद्धये ।
पुनश्च कोटियोगिन्यः पूज्या एकाख्यया प्रिये ॥
पद्मपत्राग्रहाग्रेषु पूर्ववन्मन्त्रकल्पनैः ।
ततो देवीसन्निधाने सम्यग्दुर्गा फलप्रदा ॥
ऐशान्यादिक्रमे द्वे द्वे मध्ये वा नव पूजयेत् ।
आसामप्युग्रचण्डादिवन्मन्त्रः परिकीर्त्तितः ॥
पाद्यादिभिः पूर्ववच्च तत्तन्मन्त्रैः प्रपूजयेत् ।

---

* खरकर्णी इति ४ पु० पा० ।

† मनोत्मथन्यपि इति सर्वपुस्तकेषूपलभ्यते ।

मृत्युञ्जयप्राणसंस्थैरथ पौराणिकैरपि ॥
पूर्वपक्षः कौलिकानामुत्तरः श्रुतिशालिनाम् ।
तन्मन्त्रानधुना वक्ष्ये सावधाना निशामय ॥
चतुर्मुखीं जगद्धात्रीं हंसारूढां वरप्रदाम् ।
सृष्टिकर्त्रीं महाभागां ब्रह्माणीं तां नमाम्यहम् ॥
वृषारूढां शिवां भद्रां त्रिनेत्रां वरदां शिवाम् ।
माहेश्वरीं नमस्यामि जगत्संहारकारिणीम् ॥
कौमारीं पीतवसनां मयूरवरवाहिनीम् ।
शक्तिहस्तां शोणदेहां नमामि वरदां सदा ॥
शङ्खचक्रगदापद्मधारिणीं कृष्णविग्रहाम् ।
स्थितिरूपां खगेन्द्रस्थां वैष्णवीं प्रणमाम्यहम् ॥
वराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम् ।
शुभदां नीलवसनां वाराहीं तां नमाम्यहम् ॥
नृसिंहरूपिणीं भीमां दैत्यदानवघातिनीम् ।
विकरालनखां शुभ्रां नारसिंहीं नमाम्यहम् ॥
इन्द्राणीं गजकुम्भस्थां सहस्रनयनां शुभाम् ।
नमामि वरदां देवीं सर्वदेवनमस्कृताम् ॥
चामुण्डां मुण्डमथनीं मुण्डमालोपशोभिताम् ।
अट्टाट्टहासमुदितां नमाम्यात्मविभूतये ॥
कात्यायनीं दशभुजां महिषासुरमर्दिनीम् ।
प्रसन्नवदनां देवीं वरदां प्रणमाम्यहम् ॥
चण्डिके नवदुर्गे त्वं महादेवप्रिये सदा ।
पूजां समस्तां संगृह्य रक्ष मां त्रिदशेश्वरि ॥

कात्यायन्याश्च दुर्गाया मन्त्रद्वयमिदं मतम् ।
इमे तेनैव मन्त्रेण पूजयेत् सुरवन्दिते ॥
पुनः पूर्वोक्तविधिना देवीरेकादशार्चयेत् ।
जयन्तीं मङ्गलां कालीं भद्रकालीं कपालिनीम् ॥
दुर्गां क्षमां शिवां धात्रीं स्वधां स्वाहां च पूजयेत् ।
ततोऽस्त्रपूजां कुर्वीत सप्तम्यर्चनतोऽधिकाम् ॥
प्रणवाद्यैर्नमोऽन्तैश्च मन्त्रैरेव सुरेश्वरि ।
आदौ तु दक्षिणे भागे ततो वामे प्रपूजयेत् ॥
पाद्यादिभिस्त्रिशूलादीन् केवलैरक्षतैरथ ।
सर्वायुधानां प्रथमो निर्मितस्त्वं पिनाकिना ॥
शूलसारं समाकृष्य कृत्वा मुष्टिग्रहं शुभम् ।
असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥
श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ।
चक्र त्वं विष्णुरूपोऽसि विष्णुपाणौ सदा स्थितः ॥
देवीहस्तगतश्चासि चक्रराज नमोऽस्तु ते ।
सर्वायुधानां श्रेष्ठस्त्वं दैत्यसेनानिषूदन ॥
भयेभ्यः सर्वदा रक्ष तीक्ष्णबाण नमोऽस्तु ते ।
शक्ते त्वं सर्वदेवानां गुहस्य च विशेषतः ॥
शक्तिरूपेण सर्वत्र रक्षां कुरु नमोऽस्तु ते ।
रक्षारूपेण खेट त्वमरिसंहारकारकः ॥
सदा देवीकरगत मां रक्ष बहुसङ्कटात् ।
सर्वायुधमहामात्र सर्वासुरनिषूदन ॥
चाप मां सर्वतो रक्ष साकं सायकसत्तमैः ।

पाश त्वं नागरूपोऽसि विषपूर्णो विषोदरः ॥
शत्रूणां दुःसहो नित्यं नागपाश नमोऽस्तु ते ।
अङ्कुशोऽसि नमस्तुभ्यं गजानां त्वं नियामकः ॥
देवानामपि रक्षार्थं पार्वत्याऽसि धृतः करे ।
यस्या निनादमाकर्ण्य शकृत्मूत्रे प्रसुस्रुवः ॥
दैत्यसङ्घाः पाहि सा त्वं घण्टे नानाविधाद्भयात् ।
परशो त्वमतितीक्ष्णोऽसि सर्ववैरिविमर्दन ॥
देवीहस्तगतश्चासि सदा तुभ्यं नमो नमः ।
यानि यानीह मुख्यानि प्रसिद्धान्यायुधानि च ॥
क्षयकारीणि शत्रूणां विख्यातानि जगत्त्रये ।
यानि यान्यम्बिका धत्ते करेषु स्वेषु सर्वदा ॥
भुशुण्डीपाशपरिघभिन्दिपालास्तु लागुडाः ।
ऋष्टितोमरकुन्ताश्च पट्टिशो मुशलस्तथा ॥
गदाशतघ्नीकुणपच्छुरिकाकर्त्तरीमुखाः ।
सर्वाँस्तान् पूजयाम्यद्य महाष्टम्यां विशेषतः ॥
सर्वे रक्षन्तु मां नित्यं सर्वसिद्धिं ददत्वपि ।
तारात् कूर्चाच्च दुर्गायै सर्वायुधपदान्यपि ॥
धारिण्यै नम उच्चार्य दद्यात् पुष्पाञ्जलित्रयम् ।
ततो देव्याः किरीटादीनलङ्कारान् प्रपूजयेत् ॥
ताराद्येन नमोऽन्तेन नाम्ना ङेन्तेन तस्य च ।
ततः प्रपूजयेद्देव्याः सिंहासनमनुत्तमम् ॥
ताराद्वज्रनखदंष्ट्रायुधाय परिकीर्त्य हि ।
महासिंहाय हुँ हृच्च सिंहमेतेन पूजयेत् ॥

यथोपकल्पितैरेवोपचारैः कुसुमाक्षतैः ।
तदन्ते मनुनैतेन देव्याः सिंहासनं यजेत् ॥
आसनं चासि देव्यास्त्वं घोरदंष्ट्रोत्कटान्वितः ।
हिमाद्रिशिखराकार सिंहराज नमोऽस्तु ते ॥
देव्या दत्तवरत्वेन विशेषान्महिषासुरम् ।
अष्टम्यां च नवम्यां च पूजयेद्बहुविस्तरैः ॥
यावच्छक्योपचारैस्तु पाद्यादिभिरनेकधा ।
नमोऽन्तः प्रणवादिश्च ङेन्तोऽन्तर्महिषासुरः ॥
एतेन मनुना सर्वोपचारानस्य चार्पयेत् ।
न सामान्यासुरधिया साक्षाद्रुद्रधियैव हि ॥
पूजान्ते कीर्त्तयेन्मन्त्रानमून् बद्धाञ्जलिः प्रिये ।
रुद्रोऽस्यसुरराज त्वं देवानां दर्पनाशकः ॥
पितुर्वरप्रार्थनया महिषीगर्भसम्भवः ।
कात्यायन्या समं योद्धुं सामर्थ्यं कस्य विद्यते ॥
केनासुरेण विधृतः समरे मधुसूदनः ।
केनान्येन विजित्याजौ त्रिदशाः सेवकीकृताः ॥
मन्वन्तरत्रयं केन भुक्तं राज्यमकण्टकम् ।
बभूव कस्य वा सेना परार्धशतसंमिता ॥
रुद्ररूपधरायातो महिषासुर ते नमः ।
ततः संपूजयेद्देवि चतुरो वटुकानपि ॥
सिद्धपुत्रं ज्ञानपुत्रं तथा सहजपुत्रकम् ।
शेषे समयपुत्रं च मन्त्रमेषां निशामय ॥
वेदादिकमलाबीजे पुरतोऽन्ते नमोऽपि च ।

तत्तन्नाम्ना सह तथा वटुको विग्रहीकृतः ॥
सङेन्त इति मन्त्राः स्युरेतेषां जगदीश्वरि ।
समस्तैरुपचारैस्तु यथाविभवकल्पितैः ॥
पूजयेद्वटुकानेताञ्छृण्वन्यावृत्तिपूजनम् ।
पूजयेत् क्षेत्रपालाँश्च मध्ये किञ्जल्कपक्षयोः ॥
हेतुकं त्रिपुरघ्नं च अग्निजिह्वं तथैव च ।
अग्निवेतालसंज्ञं च कालं चाथ करालकम् ॥
एकपादं भीमनाथमुत्तरादिक्रमेण तु ।
अधुना मन्त्रमेतेषां ब्रवीमि शृणु पार्वति ॥
तारकूर्च्चक्षेत्रपालबीजत्रयमिदं पुरः ।
एतन्नाम्ना सह पुनः क्षेत्रपालः सविग्रहः ॥
ङेन्तो महाभीषणश्च तद्वदेव प्रकीर्त्तितः ।
क्रोधो हृच्छिरसी चापि मन्त्र एषां वरानने ॥
मण्डलस्य चतुर्दिक्षु द्वौ द्वौ मध्ये च पूजयेत् ।
भैरवान् नव देवेशि शरदर्च्चनकर्मणि ॥
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च ।
आनन्दश्च कपाली च भीषणस्तदनन्तरम् ॥
संहारी सर्वशेषे स्यात् कीर्त्तिता नव भैरवाः ।
तारत्रपारोषबीजं तत्तन्नाम ततः परम् ॥
भैरवान्तं विग्रहि च ङेन्तं हृन्मन्त्रसंयुतम् ।
दिक्ष्वष्टसु बहिः पद्माद्दिगीशानष्ट पूजयेत् ॥
इन्द्रोऽग्निश्च यमश्चैव नैर्ऋतो वरुणस्तथा ।
वायुः सोमश्च ईशान एतन्नाम्ना परिस्थिताः ॥

वज्रं शक्तिश्च दण्डश्च खड्गः पाशोऽङ्कुशस्तथा ।
ध्वजशूले अमीषां तु शस्त्राणि कथितानि ते ॥
नैर्ऋतो वरुणश्चापि मध्येऽनन्तः प्रकीर्त्तितः ।
तदस्त्रं चक्रमुदितं यथेन्द्रेशानमध्यतः ॥
ब्रह्मा सपद्म इत्येते दिगीशा दश ईरिताः ।
मन्त्ररीती इदानीं त्वं समाकलय भामिनि ॥
प्रणवं पुरतो दत्वा तत्तन्नाम ततः परम् ।
ततः परं तत्तदस्त्रं सशब्दपरिबृंहितम् ॥
सवाहनपरीवारं सायुधं तदनन्तरम् ।
शब्दाश्चत्वार इत्येते ङेन्ताः कार्या नमस्ततः ॥
ततो दद्याद्बलिं देव्यै पूर्वोदितविधानतः ।
अष्टम्यामधिकं दद्यात् सप्तमीबलिदानतः ॥

तन्त्रान्तरे ।

ततो यथाशक्ति जपं कृत्वा स्तोत्रमुदीरयेत् ।

बलिदानविधिः स्तोत्रं चाग्रे वक्ष्यते ।

तथा ।

साष्टाङ्गं प्रणमेद्भूमौ देवीं भक्तिपरायणः ।

(निर्णयामृते) पुराणान्तरे ।

ततः खड्गं नमस्कृत्य शत्रूणां वधसिद्धये ।
इच्छेत विजयं राज्ये सुभिक्षं चात्मनो नृपः ॥
पुनः पुनः प्रणम्यार्यां संस्मरेद्धृदये शिवाम् ।
सर्वं कृत्वेति कौरव्य अष्टम्यां जागरं निशि ॥
*नटनाटकघोषैश्च कारयेच्च महोत्सवम् ।

नटनर्त्तकगीतैश्च इति ३, ४, ५ पु० पा० ।

अथाष्टमीनवम्योः सन्धौ चामुण्डापूजा ।

(महाकालसंहितायाम्)

अष्टमीनवमीसन्धौ कुर्वते केचिदर्चनम् ।
तत्सन्धिपूजनमिति पुराणादिषु कीर्त्तितम् ॥
नवम्यामर्धरात्रे वा तत्परेणापि पूजनम् ।
तान्त्रिकाः केचिदिच्छन्ति सिद्धिं तूभयथाऽर्चने ॥
चामुण्डारूपधारिण्यास्तत्र देव्यास्तु पूजनम् ।
विहितं नान्यरूपिण्याः कृत इत्येष निर्णयः ॥
तन्मन्त्रं ध्यानमस्यास्तु समाकल्प्य साम्प्रतम् ।

चामुण्डाया मन्त्रध्याने तन्त्रान्तरोक्ताष्टमातृकाप्रकरणे वक्ष्यामः ।

तथा ।

एवं ध्यात्वा च सम्पूज्य विविधोपायनादिभिः ।
शक्तौ तु मार्त्तिकीः स्थालीः पूरयेदन्नतेमनैः ॥
पक्वान्नैराममांसैश्च रुधिरैर्देयपक्षिणाम् ।
ताश्च संपूजयेद्गन्धै रक्तपुष्पाक्षतैरपि ॥
उपरिष्टाद्धूपदीपैरखिलैर्मनुभिश्च यः ।
वलिं समुत्सृजेत् तेन महतीं श्रियमश्नुते ॥
शक्तियामे ततः पश्चात् केचित् कुर्वन्ति कौलिकाः ।
तद्विधानं पुरैवोक्तं तेनैवैतां समापयेत् ॥

अथ नवमीकृत्यम् ।

(भविष्यपुराणे)

नवम्यां श्रीसमायुक्ता देवैः सर्वैः सुपूजिता ।
जघान महिषं दुष्टमवध्यं देवतादिभिः ॥
लब्ध्वाऽभिषेकं वरदा शुक्ले चाश्वयुजस्य च ।

तस्मात् सा तत्र सम्पूज्या नवम्यां चण्डिका बुधैः ॥
महत्त्वं हि यतः प्राप्ता तत्र देवी सरस्वती ।
तदर्थं महती प्रोक्ता नवमीयं सदा बुधैः ॥
पूजयित्वा महादेवीं नवम्यां मन्त्रचण्डिकाम् ।
महत्त्वं प्राप्तवान् वीर ब्रह्मा विष्णुस्तथाऽमराः ॥
तस्मादियं महापुण्या नवमी पापनाशिनी ।
उपोष्या तु प्रयत्नेन सततं सर्वपार्थिवैः ॥
पूर्वोत्तरेण ऋक्षेण संयुक्ता विधिवन्नृप ।
विशेषतो नृपाद्यैश्च बालैर्वृद्धैः सयौवनैः ॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च सेवकैः ।

इत्यादि (दुर्गोत्सवपद्धतिः) ।

तन्त्रान्तरे ।

ततो महानवम्यां च पूजयेज्जगदम्बिकाम् ।
अष्टम्यां यावती प्रोक्ता विस्तरेण समर्हणा ॥
नवम्यामपि कर्त्तव्या तावत्येव वरानने ।
विशेषस्तत्र कर्त्तव्यं प्रभूतबलिदानकम् ॥

(महाकालसंहितायाम्)

नैमित्तिकक्रमेणैव पीठमूर्त्त्यर्च्चनं चरेत् ।
शक्तौ नित्योदितावृत्त्यर्च्चनं कुर्वीत साधकः ॥
नान्यां पूजां वरारोहे व्यवस्थेयं शिवोदिता ।
पीठमूर्त्तौ पत्रिकामृन्मूर्त्तौ यो भक्तिभावितः ॥
कुरुते तस्य विहितं पूजनद्वितयं तदा ।
पत्रिकायाः पुरः पूजा पीठमूर्त्त्योस्ततः परम् ॥
सर्वाऽपि तान्त्रिकी रीतिः पीठमूर्त्त्योरुदीरिता ।

पत्रिकादिषु पौराणी रीतिरुक्ता पुरारिणा ॥
असंसृष्टं पृथक्कृत्य द्वयमेतन्मयोदितम् ।
ततः परं सुरेशानि पाठयेदथ वा पठेत् ॥
मार्कण्डेयपुराणान्तर्गतां भगवतीस्तुतिम् ।
समग्रां वा पठेदाहो वधं शुम्भनिशुम्भयोः ॥
महिषासुरस्याप्यथ वा मधुकैटभयोरपि ।
कुर्यादुभयमेवात्र विधिं संकल्पपूर्वकम् ॥
ब्राह्मणान् वरयित्वैव वस्त्रालङ्करणासनैः ।
विदध्यात् कामनोल्लेखं पूजां शक्त्या च पुस्तके ॥
शनैः पठेत् पाठकोऽपि वर्णोच्चारणपूर्वकम् ।
सुव्यक्तं नातिविश्लिष्टं न शिरश्चालगीतवत् ॥
तनु मान्दोलयन् नापि न हसन् न रुदन् व्रजन् ।
नाश्नन्नान्यैरालपँश्च न मध्ये च्छिन्नवत् तथा ॥
आचान्तः कृतशौचश्च पदोरुद्गमनीयवान् ।
एतेन विधिनाऽधीते तुष्यते जगदम्बिका ॥
यथोक्तफलदात्री च भवति प्राणवल्लभे ।
यथैतत्पाठतो देवी प्रीता स्याद्द्रुतमीश्वरी ॥
न तथा धूपदीपस्रग्बलिनैवेद्यविस्तरैः ।
पठनं पाठनं वाऽपि तस्मादेतस्य यत्नतः ॥
कार्यं शारदपूजायां कालिकातुष्टिमिच्छता ।
देवीशारदपूजायां यथैतस्य हि नित्यता ॥
होमस्यापि तथा ज्ञेया मुख्ये अङ्गे इमे मते ।
हस्तमात्रं विधायादौ स्थण्डिलं श्रद्धया मृदा ॥

तत्राग्निस्थापनं कृत्वा वैदिकैर्मनुभिः प्रिये ।
घृताहुतिं वा जुहुयात् तिलमिश्रामथापि वा ॥
विल्वपत्रं यवां पद्मं पायसं वा मधूक्षितम् ।
मन्त्रस्तत्र तु विज्ञेया भारती षोडशाक्षरी ॥
अथ वा जयदुर्गाया मन्त्रो यः परिनिष्ठितः ।

भारती षोडशाक्षरीति प्रकृताभिप्रायेण । जयदुर्गामन्त्रस्तु सकलसाधारण इति बोध्यम् ।

तथा ।

सप्तशत्यास्तथा देवी एकैकश्लोक एव वा ।
मन्त्रे सहस्रसंख्या स्याच्छक्तावयुतमेव वा ॥
उभयत्रापि दातव्याः कर्मान्ते दक्षिणाः शुभाः ।
इदं कर्मद्वयं देवि मूर्तेः पुरत आचरेत् ॥
नाप्यदो द्वितयं कार्यं क्षपायां वासरादृते ।
तस्यां कृतं तु विफलं जायते वेदशासनात् ॥
देवी सप्तशतीपाठं गृह्णाति विधिवत् कृतम् ।
विधिना वाऽप्यविधिना पुनर्होमं प्रयच्छति ॥
तस्माद्यत्नेन कर्त्तव्यो होमः शारदपूजने ।
होमः सप्तशतीपाठो वलिर्वादित्रवादनम् ॥
चतुष्टयमिदं शस्तं मासीषे कालिकार्च्चने ।
प्रभूतवलिदानं च कार्यं भूत्यनुसारतः ॥

अथ वलिदानविधिस्तत्रैव ।

ततो दद्याज्जीववलिं यथालाभं यथाविधि ।
विधिस्तु द्विविधः प्रोक्तः श्रौत आगमिकस्तथा ॥
श्रौतः श्रुत्युक्तमन्त्रेणागमस्तन्त्रोक्तमन्त्रकैः ।

श्रौतोऽपि स्वस्वगृह्योक्तविधिना संप्रदीयते ॥
पशुजातिविशेषेण तत्राप्यस्ति भिदाऽधिका ।

(मेरुतन्त्रे)

वलिस्तु त्रिविधो ज्ञेयस्तान्त्रिकः स्मार्त्त एव च ।
वैदिकश्चेति तत्रादौ तान्त्रिकोऽष्टविधः स्मृतः ॥
नरश्च महिषः कोलश्छागोऽविः सारसस्तथा ।
कपोतः कुक्कुटश्चेति सामान्याः पूर्वपूर्वतः ॥

तथा ।

कूष्माण्डं नारिकेलं वा श्रीफलं चेक्षुमेव च ।
वस्त्रसंवेष्टितं कृत्वा छेदयेच्छुरिकादिभिः ॥
एवं स्मार्त्तो वलिः प्रोक्तो धर्मशास्त्रानुगामिनाम् ।

तथा ।

वैदिकं तु वलिं दद्यादोदनं स्विन्नमाषवत् ।
सरोचनमतिक्रूरदैवते वटकान्वितम् ॥

इत्युक्तं (महाकालसंहितायाम्) ।

श्रौतः श्रुतिषु सन्धेयो योऽध्वरेषु निरूपितः ।
वक्ष्याम्यागमिकं सर्वं यागस्थानक्रमागतम् ॥
न स देवो न सा देवी देवयोनिभिदा न सा ।
न स कालो न तद्भूतं यो नेच्छति वलिं प्रिये ॥
अमूर्त्ता ये च कालाश्च माससंवत्सरर्त्तवः ।
पक्षायनाहोरजनीतिथिप्रहरसंक्रमाः ॥
एतेऽपि वलिमिच्छन्ति किं पुनर्देवयोनयः ।
वनस्पत्योषधिलतातरुगुल्मनगादयः ॥
स्थावरा जङ्गमाश्चापि वल्याकाङ्क्षां प्रकुर्वते ।
यस्य यस्य हि देवस्य यो यो वलिरुदीरितः ॥

एतत्प्रसङ्गेन शिवे स स कश्चन कथ्यते ।
स्वयम्भुवो बलिः सिंहो विष्णोर्वार्ध्रीणसः स्मृतः ॥
अश्व इन्द्रस्य कथितो गण्डकः परमेष्ठिनः ।

विष्ण्वादिमुद्दिश्य वार्ध्रीणसादेरुत्सर्गमात्रं न तु हिंसेति विधानमुक्तावलीकृतः ।
वार्ध्रीणसलक्षणं त्वग्रे वक्ष्यते ।
तथा ।

शूकरो भैरवस्यापि प्रमथानां च जम्बुकः ।
प्रियो द्वीपी वेधसश्च चित्रको बलिरिष्यते ॥
गणाध्यक्षस्य भल्लूको यक्षाणां लोहितो मृगः ।
स्कन्दस्य गोधा विश्वेषां देवानां चमरोऽपि च ॥
विनायकानां च बलिः कृष्णसार उदीरितः ।
वेतालानां च महिषो गुह्यकानां च सम्बरः ॥
शच्याः शल्यो रोहिषस्तु तुषितानां प्रकीर्त्तितः ।
कृकलाशो दानवानां दैत्यानां श्येन उच्यते ॥
हिरण्यगर्भस्य बलिरष्टापद उदीर्यते ।
ईशानस्य पदस्वर्चा रुरू रुद्रस्य कीर्त्त्यते ॥
बलिर्ममापि गोकर्णः साध्यानां गवयस्तथा ।
सृमरो भासुराणां च वसूनामृक्ष इष्यते ॥
बृहस्पतेस्तु गवयो हस्ती चैव प्रजापतेः ।
कुरङ्गो गणसाध्यानां तक्षण उष्ट्रो निगद्यते ॥
श्राद्धीयविश्वदेवानां वृषभः परिकीर्त्तितः ।
अग्नेस्तु कुटरुः पक्षी चक्रवाकः प्रचेतसः ॥
पारुष्णो गार्हपत्यस्य दक्षिणाग्नेस्तु चीनकः ।
चमूरुराहवनीयस्य शशोऽर्यम्ण उदीरितः ॥

वायोर्वलाका सोमस्य हंसश्चन्द्रस्य वै लवः ।
वरुणस्य तथा नक्रो मित्रस्य च कुलीयकः ॥
चाषोऽग्नीषोमयोर्ज्ञेय इन्द्राग्न्योः क्रौञ्च एव च ।
मित्रमित्रस्य मद्गुः स्यात् कुलीकस्त्वष्टुरेव हि ॥
आदित्यानां तथा न्यङ्कुः कृष्णोऽपि हि यमस्य च
स्यात् प्राजापत्यवाय्वोश्च गोमृगौ बलिरीश्वरि ॥
नासत्ययोर्मयूरोऽपि पूष्णो जम्बुक उच्यते ।
गर्दभो निर्ऋतेर्मित्रावरुणस्य कपोतकः ॥
गोधादि देवपत्नीनां मालिकः सवितुस्तथा ।
कुलीको दैत्ययोनीनां राजज्ञोऽप्सरसामपि ॥
अन्तरिक्षस्य योक्त्रस्तु भूमेराखुर्दिवः कशा ।
दिशां बलिस्तु नकुलो विदिशां बभ्रुरेव च ॥
अपां मत्स्यस्तेजसस्तु होमीयाख्यो भुजङ्गमः ।
जलः सामान्यकालस्य तथा कालस्य चिल्लिका ॥
सुपर्णश्चापि दात्यूहो बलिर्वत्सरमासयोः ।
कपिञ्जलो वसन्तर्त्तोर्ग्रैष्मस्य कलविङ्ककः ॥
वर्षाणां तित्तिरिर्ज्ञेयः शरदो वर्त्तिका तथा ।
ऋकरश्चापि हैमन्तः शैशिरो वैककर्यपि ॥
पक्षस्य खञ्जरीटः स्यादयनस्य तु सारसः ।
पारावतो दिनस्यापि रात्रेः सीरायुरुच्यते ॥
प्रोक्ता जलौका सन्ध्याया यैज्ञराजस्तिथेरपि ।
यामस्य सुखिलोकस्तु संक्रान्तेरन्यपायकः ॥
किरीकको ग्रहाणां च नक्षत्राणां शरव्यकः ।

राशीनामपि साकल्यो लग्नानामपि चुञ्चुटः ॥
शिशुमारः समुद्रस्य नदीनां च तिमिङ्गिलः ।
आवर्त्तानां च मकरो विघ्नीनां शङ्खलोऽपि च ॥
उष्ट्रः पातालदेवस्य शङ्कुर्वै ताण्डवस्य च ।
पर्जन्यानां च मण्डूको वृष्टेरपि महीलताः ॥
विद्युतामपि सम्बूको भारद्वाजोऽशनेरपि ।
सिनीवालीकुहूराकानुमतीनां क्रमेण हि ॥
शरादिकङ्कहारीतजीवञ्जीवाः प्रकीर्त्तिताः ।
बलिः कलञ्जः प्रेतानां पिशाचानां वकोऽपि च ॥
भूतानां कुररश्चापि कुक्कुटो ब्रह्मरक्षसाम् ।
गन्धर्वाणां कोकिलोऽपि घोणकानां च वायसः ॥
वर्त्तकः क्षेत्रपालानां वटुकानां च कुक्कुटः ।
यावत्यो जातिहारिण्यस्तासां भारुण्ड उच्यते ॥
छुच्छुन्दरीह्यश्मनः स्याज्जलस्य शरभो बलिः ।
चिल्लो बलिर्डाकिनीनां किन्नराणां च तक्षकः ॥
भूलिङ्गो योगिनीनां स्यान्निधीनां टिट्टिभो बलिः ।
इन्द्रियाणामथो वच्मि चक्षुषोर्मशको बलिः ॥
श्रोत्रयोर्भ्रमरश्चापि घ्राणस्य सरघास्तथा ।
रसनाया बलिश्चिक्का मक्षिका च त्वचो बलिः ॥
पतङ्गो मनसश्चापि प्लुषिर्वाचो बलिर्मतः ।
झिल्लीकीटो बलिः पाण्योः खद्योतः पदयोरपि ॥
पायोर्यूका समुद्दिष्टा उपस्थस्य सिनीपतिः ।
वनस्पतीनां मधुको लतानां तैलपायिका ॥

मत्कुणा ओषधीनां स्युस्तृणानां च पिपीलिका ।
गुल्मानां गन्धकीटोऽपि शैलानां वुद्गतास्तथा ॥
शवो बलिः पूतनाया राक्षसीनामहिर्बलिः ।
जातमात्रशिशुः षष्ठ्याः शङ्खो बालग्रहस्य च ॥
चकोरो गरुडस्यापि मातॄणां तैलपायिका ।
विद्याधराणां च कोलो यज्ञानां शुक एव च ॥
गृध्रोऽरुणस्य च वलिर्नरकस्य करेटुकः ।
राज्ञो वलिर्मर्कटोऽपि कान्तारस्य प्लवः खगः ॥
सर्वेषामेव देवानां देवीनां च विशेषतः ।
बलित्वेन विनिर्दिष्टा महिषच्छागलादयः ॥
जलजाः स्थलजाश्चापि ग्रामजारण्यजास्तथा ।
पशवः पक्षिणः कीटास्तिर्यग्योनय एव च ॥
इमे विधात्रा विहिता बलित्वेन दिवौकसाम् ।
नान्यैर्नैवेद्यसम्भारैस्तथा तुष्यन्ति देवताः ॥
यथा पशूनां बलिभिर्विहङ्गानां तथैव च ।
अत एव हि देवेशि मीमांसावेदयोरपि ॥
देवानां प्रियशब्दस्तु पशुपर्याय उच्यते ।
एवं विज्ञाय सिद्धान्तं देव्याः सन्तोषहेतवे ॥
पशून् दद्याद्बलित्वेन मेध्यानपि विहङ्गमान् ।
क्रिमिकीटादयः सर्वे ये तिर्यञ्चः प्रकीर्त्तिताः ॥
न ते देवीबलित्वेन विधात्रा विहिताः प्रिये ।
आलभेत वृषं श्वेतं यज्ञे गोमेधनामनि ॥
नरमेधे नरं चापि गजक्रान्ते गजं तथा ।

अश्वमेधे तथैवाश्वं शङ्खचूडे च हस्तिनम् ॥
ब्रवीति यत्र वेदोऽपि तत्र कैव विचारणा ।
तस्मान्नैमित्तिकार्चायां बलिरावश्यकः प्रिये ॥
विशेषेण प्रदात्तव्यो देवीसन्तोषहेतवे ।
बलिं विना नैव देवी पूजामङ्गीकरोति हि ॥
तत्राप्युभौ प्रशस्येते महिषश्छाग एव च ।
अन्यदेवोचितबलिर्विचारैः किं प्रयोजनम् ॥
येन सन्तुष्यते काली तं विचारं ब्रुवेऽधुना ।
याः काश्चिद्गुह्यकाल्यास्तु विहिताः पशुजातयः ॥
आरण्या अथ वा ग्राम्या जलजानां च जातयः ।
खगानां जातयश्चापि ता एवादौ ब्रवीमि ते ॥
मत्स्या मृगा वराहाश्च कच्छपा महिषास्तथा ।
गण्डका गोधिका ग्राहाः शार्दूला हरयोऽपि च ॥
नकुलाः शरभश्चापि गवयाश्छागलास्तथा ।
मनुष्याः पक्षिणश्चापि तेषां कोशा अपि प्रिये ॥
भगवत्या बलित्वेन विधात्रा बलिकल्पिताः ।
एतेषां बलिदानेन सर्वकार्याणि साधयेत् ॥

बलिदानफलान्याह ।

बलिभिर्वर्धते ह्यायुर्बलिभिः शाम्यते रुजा ।
जयत्यरातीन् बलिभिः प्राप्यते बलिभिर्धनम् ॥
सिद्धिमाप्नोति बलिभिर्बलिभिस्त्रिदिवं व्रजेत् ।
निष्कामाणां बलौ दत्ते प्राप्यो मोक्षोऽपि यज्ञवत् ॥

मत्स्यादीनां जातिभेदानाह ।

जातिभेदानथो वक्ष्ये समासादवधारय ।

अष्टादशभिधा मत्स्याश्चतुर्विंशतिधा मृगाः ॥
वराहाः पञ्चधा प्रोक्तास्त्रिभेदाः कच्छपा अपि ।
द्विभेदा महिषास्तद्वद्गण्डकाश्च चतुर्विधाः ॥
गोधिका च त्रिभेदा स्याद्द्विभेदो ग्राह एव च ।
त्रिविधौ व्याघ्रसिंहौ च नकुलो द्विविधोऽपि च ॥
शरभश्चैकजातिः स्यान्नास्य भेदो वरानने ।
गवयस्त्रिविधः प्रोक्तश्छागः पञ्चविधो मतः ॥
चतुर्विधा मनुष्याश्च षट्त्रिंशज्जातयः खगाः ।
क्रमेण नामान्येतेषां व्याहरामि तव प्रिये ॥
शङ्कुलो रोहितः शालः पाठीनो राघवोऽपि च ।
प्रोष्ठी नालशिशुच्छ्यङ्कमेरेटाङ्कुलिचाम्बटाः ॥
तिमिभाकूटराजीवगडकाः शस्तजातयः ।
गोकर्णकृष्णसारैणरुरुन्यङ्कुचमूरवः ॥
प्रियवातप्रमीचीनसमूहस्त्मरक्षषाः ।
रङ्कुशम्बरकन्दल्यः सुखरो रोहिषो वटः ॥
कदल्येन विसालाक्षपतङ्गोल्लाटरोहिताः ।
वराहास्तब्धकक्रोडकुशाक्षीणजलस्वनाः ॥
कूर्मश्चित्री चित्रकटो वामनश्चेति वै त्रिधा ।
अकेरः क्षीरिलश्चापि महिषो द्विविधो मतः ॥
कौञ्जरो वारिलश्चामीं वैशः खड्गाश्चतुर्विधाः ।
हिरण्या किलिका मोना गोधिका त्रिविधा मता ॥
दीर्घग्रीवश्चर्मपूरो ग्राहो द्विविध एव च ।
तरक्षुस्तरलश्चित्रो व्याघ्रस्त्रिविध उच्यते ॥

शरलः कृकयुर्मेदी सिंहोऽपि त्रिविधो मतः ।
स्थूलः कलिङ्गश्च तथा नकुलोऽपि द्विधेरितः ॥
एकजातिं विना नैव शरभोऽन्यः प्रजायते ।
लाटिको विट्चरः साक्षी गवयोऽपि त्रिधोच्यते ॥
त्रिपिवः पालितः क्षौरी वर्क्करो मारिषस्तथा ।
पञ्चभेदो भवेच्छागोऽविरपि त्रिविधो मतः ॥
उर्मिकः पारिशो भेटो मनुष्यानपि मे शृणु ।
न मनुष्यत्वसामान्ये चातुर्विध्यं हि वर्त्तते ॥
प्रकारभेदतस्तस्या भिन्नता परिकल्पते ।
चण्डिकानुगृहीतस्य वितृष्णस्य भवाम्बुधौ ॥
तत्तल्लोकावाप्तिफलश्रवणोत्कण्ठितस्य च ।
स्वतः प्रवृत्तिर्देव्यास्तु बलिरूपो भवाम्यहम् ॥
आगत्य च स्वयं ब्रूते मां बलित्वेन योजय ।
प्रत्यक्षमेव सर्वेषां नृपस्य च विशेषतः ॥
स एक उदितो देवि द्वितीयमवधारय ।
बहुवित्तस्य रत्नादेस्तेनो लोकधूर्तश्च यः ॥
निर्णीय परिषन्मध्ये प्राग्विपाकेन कीर्त्तितः ।
शीर्षच्छेद्यतया देवि द्वितीयः स निगद्यते ॥
युद्धे जितो धृतः शत्रुः कूटयोधी भटाकृतिः ।
स तृतीयो विनिर्दिष्टश्चतुर्थमवधारय ॥
य आततायी पान्थानां कान्तारेऽप्यथ वा गृहे ।
विदितश्चापि निर्णीतः साक्षिभिः सत्यवादिभिः ॥
स हि तुर्यः समाख्यातः पञ्चमो नोपपद्यते ।

वक्ष्ये विहङ्गान् ये देव्यै वलित्वेन निरूपिताः ॥
पारावतास्ताम्रचूडा हंसा वार्ध्रीणसास्तथा ।
उलूका लोहपृष्ठाश्च सर्वांघाटाश्च सारसाः ॥
कलविङ्काश्चकोराश्च चक्रवाकाः शुका अपि ।
शतपत्रा भरद्वाजा भूलिङ्गाश्चटकास्तथा ॥
कारण्डवाश्चक्रवाकाः पारुश्वाश्च कुलीयकाः ।
प्लवाः कुटरवश्चापि वर्त्तकाः कुक्कुभा अपि ॥
तित्तिर्युरुकक्रौञ्चाश्च नवचाषशिखण्डिनः ।
योक्त्रदात्यूहसाकल्यपैङ्गराजन्यवायकाः ॥
जिहीका सुखिलीकाश्च मद्गुहारीतवर्त्तकाः ।
जीवञ्जीवाश्च हारीताः कोयष्ट्यश्मटटिट्टिभाः ॥
वककोकिलगृध्राश्च करेटुश्चोनखञ्जनाः ।
चिरीकाश्चैव जहिकाः सीचापुञ्जन्तमेकलाः ॥
कशाः सुपर्णा भारुण्डा हामायाश्चापि-पार्वति ।
इति ते कथिताः सर्वे षष्टिभेदा विहायसाम् ॥
देव्यै योग्यबलित्वेन नान्य उक्ता विहङ्गमाः ।
एतेषां जातिभेदास्तु वर्त्तन्ते डामरादिषु ॥
बहुत्वात् ते न कथ्यन्ते ग्रन्थगौरवभीतितः ।
कपोतभ्रामका बङ्कमनिरथतुरुकादयः ॥
पारावतास्तु दशधा हंसाः पञ्चविधास्तथा ।
राजहंसा मल्लिकाख्या धार्त्तराष्ट्राः परिस्फुटाः ॥
माल्लेया एवमन्येऽपि ज्ञेया विगहजातयः ।
तथा ।
अधुना संप्रवक्ष्यामि बलिना येन येन हि ।

यं यं कालमभिव्याप्य तुष्टा भवति कालिका ॥
*अष्टादशविधैर्मत्स्यैः कच्छपैरपि चण्डिका ।
तृप्यते मासमात्रं हि बलित्वेन नियोजितैः ॥
ताम्रचूडस्य बलिना हंससारसयोरपि ।
तृप्ता भवति मासौ द्वौ त्रीन् मासान् द्वीपिनक्रयोः ॥
कलविङ्कैरुलूकैः स्यात् तृप्ता मासचतुष्टयम् ।
पञ्च मासान् भवेत् तृप्ता शुकैः पारावतैरपि ॥
दार्वाघाटैश्चकोरैश्च षण्मासाँस्तृप्तिमाप्नुयात् ।
तृप्यते सप्त मासान् सा जिहीकैश्च कुलीयकैः ॥
चतुर्विंशतिभेदैश्च कुरङ्गैर्गवयैरपि ।
मासानष्टौ भवेत् तृप्ता नव मासान् पिकैरपि ॥
हारीतबलिना देवी दश मासाँश्च तृप्यते ।
तथा दात्यूहदानेन गजराजैर्वरानने ॥
मासानेकादश शिवा तृप्तिमायाति सिद्धिदा ।
गोधिकाबलिदानेन तृप्ताऽब्दं व्याप्य जायते ॥
अविना नकुलेनापि त्र्यब्दं तृप्ता भवेदपि ।
आजेन बलिना वाऽपि तुष्टा स्यात् पञ्चवत्सरम् ॥
जीवञ्जीवेन पाङ्गेन तुष्यतेऽष्टौ च हायनान् ।
पार्षतैणैन बलिना वराहबलिनाऽपि च ॥
द्वादशाब्दमभिव्याप्य तुष्टा भवति कालिका ।
हामायनामा यः पक्षी सिंहाकृतिधरोऽरुणः ॥
तद्दानात् तुष्यते देवी पञ्चविंशतिवत्सरम् ।

---

* मत्स्यादिभेदाः पशुभेदाश्च पूर्वमुक्ताः स प्रति तेषामप्रचारात् तन्नामानि (शब्दकल्पद्रुमवाचस्पत्याभिधानादिष्वपि) सर्वाणि नोपलभ्यन्तेऽतः पुस्तकस्थान्येव रक्षितानि ।

त्रिविधैरपि शार्दूलैर्महिषैर्द्विविधैरपि ॥
चतुर्विधैस्तथा खड्गैर्बलित्वेन समर्पितैः ।
शतं संवत्सरं यावच्चण्डिका प्रीतिमश्नुते ॥
एको वार्ध्रीणसोऽजश्च विशेषः परिकीर्त्यते ।
अपरः पक्षिजातीयो हिमवच्चरणस्थितः ॥
वृद्धः श्मश्रुधरः श्वेतः पादस्फोटीन्द्रियोज्झितः ।
त्रिविधो रक्तरसनो निःशृङ्गः स्वरभङ्गयजः ॥
पीतचञ्चू रक्तशिराः सितपक्षोऽसिताङ्घ्रिकः ।
नीलग्रीवः पाटलाभगलो वार्ध्रीणसः खगः ॥

(कालिकापुराणेऽपि)

त्रिपिवं त्विन्द्रियक्षीणं श्वेतं वृद्धमजं परम् ।
वार्ध्रीणसं विजानीयाद्धव्यकव्येषु संस्कृतम् ॥
नीलग्रीवो रक्तशिराः कृष्णपादः सितच्छदः ।
वार्ध्रीणसः स पक्षी स्यान्मम विष्णोरपि प्रियः ॥

(महाकालसंहितायाम्)

अजवार्ध्रीणकैस्तुष्टा भवेत् त्रिंशतिवत्सरम् ।
निरङ्कसामान्यशशैर्बलित्वेन निरूपितैः ॥
जायते गुह्यकाली सा तुष्टा पञ्चशतं समाः ।
शरभैरथ सिंहैश्च शोणितैश्च स्वदेहजैः ॥
दत्ते सन्तुष्यते काली सहस्रं परिवत्सरान् ।
वार्ध्रीणसविहङ्गेन दत्तेन विधिना प्रिये ॥
अब्दं द्वादशसाहस्रं तुष्यते जगदम्बिका ।
चौराततायिरूपेण नारेण बलिना तथा ॥
त्रीणि लक्षाणि वर्षाणां प्रीतये गुह्यकालिका ।

एते ते कथिता देवि बलयस्तृप्तिहेतवः ॥

अथ निषिद्धबलयस्तत्रैव ।

अदेयानधुना वक्ष्ये पशूनपि विहङ्गमान् ।
भल्लूकान् मर्कटान् फेरून् सर्पानोतून् शुनस्तथा ॥
क्रमेलकाँश्च बालेयान् शल्यान् विट्चरशूकरान् ।
जलजेष्वपि मण्डूकान् रासभान् शिशुमारकान् ॥
कुलीरान् दीर्घपृष्ठादीन् मीनानपि च भूरिशः ।
खगेषु वायसाँश्चिल्लान् दुर्विदान् कुलिकानपि ॥
एवमन्येऽपि विज्ञेया नानाशास्त्रागमादिषु ।

तथा ।

काँश्चिन्निषिद्धान् वक्ष्यामि विहितेषु बलिष्वपि ।
ग्राम्याणामथ वन्यानां पशूनां पक्षिणां तथा ॥
स्त्रियं नैव प्रयुञ्जीत बलिकर्मणि साधकः ।
ज्ञानपूर्वं बलिं दत्वा नरकं प्रतिपद्यते ॥
अज्ञानेन वितीर्यापि किञ्चित् पापं समश्नुते ।
अत्रिमाससमुत्पन्नं पशुं न विनिवेदयेत् ॥
न्यूनं तदर्धान्न खगं जातु देव्यै समर्पयेत् ।
भग्नशृङ्गं भग्नदन्तं छिन्नलाङ्गूलमेव च ॥
काणं व्यङ्गं रोगिणं च शृङ्गाहतनरं तथा ।
दुष्टं गलितरोमाणं क्षीरपं च गलद्विशम् ॥
पशुं न दद्याद्दीदृक्षं तथा चैव विहायसम् ।
छिन्नत्रोटिं छिन्नपक्षं रुग्णमाहारवर्जितम् ॥
अनुड्डीनं तथाऽऽकाशे मातुरङ्के परिस्थितम् ।
विहितावपि विज्ञातौ न दद्यात् पशुपक्षिणौ ॥

तन्त्रान्तरे ।

कृष्णवर्णो बलिर्यस्तु श्वेतपुच्छो यदा भवेत् ।
छागलं तादृशं विद्वान् दूरतः परिवर्जयेत् ॥
एवं सितं कृष्णपुच्छं वर्जयेत् मतिमान् सदा ।

(महाकालसंहितायाम्)

यस्य यस्य निषिद्धो यः स इदानीं निरूप्यते ।
नरं कंशरिणं व्याघ्रं चाषं खञ्जनमेव च ॥
स्वकीयरुधिरं मद्यं न दद्याद्ब्राह्मणः क्वचित् ।
तौ द्वौ खगौ तथा सिंहं द्वीपिनं मानुषं तथा ॥
दत्वा रोगी च हीनायुर्भूत्वा नरकमश्नुते ।
आत्महत्यामवाप्नोति दत्वा स्वरुधिरं द्विजः ॥
दत्वा देव्यै द्विजो मद्यं ब्राह्मणाद्विच्युतो भवेत् ।
चाण्डालत्वमवाप्नोति सर्वकर्मविवर्जितः ॥
न कृष्णसारं वितरेद्बर्हिणं च नराधिपः ।
कृष्णसारं ददद्देव्यै द्वितीयो वर्ण ईश्वरि ॥
ब्रह्मघ्नत्वमवाप्नोति सर्वकर्मविवर्जितः ।
न वैश्याः शूकरं दद्युर्न वर्त्तककुलीयकौ ॥
ददतां तत्क्षणादेव महापातकता भवेत् ।
वर्णोऽपरो नो वितरेद्गोधिकाशुकखड्गिनः ॥
मूषं मार्जारकं चाषं शूद्रो दत्वा पतत्यधः ।
मोहाद्धठाद्वा ददतां सद्यो ब्रह्मघ्नता भवेत् ॥
वानप्रस्थो ब्रह्मचारी गृहस्थो वा दयापरः ।
सात्त्विको ब्रह्मनिष्ठश्च यश्च हिंसाविवर्जितः ॥
ते न दद्युः पशुबलिमनुकल्पं चरन्त्यपि ।

अनुकल्पेऽपि मुख्येऽधिकारिण एवाधिकार इति प्रागुक्तम् ।
अनुकल्पविधिस्तु तत्रैवोक्तो यथा ।

सात्त्विको जीवहत्यां हि कदा चिदपि नो चरेत् ।
इक्षुदण्डं च कूष्माण्डं तथा वन्यफलादिकम् ॥
क्षीरपिण्डैः शालिचूर्णैः पशुं कृत्वा चरेद्बलिम् ।
तत्तत्फलविशेषेण तत्तत्पशुमुपानयेत् ॥

तथा ।

महिषत्वेन कूष्माण्डं छागत्वेनैव कर्कटीम् ।
वृन्ताकं कुक्कुटत्वेन मेषत्वेन च तुम्बिकाम् ॥
रम्भापुष्पं बीजपूरं पिण्डं जीवं कलौ भवेत् ।
मानुषत्वेन पनसं मत्स्यत्वेनेक्षुदण्डकम् ॥
शूरणं शम्बरत्वेन तथा कोशातकं मृगे ।
पायसं तु गजत्वेन मार्जारत्वे कुलित्थकम् ॥
पटोलं शूकरत्वेन शर्करावालुकं तथा ।
खड्गत्वेन महेशानि मत्स्यत्वे कदलीफलम् ॥
मूषत्वे मूलकं चैव सारङ्गत्वे कलिङ्गकम् ।
करित्वे नारिकेलं च कल्पयेत् परमेश्वरि ॥
माषाः सर्वबलित्वेन सर्वेषां कृशरान्नतः ।

तथा ।

तत्तत्पशुप्रदातॄणां फलावाप्त्यै वरानने ।
घृतगोधूमैक्षवाद्यैः फाणितैरन्नजैस्तथा ॥
कृत्वा तं तं पशुं दद्युस्तत्तत्फलमवाप्नुयुः-इति ।

अथ प्रशस्तपशुलक्षणं (रत्नावल्याम्)

ऊर्ध्वशृङ्गो लम्बकर्ण एकवर्णोऽतिपीवरः ।
नीरोगः पुष्टकायश्च सदर्पश्च बलोर्जितः ॥

नाधिकाङ्गो न हीनाङ्ग एकद्वित्र्यादिहायनः ।
प्रशस्तपशुरीदृक्षो देवीप्रीतिकरः शुभः ॥

तन्त्रान्तरे ।

कृष्णवर्णश्छागलस्तु पृष्ठवंशे सितो यदि ।
प्रशस्तं तं विजानीयाद्विपरीतं विवर्जयेत् ॥

विपरीतमिति श्वेतवर्णम् । पृष्ठावच्छेदेन नीलमित्यर्थः ।

(त्रैपुरपद्धत्याम्)

बल्यन्ते छागलबलिं तथा मेषं सुरेश्वरि ।
प्रदद्यात् सर्वकालेषु सर्वकामार्थसिद्धये ॥
नित्ये नैमित्तिके काम्ये माहिषं बलिमाहरेत् ।
जयाय सर्वकामाय देवीलोकाप्तसिद्धये ॥

(महाकालसंहितायाम्)

पशूनां यत्र बाहुल्यं भवेद्वित्तानुसारतः ।
तत्रैकं प्रथमं देवि सर्वलक्षणलक्षितम् ॥
ऊर्जस्विनं सुन्दरं च बलिनं पशुमुत्सृजेत् ।

तथा ।

पशूनामिह सर्वेषां प्रोक्षणं चैवमेव हि ।
कश्चिद्विशेष उत्सर्गे फलं दैवाद्युदीरणे ॥

(त्रैपुरपद्धत्याम्)

सर्वलक्षणसंयुक्तं पशुं संस्नाप्य मन्त्रतः ।
देव्यग्रे स्थापयित्वाऽर्घोदकैः संप्रोक्षयेत् ततः ॥
अस्त्रमन्त्रेण संरक्ष्य कवचेनावगुण्ठ्य च ।
मूलमन्त्रं समुच्चार्य धेनुमुद्रामृतीकृतम् ॥
गन्धपुष्पाक्षतैः सम्यक् परिपूज्योपचारकैः ।
कर्णे तस्य पठेन्मन्त्रं पशुपाशविमोचनम् ॥

ॐ पशुपाशाय विद्महे विप्रकर्णाय धीमहि तन्नो जीवः* प्रचोदयात् ।

गायत्रीयं समाख्याता पशुपाशविमोचिनी ।
इमां पठेद्दक्षकर्णे तस्य मुक्तिप्रसिद्धये ॥

संप्रोक्षयेदिति प्रोक्षणं मूलमन्त्रेणैव ।

अर्घपात्रोदकैः शुद्धैर्मूलेन प्रोक्षयेत् त्रिशः ।

इति महाकालोक्तेः ।

गात्र्यन्तरमुक्तं तत्रैव ।

योगिनीबीजतो ङेन्तं बलिरूपं तु विद्महे ।
देवीप्रियं पूर्वतश्च धीमहीति ततः परम् ॥
तन्नः पशुरिति प्रोच्य वदेच्चाथ प्रचोदयात् इति ।

योगिनीबीजं छ्रीमिति (त्रैपुरपद्धत्याम्) ।

ततः खड्गं यजेन्मन्त्री मन्त्रेणानेन दक्षतः ।
तारं च भुवनेशानीं कालीयुग्मं समालिखेत् ॥
वज्रेश्वरीपदं पश्चाल्लोहदंष्ट्रां ततः परम् ।
ङेन्तां हृद्वसुयुग्मैकसङ्ख्यवर्णो मनुर्मतः ॥
अनेन गन्धपुष्पाद्यैः खड्गमभ्यर्चयेद्बुधः ।
ततस्तस्य मुष्टिदेशे मध्ये चाग्रे यथाक्रमम् ॥
गन्धपुष्पाक्षतैर्मन्त्री मिथुनत्रितयं जयेत् ।
वागीशीसहितो ब्रह्मा लक्ष्मीनारायणौ तथा ॥
उमामहेश्वरौ चेति संप्रोक्तं मिथुनत्रयम् ।
ततश्चानेन मन्त्रेण तं खड्गमभिमन्त्रयेत् ॥
खड्गायासुरनाशाय शक्तिकार्याय तत्पर ।
पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ नमोऽस्तु ते ॥

---

* रुद्र इति ४ पु०.पा० ।

ततस्तु ताम्रपात्रस्थकुशाक्षतजलादिकम् ।
गृहीत्वा मूलमुच्चार्य संकल्प्य पशुमुत्सृजेत् ॥
गृहीत्वाऽक्षततोयादि पशोः शिरसि संत्यजेत् ।
ततस्तेनैव खड्गेन मूलमन्त्रेण साधकः ॥
पशुच्छेदं प्रकुर्वीत स्वयं देवीमनुस्मरन् ।

(मेरुतन्त्रसिद्धान्तसारयोः)

यदा संचालयेद्गात्रं गृहीतस्तु यथेच्छया ।
यावन्न चालयेद्गात्रं पशुस्तावन्न हन्यते ॥
उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा ।
निरीक्ष्य साधकः पश्चादिमं मन्त्रमुदीरयेत् ॥
पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥
चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ।
चामुण्डाबलिरूपाय बले तुभ्यं नमो नमः ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ॥
इमं देहं परित्यज्य भूत्वा देववपुर्धरः ।
मोदस्व प्रमथैः सार्धं यावदिन्द्राश्चतुर्दश ॥
ऐँ ह्रीँ श्रीमिति मन्त्रेण त्वं बलिं मत्स्वरूपिणम् ।
चिन्तयित्वा न्यसेत् पुष्पं कुम्भकेनास्य मस्तके ॥

(महाकालसंहितायाम्)

ध्यायेत् कुसुममादाय खड्गमादौ वरानने ।
कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणम् ॥
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ।

रक्ताम्बरधरं चैव पाशहस्तं कुटुम्बिनम् ॥
पिबमानं च रुधिरं भुञ्जानं क्रव्यसंहतिम् ।
क्षोभयन्तं जगत् सर्वं कम्पनादिप्रचारणैः ॥
वेष्टितं मृत्युकालाभ्यां वामदक्षिणभागतः ।

तन्त्रान्तरे ।

ततः खड्गं यजेन्मन्त्री पाद्याद्यैरुपचारकैः ।
गन्धपुष्पाक्षताद्यैश्च मन्त्रेणानेन मन्त्रवित् ॥

मन्त्रस्तु पूर्वोक्त एव ।

(महाकालसंहितायाम्)

ततो बद्धाञ्जलिर्मन्त्रं पठेत् खड्गं निरीक्ष्य वै ।
रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः ॥
भुङ्क्ष्वैतस्य पशो रक्तं क्रव्यसंहतिमेव च ।
छिन्धीममित्र* मे शत्रुं मङ्गलानि प्रयच्छ मे ॥
दैत्यदानवरक्षोऽसृङ्मेदोन्मत्त नमोऽस्तु ते ।
एतेन खड्गमामन्त्र्य तन्नामाष्टकमुच्चरन् ॥
गृह्णीयान्निशितं खड्गं येन सद्यो भवेद्वधः ।
असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥
श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ।

(मेरुतन्त्रे)

ओँ हूँ फडिति मन्त्रं जपन् संछेदयेद्बलिम् ।
एकेनैव प्रहारेण छिन्नो दैवततुष्टये ॥

(महाकालसंहितायामपि)

चन्द्रहासेन खड्गेन छिन्द्यादेकप्रहारतः ।
उत्थाय हननं कुर्यान्नोपविश्य कदा चन ॥

---

* छिन्धीश पित्र इति २ पु० पा० ।

(कालिकापुराणे)

चन्द्रहासेन कर्त्र्या वा छेदनं मुख्यमुच्यते ।
दात्रासिधेनुक्रकचशङ्कुलाभिस्तु मध्यमम् ॥
असिधेनुः स्वल्पखड्गः शङ्कुला चक्रकर्त्तरी ।
क्षुरक्षुरप्रभल्लैश्च मध्यमं परिकीर्त्तितम् ॥
एभ्योऽन्यैः शक्तिबाणाद्यैर्बलिश्छेद्यः कदाऽपि न ।
नात्ति देवी बलिं तं तु दाता मृत्युमवाप्नुयात् ॥
हस्तेन छेदयेद्यस्तु प्रोक्षणं साधकः पशुम् ।
पक्षिणं वा ब्रह्महत्यां स प्राप्नोति दुरुत्सहाम् ॥
नामन्त्र्य खड्गं तु बलिं नियुञ्जीत विचक्षणः ।

तन्त्रान्तरे ।

सर्वेषामुत्तमः खड्गश्चन्द्रहासः सुखावहः ।
पञ्चाशदङ्गुलः कार्यः किं वा तालत्रयेण तु ॥
करवीरदलाकारः किं वा पद्मदलाकृतिः ।
अथ वा कुब्जखड्गेन दण्डखड्गेन भेदयेत् ॥

(महाकालसंहितायाम्)

सहस्रायुतलक्षाणां बलीनां सम्भवे सति ।
द्वौ त्रीन् पञ्च तथाऽष्टौ वा दश वा द्वादशापि वा ॥
एभ्योऽधिकान् नैव कुर्याद्देवी*भावतया स्थितान् ।
प्राच्याशाभिमुखान् कृत्वा युगपन्मन्त्रमीरयेत् ॥
तन्त्रेणैव बलीन् सर्वान् प्रोक्षयेद्देशिकोत्तमः ।
छेदका अपि भूयांसः कर्त्तव्याः कमलानने ॥
हरिद्वीप्यजकोरभ्रलुलायाकाशगामिनः ।

---

* देवीभाव-इति २ पु० पा० ।

दद्यादेतान् वामभागे पानकाले च यानि च ॥

उरभ्रो मेषः ।

तथा ।

मत्स्यान् ग्राहान् शशान् खड्गान् कमठान् कोलगोधिकाः ।
यावतो मृगभेदांश्च दद्यात् संमुख एव हि ॥

(श्रीक्रमसंहितायाम्)

यत्नतस्तं बलिं दद्यान्न हन्यादात्मना पुनः ।
यदि हन्यात् प्रमादेन रौरवं नरकं व्रजेत् ॥

महाकालोऽपि ।

स्वहस्तेन पशुं हत्वा पशुयोनिमवाप्नुयात् ।

तन्त्रान्तरं ।

स्वयं वा भ्रातृपुत्रो वा भ्राता वा सुहृदेव वा ।
सपिण्डश्छेदयेद्वाऽपि शुद्धान्तःकरणो यदि ॥
न रिपुं नाङ्गहीनं वा न काणं नापि कुब्जकम् ।
न योजयेच्छत्रुपक्षं बलिच्छेदनकर्मणि--इत्युक्तम् ॥

महिषबलिदाने विशेष उक्तो (महाकालसंहितायाम्)

विशेषः कश्चिदधिको महिषे तं ब्रुवेऽधुना ।
तदङ्गे देवताः सर्वाः पूजयेत् कुसुमाक्षतैः ॥
प्रणवादिनमोऽन्तैश्च मध्ये ङेन्तैः पदैस्तथा ।
स्थानानि देवताश्चापि क्रमेण कथयामि ते ॥
ब्रह्मरन्ध्रे च नासायां कर्णयो रसने तथा ।
नेत्रयोर्वदने चैव ललाटे तदनन्तरम् ॥
दक्षगण्डे वामगण्डे ग्रीवायां कंश एव च ।
दक्षभ्रुवि तथा वामभ्रुवि चैव वरानने ॥
ओष्ठेऽधरे च स्कन्धे च हृदये पृष्ठ एव च ।

जठरे चरणे पुच्छे सर्वस्मिन् देह एव च ॥
ब्रह्मा मेदिन्यथाकाशः सर्वतो मुख एव च ।
ज्योतींषि विष्णुश्चन्द्रश्च शक्रो वह्निर्महेश्वरः ॥
निर्ऋतिर्मित्रवरुणौ तथा लक्ष्मीः सरस्वती ।
धनेश्वरः सर्पराज आदित्यः साध्य एव च ॥
गन्धर्वेन्द्रस्तथा सिद्धा चामुण्डा सर्वशेषगा ।
अनेनैव प्रकारेण नरस्यापि प्रपूजयेत् ॥
क्रमसिद्धं पूर्वगतमदोऽधिकमिहार्हणम् ।
अथोभयोः शेषगतान् मन्त्रानाकलय प्रिये ॥
यमस्य वाहनत्वेन ख्यातस्त्वमसि कासरः ।
वसतः शृङ्गयोरग्रे मृत्युकालौ सदा तव ॥
भवानेव परिद्वेष्टि ज्वलनाँस्तुरगानपि ।
तव रूपं समास्थाय रम्भासुरसुतः पुरा ॥
भगवत्या समं युद्धं कृतवान् दर्पमोहितः ।
देव्या त्वं निहतश्चासि तथा क्रान्तं शिरस्तव ॥
वहस्यतश्चण्डिकां त्वं शिरसा भङ्गुरेण वा ।
त्वत्तो नान्यो बलिः कश्चिद्देव्याः प्रीतिप्रदायकः ॥
अतो ददामि काल्यै त्वां भक्तियुक्तेन चेतसा ।
मयि कल्याणमाधाय गच्छ कासर सद्गतिम् ॥

नरबलौ विशेषमाह ।

मनुष्यबलिदाने तु विशेषः कश्चिदीरितः ।
पूर्वेद्युरकृताहारं संपरित्यक्तमैथुनम् ॥
स्नातं रक्ताम्बरधरं नरं मुण्डितमस्तकम् ।

रक्तचन्दनदिग्धाङ्गं कृत्तश्मश्रुनखं तथा ॥
अजाताश्रुकमुद्रिक्तं न दीनं नाप्यधोमुखम् ।
न बाडवं न चाण्डालं न क्लीबं पतितं न च ॥
चतुर्विधेभ्योऽपि शिवे स्वयमागतमुत्तमम् ।
प्रोक्षयेत् पशुसामान्यरूपेण प्रथमं ततः ॥
महिषोक्तप्रकारेण पश्चादेतान् मनून् जपेत् ।
सर्वेषु प्राणिषु श्रेष्ठस्त्वं मनुष्य इति स्थितः ॥
बलिश्रेष्ठ महाभाग देवगर्भश्रिया वृतः ।
रक्ष मां सर्वभीतिभ्यः सिद्धिं देहि तथोत्तमाम् ॥
राज्यं देहि यशो देहि देहि चानुत्तमां गतिम् ।
आरोग्यं दीर्घमायुश्च प्रजावृद्धिं रणे जयम् ॥
कल्याणं विपुलान् भोगान् दारानपि हृदीप्सितान् ।
कात्यायन्यां दृढां भक्तिं लक्ष्मीमप्यधिकां स्थिराम् ॥
दत्वा राज्यं परित्यज्य शरीरं पाञ्चभौतिकम् ।
देवीलोकं व्रज क्षिप्रं सज्ञातिसुतबान्धवम् ॥
महादानैर्महायज्ञैस्तपोभिरतिदुष्करम् ।
यत् स्थानं नाप्यते लोकैस्तत् त्वं गच्छ नरर्षभ ॥
अङ्गीकृतो महाकाल्या मांसशोणितलिप्सया ।
देवीलोकं सुदुष्प्राप्यं प्राप्नुहि त्वं द्रुतं गतः ॥
तत्र गत्वा शिवं ध्याहि मामकीनं जगत्पते ।
देवीलोकगतिः काम्या मत्प्रसादात् तवेदृशः ॥
त्वत्प्रसादादहं शत्रून् जयेयं रणमूर्धनि ।
श्लोकानष्टाविमान् देवि पठेन्नरबलिक्षणे ॥

गण्डकेऽपि विशेष उक्तस्तत्रैव ।

खड्गसन्त्वं समाख्यास्ये गण्डको येन दीयते ।
द्विपदेहाकृते खड्ग शस्त्राभेद्यकलेवर ॥
तृप्ता भवेयुः पितरस्त्वन्मांसेन सुरा अपि ।
न च त्वत्तोऽधिकः कश्चित् पवित्रः पृथिवीतले ॥
त्वत्करोटिजपात्राणि शस्तानि श्राद्धकर्मणि ।
मया देव्या बलित्वेन त्वमद्य विनिवेदितः ॥
मम विघ्नान् समुत्सार्य सद्यो देवीगणे भव-इति ।

(यामले)

एवं हत्वा पशून् सद्यस्तदीयरुधिरं तथा ।
स्वर्णादिरचिते पात्रे गृह्णीयादुष्णफेनिलम् ॥

(कालिकापुराणे)

ॐ ह्रीँ ऐँ ह्रीँ श्रीँ कौशिकी रुधिरेणाप्यायताम्-इति ।
पात्रे नियोजयेद्रक्तं शिरस्येव प्रदीपकम् ॥

(महाकालसंहितायाम्)

अथ पात्राणि वक्ष्येऽहं स्थाप्यते यत्र शोणितम् ।
हैमे वा राजते ताम्रे ग्राह्यं रक्तं महीभृता ॥
सामन्तैर्माण्डिलकैश्च ताम्रे वा कांस्यरैत्ययोः ।
दरिद्रगृहिभिश्चापि मार्त्तिके वाऽथ दारवे ॥
अथ वा पत्रपुटके नैव लोहे कदा चन ।
न रङ्गे सीसके चापि नारिकेलफलत्वचि ॥
कौलानां सर्वपात्रेभ्यः कपालं श्रेष्ठमिष्यते ।
एषां पशूनां पललैर्यावती तृप्तिरीरिता ॥
भगवत्याः प्रिये तृप्ती रुधिरैरपि तावती ।
नित्ये नैमित्तिके वाऽपि कात्यायन्याः प्रपूजने ॥

विना वलिं नैव दद्यादामे पललशोणिते ।
पशोर्वा पक्षिणो वाऽपि नरस्यापि विशेषतः ॥

अथ मस्तकपतनफलं तत्रैव ।

एवं दत्वा बलिं देव्यै बलिदानविधिर्यथा ।
शुभाशुभं विजानीयाद्राज्यस्य च नृपस्य च ॥
यदि वायव्यदिग्भागे नैर्ऋत्ये दक्षिणेऽपि वा ।
मस्तके पतिते चैव हानिरत्र विनिर्दिशेत् ॥
शेषेषु दिक्षु सर्वासु विदिक्षु च फलं शृणु ।
पूर्वे चोत्तरदिग्भागे पतते यदि मस्तकम् ॥
सर्वसम्पत्करं विद्याद्राजा राज्यं विनिर्दिशेत् ।
अग्निर्वा दक्षिणे कर्णे यदा पतति वै शिरः ॥
तदा सिद्धिश्च मासान्ते वामकर्णे विपद्भवेत् ।
राज्ञामग्रे भवेद्धानिर्गृहस्थानां भवेच्छुभम् ॥
ऐशान्यां मध्ययोश्चैव पतते यदि मस्तकम् ।
छिन्नं शिरो निपतितं सहास्यं यदि दृश्यते ॥
विभूतिं तस्य जानीयाद्राजा राज्यं विनिर्दिशेत् ।
तदा स्वल्पेन कालेन सर्वसिद्धिर्भवेद्ध्रुवम् ॥
एकवारे भवेत् सिद्धिर्द्विवारे हानिरुच्यते ।
गृहस्थानां विजानीयाद्राज्ञां तु विपरीतकम् ॥
यदाऽश्रु दृश्यते नेत्रे तदा हानिं विनिर्दिशेत् ।
यदा कटकटाशब्दो दन्तानां श्रूयते क्व चित् ॥
तदा तु मरणं विद्याद्धानिं सर्वत्र निर्दिशेत् ।

(त्रैपुरपद्धत्याम्)

दक्षिणे पतिते सिद्धिर्वामभागे च निन्दितम् ।

सव्ये तु पतिते छेदे देवीमन्त्रं स्मरेद्बुधः ॥
ततः कुण्डादिके हुत्वा हुतिभिर्दशपञ्चभिः ।
शमयेद्धूङ्कृतेर्दोषं बलिलक्षणलक्षितम् ॥

(महाकालसंहितायाम्)

दद्याद्राक्षसदिग्भागे मन्त्री बलिशिरः स्वयम् ।
तद्दक्षिणे रक्तपात्रं विपरीतं न संददेत् ॥
देवस्य संमुखं कृत्वा छिन्नं भागं प्रकल्पयेत् ।
तदेव शस्तं जानीयान्मध्यमं तदुदीरितम् ॥
बलीनामिति संज्ञानं शिरश्च पुरतो ददेत् ।

तथा ।

न भूमौ स्थापयेच्छीर्षं न चैव विपरीतकम् ।
शिरः सलोहितं दद्यात् पुर एव न चान्यतः ॥
रुधिरादानकाले तु पात्रे स्वविभवाहृते ।
सैन्धवं स्थापयेत् किञ्चित् फलानामेकमेव हि ॥
तद्रक्तं हविरेव स्यात् पुरोडाशं च तच्छिरः ।
नासाग्रीवागण्डपुच्छपललानि निकृत्य हि ॥
पशूनां वदने क्षिप्त्वा ततः संस्थापयेत् पुरः ।
तथा पक्षत्रिपत्रं च वीनां त्रोटौ विनिःक्षिपेत् ॥
पशुवच्चरणस्यापि शीर्षे कमललोचने ।
बलीनां मस्तके दद्यात् प्रदीपं धूपवर्त्तिकाम् ॥
दहनाल्लोमकेशानां यो गन्ध उपतिष्ठते ।
घ्राति तं* चण्डिका देवी सन्तुष्टा तु प्रजायते ॥
तस्मिन्नेव ह्यवसरे आधिक्यं धूपदीपयोः ।

---

* तेन सा इति ३ पु० पा० ।

यथाविभतो देवि कर्त्तव्यं भक्तितत्परः ॥
बल्याधिक्ये च शीर्षाणां विधेयाः पङ्क्तयस्तथा ।
सधूपदीपाः कुसुमाक्षतपुञ्जान्वितास्तथा ॥

तथा ।

शिरश्च संमुखे स्थाप्यं सदीपं पात्रवर्जितम् ।
स चापि हविरक्तः स्यादथ वा तिलजोक्षितः ॥
सार्षपं न प्रदातव्यं न चान्यफलसम्भवम् ।
मूर्धाभिषिक्तो हविषा तैलेन बहुसिद्धिभाक् ॥
अन्यबीजोद्भवै रोगं शोकं मृत्युं च विन्दति ।
यथा लोमानि दह्यन्ते यत्नात् कार्यं तथा नरैः ॥

तन्त्रान्तरे ।

सूत्रवर्त्तिं प्रदद्याच्च वस्त्रवर्त्तिः प्रशस्यते ।
अङ्गुष्ठस्य प्रमाणं च दीर्घं चैव षडङ्गुलम् ॥
कार्पाससूत्रकैर्दद्यादेकविंशतिसूत्रकैः ।
सुगन्धिद्रव्यैस्तत् कुर्यात् कर्पूरागुरुचन्दनैः ॥
ग्राहाणां कच्छपानां च गोधायाश्च विशेषतः ।
मत्स्यानामपि पक्षिणां न दीपं दापयेच्छिवे ॥
शीर्षोपरि ज्वलद्दीपं यावत्कालं प्रवर्त्तते ।
तावत्कालं वसेत् स्वर्गे तस्माद्यत्नेन दापयेत् ॥
लोमदाहोद्भवं गन्धं घ्रात्वा देवी प्रसीदति ।
तस्मात् संवर्धयेद्दीपं तस्मात् पात्रं विवर्जयेत् ॥
निर्वाणे मृत्युमाप्नोति हीयमाने प्रदीपके ।

(महाकालसंहितायाम्)

ततः पात्रं पुरः कृत्वा देव्याः सपशु-शोणितम् ।
शर्करायुतदूर्वाणां प्रदद्यात् त्रिर्महाघृतम् ॥

23

सैन्धवं शृङ्गवेरं च कदलीफलमेव च ।
पातयेन्मधुराणां च काममुद्दिश्य साधकः ॥
अष्टधा विभजेद्विद्वन्मध्ये चैकं कुशादिभिः ।
दत्वा किञ्चिद्घृतं तत्र कुर्यात् तर्पणमुद्रया ॥
तर्पणं भागभाजां वै देवीनां द्विर्द्विरेव च ।
आद्यन्तिमौ तारहार्दौ मध्ये आदिमनोरपि ॥
तत्तन्नाम्ना मन्त्रमपि तर्पयामीति संयुतम् ।
द्वितीयरूपं ङेन्तं च तद्द्वितीयपदोदितम् ॥
मध्ये नित्योदितश्र्याख्यपात्रवत् पीठगा क्रिया ।
पूर्वस्यां दिशि चामुण्डा दक्षिणस्यां तु योगिनी ॥
डाकिन्युक्ता पश्चिमायामुत्तरस्यां तु भैरवी ।
विदारिकाऽऽग्नेयकोणे नैर्ऋत्यां पापराक्षसी ॥
पूतना चापि वायव्ये ईशाने कालिका तथा ।
ततः स्तुतिं प्रकुर्वीत बद्धाञ्जलिपुटोऽग्रतः ॥
जय देवि जगन्मातर्जय पापौघहारिणि ।
जय जन्मजराव्याधितृणदावानलाकृते ॥
जय सर्वविपत्तिघ्ने जय त्रिदशवन्दिते ।
जय नित्यानन्दरूपे जय कल्याणदायिनि ॥
जय शत्रुक्षयकरे जय रोगप्रणाशिनि ।
जय भीमे जयाघोरे जय सङ्कटतारिणि ॥
जयामृतरसास्वादतुन्दिलामन्दविग्रहे ।
त्रिनेत्रे विकरालास्ये मुण्डमालाविभूषिते ॥
सर्वासुरक्षयकरि खड्गखट्वाङ्गधारिणि ।

महाघोरे महारावे दैत्यदर्पनिषूदिनि ॥
इमं पशुबलिं देवि गृहीत्वा कालरात्रिके ।
प्रीता भव महाचण्डे रक्ष मां शरणागतम् ॥
आयुर्देहि धनं देहि भाग्यं कीर्त्तिं च देहि मे ।
स्त्रियं देहि सुतान् देहि सर्वान् कामाँश्च देहि मे ॥
उग्रचण्डे प्रचण्डाऽसि प्रचण्डकरवालिनि ।
महाचण्डोग्रदोर्दण्डे विश्वेश्वरि नमोऽस्तु ते ॥
रक्ष मां शरणापन्नं त्वत्पादार्पितमानसम् ।
हर पापं हर क्लेशं हर शोकं हरासुखम् ॥
हर रोगं हर क्षोभं हर दैन्यं हरप्रिये ।
स्तुतिमेतां पठित्वैवं दण्डवत् प्रणमेद्भुवि ॥
गुह्यकालि जगद्धात्रि सर्वान्तर्यामिनीश्वरि ।
गृहीत्वेमं पशुबलिं यथोक्तफलदा भव ॥
कायेन मनसा वाचा त्वत्तो नान्या गतिर्मम ।
अन्तश्चरसि भूतानां द्रष्ट्री त्वं परमेश्वरि ॥

(यामले)

कात्यायनि महामाये दुर्गे दुर्गतितारिणि ।
नमस्तुभ्यं जगद्धात्रि कालरात्रिस्वरूपिणि ॥
एवं स्तुत्वा महादेव्यै दत्वा च सुमनोऽञ्जलीन् ।
साष्टाङ्गं प्रणमेद्भूमौ भक्तियुक्तेन चेतसा ॥

सुमनोऽञ्जलीनिति बहुवचनं कपिञ्जलाधिकरणन्यायेन त्रित्वे पर्यवस्यति । तथा च पुष्पाञ्जलित्रयं दत्वा प्रणमेदित्यर्थः ।

इति बलिदानविधिः ।

अथ पशुपक्षिणां वस्त्वन्तराणां च दैवतानि ।

(महाकालसंहितायाम्)

पशूनां च विहङ्गानामन्येषामपि वस्तूनाम् ।

ब्रवीमि देवताः सर्वाः क्रमेणोत्सर्गकर्मणि ॥
प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः ।
तथा चैकशफाः सर्वे कथिता यमदैवताः ॥
महिषश्च तथा याम्य उष्ट्रो वै नैर्ऋतो मतः ।
गोवृषौ रुद्रदैवत्यौ छाग आग्नेय उच्यते ॥
मेषस्तु वारुणो ज्ञेयो वराहो वैष्णवो मतः ।
गोरीदेव्यौ व्याघ्रसिंहौ गण्डको ब्रह्मदैवतः ॥
यावन्तो मृगभेदाः स्युः कथिता वायुदेवताः ।
यावन्तः पक्षिणः सर्वे वायव्याः परिकीर्त्तिताः ॥
प्राजापत्यास्तथा मत्स्याः कच्छपाः साध्यदैवताः ।
गोधा वरुणदैवत्या ग्राहा अपि च तादृशाः ॥
तथा च बभ्रूशलभावादित्येशानदैवतौ ।
कन्या दासस्तथा दासी प्राजापत्या नरास्तथा ॥
अभयं शिवदैवत्यं धरित्री विष्णुदैवता ।
तथा समुद्रदैवत्यं रत्नमुक्ताफलादिकम् ॥
जलाशयास्तथा सर्वे वारिधानी कमण्डलुः ।
प्रपा कुम्भश्च करकं ज्ञेयं वरुणदैवतम् ॥
सुवर्णमग्निदैवत्यं लौहं भैरवदैवतम् ।
“कांस्ये पूषाऽश्विनौ चापि देवता परिकीर्त्तिताः ॥”
रङ्गं नासत्यदैवत्यं सीसकं वायुदैवतम् ।
ताम्रं च सूर्यदैवत्यं पित्तलं कुजदैवतम् ॥
रजतं चन्द्रदैवत्यं खर्परं पितृदैवतम् ।

“ ” एतच्चिह्नान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

गुडं कुबेरदैवत्यं शर्करा मित्रदैवता ॥

“अन्यत्र तु।

आपो गुडे देवताः स्युः·········इत्युक्तम्।

तथा।”

जाङ्गलं वह्नि*दैवत्यं मधु स्याद्यदैवतम्।
ताम्बूलदेवता ज्ञेया शक्रो विद्याधरोऽथ वा ॥

“तन्त्रान्तरे।

ताम्बूले देवताः शक्रविद्याधरविनायकाः।

महाकालः।”

तथा मृत्युञ्जयो देवो घृतेषु परिनिष्ठितः।
तैलं तु राहुदैवत्यं कार्पासं केतुदैवतम् ॥
क्षीरं च तारादैवत्यं दधि[†] चौषधिदैवतम्।

“अन्यत्र तु।

क्षीरे नारायणः प्रोक्तो दधिसर्पाः प्रकर्त्तिताः-इत्युक्तम्”।

तथा।

पिष्टं शचीदैवतं च सिन्दूरमपि पार्वति।

“तन्त्रान्तरे।

अन्येषु देवताः सर्वे देवः पिष्टे प्रजापतिः।

महाकालः”।

लवणं चाब्धिदैवत्यं जलं वरुणदैवतम्।
देवः स्मरश्च गन्धर्वो मधुपर्के च चन्दने ॥
पुष्पं च लक्ष्मीदैवत्यं धूपे देवो वनस्पतिः।
अप्सरोदैवतं ज्ञेयं सर्वं मृगमदादिकम् ॥
दीपोऽपि वह्निदैवत्यो नैवेद्यं विष्णुदैवम्।

---

[*] ब्रह्मदैवत्यम्—इति ५ पु० पा०।

[†] दध्यौषधीशदैवतमित्यन्यत्र पाठः। तत्रौषधीशश्चन्द्रः।

“ ” एतदन्तर्गतः पाठः ५ पुस्तकेऽधिक उपलभ्यते।

पादुका सोमदैवत्या छत्रं स्यादिन्द्रदैवतम् ॥
देवता कामधेनुः स्याच्चामरे त्रिदशेश्वरि ।
व्यजनं वायुदैवत्यमिन्द्रः सिंहासनस्य च ॥
माला च रतिदैवत्या डाकिनी देवता सुरा ।
मांसं निर्ऋतिदैवत्यं वितानं चन्द्रदैवतम् ॥
प्राजापत्यानि शस्यानि पक्वान्नानि च सर्वशः ।
वाचस्पत्यानि वासांसि पाण्डुराण्यसितानि च ॥
मयुदैवानि रक्तानि दुर्गादैवं तु पट्टकम् ।
विद्या ब्राह्मी विनिर्दिष्टा विद्याप्रकरणानि च ॥
सारस्वतानि ज्ञेयानि पुस्तकाद्यानि पार्वति ।
पात्राणामपि सर्वेषां विश्वकर्माऽधिदैवतम् ॥
"(यामले)
वाद्यं चतुर्विधं ज्ञेयं रुद्रगन्धर्वदैवतम् ।
महाकालः" ।
द्रुमाणां च लतानां तु शाकानां हरितैः सह ।
फलानामपि सर्वेषां देवो ज्ञेयो वनस्पतिः ।
अजिनानि तथा शय्या रथ आसनमेव च ॥
उपानहौ तथा दोला यच्चान्यत् प्राणिवर्जितम् ।
उत्तानाङ्गिरदैवत्यं प्रवदन्ति मनीषिणः ॥
ध्वजो वै धर्मदैवत्यः सीरं पर्जन्यदैवतम् ।
पाषाणादि तथा रत्नं कथितं शक्रदैवतम् ॥
गृहं तु सर्वदैवत्यमनुक्तं यन्मया प्रिये ।
तत् सर्वं रुद्रदैवत्यं ज्ञेयमुत्सर्गकर्मणि ॥

इति दैवतानि ।

" „ एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

अथ कुमारीपूजाविधिः ।

(महाथर्वणसंहितायाम्)

ततः कुमारीयजनं कुर्यात् साधकसत्तमः ।
यस्मिन् कृते तु विधिवत् कर्मणः साङ्गता भवेत् ॥
अकृते चाङ्गहानिः स्याद्विशेषाच्छरदर्च्चने ।

(महाकालसंहितायाम्)

समाप्य पूजामासायं प्रदोषे पर्युपस्थिते ।
कुमारीपूजनं कुर्याद्विधिना पञ्चमं हितम् ॥

तथा ।

भक्तभद्राभद्रमुभे तदनक्ति सुरेश्वरि ।
स्वयं तद्रूपमास्थाय मूढभावमुपेयुषी ॥
दिदृक्षुरायाति शिवा भक्तिपूजनसम्भृतिः ।
तस्मात् तत्रादरः कार्यो भक्तिभावं च जानता ॥
देवतास्त्रिविधोत्पातैर्यथादेशो हिताहितम् ।
सूचयन्ति तथैवैषां वार्षिकं सुरवन्दिते ॥
तद्विज्ञानार्थमप्येषा पूजितव्या प्रयत्नतः ।
चतुर्णामपि कौलानां स्मर्त्तानामानुकल्पिनाम् ।
नैवात्र मतभेदोऽस्ति नैवार्च्चनभिदाऽपि वा ॥
न च पूर्वोत्तरौ पक्षौ न च संदेहकल्पना ।
भवेच्च फलबाहुल्यं तुष्टिर्देव्यास्तथैव च ॥
विशिष्य ज्ञायतेऽनेन तथा भावि शुभाशुभम् ।
ज्ञाते शुभे भवेत् तोषोऽन्यस्मिँश्चोपायचिन्तनम् ।

तथा ।

न तथा तुष्यति शिवा बलिहोमस्तुतीरणैः ।
कुमारीपूजनेनात्र यथा सद्यः प्रसीदति ॥

न केवलं पूजयेत् तां भोजयेच्चापि यत्नतः ।

तथा ।

व्यङ्गता चाप्यकरणात् पूजायाः परिकीर्त्तिता ।
कुमारीपूजनेनात्र यथा सद्यः प्रसीदति ॥
करणात् साङ्गताऽपि स्यादन्यस्मिन्नकृतेऽपि हि ।

तथा ।

कौलानां निशि पूजोक्ता स्मार्त्तानामपराह्णिकी ।
नित्या तु शारद्यर्चायां काम्या नैमित्तिकीतरा ॥

कुमारीलक्षणमाह ।

सुस्नातां रक्तपीतादिनानारागोज्ज्वलांशुकाम् ।
सर्वालङ्कारचित्राङ्गीमज्ञातानङ्गचेष्टिताम् ॥
अजातपुम्मनःसङ्गां सप्ताष्टनववार्षिकीम् ।
अनीचजातिं गौराङ्गीं पितृमातृमतीमपि ।
अदन्तुरामवाग्दन्तामधिकोनाङ्गवर्जिताम् ॥
अदीर्घकेशीमुद्दीप्तां सुस्मितास्यामलोभनाम् ।

निषिद्धालक्षणमुक्तं तत्रैव ।

श्यामां दीर्घदतीमोतुनयनां पिङ्गमूर्धजाम् ।
तनुमूनगतिं क्रुद्धां कुब्जां खञ्जां च खर्विकाम् ॥
भ्रूकेशाल्पत्वसहितां तथा चैव गलद्व्रणाम् ।
जातस्तनरजोऽनङ्गां प्रयत्नेन विवर्जयेत् ॥

तन्त्रान्तरे ।

अधिकाङ्गीं च हीनाङ्गीं रोगिणीं च व्रणाङ्किताम् ।
अन्धां काणां केकरां च कुरूपां लोमशां त्यजेत् ॥

(महाकालसंहितायाम्)

एतद्भिन्ना कुमारी तु वरणीयाऽर्चनक्रमे ।

(मेरुतन्त्रे)

विप्रां सर्वेष्टसंसिद्ध्यै यशसे क्षत्रियोद्भवाम् ।
वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत् ॥

(स्कान्दे)

दारुणे चान्त्यजां कन्यां पूजयेद्विधिना नरः ।

(यामले)

यः कुमारीं यजेन्मन्त्री सर्वपर्वसु सर्वदा ।
तेनार्च्चिता महादेवी सत्यं सत्यं न संशयः ॥
सन्ध्यैकवर्षा संप्रोक्ता द्विवर्षा च सरस्वती ।
त्रिधामूर्त्तिस्त्रिवर्षा च चतुरब्दा च कालिका ॥
सुभगा पञ्चवर्षेयमुमा षड्वार्षिकी भवेत् ।
मालिनी सप्तवर्षा च अष्टमी कुब्जिका मता ॥
नवाब्दा कालसंकर्षा दशवर्षाऽपराजिता ।
एकादशाब्दा रुद्राणी द्वादशाब्दा च भैरवी ॥
तत्परा स्यान्महालक्ष्मीस्तत्परा कुलनायिका ।
क्षेत्रज्ञा तत्परा प्रोक्ता षोडशाब्दा च चण्डिका ॥
एवं क्रमेण विज्ञेया विना पुष्पं कुमारिका ।

(हेमाद्रौ स्कान्दे)

एकैकां पूजयेत् कन्यामेकवृद्ध्या तथैव च ।
द्विगुणं त्रिगुणं वाऽपि प्रत्येकं नवकं तु वा ॥

तथा ।

*नवभिर्भजते भूमिमैश्वर्यं द्विगुणेन तु ।
एकवृद्ध्या लभेत् क्षेममेकैकेन श्रियं लभेत् ॥
एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥

---

* नवभिर्जृम्भते इति ४ पु० पा० ।

" (वाडवानलीये)

उत्तमा सा परिज्ञेया सप्ताष्टनवहायना ।
मध्यमा पञ्चवर्षा च षडब्दा दशहायना ॥
एकद्वित्रिचतुर्वर्षा रुद्राब्दाद्याऽवरा स्मृता " ।

(महाकालसंहितायाम्)

गीतवादित्रनिर्घोषैरानन्दादरपूर्वकम् ।
नीत्वा पूजागृहद्वारि कुमारीस्ता अयुग्मिकाः ॥
पञ्च वा सप्त वा चापि नवैकादश वा पुनः ।
मुख्यैका तासु कर्त्तव्या या स्यात् सर्वाङ्गसुन्दरी ॥
बह्वीनामप्यभावे हि भवेदेका कुमारिका ।
काम्ये नैमित्तिके चैका बह्व्यः शारदपूजने ॥
श्रेणीभूता उत्थिताश्च नम्रीभूतात्मना अपि ।
स्थापयित्वा क्रमेणैता मुख्यामादौ नियोज्य च ॥
देवीबुद्धिं विधायास्यां साधको विगतत्वरः ।
गृहीतमदिरामत्तः कल्पितार्च्चनसम्भृतिः ॥
प्राणायामं विधायादौ ततो भूतापसारणम् ।
गुरुं गणपतिं नत्वा वामदक्षिणयोस्ततः ॥
मध्ये कुमारीं च तथा मूलदेवीस्वरूपिणीम् ।
छोटिकाभिस्तथा तालत्रितयैर्बन्धनं दिशाम् ॥

तथा ।

कुमर्या मूलभूतायाः पादौ प्रक्षालयेत् ततः ।

तथा ।

तज्जलं मस्तके दद्याद्देवीपादोदप्रज्ञया ।
स्वोत्तरीयांशुकेनैव पादाम्बूपनयेत् ततः ॥

" " एतद्चिह्नान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

पुनरक्षतमादाय विघ्नानुत्सारयेत् प्रिये ।
उदीर्यमाणमन्त्रेण तालत्रयपुरःसरम् ॥
तारपाशकलाकूर्चास्त्राणि प्रथमतो वदेत् ।
भूतान्यपसारय च विघ्नान् नाशय चेत्यपि ॥
हृच्छीर्षे चरमे दद्यादेकविंशाक्षरो मनुः ।
कुमार्या सहिताः सर्वे तथा देवीस्वरूपया ॥
दर्शनार्थं समायान्ति यावन्तो देवयोनयः ।
प्रेता भूताः पिशाचाश्च गन्धर्वा गुह्यका अपि ॥
राक्षसा दानवा यक्षा ये चान्ये क्रूरकर्मिणः ।
सह प्रविश्य कौमार्या मण्डपं शारदार्चनम् ॥
लुम्पन्ति च कुमार्यर्चां पूजां विध्वंसयन्ति च ।
अतो वारद्वयं कार्यं विघ्नस्योत्सारणं प्रिये ॥
ततः स्ववामहस्तेन कुमार्या दक्षिणं करम् ।
गृहीत्वा दक्षचरणविनिःक्षेपपुरःसरम् ॥
पङ्क्तीभूताः कुमारीस्ताः श्लोकरूपं मनुं पठन् ।
पूजागृहान्तः शनकैर्नम्रमौलिः प्रवेशयेत् ॥
समस्तजगतामाद्ये जगदाधाररूपिणि ।
कुमारीरूपमास्थाय प्रविशेदं गृहं मम ॥
भवत्याः कीदृशं रूपं जाने मातरहं न हि ।
कुमारीरूपमेवेदं पश्यामि नरचक्षुषा ॥
भक्तिं मदीयां विज्ञाय त्वत्पादाम्बुजयोः शिवे ।
त्वया प्रकटितं रूपमीदृशं सर्वसिद्धये ॥
दृष्टिः कार्या न मे पापे सञ्चारेणासतः पथः ।

दृढायां केवलं भक्तौ दातव्या सुरवदिन्ते ॥
शिवायास्तव रूपं हि कीदृशं नेति जानते ।
ज्ञास्यामि को वराकोऽहं पाञ्चभौतिकविग्रहः ॥
इति पञ्च पठन् श्लोकान् स्वपृष्ठेनैव तारयेत् ।
अनीक्षमाण एवं शि गोलत्राद्यपुरःसरम् ॥

(यामले)

स्नापिता गन्धतैलेन नानाभरणभूषिता ।
आनीय देवतापार्श्वे स्थापनीया सुधीमता ॥

(महाकालसंहितायामपि)

मुख्यं तत्पूजनं प्रोक्तं मुख्याया एव तन्मनुम् ।
तत्पूजयैव ताः सर्वाः पूजिताः स्युर्न संशयः ॥

तथा ।

बलिं दत्वा ततो देवयोनिभ्यः परमेश्वरि ।
आरभेत निरालस्यः कुमारीन्यासमुत्तमम् ॥
नामान्यादौ खलु महाचण्डयोगेश्वरी मता ।
ततः सिद्धिकराली च पुनः सिद्धिविकराल्यपि ॥
महान्ता मार्यथ ज्ञेया वज्रकापालिनी ततः ।
मुण्डमालिन्यट्टहासिन्येते द्वे परिकीर्त्तिते ॥
चण्डकापालिनी कालचक्रेश्वर्यप्यनन्तरम् ।
गुह्यकाली ततः कात्यायनी कामाख्यया सह ॥
चामुण्डा सिद्धिलक्ष्मीश्च कुब्जिका तदनन्तरम् ।
मातङ्गी तदनु ज्ञेया चण्डेश्वर्यथ कीर्त्यते ॥
सर्वशेषेऽथ कौमारी एता अष्टादशेरिताः ।
"एतानि गुह्येशीविद्याणि" ।

" " एतच्चिह्नान्तर्गतः पाठः ख पुस्तकेऽधिक उपलभ्यते ।

“अन्यत्र तु ।

नामान्यादौ व्याहरामि दुर्गा नारायणी शिवा ।
महामाया योगनिद्रा कालरात्री कपर्दिनी ॥
उग्रचण्डा भद्रकाली अजिता चापराजिता ।
कात्यायनी महाकाली कामाख्या कुलनायिका ॥
भैरवी भुवनेशी च कौमार्यष्टादश स्मृताः ।

इति नामान्तराण्युक्तानि ।
तथा” ।

अङ्गान्यतो वच्मि शिरो मुखं तदनु चक्षुषी ।
कर्णौ नासापुटे चापि कपोलौ तत्पुरौ पुनः ॥
अधरोष्ठौ दन्तपङ्क्ती स्कन्धौ हृदयमेव च ।
बाहू च जठरं पृष्ठमूरुजानू तथैव च ॥
जङ्घे पादौ च सर्वाङ्गं तावन्त्येव स्थलानि च ।

(त्रिशक्तिरत्ने)

कलादि च कलान्तं ताः पूजयेद्विधिना बुधः ।
उपवेश्यासने दिव्ये कुमारीं साधकोत्तमः ॥
वक्ष्यमाणेन विधिना देहेऽस्या न्यासमाचरेत् ।
कुमारिका स्यात् प्रथमा द्वितीया नायिका मता ॥
तृतीया भैरवी ख्याता तुर्या वागीश्वरी भवेत् ।
पालिका पञ्चमी प्रोक्ता सम्बुद्ध्यन्ताः कुलादिकाः ॥
न्यस्याः पञ्चाङ्गयोगेन कुमारीणां कलेवरे ।
वामावर्त्तक्रमादास्यचतुष्कं पूजयेत् क्रमात् ॥
ततः सिद्धा जया पूर्वा जयाऽन्या कुब्जिका परा ।
कालिका पञ्चमी प्रोक्ता विज्ञेया बोधिता इमाः ॥

“ ” एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

पूर्वादिवर्गसंयुक्ता चतुर्थ्यन्ता नमोऽन्तकाः ।
तत्तत्स्थानेषु विन्यस्याः स्वधिया क्रमपूर्वकम् ॥
पञ्चप्रणवयोगेन चैतन्यमनुना सह ।
न्यासजालं हि पूर्वोक्तं कुर्यात् साधकसत्तमः ॥

(महाकालसंहितायाम्)

ततोऽर्घस्थापनं कुर्यान्नित्यके यदुदाहृतम् ।
पूजोपकरणस्यापि शुद्धिरुक्ता पुरोक्तवत् ॥

तथा ।

ततो ध्यानं प्रकुर्वीत कुमार्या वक्ष्यमाणकम् ।

“ तन्त्रान्तरे ।

प्रसन्नवदनाम्भोजां प्रोद्यद्बालार्कसप्रभाम् ।
रक्ताम्बरां रक्तमाल्यां नानालङ्कारभूषिताम् ॥
सस्मितां दिव्यकन्याभिः क्रीडारसपरायणाम् ।
ध्यायेत् कुमारिकां बालां स्वभक्ताभीष्टसिद्धिदाम्” ॥

तथा ।

उपचाराँस्ततः सर्वान् पाद्यादीन् स्तुतिपश्चिमान् ।

“ समर्पयेदिति शेषः ” ।

(यामले)

यष्ट्वा पूर्वमार्गेण वक्ष्यमाणेन वा पुनः ।
स्वनामभिश्चतुर्थ्यन्तैस्स्वतारार्द्यैर्नमोऽन्तकैः ॥
देवतापश्चिमे मन्त्री यजेदेताः सलक्षणाः ।
आद्या शुद्धा कालिकाऽन्या तृतीया ललिता स्मृता ॥
चतुर्थी मालिनी ख्याता पञ्चमी स्याद्वसुन्धरा ।
सरस्वती रमा गौरी दुर्गा तु नवमी भवेत् ॥

“ ” एतच्चिह्नान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

पञ्चाब्दं नववर्षं च यजेद्बालं विचक्षणः ।
पञ्चाब्दो वटुकः प्रोक्तो नववर्षो गणेश्वरः ॥

तथा ।

प्रदद्यादासनं वाचा ह्रिया पाद्यं समर्पयेत् ।
रमयाऽर्घं निवेद्याथ स्त्रिया चन्दनमर्पयेत् ॥
कुमार्यै शक्तिबीजेन प्रदद्यात् कुसुमोच्चयम् ।
चैतन्यमनुना मन्त्री धूपदीपादिकं न्यसेत् ॥
तारा एते समाख्याता भृगुर्भवसमन्वितः ।
विन्दुनादसमाक्रान्तश्चैतन्यमनुरीरितः ॥
क्वचिद्भैरवबीजं तु पञ्चमः प्रणवो मतः ।

" एकस्या एव पूजने त्रिताराद्यमन्त्रेणैव समस्तोपचारसमर्पणं बोध्यम् ।
त्रिताराद्येन मन्त्रेण सर्वं तस्यै निवेदयेत्-इति वचनात् " ।

(महाकालसंहितायाम्)

भूषणानि दुकूलानि सिन्दूरालक्तकावपि ।
कज्जलादर्शविख्याततालवृन्तानि पेटिका ॥
परिकर्माधारचोलमञ्चिकापीठदोलिका ।
पाञ्चालिका च मञ्जूषा पादुके कुथपट्टके ॥
चन्द्रातपोपसङ्ख्यान तथोद्वर्त्तनभाजनम् ।
शय्योपधानपर्यङ्काः समुद्गं च प्रसाधनी ॥
प्रतिग्राहश्च हिन्दोला तथा सीमन्तवर्त्तिका ।
गोरोचनामृगमदौ कर्पूरं कुङ्कुमं तथा ॥
एवमादीनि चान्यानि यावच्छक्यानि सुन्दरि ।
प्रदातव्यानि वस्तूनि कुमारी तुष्यते यथा ॥

तथा ।

" " एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

ततो यत् स्थापितं पात्रं कुमार्यै प्रतिपादयेत् ।
स्वीकुर्यात् सा च तत्रैव तथा यत्नं समाचरेत् ॥
अगृहीते तु तत्पात्रे महान् दोषोऽभिजायते ।
अतो यत्नस्तथा कार्यः स्वीक्रियेत यथा तया ॥
ततो गृहीत्वा कुसुमाक्षतं तस्याः कलेवरे ।
पञ्चाशत्सङ्ख्यकाः शक्तीः क्रमतः परिपूजयेत् ॥
ता इदानीं प्रवक्ष्यामि सावधाना निशामय ।
आद्या जया च विजया ऋद्धिदा माययाऽन्विता ॥
कला च सिद्धिदा सूक्ष्मा प्रभा स्यात् सुप्रभा ततः ।
विद्युता च विशुद्धिश्च नन्दिनी च विशुद्धियुक् ॥
अपराजिता च ललिता लक्ष्मीर्गौरी तथैव च ।
अथ मेधा च गायत्री सावित्री च स्वधा पुनः ॥
स्वाहेच्छे च क्रिया विद्या प्रज्ञा दीप्ता च चेतना ।
भद्रा ज्येष्ठा तथोमा च शिवा च मुदिता क्षमा ॥
श्रद्धाऽथ विमला कौमुद्यपि वै विशदा ततः ।
अशोका ज्ञानदा चैव बलदा राज्यदाऽपि च ॥
मैत्री तदनु रुद्राणी भवानी च मृडान्यपि ।
सर्वज्ञा चण्डिका चापि कुमारी सर्वशोषगा ॥
पञ्चाशत्सङ्ख्यका एताः कुमार्याः शक्तयः स्मृताः ।
भैरवानष्ट तदनु पूजयेदक्षतादिभिः ॥
भैरवीभ्यस्ततो विघ्नविनायकेभ्य एव च ।
वटुकक्षेत्रपालाभ्यां योगिनिभ्यस्तथैव च ॥
भूतेभ्यः प्रेतयक्षेभ्यो डाकिनीभ्यस्तथैव च ।

एतत्पूजां प्रकुर्वीत सदूर्वा*क्षतचन्दनैः ॥
पुनरष्टौ सर्वशेषे ङेन्ता देवीर्यजेत् प्रिये ।
महामाया कालरात्री ततो वै सर्वमङ्गला ॥
पूज्या डमरुका पश्चाद्राजराजेश्वरी तथा ।
सम्पत्प्रदा भगवती कुमारी तदनन्तरम् ॥

(यामले)

कुलान्तः पूजयेदेनां कुलकोणेष्विमान् यजेत् ।
कामेश्वरी च वज्रेशी तृतीया भगमालिनी ॥
उपरिष्टात् कुलद्वन्द्वकोणेष्वेताः समर्चयेत् ।
अनङ्गकुसुमाऽनङ्गमन्मथाऽनङ्गपूर्विका ॥
मदनानन्दशब्दाद्या चतुर्थी कुसुमोत्तरा ।
पञ्चम्यनङ्गमदनाऽऽतुराऽनङ्गपदादिका ॥
शिशिरा कथिता ह्येताः शक्तयो रससङ्ख्यकाः ।
अनेन विधिना पूज्या कुमारी साधकोत्तमैः ॥

(महाकालसंहितायाम्)

समाप्येत्थं कुमार्यर्चां तत्पुरो भुवि वारिणा ।
वर्त्तुलं मण्डलं कृत्वा तन्मध्ये कुलकामिनीम् ॥
विलिख्य जलकुसुमाक्षतचन्दननागजैः ।
पूजयेन्मण्डलं तच्च शुभदायै नमो वदेत् ॥
स्थालीगतं च तत्सर्वमन्नं तत्र निवेश्य हि ।
नानाविधां च सामग्रीं लेह्यचोष्यादिघट्टिताम् ॥
मांसमीनसुरापूर्णां भक्ष्यचर्व्यादिपूरिताम् ।
कुमारीदक्षहस्ते च स्थापयित्वाऽन्नमूर्धनि ॥

---

* कुर्यान् पूजां देवि कुसुमा-इति ४, ५ पु० पा० ।

उत्तानं वक्ष्यमाणेन मनुनाऽन्नं समुत्सृजेत् ।

“ अन्नोत्सर्गमन्त्रस्तु ।

ऐँ ह्रीँ श्रीँ स्त्रीँ सौँः सर्वशक्तिस्वरूपायै सर्वसिद्धिदायै भगवत्यै कुमार्यै भक्ष्यभोज्यनानाविधान्नकल्पितषड्रसोपेतमिदं महाभोगनैवेद्यं तुभ्यमहं निवेदयामि गृहाण २ भुङ्क्ष्व २ प्रसीद २ सर्वसिद्धिं मे प्रयच्छ २ ऐँ ह्रीँ श्रीँ नमः स्वाहा ।

इति पद्धतिकृतोक्तः ” ।

तथा ।

इतरासां कुमारीणां प्रत्येकं पूजनं चरेत् ।
गन्धपुष्पैर्धूपदीपैर्नैवेद्यैरन्नसङ्कुलैः ॥

तथा ।

अन्नानि यादृशान्यस्यै मुख्यायै कल्पितानि हि ।
अन्याभ्यस्तादृशान्येव दातव्यान्येष निश्चयः ॥
फलाफलं तु मुख्याया ज्ञेयमत्र विपश्चिता ।
भुञ्जानासु कुमारीषु न तूर्यध्वनिमाचरेत् ॥
नान्यत्र च मनो दद्यात् संबाधं नैव कल्पयेत् ।
कोलाहलं निषेधेत अमङ्गल्यानि यानि च ॥
रुदितापानवायुं च प्रयत्नेन विवर्जयेत् ।
सावधानो भवेदत्र किमादौ भक्षयन्ति ताः ॥
मिथः किं वा प्रजल्पन्ति कुत्र वा वस्तुविग्रहः ।
कुत्र दृष्टिं प्रक्षिपन्ति भीताः किं वा वदन्त्यमूः ॥
इत्यादि नानाजातीयाश्चेष्टा आसां प्रयत्नतः ।
सावधानतया ज्ञेया भद्राभद्रस्य सूचकाः ॥

“ ” एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

भक्षयन्तीषु तास्वेवं पठेत् तत्स्तोत्रमत्वरम् ।
कृताञ्जलिर्नम्रशिरा आसामग्रे क्षिपन् दृशौ ॥
जय कालि महाभीमे भीमरावे भयापहे ।
संसारदावाग्निशिखे वृजिनार्णवतारिणि ॥
ब्रह्मेन्द्रोपेन्द्रभूतेशप्रभृत्यमरवन्दिते ।
सर्गपालनसंहारकारण्यहितमारिणि ॥
गुह्यकालि परानन्दरसपूरितविग्रहे ।
परब्रह्मरसास्वादकैवल्यानन्ददायिनि ॥
गुणातीतेऽपि सगुणे महाकल्पान्तनर्त्तकि ।
कुमारीरूपमास्थाय विद्याप्रज्ञास्वरूपिणि ॥
आगताऽसि ममागारं शारद्यर्चासमाप्तये ।
सांवत्सरिककल्याणसूचनाय तथैव च ॥
धन्योऽस्मि कृतकृत्योऽस्मि सफलं जीवितं मम ।
यस्मात् त्वमीदृशं कृत्वा कौमारं रूपमुत्तमम् ॥
गुह्यकालि समायाताऽऽह्निकपूजाजिघृक्षया ।
त्वमेवैतेन रूपेण देवेभ्यः प्रार्थिता पुरा ॥
दत्तवत्यसि साम्राज्यं वरानपि समीहितान् ।
मह्यमप्यद्य देवेशि वरं देहि सुपूजिता ॥
ब्रह्मणे सृष्टिसामर्थ्यं त्वं पुरा दत्तवत्यसि ।
विष्णवे च त्वमेवादास्तथा पालनशक्तिताम् ॥
महारुद्राय संहारकर्तृत्वमददः शिवे ।
देवेभ्यश्चापि दैत्यानां नाशने दक्षतामपि ॥
अन्तर्यामिन्यसीशानि त्रिलोकीवासिनामपि ।

निवेदयामि किं तेऽहं सर्वकर्मैकसाक्षिणि ॥
शत्रुनाशं राज्यलाभं शरीरारोग्यमेव च ।
त्वत्पादाम्बुजयोर्भक्तिं याचेऽहं चतुरो वरान् ॥
नमस्ते भगवत्यम्ब नमस्ते भक्तिवत्सले ।
नमस्ते जगदाधाररूपिणि त्राहि मां सदा ॥
मातरं वेद्मि रूपं ते न शरीरं न वा गुणम् ।
भक्त्या हृत्स्थितया पूजां तव जानाम्यनन्यधीः ॥
त्वं माता त्वं पिता बन्धुस्त्वमेव जगदीश्वरि ।
त्वं गतिः शरणं त्वं च स्वर्गस्त्वं मोक्ष एव च ॥
विहाय त्वां जगन्मातर्नान्यां जानामि देवताम् ।
नमस्तेऽस्तु नमस्तेऽस्तु नमस्तेऽस्तु नमो नमः ॥
एभिः श्लोकैः स्तुतिं कृत्वा कुमारीणां वरानने ।
दद्यादाचमनीयं हि भोजनान्ते गतत्वरः ॥
ततः प्रदद्यात् ताम्बूलं मृगचन्द्राभिवासितम् ।
सह वाद्यादिभिस्तावदनुव्रज्य विसर्जयेत् ॥
शुभाशुभफलं वच्मि साम्प्रत तव पार्वति ।
तत्राप्यादौ शुभं वक्ष्ये विपरीतं ततोऽस्य च ॥
तदुच्छिष्टं ततो दद्याज्जम्बुकेभ्योऽथ भूतले ।
निखनेदप्सु वा देवि समालोड्य विसर्जयेत् ॥
आदौ भक्ते करे दत्ते सुभिक्षं विषये भवेत् ।
पायसे यजमानस्य पशुवृद्धिः प्रजायते ॥
घृते स्यादायुरारोग्यं पूजामैश्वर्यवृद्धये ।
तथा मोदकशष्कुल्योः सन्ततिर्भूयसी भवेत् ॥

मत्स्यजातिष्वर्थलाभः कृशरे यानसम्पदः ।
मांसे तु पुत्रलाभः स्यात् तेमने कामिनी भवेत् ॥
फलं मांसविशेषस्य भिन्नं मिश्रं ब्रुवे हि तत् ।
अर्थलाभस्तु वाराहे खाड्गे तु विजयो रणे ॥
माहिषेण तु मांसेन राज्यप्राप्तिर्भवेद्ध्रुवम् ।
आरोग्यं हारिणेनाशु कार्ष्णसारेण वाग्मिता ॥
शाशे मेधाविता गच्छेद्राजेष्वजरतामपि ।
आत्रेये पलले देवि सर्वकल्याणमाप्नुयात् ॥
कामठे मेदिनीलाभो बह्वन्नत्वं च राङ्कुरे ।
वार्ध्रीणसे शत्रुनाशो हांसे मनुजवश्यता ॥
तैत्तिरेऽभीष्टसिद्धिश्च वर्त्तके पापसंक्षयः ।
मनस्तोषो बलाकायां फलेक्षोर्विश्ववश्यता ॥
कीर्त्तिस्तु महती दध्नि दुग्धे सम्पदनुत्तमा ।
पिष्टके तनयावाप्तिः शाके च रिपुसंक्षयः ॥
हालायां पुण्यवृद्धिः स्याच्चोष्ये संपत् सुवाग्मिता ।
धनागमः फाणिते तु कूर्च्चिकायां बलोन्नतिः ॥
तुम्बीवृन्ताककूष्माण्डकारवेल्लपटोलकैः ।
घोषशूरणदीर्घाङ्घ्रिमूलकैस्तेमने कृते ॥
विद्यालाभो भवेद्देवि तक्रे वाक्पटुताऽपि च ।
गोधूमचूर्णघटिते वस्तुनि प्रतिभा रणे ॥
वेद्यां दृष्टौ भवेन्मोक्षो मण्डपेऽप्युन्नतिर्भवेत् ।
चामरच्छत्रयोस्तालवृन्तपर्यङ्कयोरपि ॥
घण्टादर्पणयोश्चापि वृग्दाने भूतिरुत्तमा ।

आकल्पालङ्करणयोः स्पर्शचालनदृष्टिषु ॥
नानाविधानि* द्रव्याणि भवन्ति महितुः प्रिये
एवंविधानि भूयांसि चेष्टितान्यशनानि च ॥
शुभादेशोनि जायन्ते विपरीतान्यतः शृणु ।
मुख्यभूता कुमारी चेद्भ्रमति द्वित्रिवारकम् ॥
दुर्भिक्षं जायतेऽवश्यं प्रजाः स्युः पीडिता अपि ।
राजा विनाशमायाति कुमार्या रोदने कृते ॥
उच्चारे तु महामारी पुरीषे पुरदाहनम् ।
अभोजने शत्रुभयमापदो बहुभोजने ॥
अभाषणे त्वामयाः स्युर्विपदो बहुभाषणे ।
उपसर्गा बहुविधाश्चेष्टया करपादयोः ॥
अतिलज्जा विनाशाय तथा निर्लज्जता शुभा ।
नानोत्पातास्तु मौने स्युः स्वापे बाहोर्विनाशनम् ॥
सर्वनाशस्तु भीतायां क्रुद्धायां मृत्युरेव च ।
आवेशे तत्क्षणाद्राजा म्रियते नात्र संशयः ॥
शङ्कितायां शत्रुशङ्का शान्तायामीतितो भयम् ।
चिन्तितायां तु विजेयं तद्राष्ट्रस्यैव पातनम् ॥
मोहे वित्तविनाशः स्याज्जाड्ये पूजा च निष्फला ।
चाञ्चल्ये चञ्चला लक्ष्मीः पूजकस्यैव जायते ॥
विषादवत्यथ यदि कुमारी तत्र जायते ।
सरुज सप्रजं राष्ट्रं तदा सीदति पार्वति ॥
रोगेण म्रियते राजा यदि रुग्णा प्रजायते ।

---

* सौख्यानि इति ४, ५ पु० पा० ।

दुर्भिक्षमरकातङ्का यद्यश्रूणि विमुञ्चति ॥
सर्वनाशो भवेत् तर्हि धुनोति यदि मस्तकम् ।
त्रस्तायां रिपुजस्त्रासस्तस्य राज्ञः प्रदिश्यते ॥
कम्पे सति स्याद्विमुखी कालिका परमेश्वरी ।
नीचैः शिरश्चेत् कुरुते असन्तुष्टा तदेश्वरी ॥
हीनायुः स्यात् तदा पृथ्वीपतिश्चेद्गद्गदस्वरा ।
पूजकस्य भवेद्दैन्यं व्याकुला यदि जायते ॥
मोहने व्याकुलायां तु सर्वं नगरमाकुलम् ।
क्रोडितायां भवेद्रोगः स्वेदे दारधनक्षयः ॥
अधोवायुं पतति चेत् कुमारीदैवयोगतः ।
पीडितं परचक्रेण तदा भवति पत्तनम् ॥
गीतं गायति चेत् तत्र कुमारी रहितक्रिया ।
संप्रजाराष्ट्रतनयदारस्य नृपतेर्मृतिः ॥
सहागताभिः कदा चिन्मुख्या विवदते यदि ।
तदा समायात्यकस्मात् परचक्रं सुदारुणम् ॥
यया कया चित् सार्धं वा येन केन चिदेव वा ।
कुमारी भाषते वीतभयं मन्दाक्षसाध्वसा ॥
प्रजायन्ते तदा तस्य विषयेषु षडीतयः ।
व्यत्यासं यदि भक्ष्यस्य कुर्वते करचालनैः ॥
ग्रस्तं समस्तं भवति मनसो वाञ्छितं प्रिये ।
उपायनीकृतं यद्यद्द्रव्यं देव्यै तु मण्डपे ॥
तच्चेत् कराभ्यां स्पृशति कान्दिशीको भवेन्नृपः ।
निर्वापयति चेद्दीपं कुमारी मुखमारुतैः ॥

बुद्धिभ्रंशो भवेत् तर्हि ज्ञानदीपश्च नश्यति ।
दैवयोगाच्च नृत्यन्ति कुमार्यश्चेत् सुराकुलाः ॥
सराजकः सविषयः श्मशानमिव जायते ।
वासांस्युत्सृज्य नग्नाः स्युर्यदि तत्र कुमारिकाः ॥
शत्रुभिर्धूर्यते तर्हि राजा समरमूर्धनि ।
यदि फूत्कृत्य कूर्दन्ते करौ धृत्वा भ्रमन्ति च ॥
भूतावेशः क्षितीशस्य जायते नात्र संशयः ।
उच्चरिष्यामि हास्ये वा वदन्तीत्थं कुमारिकाः ॥
भोजनावसरे तर्हि महामारीभयं भवेत् ।
वामे वा दक्षिणे वाऽपि चलत्तारकया दृशा ॥
रक्तोग्रया घूर्णयते शिरः स्वस्य कुमारिका ।
कुरुते वाऽऽट्टहासं सा येन त्रस्यन्ति मानवाः ॥
भूतावेशो भवेत् तर्हि प्रेता नृत्यन्ति वा पुरे ।
दन्तैर्दन्तान् पीडयित्वा कुर्यात् कटकटारवम् ॥
प्रयाति सदनं मृत्योः सदारसुतबान्धवः ।
दृशावनिमिषे कृत्वा सन्दश्यौष्ठं रदेन हि ॥
संतर्जयति शीर्षं चेत् कम्पयन्ती कुमारिका ।
तदेव फलमुद्दिष्टं यत् स्यात् कटकटारवे ॥
आद्यन्तिकं भजेन्मौनं करेणान्नं स्पृशेन्न च ।
शिरोऽत्यर्थं च नमयेदङ्गुष्ठेन लिखेद्भुवम् ॥
विदध्याद्भूतले रेखां करजैर्निष्प्रयोजनम् ।
संहताभ्यां कराभ्यां च कण्डूयेदथ वा शिरः ॥
तृणान्यकारणाच्छिन्द्यादङ्गुलीस्फोटमाचरेत् ।

पाणिभ्यां मुद्रयेन्नेत्रे द्वौ कर्णौ पिदधाति वा ॥
कुर्वीत वा बाहुरिकां पार्ष्णिघृष्टिं करोति वा ।
महान्तं ग्रासमादत्ते मुखं व्यादाय तिष्ठति ॥
अन्नोपरि क्षुतं धत्ते जृम्भणं वा मुहुर्मुहुः ।
गृहीत्वा पाणिना वाऽन्नं चतुर्दिक्षु क्षिपत्यपि ॥
उत्थाय वा प्रचलति त्यक्त्वाऽन्नं पूजनं तथा ।
आयाति वमनं वाऽस्याः स्यातां रोमाञ्चवेपथू ॥
निर्गच्छतो वा तद्गात्रात् पूयास्रे हेतुमन्तरा ।
अकस्मादेव कुरुते काकुं चेत् कारणं विना ॥
अश्लीलं वल्गति तथा स्ववर्ग्यार्थे प्ररोदिति ।
आमुक्तालङ्कृतीर्मुञ्चेद्गृहं यास्यामि वा वदेत् ॥
यस्य कस्यापि वा कुर्याद्धर्षणं तत्स्थले स्थिता ।
उपालभेत वा कां च्चित् सहैवास्या उपेयुषी ॥
भिनत्ति वा निदानं वा स्वहस्तवलयानि वा ।
कृते मृतस्य कस्यापि बन्धोः शोचति तत्र सा ॥
यत्किञ्चिद्वा प्रलपति निर्निमित्तं कुमारिका ।
सर्वमेतदमङ्गल्यं विज्ञेयं त्रिदशार्चिते ॥
दुर्भिक्षं धननाशं च रोगो मारीभयं तथा ।
पदे पदे च विपदः शोको व्याधी रिपून्नतिः ॥
परचक्रागमोऽकस्मादग्निदाहः पुरे गृहे ।
मृत्युत्रासश्च दारिद्र्यं विच्छेदो बन्धुभिः सह ॥
भूतप्रेतपिशाचाभिनिवेशोऽपि गृहे गृहे ।
अष्टाभिस्तु महारोगैः प्रजानां निधनं भवेत् ॥

कुमारीचेष्टितद्वारा ज्ञायते हि शुभाशुभम् ।
वार्षिकं च फलं राज्ञो जयो वाऽथ पराजयः ॥
मृत्युर्दुःखं धनं सौख्यं शत्रुभीतिर्बलोन्नतिः ।
राज्यवृद्धिः प्रजापीडा व्यङ्गताऽनीकसंक्षयः ॥
कुमारीपूजनात् सर्वं ज्ञायते भोजनादपि ।
परीक्षा यत्नतस्तस्माद्राज्ञा स्वस्य शुभाशुभम् ॥
अर्चितोऽपि विशेषेण भोजनेन सुरेश्वरि ।
जाते शुभे समीचीनं वृत्ते तदितरत्र हि ॥
काम्यार्चा बहुसम्भारैर्दोषं तज्जं निवारयेत् ।
निवृत्य स्वगृहं रुग्णा याता यदि कुमारिका ॥
तस्मिन्नेवाहनि भवेत् तथाऽपि न शुभं फलम् ।
इत्यादि फलबाहुल्यं शुभस्याप्यशुभस्य च ॥
मया विविच्य कथितं ध्रियस्व हृदि यत्नतः ।
ततो निशीथसमये विधिवत् पूजनं ततः ॥

“(वाडवानलीये)

पूजिता शरदर्चायां या कुमार्युक्तलक्षणा ।
सर्वपर्वसु सा पूज्या यावत् पुष्पं न दृश्यते ॥

पुष्पमित्युपलक्षणम् ।

महाकालः” ।

पीठमर्च्यां प्रकुर्वीत धूपदीपानुलेपनैः ।
नैवेद्यैरुपहारैश्च गीतवाद्यादिभिस्तथा ॥

(यामले)

कुमारीपूजिता हन्ति कलुषं पूर्वसञ्चितम् ।
कुमारिकां विजानीयात् साक्षात् प्रकृतिरूपिणीम् ॥

“ ” एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

पत्रं पुष्पं फलं तोयं यत्किञ्चिद्वस्तु शोभनम् ।
अनन्तफलदं प्रोक्तं कुमार्यै चेत् समर्पयेत् ॥
भोजिता चेत् कुमारी स्याद्भोजितं भुवनत्रयम् ।
ब्राह्मणाय सुशीलाय कुमारीं यः समर्पयेत् ॥
पृथिवीदानजं पुण्यं सोऽश्नुते नात्र संशयः ।
स सर्वसिद्धिमाप्नोति यः कुमारीं समर्चयेत् ॥
वसन्ति सततं देहे कुमार्या योगिनीगणाः ।
अतः पूज्या नमस्या सा लालनीया तदिच्छया ॥
अशक्त्या पूजयेदेकां कुमारीं साधकोत्तमः ।
विना कुमरिकापूजां न पर्व परिहापयेत् ॥
यो नित्यमर्चयेदेतां तस्य स्यात् सिद्धिरुत्तमा ।
नवरात्रे समायाते नवम्यन्तं निशातधीः ॥
नानोपहारैरभ्यर्च्य कुमारीं वृद्धिपूर्वकम् ।
वृद्धिक्रमेण प्रयजेद्वाञ्छितां सिद्धिमाप्नुयात् ॥
अथ वा पूजयेन्मन्त्री युवतीर्नव संख्यकाः ।
हृल्लेखा गगना रक्ता महासूक्ष्मा करालिका ॥
इच्छा ज्ञाना क्रिया दुर्गा नवनामभिरीताः ।
पूर्ववत् पूजयेन्मन्त्री जपेत् साद्धं सहस्रकम् ॥
यदि सा क्षोभमायाति स्वयमेव विलासिनी ।
तया सह नयेद्रात्रिं वासरं वा निशातधीः ॥
कुमारीं न स्पृशेदेव भावयुक्तेन चेतसा ।
अन्यथा मृत्युमाप्नोति नो चेद्देवी पराङ्मुखी ॥

(महाकालसंहितायाम्)

एवं दोषगुणौ ज्ञात्वा कुर्वीत विधिपूर्वकम् ।

कुमारीपूजनं भक्त्या शरत्पूजनकर्मणि ॥
बलिहोमादयश्चास्य कलां नार्हन्ति षोडशीम् ।

इति कुमारीपूजाविधिः ।

अथ शिवाबलिः ।

(कुलचूडामणौ)

विल्वमूले प्रान्तरे वा श्मशाने वाऽपि साधकः ।
मांसप्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत् ॥

(महाकालसंहितायाम्)

पुराद्बहिर्निशाकाले महारण्यसमीपतः ।
गृहीत्वा भक्ष्यवस्तूनि पूजासम्भृतिमप्युत ॥
आप्तैरनुगतो द्वित्रैः प्रदद्यात् फेरवीबलिम् ।
आमानि पक्वान्यपि च मांसानि विधिनाऽर्पयेत् ॥
तत्रोदीचीदिग्वदनो वीतभीः शुचिरूर्जितः ।
प्राणायामं षडङ्गं च विधायार्घं प्रपूज्य वै ॥
उत्थाय मुक्तचिकुरः शिवा आकारयेच्छनैः ।

(कुलचूडामणौ)

कालि कालीति वक्तव्यं तत्र सा शिवरूपिणी ।
पशुरूपा समायाति परिवारगणैः सह ॥
भुक्त्वा रौति यदैशान्यां मुखमुत्तोल्य सुस्वरम् ।
तदैव मङ्गलं तस्य नान्यथा कुलभूषण ॥
अवश्यमन्नदानेन तोषयेन्नियतं शिवाम् ।
नित्यश्राद्धं यथासन्ध्यावन्दनं पितृतर्पणम् ॥
तथेयं कुलदेवीनां नित्यता कुलपूजने ।
पशुरूपां शिवां देवीं यो नार्च्चयति निर्जने ॥
शिवारावेण तस्याशु सर्वं नश्यति निश्चितम् ।

जपपूजाविधानानि यत्किञ्चित्सुकृतानि च ॥
गृहीत्वा शापमासाद्य शिवा रोदिति निर्जने ।
एकया त्वद्यते यत्र शिवया देवभैरव ॥
तत्रैव सर्वशक्तीनां प्रीतिः परमदुर्लभा ।
पशुशक्तिर्नरे शक्तिः पक्षिशक्तिश्च भैरव ॥
पूजिता विगुणं कर्म सगुणं कारयेद्यतः ।
तेन सर्वप्रयत्नेन कर्त्तव्यं पूजनं महत् ॥
राजादिभयमापन्नं देशान्तरभयादिकम् ।
शुभाशुभानि कर्माणि विचिन्त्य बलिमाहरेत् ॥
गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि ।
शुभाशुभफलं व्यक्तिं ब्रूहि गृह्ण बलिं तव ॥
एवमुच्चार्य दातव्यो बलिः कुलजनप्रिये ।

(महाकालसंहितायाम्)

स्थानादस्मादपसरेत् किञ्चिद्दूरतरं प्रिये ।
शिवा यथा वीतभया आगच्छन्त्यन्नसन्निधौ ॥
तत्र स्थित्वा निरीक्षेत किं किं ता भक्षयन्ति हि ।
सर्वा आगत्य चेत् सर्वं प्रदत्तं भक्षयन्ति हि ॥
विनिर्दिशेत् सर्वसिद्धिं राज्यलाभं धनागमम् ।
यद्यत् ता भक्षयन्त्यन्नं तत्तत् फलमवाप्नुयात् ॥
यद्यच्च नैव खादन्ति तत्तन्नैव फलं लभेत् ।
कुमारीपूजनादौ तु विशेषोऽस्योपवर्णितः ॥
तेन नात्र ब्रुवे देवि ग्रन्थाधिक्यभयादपि ।
कुमारीरूपमास्थाय यथाऽऽयाति महेश्वरी ॥

शिवारूपं तथा कृत्वा स्वयमायाति कालिका ।
ततो भक्तिः प्रकर्त्तव्या तासु यत्नेन साधकैः ॥
शिवासु भक्षयन्तीषु सर्वेभ्यो बलिमाहरेत् ।
संहारभैरवायादौ वटुकेभ्यस्ततः परम् ॥
विनायकेभ्यो मातृभ्यः क्षेत्रपालेभ्य एव च ।
योगिनीभ्यो डाकिनीभ्यः शिवदूतीभ्य एव च ॥
पुरोक्तो मन्त्र आसिद्धिं तेन तेन बलिं हरेत् ।
महदैश्वर्यमाप्नोति निःशेषं भक्षयन्ति चेत् ॥
अर्धे तु मध्यमा सिद्धिरभक्षे तु विपद्भवेत् ।

(कुलचूडामणौ)

यदि नो गृह्यते वत्स तदा नैव शुभं भवेत् ।
शुभं यदि भवेत् तत्र भक्ष्यते तदशेषतः ॥

(महाकालसंहितायाम्)

खादितोत्थाय तिष्ठत्सु शिवावृन्देषु तत्र हि ।
दण्डवत् प्रणमेत् सर्वाः स्वेष्टदेवीधिया स्वयम् ॥
पुष्पाञ्जलिं समादाय गन्धचन्दनचर्च्चितम् ।
उत्थाय मुक्तचिकुरो मीलिताक्षो दिगम्बरः ॥
भक्तिशाली वीतभयः किञ्चित्प्रणतकन्धरः ।
स्तुतिं कुर्यात् स्तवैरेतैर्वरप्रार्थनपूर्वकम् ॥
शिवारूपधरे देवि गुह्यकालि नमोऽस्तु ते ।
उल्कामुखि ललज्जिह्वे घोररावे शृगालिनि ॥
श्मशानवाशिनि प्रेते शवमांसप्रियेऽनघे ।
अरण्यचारिण्यनघे शिवे जम्बुकरूपिणि ॥
नमोऽस्तु ते महामाये जगत्तारिणि कालिके ।

मातङ्गि कुक्कुटे रौद्रि महाकालि नमोऽस्तु ते ॥
सर्वसिद्धिप्रदे भीमे भयङ्करि भयापहे ।
प्रसन्ना भव देवेशि मम भक्तस्य चण्डिके ॥
संसारसागरतरे जय सर्वशुभङ्करि ।
विस्रस्तचिकुरे चण्डि चामुण्डे मुण्डमालिनि ॥
संहारकारिणि क्रुद्धे सर्वसिद्धिं प्रयच्छ मे ।
दुर्गे किराति शवरि प्रेतासनगतेऽभये ॥
अनुग्रहं कुरु सदा कृपया मां विलोकय ।
राज्यं प्रयच्छ विकटे वित्तमायुः सुतान् स्त्रियम् ॥
शिवाबलिप्रदानेन त्वं प्रसन्ना भवेश्वरि ।
नमस्तेऽस्तु नमस्तेऽस्तु नमस्तेऽस्तु नमोऽस्तु ते ॥
इत्येतैरष्टभिः श्लोकैः शिवास्तोत्रमुदीरयेत् ।
ततस्तच्छेषमन्नं यद्भाजनं चान्यदेव वा ॥
सर्वं हि निखनेद्भूमौ प्रयत्नेनैव पार्वति ।
यदि काकाः खराः श्वानो ये चान्ये पापजातयः ॥
भक्षयन्ति तदुच्छिष्टं तदा विघ्नः प्रजायते ।
रात्रावेव समागच्छेन्निर्भयो विपिनान्तरात् ॥

इति शिवाबलिविधिः ।

अथ कृत्यशेषमाह ।

आगत्य गन्धपुष्पाद्यैः पुनर्देवीं प्रपूजयेत् ।

तथा ।

ततः प्रदक्षिणीकृत्य पतित्वा दण्डवद्भुवि ।
भक्तिनम्रः स्तुतिं जल्पेत् काकुगद्गदया गिरा ॥
अलिका नासिका बाहू वक्षो जठरमेव च ।

पादौ क्ष्मां स्पर्शतो दण्डप्रणामः स हि गद्यते ॥
आयुर्देहि यशो देहि भगं भगवति देहि मे ।
पुत्रान् देहि धनं देहि कामान् सर्वाँश्च देहि मे ॥
प्रचण्डे पुत्रदे नित्यं सुप्रीते सुरनायिके ।
कुलोद्योतकरे चोग्रे जयं देहि नमोऽस्तु ते ॥
उग्रचण्डे प्रचण्डासि प्रचण्डबलनाशिनि ।
नमस्ते सर्वदा देवि विश्वेश्वरि नमोऽस्तु ते ॥
दुर्गोत्तारिणि दुर्गे त्वं सर्वाशुभनिषूदनि ।
धर्मार्थमोक्षदे देवि नित्यं मे वरदा भव ॥
दुर्गे देवि महाभागे त्राहि मां शरणागतम् ।
महिषासृङ्मदोन्मत्ते प्रणतोऽस्मि प्रसीद मे ॥
हर पापं हर क्लेशं हर शोकं हराशुभम् ।
हर रोगं हर क्षोभं हर मानं हर प्रिये ॥
कालि कालि महाकालि कालिके पापहारिणि ।
धर्मकामप्रदे देवि नारायणि नमोऽस्तु ते ॥
संग्रामे विजयं देहि धनं देहि सदा गृहे ।
धर्मकामर्थसम्पत्तीर्देहि देवि नमोऽस्तु ते ॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यविजयं देहि देवि नमोऽस्तु ते ॥
आयुर्ददातु मे काली पुत्रानपि सदाशिवा ।
अर्थकामौ महामाया विभवं सर्वमङ्गला ॥
शिरो मे चण्डिका पातु कण्ठं पातु सुरेश्वरी ।
हृदयं पातु चामुण्डा सर्वतः पातु कालिका ॥

ब्रह्माणी चैव कौमारी वाराही वैष्णवी तथा ।
माहेश्वरी नारसिंही इन्द्राणी शिवदूत्यपि ॥
महाकाली च चामुण्डा भैरवी कौशिकी तथा ।
उग्रचण्डा च प्रचण्डा च चण्डोग्रा चण्डनायिका ॥
चण्डा चण्डवती चैव अतिचण्डा च चण्डिका ।
एताश्चान्याश्च रुद्राणि यास्ते तिष्ठन्ति शक्तयः ॥
ताभिः सहैव मां रक्ष संग्रामे संकटे तथा ।
नानापुराणवाक्येन नानादेवर्षिभाषितैः ॥
सदाशिवाज्ञया चापि त्वमेव शरणं मम ।
त्वां विहायेतरां नैव संश्रये देवतां शिवे ॥
अतः परं यदुचितं तत् कर्त्तुं मातरर्हसि ।
आध्याकुलं च दारिद्र्यं रोगं शोकं च दारुणम् ॥
बन्धुस्वजनवैराग्यं दुर्गे त्वं हर दुर्गतिम् ।
राज्यं तस्य प्रतिष्ठा च लक्ष्मीस्तस्य सदा स्थिरा ॥
प्रभुत्वं तस्य सामर्थ्यं यस्य त्वं मस्तकोपरि ।
धन्योऽहं कृतकृत्योऽहं सफलं जीवितं मम ॥
अगताऽसि यतो दुर्गे माहेश्वरि ममालयम् ।
अर्घ्यं पुष्पं च नैवेद्यं धूपं दीपं बलिं तथा ॥
गृहाण वरदे देवि कल्याणं कुरु सर्वदा ।
कृत्वैवं विधिना दण्डप्रणामस्तुतिपूर्वकम् ॥
पूजां समर्पयेद्देव्यै गृहीत्वा पाणिना जलम् ।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥
25 यदर्च्चितं मया देवि परिपूर्णं तदस्तु मे ।

गृहीतुं शारदीं पूजां मर्त्यमण्डलमागताम् ॥
चण्डिके त्वां नमाम्यद्य पूजेयं प्रतिगृह्यताम् ।
कायेन मनसा वाचा त्वत्तो नान्या गतिर्मम ॥
अन्तश्चरसि भूतानां ज्ञात्री त्वं सर्वसाक्षिणी ।
एतावत् कृत्यमुदितं शारदीयार्च्चनक्रमे ॥
प्रातरारभ्य देवेशि रात्रेर्यामत्रयावधि ।
शिवाबलिं कुमार्यर्च्चां प्रभूतं बलिमेव वा ॥
हित्वाऽदस्त्रयमष्टम्यामयमेव विधिः प्रिये ।
ततः प्रसादं देव्या यदवशिष्टं भवेदनु ॥
गन्धं पुष्पं च नैवेद्यं सिद्धं वाऽसिद्धमेव वा ।
बन्धुभिः सह भुञ्जीत हास्यकौतुकपूर्वकम् ॥
गीतनृत्यादिकं पश्चाद्देव्यग्रे विनियोजयेत् ।
क्रीडां च ज्ञातिभिः सार्धं विदधीत विचक्षणः ॥

“एतावदशक्ता संक्षिप्तपूजोक्ता (कालिकापुराणे)

सम्यक्कल्पोदिता पूजा यदि कर्त्तुं न शक्यते ।
गन्धं पुष्पं च धूपं दीपं नैवेद्यमेव च ॥
अभावे तोयपुष्पाभ्यां तदभावे च भक्तितः ।
संक्षेपपूजा कथिता … … इति” ॥

इति नवमीकृत्यम् ।

अथ द्वितीयादिनवमीपर्यन्तं रेवन्तादिपूजाविधिः ।

तदुक्तं (स्कन्दपुराणे)

शान्तये वृद्धयेऽश्वानामात्मनो विजयाय च ।
द्वितीयादिनवम्यन्तं रेवन्तं पूजयेन्नृपः ॥

“ ” एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

ग्रन्थान्तरे ।

आश्विनस्य सिते पक्षे नवमीं यावदेव हि ।
द्वितीयां तिथिमारभ्य पूजयेद्विविधार्हणैः ॥
रेवन्तमुच्चैःश्रवसं तुरङ्गानभिरक्षितान् ।
वर्धन्ते वाजिनस्तेन सर्वोपद्रववर्जिताः ॥

अभिरक्षितानिति रक्षणहेतुस्तद्विधिश्लोकः ।

(शालिहोत्रे)

अश्वयुजि शुक्लपक्षे द्वितीयादि सप्तरात्रं तु ।
वडवारूपेणैका स्वातिः सौरं रथं वहति ॥
सा भारेणाक्रान्ता क्रुद्धाऽन्यान्यान्निरीक्षते वाहान् ।
तेषां तेजः सत्त्वं बलं च कृत्स्नं निगृह्णाति ॥
सञ्जायन्ते रोगा महोपसर्गैः समन्विताः कष्टाः ।
तस्मात् स्वात्युपतापे वाजिषु पीडा भवेन्महती ॥
एवं च सप्तरात्रं स्वातेः सम्पात एव निर्दिष्टः ।
तत्र दिवाकरकिरणैरस्पृष्टा वाजिनो रक्ष्याः ॥
शालां ततोपलिप्तां मनोरमां वर्जितां च रविकिरणैः ।
नानाकारैः पुष्पैरलङ्कृतां धूपितां कुर्यात् ।
तस्यां स्नातास्तुरगाः सुधूपिता अर्चिता द्वितीयायाम् ॥
पुरुषैश्च शस्त्रहस्तैः सप्ताहं रक्षितव्यास्तु ।

तथा ।

शुभेऽहनि मुहूर्त्ते च क्ष्मापतिः सपुरोहितः ।
कृतमङ्गलसंस्कारान् वाहान् शालां प्रपूजयेत् ॥

ज्योतिःशास्त्रेऽपि ।

स्वाती नाम रवेः पत्नी वरदा रूपिणी रथम् ।
वहन्ती साऽऽश्विने मासि सूर्यरश्मिसमाश्रिता ॥

सप्ताहं पीडयेदश्वाँस्ततः स्नानार्च्चितान् गृहे ।
रेवन्तं पूजयित्वाऽथ बद्ध्वा पोटलिकां गले ॥

तथा ।

शुक्लपक्षे द्वितीयायां शालां संवेष्ट्य रक्षयेत् ।
आदित्यरश्मितो वाहान् कटैर्वस्त्रादिकैस्तथा ॥
अस्तं गते दिनकरे कटादीनपकर्षयेत् ।
प्रवातार्थं पुनर्दद्याद्यावत् सन्ध्या न जायते ॥
शालाप्रवेशविहितां रक्षां कण्ठे प्रदापयेत् ।
लोहकं निम्बपत्राणि गुग्गुलुं सर्षपान् घृतम् ॥
तैलबद्धां वचां हिङ्गु बध्नीयाद्वाजिनां गले ।
घर्षणं भ्रामणं चैव तथा चैवापवर्त्तनम् ॥
निशाशेषे प्रकर्त्तव्यं यावद्दूरे दिवाकरः ।
एतत्प्रतिदिनं कुर्यात् सप्तरात्रमतन्द्रितः ॥
कारयेद्ब्राह्मणाँश्चैव शान्तिस्वस्त्ययनानि च

(ब्रह्मपुराणेऽपि)

शान्तिस्वस्त्ययने कार्ये तदा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्ठं वचां सिद्धार्थकाँस्तथा ॥
पञ्चरङ्गेन सूत्रेण कण्ठे तेषां तु बन्धयेत् ।
वायव्यैर्वारुणैः सौरैः शाक्तैर्मन्त्रैः सवैष्णवैः ॥
वैश्वदेवैस्तथाऽऽग्नेयैर्होमः कार्यो दिने दिने ।
तुरगा रक्षणीयाश्च पुरुषैः शस्त्रपाणिभिः ॥
न च ताड्याः क्वचित् तत्र न च वाह्याः कदाचन ।

(शालिहोत्रे)

शिरसि स्थापयेद्देवीं रेवन्तं पूजयेत् सदा ।

तथा ।

नानाखाद्यनिवेद्यानि रेवन्ताय निवेदयेत् ।

तथा ।

वेदीं च कल्पयित्वा धुरि च विधानेन पावकं जुहुयात् ।

धुरि शालाशिरोभागे ।

सायं प्रातश्च शुचिः पुरोहितो ब्रह्मचारी स्यात् ।
शालिहोत्रगदितेन मन्त्रेणानेन होमयेत् ॥
रोहिताश्व महाभाग हव्यवाडमरोत्तम ।
धूमध्वज क्रतुद्वार स्वर्गस्य प्रथितः पथि ॥
उत्तिष्ठ होमं गृह्णेमं शान्तिरस्य हयेषु च ।
स्वाहेति तत्र मन्त्रेण प्रापयेत् प्रथमाहुतिम् ॥
ततः प्रजापतीन्द्राय सोमाय वरुणाय च ।
विवस्वते कुवेराय सुषेणायाहिशालिने ॥
आदित्येभ्यस्तथाऽश्विभ्यां रुद्रेभ्यो वसुभिः सह ।
विष्णोश्च विश्वदेवानां साध्यानां मरुद्भिः सहः ॥
वासुकिप्रमुखानां च नागानां गरुडस्य च ।
सर्वासां पौर्णमासीनां तिथीनां चैव सर्वशः ॥
देवीनां नदीनां सागराणां वनपस्तीनाम् ।
स्वाहाकारेण जुहुयात् तृतीयं च हुताशने ॥
देवानामेव सर्वेषां स्वाहाकारेण होमयेत् ।
दुर्बलानीह रक्षांसि प्रत्यूषे ब्रह्मतेजसा ॥
भवन्ति तस्मात् प्रत्यूषे स्वापयेत् पोषयेद्धयान् ।
पुरोहितस्तु द्विः कालं तर्पयित्वा द्विजोत्तमम् ॥
पुण्याहं कारयेन्नित्यं स्वस्त्याशीर्मङ्गलान्वितम् ।

नटनर्तकगन्धर्वाः सूतचारणमागधाः ॥
तुरगानुपतिष्ठेयुः सप्ताहं शान्तिकारणात् ।
मनोज्ञान् मधुरान् शब्दान् श्रुत्वा गच्छन्ति वै ग्रहाः ॥
वादित्रं वाहनागारे तस्मान्नित्यं प्रयोजयेत् ।
अतिक्रम्य च सप्ताहमष्टम्यां स्नापयेद्धयान् ॥
वरुणाय बलिं दत्वा पश्चात् तोयेऽवगाहयेत् ।

अष्टम्यामिति द्वितीयामारभ्याष्टमीतिथावित्यर्थः ।

ग्रन्थान्तरे ।

तानश्वान् समलङ्कृत्य वाजिशालां प्रवेश्य च ।
प्रतिमायां चित्रपटे स्थण्डिले मण्डलेऽथ वा ॥
नानोपचारसम्भारै रेवन्तं देवमर्च्चयेत् ।
नमो देवाधिदेवाय तुरङ्गबलचारिणे ॥
सूर्यपुत्राय देवाय तुरङ्गानां हिताय च ।
तुरङ्गपरिषद्यस्य नृगजोपरि धावति ॥
साश्वमश्वाधिपं रक्ष शरणं त्वां व्रजाम्यहम् ।
इति पुष्पाञ्जलिं दत्वा रेवन्ताय बलिं हरेत् ॥

तथा ।

सूर्यपुत्र महावाहो छायाहृदयनन्दन ।
शान्तिं कुरु तुरङ्गानां रेवन्ताय नमोऽस्तु ते ॥
एवं स्तुत्वाऽथ विधिवदुच्चैःश्रवसमर्च्चयेत् ।

(ब्रह्मपुराणे)

अश्वयुक्शुक्लपक्षे तु स्वातीयोगे सुशोभने ।
पूर्वमुच्चैःश्रवा नाम प्रथमं सूर्यमावहत् ॥
तस्मात् साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धया सदा ।

पूजनीयाश्च तुरगा नवमीं यावदेव हि ॥

ग्रन्थान्तरे ।

उच्चैःश्रवो नमस्तुभ्यं नमः क्षीराब्धिनन्दन ।
वाहान् वर्धय वाहेन्द्र सर्वोत्पातं विनाशय ॥
एवं स्तुत्वोच्चैःश्रवसं तुरगान् पूजयेत् ततः ।
नानोपचारैस्तेषां तु कर्णजापमिदं पठेत् ॥
गन्धर्वकुलजातोऽसि मा भूयाः कुलदूषकः ।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥
तेजसा चैव सूर्यस्य मुनीनां तपसा तथा ।
रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ॥
प्राभावाच्च हुताशस्य वर्त्तस्व त्वं तुरङ्गम ।
स्मर त्वं राजपुत्रोऽसि कौस्तुभं च मणिं स्मर ॥
सुरासुरैर्मथ्यमानात् क्षीरोदादमृतादिभिः ।
जात उच्चैःश्रवा पूर्वं तेन जातोऽसि तत् स्मर ॥
यां गतिं ब्रह्महा गच्छेत् पितृहा मातृहा तथा ।
भूम्यर्थे नृतवादी च रणे यस्तु पराङ्मुखः ॥
सूर्याचन्द्रमसौ वायुर्यावत् पश्यन्ति दुष्कृतम् ।
व्रज त्वं तां गतिं क्षिप्रं तच्च पापं भवेत् ततः ॥
विकृतिं यदि गच्छेथा युद्धेऽध्वनि तुरङ्गम ।
रिपून् विजित्य समरे भर्त्रा सह सुखी भव ॥
तुरङ्गम चिरं जीव परशस्त्रैरलक्षितः ।
सदा मां समरे रक्ष स्वामिकार्यं सदा कुरु ॥

ज्योतिःशास्त्रे ।

नार्च्चयेज्जलजैः पुष्पैर्वाहनार्घविधिं प्रति ।

सौगन्धिकं विशेषेण तेषां दद्याच्च सर्वदा ॥
ग्रहहोमस्तु कर्त्तव्यो ग्रहाणामर्च्चनं तथा ।
अनेन विधिना यस्तु करोति तुरगोत्सवम् ॥
तस्य तुरङ्गनाथस्य न कदा चिद्भयं भवेत् ।

गजपूजाऽप्युक्ता (ब्रह्मपुराणे)

ज्येष्ठायोगे पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमवहन् पूर्वं सशैलवनकाननाम् ।
कुमुदैरावतौ पद्मः पुष्पदन्तोऽथ वामनः ॥
सुप्रतीकोऽञ्जनो नीलस्तस्मात् ताँस्तत्र पूजयेत् ।
शाक्राद्दृक्षात् समारभ्य नवम्यन्तं च पूर्ववत् ॥

गजपुजामन्त्रस्तु ।

पान्तु वो बसवो रुद्रा आदित्याः समरुद्गणाः ।
भर्त्तारं रक्ष नागेन्द्र समयः प्रतिपाल्यताम् ॥
अवाप्नुहि जयं युद्धे समये स्वस्ति नो व्रज ।
श्रीस्तु सोमाद्बलं कृष्णात् तेजः सूर्याज्जवोऽनिलात् ॥
स्थैर्यं मेरोर्जयो रुद्राद्यशो देवात् पुरन्दरात् ।
युद्धे रक्षन्तु नागास्त्वां दिशश्च सह दैवतैः ॥
अश्विनौ सह गन्धर्वैः पान्तु त्वां सर्वतः सदा ।

इति ज्योतिःशास्त्रे प्रोक्तः ।

इति रेवन्तादिपूजाविधिः ।

अथ शक्तिसङ्गमोक्ताः काम्यविशेषा लिख्यन्ते ।

नवरात्रव्रतासक्तो नवनाथो भवेद्ध्रुवम् ।
गौडकाश्मीरद्रविडमार्गेण त्रिविधो भवेत् ॥
अष्टम्यन्तं जपः कार्यस्ततोऽष्टम्यां तु होमयेत् ।
अर्धरात्रे समायाता पूर्वविद्धाऽपि पार्वति ॥

साऽष्टमी सर्वकार्याणां कर्त्री भवति निश्चितम् ।
होमपूजादिकं तत्र कुर्याद्यत्नेन पार्वति ॥
द्वितीयदिवसे चेत् सा तदैवोपोषणं चरेत् ।

तथा ।

घटिकाः षोडश त्याज्या आद्याः प्रतिपदस्तु याः ।
कलशस्थापनं कुर्यात् कल्याणं जायते तदा ॥
नवम्यां पारणं कुर्याद्दशम्यां तु विसर्जनम् ।
काश्मीराख्यं क्रमं देवि शृणु यत्नेन पार्वति ॥
नवरात्रं निराहारो होमोऽष्टम्यां तथा भवेत् ।
नवम्यां विप्रभोज्यं स्याद्दिग्वेधे पारणं चरेत् ॥
नवरात्रं निराहारो निर्विकल्पं जितेन्द्रियः ।
अष्टमीनवमीसन्धौ होमकर्म समाचरेत् ॥
नवम्यां विप्रभोज्यं स्याद्दशम्यां पारणं चरेत् ।
केरलाख्यः क्रमः प्रोक्तो निर्णयं शृणु पार्वति ॥
तिथिक्षये तथा वृद्धौ यथोक्तेन तु वर्त्मना ।
अष्टमीनवमीप्राप्तौ पूर्ववेधो न दूष्यति ॥
अष्टम्यामर्धरात्रे तु यत्किंचित् कुरुते नरः ।
तत्तदक्षयमायाति नवदुर्गाप्रयोगतः ॥
एकोत्तरप्रविद्ध्या वा स्तोत्र जापादिकं चरेत् ।
प्रथमेऽह्नि जपो यावत् तावत् कुर्याच्च वा सुधीः ॥
उदयास्तमयं जप्त्वा त्रैलोक्यविजयी भवेत् ।
नवरात्रव्रते स्त्रीणां *मृत्युयोगो भवेद्यदा ॥
सैव देवी न संदेहस्तां पूज्य विजयी कलौ ।

---

* स तु योगो इति ४ पु० प.० ।

ताम्बूलागुरुकस्तूरीदिव्याम्बरविभूषणैः ॥
सूर्योदयं समारभ्य पुनः सूर्योदयान्तरम् ।
तावज्जप्त्वा निरातङ्कः सर्वसिद्धीश्वरो भवेत् ॥
एकासनगतो भूत्वा नवरात्रं तु शाम्भवीम् ।
मुद्रामालम्बयेद्देवि नवनाथाधिपो भवेत् ॥
गुहायां मठिकायां वा निर्जने पर्वतेऽपि वा ।
अधोमुखो वा देवेशि नवरात्रं निरम्बुभुक् ॥
स्वमाच्छाद्य मृदा देवि तत्र संस्थापयेद्घटम् ।
यवाङ्कुरान् समारोप्य शाम्भवीं मुद्रिकां चरेत् ॥
दृढासनी वाऽशयनी यथोद्दिष्टं समाचरेत् ।
कापालिकावधूतानां व्रतमेतन्मयेरितम् ॥

शाम्भवी मुद्रा तु (त्रिपुरासारसमुच्चये)

अथ पार्ष्णिनिरुद्धकम्बुनिर्ना ध्वजमूलस्थितसव्यपादपार्ष्णिः ।
ऋजुकायशिरोधरो यतात्मा विषयेभ्यो विनिवर्त्तितेन्द्रियश्च ॥
काकीचञ्च्वग्रकृष्टैर्मुहुरुदरदरीं पूरयित्वा समीरै-
रङ्गुष्ठाभ्यामुभाभ्यां नररिपुविवरे तर्जनीभ्यां च नेत्रे ।
नासारन्ध्रं निरुध्य स्थिरविमलमतिर्मध्यमाभ्यामथास्यं
त्वन्याभिर्नीतिगाढं कमलजनिलये स्थापयेन्मानसं स्वम्–इति॥

तथा (शक्तिसङ्गमे)

आज्ञा भवति देवेशि तदैवोपोषणं चरेत् ।
आज्ञा यदि न जायेत तदा ग्रामाधिपस्य च ॥
देशाधिपस्य विप्रस्य पूजकस्य स्त्रियस्तथा ।
आज्ञां गृहीत्वा देवेशि वरं प्रार्थ्य सुखी भवेत् ॥
भक्तप्रीता च सा दुर्गा स्वयमाज्ञां प्रयच्छति ।

वीरशाक्तविधानेन चण्डदर्पव्रतं चरेत् ॥
जिह्वां संत्रोट्य यत्नेन ह्विवेदेषुरसाङ्गुलाम् ।
जिह्वा सा पुनरायाति तेन सिद्धीश्वरो भवेत् ॥
नवरात्रं समासाद्य महाष्टम्यां निशामुखे ।
देवीं यत्नेन संपूज्य सङ्कल्पं कामनान्वितम् ॥
शिरःपुष्पं कर्त्तयित्वा पूर्णं मध्यकनिष्ठतः ।
यत्ने देवे निवेद्याथ शिवतुल्यो भवेद्ध्रुवम् ॥
पुनः शिरः समायाति महाचीनवरः स तु ।
अथ वाऽन्यप्रकारेण प्रयोगः कथ्यते शृणु ॥
नवरात्रं निराहारः श्रद्धाभक्तिसमन्वितः ।
महाष्टम्यामर्धरात्रे अङ्गुष्ठान्मस्तकावधि ॥
मासं संकर्त्त्य यत्नेन यथोक्तं कुण्डमाचरेत् ।
होमयेत् तत्र देवेशि देवीप्रत्यक्षतामियात् ॥
देवीदेहं भवेत् तद्धि नात्र कार्या विचारणा ।
अथ वाऽन्यप्रकारेण प्रयोगः कथ्यते शृणु ॥
नवरात्रे निराहारो गुरुभक्तो महाव्रती ।
कुण्डं पुरुषमात्रं तु कृत्वा तत्र विशङ्कितः ॥
पञ्चपल्लवकाष्ठानां वह्निं तत्र समाचरेत् ।
अङ्गुष्ठान्मस्तकं यावत् स्वदेहं होमयेद्व्रती ॥
अग्निशय्यां च वा कृत्वा देवीं पश्यति निश्चितम् ।
अर्च्चापरः क्रमेणैव लतागेहप्रवेशनात् ॥
भवेत् कल्पलतातुल्यः साधको नात्र संशयः ।
अथ वाऽन्यप्रकारेण प्रयोगः कथ्यते शृणु ॥

नवरात्रं निर्विकल्पो निराहारो दृढव्रतः ।
यमुद्दिश्य क्रियां कुर्यात् तमेव वशमानयेत् ॥
कामबीजं साध्यनाम वशीकुर्विति चोच्चरेत् ।
स्वाहामुच्चार्य देवेशि प्रदीप्ते जठरानले ॥
होमयेद्यत्नतो देवि तद्गृहं वशमानयेत् ।
अथ वाऽन्यप्रकारेण प्रयोगः कथ्यते श्रृणु ॥
नवरात्रं निराहारः सत्यवादी जितेन्द्रियः ।
सहदेवीरस गृह्य नवम्यां परमेश्वरि ॥
पूर्वोक्तमनुना देवि पत्राण्यापिण्डमाहरेत् ।
आजन्मान्तं वशीकुर्यात् तमेव सकुटुम्बकम् ॥
अथ वाऽन्यप्रकारेण प्रयोगः कथ्यते श्रृणु ।
नवरात्रं मौनयुक्तो वृक्षासनसमन्वितम् ॥
पारणादिवसे प्राप्ते गोमुखं कारयेत् प्रिये ।
पूर्वोक्तमनुना देवि होमयेज्जठरानले ॥
स्वगेहे तत्त्वरात्रेण तद्गेहे दिवसत्रयात् ।
आजन्मान्तं वशं कुर्यान्महादेवाधिकं नरम् ॥
अथ वाऽन्यप्रकारेण प्रयोगः कथ्यते श्रृणु ।
नवरात्रं निराहारो गुरुभक्तो महाव्रती ॥
वामाङ्गुष्ठोपरि स्थित्वा वेदरात्रं महेश्वरि ।
दक्षाङ्गुष्ठोपरि तथा वेदरात्रं महेश्वरि ॥
नवम्यां पारणं कुर्याद्बिल्वे पिण्डं प्रदापयेत् ।
जगत्त्रयं वशीकुर्यान्नात्र कार्या विचारणा ॥
अथ वाऽन्यप्रकारेण प्रयोगः कथ्यते श्रृणु ।

नवरात्रं पर्यटन् वैरोचनासनसंयुतः ॥
होमं कुर्यान्महाष्टम्यां नवम्यां पारणं चरेत् ।
सर्वस्वदानं कृत्वा तु त्रैलोक्यविजयी भवेत् ॥
अथ वाऽन्यप्रकारेण प्रयोगः कथ्यते शृणु ।
गोमूत्राशी महेशानि नवरात्रं महेश्वरि ॥
यं कँ त्रिहैं जपेन्मन्त्रं नवम्यां होममाचरेत् ।
नवम्यां पारणं कुर्याद्धोमुखेन महेश्वरि ॥
देवतादर्शनं भूयाद्रात्रौ स्वप्ने महेश्वरि ।
अथ वाऽन्यप्रकारेण प्रयोगं शृणु पार्वति ॥
नवरात्रं जितग्रासो मौनव्रतधरः शुचिः ।
निर्द्वन्द्वो निरहङ्कारः सत्यवादी महामतिः ॥
राजाकर्षणकामश्चेद्राज्ञः सदनदिङ्मुखः ।
पारणामिच्छया कुर्याद्रात्रिजापी सदा भवेत् ॥
त्रैलोक्यं वशमायाति नात्र कार्या विचारणा ।

अथ दशमीकृत्यम् ।

तत्रैव ।

ततो दशम्यां निर्वाह्य स्नातो नित्यक्रियां निजाम् ।
यावच्छक्त्युपचारैस्तु पूजयेन्न्यासमुज्जहन् ॥
कृताञ्जलिः पठेत् पश्चाद्विसर्जनमनूनिमान् ।
विधिहीनं क्रियाहीनं भक्तिहीनं यदर्च्चितम् ॥
पूर्णं भवतु तत्सर्वं त्वत्प्रसादान्महेश्वरि ।
शक्नुवन्ति न ते पूजां कर्त्तुं ब्रह्मादयः सुराः ॥
अहं किं वा करिष्यामि मृत्युधर्मा नरोऽल्पधीः ।
न जानेऽहं तेऽम्ब रूपं न शरीरं न वा गुणान् ॥

एकामेव हि जानामि भक्तिं त्वच्चरणाब्जयोः ।
तां भक्तिं हृदि सम्भाव्य शारद्यर्चां प्रगृह्य च ॥
गच्छ देवि निजस्थानं मह्यं दत्त्वा वरान् बहून् ।
एतान्मन्त्रान् समुच्चार्य चरलग्ने चरांशके ॥
प्रतिमां पत्रिकां वाऽपि चालयेत् पूजकः शनैः ।
निर्माल्येन ततो देव्याः पूजयेत् कलशोपरि ॥
निर्माल्यवासिनीं देवीं ङेन्तां नमः पदेन हि ।
प्रदर्श्य योनिमुद्रां च ऐशान्यां दिशि निःक्षिपेत् ॥
निर्माल्यं भगवत्यास्तच्चण्डेश्वर्यै नमो वदन् ।
मृन्मूर्त्तिं पत्रिकां वाऽपि जलेऽगाधे विनिःक्षिपेत् ॥
स्रोतस्यथो मज्जयित्वा नदीवेगेन हारयेत् ।
पीठमूर्त्तौ स्वके स्थाने चालयित्वा निवेशयेत् ॥
चालने यन्मनुद्वन्द्वं तदिदानीं निशामय ।
उत्तिष्ठ देवि चामुण्डे शुभां पूजां प्रगृह्य मे ॥
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ॥
यत् पूजितं मया देवि परिपूर्णं तदस्तु ते ।
गम्यतामर्थलाभाय क्षेमाय विजयाय च ॥
शत्रोर्दर्पविनाशाय पुनरागमनाय च ।
व्रज त्वं स्रोतसि जले मद्गेहे तिष्ठ भूतये ॥
आगामिवत्सरे च त्वं पुनरायास्यसि ध्रुवम् ।
इति देवीं चालयित्वा मनुना कथयिष्यता ॥
महावाद्यरवं कुर्यान्नभोदिक्पूरि सर्वतः ।

तारत्रपारुषश्चैव शाकिनी डाकिनी तथा ॥
चामुण्डे चल युग्मं च चालय द्वितयं तथा ।
कूर्चास्त्रानलकान्ताभिर्मनुश्चालनकर्मणि ॥
शङ्खतूर्यनिनादैश्च मृदङ्गैः पटहैस्तथा ।
ढक्काभेरीझर्झरैश्च पणवानकगोमुखैः ॥
तालवादित्रवीणाभिरातोद्यैर्डिण्डिमैरपि ।
मुरजैर्वेणुभिर्हिङ्कैस्तालमानलयान्वितैः ॥
धूलीकर्दमविक्षेपैः क्रीडाकौतुकमङ्गलैः ।
वेशयुग्वेशनिचयैर्विविधैः शावरोत्सवैः ॥
भगलिङ्गाभिधानैश्च भगलिङ्गप्रगीतकैः ।
भगलिङ्गक्रियाशब्दैर्वेशचेष्टाभिरुक्तिभिः ॥
विसर्जनस्यावसरे क्रीडितव्यं निजेच्छया ।
कार्यं जरद्भिरप्येतद्देवीसन्तोषहेतवे ॥
परैर्वा क्षिप्यते यस्तु यः परान् नाक्षिपत्यपि ।
तस्य क्रुद्धा भगवती शापं दद्यात् सुदारुणम् ॥
एतत्प्रासङ्गिकीं देव्या उक्तिं समवधारय ।
ममानन्दे सदानन्दः सदानन्दो भविष्यति ॥
ममानन्दे निरानन्दो निरानन्दो भविष्यति ।
यथा यथा ममानन्दे भवत्युन्मत्तवज्जनः ॥
तथा तथाऽहं तुष्यामि तत्कृतार्चासु वल्लभ ।
ख्यातं मम भगं चिह्नं लिङ्गं चिह्नं तव प्रभो ॥
लिङ्गाङ्कत्वाद्भगाङ्कत्वादियं माहेश्वरी प्रजा ।
त्वां मां विहाय नैवान्यत् किञ्चित् त्रिभुवनोदरे ॥

तस्मान्मत्पूजनस्यान्ते त्वन्मच्चिह्नोक्तिभिर्जनः ।
यः क्रीडति महाभाग स मे मनसि तिष्ठति ॥
अकुर्वाणोऽपि सुरतं भगं भगमिति ब्रुवन् ।
लिङ्गं लिङ्गमिति प्रोच्य मां तोषयति तत्क्षणात् ॥
रेतःसिक्तं भवेद्यादृक् तादृश्यत्र प्रजायते ।
भगं त्रिजगतां स्रष्टृ को वा निन्दितुमर्हति ॥
इत्यादिवचनैर्देव्या यथेष्टं विहरेज्जनः ।
उपस्थयोनिभजनशब्दैस्तत्तत्क्रियान्वितैः ॥
ततो नित्योदकाभ्यासं स्वयमम्भः प्रविश्य च ।
पत्रिकां मृन्मयीं मूर्त्तिं तदन्तः स्थापयेच्छनैः ॥
निमज्ज्याम्भसि सम्पूज्य पत्रिकां वर्जितां जले ।
मया देवि वरान् दत्वा ततो गच्छेन्निजालयम् ॥
इत्यनेन तु मन्त्रेण देवीं संस्थापयेज्जले ।
पोतमूर्त्योरिदं कर्म न कार्यं त्रिदशेश्वरि ॥
ततः सर्वैर्जनैः सार्धं जलक्रीडां समाचरेत् ।
निमज्जनोन्मज्जनैश्च तथा पिञ्जलताम्बुभिः ॥
अन्यैर्जलविहारैश्च क्षणं कौतुकमाचरेत् ।
प्रदद्याद्दक्षिणां पूजां कारयित्वा स्वभक्तितः ॥
हिरण्यं रजतं धेनुं भूमिं वासांसि मन्दिरम् ।
यावच्छक्यं च यच्छक्यं दातव्यं दक्षिणां ततः ॥
यानि देव्यै प्रदत्तानि महोपकरणान्यपि ।
विभज्य तानि सर्वेभ्यो दातव्यानीति निश्चयः ॥

पूजाफलान्याह ।

एवमुक्तप्रकारेण कृत्वा शारदपूजनम् ।

यदाप्नोति फलं देवि तदिदानीं निशामय ॥
सप्तलोकोपरि शिवे वैकुण्ठो लोक उच्यते ।
तदूर्ध्वं शिवलोको हि गोलोकस्तदनन्तरम् ॥
तस्योपरि प्रियतमे देवीलोको विराजते ।
योजनानां कोटिशतं विस्तीर्णं तावदायतम् ॥
विभवा वा गुणा यस्य मम वाचामगोचराः ।
कल्पकोटिशतं साग्रं तत्रायं वसति प्रिये ॥
अव्याहतगतिर्भूत्वा षडानन इवापरः ।
त्रिलोकीं विचरत्येष द्वितीयो द्विरदाननः ॥
यदीहावतरत्येष कदा चित् कालपर्ययात् ।
शतसंवत्सरायुः स्यात् समस्तपृथिवीपतिः ॥
तेजसा सूर्यसदृशः कान्त्या चन्द्रमसा समः ।
कुबेरसन्निभो वित्ते क्षमया क्षमया समः ॥
स्थैर्ये सुमेरुणा तुल्यो गाम्भीर्ये सागरोपमः ।
विद्यया वाक्पतिसमः सौन्दर्ये मन्मथोपमः ॥
प्रियंवदो विनीतश्च दाताऽमितपराक्रमः ।
किं बहूक्तेन देवेशि यावन्तो हि गुणाः स्मृताः ॥
तमेकं संश्रयन्ते हि समुद्रं सरितो यथा ।
प्रत्येकमस्या बाहुल्यं वर्त्तते फलसम्भवे ॥
न विस्तरभयाद्वच्मि डामरेषु तदीरितम् ।
न तादृशं फलं किञ्चिद्यन्न स्याच्छारदार्च्चनात् ॥

ततोऽपराजितां संपूज्य यात्रां कुर्यात् । तदुक्तं (निर्णयामृते) पुराणान्तरे ।

दशम्यां पूजयित्वा तु मृन्मयीं वाऽपराजिताम् ।

कलशं तोयसंपूर्णं जयन्तीपल्लवाननम् ॥
चतुर्वर्णैस्तदा यात्रा कर्त्तव्या साधनेन च ।
दशम्यां च बली राजा पूजयित्वाऽपराजिताम् ॥
दशदिक्षु मनोयोगाद्यात्रां कृत्वाऽथ वा नृपः ।
नीराजनं स्वस्य कृत्वा ततो नीराजयेद्बलम् ॥

नीराजनमन्त्रस्तत्रैव ।

चतुरङ्गबलं मह्यं सुस्थिरत्वं व्रजत्विह ।
विजयो मम सर्वत्र अस्तु मेऽग्निप्रसादतः-इति ॥

“सर्वत्र विजयो मेऽस्तु त्वत्प्रसादात् सुरेश्वरि-इति (कृत्यरत्ने)

अपराजितापूजने संक्षिप्तप्रकारस्तु अपराह्णे ईशानदिशमाश्रित्य सीमानमुल्लङ्घ्य-
अद्याश्विनशुक्लदशम्यां क्षेमसिद्ध्यर्थमपराजितापूजां करिष्ये-
इति सङ्कल्प्य कलशेऽष्टदलपद्मयन्त्रमध्ये-अपराजितायै नमः-इत्यपराजिताम् ।

तद्दक्षिणे-क्रियाशक्त्यै नमः-इति जयाम् ।

वामे-उमायै नमः-इति विजयां चावाह्य ।

ॐ अपराजितायै नमः । ॐ जयायै नमः । ॐ विजयायै नमः ।

इति मन्त्रैः सम्पूज्य प्रणम्य ।

इमां पूजां मया देवि यथाशक्ति निवेदितम् ।
रक्षार्थं तु समादाय व्रज स्वस्थानमुत्तमम्-इति विसर्जयेत्” ॥

(महाकालसंहितायाम्)

अथ नीराजनं राजाऽपराह्णे विदधीत वै ।
विचित्रवेशवसनः सह स्वजनबान्धवैः ॥
चूडामणिपरिस्फूर्यत्कीरीटकुण्डलोज्ज्वलः ।
लसत्प्रालम्बिको मुक्तामाली कटकमण्डितः ॥

“ ” एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

केयूरी शृङ्खली तद्वदङ्गुलीयकभूषितः ।
उष्णषी बद्धनिस्त्रिंशश्चर्च्चितो मलयद्रवैः ॥
चन्द्रकुङ्कुमकस्तूरीविलेपनसुवासितः ।
नानाविषयजालश्वान् भूषाभिः परिबृंहयेत् ॥
गान्धरजानुत्तरजान् पारसीकोद्भवानपि ।
काम्बोजवानायुभवान् वाल्हीकमणिमन्थजान् ॥
युक्ताँस्तदीयभूषाभिः कुथाभिरुपशोभितान् ।
एवमेव गजेन्द्राँश्च कुथघण्टाङ्कुशोज्ज्वलान् ॥
कलिङ्गजङ्गलभवाँश्चेदितैलङ्गसम्भवान् ।
एवं रथानपि व्यूहे तदुपस्करसंयुतान् ॥
पदातीँश्च भटाँश्चापि नानाप्रहरणान्वितान् ।
कोदण्डशरनिस्त्रिंशशूलपट्टीशतोमरान् ॥
गदापरिघचक्रर्ष्टिभुशुण्डीपाशकौरजान् ।
भिन्दिपालहुताशक्तिपर्शुकुन्ताहिमुद्गरान् ॥
खट्वाङ्गवज्रमुशलपाशायोगुडकर्त्तरीः ।
शतघ्नीशल्यकुद्दालक्रकचच्छुरिकास्तथा ॥
एतान्यन्यानि चास्त्राणि दधतः स्फुरितौजसः ।
चतुरङ्गबलं चेत्थं कृत्वाऽग्रेसरमीश्वरि ॥
नानाविधैर्वाहनैश्च पौरजानपदानपि ।
वादित्राणि च सर्वाणि वादयित्वा विशेषतः ॥
महाकोलाहलं कृत्वा समराभिप्रयाणवत् ।
जय जीवेति निनदैः स्तूयमानो महीपतिः ॥
विनिर्गच्छेत् पुरात् स्वीयादनुकूलां दिशं प्रति ।

ब्राह्मणानग्रतः कृत्वा ताम्बूलं चर्वयन्मुहुः ॥
नटान् मल्लान् वन्दिनश्च शिल्पिनो गणिकास्तथा ।
दैवज्ञान् वणिजो दूतानन्यान् वै देशिकानपि ॥
विलोकयन् हृष्टमना एतेभ्यः पारितोषिकम् ।
ददन्नुत्साहसंयुक्तो विजिगीषुरिव व्रजेत् ॥
एतन्नीराजनं नाम घटनाया बलाब्जयोः ।

अथ खञ्जनादिदर्शनविधिस्तत्रैव ।

एतत् कृत्वा महीपालो भूषितस्तेन चान्वितः ।
खञ्जनं सारसं चाषं प्रयत्नेन विलोकयेत् ॥
अनूपकच्छगोष्ठानगोविडम्बुरुहादिषु ।
स्थितो रुवन् विधुन्वानः पक्षती खञ्जनः शुभः ॥
मङ्गल्यं खञ्जनं दृष्ट्वा मध्यस्थाने मनोरमे ।
शुभं स्यादशुभं ज्ञेयं विपरतेन संशयः ॥
वृक्षेषु गोषु गजवाजिमहोरगेषु
राज्यप्रदः कुशलदः शुचिशाद्वलेषु ।
भस्मास्थिकाष्ठतुषलोमतृणेषु दृष्टो-
ऽरिष्टं ददाति बहुशः खलु खञ्जरीटः ॥
तस्मिन् निधिर्भवति मैथुनमेति यस्मिन्
यस्मिन् पुनर्वसति तत्र दिशन्ति कान्तम् ।
अङ्गारमप्युपदिशन्ति पुरीषणेऽस्य
तत् कौतुकाय च शुभाय च खञ्जरीटः ॥
दृष्ट्वा तु खञ्जनं राजा प्रणमेद्विहिताञ्जलिः ।
इमं मन्त्रं समुच्चार्य श्लोकरूपं वरानने ॥
खञ्जनः खञ्जरीटश्च शङ्खमौलिः शुभप्रदः ।

महापद्मो नीलगलश्चपलाङ्गो हरिद्विजः ॥
यः खञ्जरीटं प्रणमेदेभिर्नामभिरष्टभिः ।
जायते मङ्गलं तस्य सतो गेहे यतः पथि ॥
नारायणशरीरोत्थ संवत्सरशुभप्रद ।
शालग्रामशिलाकण्ठ खञ्जरीट नमोऽस्तु ते ॥
वासुदेवस्वरूपेण सर्वकामफलप्रद ।
पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोऽस्तु ते ॥
त्वं योगयुक्तो मुनिपुत्रकस्त्वमदृश्यतामेषि हिमोद्गमेन ।
त्वं दृश्यसे प्रावृषि निर्गतायां त्वं खञ्जनाश्चर्यमयो नमस्ते ॥
अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनम् ।
शान्तिं कुर्वीत कुर्याच्च स्नानं सर्वौषधीजलैः ॥
अयं खगस्तु विज्ञेयो विष्णुरूपी सुरेश्वरि ।
संसूचयति वर्षोत्थं मङ्गलामङ्गलद्वयम् ॥
देवीरूपस्तु विज्ञेयः सारसः पक्षिराडपि ।
तं दृष्ट्वा तोयतर्वद्रिसद्दूर्वावीतलेषु हि ॥
प्रणमेच्छुभदं केशगमस्थिगमभद्रदम् ।
तथा कुर्वाण आहारं चञ्च्वा कण्डुं तनावपि ॥
तिष्ठन् कुलाये शावाय दद्द्या भोजनं शुभम् ।
सारसः सरसीवासः पुष्करः पुष्करालयः ॥
विघ्नापहर्त्ता पक्षीन्द्रो देवीरूपो महाबलः ।
विघ्नं नाशय पक्षीन्द्र शुभं देहि महाबल ॥
पुष्कराब्दफलं ब्रूहि जहि शत्रून महाबल ।
पठित्वेदं पद्ययुगं प्रणमेत् सारसं बुधः ॥

विपरीते तथैतस्य पूर्ववच्छान्तिकं चरेत् ।
अथ चाषं निरीक्ष्यापि महारुद्रस्वरूपिणम् ॥
पूर्वोदितेषु स्थानेषु प्रणमेन्मङ्गलप्रदम् ।
अन्यत्राशुभदातारं विहगं शिवरूपिणम् ॥
अशोकश्च विशोकश्च नन्दीशः पुष्टिवर्धनः ।
ताम्रचूडो मणिग्रीवः स्वस्तिकश्चापराजितः ॥
अष्टावेतानि नामानि चाषं दृष्ट्वा तु यः पठेत् ।
अग्रतो धनलाभाय पार्श्वतो विजयाय च ॥
पृष्ठतः क्षेमवित्ताभ्यां दिव्य चाष नमोऽस्तु ते ।
अशोकाय नमस्तुभ्यं सर्वाभीष्टप्रदाय च ॥
नीलकण्ठाय भद्राय भद्ररूपाय ते नमः ।
भद्रत्वं देहि मे भद्रमाशां पूरय पूरक ॥
स्वस्तिकोऽसि कुरु स्वस्ति त्वं मां नन्दीश नन्दय ।
अशोक कुर्वशोकं मां पुष्प त्वं पुष्टिवर्धन ॥
एवं चाषं नमस्कृत्य "प्रणमेच्च शमीतरुम् ।
अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ॥
दुःस्वप्नशमनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ।
शमी शमयते पापं शमी लोहितकण्टका ॥
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनि ।
करिष्यमाणयात्राया यथाकालं सुखं मया ॥
तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ।
इति संप्रार्थ्य मूलस्थां" गृहीत्वा पीतमृत्तिकाम् ॥

" " एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

प्रदक्षिणीकृत्य तथा समीवृक्षं महीपतिः ।
नियुद्धं प्रेक्ष्य मल्लानां भटानां शस्त्रलाघवम् ॥
भरतानां प्रेषणं च धावनं गजवाजिनाम् ।
अस्तं गते दिनमणौ दीपिकाशतसंवृतः ॥
प्रविशेन्नगरं राजा कोलाहलपुरःसरम् ।
अनेन विधिना यस्तु कुरुते शारदं महम् ॥
तस्य देवी सदा तुष्टा सदा नैव विमुञ्चति ।
फलं यच्छारदार्चाया वक्तुं तत् केन शक्यते ॥
ईदृशेव च वासन्ती पूजा कार्या मधौ सिते ।

इति दुर्गोत्सवविधिः ।

बिभ्रत्यद्भुतभूतिभूतपवचोवैचित्र्यचित्रामृत-
स्रोतःशालिनि सन्निबन्धसरित्संभेदमभ्यर्हितम् ।
सन्मुक्तोपमयुक्तिशालिनि तरङ्गः प्रारदेकादशो
विज्ञश्रीनरदेवनिर्मितपुरश्चर्यार्णवेऽस्मिन् नवे ॥

इति श्रीमन्महाराजाधिराजप्रतापसिंहसाहविरचिते पुरश्चर्याणवे दुर्गामन्त्रपुरश्चरणदुर्गोत्सवविधिर्नामैकादशस्तरङ्गः ।

अथ ब्रह्माण्यादिमन्त्रास्तत्पुरश्चरणविशेषाश्च निरूप्यन्ते ।

(मेरुतन्त्रे)

मुनय ऊचुः ।

देवदेव महादेव भक्तानुग्रहकारक ।
ब्राह्म्याद्यष्टौ भास्करस्य रथे तिष्ठन्ति शक्तयः ॥
रणे मृतानां योगेन मृतानां सहगामिनाम् ।
स्वर्गं याश्च प्रयच्छन्ति तन्मनून् ब्रूहि शङ्कर ॥

शिव उवाच ।

ब्रह्मशक्तिस्तु शक्तीनां नायिका परिकीर्त्तिता ।
योगिनां मुक्तिदात्री सा भोगिनां भोगदा मता ॥
ब्रामित्येकाक्षरं बीजं मुनिर्वाचस्पतिर्मतः ।
गायत्री छन्द उद्दिष्टं बः शक्तिः कीलकं वचः ॥

अथ ध्यानम्

ध्यायेद्ब्राह्मीं पलाशस्थां हंसारूढां चतुर्भुजाम् ।
अक्षमालावराभीतिकमण्डलुकरारुणाम् ॥
बीजेनैव षडङ्गानि………………… इति ।

अस्य पुरश्चरणं तत्रैव ।

लक्षमेकं जपेन्मन्त्रं पलाशसमिधैर्हुनेत् ।
तत्पुष्पयुक्तसलिलैस्तर्पयेन्मार्जयेत् कुशैः ॥

अथ माहेश्वरीमन्त्रः ।

अथातः संप्रवक्ष्यामि सम्यङ्माहेश्वरीविधिम् ।

ॐ ह्रीँ नमो भगवति माहेश्वर्यै हि संवदेत् ॥
परमे पदमुच्चार्यैश्वर्यै स्वाहान्तको मनुः ।
तारादिरेकविंशार्णोऽश्वारूढा तत्परं मतम् ॥

ध्यानम् ।

वृषारूढां भालचन्द्रां त्रिनेत्रां शशिसन्निभाम् ।
दधतीं शूलडमरुमहाहिवलयां भजे ॥

अथ पुरश्चरणम् ।

वर्गलक्षं जपेन्मन्त्रं विल्वपत्रैर्घृतप्लुतैः ।
जुहुयात् तद्दशांशेन महदैश्वर्यवान् भवेत् ॥

अथ कौमारीमन्त्रः ।

अथातः संप्रवक्ष्यामि कौमार्या विधिमुत्तमम् ।
क्रौँ कौमार्यै नम इति षडर्णो मन्त्र ईरितः ॥
मुनिर्ब्रह्मा च गायत्री छन्दः कौमारिका भवेत् ।
देवता कौमिदं बीजं कौमार्यै शक्तिरुच्यते ॥
मन्त्रवर्णैः षडङ्गानि हृदि ध्यायेच्च देवताम् ।

ध्यानं यथा ।

शक्त्यक्षस्त्रग्वराभीतिकरां बन्धूकसन्निभाम् ।
मयूरध्वजिनीं रक्तवस्त्रामौदुम्बरस्थिताम् ॥
हरित्कञ्चुकिकां रम्यां नानालङ्कारभूषिताम् ।

अथ पुरश्चरणम् ।

लक्षषट्कं जपः प्रोक्तः पञ्चखाद्यैस्तथा हुनेत् ।
मधुरत्रयसंयुक्तैः सिद्धमन्त्रस्तदा भवेत् ॥
तर्पणं मार्जनं कृत्वा कुमारीणां च भोजनम् ।

अथ वैष्णवीमन्त्रः ।

अथातः संप्रवक्ष्यापि वैष्णवीमन्त्रमद्भुतम् ।

अकचटतपयशा वैष्णव्या मन्त्र ईरितः ॥
अष्टाक्षरो मनुश्चास्य नारदोऽनुष्टुबुच्यते ।
छन्दस्तु वैष्णवी देवी न्यासः प्रणवपूर्वकः ॥
मूलमन्त्राक्षरैः कुर्यात् त्रिभिस्त्रिभिरनुक्रमात् ।
एकैकं च जपेत् पश्चादङ्गानि षडनुक्रमात् ॥

अथ ध्यानम् ।

शोणपद्मप्रतीकाशां मुक्तमूर्धजलम्बिनीम् ।
लसत्काञ्चनसम्भूतकुण्डलोज्ज्वलशालिनीम् ॥
स्वर्णरत्नसमुन्नद्धकिरीटसूत्रधारिणीम् ।
कृष्णशुक्लारुणैर्नेत्रैस्त्रिभिश्चारुविभूषिताम् ॥
बन्धूकदन्तवसनां शिरीषप्रभनासिकाम् ।
कम्बुग्रीवां विशालाक्षीं सूर्यकोटिसमप्रभाम् ॥
चतुर्भुजां सुवसनां पीनोन्नतपयोधराम् ।
दक्षिणाभ्यां कराभ्यां तु खड्गं च जपमालिकाम् ॥
बिभ्रतीं वामहस्तभ्यामभयं च वरं तथा ।
अनल्पनागनासोरुं गुप्तगुल्फां सुपार्ष्णिकाम् ॥
गात्रेण रत्नस्तम्भं च सम्यगालम्ब्य संस्थिताम् ।
किमिच्छसीति वचनं व्याहरन्तीं मुहुर्मुहुः ॥
पञ्चाननं पुरः संस्थं निरीक्षन्तीं स्ववाहनम् ।

ईदृशीं चण्डिकां ध्यायेदिति शेषः ।

अथ पुरश्चरणम् ।

लक्षद्वयं जपेदस्य पुरश्चरणकर्मसु ।
दशांशं होममाज्येन कर्त्तव्यं तर्पणादिकम् ॥

अथ मन्त्रान्तरं तत्रैव ।

ॐ नमोऽन्ते च वैष्णव्यै मन्त्रः प्रोक्तः षडक्षरः ।

मन्त्रार्णैरत्र चाङ्गानि शेषं पूर्ववदाचरेत् ॥

अथापराजितावैष्णवीमन्त्रस्तत्रैव ।

अथातः संप्रवक्ष्यामि वैष्णवीमपराजिताम् ।
तारमाकर्षिणिपदमावेशिनि ततो वदेत् ॥
ज्वालामालिनि रमणि रामणि धरणीति च ।
धारणि तपनीत्युक्त्वा तापिनि मनोन्मादिनि ॥
शोषिणीति पदं प्रोच्य ततः संमोहिनीति च ।
तथा नीलपताके च महानीले महाप्रिये ॥
महाग्नेयि महाचण्डे महारौद्रि महेति च ।
वज्रिणोति तथाऽऽदित्यरश्मिजाह्नवि संवदेत् ॥
यमघण्टे किलिकिलिचिन्तामणिपदं वदेत् ।
सुरभिसुरोत्पन्ने च सरस्वतिपदं ततः ॥
सर्वकामदुघे प्रोच्य यथा मम मनीषितम् ।
कार्यं तन्मे सिध्यत्विति स्वाहान्तोऽयं मनुर्मतः ॥
षड्द्वादशार्णो मुन्यादिः प्राग्वत् सौख्यप्रदो मनुः ।
जपेद्वर्णशतं होमादिकं पूर्ववदाचरेत् ॥

अथ वाराहीमन्त्रः ।

अथ वार्त्तालिकां वक्ष्ये वाराहीं शत्रुघातिनीम् ।
ऐँ लौँ ठँठँठमिति हुँ स्वाहान्तोऽष्टाक्षरो मनुः ॥
छन्दोऽनुष्टुप् च कपिलो मुनिर्वार्त्तालिका सुरी ।
वाराह्यत्र षडङ्गानि क्रमाद्दृद्विभ्विन्दुभूभूभिः ॥
द्वाभ्यां ध्यायेत् ततो देवीं विद्युद्भासां कराम्बुजैः ।
दधानामङ्कुशं पाशं मुद्गरं शक्तिमेव च ॥
विद्युद्भासां त्रिनेत्रां च नाशयन्तीं तथा रिपून् ।

अथ पुरश्चरणम् ।

वसुलक्षं जपित्वाऽन्ते विल्वपत्रैर्हयारिजैः ।
धात्रीफलैर्भृङ्गराजैः कुशैश्चापि दशांशतः ॥
होमः कार्यस्तर्पणादि कुर्याद्ब्राह्मणभोजनम् ।
एवं सिद्धमनुर्मंत्री प्रयोगान् कर्त्तुमर्हति ॥

अथ श्यामलामन्त्रः ।

अथातः संप्रवक्ष्यामि मालामन्त्रं सुसिद्धिदम् ।
ॐ ऐँ ग्लौँ ऐँ नमः प्रोच्य ततो भगवतीति च ॥
वार्त्तालिवाराहियुगं वाराहमुखिवाभवम् ।
ग्लौँ अन्धे अन्धिनीति नमो रुन्धे च रुन्धिनि ॥
नमो भञ्जे भञ्जिनीति नमो मोहेति मोहिनि ।
नमस्तम्भे स्तम्भिनीति नम ऐँ ग्लौँ च वाग्भवम् ॥
सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाग्वदेत् ।
चित्तचक्षुर्मुखगतिजिह्वास्तम्भं कुरुद्वयम् ॥
शीघ्रं वश्यं कुरु कुरु ऐँ ग्लौँ ऐँ ठचतुष्टयम् ।
हूँ फट् स्वाहेति मन्त्रोऽयं वेदरुद्राक्षरः स्मृतः ॥
मुनिः शिवोऽस्य जगती छन्दो वार्त्तालिका सुरी ।
वाराह्यस्य षडङ्गानि वार्त्ताली हृदयं स्मृतम् ॥
वाराह्यस्य शिरः प्रोक्तं शिखा वाराहमुख्यपि ।
अन्धे अन्धिनि वर्मोक्तं रुन्धे रुन्धिनि नेत्रकम् ॥
भञ्जे भञ्जिनि चास्त्रं स्यात् ततो ध्यायेच्च चण्डिकाम् ।

अथ ध्यानम् ।

रक्ताब्जकर्णिकायां तु शवासनसमास्थिताम् ।
मुण्डमालालसत्कण्ठां नीलाभां दधतीं करैः ॥

अभयं मुशलं चापि हलं चापि वरं तथा ।
वाराहास्यां तुङ्गकुचां त्रिनेत्रामरुणाम्बराम् ॥

अथ पुरश्चरणम् ।

जपेन्मन्त्रं सहस्राणि बन्धूककुसुमैस्तिलैः ।
जुहुयात्..इति ॥

अथ स्वप्नवाराहीमन्त्रः ।

अथातः संप्रवक्ष्यामि वाराहीं स्वप्नसंज्ञिकाम् ।
ॐ ह्लौँ नमश्च वाराहीघोरे स्वप्नं विसर्गयुक् ॥
ठद्वयं वह्निजायान्तो मन्त्रः पञ्चदशाक्षरः ।
ईश्वरोऽस्य मुनिः प्रोक्तो जगती छन्द ईरितम् ॥
देवता स्वप्नवाराही बीजं तारः प्रकीर्त्तितः ।
हृल्लेखा शक्तिरुद्दिष्टा ठद्वयं कीलकं मतम् ॥

अथ ध्यानम् ।

ततो ध्यायेद्घनश्यामां त्रिनेत्रामुन्नतस्तनीम् ।
कोलास्यां चन्द्रभालां च दंष्ट्रोद्धृतवसुन्धराम् ॥
खड्गाङ्कुशौ दक्षिणयोर्वामयोश्चर्मपाशकौ ।
अश्वारूढां च कोलास्यां नानालङ्कारभूषिताम् ॥

अथ पुरश्चरणम् ।

लक्षं जपेद्दशांशेन नीलपद्मैस्तिलैर्हुनेत् ।

अथेन्द्राणीमन्त्रः ।

अथातः संप्रवक्ष्यामि इन्द्राणीं नष्टराज्यदाम् ।
इन्द्राणीं नम इति मन्त्रः प्रोक्तः षडक्षरः ॥
गुरुर्मुनिश्च गायत्री छन्दो देवीन्द्रवल्लभा ।
इँ बीजं शक्तिरिन्द्रणीं नमः कीलकमुच्यते ॥

अथ ध्यानम् ।

वज्रपाशवराभीतिहस्ता श्यामाम्बरावृता ।

चतुर्दन्तगजाकल्पच्छायासंस्था हिरण्यभा ॥

अथ पुरश्चरणम् ।

लक्षषट्कं जपेन्मन्त्रं मालतीकुसुमैर्हुनेत् ।
त्रिमध्वक्तैस्तावदेव राज्यार्थं राजवृक्षकैः ॥

अथ चामुण्डामन्त्रस्तन्त्रान्तरे ।

मायाबीजं समुच्चार्य चामुण्डा ङेयुता पुनः ।
नमोऽन्तो नगवर्णोऽयं मन्त्रः सर्वार्थसाधकः ॥
शिवो मुनिश्च गायत्री छन्दोऽमुष्य च देवता ।
चामुण्डा मन्त्रवर्णैश्च द्विरावृत्या षडङ्गकम् ॥

अथ ध्यानम् ।

नीलोत्पलदलश्यामचतुर्बाहुसमन्विता ।
खट्वाङ्गं चन्द्रहासं च बिभ्रती दक्षिणे करे ॥
वामे चर्म च पाशं च ऊर्ध्वतो भावतः पुनः ।
दधती मुण्डमालां च व्याघ्रचर्माम्बराधरा ॥
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घाऽतिभीषणा ।
लोलजिह्वा निम्नरक्तनयनाकारभीषणा ।
कबन्धवाहनासीना विस्तारिश्रवणानना ॥

अथ पुरश्चरणम् ।

वर्णलक्षं जपेन्मन्त्रं दशांशं मधुरप्लुतैः ।
पायसैर्जुहुयान्मन्त्री ततः सिद्धो भवेन्मनुः ॥

अथ महालक्ष्मीमन्त्रस्तत्रैव ।

मायाबीजं समुद्धृत्य स्वबीजं च समुद्धरेत् ।
ततो ङेन्ता महालक्ष्मीर्नमोऽन्तोऽष्टाक्षरो मनुः ॥
मुनिरस्य शिवः प्रोक्तो गायत्री छन्द ईरितम् ।
देवता तु महालक्ष्मीर्मन्त्रवर्णैः षडङ्गकम ॥

अथ ध्यानम् ।

सुवर्णवर्णदीप्ताङ्गी त्रिनेत्रा सिंहवाहिनी ।
ईषत्प्रहसिता देवी नीलोत्पलदलेक्षणा ॥
भुजषोडशसम्पन्ना सर्वालङ्कारभूषिता ।
खड्गं घण्टां शरं सूत्रमङ्कुशं शूलपद्मकम् ॥
दधाना दक्षिणैर्हस्तैरनाथेभ्यो वरप्रदा ।
तथा वामैर्हस्तपद्मैः खेटकं डिण्डिमं धनुः ॥
कमण्डलुं नागपाशं कपालं पुस्तकाभयम् ।
जाज्वल्यमाना तेजोभिरतीवाह्लादकारिणी ॥

अथ पुरश्चरणम् ।

लक्षमेकं जपेन्मन्त्रं दशांशं मधुरप्लुतैः ।
विदध्यात् पायसैर्होममेवं सिद्धो भवेन्मनुः ॥

इत्यष्टमातृकाप्रकरणम् ।

अथ गोरक्षनाथमन्त्रः ।

(कल्पद्रुमतन्त्रे)

गर्ग उवाच ।

अथ मन्त्रं प्रवक्ष्यामि शृणु त्वं यदुनन्दन ।
जपन्ति साधका वीरास्तन्मन्त्रान् श्रद्धयाऽन्विताः ॥
शीघ्रं भवति सिद्धिर्वै साधकानां शिवाज्ञया ।

तथा ।

गोरक्षस्य मनुं जप्त्वा योगीन्द्रो भविता नरः ।
विना गोरक्षमन्त्रेण योगसिद्धिर्न जायते ॥
गोरक्षस्य प्रसादेन सर्वकार्याणि साधयेत् ।

मन्त्रा यथा ।

ॐ ह्रीँ श्रीँ हुँ फट् स्वाहा ।

ॐ ह्रीँ श्रीँ गोँ गोरक्ष हुँ फट् स्वाहा ।
ॐ ह्रीँ श्रीँ गोँ गोरक्ष हुँ हुँ निरञ्जनात्मने हूँ फट् स्वाहा ।
ॐ श्रीँ गोँ ह्रीँ हँ हाँ गोरक्षनाथाय निरञ्जनात्मने* हँ सँ फट् हसः ।

इति चत्वारो मन्त्राः ।

अथ गायत्री ।

ॐ ह्रीँ श्रीँ गोँ गोबीजाय विद्महे गोरक्षाय धीमहि तन्नो निरञ्जनः प्रचोदयात् ।

अथ ऋष्यादिन्यासः ।

गोरक्षनाथमन्त्रस्य बृहदारण्यको मुनिः ।
छन्दोऽनुष्टुब्देवता च नाथो गोरक्षसंज्ञकः ॥

कराङ्गन्यासस्तु ।

ॐ ह्रीँ श्रीँ गोँ गोरक्षनाथाय अङ्गुष्ठाभ्यां नमः—इत्यादि ।

अथ ध्यानम् ।

शुद्धस्फटिकसंकाशो जटाजूटी त्रिलोचनः ।
निरञ्जनो निराकारो निर्विकल्पो निरामयः ॥

अथ पुरश्चरम् ।

लक्षं शताधिकं जप्त्वा साधकः शुद्धमानसः ।
साधयेत् सर्वकार्याणि नात्र कार्या विचारणा ॥
धारयेद्यो नरो नित्यं मन्त्रमेनं विशेषतः ।
स योगसिद्धिमाप्नोति गोरक्षस्य प्रसादतः ॥

अथ शीतलामन्त्रो (मेरुतन्त्रे)

अथ वक्ष्ये महेशस्य वस्त्रप्रक्षालिका तु या ।
शीतलेति च विख्याता मसूर्या चिपिटेश्वरी ॥

---

* हँ सँ फट् हूँ इति २, ५ पु० पा० ।

तारो माया रमा शीतलायै हृच्च नवाक्षरः ।

(“ यामले तु) ।

माया श्रीशीतला ङेन्ता हृदन्तोऽष्टाक्षरो मनुः—इत्युक्तम् ।

(मेरौ ”)

उपमन्युर्मुनिश्छन्दो बृहती शीतला सुरी ।

षड्दीर्घयुक्तपालक्ष्मीबीजाभ्यां स्यात् षडङ्गकम् ॥

अथ ध्यानं (“ यामलादौ)

नमामि शीतलां देवीं रासभस्थां दिगम्बराम् ।

मार्जनीकलशोपेतां सूर्पालङ्कृतमस्तकाम् ॥

(मेरौ ”)

ध्यायेच्च शीतलां देवीं रासभस्थां दिगम्बराम् ।

मार्जनीसूर्पहस्तां च रक्तपुष्पहिमार्चिताम् ॥

तैलादिमलसंयुक्तवस्त्रपोटलिशीर्षकाम् ।

त्रिकोणान्तर्यजेद्देवीं कोद्रवां च मसूरिकाम् ॥

शराविकां च कोणेषु भूपुरे त्वष्टभैरवान् ।

अथ पुरश्चरणम् ।

अयुतं प्रजपेन्मन्त्रं पायसेन दशांशतः ।

हुत्वा कृत्वा तर्पणादि मन्त्रसिद्धिः प्रजायते ॥

नाभिमात्रे जले स्थित्वा यः सहस्रं जपेन्मनुम् ।

तेन संमार्जितास्तीव्राः स्फोटा नश्यन्ति तत्क्षणात् ॥

साधितो येन मन्त्रोऽयं तस्य वंशे न शीतला ।

तेनाभिमन्त्रितं भस्म यद्गेहे तत्र सा न हि ॥

एतत्पुरुषस्यापि मन्त्रस्तत्रैवोक्तः ।

अथातः संप्रवक्ष्यामि भर्त्तुरस्याः परं मनुम् ।

“ ” एतच्चिह्नान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

तारः प्रासादबीजं यँ वँ व्योमव्यापिने द्विठः ॥
एकादशार्णमन्त्रोऽयं न्यासध्यानार्च्चनादिकम् ।
प्रासादमन्त्रवज्ज्ञेयमर्धलक्षं पुरस्कृतिः ॥
दशांशं जुहुयादाज्यैस्तर्पणादि ततश्चरेत् ।

इति शीतलाप्रकरणम् ।

अथोक्तदेवतानां पूजायन्त्राणि प्रदर्श्यन्ते ।

तत्रादौ विघ्नराजयन्त्रं (मेरुतन्त्रे)

श्रीपर्ण्यादिकृते पीठे रचयेत् कुङ्कुमादिना ।
चतुर्द्वारयुतं कुर्याच्चतुरस्रत्रयं शुभम् ॥
तन्मध्येऽष्टदलं कार्यं पूजापीठं गणेशितुः ।

अथ लक्ष्मीगणेशयन्त्रं तत्रैव ।

अष्टपत्राम्बुजद्वन्द्वं कर्णिकाकेशरोज्ज्वलम् ।
चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतम् ॥

“शक्तिगणेशक्षिप्रप्रसादहेरम्बहरिद्रा गणेशयन्त्रं विघ्नराजयन्त्रवत् ।

अथ महागणपतियन्त्रं तत्रैव ।

धर्मादिक्लृप्ते पूर्वोक्ते तीव्रादिनवशक्तिके ।
पूजायन्त्रं गणेशस्य मातृकापद्म उच्यते ॥
चतुर्द्वारसमायुक्तं चतुरस्रत्रायवृतम् ।”
तत्कर्णिकायां षट्कोणं तदन्तश्च त्रिकोणकम् ॥

विरिञ्चिगणनायकयन्त्रं विघ्नराजयन्त्रवत् । वक्रतुण्डयन्त्रं लक्ष्मीगणेशयन्त्रवत् । एवमग्रिमयोरपि विघ्नराजसमानम् ।

अथ सूर्ययन्त्रं (सौ.रपद्धतौ)

लिखेदष्टदलं पद्मं तद्बाह्येऽष्टदलं लिखेत् ।
चतुरस्रं ततो बाह्ये सूर्ययन्त्रमिदं स्मृतम् ॥

“ ” एतदङ्कान्तर्गतः पाठः ४, ५ पुस्तकेऽधिक उपलभ्यते ।

(महाक्रमार्चनपद्धतौ तु)

मध्येऽष्टदलपद्मं च अष्टशृङ्गं ततः परम् ।
द्वादशारं च कमलं वेदास्रद्वारमेव हि—इत्युक्तम् ॥

क्व चित् तु चतुरस्रावृतमष्टदलमात्रमुक्तम् ।

अन्यत्र तु द्वादशदलपद्ममुक्तम् ।

अथ विष्णुयन्त्रं तत्रैव ।

अष्टपत्रं लिखेत् पद्मं कर्णिकाकेशरोज्ज्वलम् ।
चतुरस्रावृतं बाह्ये पूजापीठं मधुद्विषः ॥

अथ मत्स्ययन्त्रन् ।

षट्पत्रं विलिखेत् पद्मं तद्बाह्ये च चतुर्दलम् ।
सप्तपत्रं तु तद्बाह्ये तद्बाह्येऽष्टदलं लिखेत् ॥
ततश्चतुर्दशदलं तद्बहिः षोडशच्छदम् ।
वसुच्छदं तु तद्बाह्ये चतुरस्रं ततो बहिः ॥

कूर्मयन्त्रं तु भूपुरावृतमष्टदलपद्ममेव ।

अथ वराहयन्त्रं (प्रपञ्चसारे)

अष्टपत्रमथ पद्ममुल्लसत्कर्णिकं विधिवदारचय्य च ।
मण्डलं रविसहस्रसन्निभं शूकरं यजत तत्र सिद्धये ॥

अथ नृसिंहयन्त्रम् (विष्वक्सेनसंहितायाम्)

अष्टपत्रं लिखेत् पद्मं कर्णिकाकेशरान्वितम् ।
तद्बाह्येऽष्टदलं लेख्यं तद्बाह्येऽपि वसुच्छदम् ॥
चतुरस्रं ततो बाह्ये यन्त्रं श्रीनारसिंहकम् ।

अन्यत्र तु पूर्वोक्तविष्णुयन्त्रमेव श्रीनृसिंहयन्त्रमुक्तम् ।

अथ वामनयन्त्रम् ।

षड्दलं पद्ममालिख्य तद्बाह्ये षोडशच्छदम् ।
तद्बहिर्वसुपत्रं च तद्बाह्ये द्वादशच्छदम् ॥
अष्टपत्रं ततो बाह्ये तद्बहिर्भूपुरत्रयम् ।

अथ परशुरामयन्त्रम् ।

आदौ चतुर्दलं पद्मं तद्बाह्येऽष्टदलं लिखेत् ।
अष्टपत्रं ततो बाह्ये तद्बहिर्दशपत्रकम् ॥
तद्बहिर्द्वादशारं च षोडशारं च तद्बहिः ।
तद्बहिर्भूपुरद्वन्द्वं चतुर्द्वारोपशोभितम् ॥

अथ रघुनाथयन्त्रम् ।

अष्टपत्रं लिखेत् पद्मं षट्कोणोज्ज्वलकर्णिकम् ।
पुनरष्टदलं बाह्ये लिखेद्वृत्तत्रयाद्बहिः ॥
तद्बहिर्द्वादशदलं तद्बाह्ये षोडशच्छदम् ।
दन्तपत्रं च तद्बाह्ये भूपुरत्रितयावृतम् ॥

अत्र केचित् ।

देहात्मनोर्यथा भेदो मन्त्रदैवतयोस्तथा ।
तस्मात् पीठे महामन्त्रं लिखित्वा तत्र पूजयेत्–इति ॥

वशिष्ठवचनादस्मिन् सपर्यायन्त्रेऽपि साधारणयन्त्रोक्तमन्त्रवर्णान् यथास्थानं लिखित्वा श्रीरामः पूज्य इति वदन्ति ।

धारणयन्त्रे मन्त्रलिखनप्रकारस्तु (रामतापिन्या–) मुक्तः ।

यथा ।

त्रिरेखापुटमालिख्य मध्ये तारद्वयं लिखेत् ।
तन्मध्ये बीजमालिख्य तदधः साध्यमालिखेत् ॥
द्वितीयान्तं च तस्योर्ध्वे षष्ठ्यन्तं साधकं तथा ।
कुरुद्वयं च तत्पार्श्वे लिखेद्बीजान्तरे रमाम् ॥
तत्सर्वं प्रणवाभ्यां च वेष्टयेद्बुद्धि–ऋद्धिमान् ।
दीर्घभाजि षडस्रेषु लिखेद्बीजं हृदादिभिः ॥
कोणपार्श्वे रमामाये तदग्रेऽनङ्गमालिखेत् ।
क्रोधं कोणाग्रान्तरेषु लिखेन्मन्त्र्यभितो गिरम् ॥

वृत्तत्रयं साष्टपत्रं सरोजे विलिखेत् स्वरान् ।
केशरे चाष्टपत्रे च वर्गस्तिकमथो लिखेत् ॥
तेषु मालामनोर्वर्णान् विलिखेद्भूमि-(४५)संख्यया ।
अन्ते पञ्चाक्षरानेवं पुनरष्टदलं लिखेत् ॥
तेषु नारायणाष्टार्णं लिखेत् तत्केशरे रमाम् ।
तद्बहिर्द्वादशदलं विलिखेद्द्वादशाक्षरम् ॥
तथोन्नमो भगवते वासुदेवायेत्यव्ययम् ।
आदिक्षान्तान् केशरेषु वृत्ताकारेण संलिखेत् ॥
तद्बहिः षोडशदलं लिखेत् तत्केशरे ह्रियम् ।
वर्मास्त्र*रतिसंयुक्तं दलेषु द्वादशाक्षरम् ॥
तत्सन्धिश्रीरजादीनां मन्त्रान् मन्त्री समालिखेत् ।
हृँ सृँ भृँ वृँ लँ षृँ जृँ च लिखेत् सम्यगतो बहिः ॥
द्वादशारं महापद्मं नादविन्दुसमायुतम् ।
विलिखेन्मन्त्रराजार्णं तेषु पत्रेषु यत्नतः ॥
ध्यायेदष्ट वसूनेकादश रुद्राँस्तथैव च ।
द्वादशेनाँश्च धातारं वषट्कारं ततो बहिः ॥
भूगृहं वज्रशूलाढ्यं रेखात्रयसमन्वितम् ।
द्वारोपेतं च राश्यादिभूषितं फणिसंयुतम् ॥
एवं मण्डलमालिख्य तस्य दिक्षु विदिक्षु च ।
नारसिंहं च वाराहं लिखेन्मन्त्रद्वयं तथा ॥
कूटरेफानुग्रहेन्दुनादशक्त्यादिभिर्युतः ।
यो नृसिंहः समाख्यातो ग्रहमारणकर्मणि ॥

---

* नति- २, ३, ५ पु० पा० ।

अन्त्यार्घीशवियद्विन्दुनादैर्बीजं च शौकरम् ।
हूँकारं चात्र रामस्य मालामन्त्रोऽधुनेरितः ॥
तारो नतिश्च निद्रायाः स्मृतिर्वेदश्च कामिका ।
रुद्रेण सहिता वह्निमेधामरविभूषिताः ॥
दीर्घा क्रूरयुताह्लादिन्यथो दीर्घा समानदा ।
क्षुधा क्रोधिन्यमोघा च विश्वमप्यथ मेधया ॥
युक्ता दीर्घा ज्वालिनी च ससूक्ष्मा मृत्युरूपिणी ।
सप्रतिष्ठाऽऽह्लादिनी त्वक् क्ष्वेडं प्रीतिश्च सामरा ॥
ज्योतिस्तीक्ष्णाऽग्निसंयुक्ता श्वेताऽनुस्वारसंयुता ।
कामिका पञ्चमोलान्ता स्तान्तान्तो धान्त इलाथ ॥
ससानन्तो दीर्घयुक्तो वायुः सूक्ष्मयुतो विषा ।
कामिका कामिका रुद्रयुक्ताऽथोपिस्थिराससे ॥
तापिनी दीर्घयुक्ता भूरनिलोऽनन्तगोऽनलः ।
नारायणात्मकः कालः प्राणोऽम्भो विद्यया युतम् ॥
पीता रतिस्तथा लान्तो युक्तो योन्या तथा नतिः ।
सप्तचत्वारिंशदर्णो गुणान्तस्त्वगुणः स्वयम् ॥
अयं राज्याभिषिक्तस्य रामस्योक्तक्रमाल्लिखेत् ।
इदं सर्वात्मकं यन्त्रं प्रागुक्तमृषिसेवितम् ॥
सेवकानां मोक्षकरमायुरारोग्यवर्धनम् ।
अपुत्राणां पुत्रदं च बहुना किमनेन वै ॥
प्राप्नुवन्ति क्षणात् सम्यगत्र धर्मादिकानपि ।
इदं रहस्यं परममीश्वरेणापि दुर्गमम् ॥
इदं यन्त्रं समाख्यातं न देयं प्राकृते जने ।

श्रीकृष्णबलरामयोर्यन्त्रं तु पूर्वोक्तविष्णुयन्त्रमेव ।

बुद्धयन्त्रं तु भूपुरावृतद्वात्रिंशद्दलं पद्मम् ।

एवं ध्यात्वा यजेत् पद्मे द्वात्रिंशत्पत्रसंमिते ।

इति (मेरुतन्त्र–) वचनात् ।

विष्णुयन्त्रमेव कल्कियन्त्रम् ।

हयग्रीवादियन्त्रमपि विष्णुयन्त्रमेव ।

गोपालसुन्दरीयन्त्रं श्रीचक्रं तच्चाग्रे वक्ष्यते ।

अथ शिवयन्त्रं (प्रपञ्चसारे)

अष्टपत्रगुणवृत्तराशिभिर्वीथिकल्पतरुभिः समावृतम् ।
मण्डलं प्रतिविधाय शूलिनः पीठमन्त्रनवशक्तिभिर्यजेत् ॥

क्वचित् तु भूपुरत्रयावृताष्टदलपद्मत्रयात्मकं शैवयन्त्रमुक्तम् ।

“ कर्णिकाकेशरभ्राजद्वसुपत्रत्रयं लिखेत् ।
चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतम्–इति ॥

(सिद्धान्तसंग्रहे)

भूपुरत्रयमध्ये तु लिखदष्टदलत्रयम् ।
केशरानाद्यपत्रेषु मध्ये विन्दुं प्रकल्पयेत् ” ॥

अथ दक्षिणामूर्त्तियन्त्रं (मेरुतन्त्रे)

पद्मत्रयसमोपेते भूगृहत्रितयान्विते ।
चतुर्द्वारयुते……………………इति ॥

अथ पाशुपतास्त्रमन्त्रयन्त्रं तत्रैव ।

पद्ममष्टदलं कृत्वा कर्णिकाकेशरान्वितम् ।
चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतम् ॥

अथ बटुकयन्त्रं तत्रैव ।

शैवे पीठे यजेद्देवमन्तर्व्योमाष्टपत्रकम् ।
ऊर्ध्वं त्रिकोणषट्कोणमष्टपत्रं गृहावृतम् ॥

“ ” एतदङ्कान्तर्गतः पाठः ४ पुस्तकेऽधिक उपलभ्यते ।

अथ क्षेत्रपालयन्त्रं तत्रैव ।

शैवे पीठे यजेदष्टपत्रे दिक्स्वरभूषिते ।

अथ भवानीयन्त्रं तन्त्रान्तरे ।

आदौ त्रिकोणमालिख्य तद्बाह्येऽष्टदलाम्बुजम् ।
“भूपुरं चापि तद्बाह्ये भवानीमत्र पूजयेत् ॥

एतदेव त्रिकोण शून्यं यन्त्रान्तरम् ।”

गरुडयन्त्रं तु वक्ष्यमाणमातृकायन्त्रमेव ।

पूजयेन्मातृकापद्मे गरुडं वेदविग्रहम्—इति (मेरुतन्त्र-) वचनात् ।

कार्त्तवीर्ययन्त्रं तु पूर्वोक्तविष्णुयन्त्रमेव ।
काम्यपूजायां तु विशेष उक्तो (मेरुतन्त्रे)

अथातो दक्षिणे मार्गे वक्ष्यते काम्यपूजनम् ।
शुद्धभूमावष्टगन्धैर्लिखेद्यन्त्रं तदुच्यते ॥
लिखेद्दशदलं पद्मं कर्णिकायां समालिखेत् ।
प्लौँ क्लीमोमैश्च पत्रेषु प्रणवाद्यानि संलिखेत् ॥
मन्त्रस्य नवबीजानि ततो यन्त्रान्तरेषु च ।
फडादिदशवर्णाँश्च मन्त्रस्यैव समालिखेत् ॥
शषसहान् स्वराँश्चापि केशरेषु द्विशो लिखेत् ।
वेष्टयेत् कादिभिर्वर्णैः शषसहविवर्जितैः ॥
तद्बाह्ये चतुरस्रं तु वेष्टयेद्भूतवर्णिकैः ।
कामनाभेदतस्तानि वाय्वग्निक्ष्मा जलं नभः ॥
पञ्च ह्रस्वाः पञ्च दीर्घा एकाराद्याश्च पञ्च च ।
पञ्चवर्णा पञ्च याद्याः षक्षराश्च सहौ क्रमात् ॥
स्तम्भने पार्थिवैराप्यैः शान्तौ वश्ये च तैजसैः ।
उच्चाटने वायवीयैर्विद्वेषे चापि नाभसैः ॥

“ ” एतदङ्कान्तर्गतः पाठः ४, ५ पुस्तकयोरधिक उपलभ्यते ।

मारणे तैजसैः शान्तौ चाप्यैः पुष्टौ च पार्थिवैः ।
अस्मिन् यन्त्रे तोयपूर्णघटे भूपं प्रपूजयेत् ॥
कुम्भं स्पृष्ट्वा जपेन्मन्त्रं सहस्रं तेन सेचयेत् ।
सम्यक् साध्यं तदा स स्यात् पुत्रवान् रोगवर्जितः ॥
यशस्वी दीर्घजीवी च सत्कलत्रोऽसुरक्षकः ।
वाक्सिद्धश्चापि तेजस्वी प्रतापी विजितेन्द्रियः ॥
शत्रूपद्रवमापन्नो ग्रामे वा मण्डपे पुरे ।
संस्थापयेदिदं यन्त्रमरिभीतिनिवृत्तये ॥
अथ वक्ष्ये वामगानां यन्त्रभेदं शृणुष्व तत् ।
लिखेदष्टदलं पद्मं ससाध्यं क्रौँ च मध्यतः ॥
यौँ यैमाद्यन्तयोस्तस्य लिखेत् पत्रेषु च क्रमात् ।
मन्त्रबीजाष्टकं चान्ते दले लेख्यं पुनश्च फट् ॥
पत्रान्तरे शेषवर्णानन्ते वर्णद्वयं लिखेत् ।
द्विशः स्वरान् केशरेषु द्विधोष्मार्णसमन्वितान् ॥
वृत्तद्वयं च तद्बाह्ये तयोर्वीथ्यां च कादिकान् ।
उष्मोनाँश्चतुरस्रं तु वज्राष्टकसमन्वितम् ॥
तद्बाह्ये विलिखेत् तत्र पूर्ववद्भूतवर्णिकान् ।
स्नानार्थं घटमानीयमन्यत् पूर्ववदीरितम् ॥

अथ हनुमद्यन्त्रं तन्त्रान्तरे ।

अष्टपत्रं लिखेत् पद्मं कर्णिकाकेशरोज्ज्वलम् ।
भूपुरं च ततो बाह्ये लिखित्वा तत्र पूजयेत् ॥

अथ स्मरयन्त्रं तत्रैव ।

यन्त्रं लिखेत् ततो विद्वान् वसुपत्राम्बुजं शुभम् ।
तद्बहिः षोडशदलं चतुरस्रेण संयुतम् ॥

अथ मातृकायन्त्रं (शारदायाम्)

व्योमेन्दौ रसनार्णकर्णिकमचां द्वन्द्वैः स्फुरत्केसरं
पत्रान्तर्गतपञ्चवर्गयशलार्णादित्रिवर्गं क्रमात्।
आशास्वश्रिषु लान्तलाङ्गलियुजा क्षोणीपुरेणावृतं
पद्मं कल्पितमत्र पूजयत तां वर्णात्मिकां देवताम्॥

व्योम हकारः। इन्दुः सकारः। औ इति स्वरूपम्। रसनार्णो विसर्गः। तेन ह्सौरिति। आशास्वित्यादि। आशासु दिक्षु। अश्रिषु कोणेषु। लान्तो वकारः। लाङ्गली ठकारः। तथा चतुर्दिक्षु वकारयुक्तेषु कोणेषु ठकारयुक्तेनेत्यर्थः। शेषं स्पष्टम्।

भूतलिपियन्त्रं तु अष्टदलोपरि षोडशदलं तदुपरि चतुर्द्वारयुक्तं चतुरस्रमिति (शारदा-)टीकायामुक्तम्।

अथ श्यामासपर्यायन्त्रं (कालीतन्त्रे)

आदौ त्रिकोणं विन्यस्य त्रिकोणं च बहिर्न्यसेत्।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम्॥
ततो वृत्तं समालिख्य लिखेदष्टदलं ततः।
वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम्॥

यन्त्रान्तरमुक्तं (कुमारीकल्पे)

आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत्।
बहिस्त्रिकोणमालिख्य षट्कोणं च बहिर्न्यसेत्॥
मध्ये तु बैन्दवं चक्रं बीजेनापि विभूषितम्।
षट्कोणात् तु बहिः पद्मं भूपुरैकेण संयुतम्॥
ज्ञात्वैवं मुक्तिमाप्नोति यन्त्रमेतन्न संशयः।

पद्ममष्टदलम्। भूपुरं च चतुर्द्वारयुक्तम्।

तदुक्तं (भैरवतन्त्रे)

शङ्क्वश्रिभ्यां च षट्कोणं तत्र शक्तित्रयं लिखेत्।
पद्ममष्टदलं भूमिपूश्चतुर्द्वारसंयुतम्॥

शक्त्यग्निभ्यामिति । शक्तिरधोमुखत्रिकोणम् । अग्निरूर्ध्वमुखं त्रिकोणम् । ताभ्यां षट्कोणे सिद्धे तन्मध्ये वाऽधोमुखत्रिकोणत्रयं लिखेदित्यर्थः ।

तथा ।

स्वर्णादिरचिते पात्रे रक्तचन्दनचर्चिते ।
स्वयम्भुकुसुमाक्ते वा रक्ताक्ते चान्यथा शुचि ॥
रक्तचन्दनलेखन्याऽथ वा स्वर्णशलाकया ।

रक्तचन्दनचर्चिते पशुना स्वयम्भुकुसुमाद्यक्ते वीरेण यन्त्रं लेखनीयमित्यर्थः ।

(कुमारीकल्पे)

एतत् तु विलिखेत् ताम्रे कुण्डगोलविलेपिते ।
स्वयम्भुकुसुमैर्युक्ते कुङ्कुमारुणसेविते ॥

(स्वतन्त्रतन्त्रे)

स्वयम्भुकुसुमं कुण्डगोलोत्थं रोचनाऽगुरुः ।
काश्मीरमृगनाभी च मद्यं मलयजोद्भवम् ॥
एष गन्धः समाख्यातः सर्वदा चण्डिकाप्रियः ।
एतेन गन्धयोगेन योनिचक्रक्रमं लिखेत् ॥

(मुण्डमालायाम्)

ताम्रपात्रे कपाले वा श्मशाने काष्ठनिर्मिते ।
शनिभौमदिने वाऽपि वीरमृतकसम्भवे ॥
स्वर्णे रौप्ये तथा लौहे चक्रमर्च्यं विधानतः ।

अत्रापि कपालादिपि वीरादिपरत्वं वेदितव्यम् ।

अथ गुह्यकालीयन्त्रं (महाकालसंहितायाम्)

सबिन्दुत्र्यारपञ्चारत्रिभिन्ननवकोणयुक् ।
वृत्तयोरन्तरेऽष्टारयुतं तदनु भाविनि ॥
वस्वर्कभूपच्छदनाम्भोजवृत्तान्वितं ततः ।
अष्टाशनिसमायुक्तमन्तर्बहिरथापि च ॥
अष्टशलाष्टमुण्डाढ्यं वह्निज्वालायुतेन हि ।

श्मशानेनावृतं शेषे शोणितोदेन वेष्टितम् ॥
यन्त्रराजमिदं देवि पूजनाय प्रकल्पितम् ।
भरतश्च्यवनश्चापि हारीतश्च जवालकः ॥
दक्षश्चैते जनाः पञ्च पूजयन्त्यमुनाऽम्बिकाम् ।
बिन्दुः पञ्चारषट्कोणत्रिकोणनवकोणगः ॥
अष्टारवृत्तसहितषोडशच्छदपद्मयुक् ।
पुनर्वृत्तान्वितः शेषे पूर्ववत् सकलं प्रिये ॥
पूज्योऽयं रामयक्षेशनाहुषाणां वरानने ।

अथ कामकलायन्त्रं तत्रैव ।

यन्त्रमस्याः प्रवक्ष्यामि तत्र धेहि मनः प्रिये ।
भूपुरे वसुपत्राढ्ये पद्ममष्टदलान्वितम् ॥
केशराणि प्रकल्प्यानि तदन्तश्चापि कर्णिकाम् ।
कर्णिकान्तस्त्रिकोणस्य त्रितयं पृथगेव हि ॥
बहिस्त्रिकोणकोणेषु लिखेद्बीजत्रयं शुभम् ।
मायाबीजं तु वामे स्यात् क्रोधबीजं तु दक्षिणे ॥
अधः पाशं विनिर्दिश्य कन्दर्पार्णं तु मध्यतः ।
तदन्तःस्थायिनी देवी तत्र सर्वं प्रतिष्ठितम् ॥
एतद्यन्त्रं महादेवि सर्वकामफलप्रदम् ।
एतस्य सर्वयन्त्राणि कलां नार्हन्ति षोडशीम् ॥

अथ श्मशानकालीयन्त्रं (स्वतन्त्रतन्त्रे)

पद्मं चाष्टदलं वृत्तं तद्बाह्येऽष्टकवर्गकम् ।
धरण्यां विलिखेदाद्यं चतुष्कं च चतुष्ककम् ॥
पूर्वादि उतरान्तं च मध्ये देवीं प्रपूजयेत् ।

अथ सिद्धिलक्ष्मीयन्त्रं कालानलतन्त्रे।

यन्त्रोद्धारमहं वक्ष्ये सिद्धिलक्ष्म्या द्विज शृणु।
चतुरस्रं चतुर्द्वारं वृत्तत्रयेण वेष्टितम्॥
अष्टारं च रविदलं पुनरष्टदलं लिखेत्।
षट्कोणमध्ये कोणं च तत्र विन्दुं विचिन्तयेत्॥

अथ तारायन्त्रं (फेरवीये)

अष्टपत्रं लिखेत् पद्मं त्रिकोणोज्ज्वलकर्णिकम्।
मायां पूर्वदले न्यस्य याम्ये बीजं द्वितीयकम्॥
तथोत्तरे पश्चिमे च फट्कारं विलिखेत् ततः।
मध्ये बीजं लिखित्वा.................... इति॥

(फेत्कारिणीतन्त्रे)

सयोनि गोमयेनाष्टपत्रमब्जं सुशोभनम्।
भूपुरं वसुवज्राढ्यं यन्त्रमेकजटात्मकम्॥

(मेरुतन्त्रे)

ततस्तां पूजयेत् पीठे पद्मे षट्कोणकर्णिके।
धरागृहावृते पीठमादावर्च्यं सशक्तिकम्॥

एतयोर्भूपुरमधिकमुक्तम्।

तथा त्रिकोणषट्कोणयोर्विकल्पः (नीलतन्त्रे)

व्योमेन्दौ रसनार्णकर्णिकमथो द्वन्द्वैः स्फुरत्केशरं
वर्गोल्लासिवसुच्छदं वसुमतीगेहेन संवेष्टितम्।
ताराधीश्वरवारिवर्गविलसद्दिक्कोणसंशोभितं
यन्त्रं नीलतनोः परं निगदितं सर्वार्थसिद्धिप्रदम्॥

इदं च नीलसरस्वतीयन्त्रं नीलतनोरित्यभिधानात्।

(फेत्कारिणीतन्त्रो-)क्तयन्त्रमेकजटायाः। (फेरवीयमेरुतन्त्रोक्तं) च तारायाः इति सम्प्रदायविदः।

केचित् तु व्योमेन्द्रावियदादिना धारणयन्त्रमुक्तम्। पूर्वोक्तानि यन्त्राणि तारेकूटानि लसरस्वतीसाधारणानीति वदन्ति।

(मत्स्यसूक्ते)

अनुक्तकल्पे यन्त्रं तु लिखेत् पद्मं दलाष्टकम्।
षट्कोणकर्णिकं वृत्तं वेदद्वारोपशोभितम्॥

अथ श्रीयन्त्रं (यामले)

बिन्दुत्रिकोणवसुकोणदशारयुग्मं
मन्वस्रनागदलसंयुतषोडशारम्।
वृत्तत्रयं च धरणीसदनत्रयं च
श्रीचक्रराजमुदितं परदेवतायाः॥

अस्मिन् यन्त्रे केशरा न कर्त्तव्याः।

योऽस्मिन् यन्त्रे महेशानि केशराणि प्रकल्पयेत्।
योगिनीसहितास्तस्य हिंसां कुर्वन्ति भैरवाः॥

इति (भूतभैरवोक्तेः)

एतद्दर्शनफलमुक्तं (यामले)

सम्यक् शतक्रतून् कृत्वा यत् फलं समवाप्नुयात्।
तत् फलं लभते भक्त्या कृत्वा श्रीचक्रदर्शनम्॥
महाषोडशदानादि कृत्वा यल्लभते फलम्।
तत् फलं समवाप्नोति कृत्वा श्रीचक्रदर्शनम्॥
सार्धत्रिकोटितीर्थेषु स्नात्वा यत् फलमश्नुते।
लभते तत् फलं भक्त्या कृत्वा श्रीचक्रदर्शनम्॥

अथ पूजाफलम्।

कोटिलिङ्गप्रतिष्ठायां यत् फलं समुदाहृतम्।
तत्फलं लभते नूनं श्रीचक्रस्य च पूजनात्॥

अथ दानफलम्।

श्रीचक्रं कारयित्वा तु यो दद्यात् साधकाय च।

भूचक्रं तेन दत्तं हि सशैलवनसागरम् ॥

अथैतत्पादोदकमाहात्म्यम् ।

गङ्गापुष्करनर्मदासयमुनागोदावरीगोमती-
गङ्गाद्वारगयाप्रयागबदरीवाराणसीसिन्धुषु ।
रेवासेतुसरस्वतीप्रभृतिषु ब्रह्माण्डभाण्डोदरं
तीर्थस्नानसहस्रकोटिगुणितं श्रीचक्रपादोदकम् ॥

अथैतच्चक्रोद्धारप्रकारस्तन्त्रान्तरोक्तः प्रदर्श्यते ।

वृत्तं कृत्वेष्टमानेन मध्ये सूत्रं तु पातयेत् ।
पूर्वपश्चिमलग्नाग्रं द्विचत्वारिंशदङ्कयेत् ॥
पूर्वदिग्भागतः कार्या रेखा दोषापनुत्तये ।
त्यक्त्वा षड्भागमाद्या स्याद्रेखा याम्योत्तराश्रिता ॥
पञ्चभागाँस्ततस्त्यक्त्वा द्वितीयाऽपि तथा भवेत् ।
ततो भागचतुष्केण दूरतस्त्रितया भवेत् ॥
ततो भागत्रयं त्यक्त्वा रेखा स्यात् तु चतुर्थिका ।
भागद्वयं ततस्त्यक्त्वा रेखा कार्याऽथ पञ्चमी ॥
ततो भागचतुष्केण षष्ठी रेखा तथा भवेत् ।
सप्तमी स्यात् त्रिभिर्भागैश्चतुर्भागैस्तथाऽष्टमी ॥
नवमी पञ्चभिर्भागैरेवं रेखा विधाय तु ।
अन्तरं वृत्ततः षड्भिरंशैराद्यन्तरेखयोः ॥
सूर्यादिग्रहनामानि नवानां धारयेत् क्रमात् ।
पार्श्वद्वयेऽपि कर्त्तव्यं रेखाग्राणां विमार्जनम् ॥
अग्रयोरुभयोर्लुप्येत् सूर्ये भागत्रयं त्रयम् ।
पञ्चभागान् प्रलुप्येत द्वितीया पार्श्वयोर्द्वयोः ॥
मार्जनं च भवेदेवमङ्गयोः शनिभौमयोः ।

बुधरेखाग्रयोर्लुम्प्याद्भागान् षोडश यत्नतः ॥
अष्टादश विलुप्येत भागान् गुर्वग्रयोर्द्वयोः ।
षोडशोभयतो लुप्येद्भागान् भृग्वग्रयोस्तथा ॥
राहुकेत्वोः क्रमेण स्यादष्टषड्भागमार्जनम् ।
सूर्याग्रे चुम्बतः शुक्रे मध्यं सोमाग्रके पुनः ॥
चुम्बतः केतुमध्यं तु भौमाग्रे वृत्तचुम्बके ।
बुधाग्रे राहुमध्यं तु चुम्बतस्तद्वदेव हि ॥
चुम्बतः शनिमध्यं तु अग्रभागौ बृहस्पतेः ।
पूर्वस्यां वृत्तमध्यं चुम्बतोऽग्रे शनेरपि ॥
राह्वग्रे सूर्यमध्यं तु चुम्बतस्तद्वदेव हि ।
केत्वग्रे चुम्बतो भौमं भृग्वग्रे सोमचुम्बके ॥
एवं चक्रं लिखित्वा तु भवेदतिमनोरमम्-इति ।

बालायन्त्रं तु वक्ष्यमाणत्रिपुरभैरवीयन्त्रवत् ।
(त्रिपुरासारसमुच्चये) यन्त्रान्तरमुक्तम् ।

त्रिकोणं विलिख्यानु वृत्तं दलानां
ततः पञ्चकं तद्बहिश्चापि वृत्तम् ।
पुनः षड्दलं बाह्यतश्चापि वृत्तं
लिखेदष्टपत्राणि तद्बाह्यतोऽपि ॥

अथ भुवनेश्वरीयन्त्रम् (शारदायाम्)

पद्ममष्टदलं बाह्ये वृत्तं षोडशभिर्दलैः ।
विलिखेत् कर्णिकामध्ये षट्कोणमतिसुन्दरम् ॥
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत् ।

अथ त्रिपुरभैरवीयन्त्रं (शारदायाम्)

पद्ममष्टदलोपेतं नवयोन्याढ्यकर्णिकम् ।

चतुर्द्वारसमायुक्तं भूगृहं विलिखेत् ततः ॥

अथ चैतन्यभैरवीयन्त्रं (ज्ञानार्णवे)

त्रिकोणं चैव षट्कोणं वसुपत्रं वरानने ।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत् ॥

भुवनेश्वरीभैरवीकमलेश्वरभैरव्योरपि तदेव यन्त्रम् । सम्पत्प्रदाभैरवीयन्त्रं त्रिपुरभैरवीयन्त्रवत् । कामेश्वरभैरवीयन्त्रं चैतन्यभैरवीयन्त्रवत् ।

अथ षट्कूटाभैरवीयन्त्रं (ज्ञानार्णवे)

यन्त्रमस्या वरारोहे त्रिकोणं संपुटं लिखेत् ।
बहिरष्टदलं पद्मं रविपत्रं ततो लिखेत् ॥
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत् ।

अथ रुद्रभैरवीयन्त्रं तत्रैव ।

त्रिकोणं चैव वृत्तं च वृत्ताष्टदलपङ्कजम् ।
वृत्तं भूमण्डलं च ·································· इति ॥

अथ छिन्नमस्तायन्त्रं (यामले)

त्रिकोणं विन्यसेदादौ तन्मध्ये मण्डलत्रयम् ।
तन्मध्ये विलिखेद्योनिं द्वारत्रयसमन्वितम् ॥
बहिरष्टदलं पद्मं भूबिम्बत्रितयं पुनः ।
कूर्मबीजं लिखेन्मध्यं त्रिकोणे हसमन्वितम् ॥

(तन्त्रान्तरे)

अथोच्यते यन्त्रराजं वैरोचन्या महेश्वरि ।
षट्कोणं प्रथमं लेख्यं मध्यदेशे त्रिकोणकम् ॥
सूर्यबिम्बं ततो दद्याच्चतुरस्रं ततः परम् ।
भूगोलं च ततो दद्याच्चतुरस्रं ततः परम् ॥
अष्टपत्रं ततो दद्याद्यथास्थाने च देशिकः ।
चन्द्रबिम्बं ततो दद्याद्वह्निबिम्बं ततः परम् ॥

भूगोलं च ततो दद्याद्भूपुरत्रितयं ततः ।
वज्रशूलसमायुक्तं कोणे टङ्कं नियोजयेत् ॥
किञ्जल्के केशरे दद्यान्मन्त्रवर्णांस्त्रिकोणके ।
इति कामोपरि ध्यायेद्देवीं वैरोचनीं शुभाम् ॥

(तन्त्रान्तरे)

भैरवोक्तमहं वक्ष्ये यन्त्रं सर्वसमृद्धिदम् ।
त्रिकोणं प्रथमं लेख्यं षट्कोणैर्वेष्टयेच्च तत् ॥
त्रिविम्बं च ततो दद्याद्गुणानां परिणामकम् ।
भूपुरत्रितयं कुर्याद्वज्रशूलसमन्वितम् ॥
कोणदेशे ततो दद्याट्टङ्कास्त्रं सुमनोहरम् ।
यथास्थाने लिखेद्धीमान् कर्त्तृखर्परकं शुभम् ॥
रतिकामोपरि ध्यायेद्देवीं वैरोचनीं शुभाम् ।

(मेरुतन्त्रे)

त्रिकोणं रसकोणं वाऽष्टदलं भूपुरं ततः ।

अथ धूमावतीयन्त्रं तन्त्रान्तरे ।

लिखेदष्टदलं पद्मं भूपुरेण च वेष्टितम् ।

अथ बगलामुखीयन्त्रं (मेरुतन्त्रे)

सौवर्णे वाऽथ वा रौप्यं पैत्तले वाऽथ भूर्जके ।
कर्पूरागुरुकस्तूरीश्रीखण्डकुङ्कुमैरपि ॥
लिखेद्यन्त्रं प्रयत्नेन लेखन्या हेमतारयोः ।
मध्ये योनिं समालेख्य तद्बाह्ये तु षडस्रकम् ॥
तद्बाह्येऽष्टदलं पद्मं तद्बाह्ये षोडशच्छदम् ।
चतुरस्रत्रयं बाह्ये चतुर्द्वारोपशोभितम् ॥

अथ मातङ्गीयन्त्रं तन्त्रान्तरे ।

षट्कोणाष्टदलं पद्मं लिखेद्यन्त्रं मनोरमम् ।

एतस्मिन् पूजयेत् पीठे नवशक्तीः क्रमादिमाः ॥

अथ यन्त्रान्तरं (मेरुतन्त्रे)

त्रिकोणं पञ्चकोणं च बहिरष्टदलद्वयम्।
षोडशारं चाष्टदलं भूपुत्रितयं लिखेत् ॥

एतद्द्वयमप्युच्छिष्टचाण्डालिन्याः। राजमातङ्गीयन्त्रं तु तद्ध्यानात् प्रागेवोक्तम्। वश्यमातङ्ग्यादिभेदानामपि तदेव यन्त्रमाकलनीयम्।

अथ सुमुखीयन्त्रम्।

त्रिकोणं पञ्चकोणं च वृत्तमष्टदलावृतम्।
चतुरस्रं च तद्बाह्ये सुमुखीयन्त्रमीरितम् ॥

अथ लक्ष्मीयन्त्रं (मेरुतन्त्रे)

धर्मादिकल्पिते पीठे भूपुरद्वारशोभिते।
दलादष्टके केशराख्ये कर्णिकायां यजेदिमाम् ॥

भूपुरावेष्टितमष्टदलपद्मत्रयात्मकं यन्त्रमन्यत्रोक्तम्।

अथ सरस्वतीयन्त्रं तन्त्रान्तरे।

पद्ममष्टदले लेख्यं चतुरस्रावृतं शुभम्।
यन्त्रमेतद्वरारोहे वाग्देव्याः परिकीर्त्तितम् ॥

त्वरिताया नित्यक्लिन्नायाश्च यन्त्रं पूर्वोक्तभुवनेश्वरीयन्त्रवत्।

अथान्नपूर्णायन्त्रं (मेरुतन्त्रे)

त्रिकोणं च चतुःपत्रं वसुपत्रं ततः परम्।
कलापत्रं च भूबिम्बं चतुरस्रत्रयावृतम् ॥

प्रत्यङ्गिरायन्त्रमन्नपूर्णायन्त्रवत्।

अथ कुब्जिकायन्त्रम्।

बिन्दुत्रिकोणषट्कोणमष्टपत्रं सकेशरम्।
श्रीमत्कुब्जेश्वरीयन्त्रं सद्वारं भूपुरत्रयम् ॥

तन्त्रान्तरे।

बिन्दुत्रिकोणषट्कोणमष्टपत्राम्बुजं तथा।
समातृबीजाष्टदलमष्टशृङ्गं सभूपुरम् ॥

गङ्गायन्त्रं तु सरस्वतीयन्त्रवत् । भूपुरावृतषडस्रं वाग्मतीयन्त्रम् । अष्टदलकमलद्वयात्मकं चन्द्रयन्त्रम् ।

अथ भौमयन्त्रं (मेरुतन्त्रे)

त्रिकोणं पूर्वमुद्धृत्य पञ्चधा विभजेत् ततः ।
तृतीयरेखां चिह्नाभ्यां लाञ्छयेत् समभागतः ॥
आद्यरेखाग्रयुगलं तृतीयाचिह्नयोर्न्यसेत् ।
द्वितीयाग्रे समाकृष्य तृतीयाचिह्नयोर्न्यसेत् ॥
युता रेखा तृतीया तु समा भाज्या समं ततः ।
तुर्या चिह्नद्वयेनाथ त्रिभिश्चिह्नैश्च पञ्चमी ॥
तृतीयाग्रे प्रकुर्वीत पञ्चम्या मध्यचिह्नजे ।
तुर्याग्रे योजयेत् सम्यक् पञ्चम्या चिह्नयोर्द्वयोः ॥
अथ मीनद्वये दद्यात् सूत्रयुग्मं विचक्षणः ।
एवमेकाधिका सम्यक् कोष्ठानां विंशतिर्भवेत् ॥

बुधादीनां यन्त्रं तु भूपुरावृताष्टदलकमलम् । तेषां यन्त्रान्तराणि विस्तरभयान्न लिख्यन्ते ।

पिङ्गलादिग्रहमातृयन्त्रं तु त्रिकोणपञ्चकोणाष्टदलभूपुररूपम् । षड्दलाद्बहिरष्टदलमिन्द्रयन्त्रम् । अग्नियन्त्रमपि तदेव । अष्टदलमात्रमग्नेर्यन्त्रान्तरम् । यमयन्त्रमिन्द्रयन्त्रवत् । नैर्ऋतयन्त्रं तु पञ्चकोणगर्भाष्टदलपद्मम् । षड्दलाद्बहिरष्टदलवरुणयन्त्रम् । षड्दलाद्बहिरष्टदलत्रयं वायुयन्त्रम् । कुबेरयन्त्रमष्टदलमात्रम् । ईशानयन्त्रं शिवयन्त्रवत् । ब्रह्मयन्त्रं तु दशदलपद्मम् । विष्णुयन्त्रमेवानन्तयन्त्रम् । षट्कोणकर्णिकषोडशदलपद्मं ब्राह्मीयन्त्रम् । पञ्चकोणगर्भाष्टदलकमलं कौमारीयन्त्रम् । वैष्णवीयन्त्रमष्टदलपद्मम् । तदेव वाराहीयन्त्रमपि ।

मालामन्त्रं तु यन्त्रान्तरमुक्तं (मेरुतन्त्रे)

योनिपञ्चास्रषट्कोणाष्टपत्रशतपत्रकम् ।
सहस्रदलभूबिम्बसंवीतं द्वारशोभितम् ॥
कैलाशाचलमध्यस्थं पीठमेतद्विचिन्तयेत् ।

त्रिकोणषोडशदलाष्टदलदशदलद्वयात्मकं स्वप्नवाराहीयन्त्रं तत्रैवोक्तम् । षट्कोणगर्भाष्टदलपद्ममैन्द्रीचामुण्डामहालक्ष्मीयन्त्रम् ।

अथ दुर्गात्मकचामुण्डामन्त्रयन्त्रं तु तन्त्रान्तरे ।

एतन्मन्त्रावृतत्र्यस्रषट्कोणाष्टदलं लिखेत् ।
पञ्चविंशद्दलं बाह्ये चतुरस्रावृतं शुभम् ॥

अथ दुर्गायन्त्रं (मेरुतन्त्रे)

अष्टपत्राम्बुजद्वन्द्वं चतुरस्रत्रयावृतम् ।
चतुर्द्वारसमायुक्तं कुङ्कुमादिभिरुद्धरेत् ॥

अथ यन्त्रपुरश्चरणं तन्त्रान्तरे ।

आदौ यन्त्रस्य सिद्ध्यर्थं तन्मन्त्रस्य पुरस्क्रियाम् ।
कृत्वाऽयुतप्रमाणेन पश्चाद्यन्त्रस्य वाऽऽचरेत् ॥
यथाऽऽधारे यथाद्रव्यैर्यन्त्रं संलिख्य यत्नतः ।
तत्रावाह्यैव तद्देवं संपूज्य विधिपूर्वकम् ॥
ध्यात्वा बलिं जपं होमं कृत्वा देवं विसर्जयेत् ।
एकैकवारमावर्त्त्य तन्मन्त्रं संस्मरन् बुधः ॥
इत्थं जपादिभिः सिद्धे यन्त्रे नासाध्यता क्वचित् ।
दिक्सहस्रप्रमाणेन यन्त्रे कार्या पुरस्क्रिया ॥

अथ धारणयन्त्रसाधनमुक्तं (मेरुतन्त्रे)

अथ यन्त्रविधिं वक्ष्ये सर्वतन्त्रेषु गोपितम् ।
सिद्धस्य लिखनादेव यन्त्रसिद्धिः प्रजायते ॥
न भावि यत्र कार्यं तु सिद्धस्यापि तदा भवेत् ।
दुःस्वप्नदर्शनं पूर्वं तदा यन्त्रं न कारयेत् ॥
साधकस्य शुभे घस्रे समाराध्येष्टदेवताम् ।
स्वप्यात् त्रिदिवसं भूमौ हविष्याशी जपे रतः ॥
एतद्यन्त्रं करिष्यामि मम तत् कीदृशं प्रभो ।
स्वप्ने वदैतद्देवेशि तदङ्गत्वेन पूजनम् ॥

प्रदोषसमये कृत्वा लिखेत् त्रिदिवसं भुवि ।
तृतीयदिवसे रात्रौ यथा स्वप्नः प्रजायते ॥
तथैवाज्ञां गृहीत्वा तु सत्स्वप्ने चालिखेद्भुवि ।
अस्वप्ने वाऽथ दुःस्वप्ने नैव कुर्याल्लिखेद्धि तत् ॥
जीवसंस्थापनं यन्त्रे कुर्याद्येन फलं लभेत् ।
षष्ठ्यन्तं साधकपदं मध्यबीजोर्ध्वतो लिखेत् ॥
द्वितीयान्तं साध्यमधः कुरुद्वन्द्वं च पार्श्वयोः ।
हसौर्यन्त्रस्य जीवः स्यान्मध्यभागादधो लिखेत् ॥
हंसः सोऽहं मनोरस्य लिखेदेकैकमक्षरम् ।
ईशानादिषु कोणेषु दक्षपार्श्वे च इद्वयम् ॥
उद्वयं वामपार्श्वे च पूर्वाशादौ लिखेत् क्रमात् ।
लँ रँ मँ क्षँ तथा वँ यँ सँ हँ पूर्वादिके लिखेत् ॥
ईशानपूर्वयोर्मध्ये आँ ह्रौँ वायव्यसौम्ययोः ।
एवं दिक्पालबीजानि दशदिक्षु न्यसेत् क्रमात् ॥
यन्त्रराजाय विद्महे वरप्रदाय धीमहि तन्नो यन्त्रः प्रयोदयात् ।
एतस्याः प्रतिकाष्ठायां लिखेद्वर्णत्रयं त्रयम् ।
बहिः प्राणप्रतिष्ठाया मन्त्रं सर्वत्र वेष्टयेत् ॥
एवं तु लिखितं यन्त्रं भवेत् सिद्धिप्रदायकम् ।
स्थलानुक्तौ भूर्जपत्रे क्षौमे वा ताम्रपत्रके ॥
यन्त्रं विलिख्य गुटिकां बद्ध्वा सूत्रेण वेष्टयेत् ।
लाक्षयाऽऽच्छादितं स्वर्णे रूप्ये ताम्रेऽथ वा क्षिपेत् ॥
यद्देवताकं यन्त्रं स्यात् तद्बीजेन च पूजयेत् ।
तदभावे मातृकार्णैर्यन्त्रपूजां समाचरेत् ॥

अष्टोत्तरसहस्रं तु मूलं जप्त्वा हुनेद्घृतम् ।
तत्संपातेन संसिक्तं कृत्वा यन्त्रं नियोजयेत् ॥
मूर्ध्नि बाहौ गले वाऽपि तत्तदिष्टार्थसिद्धये ।

(मेरुतन्त्रे)

उपास्या वा भूतलिपिर्यन्त्रसिद्धिविधायिनी ।
अक्लेशेनैव सर्वेषां यन्त्राणां सिद्धिमाप्नुयात् ॥

अथ भूतलिपिनिर्णयः (शारदायाम्)

अथ भूतलिपिं वक्ष्ये सुगोप्यामपि दुर्लभाम् ।
यां प्राप्य शम्भोर्मुनयः सर्वान् कामान् प्रपेदिरे ॥
पञ्च ह्रस्वाः सन्धिवर्णा व्योमेराग्निर्जलं धरा ।
अन्तमाद्यं द्वितीयं च चतुर्थं मध्यमं क्रमात् ॥
पञ्चवर्गाक्षराणि स्युर्वान्तः श्वेतेन्दुभिः सह ।
एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः ॥

पञ्च ह्रस्वा इति अकारादयः । सन्धिवर्णा एकारादयश्चत्वारः । व्योम हकारः । ईरो यकारः । अग्नी रेफः । जलं वकारः । धरा पृथ्वी, तद्बीजं लकारः । अन्तमित्यादि वर्गस्येति शेषः । वान्तः शकारः । श्वेतः षकारः । इन्दुः सकारः ।

तथा ।

आयंवरार्णाः वर्गाणां पञ्चमाः शार्णसंयुताः ।
वर्गाद्या इति विज्ञेया नव वर्गाः स्मृता अमी ॥

आयंवरार्णा इति । अश्च ए च अंवरार्णश्च ते । आयंवरार्णा अकारैकारहकारा इत्यर्थः । वर्गाणां पञ्चमा ङञणनमाः । शार्णः शकारः । एते वर्णा नवानां वर्गाणामाद्या इत्यर्थः ।

भूतलिपित्वं दर्शयति ।

व्योमेराग्निजलक्षोणीवर्गवर्णान् पृथग्विदुः ।
द्वितीयवर्गे भूर्न स्यान्नवमे सजलं धरा ॥

भूर्न स्यादिति । द्वितीयवर्णस्य वर्णचतुष्टयात्मकत्वादिति भावः । एवमग्रेऽपि बोध्यम् ।

तथा ।

विरिञ्चिविष्णुरुद्राश्विप्रजापतिदिगीश्वराः ।
क्रियादिशक्तिसहिता नवदुर्गेश्वराः स्मृताः ॥
ऋषिः स्याद्दक्षिणामूर्त्तिर्गायत्री छन्द ईरितम् ।
देवता कथिता सद्भिः साक्षाद्वर्णेश्वरी परा ॥
हादिषड्वर्णकैः कुर्यात् षडङ्गानि सजातिभिः ।

(मेरुतन्त्रे)

स्वरहोतैर्हयाद्यैश्च मन्त्रार्णैः पञ्चपञ्चभिः ।

अथ ध्यानं (शारदायाम्)

ध्यायेल्लिपितरोर्मूले देवीं तन्मयपङ्कजे ।
वदन्ति सुधियो वृक्षं नित्यं वर्णमयं शुभम् ॥
परसंविन्महाबीजं बिन्दुनादमहाशिफम् ।
पृथिव्यक्षरशाखाभिः सर्वाशासु विजृम्भितम् ॥
सलिलाक्षरपत्रैः स्वैः संछादितयुगत्रयम् ।
वह्निवर्णाङ्कुरैर्दीप्तं रत्नैरिव सुरद्रुमम् ॥
मरुद्वर्णलसत्पुष्पैर्द्योतयन्तं वपुःश्रियम् ।
आकाशार्णफलैर्नम्रं सर्वभूताश्रयं परम् ॥
परामृताख्यमधुभिः सिञ्चन्तं परमेश्वरीम् ।
वेदागमादिभिः कल्पसमुन्नतिमनोहरम् ॥
शिवशक्तिमयं साक्षाच्छायाश्रितजगत्त्रयम् ।
एतामाश्रित्य सुधियः सर्वान् कामान् प्रपेदिरे ॥
अङ्कोन्मुक्तशशाङ्ककोटिसदृशीमापीनतुङ्गस्तनीं
चन्द्रार्धान्वितमस्तकां मधुमदादालोलनेत्रत्रयाम् ।
बिभ्राणामनिशं वरं जपवटीं विद्यां कपालं करै-

राद्यां यौवनगर्वितां लिपितनुं वागीश्वरीमाश्रये ॥

अथ पुरश्चरणम् ।

लक्षं न्यसेज्जपेत् तावज्जुहुयादयुतं तिलैः ।
पूजयेदन्वहं देवीं पीठे प्रागीरिते सुधीः ॥

(मेरुतन्त्रेऽपि)

लक्षं प्रजप्यादयुतं तिलैर्हुत्वा च तर्पयेत् ।
एवं भूतलिपिः सेव्या यन्त्रसिद्धिः प्रजायते ॥
श्रीविद्याराधने वाऽपि समर्थो जायते नरः ।

इति भूतलिपिपुरश्चरणम् ।

अथ मातृकान्यासपुरश्चरणं (शारदायाम्)

दीक्षितः प्रोक्तमार्गेण न्यसेल्लक्षं समाहितः ।
जपेत् तत्संख्यया विद्वानयुतं मधुराप्लुतैः ॥
विदधीत तिलैर्होमं मातृकामन्वहं जपेत् ।

इति मातृकान्यासपुरश्चरणम् ।

अथ त्रिलोहीमुद्रा तत्रैव ।

सोमसूर्याग्निरूपाः स्युर्वर्णा लोहत्रयं तथा ।
रौप्यमिन्दुः स्मृतो हेम सूर्यस्ताम्रं हुताशनः ॥
लोहभागाः समुद्दिष्टाः स्वराद्यक्षरसंख्यया ।
तैर्लोहैः कारयेन्मुद्रामसङ्कलितसङ्गताम् ॥
साग्रं सहस्रं संजप्य स्पृष्ट्वा तां जुहुयात् ततः ।
तस्यां संपातयेन्मन्त्री सर्पिषा पूर्वसंख्यया ॥
निःक्षिप्य कुम्भे तां मुद्रामभिषेकोक्तवर्त्मना ।
आवाह्य पूजयेद्देवीमुपचारैः समाहितः ॥
अभिषिञ्च्य विनीताय दद्यात् तां मुद्रिकां गुरुः ।

इयं रक्षा क्षुद्ररोगविषज्वरविनाशिनी ॥
व्यालचौरमृगादिभ्यो रक्षां कुर्याद्विशेषतः ।
युद्धे विजयमाप्नोति धारयेन्मनुजेश्वरः ॥

सोमसूर्याग्निरूपा इति । अकारादयः स्वराः सोमरूपाः । कादयो मान्ताः स्पर्शवर्णाः सूर्यरूपाः । यकारादयो व्यापकवर्णा अग्निरूपा इत्यर्थः ।

तथेति । तथैव लोहत्रयमपि सोमसूर्याग्निरूपमित्यर्थः ।

एतदेव स्फुटयति रौप्यमित्यादिना । भागा अंशाः ।

स्वराद्यक्षरसंख्ययेति । रौप्यस्य षोडश । हेम्नः पञ्चविंशतिः । ताम्रस्य दशभागा इत्यर्थः ।

असङ्कलितसङ्गतामिति । असङ्कलितामेकरूपतामनापन्नाम् । सङ्गतां परस्परसम्बद्धाम् ।

संजप्येति । जपश्चात्र मातृकावर्णानामेव ।

तस्यां संपादयेदिति । स्वाहेति हुत्वा तस्यां मुद्रायां संपाताज्यं निःक्षिपेदित्यर्थः ।

अभिषिकोक्तवर्त्मनेति । काम्याभिषेकोक्तरीत्येत्यर्थः ।

काम्याभिषेकस्तु तत्रैव ।

पूर्वोक्तं पङ्कजं कृत्वा कुम्भं संस्थाप्य पूर्ववत् ।
क्वाथेन पूरयेन्मन्त्री यथावत् क्षीरशाखिनाम् ॥
अष्टगन्धं विलोड्यास्मिन् नवरत्नसमन्विते ।
आवाह्य पूजयेद्देवीं मातृकामुक्तमार्गतः ॥
सहस्रं साधितैस्तोयैरभिषिञ्चेत् प्रियं नरम् ।
भानुवारे शुभे लग्ने ब्राह्मणानपि भोजयेत् ॥
गुरवे दक्षिणां दद्याद्भक्तियुक्तः स्वशक्तितः ।
रक्षाकरं विशेषेण कृत्वा द्रोहोपशान्तिदम् ॥
ऐश्वर्यजननं पुंसां सर्वसौभाग्यसिद्धिदम् ।
अभिषेकमिमं प्राहुर्विश्वसंमोहनं परम्—इति ॥

देवीं मातृकासरस्वतीम् ।

अभिषिच्येति । अभिषेकस्तु विलोममातृकावर्णैः कार्यः ।

अभिषिञ्चेद्विलोमेन साध्यन्तं दत्तदक्षिणम् ।

इत्यभिषेकान्तरे तत्रैवोक्तत्वात् ।

अथ नवरत्नमुद्रा तत्रैव ।

विभजेन्मातृकां मन्त्री नववर्गान् यथाक्रमात् ।
अष्टावष्टौ स्वराः स्पर्शाः पञ्चशो व्यापका अपि ॥
नववर्गाः समुत्पन्नाः नवरत्नेश्वरग्रहाः ।
अर्केन्दुरक्तज्ञगुरुभृगुमन्दाहिकेतवः ॥
माणिक्यं मौक्तिकं चारु विद्रुमं गारुडं पुनः ।
पुष्परागं लसद्वज्रं नीलं गोमेदकं शुभम् ॥
वैदूर्यं नवरत्नानि मुद्रां तैः कल्पयेच्छुभाम् ।
जपहोमादिकं सर्वं कुर्यात् पूर्वोक्तवर्त्मना ॥
यो मुद्रां धारयेदेनां तस्य स्युर्वशगा ग्रहाः ।
वहते तस्य सौभाग्यं लक्ष्मीरप्यहता भवेत् ॥
कृत्या द्रोहा विनश्यन्ति नश्यन्ति सकलापदः ।
रक्षोभूतपिशाचाद्या नेक्षन्ते तं भयाकुलाः ॥
उपर्युपरि वर्धन्ते धनरत्नादिसम्पदः ।

इति नवरत्नमुद्रा ।

अथ षोढान्यासपुरश्चरणं तन्त्रान्तरे ।

देवीभावसमायुक्तः षोढान्यासपरो भवेत् ।
दशविद्याविधौ सा च दशधा भिन्नभिन्नतः ॥
प्रत्येकं षडृषिं तं तं तद्ध्यानं च समाचरेत् ।
ऋषिच्छन्दादिकं यत्र कीर्त्तितं परमेश्वरि ॥
तदेव तत्र गदितमनुक्ते मूलदेववत् ।
ध्यानं छन्दादिकं स्तोत्रं देवीवत् सर्वमेव तु ॥

अयुतं च पुरश्चर्या न्यासस्तत्क्रमयोगतः ।

इति षोढान्यासपुरश्चरणम् ।

अथ सहस्रनामस्तवकवचानां पुरश्चरणं तत्रैव ।

ईश्वर उवाच ।

सहस्रनामस्तोत्रेषु कवचेष्वपि पार्वति ।
कवचादौ तु या प्रोक्ता सा वै कार्या पुरस्क्रिया ॥
यत्रानुक्ता पुरश्चर्या तत्र किं वा विधीयते ।
अयुतं तु पुरश्चर्या स्तोत्रमात्रे प्रकीर्त्तिता ॥
सहस्रनामकवचे पुरश्चर्या त्वियं मता ।
एवं पुरस्क्रियां कृत्वा दशांशं हवनादिकम् ॥
तर्पणं मार्जनं देवि कुत्र चित् परिकीर्त्तितम् ।
महाकालमते प्रोक्तं तत्रस्थं चेत् समाचरेत् ॥
विप्रसंतोषणेनैव सर्वं सिद्ध्यति पार्वति ।
हवनं तु तथा कार्यं पुरश्चर्यादिकं भवेत् ॥
सहस्रनामरूपं वै कीदृशं परमेश्वरि ।
तथा च कवचं देवि किंरूपं परिकीर्त्तितम् ॥
शिवदेव्योस्तु संवादो ब्रह्मरन्ध्रं प्रकीर्त्तितम् ।
अन्ये श्लोकाः केशतुल्या ऋषिः शिर उदीरितम् ॥
छन्दो मुखं भवेद्देवि देवता हृदयं भवेत् ।
बीजं गुह्यमिति प्रोक्तं शक्तिं तु पदगां विदुः ॥
सर्वाङ्गं कीलकं देवि ह्यर्थवादः प्रकीर्त्तितः ।
स्तोत्रमध्ये स्थितं यद्यत् तत् सर्वं स्तोत्ररूपकम् ॥
एवं च देवदेवेशि स्तोत्ररूपं प्रकीर्त्तितम् ।
तथैव कवचं देवि ज्ञात्वा पाठं पठेत् प्रिये ॥

अङ्गहीने भवेन्नाशः सर्वथा परमेश्वरि ।
फलस्तुत्यादिकं देवि अङ्गमित्यभिधीयते ॥
आद्योपान्तं विना देवि फलमर्धं प्रकीर्त्तितम् ।
अत्रार्थे प्रत्ययो देवि षडङ्गाद्या यथा स्मृताः ॥
हवनं कवचादीनां श्लोकान्ते विहितं च वा ।
आद्योपान्तं पठित्वा तु पश्चात् तु हवनं मतम् ॥
आदौ पूर्णं तु संपठ्य तथैवान्ते महेश्वरि ।
मध्ये नामानि पाठ्यानि पुरश्चर्या प्रकीर्त्तिता ॥
श्लोकान्ते हवनं प्रोक्तं श्लोकान्ते मार्जनादिकम् ।
तत्र स्तोत्रोक्तविधिना पुरश्चर्यादिकं चरेत् ॥
स्तोत्रमावर्त्त्य संपूर्णं तदन्ते गणनां चरेत् ।
संपूर्णहोमयोगोऽयं कथितस्ते प्रियंवदे ॥
सारूप्यं कवचाख्यं च सायुज्यं स्तोत्रमीरितम् ।
सान्निध्यं नामसाहस्रं त्रितयं परिकीर्त्तितम् ॥
कवचं कवचरूपं स्यात् स्तोत्रं सहचरो भवेत् ।
सहस्रनामस्तोत्रं तु पूजास्थाने प्रकीर्त्तितम् ॥
पूजा दुर्गास्वरूपा स्याद्बलिदानं तु मारणम् ।
मन्त्रो राजा पुरश्चर्या राज्यसंपत्तिरीरिता ॥
संपत्त्या तु विना राजा न शोभति महेश्वरि ।
संपत्तिमूलमेतद्धि सर्वमेव प्रकीर्त्तितम् ॥
होमो मन्त्रः इति प्रोक्तः पर्जन्यास्त्वं तु तर्पणम् ।
जलं दुर्गस्वरूपं वै त्वभिषेकः प्रकीर्त्तितः ॥
ब्राह्मणानां भोजनं तु दुष्टसैन्यप्रभक्षणम् ।

देवतागुरुविद्यैक्यं स्वात्मैक्यं परिभाव्य च ॥
सर्वसिद्धीश्वरो भूत्वा त्रैलोक्याधिपतिर्भवेत् ।
यथा च राजराज्यादौ शत्रुसैन्यभयं भवेत् ॥
सिद्धिराज्ये महादेवि तथैव परिकीर्त्तितम् ।
दुर्गयन्त्रादिकं देवि देशराज्ये यथा मतम् ॥
तथैव सिद्धिराज्यस्य पुरश्चर्यादिकं मतम् ।
मन्त्रो राजा गुरुर्मन्त्री गणेशा द्वारपालकाः ॥
साधनं शवमुण्डस्य सिंहासनमितीरितम् ।
साधकेन तथा कार्यं येन सर्वं तु सिध्यति ॥
नैमित्तिकं च काम्यं च हयद्विरदकौ मतौ ।
होमधूपः पताका स्याज्जयस्तु सिद्धभूमिका ॥
सिद्धिराजाधिपे देवि किं न सिद्ध्यति भूतले ।
षोढान्यासादिकं सेना देवता राज्यदायिका ॥
यन्त्रं तु वज्रदुर्गं तु जीवचक्रं स्वभेदकम् ।
कवचादि पुरश्चर्या प्रोक्ता किं श्रोतुमिच्छसि ॥

इति स्तवकवचसहस्रनामपुरश्चरणम् ।

अनुक्तपुरश्चरणानां स्तवकवचादीनां पुरश्चरणमेतत् । उक्तपुरश्चरणानां तु तेषां कल्पोक्तमेव तत् कार्यम् ।

अथ कर्पूरस्तवपुरश्चरणं (वीरतन्त्रे)

देव्युवाच ।

कर्पूराख्यमिदं स्तोत्रं यदुक्तं भवता पुरा ।
षट्कर्मसाधनं तस्य प्रयोगं वद शङ्कर ॥

श्रीशिव उवाच ।

शृणु देवि प्रवक्ष्यामि कर्पूरस्तवसाधनम् ।

सकृत् कृतेऽपि देवेशि काली तुष्टा भवेत् सदा ॥
शनिभौमदिने देवि स्नात्वा प्रयतमानसः ।
संपूज्य कालिकां देवीं सङ्कल्पं सम्यगाचरेत् ॥
कृत्वा षोढादिकं देवि पठेत् स्तोत्रमनुत्तमम् ।
अयुतैकप्रमाणेन तद्दशांशं हुनेत् सुधीः ॥
तर्पणं चाभिषेकं च ब्राह्मणान् भोजयेत् ततः ।
पश्चात् स्वकार्यसिद्ध्यर्थं प्रयोगानाचरेत् तथा ॥
राज्ञो भये समुत्पन्ने दुर्भिक्षे शत्रुसंकटे ।
त्रासोत्पन्ने महेशानि रोगशोकभये तथा ॥
पठेत् स्तोत्रं महाकाल्याः सर्वशान्तिं प्रयच्छति ।
कुमारीपूजनं चान्ते कर्त्तव्यं सुसमाहितः ॥
एवं कृते महेशानि सम्यक् सिद्धिर्भवेद्ध्रुवम् ।

इति कर्पूरस्तवपुरश्चरणम् ।

अथ सप्तशतीस्तवविधानम् ।

(मुक्तावल्याम्)

सप्तशत्या विधानं तु शृणु वक्ष्यामि यत्नतः ।
यज्ज्ञात्वा साधकश्रेष्ठः सर्वसिद्धिमवाप्नुयात् ॥

(मेरुतन्त्रे)

सप्तशत्यास्तु सकलं तत्त्वं वेद्म्यहमेव हि ।
पादोनं श्रीहरिर्वेत्ति वेत्त्यर्धं तु प्रजापति ः ॥
व्यासस्तुर्यांशकं वेत्ति कोट्यंशमितरे जनाः ।

(वाराहीतन्त्रे)

ऋषिच्छन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः ।

ऋष्यादिन्यास उक्तो (मेरुतन्त्रे)

सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्मुनिः ।

छन्दो गायत्रमुदितं महाकाली तु देवता ॥
वाग्बीजं पावकस्तत्त्वं धर्मार्थे विनियोजनम् ।
मध्यमस्य चरित्रस्य मुनिर्विष्णुरुदाहृतः ॥
उष्णिक् छन्दो महालक्ष्मीर्देवता बीजमद्रिजा ।
वायुस्तत्त्वं धनप्राप्त्यै विनियोग उदाहृतः ॥
उत्तरस्य चरित्रस्य मुनिः शङ्कर उच्यते ।
महासरस्वती देवी त्रिष्टुप् छन्द उदाहृतम् ॥
कामो बीजं रविस्तत्त्वं कामाप्त्यै विनियोजनम् ।

तन्त्रान्तरे ।

नवार्णमन्त्रवर्णैस्तु षडङ्गन्यासमाचरेत् ।

देवतात्रयध्यानानि (दुर्गाप्रकरणे) प्रोक्तानि ।

अथ पाठक्रमो (वाराहीतन्त्रे)

आधारे स्थापयित्वा तु पुस्तकं वाचयेत् ततः ।
हस्तसंस्थापनाद्देवि भवेदर्धफलं यतः ॥
यावन्न पूर्यतेऽध्यायस्तावन्न विरमेत् पठन् ।
यदि प्रमादादध्याये विरामो भवति प्रिये ॥
पुनरध्यायमारभ्य पठेत् सर्वं मुहुर्मुहुः ।
अनुक्रमात् पठेद्देवि शिरःकम्पादिकं त्यजेत् ॥

(महाकालसंहितायाम्)

ब्राह्मणान् वरयित्वैवं वस्त्रालङ्करणासनैः ।
विदध्यात् कामनोल्लेखं पूजां शक्त्या च पुस्तके ॥
शनैः पठेत् पाठकोऽपि वर्णोच्चारणपूर्वकम् ।
सुव्यक्तं नापि विश्लिष्टं न शिरश्चारगीवत् ॥
तनुमान्दोलयन्नापि न हसन्न रुदन् व्रजन् ।

नाश्नन्नान्यैरालपँश्च न मध्ये छिन्नवत् तथा ॥
आचान्तः कृतशौचश्च पदोद्गमनीयवान् ।
एतेन विधिनाऽधीते तुष्यते जगदम्बिका ॥
यथोक्तफलदात्री च भवति प्राणवल्लभे ।

(वाराहीतन्त्रे)

प्रणवं चादितो दत्वा स्तोत्रं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥

तथा ।

स्वयं च लिखितं यच्च शूद्रेण लिखितं भवेत् ।
अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् ॥
स्तोत्रे न दृश्यते यत्र प्रणवं तत्र विन्यसेत् ।
सर्वत्र पाठे विज्ञेयस्त्वन्यथा विफलं भवेत् ॥

(देवीपुराणे)

वाचकं पूजयित्वा तु यथाविभवविस्तरैः ।
वाचयीत ततो राजन् देवीमाहात्म्यमुत्तमम् ॥
तदन्ते शान्तिशब्दस्तु जनस्य सनृपस्य च ।
अनेन विधिना राजन् यः पठेच्छृणुयादपि ॥
चिन्तयेद्वाचयेद्वाऽपि तस्य पुण्यफलं शृणु ।
वाजपेयसहस्रस्य अश्वमेधशतस्य च ॥
यत् फलं लभते तात तत् फलं शतधा भवेत्–इत्यादि ।

(मरीचिकल्पे)

रात्रिसूक्तं जपेदादौ मध्ये सप्तशतीस्तवम् ।
प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमः ॥
एवं संपुटितं स्तोत्रं सर्वकामार्थसिद्धये ।

अत्र रात्रिसूक्तं—च ।

त्वं स्वाहा त्वं स्वधा—इत्यादि प्रथमचरित्रस्थस्तुतिरूपं देवीसूक्तम् ।

नमो देव्यै—इत्यादि तृतीयचरित्रस्थस्तुतिरूपमिति नागोजिभट्टादयः ।

अन्ये तु सूक्तद्वयं वैदिकमेवेत्याहुः ।

(मेरुतन्त्रे)

मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठेत् ।
पुटितं मूलमन्त्रेण जपन्नाप्नोति वाञ्छितम् ॥

मूलमन्त्रस्तु दुर्गाप्रकरणोक्तो नवार्णः ।

अथ पुरश्चरणं (मरीचिकल्पे)

कृष्णाष्टमीं समारभ्य यावत् कृष्णचतुर्दशीम् ।
वृद्ध्यैकोत्तरया जाप्यं पूर्वसंपुटितं तु तत् ॥
एवं देवि मया प्रोक्तः पौरश्चरणिकः क्रमः ।
तदन्ते हवनं कुर्यात् प्रतिश्लोकेन पायसैः ॥
*रात्रिसूक्तं प्रति–ऋचं तथा †देव्यास्तु सूक्तकम् ।

प्रतिश्लोकेनेति । तस्य (कात्यायनीतन्त्रो–)क्तमन्त्रविभागेन । तदज्ञाने तु श्लोकेनैव होमः कार्यं इति साम्प्रदायिकाः ।

नवरात्रे प्रकारान्तरेण पुरश्चरमुक्तं तत्रैव ।

अथातः संप्रवक्ष्यामि नवरात्रविधानकम् ।
जपेदेकोत्तरां वृद्धिं दिनानि नवसंख्यया ॥
नवाक्षरीविधानेन संपूज्याथ विचक्षणः ।
सहस्रं प्रजपेन्मन्त्रं प्रत्येकं च यथाविधि ॥
हुत्वा दशांशतो होमं तत्र सिद्धिमवाप्नुयात् ।

इति पुरश्चरणम् ।

अथ प्रसङ्गाच्छतचण्डीविधिर्लिख्यते ।

तथा च (मेरुतन्त्रे)

शतचण्डीविधानं तु प्रवक्ष्ये प्रीतये नृणाम् ।

---

* रात्रिं प्रपद्य–इत्यादि रात्रिसूक्तम् । † अहं रुद्र–इत्यादि देवीसूक्तम् ।

नृपोपद्रवमापन्ने दुर्भिक्षे भूमिकम्पने ॥
अतिवृष्ट्यामनावृष्टौ परचक्रभये क्षये ।
सर्वे विघ्ना विनश्यन्ति शतचण्डीविधौ कृते ॥
रोगाणां वैरिणां नाशो धनपुत्रसमृद्धयः ।
शङ्करस्य भवान्या वा प्रसादनिकटे शुभम् ॥
मण्डपं द्वारवेद्याढ्यं कुर्यात् सध्वजतोरणम् ।
तत्र कुण्डं प्रकुर्वीत प्रतीच्यां मध्यतोऽपि वा ॥
स्नात्वा नित्यकृतिं कृत्वा योजयेद्दशवाडवान् ।
जितेन्द्रियान् सदाचारान् [*]कुलीनान् सत्यवादिनः ॥
व्युत्पन्नाँश्चण्डिकापाठे रतान् लज्जादयावतः ।
मधुपर्कविधानेन वस्त्रस्वर्णादिदानतः ॥
जपार्थमासनं मालां दद्यात् तेभ्योऽपि भोजनम् ।
ते हविष्यान्नमश्नन्तो मन्त्रार्थगतमानसाः ॥
भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवम् ।
मार्कण्डेयपुराणोक्तं दशकृत्वः सचेतसः ॥
नवार्णं चण्डिकामन्त्रं जपेयुश्चायुतं [†]क्वचित् ।

वाडवा विप्राः ।

अत्र च ।

पञ्चभिः सप्तभिर्वाऽपि नवैकादशभिस्तथा ।
अदीर्घदिवसे क्षिप्रं विदध्याच्चण्डिकामखम् ॥
अयुग्मब्राह्मणैः कार्यं शतावृत्तं सुसिद्धये ।
त्रिपञ्चसप्तनवभिर्दिनैः पक्षेण वा पुनः ॥
देवीमाहात्म्यपाठं तु युगैर्विप्रैः कृतं च यत् ।

---

[*] कृतज्ञान् इति २ पु० पा० ।

[†] पृथक् इति ४ पु० पा० ।

निष्फलं च भवेत् सर्वं भूतिनाशं च प्राप्नुयात् ॥

इति यद्वचनत्रयं क्रोडतन्त्रनाम्ना पठ्यते तत् तु निर्मूलम् । तन्त्रानुपलम्भादनेकतन्त्रविरोधाच्च ।

तथा ।

यजमानः पूजयेच्च कन्यानां दशकं शुभम् ।
द्विवर्षाद्या दशाब्दान्ताः कुमारीः परिपूजयेत् ॥

तथा ।

विप्रां सर्वेष्टसंसिद्ध्यै यशसे क्षत्रियोद्भवाम् ।
वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत् ॥

द्विवर्षादीनां प्रत्येकं नामानि ।

द्विवर्षा सा कुमार्युक्ता त्रिमूर्त्तिर्हायनत्रिका ।
चतुरब्दा तु कल्याणी पञ्चवर्षा तु रोहिणी ॥
षडब्दा कालिका प्रोक्ता चण्डिका सप्तहायना ।
अष्टवर्षा शाम्भवी स्याद्दुर्गा तु नवहायना ॥
शुभदा दशवर्षोक्ता ता मन्त्रैः परिपूजयेत् ।
एकाब्दायाः प्रीत्यभावो रुद्राब्दा तु विवर्जिता ॥
मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥
कुमारिकादिकन्यानां पूजामन्त्रान् ब्रुवेऽधुना ।
जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ॥
पूजां गृहाण कौमारि जगन्मात्रे नमोऽस्तु ते ।
त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम् ॥
त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहम् ।
कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ॥

कल्याणजननीं नित्यां कल्याणीं पूजयाम्यहम् ।
अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ॥
अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ।
कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम् ॥
कामदां करुणोदारां कालिकां पूजयाम्यहम् ।
चण्डवीजां चण्डमयीं चण्डमुण्डप्रभञ्जनीम् ॥
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ।
सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ॥
सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ।
दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ॥
पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीम् ।
सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ।
एतैर्मन्त्रैर्लक्षणाढ्यां तां तां कन्यां समर्चयेत् ॥
गन्धैः पुष्पैर्भक्ष्यभोज्यैर्वस्त्रैराभरणैरपि ।
वेद्यां विरचिते रम्ये सर्वतोभद्रमण्डले ॥
घटं संस्थाप्य विधिवत् तत्रावाह्यार्चयेच्छिवाम् ।
तदग्रे कन्यकाश्चापि भोजयेद्ब्राह्मणानपि ॥
उपचारैश्च विविधैः पूर्वोक्तावरणान्यपि ।
एवं चतुर्दिनं कृत्वा पञ्चहोमान् समाचरेत् ॥

एतेन प्रथमेऽह्नि प्रत्येकमेकैकावृत्तिः । द्वितीये द्वे द्वे । तृतीये तिस्रस्तिस्रः । चतुर्थे चतस्रश्चतस्र इत्युक्तं भवति ।

तदुक्तं (रुद्रयामले)

एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्टये ।

पञ्चमे दिवसे प्रातर्होमं कुर्याद्विधानतः—इति ॥

अथ ब्राह्मणहोमद्रव्याण्युक्तानि (मेरुतन्त्रे)

पायसान्नैस्तु मध्वक्कैर्द्राक्षारम्भाफलैरपि ।
मातुलुङ्गैरिक्षुखण्डैर्नारिकेलैः पुरैस्तिलैः ॥
जातीफलैराम्रफलै रम्यैर्मधुरवस्तुभिः ।
सप्तशत्या दशावृत्त्या प्रतिश्लोकं हुतं चरेत् ॥
अयुतं च नवार्णेन स्थापितेऽग्नौ विधानतः ।
होमविधौ यो विशेषः स चाग्रे वक्ष्यते मया ॥
कृत्वाऽऽवरणदेवानां होमं तन्नाममन्त्रतः ।
कृत्वा पूर्णाहुतिं सम्यग्देवमग्निं विसृज्य च ॥
अभिषिञ्चेच्च यष्टारं विप्रौघः कलशोदकैः ।

अभिषेकमन्त्रास्तु ।

विश्वेश्वरीं जगद्धात्रीम्—इत्यादि ।
देव्या यया ततमिदम्—इत्यादि ।
नमो देव्यै महादेव्यै—इत्यादि ।
देवि प्रपन्नार्त्तिहरे प्रसीद—इति चत्वारः श्लोकाः ।
निष्कं सुवर्णमथ वा प्रत्येकं दक्षिणां दिशेत् ।

(मारीचिकल्पे तु)

पञ्चस्वर्णाः शतावृत्ते पक्षावृत्ते तु तत्त्रयम् ।
पञ्चावृत्ते स्वर्णमेकं त्रिरावृत्ते तदर्धकम् ॥
एकावृत्ते पादमेकं दद्याद्वा शक्तितो बुधः—इत्युक्तम् ।

(कात्यायनीतन्त्रे)

एकैकं दशविप्रेभ्यो दद्याद्गोमिथुनं समम् ।
निष्कत्रयसमायुक्तं वस्त्रालङ्कारभूषितम् ॥

(मेरुतन्त्रे)

भोजयेच्च पृथग्विप्रान् भक्ष्यभोज्यैः पृथग्विधैः ।
तेभ्योऽपि दक्षिणां दत्वा गृह्णीयादाशिषस्तथा ॥
एवं कृते जगद्वश्यं सर्वे नश्यन्त्युपद्रवाः ।
राज्यं धनं यशः पुत्रानिष्टमन्नं लभेत च ॥

(कात्यायनीतन्त्रे)

यद्यत् कार्यं समुद्दिश्य क्रियते शतचण्डिका ।
तत् तत् तस्य महालक्ष्मीः सत्यमाशु प्रयच्छति ॥

अथ सहस्रचण्डीविधानमुक्तं (मेरौ)

एतद्दशगुणं कुर्याच्चण्डीसाहस्रजं विधिम् ।
विद्यावतः सदाचारान् ब्राह्मणान् वृणुयाच्छतम् ॥
प्रत्यहं चण्डिकापाठान् विदध्युस्ते दशामितान् ।
अयुतं प्रजपेयुस्ते प्रत्येकं नववर्णकम् ॥
पूर्वोक्ताः कन्यकाः पूज्याः पूर्वमन्त्रैः शतं शुभाः ।
एवं दशाहं संपाद्य होमं कुर्युः प्रयत्नतः ॥
सप्तशत्याः शतावृत्त्यां प्रतिश्लोकं विधानतः ।
लक्षसंख्यं नवार्णं च पूर्वोक्तैर्द्रव्यसंचयैः ॥
होतृभ्यो दक्षिणां दत्वा पूर्वोक्तान् भोजयेद्द्विजान् ।
सहस्रसंमितान् साधून् देव्याराधनतत्परान् ॥
एवं सहस्रसंख्याते कृते चण्डीविधौ नृणाम् ।
सिद्ध्यत्यभीप्सितं सर्वं दुःखौघश्च विनश्यति ॥
मारीदुर्भगरोगाद्या नश्यन्ति व्यसनोच्चयाः ।

(रुद्रयामले)

राज्यभ्रंशे महोत्पाते जनमारे महाभये

गजमारेऽश्वमारे च परचक्रभये तथा ॥
इत्यादिविविधे दुःखे क्षयरोगादिजे भये ।
सहस्रचण्डिकापाठं कुर्याद्वा कारयेत् तथा ॥

(मेरुतन्त्रे)

नेमं विधिं वदेद्दुष्टे खले चौरे गुरुद्रुहि ।
साधौ जितेन्द्रिये दान्ते वदेद्विधिमिमं परम् ॥
एवं सा चण्डिका तुष्टा वक्तॄन् श्रोतॄन् प्ररक्षति ।

अथ होमविधिः ।

चतुरस्रे समे कुण्डे समन्ताद्धस्तमात्रके ।
एकावरणसंयुक्ते योनिमण्डलमण्डिते ॥
दशांशविधिना होममुक्तहव्येन साधयेत् ।
नित्यचण्ड्यां नवचण्ड्यां कुण्डमेवंविधं स्मृतम् ॥
एतद्द्विगुणितं कुण्डं शतचण्ड्यां प्रकीर्त्तितम् ।
संस्कारैरष्टभिः कुण्डं संस्कृत्याग्निं निधापयेत् ॥
कुण्डमध्ये भुवं दर्भैः परिमार्ज्य प्रलेपयेत् ।
प्रागग्राः स्रुवमूलेन रेखास्तिस्रः समुल्लिखेत् ॥
पांशुमुद्धृत्य रेखाणामभ्युक्षणमतः परम् ।
कुण्डस्य पूजनं षष्ठः सप्तमः सप्तमुद्रया ॥
अस्त्रावगुण्ठितं कुण्डं संस्कारश्चाष्टमः स्मृतः ।
अष्टमङ्गलनामानं कुण्डेऽग्निं सन्निधापयेत् ॥

अत्र सर्वत्र मायाबीजमन्त्रः ।

चण्डिकापाठसंपूर्णे ब्रह्माणं दक्षिणे द्विजम् ।
ततस्तदग्निमत् कुण्डं नववस्त्रेण भूषयेत् ॥
कुण्डस्योत्तरतः स्थाप्या प्रणीता वारिपूरिता ।

प्रणीतापात्रतः सर्वे स्थाप्याः पात्रगणाः क्रमात् ॥
आज्यस्थाली चरुस्थाली गव्यक्षीरसमन्विता ।
स्रुक्स्रुवौ च घृतं गव्यं तण्डुलाः कुशमूलकाः ॥
पालाशाः समिधस्तिस्रः पूर्णपात्रमतः परम् ।
सप्तद्वीपेश्वरीं ध्यात्वा गृहीत्वा कुशमूलकम् ॥
निःक्षिपेत् प्रोक्षणीपात्रे वारुणं बीजमुच्चरेत् ।
तेन दर्भसमूहेन शतसंख्येन चेश्वरि ॥
क्रमात् पात्राणि संप्रोक्षन् प्रोक्षणीपात्रवारिणा ।
आज्यपात्रे चरुस्थाल्यां निःक्षिपेद्घृततण्डुलम् ॥
यथाक्रमेण कर्त्तव्यं ततोऽधिश्रयणं तयोः ।
आदौ वै पायसं कार्यं पर्यग्निकरणं तयोः ॥
सव्यं पालाशकाष्ठेन त्रिभिर्दर्भैश्च सोज्ज्वलम् ।
स्रुवयोः स्थापनं कृत्वा दक्षिणे स्थापनं कृतम् ॥
उद्वास्य प्रथमं पूर्वादानीयाग्नेः प्रदक्षिणम् ।
कुण्डाचार्यान्तरे स्थाप्यं स्वबीजजपगौरवात् ॥

स्वबीजं त्वमृतबीजम् ।

अभिघार्य स्वबीजेन वायव्ये स्थापयेच्चरून् ।
तिष्ठन् पालाशसमिधो मौनी वैश्वानरे क्षिपेत् ॥
कुशमूलकयुक्ताभिः प्रोक्षिण्यद्भिः प्रदक्षिणम् ।
पर्युक्ष्याग्निं प्रणीतायां निःक्षिपेत् कुशमूलकम् ॥
निधाय दक्षिणं जानु भूमावग्निमुखं हुनेत् ।
अन्वारब्धस्रुवेणाज्यं निर्धूमे हव्यवाहने ॥
प्रजापतिं महाकालीं महालक्ष्मीं सरस्वतीम् ।

५८

एतदग्निमुखं प्रोक्तं मायाबीजपुरस्सरम् ॥
संस्रवान् प्रोक्षणीपात्रे निःक्षिपेद्यज्ञसाधनान् ।
विदध्यात् कल्पितं होममुक्तेन हविषा शमी ॥

कल्पितं सङ्कल्पितमित्यर्थः ।

ततः स्विष्टकृतं दद्याद्धविषा स्वोज्ज्वलेऽनले ।

मायाबीजं ब्रह्माणीमाहेश्वरीकौमारीवैष्णवीनारसिंही–ऐन्द्री–चामुण्डायै विच्चे विष्टेते स्वाहा ।

एष प्रोक्तो महादेवीमन्त्रः स्विष्टकृदाहुतौ ।
आज्येन नवाहुतिकं मायाबीजादिनामभिः ॥

नन्दारक्तदन्तिकाशाकम्भरीदुर्गाभीमाभ्रामरीकालीशिवदूती–चामुण्डायै प्रजापतिभ्यः ।

गन्धपुष्पफलोपेतां कृत्वा यज्ञात्मिकां स्रुचम् ।
ततः पूर्णाहुतिं दद्याद्घृतेनाच्छिन्नधारया ॥
नवाक्षरेण मन्त्रेण महालक्ष्मीपरायणः ।
ध्यात्वा यज्ञपुरोडाशममृतं देवदुर्लभम् ॥
प्रोक्षणीपात्रमध्यस्थान्मन्त्रेणाश्नाति संस्रवात् ।

यस्मात् प्राशस्तं संस्रवपुरोडाशं प्राश्नामि सुखपुण्यदम्–इति मन्त्रः ।

सलिलेन प्रणीतायास्तीर्थध्यानपरायणः ।
करोति मार्जनं दर्भैः शतेन श्लोकपाठतः ॥
याः शिवाः शक्तयो याश्च ताभिश्च सविता सह ।
याश्च याः सन्निधानस्थास्तास्ते कृण्वन्तु भेषजम्–इति ॥
संस्रक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापतेः ।
मातरः सर्वभूतानामापो देव्यः पुनन्तु माम् ॥

अलक्ष्मीं मलरूपां याः सर्वभूतेषु संस्थिताम् ।
क्षालयन्ति जलस्पर्शादापो देव्यः पुनन्तु माम्-इति मन्त्रः ॥
अभिषिञ्चेद्यथात्मानं चतुर्भिश्चण्डिकास्तवैः ।
शूलेन पाहि नो देवीत्यादिश्लोकचतुष्टयम् ॥

ऋत्विक्कर्तृकयजमानाभिषेके तु पूर्वोक्तश्लोकचतुष्टयमेव ।

दानं दद्याद्विधानेन हेमधेन्वम्बरादिकम् ।
सजपं होममावेद्य महालक्ष्मीं प्रणम्य च ॥
शूलेन पाहि नो देवीत्येतैः श्लोकैः प्रदक्षिणम् ।
विदध्यात् सुस्थिरो भूत्वा चण्डिकाध्यानतत्परः ॥

इत्येतैः-शूलेन-इत्यादिभिः तैरस्मान्रक्ष सर्वतः-इत्यन्तैरित्यर्थः ।

नमो देव्या इति श्लोकैः पञ्चभिर्ध्यानतत्परः ।
कृत्वा पञ्चनमस्कारानुपविश्यासने शुभे ॥
सर्वस्वरूपे इत्यादिषड्भिः श्लोकैः कृताञ्जलिः ।
प्रार्थयेज्जगतां धात्रीं प्रणतः सन् हृदीप्सितम् ॥
स्वशरीरे समारोप्य दद्यादस्यै विसर्जनम्-इति ।
अनेन विधिना यस्तु प्रकुर्याच्चण्डिकार्चनम् ॥
तस्य तुष्टा महालक्ष्मीः सर्वान् कामान् प्रयच्छति ।

इति होमविधिः ।
(प्रयोगसारे)

चण्डीपाठफलं राजन् शृणुष्व गदतो मम ।
एकावृत्त्यादिपाठानां प्रत्यहं पठतां नृणाम् ॥
सङ्कल्पपूर्वं सम्पूज्य न्यस्याङ्गेषु मनून् सकृत् ।
पश्चाद्बलिप्रदानेन फलमाप्नोति मानवः ॥
उपसर्गोपशान्त्यर्थं त्रिरावृत्तं पठेन्नरः ।

ग्रहदोषोपशान्त्यर्थं पञ्चावृत्तं वरानने ॥
महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत् ।
नवावृत्त्या भवेच्छान्तिर्मुच्येत् प्राणार्त्तिजाद्भयात् ॥
राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ।
अर्कावृत्त्या काम्यसिद्धिर्वैरिनाशश्च जायते ॥
मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्रीवश्यतामियात् ।
सौख्यं पञ्चदशावृत्त्या श्रियं प्राप्नोति मानवः ॥
कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ।
राजभीतिविनाशाय वैरस्योच्चाटनाय च ॥
कुर्यात् सप्तदशावृत्तं तथाऽष्टादशकं प्रिये ।
महार्णवविमोक्षाय विंशावृत्तं पठेन्नरः ॥
पञ्चविंशावर्त्तनाच्च भवेद्बन्धविमोक्षणम् ।
सङ्कटे समनुप्राप्ते दुश्चिकित्सामये तदा ॥
जातिध्वंसे कुलच्छेदे आयुषो नाश आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥
तथैव त्रिविधोत्पाते तथा चैवातिपातके ।
कुर्याद्यत्नाच्छतावृत्तं ततः सम्पद्यते शुभम् ॥
विपदस्तस्य नश्यन्ति अन्ते याति परां गतिम् ।
श्रियो वृद्धिः शतावृत्त्या राज्यवृद्धिस्तथा परा ॥
मनसा चिन्तितं देवि सिद्ध्येदष्टोत्तराच्छतात् ।
शताश्वमेधयज्ञानां फलं प्राप्नोति सुव्रते ॥
सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ।
भुक्त्वा मनोगतान् कामान् नरो मोक्षमवाप्नुयात् ॥

यथाऽश्वमेधः क्रतुषु देवानां च यथा हरिः ।
स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ॥
नातः परतरं स्तोत्रं किञ्चिदस्ति वरानने ।
भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ॥
अथ वा बहुनोक्तेन किमेतेन वरानने ।
चण्डिकायाः शतावृत्त्या सर्वाः सिद्ध्यन्ति सिद्धयः ॥

(मेरुतन्त्रे)

कलौ न चण्डीसदृशी सिद्धदा भुवनत्रये ।
वामदक्षिणमार्गाभ्यामधिकारिफलप्रदा ॥
तत्रादिमं चरित्रं तु रोगनाशाय योजयेत् ।
उपसर्गविनाशाय मध्यमं योजयेद्बुधः ॥
अन्त्यं विषमकामस्तु चरित्रं परिशीलयेत् ।
चरित्रद्वयशीलस्य न वंशश्छिद्यते क्व चित् ॥
पठेदाद्यन्तचरितं विपत्तिस्तस्य नश्यति ।
अनाद्यं पठते यस्तु मारयेदचिराद्रिपून् ॥
स्वार्थानुसारपद्यं च सप्तशत्यास्तु योजयेत् ।
यस्तन्मन्त्रेण पुटितं तत्प्रस्ताराङ्कसंख्या ॥
पठेच्चण्डीं तथाऽऽद्यन्ते स कामस्तस्य सिद्ध्यति ।
स्वशत्रून् दैत्यभावेन स्वमित्रान् देवताधिया ॥
भावयन् योजयेच्चण्डीं त्रिसन्ध्यं मासमात्रकम् ।
मृता वा मृतकल्पा वा शत्रवः स्युर्न संशयः ॥
सितपक्षतिमारभ्य चाष्टम्यन्तमिषस्य यः ।
जपेल्लक्षं मनुं होमं खाद्यैस्त्रिमधुराप्लुतैः ॥

प्रत्यहं पूजयेद्देवीं चण्डीमाद्यन्तयोः पठेत् ।
विप्रान् गुरुं समाराध्य वाञ्छितं लभते द्रुतम् ॥

अथ (कात्यायनीतन्त्रो-)क्ताः कति चित् प्रयोगा लिख्यन्ते ।

प्रतिमन्त्रमाद्यन्तयोः **प्रणवं**—जपेन्मन्त्रसिद्धिः ।

सप्रणवव्याहृतित्रयमादावन्ते तु विलोमं तदित्येवं प्रतिश्लोकं कृत्वा शतावृत्तपाठेऽतिशीघ्रं सिद्धिः ।

प्रतिश्लोकमादौ **जातवेदसे** इति ऋचं पठेत् सर्वकामसिद्धिः ।

अपमृत्युवारणायादावन्ते च शतं **त्र्यम्बकं** जपेत् ।

प्रतिश्लोकं **शरणागतदीनार्त्त**—इति श्लोकं पठेत् सर्वकार्यसिद्धिः ।

प्रतिश्लोकं **करोतु सा नः शुभ**—इत्यर्धं पठेत् सर्वकामाप्तिः ।

स्वाभीष्टवरप्राप्त्यै **एवं देव्या वरं लब्ध्वा**—इति श्लोकं पठेत् ।

सर्वापन्निवारणाय प्रतिश्लोकं—**दुर्गे स्मृता**—इति पठेत् ।

अस्य केवलस्यापि श्लोकस्यापि कामानुसारेण लक्षमयुतं सहस्रं शतं वा जपः ।

सर्वबाधा—इत्यस्य लक्षजपे श्लोकोक्तं फलम् ।

इत्थं यदा यदा—इति श्लोकस्य लक्षजपे महामारीशान्तिः ।

ततो वव्रे नृपो राज्य—इति मन्त्रस्य लक्षजपे पुनः स्वराज्यलाभः ।

हिनस्ति दैत्यतेजांसि—इत्यनेन सदीपबलिदाने घण्टाबन्धने च बालग्रहशान्तिः ।

आद्यावृत्तिमनुलोमेन पठित्वा ततो विपरीतक्रमेण पुनरनुलोमेन त्रामावृत्तित्रय उक्तप्रकारेषु शीघ्रं सिद्धिर्भवति ।

सर्वापन्निवारणाय—**दुर्गे स्मृता**—इत्यर्धम् ।

ततो यदन्तिके यच्च दूरके—इत्यृचं तदन्ते—**दारिद्र्यदुःख**—इत्यर्धमेव कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः ।

मारणार्थम् **एवमुक्त्वा समुत्पन्ना**—इति प्रतिश्लोकं पठेत् । मारणोक्तावृत्तिभिः फलसिद्धिः ।

ज्ञानिनामपि चेतांसि–इति श्लोकत्रयमात्रेण सद्यो मोहनमित्यनुभवसिद्धम् ।

प्रतिमन्त्रं तच्छ्लोकपाठे त्ववश्यम् ।

रोगानशेषा–इति श्लोकस्य प्रतिश्लोकपाठे सकलरोगनाशः तन्मात्रजपेऽपि समं फलम् ।

इत्युक्त्वा सा तदा देवी गम्भीरा–इति श्लोकस्य प्रतिश्लोकपाठे यथा जपे वा विद्याप्राप्तिः वाग्वैकृतेर्नाशश्च ।

भगवत्या कृतं सर्वम्–इत्यादिद्वादशोत्तरशताक्षरो मन्त्रः सर्वकामदः सर्वापन्निवारणश्च ।

देवि प्रपन्नार्त्तिहरे–इति श्लोकस्य यथाकार्यं लक्षायुतसहस्रशतान्यमे जपे प्रतिश्लोकपाठे वा सर्वापन्निवृत्तिः सर्वकामाप्तिश्च ।

एषु प्रयोगेषु प्रतिश्लोकं दीपाग्रे केवलमेव वा नमस्कारकरणेऽतिशीघ्रं सिद्धिः । अत्र सर्वत्र प्रयोगे त्रयोदशपात्रेषु एकस्मिन्नेव पात्रे वा त्रयोदशदीपाः प्रदेयाः ।

प्रतिश्लोकं **कामबीज**–संपुटितस्यैकचत्वारिंशद्दिनं त्रिरावृत्तौ सर्वकामसिद्धिः ।

एकविंशतिदिनपर्यन्तमुक्तरीत्या प्रत्यहं दशावृत्तौ वशीकरणम् ।

मायाबीज–पुटितस्य **फट्पल्लव**–सहितस्य सप्तदिनपर्यंतं त्रयोदशावृत्तपठने उच्चाटनसिद्धिः ।

तादृशस्यैव दिनचतुष्टयमेकादशावृत्तौ सर्वोपद्रवनाशः ।

एकोनपञ्चाशद्दिनपर्यन्तं प्रतिश्लोकं **श्रीबीज**–संपुटितस्य पञ्चदशावृत्तौ लक्ष्मीप्राप्तिः ।

प्रतिश्लोकं **वाग्भवबीज**–संपुटितस्य शतावृत्त्या विद्याप्राप्तिः ।

अथ परार्थे प्रयोगे–

ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तन्ववर्धयस्व सत्याः सन्तु यजमानस्य कामाः ।

इति वैदिकमन्त्रं प्रत्यध्यायं प्रत्यावृत्ति वा पठेत् ।

नवार्णमन्त्रपुटितप्रयोगस्तु कमानामात्रे कर्त्तव्यः ।

तदुक्तं (वाराहीतन्त्रादौ)

शतमादौ शतं चान्ते जपेन्मन्त्रं नवाक्षरम् ।

चण्डीसप्तशतीमध्ये संपुटोऽयमुदाहृतः ॥
सकामैः संपुटो जाप्यो निष्कामैः संपुटं विना ।
सर्वकामप्रसिद्ध्यर्थं नवार्णपुटितं जपेत्—इति ॥

अत्र नवार्णमन्त्रौ प्रसिद्धौ । तत्रैको दुर्गाप्रकरणे उक्तः ।

अन्यस्तु (वाराहीतन्त्रे)

वेदादिर्वाग्भवं चैव माया कामस्तथैव च ।
पृथ्वी रेफो वामनेत्रं नादबिन्दुविभूषितम् ॥
माया कामो नमः पश्चान्मूलमन्त्र उदाहृतः ।

अस्य पुरश्चरणमपि तत्रैवोक्तम् ।

लक्षं जपेन्मूलमन्त्रं सर्वकामार्थसिद्धये—इति ।

(कात्यायनीतन्त्रे)

स्थितिक्रमो भुक्तिकामे मुक्तिकामे च संहृतिः ।
श्रीकामे पुष्टिकामे च सृष्टिक्रम उदाहृतः ॥

सृष्टिक्रमादयश्च तत्रैवोक्ताः ।

आदिमारभ्य प्रजपेत् सृष्टिक्रम इहोच्यते ।
जपेच्छक्रादिमारभ्य शुम्भदैत्यबधावधि ॥
आद्याच्छक्रादिपर्यन्तं स्थितिक्रम उदाहृतः ।
शेषमारभ्य आद्यन्तं संहारोऽयं क्रमो भवेत् ॥

(मेरुतन्त्रे) चरित्रत्रयप्रयोगसंख्यां यथाक्रममुक्त्वा—

एवं सप्तशतं चात्र प्रयोगाः परिकीर्त्तिताः ।
तस्मात् सप्तशतीत्येतत् प्रोक्तं व्यासेन धीमता ॥

(कात्यायनीतन्त्रे) तु सप्तशतहोममन्त्रा एवास्य सप्तशतीत्वव्यवहारप्रयोजका इत्युक्तम् ।

ते च मन्त्रास्तत्रैव ।

मार्कण्डेय—ऋषिप्रोक्तप्रथमश्लोकतः प्रिये ।
व्योमादिवर्णसम्भूतो द्वितीयस्वरसंयुतः ॥

व्योम हकारस्तस्यादिः सकारः । द्वितीयस्वर आकारः । तेन सा इति ।

तथा ।

नृपान्तं प्रवदेन्मन्त्राः सर्वे चाष्टादश प्रिये ।
वैश्योवाच *ततः श्लोका व्योमाद्याः पञ्च मन्त्रकाः ॥

व्योमाद्य आद्यो येषामिति मृगनयनावत् समासः ।

नृपस्योक्तिर्मान्तवर्णो द्वादशस्वरसंयुतः ।

मान्तवर्णो यकारः । स च द्वादशस्वरेण ऐकारेण युक्तः ।

सकारो विन्दुसंयुक्तश्चान्ते स मनुरीदृशः ।
वैश्योवाच पुनर्देवि स्वरैकादश आदितः ॥

स्वरैकादश एकारः ।

वह्निबीजं विन्दुयुक्तमन्ते स्यान्मनुपञ्चकम् ।

वह्निबीजं रमिति ।

मार्कण्डेय-ऋषिप्रोक्तं मन्त्रत्रयमुदाहृतम् ।
तादिवर्णं च भुवनस्वरयुग्वाहनं परम् ॥

भुवनस्वर औ । तद्युक्तं वाहनं वौ इति ।

राजोवाचेति षण्मन्त्रा भादितान्ताः शुभानने ।
अथोवाच ऋषिर्ज्ञानमस्तीत्यादि सुरेश्वरि ॥
सर्वेश्वरेश्वरी चान्ते मन्त्रा वै द्वादश स्फुटाः ।
राजोवाचेति भगवन्नादिरन्ते विदां वरम् ॥
मन्त्रत्रयमिदं ख्यातं तत ऋषिरुवाच ह ।
नित्यैव सा पदं चादौ प्रभुरन्तेऽष्टमन्त्रकाः ॥
ब्रह्मोवाच ततश्च त्वं स्वाहादिश्च महासुरौ ।
अन्ते पञ्चदशैते स्युर्मन्त्राः स्युः परमेश्वरि ॥
एवं स्तुतादि-ऋष्युक्तिवान्तमन्त्राश्च सप्त वै ।

---

* वैश्य उवाचेत्यत्र वैश्योवाचेति पाठस्तान्त्रिकः ।

ततो भगवदुक्तिश्च भवेतादिमनुद्वयम् ॥
वञ्चितेति च ऋष्युक्तिर्मन्त्रौ द्वौ परमेश्वरि ।
ऋष्युक्तिश्च तथेत्यादि मन्त्रद्वयमुदाहृतम् ॥
सर्वे श्लोकास्त्विहाध्याये अष्टयुक् सप्ततिः क्रमात् ।
मध्ये चतुर्विंशतिका अर्धमन्त्राः प्रकीर्त्तिताः ॥
सर्वाश्चाहुतयो ज्ञेयाश्चतुरुत्तरकं शतम् ।
उवाचान्तास्तत्र बोध्याः मन्त्रा भुवनसंख्यकाः ॥

इति प्रथमचरित्रमन्त्रनिर्णयः ।

ईश्वर उवाच ।

द्वितीये ऋषिरुवाचेति नवषष्ठ्याहुतिः क्रमात् ।
ततस्तृतीयेऽध्याये तु ऋषिरुवाचेति देशिकैः ॥
षट्त्रिंशच्च तथा मन्त्राः श्लोका ज्ञेया वरानने ।
देव्युवाचेति मन्त्रान्ते मन्त्रः श्लोको मतः प्रिये ॥
ऋषेरुक्तिः पुनः श्लोकाः पञ्च मन्त्राः सनातनाः ।
एवमाहुतयस्तत्र चत्वारिंशच्चतुर्युतम् ॥
चतुर्थे क्रमतो देवि ऋष्युक्तिः षट् च विंशतिः ।
पुनस्तथैव ऋष्युक्तिः श्लोकौ द्वौ मन्त्ररूपिणौ ॥
एवं स्तुतेति मन्त्रोऽयमतिगुह्यः शुभानने ।
देव्युवाचेति व्रियतां मन्त्रोऽयं षोडशाक्षरः ॥
देवा ऊचुस्ततश्चोक्त्वा भगवत्या कृतं वदेत् ।
मन्त्रोऽयं शतवर्णाढ्यो द्वादशोत्तरयुक् पुनः ॥
ततो-ऋषिरुवाचेति इति प्रसादितेति च ।
चतुःसंख्यास्तु ते श्लोका मन्त्रास्तावन्त एव हि ॥

श्लोकाश्चतुर्थेऽध्याये तु षट्त्रिंशत् परमेश्वरि ।
अर्धमन्त्रद्वयेनैव चत्वारिंशद्द्वियुक् पुनः ॥
एवं मध्यचरित्रस्य पञ्चाशच्च शतोत्तरम् ।
तथा पञ्चशतं मन्त्रा महालक्ष्म्या विभेदतः ॥

इति मध्यमचरित्रमन्त्रनिर्णयः ।

ऋषिरुवाच त्रिपुरा विष्णुमायां प्रतुष्टुवुः ।
षण्मन्त्राः श्लोकरूपास्ते देवा ऊचुस्ततः परम् ॥
नमो देव्यादितः श्लोकास्त्रिंशद्विनम्रमर्त्तिभिः ।
विष्णुमायादितो भ्रान्तिरूपान्ते त्रीणि षष्टियुक् ॥
अवतारपृथङ्मन्त्रास्तेषां त्रिषष्टिराहुतीः ।
चितिरूपेण मन्त्रेण आहुतित्रयमाचरेत् ॥
एवं मन्त्रा अशीतिस्ते ऋषिरुवाच इत्यथ ।
एवं स्तवादियुक्तानां त्वया कस्मान्न गृह्यते ॥
मन्त्राः सप्तदशैते तु ऋष्युक्तिर्निशम्येति वै ।
इत्यादित्रितयैर्मन्त्रैः शुद्धभेदाः प्रकीर्त्तिताः ॥
अथ दूत उवाचेति देवि दैत्येश्वरः परम् ।
इत्यादिनवमन्त्राश्च पुना ऋषिरुवाच ह ॥
इत्युक्तेत्यादिमन्त्रेण एकेन च सरस्वती ।
देव्युवाचेति श्लोकास्तु चत्वारो मन्त्रभेदतः ॥
दूत उवाचेति पुनरवलिप्ताऽसि इत्यथ ।
मन्त्राश्चत्वारो विज्ञेया देव्युवाच ततः परम् ॥
एवमेतद्बली शुम्भो-स च युक्तं करोतु यत् ।
इति मन्त्रद्वयं श्लोका अर्धमन्त्राश्च ते नव ॥

एकोनत्रिंशच्च शतादधिका मन्त्ररूपकाः ।

इति पञ्चमोऽध्यायः ।

ऋषिरुवाचेत्याकर्णेति श्लोकाश्चत्वार ईरिताः ।
पुना ऋषिरुवाचेति तेनाज्ञप्तस्ततः परम् ॥
मन्त्रत्रयमिदं प्रोक्तं देव्युवाचेति वै तथा ।
दैत्येश्वरेण प्रहितो—एको मन्त्रः प्रकीर्त्तितः ॥
ततश्च ऋषिरुवाच इत्युक्तः सोऽभ्यधावत ।
इत्यादिद्वादशश्लोकाः षष्ठेऽध्याये प्रकीर्त्तिताः ॥
चतुर्विंशतिभेदास्ता देवताहुतयः क्रमात् ।

इति षष्ठोऽध्यायः ।

ऋष्युक्तिराज्ञ—इत्यादित्रयोविंशतिमातरः ।
ऋषिरुवाच तावानीतौ मातृभेदद्वयं क्रमात् ॥
सप्तविंशत्यत्र देवि भवन्त्याहुतयः क्रमात् ।
अत्राध्यायद्वये देवि धूम्राक्षी तु प्रकीर्त्तिता ॥

इति सप्तमोऽध्यायः ।

ऋषिश्चण्डे च निहते इत्याध्यायावसानकम् ।
त्रिषष्ट्याहुतयः प्रोक्ता एका स्वर्धाहुतिर्मता ॥
रक्ताक्षी देवता अष्टौ महाशक्त्यः प्रकीर्त्तिताः ।

इत्यष्टमोऽध्यायः ।

राजा विचित्रमित्यादि श्लोकद्वयमुदाहृतम् ।
ऋषिश्चकार कोपं हि इत्यादिश्लोकरूपतः ॥
एकचत्वारिंशदिह आहुतिर्नवमे शुभे ।
देवता भैरवी तावच्छृणु गोप्यं वरानने ॥

इति नवमोऽध्यायः ।

ऋषिर्निशुम्भनिहतमित्यादिद्वयमन्त्रकम् ।
ततो देवीति मन्त्रौ द्वौ एकैवाहं मनूत्तमौ ॥
पुनर्देव्येकमन्त्रेण व्यक्तमन्त्रा उदीरिताः ।
ऋषिस्ततः प्रववृते सार्धद्वाविंशतिस्स्वयम् ॥
द्वात्रिंशन्मनवस्तत्र एको ह्यर्धमनुर्मतः ।
प्रथमं सिंहमासीना शूलपाशविधारिणी ॥
मुख्या चतुर्भुजा बाणचापहस्ता शुभेक्षणा ।

इति दशमोऽध्यायः ।

ऋषिः सुमेधा विख्यातः प्रोक्तो देव्या हते शुभे ।
चतुस्त्रिंशत् तथा श्लोका मन्त्रास्तत्संख्यकाश्च ते ॥
ततो देव्येकमन्त्रेण वरदाऽहं सुरेश्वरि ।
देवा ऊचुस्तथा सर्वबाधाप्रशमनं तथा ॥
श्लोकेनैकेन देवेशि देव्युवाच ततः परम् ।
वैवस्वतेऽन्तरे प्राप्तेत्यादिश्लोकाश्चतुर्दश ॥
सार्धसर्वाहुतिर्देवि पञ्चाशत् पञ्चसंयुताः ।
वैष्णवी देवता ह्यत्र महागरुडवाहिनी ॥

इत्येकादशोऽध्यायः ।

देव्युवाचेति च तत एभिः स्तवैश्च मां सदा ।
दूरेत्यर्धेन सहिता अष्टाविंशतिरूपकाः ॥
ततश्च ऋषिरुवाच इत्युक्त्वा श्लोकमादितः ।
*ऊर्धयुग्दशभिः श्लोकैर्मन्त्रास्तत्संख्यका मताः ॥
एवं तु द्वादशाध्याये एकचत्वारिंशदाहुतीः ।

इति द्वादशोऽध्यायः ।

---

* अर्धयुग्नवभिः इति २, ५ पु० पा० ।

ततस्त्रयोदशेऽध्याये ऋषिरुवाच इत्यथ ।
एतत् ते कथितं भूपेत्यादिसार्धत्रयं मनुः ॥

मनुचतुष्टयमित्यर्थः ।

मार्कण्डेय उवाचेति ततो वक्त्रे मनुद्वयम् ।
देव्युवाच पुनश्चैव स्वल्पश्लोकत्रयेण वै ॥
अर्धानामेव मन्त्रत्वाद्भवत्यत्र षडाहुतिः ।

षट्संख्याहुतिरित्यर्थः ।

ततो मार्कण्डेय उवाचेति दत्वा तयोरिति ।
द्वौ मन्त्रौ पुनरुच्चार्य सावर्णिर्भविता मनुः ॥
एकोनत्रिंशत्संख्याकाऽऽहुतिरत्र विधीयते ।
एवं त्रयोदशाध्याये होमे तर्पणकर्मणि ॥
शतानि सप्तसंख्यानि तव प्रोक्तानि शैलजे ।
सकारादिनकारान्तो मनुः परमदुर्लभः ॥
स संप्रदायविधिना ज्ञातव्यो मम वल्लभे ।
अन्यथा विफलो मन्त्रः सत्यं सत्यं मयोदितः ॥

विधिनेति । अष्टम्यां वा चतुर्दश्यामिति कीलकेनेत्यर्थः । तत्र होमे स्वाहान्ता एते मन्त्राः पूजायां नमोऽन्ताः । तर्पणे तर्पयाम्यन्ताः ।

केचित् तन्मन्त्रं पठित्वा तत्तदध्यायदेवतायै स्वाहा—इत्येवम् ।

तत्तदध्यायहोमे तत्तदध्यायदेवतां तर्पयामि—इति तर्पणे ।

तत्तदध्यायदेवतायै नमः—इति पूजने इत्याहुः ।

एवं होमाशक्तौ ।

जयन्ती—मन्त्रेण नमो देव्या इति मन्त्रेण सर्वमङ्गल—इति मन्त्रेण वा होमपूजातर्पणानि ।

जुहुयात् स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः—इत्यपि (रहस्ये) ।
आदौ तु कवचं कृत्वा पश्चात् सप्तशतीं जयेत्—इत्यादिवचनात् ।

कवचपाठे क्रियमाणे तच्छ्लोकैराहुतयो न देयाः ।

अन्धकश्च पुरा दैत्यो दुर्गाहोमपरायणः ।
कवचाहुतिमन्त्रेण महेशेन निपातितः–इति तन्त्रान्तरवचनात् ।
कवचं चात्र शूलेन पाहि नो देवि–इत्यादिश्लोकचतुष्टयरूपमिति केचित् ।

तत्र (कात्यायनीतन्त्र–) विरुद्धे (कात्यायनीतन्त्रो–)क्तमन्त्रविभाग एवाभियुक्तैः स्पष्टीकृत्याभिदर्शितः ।

तथा हि ।

अष्टसप्तत्युत्तरं तु श्लोकानां शतपञ्चकम् ।
प्रोक्तं सप्तशतीस्तोत्रे तत्सप्तशतसंख्यया ॥
विभज्य जुहुयान्मन्त्रमिति कात्यायनीमतम् ।
मार्कण्डेय उवाचैकः सावर्ण्याद्यास्ततः परम् ॥
श्लोकमन्त्राः सप्तदश अर्धश्लोकात्मकस्ततः ।
एकोनविंशदेवं स्युर्वैश्योक्तिर्विंशतिस्तथा ॥
पुनरर्धं पुनः श्लोकं त्रयमर्धं पुनर्भवेत् ।
पञ्चविंशतिसंख्या स्याद्राजा षड्विंशतिस्तथा ॥
अर्धश्लोकात्मकं मन्त्रद्वयमर्धं पुनर्भवेत् ।
एकोनत्रिंशदेवं तु मन्त्रसंख्याः प्रकीर्त्तिताः ॥
पुनरर्धं पुनः श्लोकत्रयमर्धं पुनर्भवेत् ।
मार्कण्डेयः पुनश्चार्धश्लोकः श्लोकात्मकः पुनः ॥
अर्धश्लोकात्मको मन्त्रो राजार्धश्लोकमन्त्रकः ।
मन्त्राश्चत्वारिंशदेव श्लोकमन्त्रचतुष्टयम् ॥
पुनरर्धमृषिश्चार्धश्लोकमन्त्राः पुनर्दश ।
पुनरर्धं पुना राजा एकोना षष्टिरुच्यते ॥
पुनरर्धं पुनः श्लोकः पुनरर्धं पुना ऋषिः ।

पुनरर्धं पुनः श्लोकाः षण्मन्त्राः पुनरर्धकाः ॥
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ।
इत्येव पाठो मन्त्राणामेकसप्ततिरुच्यते ॥
ब्रह्मार्धश्लोकमन्त्रोऽथ श्लोकमन्त्रास्त्रयोदश ।
अर्धश्लोकः पुनः श्लोक ऋषिः श्लोकास्तु पञ्च वै ॥
पुनरर्धं तु मन्त्राणां सपञ्चनवतिः स्मृताः ।
भगवानर्धमन्त्रौ द्वौ ऋषिः श्लोकार्धकं पुनः ॥
श्लोकः पुना ऋषिः श्लोकद्वयं मन्त्रद्वयं भवेत् ।
श्लोकानामष्टसप्तत्या चतुर्भिरधिकं शतम् ॥
अध्यायादावेव ऋषिरुवाचेति सकृन्मनुः ।
अष्टषष्टिमिताः श्लोकास्तावन्तो मनवो मताः ॥
एकोनसप्ततिः सर्वेऽध्याये मन्त्रा द्वितीयके ।
आदावृषिरुवाचैकं पञ्चविंशत् ततः परम् ॥
निहन्यमानाद्याः श्लोका मुखरागाकुलाक्षराः ।
इत्यन्ता देव्युवाचैको गर्ज गर्जेति चापरः ॥
श्लोको-ऋषिरुवाचेति पुनश्च श्लोकपञ्चकम् ।
चतुश्चत्वारिंशदेवं सर्वे मन्त्रास्तृतीयके ॥
आदावृषिरुवाचेति शक्राद्याः श्लोकमन्त्रकाः ।
षड्विंशास्तु ऋषिः श्लोकद्वयं देवी ततः परम् ॥
व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ।
इत्यर्धश्लोकमन्त्रोऽथ देवा उच्चुस्ततः परम् ॥
भगवत्या कृतं सर्वमित्यर्धश्लोकमन्त्रकः ।
यदयं नियताद्यं च श्लोकमन्त्रत्रयं भवेत् ॥

ऋषिश्लोकास्तु चत्वारो मनवः परिकीर्त्तिताः ।
षट्त्रिंशच्छ्लोककेऽध्याये चत्वारिंशद्द्वयाधिकम् ॥
षट्सप्ततिश्लोकयुक्तेऽध्याये मन्त्रास्तु पञ्चमे ।
एकोनत्रिंशदधिकं शतं कात्यायनीमते ॥
आदौ ऋषिरुवाचेति पुरा शुम्भादयश्च षट् ।
श्लोकमन्त्रास्ततो देवा ऊचुश्चैवाष्टमो मनुः ॥
नमो देव्यादिकाः श्लोकाः पञ्च मन्त्राः प्रकीर्त्तिताः ।
त्रयोदशैव मन्त्रास्तु या देवीत्यादयोऽपि च ॥
एकविंशतिकाः श्लोका भ्रान्त्यन्तास्तेषु मन्त्रकाः ।
प्रतिश्लोके त्रयो मन्त्रा ज्ञेयास्ते च त्रिषष्टिकाः ॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै इति प्रोक्तो विंशत्यक्षरको मनुः ॥
नमस्तस्यै इति प्रोक्तो द्वितीयश्चतुरक्षरः ।
अष्टाक्षरस्तृतीयोऽपि नमस्तस्यै नमो नमः ॥
एवं द्वाविंशतिश्लोके ज्ञेयं मन्त्रत्रयं बुधैः ।
पुनः श्लोकात्मको मन्त्रस्त्रिमन्त्रः श्लोककः पुनः ॥
त्रयोविंशच्छ्लोककेषु मन्त्रा वै सप्तषष्टिकाः ।
पूर्वैस्त्रयोदशैर्मन्त्रैः सहाशीतिरुदाहृता ॥
स्तुता सुरैरिति श्लोकद्वयं चैव पुना ऋषिः ।
पुनः सप्तदशश्लोका ऋषिः श्लोकत्रयं ततः ॥
दूतश्चैव नव श्लोका ऋषिरेकोऽम्बिका ततः ।

एक इत्यस्यैकश्लोकः इत्यर्थः ।

चतुःश्लोकी पुनर्दूतश्चतुःश्लोकी पुनः शिवा ।

श्लोकद्वयं मिलित्वा तु चत्वारिंशन्नवाधिकम् ॥
अशीत्याऽपि च संयोग एकोनत्रिंशताऽधिकम् ।
शतमेवं तु विज्ञेयमाहुतीनां च पञ्चमे ॥
विंशतिश्लोकसंयुक्ते षष्ठेऽध्याये प्रकीर्त्तिता ।
सर्वे श्लोका मन्त्ररूपा देव्ये काऽथ ऋषित्रयम् ॥
चतुर्विंशतिमन्त्राणामित्येवं परिकीर्त्तितम् ।
पञ्चविंशच्छ्लोकयुक्तेऽध्याये मन्त्रास्तु सप्तमे ॥
सर्वे मन्त्राः श्लोकरूपा ऋष्युवाचद्वयं ततः ।
सप्तविंशतिरेवं तु मन्त्रसंख्या प्रकीर्त्तिता ॥
सार्धैकषष्टिश्लोकाढ्येऽष्टमेऽध्याये प्रकीर्त्तिताः ।
एकषष्टिश्लोकमन्त्रा अन्तेऽर्धश्लोकमन्त्रकः ॥
आदावेक ऋषिश्चैव त्रिषष्टिर्मन्त्रसंततिः ।
एकोनचत्वारिंशद्भिः श्लोकैर्युक्ते समीरिताः ॥
अध्याये नवमे मन्त्रास्तावन्तोऽथ मनुद्वयम् ।
राजा ऋषिश्चेति चैकचत्वारिंशन्मनुस्त्वयम् ॥
सार्धसप्तान्वितैर्विंशच्छ्लोकैस्तु दशमेऽन्विते ।
सप्तविंशतिमन्त्रास्तु श्लोकरूपास्ततोऽन्तिमः ॥
अर्धश्लोकात्मको मन्त्र ऋष्युवाचद्वयं तथा ।
देव्युवाचद्वयं चैव द्वात्रिंशन्मन्त्रसंग्रहः ॥
श्लोकानां सार्धपञ्चाशज्ज्ञेयमेकादशे स्फुटम् ।
पञ्चाशच्छ्लोकमन्त्रास्तदन्तेऽर्धश्लोकमन्त्रकः ॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
एषोऽर्धमन्त्र इत्याहुः केचिदत्र विचक्षणाः ॥

देवीद्वयमृषिश्चैको देवा एकमितीरितम् ।
पञ्चाधिकं तु पञ्चाशन्मन्त्रा ज्ञेयाः परिस्फुटम् ॥
अष्टत्रिंशच्छ्लोकयुक्तेऽप्यध्याये द्वादशात्मके ।
चत्वारिंशच्च एकश्च मन्त्रास्तत्राहुतिद्वयम् ॥
अर्धश्लोकात्मकं श्लोकाः सप्तत्रिंशन्मिता ऋषिः ।
देव्युवाचेति चैवैवमेवं संख्या स्फुटोदिता ॥
त्रयोदशे सार्धसप्तदशश्लोकाः प्रकीर्त्तिताः ।
ऋषिरुवाचेत्यारभ्य भोगस्वर्गापवर्गदाः ॥
इत्यन्ताः पञ्चमन्त्रास्ते मार्कण्डेयस्ततः परम् ।
इति तस्य वचः श्रुत्वेत्यर्धमन्त्रः प्रकीर्त्तितः ॥
श्लोकमन्त्रास्ततो ज्ञेयाः पञ्चैवाथार्धमन्त्रकम् ।
देव्युवाचेति मन्त्रोऽयं ततः श्लोकस्तु मन्त्रकः ॥
मार्कण्डेयस्ततो मन्त्रः श्लोकौ मन्त्रद्वयं ततः ।
ततो देवीषडर्धानि सप्त मन्त्राः प्रकीर्त्तिताः ॥
मार्कण्डेयस्ततः पश्चाद्द्वयं मन्त्रद्वयं स्मृतम् ।
आवृत्त्या त्वधिको मन्त्रः सावर्णिर्भविता मनुः ॥
एकोनत्रिंशत्संख्याका मन्त्रा अत्र स्मृता बुधैः-इति ।

अथ प्रसङ्गात् प्रश्नविधिरुच्यते (तन्त्रविधानमुक्तावली-)धृतवचनानि ।

त्रयोदशदलं पद्मं लिखित्वा सुमनोहरम् ।
एकाङ्कादिक्रमेणाङ्कैर्दलानि परिपूरयेत् ॥
प्रत्यध्याये श्लोकसंख्याः पृथग्लेख्याश्च पङ्क्तिशः ।
पूजयेत् पुस्तके दुर्गां नवर्णेन विधानवित् ॥
देवि दुर्गे नमस्तुभ्यं सर्वज्ञे सर्वदर्शिनि ।

सिद्धिकार्यस्य वा सिद्धिं सत्यं मन्त्रं प्रदर्शय ॥
एवं संप्रार्थ्य पुष्पं वा फलं वाऽक्षतमेव वा ।
कुमार्या वा शिशोर्हस्तादध्यायाङ्के निधाययेत् ॥
विदित्वा चैवमध्यायं तत्पद्याङ्के निधापयेत् ।
श्लोकं ज्ञात्वा ततो मन्त्री वाचयीत स्फुटाक्षरम् ॥
श्लोकस्यार्थानुसारेण ज्ञेयं विज्ञैः शुभाशुभम् ।
वरदानार्थकाः श्लोका देवीतुष्ट्यर्थकाश्च ये ॥
त्राणाभ्युपगमार्थाश्च भाविभव्यार्थकाश्च ये ।
देवोत्सवाभिधेया ये श्लोकास्ते सिद्धिसूचकाः ॥
दैत्यानां संख्ययो यत्र देवीविक्रमवर्णनम् ।
अमर्षवर्णनं देव्या असुरेषु रणाजिरे ॥
एवंविधाश्च ये श्लोकाः संग्रामविजयप्रदाः ।
प्रार्थनार्थाश्च ये श्लोकाः स्तोत्ररूपास्तथैव च ॥
सूचयन्ति च ते सिद्धिं दीर्घकालविलम्बिनीम् ।
यदि स्यादुत्तरश्लोको वरदानार्थकस्तथा ॥
सिद्धिमीदृगपि श्लोकस्तूर्णमेवाभिशंसति ।
आपदो वर्णनं तस्या वेदनं च सुपर्वणाम् ॥
भूभृद्विशोश्च संवादो वर्णनं विपदस्तयोः ।
दूतवाक्यं च दैत्यानां विक्रमस्य च वर्णनम् ॥
प्रयाणवर्णनं तेषां कार्यनाशस्य सूचकम् ।

आपद इति सुपर्वणामापदो वर्णनमित्यन्वयः । तस्या आपदो वेदनं ज्ञानं कथनमिति यावत् ।

स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ।
विचरन्ति—इत्यादिरूपमित्यर्थः ।

केचिदिष्टमनिष्टं वा श्लोकानावेदयन्ति च ।
तादृशश्लोकलाभे तु पुनः प्रश्नं समाचरेत् ॥

इति सप्तशतीप्रकरणम् ।

अथ प्राणायामपुरश्चरणं तदुक्तं (सिद्धान्तसंग्रहे)

अथातः संप्रवक्ष्यामि प्राणायामपुरस्क्रियाम् ।
बद्धपद्मासनो मन्त्री समकायशिरोऽधरः ॥
वशीकृतेन्द्रियग्रामो नाकुलः कम्पवर्जितः ।
मूलाधारेऽनाहते वा भ्रूमध्ये वा स्वपङ्कजे ॥
मन्त्रं ज्योतिर्मयं ध्यायेद्येनासौ प्राणसंयमः ।

प्राणसंयमः प्राणायामो येन मन्त्रेण कर्त्तव्य इत्यर्थः ।

तथा ।

तत्स्वरूपं शिवं ध्यायेत् पूर्वोक्तेनैव वर्त्मना ।
प्राणायामं चरेद्धीमान् पूरकादिकलक्षणम् ॥

शिवमिति प्रकृतदेवताभिप्रायेण ।

तथा ।

प्रातःकालं समारभ्य यावद्यामद्वयं भवेत् ।
हविष्यान्नैस्तथा नक्तं प्रकुर्याद्भोजनं मितम् ॥
न कुर्याद्योषितां स्पर्शं न पश्येत् पामरं जनम् ।
शुद्धभूमौ कुशास्तीर्णे शयीत विजितेन्द्रियः ॥
एवं लक्षमितं कुर्यात् प्राणायामं विचक्षणः ।
ततो होमादिकं कुर्यात् पुरश्चर्योक्तवर्त्मना ॥
भोजनं कारयेद्विप्रान् गुरुं संतोषयेत् तथा ।
एवं कृत्वा सर्वपापनिर्मुक्तः शुद्धविग्रहः ॥
मन्त्रसिद्धिमवाप्नोति योगसिद्धिं विशेषतः ।
अणिमाद्यष्टसिद्धीनामपि स्यादाश्रयस्तु सः ॥

यन्मन्त्रं साधयेन्मन्त्री स मन्त्रस्तस्य सिध्यति ।

इति प्राणायामपुरश्चरणम् ।

अथ पुरश्चरणव्यतिरिक्तेन मन्त्रसिद्धिप्रकारो (वीरतन्त्रे)

अथ सम्यक् प्रवक्ष्यामि गुरुसिद्धिपरम्पराम् ।
एवं ज्ञात्वा विशेषज्ञो गोपयेत् प्रीतये मम ॥
एतत्प्रकाशनाल्लोके महाहानिः पदे पदे ।

शिवशिखिशीतभानुं पञ्चमान्त्यस्वराढ्यं
द्वितयमिदमपूर्वं बीजमुग्रप्रभायाः ।
क्षणमपि रमणीनां मण्डलान्तर्विभाव्य
क्षपयति दुरदृष्टं वादिराड्जायते सः ॥

शिवो हकारः । शिखी वह्निस्तद्बीजं रेफः । सितभानुरनुस्वारः । पञ्चमान्त्यस्वर उकारस्तेन हुमिति प्रणवादिवह्निजायान्तस्योग्रप्रभामन्त्रस्य द्वितीयं बीजमित्यर्थः ।

तथा ।

स जयति रिपुवर्गान् वादिराजान् विवादे
रमयति रमणीनां चित्तचौरश्चिरायुः ।
कवयति कविराजैरप्यदृष्टं सुकाव्यं
मधुमतिरपि हेया किं पुनः सिद्धिसंघाः ॥
कुलयुवतिसुयोनौ मन्त्रवर्णान् विलिख्य
निखिलनिगमवर्णान् सुप्तदोषादिदुष्टान् ।
विदितगुरुकुलान्तर्बाह्यवर्त्मा विधिज्ञो
मधुपुटितपटीयान् भावयेच्छान्तचित्तः ॥
कुलपथमनुसन्ध्यातर्पणासक्तचित्त-
स्तव जननि जनो यस्तर्पयेत् तीर्थतोयैः ।
स किल सुरतपुष्पैर्गन्धमाल्यानुरूपै

रचितयुवतिवेशस्तद्धिया ध्यायते सः ॥
परिचरति समस्तैर्न्यासपूर्वैः प्रसिद्धैः
स्तवपरिकरजालैर्योनिचक्रे प्रपूज्य ।
सुँविमलकुलजातां ह्रीघ्रिणावर्जितां यः
स्वयमपि रचिताङ्गः क्षोभकृद्योगिनीनाम् ॥
पशुरिपुकुलचक्रे संस्पृशन्मध्यशाखं
सुरतरुसुरनाथः पापभ्रष्टसुवेशः ।
कुलपतिकुलनाथस्तद्द्वयं योजयित्वा
मनुपुटितविमृष्यं योजयेत् तद्बहिर्यः ॥
जननि तव कलानां को विदां कामरूपः
कुमतिरहितचित्तः संलिखेत् तान्त्रिधारे ।
विगतभयविवादध्वान्तजालः सुधांशु-
स्तत्र चरणतलान्तर्धूल्यजालैर्विधेयः ॥
परिकलितवपुस्तद्धर्मभिर्देवपूज्यैः
परिचरति स विज्ञो मोक्षचर्याधिया सः ।
मदनमदवधूनां बीजमुद्धृत्य शक्तिं
तदनु कठतबीजं लोकधात्रीं तदन्तः ॥
यदि जपति मदन्तर्भावमासाद्य सद्यः
सुरनगरगतिस्तैः सिद्धवर्गैः स पूज्यः ।
शिवभृगुमदपृथ्वीशक्तियुक्तं सुसिद्धौ
हरिहरचतुरास्यस्वस्वभूतिप्रभूतम् ॥
परमवरदसंज्ञः क्षोभकृत् कामिनीना-
मधिपतिरपि वाचां श्रीपतिः सार्वभौमः ।

भृगुमदकथिताधः कामबीजं तदग्रे
   भुवनभयविनाशः क्षोभिणीं योजयित्वा ॥
जपति यदि सकृद्वा चिन्त्यते वीरसिंहः
   कुलयुवतिकुलान्तः क्षोभकृत् कामभावात् ।
मदनमदलताधः शक्तिबीजं नियोज्य
   स्मरहरहरिरूपी कामरूपः कुबेरः ॥
रिपुकुलहरिणाक्षीलोचनाम्भोजविद्यु-
   द्विपुलजननिषेकात् खण्डितान्तोग्रतापः ।
शिवभृगुमदमूलं लोभमूलं भजन्ति
   यदि त्रिविधगुरूणां वर्ममूलं विमृष्य ॥
निधिपतिरपि नाथो गीष्पतिर्भद्रचेता
   यदि भवति तदेतन्मुख्यमुर्वीपतित्वम् ।
वरुणबलविवर्जं घ्राणमेकं विवर्जं
   तदुपरि मृगचिह्नं द्वन्द्वमेतद्भवान्याः ॥
निखिलमुनिवराणां मोक्षदानैकदक्षः
   सदसतसमधर्मा क्षेमकृन्मन्त्रराजः ।
शिवशमनययुक्तं बीजमेतद्भवान्या
   अनलशिवसधर्माश्वादिराजं स्वतन्त्रम् ॥
तव समनययुक्तं बीजमेतद्भवान्या
   द्वितयमपि विमानं वक्तुमीशो महेशः ।
किमिह कमलजन्मा जन्मधारासहस्रै-
   रिति भजति नराणां मन्त्रराजं स्वभाग्यैः ॥
भवति जननि युष्मत्पादपद्मोयभक्त-

स्त्यजसि परपुमांसं नेदृशं क्वापि काले ।
न खलु वपुपुरर्घ्यं तस्य का च्चित् कदा च्चि-
न्निहितगुरुमुखाद्वा प्राप्य कस्मादकस्मात् ॥
स्मररिपुपुरपारे मोक्षचर्यास्वपारे
परमपदविलीनः सर्वसौभाग्यभोगैः ।
अनलपुरविभागे कालिकारन्ध्रबीजं
तदपि यदि विदध्याद्दीक्षितं दण्डवर्णम् ॥
नयनयुतलकारं मस्तके नामयुक्तं
तदनु विकटदंष्ट्रासोत्कटं बीजयुक्तम् ।
यदि जपति समस्तं गुह्यगुह्यातिगुह्यं
त्रिजगति किमिहास्ते क्लेशलभ्यं कथं च्चित् ॥
क्रमपच्चितमपूर्वं सर्वमेवानुबद्ध्यं
मनुरपरविभाव्यस्तस्य मध्यस्थरूपम् ।
भजति यदि चिदानन्दात्मधृक् केवलोऽसौ
विविधभुवनमुख्यः कौतुकी मानमुख्यः ॥
इति ते कथितं सर्वं रहस्यं परमाद्भुतम् ।
यथानुक्रमतो लोके किं न साध्यति योगिराट् ॥

अथ भैरवसाधनं (मेरुतन्त्रे)

अथातः संप्रवक्ष्यामि नानाभैरवसाधनम् ।
श्मशाने ते तु तिष्ठन्ति काले काले पुरे पुरे ॥
नियमं कं च्चिदेकं यो न त्यजेद्धर्मगर्भितम् ।
वाममार्गादिनिरतोऽप्यद्दष्टेतरवर्त्मनाम् ॥
हीने गुरावपूर्णे वा साधने लोकभीतितः ।
स भवेद्भैरवो देवस्तस्य देशस्य शासकः ॥

तत्रत्यभूतवेतालाः सदा संसेवयन्ति तम् ।
स्वमार्गप्रच्युतानां स शासनं कुरुते सदा ॥
क्षीणकर्मणि तस्मिँश्च गते ग्रामो विलीयते ।
अन्यस्मिन् भैरवे जाते ग्रामो वसति निश्चितम् ॥
यदाम्नायो भैरवोऽसौ तच्छासनं तु तद्दिशि ।
तेन मार्गेण वशयेत् कार्यार्थं भैरवं तु तम् ॥
वाग्रमाकायमायाख्यास्तारो बीजं क्रमाद्भवेत् ।
पूर्वाद्यूर्ध्वान्तकानां तदाम्नायानां क्रमेण च ॥
आम्नायबीजं ग्रामस्य बीजं भ्राँ भैरवस्य च ।
ग्रामनाम ततः प्रोच्य पितृगेहे निवासिने ॥
ततस्तेषां मनुमिमं जपेद्दशसहस्रकम् ।
निशि श्मशाने च बलिं तदाम्नायोक्तवर्त्मना ॥
जपादौ च जपान्ते च नित्यं दद्यादनन्यधीः ।
वटुकोक्तं हुनेद्द्रव्यं तर्पणादि ततश्चरेत् ॥
एवं सिद्धमनुर्मन्त्री भूतानां निग्रहक्षमः ।
तस्मिन् देशे भवेत् तस्य प्रत्यक्षीकरणं शृणु ॥
कृतनित्यक्रियः प्रातः सोपवासो जितेन्द्रियः ।
सायं सन्ध्यादिकं कृत्वा शान्तिपाठं विधाय च ॥
प्रगृहीत्वा च सामग्रीं सायं सोत्तरसाधकः ।
व्रजेच्छ्मशानसामग्रीं शृणु सुस्थिरमाषकान् ॥
अनङ्कुरान् जलतिलान् मुद्गाँस्तद्वन्मसूरिकान् ।
तथैव चणकान् भक्तं पायसान् पूपशष्कुलीः ॥
कन्यकाकर्त्तितं सूत्रं कुङ्कुमेन सुरञ्जितम् ।

अष्टौ वितस्तिदीर्घाश्च मुष्टिस्थूलाश्च खादिराः ॥
कीला एको हस्तमात्रं गन्धपुष्पादिकं तथा ।
बलिद्रव्यं च पूर्वोक्तं पूर्वाम्नाये समत्स्यकम् ॥
समांसं पश्चिमाम्नाये समद्यं चोत्तरे भवेत् ।
ग्राममध्ये श्मशाने च ऊर्ध्वाम्नाये सरक्तकम् ॥
यथायोग्यं च नैवेद्यं गच्छेच्च भयवर्जितः ।
पादप्रक्षालनं कृत्वा ततः स्मृत्वाऽस्य देवताम् ॥
बद्धाञ्जलिरिदं वाक्यं प्रवदेत् साधकोत्तमः ।
अत्र श्मशाने याः काश्चिद्देवता निवसन्ति हि ॥
ताः प्रयच्छन्तु मे सिद्धिं प्रसन्नाः सन्तु पान्तु माम् ।
पूर्वे मां शङ्करः पातु तथाऽऽग्नेय्यां च शूलधृक् ॥
कपाली दक्षिणे पातु नैर्ऋत्ये जटिलोऽवतु ।
पश्चिमे पार्वतीभर्त्ता वायव्यां प्रमथाधिपः ॥
उत्तरे मुण्डमालाढ्य ईशाने वृषभध्वजः ।
ऊर्ध्वं पातु तथा शम्भुरधस्ताद्धूलिधूसरः ॥
अग्रतो भैरवः पातु पृष्ठतः पातु खेचरः ।
दक्षिणे भूधरः पातु वामे तु पिशिताशनः ॥
केशान् पातु विशालाक्षो मूर्धानं च मरुत्प्रियः ।
मस्तकं पातु भृग्वीशो नेत्रे पातु महामनाः ॥
कपोलौ पातु वीरेशो गण्डौ गण्डादिमर्दनः ।
उत्तरोष्ठे विरूपाक्षस्त्वधरे योगिनीप्रियः ॥
दन्तेषु दक्षविध्वंसी चिबुके नृकपालधृक् ।
कण्ठे रक्षतु मां देवो नीलकण्ठो जगद्गुरुः ॥

दक्षस्कन्धे गिरीन्द्रेशो वामस्कन्धे च सुन्दरः ।
भुजे च दक्षिणे सर्वमन्त्रनाथः सदाऽवतु ॥
वामे भुजे सार्वभौमो हृदये पातु पाण्डुरः ।
दक्षस्तनं पशुपतिर्वामं पातु महेश्वरः ॥
उत्तरे सर्वकल्याणकारकोऽवतु मां सदा ।
नाभौ कामप्रविध्वंसी जङ्घे पातु दयामयः ॥
जानुनी पात्वजामित्रो गुल्फौ गौरीपतिः सदा ।
पादपृष्ठं ज्ञाननिधिस्तथा पादाङ्गुलीर्हरः ॥
पादाधः पातु सततं व्योमकेशो जगत्प्रियः ।
इति रक्षां समाधाय मन्त्ररक्षां ततश्चरेत् ॥
ॐ ह्लाँ ह्लुँ ह्लुँ च पूर्वे ॐ ह्लौँ ह्लुँ ह्लौँ हुताशने ।
ॐ ह्लौँ श्रीँ दक्षिणे न्यस्य ॐ ग्लुँ स्लुँ चापि नैर्ऋते ॥
ॐ प्लुँ म्लुँ य्लुँ प्रतीच्यां च तारः प्रौँ प्रुँ समीरणे ।
ॐ भ्राँ भैरवः सौम्यायां ॐ ब्लुँ प्लुँ भ्रुँ च फट् शिवे ॥
ॐ ग्लौँ ब्लुँ मूर्धदेशेऽथो स्राँ स्रुँ स्रँ स्रस्त्वधः स्मृतम् ।
एवं रक्षां समाधाय कील्याः कोलादिगष्टके ॥
मध्ये महाकोलमथो दिक्पालार्च्चनमारभेत् ।
ततो मन्त्रमिमं ब्रूयात् प्रार्थयेत् प्रेमसंयुतः ॥
भ्राँ भैरव द्विरुच्चार्य भयङ्करहरे वदेत् ।
मां रक्ष रक्ष हुँ फट् च स्वाहा द्वात्रिंशदर्णकः ॥
पलाशभाजने माषान् कृत्वा प्राचीं व्रजेत् ततः ।
कीलस्य निकटे चेन्द्रमावाह्य परिपूजयेत् ॥
ध्यानं प्रागुक्तवत् कृत्वा तत्पुरश्चतुरस्रके ।

मन्त्रेणानेन चेन्द्राय मण्डले बलिमर्पयेत् ॥
ॐ ह्लाँ ह्लीँ ह्लुँ समुच्चार्य भो इन्द्र सुरनायक ।
प्रसन्नो भव मे शीघ्रं देहि सिद्धिं सनातनीम् ॥
इमं बलिं गृह्ण गृह्ण हूँ फट्नागाग्निवर्णकः ।
जलं दत्वा बलिं त्यक्त्वा नत्वेयाद्वह्निकीलकम् ॥
अग्निं तत्र समावाह्य प्राग्वद्ध्यात्वा प्रपूजयेत् ।
तदग्रे मण्डलं कृत्वा दद्यान्मन्त्रेण वै बलिम् ॥
ॐ रँ राँ रूँ रूँ च रिँ रीँ तदग्रेऽग्नेपदं पदेत् ।
तेजोनायक मे शीघ्रं सिद्धिं देहि इमं वदेत् ॥
मुद्गबलिं गृह्ण गृह्ण हूँ फड्देवार्णको मनुः ।
ततो दक्षिणकीलस्य निकटे यममर्चयेत् ॥
मँ बीजेन समावाह्य मनुना निर्वपेद्बलिम् ।
ॐ प्राँ प्रीँ प्रुँ ततः प्राँ प्रीँ प्रूँ भो यमपदं वदेत् ॥
प्रेताधिपतये शीघ्रं प्रसन्नो भव संवदेत् ।
इमं मे मसुरं पात्रे बलिं गृह्णयुगं वदेत् ॥
हूँ फडन्तः समाख्यातो मन्त्रो गोरामवर्णकः ।
ततो नैर्ऋत्यकीलस्य निकटे नैर्ऋतं यजेत् ॥
क्षँ बीजेन समावाह्य बलिमन्त्रोऽथ कथ्यते ।
ॐ प्रैँ प्रैँ प्रैँ ततो हूँ हूँ त्रिः खँ हिह्रीँ च भोयुगम् ॥
रक्षोनाथ पदाच्छीघ्रं प्रसन्नो भव संवदेत् ।
इमं मे चणकबलिं गृह्ण हूँ फड्मनुर्मतः ॥
षट्त्रिंशदर्णोऽथ ततो व्रजेत् पश्चिमकीलकम् ।
वँ बीजेन समावाह्य वरुणं तत्र पूजयेत् ॥

बलिमन्त्रो ध्रुवो ब्राँ ब्रीँ भो भो वरुण संवदेत् ।
जलनाथपदस्यान्ते प्रसन्नो भव संवदेत् ॥
इमं ते चोदनबलिं गृह्ण गृह्ण च हूँ च फट् ।
त्रिंशदर्णो मनुः प्रोक्तो वरुणस्य बलेरयम् ॥
ततो व्रजेद्वायुकोणं कीलस्य निकटेऽर्चयेत् ।
यँ बीजेन समावाह्य वायुं शृणु बलेर्मनुम् ॥
वाँ वीँ वूँ ततः क्राँ क्रीँ भो भो वायो पुनः पुनः ।
क्षिप्रं प्रसन्नो भवेति ममेदं पायसेति ॥
बलिं गृह्णयुगं हूँ फट् पञ्चत्रिंशाक्षरो मनुः ।
उदक्कीलं ततो गत्वा कुँ बीजेन धनेश्वरम् ॥
आवायेत् पूजयित्वा मनुना निर्वपेद्बलिम् ।
ॐ क्राँ क्रूँ ततः क्राँ क्रीँ भो भो यक्षपदं वदेत् ॥
नाथ शीघ्रं प्रसन्नो मे भवेति च पदं वदेत् ।
ममापूपबलिं गृह्ण गृह्ण हूँ फड्रदार्णकः ॥
ईशानकीलनिकटे गत्वेशानं समाह्वयेत् ।
हँ बीजेन ततः पूज्यबलिः स्यान्मनुनाऽमुना ॥
ॐ श्राँ श्रीँ श्रूँ ततः श्राँ श्रीँ श्रीँ श्रीँ स्याच्छष्कुलीपदम् ।
बलिं गृह्णयुगं हूँ फड्नवविंशतिवर्णकः ॥
पुष्पाक्षतान् समादाय मध्यस्तम्भादधः स्थितः ।
अधस्तनस्तम्भाय नमो मन्त्रोऽयं तु नवाक्षरः ॥
अनेन मनुना स्तम्भनिर्भयः परिपूजयेत् ।
महाकवचमन्त्रेण कुर्याद्देहस्य रक्षणम् ॥
ॐ ह्राँ ह्रीँ ह्रुँ ततो ह्रश्च क्षाँ क्षीँ क्षुँ क्षः समुच्चरेत् ।

स्लाँ स्लीँ स्लुँ स्लैँ स्तथा घ्राँ घ्रीँ घ्रोँ घ्रौँ म्राँ म्रीँ ततो वदेत् ॥
म्रूँ म्रोँ म्रैँ म्रँ ततो म्रोँ म्रौँ त्रिधोक्तेन त्रिधा त्रिधा ।
हूँ सप्तकं समुच्चार्य फडन्तं सर्वतो वदेत् ॥
रक्ष रक्ष पदं प्रोच्य रक्ष रक्षेति भैरव ।
नाथ नाथ फडन्तोऽयमेकपञ्चाशदक्षरः ॥
इत्यात्मरक्षां कृत्वाऽथ स्तम्भस्य च समीपतः ।
आसनं सम्यगास्तीर्य तत्र प्राङ्मुख आस्थितः ॥
साग्रे समे तु भूभागे गोमयाद्युपलेपिते ।
पद्ममष्टदलं कृत्वा तद्बहिः षोडशच्छदम् ॥
तद्बाह्येऽष्टदलं चापि भूपुरं च ततो लिखेत् ।
चतुरस्रत्रयोपेतं चतुर्द्वारसमन्वितम् ॥
तन्मध्ये देवमावाह्य सम्यङ्मूलेन पूजयेत् ।
कर्णिकायां षडङ्गानि ह्यसिताङ्गादिभैरवान् ॥
पत्राष्टके पूजयित्वा पूजयेत् षोडशच्छदे ।
कुलीशं सकुलीशं च जामित्रं रामटं रिभम् ॥
प्रचण्डं चण्डकेशं च चण्डात्मानं च चामरम् ।
चारित्रं च चमत्कारं चञ्चलं चारुभूषणम् ॥
चामीकरं चारुवहं चकितं चेति षोडश ।
नत्यन्तनामभिः पूज्याः षोडशानन्दपूरिताः ॥
ब्राह्म्याद्याश्चाष्टपत्रेषु बहिर्वीथ्यां दिगीश्वरान् ।
तद्बाह्यायां तदस्त्राणि तद्बाह्यायां त्विमान् यजेत् ॥
प्रचण्डचण्डोर्ध्वकेशभीषणाभीषणाभिधाः ।
व्योमकेशो व्योमबाहो व्योमव्यापक एव च ॥

एतान् वीरान् समाहूय त्रायाहीति समुच्चरेत् ।
अभ्यर्च्चयेन्निर्भयः सन् बलिं न्यासान् समाचरेत् ॥
पश्चिमाभिमुखो भूत्वा मालां संपूज्य संयजेत् ।
उच्चैः स्वरं तदाऽऽयाति प्रत्यहं भैरवः स्वयम् ॥
वामहस्तेन दद्याच्च यथाम्नायोदितं बलिम् ।
सम्भोजयन् जपं कुर्यान्निर्भयः प्रीतमानसः ॥
तृप्तो देवो यदा ब्रूयाद्वरं वरय वाञ्छितम् ।
दक्षिणे पायसेनैव तस्य तृप्तिः प्रजायते ॥
वामादीनां मांसमद्यरक्ताद्यैश्चरुणाऽपि वा ।
प्रणम्य दण्डवद्भूमौ वाञ्छितं वरमुच्चरेत् ॥
आगत्य च गृहे पश्चात् त्र्यहं कुर्यान्महोत्सवम् ।
एवं कलियुगे सिद्धिः श्मशानस्य प्रकीर्त्तिता ॥
जपेदेनं समारूढो दैवी प्रत्यक्षता भवेत् ।
समस्तभैरवानां तु मन्त्रादेवं मयोदितम् ॥

इति भैरवसाधनम् ।

अथ योगिनीसाधनं (भूतडामरे)

अथातः संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।
सर्वार्थसाधनं नाम देहिनां सर्वसिद्धिदम् ॥
अतिगुह्या महाविद्या देवानामपि दुर्लभा ।
यासामभ्यर्च्चनं कृत्वा यक्षेशोऽभूत् कुलाधिपः ॥
तासामाद्यां प्रवक्ष्यामि सुराणां सुन्दरीं प्रिये ।
अस्या अभ्यर्चनेनैव राजत्वं लभते नरः ॥
अथ प्रातः समुत्थाय कृत्वा स्नानादिकं शुभम् ।

प्रासादं च समासाद्य कुर्यादाचमनं ततः ॥
प्रणवान्ते सहस्रारे हुँ फड्दिग्बन्धनं चरेत् ।
प्राणायामं ततः कुर्यान्मूलमन्त्रेण मन्त्रवित् ॥
षडङ्गं मायया कुर्यात् पद्ममष्टदलं लिखेत् ।
तस्मिन् पद्मे महामन्त्रबीजन्यासं समाचरेत् ॥
पीठे देवीं समभ्यर्च्य ध्यायेद्देवीं जगत्प्रियाम् ।

ध्यानं यथा ।

पूर्णचन्द्रमुखीं गौरीं विचित्राम्बरधारिणीम् ।
पीतोन्नतकुचां रामां सर्वाद्यामभयप्रदाम् ॥
इति ध्यात्वा च मूलेन दद्यात् पाद्यादिकं शुभम् ।
पुनर्धूपं निवेद्यैव नैवेद्यं मूलमन्त्रतः ॥
गन्धचन्दनताम्बूलं सकर्पूरं सुशोभनम् ।
प्रणवान्ते भुवनेशीमागच्छ सुरसुन्दरि ॥
वह्निभार्यां जपेन्मन्त्रं त्रिसन्ध्यं च दिने दिने ।
सहस्रैकप्रमाणेन ध्यात्वा देवीं सदा बुधः ॥
मासान्ते व्याप्य दिवसं बलिपूजां सुशोभनाम् ।
कृत्वा च प्रजपेन्मन्त्रं निशीथे याति सुन्दरी ॥
सुदृढं साधकं मत्वा महिम्ना साधकालये ।
सुप्रसन्ना साधकाग्रे सदा स्मेरमुखी ततः ॥
दृष्ट्वा देवीं साधकेन्द्रो दद्यात् पाद्यादिकं शुभम् ।
सुचन्दनं सुमनसो ज्ञात्वाऽभिलषितं वदेत् ॥
मातरं भगिनीं वाऽपि भार्यां वा भक्तिभावतः ।
यदि माता तदा वित्तं दिव्यं च सुमनोहरम् ॥

भूपतित्वं प्रार्थितं यत् तद्ददाति दिने दिने ।
पुत्रवत् पालितं लोके सत्यं सत्यं सुनिश्चितम् ॥
स्वसा ददाति दिव्यं च दिव्यवस्त्रं तथैव च ।
दिव्यकन्यां समानीय नागकन्यां दिने दिने ॥
यद्यद्भवति भूतं च भविष्यति च यत् पुनः ।
तत्सर्वं साधकेन्द्राय निवेदयति निश्चितम् ॥
यद्यत् प्रार्थयते सर्वं ददाति सा दिने दिने ।
भ्रातृवत् पालितं लोके कामनाभिर्मनोरथैः ॥
भार्या स्याद्यदि सा देवी साधकस्य मनोहरा ।
राजेन्द्रः सर्वराजानां संसारे साधकोत्तमः ॥
स्वर्गे मर्त्ये च पाताले गतिः सर्वत्र निश्चितम् ।
यद्यद्ददाति सा देवी वर्णितुं नैव शक्यते ॥
तया सार्धं च सम्भोगं करोति साधकोत्तमः ।
अन्यस्त्रीगमनं त्यक्त्वा अन्यथा नश्यति ध्रुवम् ॥

इति सुन्दरीसाधनम् ।

अथ मनोहरासाधनं तत्रैव ।

ततोऽन्यसाधनं वक्ष्ये निर्मितं ब्रह्मणा पुरा ।
नदीतीरं समासाद्य कुर्यात् स्नानादिकं ततः ॥
पूर्ववत् सकलं कार्यं चन्दनैर्मण्डलं लिखेत् ।
स्वमन्त्रं तत्र संलिख्यावाह्य ध्यायेन्मनोहराम् ॥

ध्यानं यथा ।

कुरङ्गनेत्रां शरदिन्दुवक्त्रां बिम्बाधरां चन्दनगन्धलिप्ताम् ।
चेलांशुकां पीनकुचां मनोज्ञां श्यामां सदा कामदुघां विचित्राम् ॥

एवं ध्यात्वा जपेद्देवीमगुरुधूपदीपकैः ।

गन्धं पुष्पं रसं चैव ताम्बूलादीँश्च मूलतः ॥
तारं माया तथाऽऽगच्छ मनोहरे पावकवल्लभा ।
स्नात्वाऽयुतं प्रतिदिनं जपेन्मन्त्रं प्रसन्नधीः ॥
मासान्ते दिवसं प्राप्य कुर्याच्च जपमुत्तमम् ।
आनिशीथं जपेन्मन्त्रं ज्ञात्वा च साधकं दृढम् ॥
गत्वा च साधकाभ्यासे सुप्रसन्ना मनोहरा ।
वरं वरय शीघ्रं त्वं यद्यन्मनसि वर्त्तते ॥
साधकेन्द्रोऽपि तां भक्त्या पाद्याद्यैरर्च्चयेन्मुदा ।
प्राणायामं षडङ्गं च मायया च समाचरेत् ॥
मत्स्यमांसबलिं दत्वा पूजयेच्च समाहितः ।
चन्दनोदकपुष्पेण फलेन च मनोहराम् ॥
ततोऽर्च्चिता प्रसन्ना सा पुष्णाति प्रार्थितं चरेत् ।
सुवर्णस्य शतं भारं सा ददादि दिने दिने ॥
सविशेषं व्ययं कुर्यात् स्थिते तत् तु न दास्यति ।
अन्यस्त्रीगमनं तस्य न भवेदिदमीरितम् ॥
अव्याहतगतिस्तस्य भवतीति न संशयः ।
साधिताऽपि विधानेन यदि नायाति यक्षिणी ।
विषं क्रोधात्मकं प्रोच्यामुकयक्षिण्यतः परम् ।
भूतेशान्मादनं वायुद्वयं क्रोधास्त्रसंयुतम् ॥
क्रोधेनानेन चाक्रम्य जपेदष्टसहस्रकम् ।
एवं कृते समायाति वाञ्छितार्थं प्रयच्छति ॥

मुद्रामाह ।

मुष्टिमन्योन्यमास्थाय कनिष्ठे वेष्टयेदुभे ।

प्रसार्याकुञ्च्य तर्जन्यौ कार्या चैषाऽङ्कुशाकृतिः ॥
इयं क्रोधाङ्कुशी मुद्रा यक्षिण्याकर्षणक्षमा ।
इयं ते कथिता विद्या सुगोप्या या सुरेश्वरि ॥
तव स्नेहेन भक्त्या च वशोऽहं परमेश्वरि ।

इति मनोहरासाधनम् ।

अथ धनदामन्त्रस्तत्रैव ।

तत्तूयँ विन्दुना युक्तं लज्जाबीजं सविन्दुकम् ।
लक्ष्मीबीजं ततो देवि सम्बोध्य च रतिप्रिया ॥
स्वाहान्तो मनुराख्यातो मन्त्रराजोत्तमोत्तमः ।

मन्त्रान्तरम् ।

तत्तूयँ विन्दुसंयुक्तं लक्ष्मीः प्रणव एव च ।
मायाबीजं समुद्धृत्य सम्बोध्य च रतिप्रियाम् ॥
वह्निजायामिति प्रोक्तो मन्त्रराजोत्तमोत्तमः ।
कुवेरोऽस्य मुनिः प्रोक्तः पङ्क्तिश्छन्दोऽथ देवता ॥
धनदाप्रीतये तस्या विनियोगः प्रकीर्त्तितः ।
षड्दीर्घमायया चैव कराङ्गन्यास इष्यते ॥

ततो ध्यानम् ।

कुङ्कुमोदरगर्भाभां किञ्चिद्यौवनशालिनीम् ।
मृणालकोमलभुजां केयूराङ्गदभूषिताम् ॥
तुलाकोटिपरिश्रान्तपादपद्मद्वयान्विताम् ।
माणिक्यहारमुकुटकुण्डलादिविभूषिताम् ॥
नीलोत्पलदृशं किञ्चिदुग्रकुचविराजिताम् ।
कराब्जभ्राम्यत्कमलां रक्तवस्त्राङ्गरागिणीम् ॥
हेमप्राकारमध्यस्थां रत्नसिंहासनोपरि ।

ध्यायेत् कल्पतरोर्मूले देवीं तां धनदायिकाम् ॥
ध्यात्वा च साधकश्रेष्ठः पूजयेद्भक्तितत्परः ।
नवयोन्यात्मकं चक्रं विलिखेत् कर्णिकोपरि ॥
दिग्दलं पद्ममालिख्य चतुरस्रं ततो बहिः ।
कोणेषु वज्रान् संलिख्य मध्ये बीजं समुल्लिखेत् ॥
अङ्गानि केशरेऽभ्यर्च्य दले शक्तीः प्रपूजयेत् ।
लक्ष्मीः पद्मा तथा पद्मालया श्रीश्च हरिप्रिया ॥
हरा चैवाऽथ कमलालयाऽब्जलोलचञ्चला ।
एताः शक्तीः प्रपूज्याथ मध्ये देवीं प्रपूजयेत् ॥
प्रजपेद्दक्षसूत्रेण रत्नालिकृतकेन च ।
लक्षे जपेत् मन्त्रसिद्धिः प्रयोगानाचरेद्बुधः ॥
रात्रौ चेज्जपते चाष्टसहस्रं सप्त वासरान् ।
एतेनैव सुसिद्धः स्यात् पुरश्चर्यादिको विधिः ॥
किमत्र दुर्लभं देवि साधयेद्यदि मानवः ।
भुक्त्वा वाऽप्यथ वाऽभुक्त्वा पायसान्नं प्रदाय च ॥
दशकृत्वोऽथ वा शौचमकृत्वा वा कुले च ताम् ।
यः स्मरेद्देवि विद्यां तां दारिद्र्यैर्नाभिभूयते ॥
कामदेवं जपेत् पार्श्वे देव्याः प्रत्यहमादरात् ।
तेन देव्या महाप्रीतिर्वाञ्छितार्थं ददाति च ॥
पूजान्ते च समायाति रात्रौ देवी धनेश्वरी ।
सर्वालङ्कारमुत्सृज्य दत्वा याति निजालयम् ॥
धनं च विपुलं दत्वा साधकस्य मनोरथान् ।
पूरयित्वा महेशानि वशगा जायते शुभा ॥

स्वयमाहेति यक्षेशी यो मां स्मरति मानवः ।
तस्य दारिद्र्यसन्यासं दासीवत् करवाण्यहम् ॥

द्वितीयमन्त्रस्य पुरश्चरणमाह ।

सहस्रसप्ततिर्यावत् पुरश्चरणमुच्यते ।
होमो घृतेन खण्डेन मधुना च दशांशतः ॥
ताम्रपात्रे मण्डलं च कृत्वा चन्दनलेपिते ।
पूजा कार्या महादेव्याः क्षणाद्दारिद्र्यशान्तये ॥
अङ्गन्यासकरन्यासौ चाङ्गे चैवास्य देवता ।
कुवेरस्य मतेनास्याः पृजाऽपि क्रियते तथा ॥

इति धनदासाधनम् ।

अथाप्सरःसाधनं (भूतडामरे)

प्रालेयं श्रीः शशी देव्या अनादिः श्रीस्तिलोत्तमा ।
तारादिमन्त्रमुद्धृत्य प्रोक्ता काञ्चनमालिका ॥
तारं श्रीर्वर्मणा युक्ता भाव्या कुण्डलहारिणी ।
तारं वर्मसमायुक्तं रत्नमाल्येति पञ्चमी ॥
तारं ब्रह्मेति रम्भाख्या विषं श्रीरुर्वशी परा ।
अनादिबीजमाता च भूतिनीत्यप्सराः क्रमात् ॥
क्रोधं नत्वा प्रवक्ष्येऽहमथासां सिद्धिसाधनम् ।
शैलशृङ्गं समारुह्य जपेल्लक्षं समाहितः ॥
पौर्णमास्यां समभ्यर्च्य घृतदीपं निवेदयेत् ।
प्रजपेत् सकलां रात्रिमायाति बन्धनक्षये ॥
चन्दनार्घेण संतुष्टा वरं वत्स भाषिते ।
कामिता सा भवेद्भार्या प्रयच्छति रसायनम् ॥

सहस्रं वत्सरं याति वरं दद्याद्यथेप्सितम् ।
जपेदयुतमात्रं तु क्षीराशो सप्तवासरान् ॥
चन्दनेन विधायाथ मण्डलं सप्तमे दिने ।
संपूज्य भक्तितः शुक्लाष्टम्यां पर्वतमूर्धनि ॥
प्रजपेत् सकलां रात्रिं समायाति निशात्यये ।
आगत्य पुरतस्तिष्ठेत् सितवस्त्रोन्नतस्तनी ॥
चुम्बत्याऽऽलिङ्गयत्याशु भार्या भवति कामिका ।
राज्यं यच्छति संतुष्टा त्रिदिनं दर्शयत्यपि ॥
पञ्चवर्षयहस्रं तु भुक्त्वा भोगमनुत्तमम् ।
मृते राजकुले जन्म प्रयच्छति तिलोत्तमा ॥
अन्यथा म्रियते शीघ्रं विपरीते कृते सति ।
नीचगासङ्गमं कृत्वा मण्डलं चन्दनेन च ॥
धूपं चैवागुरुं दत्त्वा बलिं च प्रतिपादयेत् ।
जपेदष्टसहस्रं तु नित्यं सप्तदिनावधि ॥
सप्तमे दिवसे पूजां कृत्वा धूपं प्रदापयेत् ।
प्रजपेत् सकलां रात्रिं समायाति निशात्यये ॥
चन्दनार्घेण संतुष्टा वरं वरय भाषिते ।
साधकेनापि वक्तव्यं मातृवत् परिपालय ॥
वस्त्रालङ्करणं भक्ष्यं सेवकेभ्यः प्रयच्छति ।
मृते राजकुले जन्म दद्यात काञ्चनमालिका ॥
न तिथिर्न च नक्षत्र नोपवासो विधीयते ।
शैलमूर्ध्नि समास्थायायुतं मासं जपेन्मनुम् ॥
धूपं दत्त्वा समभ्यर्च्य पुना रात्रौ जपेत् ततः ।

अर्धरात्रे समायाति प्राग्वदर्घ्यं प्रदापयेत् ॥
कामिता सा भवेद्भार्या प्रत्यहं संप्रयच्छति ।
लक्षमेकं हिरण्यं च सिद्धद्रव्यं रसायनम् ॥
दर्शयेत् पृष्ठमारोप्य स्वर्गं कुण्डलहारिणी ।
देवतायतनं गत्वा जपेदष्टसहस्रकम् ॥
मासमेकं तु मासान्ते पौर्णमास्यां पुनर्जपेत् ।
समभ्यर्च्यार्धरात्रौ च श्रूयते नूपुरध्वनिम् ॥
समायात्यन्तिकं दद्यात् पुष्पासनमनुत्तमम् ।
किमिच्छसि वद त्वं मे भव भार्येति साधकः ॥
भार्याकर्म करोत्येवं राज्यं यच्छति कामिकम् ।
याति वर्षसहस्राणि प्रत्यहं परितोषिता ॥
प्रतिपत्तिथिमारभ्य कृत्वा चन्दनमण्डलम् ।
धूपं च गुग्गुलुं दत्वा जपेदष्टसहस्रकम् ॥
त्रिसन्ध्यं पौर्णमास्यां च पूजां कृत्वा सुशोभनाम् ।
प्रजपेत् सकलां रात्रिं समायाति निशात्यये ॥
कामिता सा भवेद्भार्या चान्यथा म्रियते ध्रुवम् ।
ददाति कामिकं भोज्यं सिद्धद्रव्यं रसायनम् ॥
दशवर्षसहस्राणि जीवतेऽन्ते मृते पुनः ।
जन्म राजकुले कुर्याद्दद्यात् क्रोधप्रसादतः ॥
रात्रौ देवगृहं गत्वा चन्दनेन च मण्डलम् ।
कृत्वा धूपं ततो दत्वाऽयुतं मासयुतं मनुम् ॥
मासान्ते महतीं पूजां कृत्वा रात्रौ जपं चरेत् ।
निशात्यये समायाति प्रदद्यात् कुसुमासनम् ॥

छुते च स्वागतं पृच्छेत् किमिच्छसि च भाषते।
साधकः प्राह भार्या त्वं भव यच्छ रसायनम् ॥
याति वर्षसहस्राणि अप्सराः स्वयमुर्वशी।
परस्त्रीं वर्जयेत् सर्वां चान्यथा म्रियते ध्रुवम् ॥
एकाकी शयने स्थित्वा शुची रात्रौ च कुङ्कुमैः।
लिखित्वा भूषिणीं भूर्जे चन्दनेन तु धूपयेत् ॥
जपेदष्टसहस्रं तु मासं यावत् प्रयत्नतः।
मासान्ते तु समभ्यर्च्य जपेदष्टसहस्रकम् ॥
रात्र्यर्धान्तिकमायाति भार्या भवति कामिता।
सिद्धद्रव्यं हिरण्यं च तुष्टा यच्छति भूषिणी ॥
क्रोधराजः पुनः प्राह यदि नायाति साधकः।
अनेन क्रोधयोगेन जपेदप्सरसां चयम् ॥
विषं प्राथमिकं बीजमुद्धरेच्च कटुद्वयम्।
अमुकीं क्रोधबीजं च वातमादरसंयुतम् ॥
जपेत् सकृत् समुद्धृत्य मन्त्रमष्टसहस्रकम्।
म्रियते शीर्यते मूर्ध्नि प्रस्फुटत्यप्सरेति च ॥
वन्दयेदप्सरोवृन्दं मन्त्रेणानेन साधकः।
विषबन्धद्वयं प्रोच्यहनयुग्ममुदीरयेत् ॥
अमुकीं क्रोधमन्त्रोऽयमप्सरोवश्यकारकः।
अथ वक्ष्येऽप्सरोवश्यकारकं मनुमुत्तमम् ॥
विषं चलद्वयं प्रोच्य अमुकीं वश्यमानय।
सकृन्मात्रजपादेवाप्सरोवश्यमियाद्ध्रुवम् ॥

इत्यप्सरस्साधनम्।

अथ ज्वालामुखीसाधनं (फेत्कारिणीतन्त्रे)

नमो भगवतीत्युक्त्वा ज्वालामालिन्यतः परम् ।
गृध्रगणपरिवृते द्विठान्तो मनुरीरितः ॥
ॐ नमो हृदयं प्रोक्तं भगवति शिरः स्मृतम् ।
ज्वालामालिनि च शिखा गृध्रगणपरिवृते ॥
वर्मस्वाहास्त्रमित्येतज्जातियुक्तं न्यसेत् तनौ ।
अभुक्त्वा नियतं चैतज्जयमन्त्रं जपेज्जयी ॥

अथ मन्त्रान्तरं तत्रैव ।

रुद्राङ्गनाग्निजायाभ्यां रुद्रज्वालामुखीत्यपि ।
मन्त्रान्तरं समाख्यातं ज्वालामुख्या अनन्तरम् ॥
दीपतैलाक्तपादोऽर्धरात्रे गुरुदिनादितः ।
जपेदष्टसहस्रं तु त्रयोविंशतिवासरान् ॥
प्रत्यहं पलषट्कं च ददातीति न संशयः ।

पूर्वमन्त्रमाहात्म्यमाह ।

नारायणेन कथितमगस्त्यैः कथितं पुनः ।
सुसिद्धिमिच्छता गोप्यो नामापि न समीरयेत् ॥
पुत्रस्य नृपतेश्चापि धार्मिकस्य विशेषतः ।
नवदुर्गाविधानेन दर्शयेत् कार्यगौरवात् ॥
नृपोऽपि सम्यगाचारो मन्त्रज्ञो विविधं धनम् ।
निवेद्य विधिवत् पश्चान्मन्त्रग्रहणमाचरेत् ॥
स्मृतिमात्रेण वैवर्णान् रिपून् सर्वान् विनाशयेत् ।
प्रदद्याद्दक्षिणां तस्य सहस्रं शतमेव वा ॥
गवां सुवर्णं निष्काणां भूमिं वा शस्यशालिनीम् ।
सर्वशान्तिमवाप्नोति सर्वरक्षाकृतिर्भवेत् ॥

निष्कमलङ्कारः ।

इति ज्वालामुखीसाधनम् ।

अथ कर्णपिशाचीमन्त्रस्तत्रैव ।

कहयुग्मं कालिके च गृह्ण युग्मं तथैव च ।
पिण्डं पिशाचि स्वाहेति द्वीपार्णः कथितो मनुः ॥

ध्यानम् ।

ध्यायेत् पिशाचीं चलशूलहस्तां श्यामां सुदीर्घां युवतीं त्रिनेत्राम् ।
क्रुद्धां विवर्णां तनुवृत्तमध्यां गुञ्जाफलैः कल्पितहारयष्टिम् ॥

साधनप्रकारमाह ।

एकविंशद्दिनं यावदुदयास्तमयं जपेत् ।
नित्यं सायं स्वमाहारं पिण्डं हर्म्योपरि क्षिपेत् ॥
त्रिसप्ताहाच्च तुष्टा सा शय्यां गत्वा पिशाचिनी ।
पञ्चविंशतिदेशानां कथां च कथयत्यपि ॥
त्रिंशद्दिनैश्च देवेशि जम्बूद्वीपकथां नयेत् ।
द्वात्रिंशता तथा गौरि त्रैलोक्यं श्रावयेद्ध्रुवम् ॥
त्रिस्वादुबलिदानेन सर्वं वदति तत्क्षणात् ।
सभायां यदि संघाते द्यूते च रिपुसंसदि ॥
सर्वं कथयति क्षिप्रं नूनं तुष्टा पिशाचिनी ।
केनापि नैव वेद्या सा साधकस्तां प्रपश्यति ॥

इति कर्णपिशाचीसाधनम् ।

अथ विभूषिण्यादिसाधनानि (फेत्कारिणीतन्त्रे)

आद्या विभूषिणी देवी परा कुण्डलधारिणी ।
हारिणी सिंहिनी चैव हंसिनी तु ततो नटी ॥
देवी कामेश्वरी चैव प्रोक्ता देवी रतिप्रिया ।

विभूषिणीमन्त्रमाह ।

क्रोधास्त्रद्वयमायान्ते भूतिनी च त्रिकूर्चतः ।
तारलज्जाद्वयादस्त्रद्वयान्ते च विभीषिका ॥

क्रोधद्वयान्तो मन्त्रोऽयं विभूषिण्या उदीरितः ।

ध्यानम् ।

कर्त्रीं चैव करे परे नरशिरस्तुङ्गाकृतिर्भीषणा
दन्तान्तर्गतमांसशोणितवसासंयुक्तभूतव्रता ।
कालव्यालकरालसत्त्वविकटव्यालम्बिदंष्ट्राङ्कुरा
यस्याः केशकुलाकुलाखिलमहोशैलाऽस्तु सा रक्षतु ॥

साधनप्रकारमाह ।

एकवृक्षतरं गत्वा यामिन्यां प्रवसेत् त्र्यहम् ।
जपेदष्टसहस्रं तु ध्यायन्नव्यग्रमानसः ॥
जपान्ते पूजनं नाम्नाऽगुरुधूपं निवेदयेत् ।
प्रजपेदर्धरात्रे तु समायाति विभूषिणी ॥
चन्दनोदकमिश्रेण दत्तार्घां तुष्यति ध्रुवम् ।
माता वा भगिनी भार्या हृष्टा भवति कामिता ॥
करमेलनकं कृत्वा माता भूत्वा जगत्त्रये ।
शताष्टपरिवारस्य सदाऽभ्यञ्जनभूषणम् ॥
भगिनी चेन्महायोगिन् सहस्रयोजनादपि ।
ददाति स्त्रियमानीय दिव्यं रसरसायनम् ॥
भार्या चेत् स्पृष्टमारोप्य स्वर्गं नयति तत्क्षणात् ।
दिने रत्नसहस्रं तु रसं चैव रसायनम् ॥

दद्यादिति शेषः ।

सर्वाशाः पूरयत्येव सदा देवी विभूषणी ।

अथ कुण्डलधारिणीमन्त्रस्तत्रैव ।

ध्रुवमायाद्वयुगला प्रोक्ता कुण्डलधारिणी ।
जपेदष्टसहस्रं तु मासमात्रं दिने दिने ॥
कर्णौ कुण्डलधारिणी शशिकुण्डलधारिणी ।

आयाति रुधिरेणार्घा देयास्तुष्टा वदत्यपि ॥
किं कर्त्तव्यं मया वत्स मातेति भव साधकः ।
पञ्चाशता दिनेनापि त्रैलोक्यमपि दास्यति ॥

अथ सिन्दूरहारिणीमन्त्रस्तत्रैव ।

क्रोधद्वयास्त्रयुगतः सिन्दूरहारिणीपदम् ।
कूर्चत्रयान्तः संप्रोक्तः सिन्दूरहारिणीमनुः ॥

ध्यानम् ।

स्वर्णालङ्कृतिहारिणी चलदलव्यालोलशाखाम्बरा
सोत्कण्ठीकृतगात्रकर्मसुभगा* शुभ्रांशुचन्द्रप्रभा ।
अन्तः संततकान्तिदन्तमलिना त्रैलोक्यशोभास्पदा
पायादूर्ध्वनवांशुशूललतिका सिन्दूरहारिण्यसौ ॥
शून्यदेवालयं गत्वा जपेदष्टसहस्रकम् ।
शीघ्रमायात्यागता सा भार्या भवति कामिता ॥
पञ्चविंशति दिनानि वस्त्रालङ्कारभूषणम् ।
ददाति साधकेन्द्राय देवी सिन्दूरहारिणी ॥

अथ सिंहिनीमन्त्रस्तत्रैव ।

लज्जाद्वयास्त्रयुगलं सिंहिनीति पदं ततः ।
क्रोधबीजत्रयाद्यन्तः कीर्त्तितः सिंहिनीमनुः ॥

ध्यानम् ।

शैलाग्रद्रुमस्वर्गदन्तवदने दुर्गान्तदैत्यस्थिता
केशा अस्थिसमस्तविष्णुचरणप्रभ्रष्टसंत्रासिनी ।
या दन्तान्तरलम्बिधारणरणे प्रक्षुब्धसिद्धाङ्गना
सेयं पातु समस्तकण्टककुलव्याकम्पिमालाकुला ॥

---

* शुभ्रांशुचन्द्रस्मिता इति २-३-५ पु० पा० ।

गत्वैकलिङ्गं यामिन्यां प्रजपेदयुतं मनुम् ।
ततो हृष्टाऽतिवरदा सिंहिन्यायाति पूजिता ॥
किं करोमि वदत्येवं भार्या भवति कामिता ।
दीनाय वस्त्रयुगलं दद्याद्रसरसायनम् ॥

अथ हंसिनीमन्त्रस्तत्रैव ।

तारत्रिकूर्चास्त्रयुगाद्धंसिनी भूतिनी ततः ।
कूर्चत्रयान्तः कथितो हंसिनीमनुरुत्तमः ॥

ध्यानम् ।

शुभ्रा शुभ्रसरोजतुल्यनयना दुग्धासवेनार्चिता
प्रारब्धध्वनिमुग्धमानववधूसंसेविता सादरम् ।
किञ्चित्तुङ्गविलोलपाङ्गवलितव्यामुग्धमीलन्मुखी
मुक्तायुक्तविलोलहारललिता श्रीहंसिनी पातु नः ॥
वज्रपाणिगृहं गत्वा प्रतिमां शोभनां लिखेत् ।
हयमारेण संपूज्य जपेदयुतसंख्यकम् ॥
यावदर्धनिशां देवी हंसिन्यायाति निश्चितम् ।
चन्दनार्घप्रदानेन हृष्टा वदति साधकम् ॥
किं मया ते प्रकर्त्तव्यं किङ्करी भव साधकः ।
वस्त्रालङ्कारभोज्याद्यं व्ययार्थं संप्रयच्छति ॥
तदशेषव्ययाभावान्न ददाति प्रकुप्यति ।

अथ चेटीसाधनं तत्रैव ।

ततः कूर्चयुगं चास्त्रयुगं चेटी ततः परम् ।
ङेऽन्तं क्रोधयुगं चोक्त्वा चेटीयुग्मं त्रपां ततः ॥

ध्यानम् ।

गच्छन्ती मितभाषिणी शशिमुखी भ्रष्टोत्तरीयाधरा

बिभ्रन्ती कलसं सरोजयुगलं स्वर्णान्तसीमन्तिनी ।
श्रीखण्डादिविलेपनामलवपुःसौरभ्यसंभाविता
किञ्चिद्धर्मसमार्जितार्पितकरा पायादियं चेटिका ॥
कुत्रापि भीषणस्थाने नामोच्चारणमात्रतः ।
ध्रुवं चेटी समागत्य चेटीकर्म करोत्यपि ॥
अथ वाऽस्य गृहद्वारे त्र्यहं रात्रौ जपं चरेत् ।
आगत्य नियतं देवी चेटीकर्म करोति च ॥

अथ कामेश्वरीमन्त्रस्तत्रैव ।

तारकूर्चास्त्रयुक्कामेश्वरि भूतिन्यतः परम् ।
ङेन्तं क्रोधत्रयं कामेश्वरीमन्त्र उदाहृतः ॥

ध्यानम् ।

कामस्कन्धसमागता मधुलतावासन्तिपुष्पान्विता
गायन्ती मधुराधरस्मितमुखी वीणावती चञ्चला ।
रक्ताम्भोजविलोचना मधुमदैर्मत्ता समन्तादियं
पायात् पुष्पधनुर्धरा मधुमती कामेश्वरी भूतिनी ॥
मातृस्थानं समागत्य कृत्वा मांसस्य भक्षणम् ।
मांसादिना बलिं दत्वा सहस्रं सप्त वासरान् ॥
जपान्नियतमायाति रुधिरार्घं निवेदयेत् ।
कामेश्वरी भवेत् तुष्टा भार्या भवति कामिता ॥
सर्वाशाः पूरयत्येव राज्यं यच्छति निश्चितम् ।

अथ रतिप्रियामन्त्रस्तत्रैव ।

तारं लज्जा च कूर्चास्त्रद्वययुक्ता रतिप्रिया ।
क्रोधत्रपास्त्रयुक्कामेश्वरीमन्त्रोक्तवत् क्रिया ॥

ध्यानम् ।

हेमप्राकारमध्ये सुरविटपितटे हेमपीठाधिरूढा
यक्षीमालाविसर्पत्परिमलकुसुमोद्भासिधम्मिल्लभारा ।
पीनोत्तुङ्गस्तनाढ्या कुवलयनयना रक्तवर्णा कराभ्यां
भ्राम्यद्रक्तोत्पलाभा सकलसुरयुता दिव्यभूषाङ्गरागा ॥
रात्रौ देवगृहं गत्वा तत्र शय्यां प्रकल्पयेत् ।
सितवस्त्रं चन्दनं च जातीपुष्पं प्रदापयेत् ॥
धूपं तु गुग्गुलं दत्वाऽष्टसहस्रं जपेन्मनुम् ।
जपान्ते नित्यमायाति चुम्बनालिङ्गनादिभिः ॥
कामिता जायते भार्या सत्यं देवी कुमारिका ।
दद्यादष्टदिनेनैव दिव्यं वस्त्रयुगं ततः ॥
कामिकं भोजनं दिव्यं परिवारस्य दास्यति ।
अन्यहैश्वानरगृहाद्द्रव्यमानीय यच्छति ॥
सहस्रमेतानि जपेज्जपान्ते सिद्ध्यति ध्रुवम् ।
मुहुर्मुहुर्जपेन्मन्त्रमित्याह क्रोधभूपतिः ॥

इति विभूषिण्यादिसाधनानि ।

अथ धरित्रीसाधनम् । तदुक्तं (वैष्णवीकल्पे)

अथातः संप्रवक्ष्यामि धरित्रीसाधनं परम् ।
रहस्यातिरहस्यं च सर्वतन्त्रेषु गोपितम् ॥
सर्वैश्वर्यकरं नृणां दुर्लभं परमाद्भुतम् ।
यज्ज्ञात्वा साधकश्रेष्ठो धनदेन समो भवेत् ॥
शरत्काले च केदारमध्ये कमलसंकुले ।
विनिर्माय कुटीं रम्यां स्थापयेत् कलशं शुभम् ॥
भौमाष्टम्यामाहृतया मृदा नक्तं विनिर्मितम् ।

गन्धर्वकर्दमैर्लिप्तं वेष्टितं शुक्लवाससा ॥
वक्ष्यमाणेन मन्त्रेण तत्रावाह्य वसुन्धराम् ।
नानोपचारसम्भारैस्त्रिसन्ध्यं पूजयेत् सुधीः ॥
भूबीजं तारमायान्ते ङेन्ता चैव वसुन्धरा ।
हृदयं वह्निजायान्तो द्वादशार्णो मनुः स्मृतः ॥
महावराहोऽस्य मुनिर्गायत्री छन्द ईरितम् ।
वसुन्धरा देवता च भूबीजं बीजमुच्यते ॥
मायाबीजं धरित्र्याश्च विनियोगः प्रसादने ।
मन्त्रवर्णैः षडङ्गानि कृत्वा ध्यायेद्वसुन्धराम् ॥

ध्यानम् ।

फुल्लाम्भोरुहमध्यस्थामिन्दीवरदलप्रभाम् ।
पीतकौशेयवसनां नानालङ्कारभूषिताम् ॥
नीलोत्पलद्वयं शालिमञ्जरीं चेक्षुकं करैः ।
बिभ्राणां सर्वलोकस्य धात्रीं वसुमतीं भजे ॥
एवं ध्यात्वा जपेन्मन्त्रं वेदलक्षं समाहितः ।
जपान्ते वसुधादेवी भाषते कलशोदरान् ॥
वरं ब्रूहि प्रदास्यामि यत् ते मनसि वर्त्तते ।
इति ब्रुवाणां तां देवीं प्रसूनाञ्जलिभिस्त्रिभिः ॥
संपूज्य प्रणमेद्भूमौ दण्डवत् साधकोत्तमः ।

श्लोकार्धपतितमन्त्रः ।

नमस्तुभ्यं भगवति जगद्धात्रि वसुन्धरे ।
विष्णुपत्नि वराहस्य दंष्ट्राकोटिकृतालये ॥
विश्वम्भरे नमस्तुभ्यं सर्वभूताश्रये धरे ।
रत्नानां च निधीनां च त्वदभ्यन्तरवर्त्तिनाम् ॥

लब्धुकामोऽस्मि कल्याणि प्रसादात् तव मेदिनि ।
इति संप्रार्थयेद्देवीं सा ददाति वरं ततः ॥
द्रक्ष्यसि प्राप्स्यसीत्येवं ततः पश्यति साधकः ।
पदे पदे च रत्नानि विधातं योजनत्रये ॥
ततस्तानि समादाय यथेष्टं विहरेद्भुवि ।
आदौ पुरस्क्रियां कुर्याद्वर्णलक्षं जपेन्मनुम् ॥
तद्दशांशं च जुहुयात् संस्कृते हव्यवाहने ।
ससर्पिषा पायसेन तद्दशांशं च तर्पयेत् ॥
मार्जयेत् तद्दशांशेन तद्दशांशेन वैष्णवान् ।
विप्रान् संभोजयेन्मन्त्री ततः साधनमाचरेत् ॥
पुरश्चर्यामकृत्वा तु न मन्त्रः कोऽपि सिद्ध्यति ।

इति धरित्रीसाधनम् ।

एवं किन्नर्यादिसाधनानि विस्तरभयादुपेक्षितानि ।

मेरुतन्त्रं महाकालसंहितां शक्तिसङ्गमम् ।
वाडवानलतन्त्रं च तन्त्रं कालानलाभिधम् ॥
कालीतन्त्रं परातन्त्रं तन्त्रराजं तथैव च ।
मुण्डमालाख्यतन्त्रं च योगिनीहृदयं तथा ॥
कुमारीतन्त्रमाम्नायरहस्यं श्रीमतोत्तमम् ।
कुलिकाम्नायतन्त्रं च कुलचूडामणिं तथा ॥
तन्त्रचूडामणि तद्वद्भावचूडामणिं तथा ।
समयाचारतन्त्रं च विश्वसारं तथैव च ॥
भैरव्या भुवनेश्वर्याश्चामुण्डायास्तथैव च ।
योगिन्याश्चापि वाराह्याः पञ्च तन्त्राणि च क्रमात् ॥
नीलतन्त्रं गौतमीयतन्त्रं फेत्कारिणीमपि ।

वामकेश्वरतन्त्रं च वीरतन्त्रं तथैव च ॥
संमोहनाख्यतन्त्रं च तन्त्रं गन्धर्वसंज्ञकम् ।
माहेश्वरीयतन्त्रं च तन्त्रं प्रथमसंज्ञकम् ॥
तद्वत् कात्यायनीतन्त्रं बालातन्त्रं तथैव च ।
उड्डीशं मालिनीतन्त्रं गुह्यातन्त्रं तथैव च ॥
कौलेशं कुब्जिकातन्त्रं कुलरत्नावलीमपि ।
विशुद्धेश्वरतन्त्रं च गणेश्वरविमर्षिणीम् ॥
सिद्धसारस्वतं शम्भुविद्यातन्त्रं तथैव च ।
तद्वद्भैरवतन्त्रं च ज्ञानार्णवकुलार्णवौ ॥
तथैव वैष्णवीकल्पं कालीकल्पं कुलामृतम् ।
श्रीमत्प्रत्यङ्गिराकल्पं ताराकल्पं तथैव च ॥
निरुत्तराख्यतन्त्रं च तन्त्रमुत्तरसंज्ञकम् ।
तन्त्रं तद्वत् स्वतन्त्राख्यं मन्त्रदेवप्रकाशिकाम् ॥
श्रीक्रमं ब्रह्मरुद्रादियामलानि कुलागमम् ।
शैषागमं सोमशम्भुमतं देव्यागमं तथा ॥
डामरं भूतपूर्वं च यक्षपर्वं च डामरम् ।
वैनायकीसंहितां च वैशम्पायनसंहिताम् ॥
अगस्त्यसंहितां तद्वद्बृहच्छ्रीक्रमसंहिताम् ।
सुरेन्द्रसंहितां चैव नन्दिकेश्वरसंहिताम् ॥
वशिष्ठसंहितां तद्वद्वायवीयां च संहिताम् ।
गोरक्षसंहितां तद्वत्सिद्धनाथाद्यसंहिताम् ॥
संहितां चैव वाराहीं महाथर्वणसंहिताम् ।
संहितां तत्त्वसाराद्यां दक्षिणामूर्त्तिसंहिताम् ॥

विष्वक्सेनीसंहितां च तथैव ब्रह्मसिंहताम् ।
निबन्धेषु क्रियासारं त्रिपुरासारसंग्रहम् ॥
प्रपञ्चसारं सिद्धान्तसारं मन्त्रमहोदधिम् ।
शारदातिलकं चापि पुरश्चरणचन्द्रिकाम् ॥
मन्त्ररत्नावलीं तद्वदाचारकुसुमावलीम् ।
संग्रहेषु प्रसिद्धेषु ताराभक्तिसुधार्णवम् ॥
आगमाद्यां कल्पलतां मन्त्ररत्नाकरं तथा ।
क्रियासंग्रहनामानं ग्रन्थं सिद्धान्तसंग्रहम् ॥
कालीतत्त्वं तथा श्यामारहस्यं मन्त्रचण्डिकाम् ।
तारारहस्यवृत्तिं च दुर्गाभक्तितरङ्गिणीम् ॥
तन्त्रसारं तन्त्ररत्नं तन्त्रचिन्तामणिं तथा ।
तत्त्वसारं योगसारं श्रीरामार्चनचन्द्रिकाम् ॥
ग्रन्थं विधानमालाख्यं विधिमुक्तावलीमपि ।
नानाविधाः पद्धतीश्च तथोपनिषदोऽपि च ॥
ज्योतिःशास्त्रं शालिहोत्रं पुराणानि स्मृतीरपि ।
सम्यगालोक्य लोकानामुपकारविधित्सया ॥
महाराजधिराजेन सुरराजानुकारिणा ।
श्रीमत्प्रतापसिंहेन विद्याब्धेः पारदृश्वना ॥
संवत्सरे निशानाथवह्निनागधरा-१८३१ङ्किते ।
तपस्यर्जुनपक्षे हि तिथौ भास्करवासरे ॥
पुरश्चर्यार्णवो नाम ग्रन्थ एष विनिर्मितः ।
महोमहीपालगणोत्तमाङ्गस्रग्धूलिभिर्धूसरपादपद्मः ।
वीरो महादानमहाहवेषु प्रतापसिंहो नृपतिश्चकास्ति ॥

उन्मीलयन् स्वजनमानसमानसानि
संकोचयन् प्रतिनृपाननकैरवाणि ।
संमोदयन् सकलकोविदलोककोकान्
यस्य प्रतापसवितोदयते धरायाम् ॥
यस्य क्षोणिपतेः प्रतापतपने विभ्राजमाने परे
राजन्ते न महीक्षितः क्षितितले खद्योतपोतद्युतः ।
यत्कीर्त्तीन्दुमरीचिभिस्त्रिभुवने शुभ्रीकृते सर्वतः
श्यामत्वं द्विषतामकीर्त्तितिमिरस्तोमेषु विश्राम्यति ॥
यावल्लोकोपकारी रचयति दिनकृद्वासरानस्ततन्द्र-
श्चन्द्रो यावत् त्रियामाः कुमुदविशदया ज्योत्स्नयाऽलङ्करोति
यावन्नामानि विष्णोः प्रजपति जनता सन्ति भूतानि यावद्-
भूभर्त्तुस्तस्य कीर्त्तिः स्फुरतु वसुमती मण्डले तावदेषा ॥
यद्विष्णुं प्रवदन्ति वैष्णवगणाः शैवाः शिवं मन्वते
गाणेशा निगदन्ति दन्तिवदनं शौरा दिनेशं विदुः ।
चिच्छक्तिं कलयन्ति शाक्तनिवहाः साङ्ख्याः परं पूरुषं
ब्रह्माब्रह्मविदो वदन्त्यवतु वस्तद्दैव्यसिंहं वपुः ॥
बिभ्रत्यद्भुतभूतिभूतपवनोर्वैचित्र्यचित्रामृत-
स्रोतशालिनि सन्निबन्धनसरित्सम्भेदमभ्यर्हितम् ।
नव्येऽस्मिन् नरदेवनिर्मितपुरश्चर्यार्णवे द्वादशः
सद्युक्तिं स्फुटमौक्तिकोत्कररुचोत्तुङ्गस्तरङ्गो गतः ॥

इति श्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधबिरुदावलीविराजमानमानोन्नतश्रीमन्महाराजाधिराजश्रीप्रतापसिंहसाहदेवविरचिते पुरश्चर्यार्णवे ब्राह्मणादिमन्त्रपुरश्चरणपूर्वकयन्त्रस्तवकवचादिपुरश्चरणभेदनिरूपणं नाम द्वादशस्तरङ्गः समाप्तः ।

शुभमस्तु ।

पुरश्चर्यार्णवस्य ध्येयदेवताचित्राणि।



गणेशध्यानम् । (६३० पृ. २० पं.)



सूर्यध्यानम् । (६४० पृ. ९ पं.)



विष्णुध्यानम् । (६४३ पृ. १९ पं.)



मत्स्यध्यानम् । (६४६ पृ. ४ पं.)



कूर्मध्यानम् । (६४७ पृ. १९ पं.)



वराहध्यानम् । (६४८ पृ. १० प.)



नृसिंहध्यानम् । (६९२ पृ. २९ पं.)



वामनध्यानम् । (६६९ पृ. १९ पं.)



परशुरामध्यानम् । (६७१ पृ. ४ पं.)



रामध्यानम् । (६७६ पृ. १८ पं.)



बलरामध्यानम् । (६८३ पृ. २० पं.)



कृष्णध्यानम् । (६८९ पृ. ४ पं.)



बुद्धध्यानम् । (६९१ पृ. २६ पं.)



कल्किध्यानम् । (६९२ पृ. १२ पं.)



हयग्रीवध्यानम् । (६९२ पृ. १७ पं.)



शिवध्यानम् । (६९७ पृ. २१ पं.)



शरभध्यानम् । (७०४ पृ. १८ पं.)



कार्त्तवीर्य-(सहस्रार्जुन-)ध्यानम् । (७१० पृ. १६ पं.)



कालीध्यानम् । (७२७ पृ. १६ पं.)



ताराध्यानम् । (७८६ पृ. २ पं.)



षोडशी-(श्रीविद्या-)ध्यानम् । (७९९ पृ. १० पं.)



भुवनेश्वरीध्यानम् । (८०६ पृ. २९ पं.)



भैरवीध्यानम् । (८०९ पृ. २. पं.)



छिन्नमस्ताध्यानम् । (८१६ पृ. ४ पं.)



धूमावतीध्यानम् । (८२२ पृ. ९ पं.)



बगलामुखीध्यानम् । (८२६ पृ. १३ पं.)



मातङ्गीध्यानम् । (८२७ पृ. १६ पं.)



लक्ष्मीध्यानम् । (८३२ पृ. ९ पं.)



दशभुजादुर्गाध्यानम् । (९६३ पृ. २१ पं.)



शीतलाध्यानम् । (११२९ पृ. ११ पं.)

कृष्णा यन्त्रम् (पृ- ११४५ पं- १)



कार्त्तवीर्ययन्त्रम् (पृ- ११४६ पं-१)



वाराहयन्त्रम् (पृ. ११४१ पं. १६)



नृसिंहयन्त्रम् (पृ. ११४१ पं. १९)



बगला यन्त्रम् (पृ. ११५६ पं. २१)



रामयन्त्रम् पृ. ११४२ पं. ७)



४]

विघ्नराज - यन्त्रम् (पृ. ११४० पं. ९)



दुर्गायन्त्रम् (पृ. ११५९ पं. ५)



हयग्रीवयन्त्रम् (पृ· ११४५ पं· ६)



कल्कियन्त्रम् (पृ· ११४५ पं· ५)



६]

सूर्ययन्त्रम् (पृ· ११५० पं-२३)



वामनयन्त्रम् (पृ· ११६१ पं-२६)



कूर्मयन्त्रम् (११४१ पं· १४)



परशुराम यन्त्रम् (पृ· ११४२ पं-२



८

बलराम यन्त्रम् (पृ. ११४५ पं.-१)



विष्णुयन्त्रम् (पृ. ११४१ पं.-७)



तारायन्त्रम् (पृ-११५१ पं- ७)



षोडशी यन्त्रम् (पृ-११५२ पं- ७)



१०

शीतला यन्त्रम्

कर्णिका बाह्य भागे वै चाष्ट पत्रं सुशोभनम् ।
चतुर्द्वार समायुक्तं भूपुर च विरेखकम् ॥



शिव यन्त्रम् (पृ० ११४५ पं० १२)



मातङ्गीयन्त्रम्(पृ- ११५६ पं- २५)



धूमावतीयन्त्रम् (पृ- ११५६ पं- १६)



१२]

त्रिपुरभैरवीयन्त्रम् (पृ० ११५५ पं० २४)



मत्स्ययन्त्रम् (पृ० ११६१ पं० १०



छिन्नमस्तायन्त्रम् (पृ· ११५५ पं· १५)



लक्ष्मी यन्त्रम् (पृ· ११५७ पं· ११)



१४

शरभयन्त्रम्॥

त्रिकोणं विलिखेत् पूर्वं तद्बाह्ये तु दलद्वयम् ।
द्वादशारं तु तद्बाह्ये तद्बाह्ये तु नवास्त्रकम् ॥
सप्तास्त्रं चैव पञ्चास्त्रं भूपुरं च क्रमाल्लिखेत् ।
पावकादि पृथिव्यन्तं लिखेन्मन्त्रं यथा क्रमम् ॥
तद्बहिः कोणषट्केषु भागारभ्यमन्त्रं लिखे ।
खट् फट् जहि तथा छिन्धि भिन्धि हन्धि लिखेत् क्रमात् ॥
आकारादि क्षकारान्तं वेष्टये द्बिन्दु संयुतम् ।
महायन्त्रमिदं पुण्यं सप्तावरणकं परम् ॥



श्री चक्रम् (पृ. ११५३ पं. ८)



श्रीकाली यन्त्रम् (पृ॰ ११५८ पं॰ १२



भुवनेश्वरी यन्त्रम् (पृ॰ ११५४ प॰ २०)



SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8513

S.J.V.J. PRATISHTHAN
LIBRARY
Jangamawadimath, Varanasi